संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 138 पुष्पम्

श्रीजयदेवकृतं

# श्रीगीतगोविन्दम्

## चतुर्दशटीकासमेतम्

(तृतीयो भागः)




प्रधानसम्पादकः

प्रो. मुरलीमनोहरपाठकः

कुलपतिः

संकलकः

आचार्यः प्रफुल्लकुमारमिश्रः

सम्पादकः

प्रो. शिवशङ्करमिश्रः



शोध-प्रकाशनविभागः

श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः

नवदेहली-16

संस्कृतविश्वविद्यालय-ग्रन्थमालायाः 138 पुष्पम्

श्रीजयदेवकृतम्

# श्रीगीतगोविन्दम्

## चतुर्दशटीकासमेतम्

### ( तृतीयो भागः )

प्रधान-सम्पादकः
**प्रो. मुरलीमनोहरपाठकः**
कुलपतिः

संकलकः
**आचार्यः प्रफुल्लकुमारमिश्रः**
उपाध्यक्षः
महर्षिसान्दिपनीराष्ट्रियवेदविद्याप्रतिष्ठानम्
उज्जयिनी

सम्पादकः
**प्रो. शिवशङ्करमिश्रः**
शोधविभागाध्यक्षः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**
**( केन्द्रीयविश्वविद्यालयः )**
**नवदेहली-110016**

प्रकाशकः

**श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः**

बी–4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली–110016

© प्रकाशकाधीनः

प्रकाशनवर्षम् : 2023

ISBN : 978-81-87987-97-9

मूल्यम् : ₹ 3000.00 (भागचतुष्टयम्)

मुद्रकः

**डी.वी. प्रिन्टर्स**

97–यू.बी., जवाहरनगरम्, देहली–110007

# सूची



| | सर्गः | विषय | पृष्ठा |
|---|---|---|---|
| १. | नवमः सर्गः | मुग्धमुकुन्दः | ११ |
| २. | दशमः सर्गः | चतुरचतुर्भुजः | ५० |
| ३. | एकादशः सर्गः | सानन्दगोविन्दः | १३४ |
| ४. | द्वादशः सर्गः | सुप्रीतपीताम्बरः | २७९ |
| ५. | परिशिष्ट | पदभावार्थचन्द्रिकाटीका | ४११ |

# श्लोक:/प्रबन्ध: सूची


| | |
|---|---|
| ❖ **नवम: सर्ग:** | **११-४८** |
| IX.50 तामथ मन्मथखिन्नां रतिरसभिन्नां....... | ११-१५ |
| IX.I.18.1 हरिरभिसरति वहति मधुपवने..... | १६-१९ |
| IX.I.18.2 तालफलादपि गुरुमति सरणम्........ | २०-२२ |
| IX.I.18.3 कति न कथितमिदमनुपदमचिरम्...... | २३-२५ |
| IX.I.18.4 किमिति विषीदसि रोदिषि विकला...... | २६-२८ |
| IX.I.18.5 सजलनलिनीदलशीतशयने....... | २९-३० |
| IX.I.18.6 जनयसि मनसि किमिति......... | ३१-३३ |
| IX.I.18.7 हरिरुपयातु वदतु वहुमधुरम्...... | ३४-३५ |
| IX.I.18.8 श्रीजयदेवभणितमतिललितम्..... | ३६-३७ |
| IX.51 स्निग्धे यत्परुषासि यत्प्रणमति..... | ३८-४३ |
| IX.51 (क) सान्द्रानन्दपुरन्दरदिदिविषद्...... | ४४-४८ |
| ❖ **दशम: सर्ग:** | **५०-१३२** |
| X.52 अत्रान्तरे मसृणरोषवशामसीम..... | ५०-५४ |
| X.I.19.1 वदसि यदि किंचिदपि दन्तरुचिकौमुदी..... | ५५-६२ |
| X.I.19.2 सत्यमेवासि यदि सुदति.......... | ६३-६६ |
| X.I.19.3 त्वमसि मम भूषणं त्वमसि मम जीवनं..... | ६७-७० |
| X.I.19.4 नीलनलिनाभमपि तन्वि तव...... | ७१-७४ |
| X.I19.5 स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी....... | ७५-७८ |
| X.I.19.6 स्थलकमलगञ्जनं मम हृदयरञ्जनं......... | ७९-८३ |
| X.I.19.7 स्मरगरलखण्डनं मम....... | ८४-८८ |
| X.I.19.8 इति चटुलचाटुपटुचारु......... | ८९-९३ |
| X.53 परिहर कृतातङ्के शङ्कां त्वया..... | ९४-९९ |
| X.54 मुग्धे विधेहि मयि..... | १००-१०३ |
| X.54 (क) शशीमुखि तव..... | १०४-१०७ |

| | |
|---|---|
| X.55 व्यथयति वृथा मौनं...... | १०८-११२ |
| X.56 बन्धूकद्युतिबान्धवोऽयमधरः..... | ११३-१२० |
| X.57 दृशौ तव मदालसे..... | १२१-१२६ |
| X.57 (क) प्रीतिं वस्तनुतां हरिः..... | १२७-१३२ |
| ❖ **एकादशः सर्गः** | **१३४-२७७** |
| XI.58 सुचिरमनुनयेन प्रीणयित्वा..... | १३४-१३८ |
| XI.I.20.1 विरचितचाटुवचनरचनं..... | १३९-१४२ |
| XI.I.20.2 घनजघनस्तनभारभरे....... | १४३-१४६ |
| XI.I.20.3 शृणु रमणीयतरं...... | १४७-१५० |
| XI.I.20.4 अनिलतरलकिसलयनि करेण........ | १५१-१५३ |
| XI.I.20.5 स्फुरितमनङ्गतरङ्गवशादिव...... | १५४-१५८ |
| XI.I.20.6 अधिगतमखिलसखीभिरिदं........ | १५९-१६२ |
| XI.I.20.7 स्मरशरसुभगनखेन करेण........ | १६३-१६६ |
| XI.I.20.8 श्रीजयदेवभणितमधरीकृत........ | १६७-१७१ |
| XI.59 सा मां द्रक्ष्यति वक्ष्यति..... | १७२-१७८ |
| XI.60 अक्ष्णोर्निक्षिपदञ्जनं स्मरकथा....... | १७९-१८३ |
| XI.61 काश्मीरगौरवपुषामभिसारीकाणाम्....... | १८४-१८८ |
| XI.62 हारावलीतरलकाञ्चन....... | १८९-१९२ |
| XI.I.21.1 मञ्जुतरकुञ्जतलकेलि सदने..... | १९३-१९६ |
| XI.I.21.2 नवभवदशोकदलशयन......... | १९७-१९९ |
| XI.I.21.3 कुसुमचयरचितशुचिवासगेहे......... | २००-२०१ |
| XI.I.21.4 चलमलयवनपवनसुरभिशीते........ | २०२-२०४ |
| XI.I.21.5 मधुमुदितमधुपकुल......... | २०५-२०६ |
| XI.I.21.6 मधुरतरपिकनिकरनिनदमुखरे........ | २०७-२०९ |
| XI.I.21.7 विततबहुवल्लिनवपल्लवे........ | २१०-२१२ |
| XI.I.21.8 विहितपद्मावतीसुखसमाजे.......... | २१३-२१५ |
| XI.63 त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो..... | २१६-२२१ |
| XI.64 सा ससाध्वससानन्दं गोविन्दे लोललोचना..... | २२२-२२५ |

XI.I.22.1 राधावदनविलोकनविकसित........ २२६-२३२
XI.I.22.2 हारममलतरतारमुरसि........ २३३-२३६
XI.I.22.3 श्यामलमृदुलकलेवरमण्डल........ २३७-२३९
XI.I.22.4 तरलदृगञ्चलचलनमनोहर........ २४०-२४३
XI.I.22.5 वदनकमलपरिशीलन........ २४४-२४६
XI.I.22.6 शशिकिरणच्छुरितोदर........ २४७-२५०
XI.I.22.7 विपुलपुलकभरदन्तुरितं........ २५१-२५३
XI.I.22.8 श्रीजयदेवभणितविभवद्विगुणीकृत........ २५४-२५८
XI.65 अतिक्रम्यापाङ्गं श्रवणपथ..... २५९-२६२
XI.66 भजन्त्यास्तल्पान्तं कृतकपट..... २६३-२६८
XI.66 (क) जयश्री विन्यस्तैर्महित इव........ २६९-२७२
XI.66 (ख) सानन्दं नन्दसूनुर्दिशतु........ २७३-२७४
XI.66 (ग) सौन्दर्यैकनिधेरनङ्गललनालावण्य........ २७५-२७७
❖ **द्वादश: सर्ग:** **२७९-४०८**
XII.67 गतवति सखीवृन्देऽमन्दत्र..... २७९-२८४
XII.67 (क) प्रत्यूह: पुलकाङ्कुरेण........ २८५-२९०
XII.67 (ख) दोर्भ्यां संयमित:........ २९१-२९५
XII.I.23.1 किसलयशयनतले कुरु...... २९६-३०१
XII.I.23.2 करकमलेन करोमि........ ३०२-३०५
XII.I.23.3 वदनसुधानिधिगलितममृतमिव........ ३०६-३०८
XII.I.23.4 प्रियपरिरम्भणरभसवलितमिव........ ३०९-३१२
XII.I.23.5 अधरसुधारसमुपनय भाविनि......... ३१३-३१५
XII.I.23.6 शशिमुखि मुखरय......... ३१६-३१९
XII.I.23.7 मामतिविफलरुषा विकलीकृत......... ३२०-३२२
XII.I.23.8 श्रीजयदेवभणितमिदमनुपद......... ३२३-३२५
XII.68 माराङ्के रतिकेलिसंकुलरणारम्भे...... ३२६-३३२
XII.68 (क) तस्या: पाटलपाणिजङ्कितमुरा...... ३३३-३३९
XII.68 (ख) व्याकोशे: केशपाशस्तरलित...... ३४०-३४२
XII.69 अथ कान्तं रतिक्लान्तमपि...... ३४३-३४४

XII.69 (क) अथ सहसा सुप्रीतं...... ३४५-३४६
XII.I.24.1 कुरु यदुनन्दन चन्दन...... ३४७-३५१
XII.I.24.2 अलिकुलगञ्जनमञ्जनकं......... ३५२-३५४
XII.I.24.3 नयनकुरङ्गतरङ्गविकासनिरासकरे....... ३५५-३५७
XII.I.24.4 भ्रमरचयं रचयन्तमुपरि रुचिरं........ ३५८-३६१
XII.I.24.5 मृगमदरसवलितं ललितं कुरु........... ३६२-३६४
XII.I.24.6 मम रुचिरे चिकुरे कुरु मानद........ ३६५-३६८
XII.I.24.7 सरसघने जघने मम........ ३६९-३७१
XII.I.24.8 श्रीजयदेववचसि रुचिरे........ ३७२-३७४
XII.70 रचय कुचयो: पत्रं चित्रं...... ३७५-३७९
XII.71 यद्गान्धर्वकलासु...... ३८०-३८६
XII.71 (क) पर्यङ्कीकृतनागनायकफणा...... ३८७-३८९
XII.71 (ख) त्वामप्राप्य मयि स्वयंवरपरां...... ३९०-३९१
XII.71 (ग) साध्वी माध्वीक ! चिन्ता न...... ३९२-३९८
XII.72 श्रीभोजदेवप्रभवस्य...... ३९९-४०२
XII.73 इत्थं केलिततीर्विहृत्य...... ४०३-४०६
XII.74 स्वामिन्! भङ्गुरवा(या)लकं...... ४०७-४०८

❖ **परिशिष्ट (पदभावार्थ-चन्द्रिका-टीका) ४११-५८४**

# श्री गीतगोविन्दम्

## चर्तुदश टीकोपेतम्

(१) नारायणदाशकृत- सर्वाङ्गसुन्दरी
(२) राणाकुम्भकृत- रसिकप्रिया
(३) जगद्धरकृत- सारदीपिका
(४) शंकरमिश्रकृत- रसमञ्जरी
(५) लक्ष्मीधरकृत- श्रुतिरञ्जनी
(६) शुक्लध्वजनृपतिकृत- सारवती
(७) वनमालिभट्टकृत- सञ्जीवनी
(८) नारायणपण्डितकृत- पदद्योतनिका
(९) कृष्णपण्डितकृत- जयन्ती
(१०) धनञ्जय-धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)
(११) पूजारीगोस्वामीकृत- बालवोधिनी
(१२) लक्ष्मणकृत- रसिकरङ्गदा
(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी
(१४) श्रीकान्तमिश्रकृत-पदभावार्थचन्द्रिकाटीका

# ।। नवमः सर्गः ।।

## मन्दमुकुन्दः



# ।। नवम: सर्ग: ।।

। मन्दमुकुन्द: ।

**५०-तामथ मन्मथखिन्नां रतिरसभिन्नां विषादसम्पन्नाम्।**
**अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहसि सखी ।।५०।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४०।। अस्मिन् सर्गे कलहान्तरिता वर्ण्णनीया। तस्यास्तु स्वरूपमुक्तं **नायिका लक्षणे ;**

ईर्ष्या कलह निष्क्रान्तो यस्या: नागछति प्रिय:।
तस्यागमनदु:खार्त्ता कलहान्तरिता मता।।

अपिच–पादयो: पतिते कान्ते या च मानं न मुञ्चति।
तस्मिन् गतेऽतुतापार्त्ता कलहान्तरिता मता।।

अथ विशेषमाह। **रसपञ्चकमध्ये** क्रमेण व्याख्या, हरिचरितमनुचिन्त्य रतिरसाद्विरम्य श्रितविषादां राधां सख्युवाचेति विग्रह:। कीदृशां कलहान्तरितां कलहेन मानेनान्तरितां दूरीकृतामित्यर्थ:। तल्लक्षणं यथा -

प्राणेश्वरं प्रणयकोपभरेण भीतं
या चाटुकार मवधीर्य्य विशेष वाग्भि:।
सन्तप्यते मदन वह्निशिखासहस्रै-
र्वाष्पाकुला च कलहान्तरिता हि सा स्यात्।। इति।।५०।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।५०।। इदानीं प्रणयकोपाद्धरिमधिक्षिप्य कलहान्तरितत्वेनोपतप्यमानां राधां सख्याह, तामथेति। अथ सखी तामुवाच। किंभूताम्? मन्मथखिन्नाम्। पुन: किंभूताम्? संभोगरागेण भावशबलतां प्राप्ताम्। पुन: किंभूताम्? विषादसंपन्नाम्। पुन: किंभूताम्? अनुध्यातहरिचेष्टिताम्। पुन: किंभूताम्? कलहान्तरिताम्। तल्लक्षणं यथा, 'प्राणेश्वरं प्रणयकोपविशेषभीतं या चाटुकारमवधीर्य विशेषवाग्भि:। संतप्यते मदनवह्निशिखा-समूहैर्बाष्पाकुलेह कलहान्तरिता हि सा स्यात्'।। इयं पथ्या आर्या। तामथेत्यादिषु अनुकूलो नायक:। प्रौढधीरा मानवती नायिका। सखी दूती च।।५०।।

## (३) जगद्धरकृत- सारदीपिका

।।५०।। प्रणयकोपात् हरिमधिक्षिप्येदानीं कृत पश्चात्तापं सखी आह अथेति अथानन्तरं मङ्गलार्थं वा सखी तां राधाम् उवाचोक्तवती कीदृशीं तां मन्मथेन कामेन खिन्नां दीनां पुन: कीदृशी रतिरसेन भिन्नां रहिताम् अतएव विषादेन दु:खेन सम्पन्नां युक्ताम् अतएवानु वारं वारं चिन्तितं हरेश्चरितं पुरा विलासो यथा तां कलहेन प्रीति: कलहेनान्तरिताम् व्यवह्नितां अत्र कलहान्तरिता नायिकावर्ण्यते तल्लक्षणं भरतेनोक्तं प्राणेश्वरं प्रणयकोपभरेण लभ्यं तं चाटुकारमचिरादवधार्य पश्चात् सन्तप्यते मदनवह्निशिखा-सहस्त्रैर्बाष्पाकुलानुकलहान्तरितेति सा स्यादिति।।५०।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५०।। पूर्वसर्गे खण्डिताया राधायाश्चरितमुक्तम्। संप्रति पश्चात्तापयुक्तां तां सख्युवाचेत्याह, अथेति। अथ अनन्तरं कलहान्तरितां परुषवचनानन्तरं कृतपश्चात्तापां राधां रहसि एकान्ते सखी उवाच उक्तवती। कीदृशीम्? मन्मथेन कामेन खिन्नां दु:खिताम्। अत एव रतिरसेन श्रृङ्गाररसेन भिन्नां संगताम्। अत एव विषादसंपन्नामुद्वेग-सहिताम्। अत एवानुचिन्तितं स्मृतं हरेश्चरितं पुरा रहोविलसितं यया ताम्। 'भिन्नमन्यार्थवचने संगते दारिते स्फुटे' इति **विश्व**:। कलहान्तरिता चेयम्, 'प्राणेश्वर प्रणयकोपभरेण भीतं या चाटुकारमवधीर्य विशेषवाग्भि:। संतप्यते मदनवह्निशिखा-सहस्त्रैर्बाष्पाकुला च कलहान्तरिता हि सा स्यात्।।' इति।।५०।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५०।। अथ तस्या एव राधाया अवस्थान्तररूपकलहान्तरितनायिकात्वं वर्णयति। कलहान्तरितालक्षणं,

तु कोपात्क्रान्तं पराभूय पश्चाद्भागेन पीडिता।
श्वासाश्रु दैन्य चिन्ताद्यै: कलहान्तरिता मता।।

अथ श्रीकृष्णभर्त्सनानन्तरं सखी मन्मथेन मनसो मथन करेण कामेन खिन्नाम् अतएव रतिरसेन सुरताभिलाषेण भिन्नां विदारिताम् अतएव विषादेन सम्भोगाभाव-निबन्धनखेदेन सम्पन्नां समेतामतएव अनुचिन्तितं पुनरालोचितं हरे: श्रीकृष्णस्य चरितं निष्कारणस्वपरित्यागादिरूपं यया तादृशम् अतएव कलहेन श्रीकृष्णविषय प्रणयकोपे नान्तरितां श्रीकृष्णसकाशाद्व्यवहितां राधां रह: एकान्ते उवाच हितमाचचक्षे।।५०।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५०।। गतमानापि राधिका निजमानभङ्गभीरुः न प्रियाभिलषितं करोतीति सखी राधामनुनयति। तद्वर्णनाय प्रसङ्गमवतारयति। रहः एकान्ते तां राधाम् अग्रेतनगीत-प्रतिपाद्यां सखी उवाच उक्तवती। तां कथम्भुताम्? कलहान्तरितां कलहेनान्तरितां व्यवहितां कृष्णसमीपादन्यत्र गतामिति यावत्। तथा च कलहेनान्तरिता न त्वनुरागेणेति दर्शितम्। अतएव अथ अनन्तरं मन्मथेन खिन्नां पीडिताम्। अतएव रतेः श्रृङ्गारक्रीडायाः रस इच्छा, तया भिन्नां सम्बद्धाम्। रसशब्दोऽत्र इच्छावाची, अमृतरसप्रस्यन्द-साध्वीकभूरित्यत्रामृतं मोक्षस्तस्य रस इच्छेति प्रामाणिकव्याख्यानात्तत्र शक्तेः। अत एव इच्छायाः सत्त्वेन इष्यमानस्य सिद्धत्वाद्विषादेन दुःखेन सम्पन्ना महतीम् अत एव अनु पश्चात् चिन्तितहरिचरितां न तूक्तहरिचरितां सखीसमक्षं स्वयमेतच्चरितकथनेन मानापगमो व्यक्त एव स्यादिति भावः। नायिका चात्र कलहान्तरितैव। तल्लक्षणम्, 'प्राणेश्वरं प्रणयकोपविशेषभीतं या चाटुकारमवधार्य विकुप्यजाता। सन्तप्यते मदनवह्निशिखासहस्त्रैर्वाष्पाकुला तु कलहान्तरिता च सा स्यादि'ति।।५०।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५०।। निर्व्याजस्नेहसंयुक्ता प्रोक्ताऽपि परुषं वचः।
[३] अनुतप्ता सहचरीवाक्यात्सा [४]नवमे भवेत्।।

(अथेति।) अथेति मङ्गलमनन्तरं वा। रह एकान्ते तां श्रीराधां सख्युवाचोक्तवती। कीदृशीम्? मन्मथखिन्नां कामसन्तप्ताम्। पुनः कीदृशीम्? रतिरसभिन्नां सुरतशृङ्गाररसेन विदारितां अत एव विषादसम्पन्नां उद्वेगयुक्ताम्। पुनः कीदृशीम्? [५]अनुचिन्तितहरिचरितां अनुचिन्तितं ध्यातं हरिचरितं [६]कृष्णविलासो यया ताम्। पुनः कीदृशीम्? कलहान्तरितां [७] प्रीतिकलहेन व्यवहिताम्। कलहान्तरितेयम्,

या पादपतितं कान्त [८] मात्मनो गुणगर्विता।
निरस्य पश्चात्तपति कलहान्तरिता तु सा ।।५०।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५०।। अथेति। अथानन्तरं सखी तां राधां प्राहोक्तवती। कीदृशीं ताम्? मन्मथेन कामेन खिन्ना दीनाम्। पुनः [९] कीदृशीम्? रतिरसेन शृङ्गाररसेन भिन्नां रहितां अत एव[१०]मन्मथखिन्नाम्। पुनः [११]कीदृशीम्? विषादेन दुःखेन सम्पन्नाम्। पुनः [१२] कीदृशीम्? [१३] अनुचिन्तितहरिचरितां अनुचिन्तितं ध्यातं हरिचरितं कृष्णविलासो यया[१४]सा[१५]ताम्। कलहेन प्रीतिकलहेनान्तरितां व्यवहिताम्। अत्र कलहान्तरिता नायिका वर्ण्यते। लक्षणं[१६]**भरतोक्तम्,**

१.अमन्दमुकुन्दः-इ.फ.ग.ह.ज. २.रहः-अ.ब.पुनः-इ. ३.अनुत्तमा सहचरी वाक्यान् सा नवमेऽब्रवीत्-अ. अनुत्तमा सहचरी वाक्यान् सा नर्ममब्रवीत्-ब. ४.नवमेऽभवत्-इ.फ.ह.ज. ५.नास्ति-अ.ब.इ.फ.ग.ह.ज. ६.श्रीनन्दात्मजविलासो-ग. ७.प्रीतिकलन-अ.ब. ८.मामनो-अ.ब. ९.नास्ति-ड. १०,११.नास्ति-ड.ल.म. १२.नास्ति-क. १३.नास्ति-ड.क.ल.म. १४.नास्ति-ड.ल.म. १५.नास्ति-ड.क.ल.म. १६.नास्ति भरते.

प्राणेश्वरं प्रणयकोप[३]भरेण[४]भीतं
[५]या चाटुकारमचिरा[६]दवधार्य पश्चात्।
सन्तप्यते मदनवह्निशिखा[७]सहस्रै-
[८]र्बाष्पाकुला[९]नु कलहान्तरिते[१०]ति सा स्यात्।।

[११]भिन्नमन्यार्थवचने सङ्गते दारिते स्फुटे इति **विश्वः** (७०.१५)।।५०।।

**(९) कृष्ण पण्डितकृत- जयन्ती**

।।५०।। अष्टपदीमवतारयति, अथेति। अथ एवं परुषवचनावमानित गोविन्द-निस्सरणानन्तरं सखी कर्त्री मन्मथेन खिन्नां दुःखितां रतिरसेन भिन्नां वर्जितामित्यर्थः। अत एव विषादेन सम्पन्नां सम्पूर्णाम्। अनुचिन्तितं हरिचरितं कृष्णसंल्लापादिकं यया तां सञ्जातानुरागामित्यर्थः। कलहेन वाङ्निष्ठुरप्रयोगरूपेण अन्तरितां तां राधां पुनः उवाच। पुनरर्थात्कलहान्तरितालक्षणमुक्तम्-

कोपात्कान्तं पराभूय पश्चात्तापसमन्विता।
कलाहान्तरिता सा तु सूरिभिः परिकीर्त्यते।।

पूर्वसर्गे प्रत्यक्षसंल्लापानन्तरं सख्या वचनेन कृष्णगमनमनुमीयते। प्रायः कलहान्तरितायाः प्रत्यक्ष[१२]सन्निधिरेव वर्ण्यते।।५०।।

**(१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)**

।।५०।। अस्मिन् सर्गे कलहान्तरिता वर्णनीया। तस्याश्च लक्षणम्, ''पादयोः पतिते कान्ते या च मानं न मुञ्चति। तस्मिन् गतोऽनुतापार्ता कलहान्तरिता मता।।'' इति। तामथेति। अथानन्तरं सखी तां पूर्वोक्तां राधां रहः एकान्ते वक्ष्यमाणं प्राहेति योजना। किंविधाम्? मन्मथखिन्नामिति। मन्मथेन खिन्नां दुःखिताम्। पुनः किंविधम्? रतिरसभिन्नामिति। रतिरसेन रतिरसाद्वा भिन्नां रहिताम्। पुनः किंविधाम्? अनुचिन्तितेति। पूर्वोक्तात् परुषवचनात् पश्चाच्चिन्तितं हरेश्चरितं ययेति विग्रहः। अत एव विषादसम्पन्नां विषादेन समृद्धां श्रितविषादामित्यर्थः। पुनः किंविधाम्? कलहान्तरितामिति। कलहेन मानेन अन्तरितां व्यवहितामिति।।५०।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५०।। अथ प्रणत्यापि मानानपगमात् उपेक्षया आह। हरौ अन्तर्हिते सति अन्तरुत्सुकामपि वहिर्मानावकुण्ठितामालक्ष्य सखी प्राह; तामथेति। अथ अनन्तरं श्रीराधां सखी रह उवाच। कीदृशीं ? मन्मथेन खिन्नां यत: कलहान्तरितां तदवस्थां प्राप्तां अतएव रतिरसेन खण्डितां ततो विषादयुक्तां अतोऽनुवारं चिन्तितं हरिचरितं चाटूक्तिपादप्रपतनादि यया ताम्। 'या सखीनां पुर: पादपतितं वल्लभं रुषा निरस्य पश्चात्तपति कलहान्तरिता हि सा।।' इति कलहान्तरितालक्षणम्।।५०।।

## (१२) लक्ष्णकृत-रसिकरङ्गदा

।।५०।। कविरेवं श्रीराधाया: खण्डितावस्थां निरूप्य पुनस्तस्या: कलहान्तरितावस्थां वर्णयितुमुपक्रमते। तामिति। अथ कृष्णोपेक्षानन्तरं सखी हितोपदेशिनी वयस्या तां राधां रह: स्वगृहस्यैकान्तस्थले उवाच, वैमनस्यापहारि वचनं व्याजहार। कीदृशम्; मन्मथखिन्नां, धैर्याभिमानिमनांस्यतिमथताकामेन प्राप्तखेदाम्। अत एव रतिरसभिन्नां रतिक्रीडाभिलाषेण विदारिताम्, पुनश्च विषादसम्पन्नाम्। निजलघुतानुसन्धान-समुदितातिविषादवशीकृतचित्ताम्। पुनश्चानुचिन्तितहरिचरिताम्, अनु वारं वारं चिन्तितं, मनसि कृतं हरेश्चाटूक्तिपादपतनादिचरितं, यया सा, ताम्। अत एव कलहान्तरितां कलहान्तरितावस्थां प्राप्ताम्। एतल्लक्षणं यथा;

या सखीनां पुर: पादपतितं वल्लभं रुषा।
निरस्य पश्चात्तपति, कलहान्तरिता हि सा।। इति ।

अन्यच्च; कोपात् कान्त पराभूय पश्चात्तापेन पीडिता।
श्वासाश्रुदैन्यचिन्तावै: कलहान्तरिता मता' इति।।५०।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

५० - तामथेति ; अथ अनन्तरं मन्मथखिन्नां कामपीडितां विषादसम्पन्नां दु:खक्लिनाम् अनुचिन्तितहरिचरितां हरे: श्रीकृष्णस्य कार्यकलापं भूयोभूय: स्मरन्तीं कलहान्तरिता नाम नायिकादशां प्राप्तुवन्तीं श्रीराधां सखी रह: गोपनेन आह। कलहान्तरिता लक्षणं,
या सखीनां पुर: पादपतितं वल्लभं रुषा।
निरस्य पश्चात्तपति कलहान्तरिता हि सा।। इति।
अपरलक्षणं **कुम्भेनोद्धृतम्**। तद् यथा,

प्राणेश्वरं प्रणयकोपविशेषभीतं या चाटुकारमवधीर्य विशेष वाग्मी:।

सन्तप्यते मदनवह्निशिखासमूहे वाष्पाकुलेह कलहान्तरिता हि सा स्यात्।।

पथ्या आर्याच्छन्द:। अनुकुलोनायक:। प्रौढधीरा-मानवता-नायिका। **विश्वनाथस्तु,**

चाटुकारमपि प्राणनाथं रोषादपास्य या। पश्चात्तापमवाप्नोति कलहान्तरिता तु सा।।५०।।

।।अष्टादश: प्रबन्ध:/ गीतम्१८।।

।।गुर्ज्जरीरागयतितालाभ्यां गीयते।।

(केचन रामकरीरागस्य रूपकतालमिति आमनन्ति)

**१-हरिरभिसरति यहति मधुपवने।**

**किमपरमधिकसुखं सखि भुवने।।**

**माधवे मा कुरु मानिनि मानमये।। ध्रुवपदम् ।।१।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१।। किमुवाच राधां सखीत्याह। गुर्ज्जरी रागेण गीयते। हरिरिति। अये मानिनि ! माधवे मानं मा कुरु इति योजना। ''अये कोपे विषादे च सम्भ्रमे स्मरणेऽपि चेति **विश्व**''। माधवो मधुवंशोद्भव: भक्तिश्लेषात् श्रिय: पति:। कथं माधवे मानो न विधेय इति आह। हे सखि! मधुपवने वहति सति हरिरभिसरति, अत: कारणात् भवने अपरमधिकमुखं किमस्ति। हरिरभिसरतीत्याह।।१।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।१।। तदेव वक्ष्यमाणमाह, हरिरभीति। तत्र पूर्वं ध्रुव:। माधव इति। अये राधे मानवति! अनु च समर्थनायिकानाथे। इति ध्रुव:। अथ पदानि, हरिरिति। हे सखि राधे! भवने गृहे। 'अपरम्' इति सावधिको निर्देश:। अत: परमधिकं किं सुखम्? न किंचिदपीत्यर्थ:। अत इति किम्? यन्मधोर्वसन्तस्य पवने वहति वाति सति हरिरभिसरति स्वयमायाति।।१।।

## (३) जगद्धरकृत- सारदीपिका

।।१।। गुर्जरीराग: यतितालस्तु हरिरिति अये हे मानिनि! अभिमानवति राधे! माधवे कृष्णे मानम् अभिमानं मा कुरु माकार्षीरिति प्रार्थनायां लोट्। यत: मधुपवने वसन्तवायौ वहति। सति हरि: अभिसरति स्वयमेव त्वदीयां सङ्केतभूमिं मा गच्छतीति। हे सखिराधे भुवनेऽपि गृहेऽपि अपरम् अधिकसुखं किम् अपितु न किञ्चिदस्ति नायकस्य स्वयमागमनात्कोपो न युक्त इत्यर्थ:।।१।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। तदेव गीतेन कथयति, हरिरिति। गीतस्यास्य गुर्जरीरागो यतितालश्च। गीतार्थस्त, 'अये' इति संभ्रमे। हे मानिनि मानवति! माधवे लक्ष्मीपतौ मानं मा कुरु। लक्ष्मीपतिरपि त्वां प्रसादयत्यहो भाग्यमित्यवश्यं त्वया मानस्त्याज्य इति सूचनाय 'माधव' पादानम्। मृदुपवने वसन्तवायों वहति सति हरिः कृष्णोऽभिसरति त्वदीयसंकेतभुमिमागच्छति। हे सखि! भुवने त्रैलोक्येऽपरं कृष्णाभिसरणादन्योक्तिं सुखम्? अपि तु न किंचिदित्यर्थः। मधु क्षीरे जले क्षौद्रे मधे पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च जीवाशोके मधुद्रुमे ।। इति **विश्वः** ।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। उक्तप्रकारमेव स्फुटयति। हरिरित्यादि। रूपकतालेन गेयम्। तत्र माधवेत्यादि अये इत्यन्तं ध्रुवपदमिदम्। अये मानिनि! मानवति! माधवे लक्ष्मीपतौ हेतुगर्भविशेषणं त्वयाभिमाने क्रियमाणे त्वां परित्यज्य लक्ष्मीरूपऋक्मिणीमेव रन्तुं गमिष्यतीति भीत्युत्पादनार्थं इत्युक्तमित्यवगन्तव्यम्। मानमहं तस्य समीपं न गच्छामीत्यभिमानं मा कुरु। कुतो न कर्त्तव्यमित्याकाङ्क्षायामाह। हरिरिति। यतः कारणात् मधुपवने वसन्तपवमाने वहति सति हरिः सर्वतापहारी श्रीकृष्णः अभिसरति अनुसरति त्वामिति शेषः। हरेः अनुसरणेन किं फलं? तत्राह किमिति, हे सखि! राधे! अधिकं हर्य्यभिसरणसुखातिरिक्तमपरमन्यत्किं भवने गृहे भुवन इति क्वचित्पाठः। तदालोक इत्यर्थः सुखं न किमपीत्यर्थः। अथवा अपरम् अधिकं च किं सुखं भविष्यतीत्यर्थः। अतश्च मानं परित्यज्य योगीव परसौख्याय हरिमेवानुसर इति तात्पर्य्यम्।।१ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१ ।। अत्र गीतस्य गुर्ज्जरीरागः, रूपकतालः। रागलक्षणन्तूक्तमेव। सखी यदुवाच तदाह। अयेपदं कोपोक्तौ। अये मानिनि! माधवे मानं कोपं मा कुरु। अत्र मा लक्ष्मीस्तस्याः धवपदोपन्यासेन तस्य लध्मीर्जायेति भवत्या औदास्येन कृष्णस्य कापि न क्षतिभवत्येव परं शोच्यता भविष्यतीति ध्वनितम्। 'अये कोपे विषादे च सम्भ्रमे स्मरणेऽपि चे'ति। अनुनयेन केवला कोपोक्तिः समीचीनेति प्रियोक्तिपुरः सरमनुनयति, हरोति। हे सखि मृदुपवने मन्दवायौ वहति सति हरिरभिसरति। अभि सर्वतोभावेन सरति यातायातं करोति। भुवने अपरं किं सुखम् अपितु न किमप्यत्यर्थः। क्वचित्तु भवने इति पाठः। तत्र भवनेऽर्थात्तव अभिसरति गतायातं करोतित्यन्वयः। मृदुपवनस्यातिमादकत्वेन तव मानमङ्गो भविष्यत्येवेति मम वचनानदरो न सर्वथा विधेय इति सत्यं तेन ध्वनितम्।।१ ।।

*'मधुपवने' इति पाठ।

+'चाटुकारमवधीर्य' इति पाठ।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१ ।। गुर्जरीरागे रूपकताले।[१३] रागतालध्रुवपदलक्षणं[१४]पूर्वमेवोक्तम्। हरिरिति। अये [१५] हे मानिनि माधवे मधुप्रिये श्रीकृष्णे मानं मा कुरु सम्भोगविलम्बनं मा कार्षीरित्यर्थः। यतो मधुपवने वसन्तवायौ वहति सति ; हरिः सकलमनोहरः कामतापहरो वाऽभिसरति सति स्वयमेवा१ गच्छति हे सखि! भवने त्रैलोक्ये वैकुण्ठे वा [२] श्रीकृष्णालिङ्गनादपरमुत्कृष्ट[३]मधिकं सुखमस्ति (किम्) ? अपि तु न किञ्चि -[४] दित्यर्थः। अस्मादन्यत्कुत्सितं सुखमिति भावः।।१ ।।

१.मृदुपवने-इ. २.भुवने-इ. ३.विशेषभीतं-र.प्रि.(नि.सा.)४.भीतिं-ड.५.या चाटुकानन-चिरादवधार्य पश्चात्-ड.या चाटुकारमवधार्य पश्चात्-ड.या चाटुकारमवधार्य विशेषवाग्भि:-र.प्रि.(नि.सा)६.अवधीर्य-क.७.समूहै-र.प्रि.(नि.सा)८.बाष्पाकुलेह-र.प्रि.(नि.सा)९.तु-क.ल.म.१०.हि-र.प्रि.(नि.सा)११.अयं नैघण्टुकोद्धार: तालफलादिति पदव्याख्यान्ते दृश्यते-ड.ल.म.नास्ति-क.१२.सन्निधावेव-इ.१३.रागताललक्षणं-अ.ब.१४.पूर्ववत्-ग.१५.हे भामिनि-ग.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१ ।। हरिरिति। अस्य गुर्जरीरागः। अये हे मानिनि अभिमानवति राधे माधवे कृष्णे मानं अभिमानं मा कुरु मा कार्षीरिति प्रार्थनायां लोट्। यतः मधुपवने वसन्तवायौ वहति [५] सति हरिरभिसरति [६] स्वयमेव त्वदीयसङ्केत-[७]भूमिमागच्छति। हे सखि राधे भवनेऽपि गृहेऽपि अपरं अधिकं सुखम् [८] अतिशयसुखं किम्? अपि तु न किमपि। नायकस्य स्वयमागमनात्कोपो न युक्त इत्यर्थः। [९]मधु क्षीरे जले क्षौद्रे मद्ये पुष्परसे मधुः। दैत्ये चैत्रे वसन्ते च जीवाशोके मधुद्रुमे इति विश्वः (६६.११)।।१ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१ ।। हरिरिति। हरिः मृदुपवने मन्दमारुते वहति सति चलति सति अभिसरति; त्वामिति शेषः। हे सखि! भुवने एतदपेक्षयाऽपरं अन्यत् अधिकमुत्कृष्टं सुखं किम्? न किमपीति भावः। ध्रुवाया व्याख्यानेअये: इति कोमलामन्त्रणम्। मानिनि ईर्ष्याकृतकोपवति माधवे विषये मानं मा कुरु मा विधेहि। यद्वा मानः सन्मानः तदस्याऽस्तीति मानी तस्मिन्। इति माधवविशेषणम्। तादृशे गर्वरूपमानकरणात् अवमानं मा कुर्वित्यर्थः।।१ ।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। किमुवाच राधां सखीत्याह, हरिरिति। अये मानिनि! माधवे मानं मा कुर्विति योजना। माधवो मधुवंशे भवः। उक्तिश्लेषात् श्रियः पतिः। एतेन तव क्षतिः न तु

तस्येति भावः। ''अये कोपे विषादे च संभ्रमे स्मरणेऽपि च'' इति **विश्वः**। ''अयेऽव्ययं सानुनयामन्त्रणे स्मरणे भये'' इति **हट्टचन्द्रः**। कथं माधवे मानो न विधेय इत्याह, मधुपवन इति। मधुपवने वहति सति वसन्तवाते वाति सति। हरिरित्यत्र यदीत्यध्याहार्यम्। यदि हरिरभिसरति त्वामित्यर्थात्, तर्हि हे सखि! अपरम् अधिकं सुखं भवने किमस्ति? इतःपरमधिकसुखान्तरं नास्तीत्यर्थः। तथा च कृष्ण आलम्बनं वसन्तपवन उद्दीपनम्। एतयोः संयोगादत्र रत्युत्कर्षो भविष्यतीति तत् त्यागोऽनुचित इतिभावः।।१ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१ ।। अस्यापि रामकिरीरागयतितालौ किम् उवाच इत्याह माधवेत्यादिना। अये इति सम्वोधने। मानिनि माधवे मानं मा कुरू। माधव इति मधुवंशोद्भवे श्रिया महासंपतेः पत्यौ मानानार्हत्वमुक्तम्। कथं? वञ्चकेऽस्मिन् मानो न विधेय इत्याह मृदु पवने वहति सति हरिरभिसरति। हे सखि! भवने अतः परं अपरं सुखं किमस्ति? माधवाभिसरणादन्यत् सुखं नास्त्येव इत्यर्थः।।१ ।।

## (११) लक्ष्णकृत-रसिकरङ्गदा

।।१ ।। उक्तं गीतेन स्फुटयति, इदमपि रामकिरीरागेण गीयत इत्युक्तम्। हरिरिति, अये! मनःकन्दलनाय कोमलामन्त्रणम्। हे मानिनि! निरर्थकमानाभिभूतचित्ते राधे! माधवे, सकलसम्पदधिष्ठातृदेवताधिपतौ सर्वसौभाग्यसम्पन्ने इत्यर्थः। अतोऽसौ मानेनापरञ्जयितुं न युज्यते इति सूचितम्। मानं मिथ्याकल्पित दोषग्रहारूढं कोपं मा कुरु। मुञ्चेत्यर्थः। ननु वञ्चके कृतं मानं कथं मुञ्चामीत्यतः आह; हरिरिति। मधुपवने विरहिजनसन्तापकारिणि वसन्तानिले वहति सञ्चरति सति हरिः भुवनमनोहरः कृष्णः अभिसरति। मधुपवनहेतुकः त्वदनिष्टशंकया स्वयं च त्वद्विरहेण स्थातुमशक्तस्त्वत् कृतभर्त्सनादिकमपि अनालोच्य त्वामनुसरतीत्यर्थः। अनुसरतु नाम, तेन किं स्यादत आह, हे सखि! हितोपदेशविषयभूते! प्रियसमागमानुकूलः अयमनिलः, प्रियतमश्च त्वदेकाभिसरणपरः। अपरं भवने गृहे किमधिकं सुखं सम्पादयसि। अतो मानग्रहमपहाय प्रियमनुसर। अन्यथा वसन्तानिलोऽयमतिभयङ्करो भावीति भावः।।१ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

उक्तं गीयते स्फुटयति, इदमपि रामकेरीरागेण गीयत इत्युक्तम्। हरिरिति, अये! मनः कन्दलनाय कोमलामन्त्रणम्। हे मानिनि! निरर्थकमानाभिताचिते राधे! माधवे, सकलसम्पदधिष्ठातुदेवताधिपतौ सर्वसौभाग्यसम्पन्ने इत्यर्थः। अतोऽसौ मानेनापरञ्जयितुं न युज्जते इति सूचितम्। मानं मिथ्याकल्पितदोषग्रहारुढं कोपं मा कुरु। मुञ्चेत्यर्थः।

ननु वञ्चके कुतं मानं कथं मुञ्चमीत्यत: आह, हरिरिति। मधुपवने विरहिजनसन्तापकारिणि वसन्तानिले वहति सञ्चरति सति हरि: भुवनमनोहर: कृष्ण: अभिसरति। मधुपवनहेतुकत्वदनिष्टशंकया स्वयं च त्वद्विरहेण स्थातुमशक्तस्त्वत्कृतभर्स्यनादिकमपि अनालोच्य त्वामनुसरतीत्यर्थ:। अनुसरतु नाम, तेन किं स्यादत आह, हे सखि! हितोपदेशविषयभुते! प्रियसमागमानुकूल: अयमनिल: प्रियतमश्च त्वदेकाभिसरणपर:। अपरं भवने गृहे किमधिकं सुखं सम्पादयसि। अतो मानग्रहमपराय प्रियमनुसर। अन्यथा वसन्तानिलोऽयमतिभयङ्करो भावीति भाव:।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१।। हरिरभिसरतीति; हे सखि हरि: इदानीं कुञ्जं प्रत्यभिसरति। अत: तु तस्मै: अभिमानवशात् मानं मा कुरु। यतो हि इदानीं वसन्तकालस्य मलयमारुत: प्रवहति। त्वं अस्मिन् समये गृहं गन्तासि किं? गृहे इतोऽपि अधिकं सुखमस्ति वा? नास्तीति अर्थ: काकुक्त्या।।१।।

**२-तालफलादपि गुरुमतिसरसम्।**
**किं विफलीकुरुषे कुचकलशम्।। माध०।।२।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२।। तालफलादिति। कुचकलशं किमु विफली कुरुषे इति योजना। तालफलादपि गुरुं गुरुत्वात् पतनमचिराद् भावीति सूचितम्। पुन: कीदृशम्, अतिसरसम् अतिशयेन रसेन श्रृङ्गारादिना सहितम् अतिसरसम्। ''श्रृङ्गारादौ विषे वीर्य्यें गुणे रागे द्रवेरस **इत्यमर:**।।२।।

### (२) राणाकुम्भकृत- रसिकप्रिया

।।२।। अपि च, तालफलादिति। हे राधे! कुचकलशं किं विफलीकुरुषे? हरिकरतलस्पर्शविलासाभावाद्विफलमित्यर्थ:। तालफलादपि गुरुं कठिनं महान्तं च। पुन: कीदृशम्? अतिशयेन सरसम्।।२।।

### (३) जगद्धरकृत- सारदीपिका

।।२।। अपि च तालेति हे राधे! तालफलादपि काठिन्येन स्थौल्येन वर्त्तुलत्वेन च तालफलादपि गुरुम् अधिकं कुचकलशं स्तनघटं किं किमर्थं विफलीकुरुषे कृष्णहस्त व्यापार परिशीलना भावाद्वैफल्य मितिभाव:। कीदृशम् अतिसरसम् अतिशय रसयुक्तं तस्मिन् दृष्टे यूनां रसाविर्भावात् हृदयाल्हादकरमिति यावत्।।२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२ ।। किंच, तालेति। कुचकलशं कलशवत्पीनं मांसलं स्तनं किमिति विफलीकुरुषे ? कृष्णकरस्पर्शादेव कुचकलशयोः साफल्यं, तदभावे वैफल्यमिति भावः। तालफलापेक्षयापि गुरुं कठिनमतिसरसं च। रसः शृङ्गाराख्यस्तत्सहितम्। तालफलपक्षे रसो माधुर्यं तत्सहितम्। अतिदमर्दनेन वै रसप्रदत्वं भवति। अपरः कलशोऽपि पूर्णः सन्गुरुर्भवति। रसो जलं तत्सहितश्च भवतीत्यपि ध्वनितम्।।२ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२ ।। इतोऽपि माधवे मानमयुक्तमित्याह। हे सखि ! तालफलादपि गुरु पृथुलं कठिनम् अतएवातिसरसमत्यन्त मनोहरम्। अथवा रसेन श्रृङ्गारेण सह वर्त्तते इति सरसः, तमतिक्रान्तः अतिसरसः अत्यादय क्रान्ताद्यर्थे द्वितीययेति द्वितीयासमासः। स्वभावेन सरसं दृष्टिमनसोरावर्जकमित्यर्थः। एतादृशं कुचकलशं कुचकुम्भं विफलीकुरुषे किमु ? कोपेन हरिपरिरम्भणमनङ्गीकुर्वाणा त्वं युगलं निष्प्रयोजनं कुरुषे। अत्र विफलीकरणे अत्यन्तविरोधद्योतनाय कुचकलशयोः फलाकारवर्ण्णना गौरवमित्यवगन्तव्यम्। अतश्च माधवे मानं मा कुरुरित्यर्थः। विफलीकुरुषे इति पदद्वयं गतिरुहात्तत्पदातितेति भाषाकारवचनात् ।।२ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२ ।। पुनरुपदेशपुरःसरमनुनयति। हे सखि कुचकलशं विफलीकुरुषे किम् ? किमर्थं विफलीकरोषीत्यर्थः। कुचकलसमिति जात्यभिप्रायेनैकवचनम्। तथा चैतादृशोऽयं न वैफल्यमर्हतीति भावः। कीदृशम् ? तालफलादपि गुरुं महान्तम्। अन्यस्माद्विफलादेः किमिति अपेरर्थः। पुनः किम्भूतम् ? अतिसरसम् अतिशयितरससहितमित्यर्थः। अत्र कलसेन रुपितस्यापि तालफलेनौपमित्या यथा तत्र मार्दनेन रसातिरेकस्तथात्रापीति सूचितम्। यथा गुरूणामतिसरसानामपि तालफलानां परिणतौ पतनं भवतीति तथाऽयमपि पतिष्यतीति त्वरया कृष्णकरस्पर्शेन सफलं कुर्वित्यपि सूचितम्। तदुक्तम् -'न पुनरेति गतं चटुलं वय' इति।।२ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२ ।। अधिकसुखमेव प्रपञ्चयतितालेति। हे राधे ! त्वं कुचकलशं स्तनघटं किमर्थं विफलीकुरुषे निष्फलं करोषि। श्रीकृष्णकरसमर्पणाभावादित्यर्थः। कीदृशम् ? तालफलादपि तालफलापेक्षयाऽपि काठिन्यस्थौल्याभ्यां वर्तुलत्वेन चातिगुरुमधिकम्। पुनः कीदृशम् ? अतिसरसं अतिरसप्रदं शृङ्गाररससहितं वा। रतिविरामेऽपि [१] सरसोत्पादकमित्यर्थः। तालफलं भक्षणेन मादकमिदन्त्ववलोकनमात्रेणेति भावः।।२।।

१.आगच्छति सति-अ.ब. २.श्रीकृष्णालिङ्गनसङ्गमादपर-इ.फ.ग. ३.अधिकसुखं-फ.ज.४.अस्तीत्यर्थ:-ग.५.नास्ति-ड.६.नास्ति-ड.ल.म.७.भूमिं गच्छति-क.८.नास्ति-ड.९.अयं नैघण्टुकोद्धार: तालफलादिति पदव्याख्यान्ते दृश्यते-ड.ल.म. नास्ति-क.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२।। तालेति। हे राधे! तालफलादपि काठिन्येन स्थौल्येन वर्तुलत्वेन च तालफलादपि गुरुमधिकं कुचकलशं? स्तनतटं किमिति विफलीकुरुषे;[२] कृष्णहस्तव्यापारशीलनाभावात्। कीदृशं [३] कुचकलशम्? अतिसरसं असि(ति)रसयुक्तम्। [४]तस्मिन् दृष्टे यूनां रसाविर्भावात् हृदयाह्लादकरमिति यावत्।।२।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। तालेति। त्वं तालफलात् तृणराजफलात् गरु विपुलं अतिसरसं कान्तिरूपरसाधिकं कुचौ कलशाविव कुचकलशं; जातावेकवचनं द्वित्वाभिप्रायकम्; किं विफलीकुरुषे व्यर्थं करोषि। कुचकलशस्य साफल्यं तावत्कान्तालिङ्गनं तन्न करोषीति वैयर्थ्यम्। अत्र कुचकलशेत्यत्र वर्तुलत्वरूपधर्मस्य इव शब्दस्य च उपमितिसमासेन लोपात् धर्मवाचकलुप्तोपमा। तालफलादुपमानादाधिक्यकथनात् व्यतिरेकालङ्कार:। उपमानाद्यदन्यस्य व्यतिरेक: स एव स: इति लक्षणात्। अतिगौरवसरसत्वं उत्कर्षहेतुरुक्त इति हेतूक्ति:। हेतोरुक्तावनुक्तौ इति **काव्यप्रकाशात्**।।२।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। तालफलादिति। कुचकलशं स्तनकुम्भं किमु कथं विफलीकुरुषे निष्फलम् माकार्षी: इति योजना। किमु निषेधो मन्तव्य:। विफलीकरणमपि सम्भावयामीत्यर्थ:। ''किमु सम्भावनायां स्यादमर्षे च किमु स्मृत:'' इति विश्व:। किंविधम्? तालफलादपि गुरुं पीवरम्। गुरुत्वात् पतनमचिरात् भवतीति सूचितम्। यद्यपि संयोगवेगप्रयत्नाद्यभावे गुरुत्वात् पतनमिति संयुक्तस्य पतनं सम्भवति तथापि पतनशब्देनात्र भङ्ग्या अधोमुखत्वं सूचितम्। पुन: किंविधम्? अतिसरसमिति। रसेनानुरागेण सहिता ये पुरुषास्ते सरसा:। अतिशयिता: सरसा यस्मात् तम् अतिसरसम्। यद्वा तं पश्यतां यूनां रागोत्पत्ति: स्यादिति कृत्वा अत्यन्तरागास्पदमिति भाव:। तालफलं गुरु सद्रवञ्च भवति। अयं तस्मादपि गुरु: सरसश्च भवति। अयं व्यतिरेकालङ्कार:। अन्योऽपि अतिशयेन जलसहितकलश: गुरुर्भवति। पूर्णकलशस्य फलदायकत्वेन सफलीकरणमनुचितमिति ध्वनि:। श्रीकृष्णकरस्पर्शेन इमम् अविफलं कुर्विति च गलितार्थ:। ''शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रस:'' **इत्यमर**:। ''रसो जले रसो.....लोभे कार्यसिद्धौ वृक्षादिप्रस....नम्'' इत्युत्पलिनी।।२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। सुखमस्तु येन मम किमिति चेत् स्तनाभ्यामाभ्यां किमपराधमिति सोत्प्रासमाह। कुचलकलशं किमर्थं विफलीकुरुषे? यतस्तालफलादपि गुरुं श्रेष्ठं तथा सरसं रसशास्त्रोक्तलक्षणसहितम् अतस्तदनुभवं विना अस्य विफलीकरणं न युक्त-मित्यर्थः ।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। मानधनायाः किन्तेन इति चेत्तर्हि तव कुचाभ्यां किमपराद्धमिति सोत्प्रासमाह, तालफलादिति ।कुचसादृश्यसौभाग्यवतां फलानां मध्ये श्लाघनीयं यत्, तालफलं, तस्मादपि गुरुमुत्कृष्टं कुचकलं किमु विफलीकुरुषे। निष्फलं करोषि। श्रीकृष्णसम्भोग-फलस्य तत्करस्पर्शाद्यभावेन विफलीकरणमनुचितमिति भावः। कीदृशमतिशयेन सरसं रतिविरामेऽपि कृष्णतृष्णाद्योतकमित्यर्थः। किंवा यावन्ति वस्तूनि सरसानि विद्यन्ते, तान्यतिक्रान्तमित्यर्थः।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। तालफलेति; तव कुचकलशं स्तनकुम्भौ किमर्थं मोघी करोसि? यतो हि तव कुचौ तालफलादपि अत्यन्तमधिकं रसयुक्तं भवति। हरिकरतलेन तत् सरसं गुरु नाम कठिनम् अतिशयेन सरसं सफली भविष्यति। उक्तञ्च **कालिदासेन** प्रियेषु सौभाग्यफला हि चारुता।।२।।

**३-कति न कथितमिदमनुपदमचिरम्।**
**मा परिहर हरिमतिशयरुचिरम्।। माध० ।।३।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३।। हे सखि! अनुपदं प्रतिपदं कतिवारात् अचिरं निकटे इदं तव प्रियं न कथितम्। सर्वं मद्वचः कथितमात्रेण त्वया क्रियते। अधुना कथं विलम्बसे, अतः कारणान्मगवचसा हरिं किंभूतम् अतिशयेन रुचिरं मनोहरम् अतिशयरुचरिम्। हरिशब्दस्यार्थमाह। दर्शनमात्रेण मनो हरतीति हरिस्तम् तादृशस्य परिहरणमनुचितमेव।।३।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।३।। अपि च,कति नेति। हे सखि! अतिशयरुचिरं हरिं मा परिहर ।इदं वचनमचिरं सांप्रतमनुपदं स्थाने स्थाने कतिवारं कथितम्।।३।।

## (३) जगद्धरकृत- सारदीपिका

।।३।। ननु यदा हरिरागतस्तदा त्वया न कथितमित्यत आह कतीति हे राधे ! इदम् अनुपदं स्थाने अचिरं साम्प्रतं कतिवारान्मया न कथितं किन्तु बहुकथितमेव किं तदित्यत आह त्वम् अतिशयरुचिरं अतिकमनीयं हरिं कृष्णं मा परिहर मावज्ञासीरीति मा त्यज।।३।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३।। ननु यदा हरिरायातस्तदा त्वयापि नोक्तमित्यत आह, कति नेति । इदमचिरं सांप्रतमेवानुपदं स्थानं स्थानं प्रति मया कियन्न कथितम्? अपि तु बहु कथितम् । इदं किम्। हरिमतिशयरुचिरमतिशयेन मनोहरं मा परिहर मोपेक्षस्व।।३।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३।। कतीति। हे सखि! अतिशयेनाधिक्येन रुचिरं रमणीयं लोकोत्कृष्टसौन्दर्य्य-सम्पन्नमित्यर्थः। एतादृशं हरिं मा परिहर मा त्यज। इदं पूर्वोक्तमर्थजातमनुपदं प्रतिक्षणं समनन्तरमेव अचिरमविलम्वं यथा तथा कति कतिबारं न कथितं नोक्तम्। अतो माधवे मानं मा कुरु इत्यर्थः ।।३।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३।। ननु भवत्या च तदानीं किमपि नोक्तमिति भवत्येवाभियोप्य इत्याशङ्क्याह, हे सखि! अचिरं साम्प्रतं मया अनुपदं प्रतिक्षणमेव इदं कति न कथितमपितु बहु कथितमित्यर्थः। 'पदं व्यवसिति त्राणस्थःनलल्म्याङ्घ्रिवस्तुषु'। अनुपदमिति पदे पदे। वीप्सायामव्ययीभावः। इदं किमित्याह, हरिं कृष्णं मा परिहर न त्यज। अत्याज्यता-प्रयोजकविशेषणमाह, अविशयरुचिरम् अतिशयेन रुचिरं मनोहरमित्यर्थः। तथा च नाहमप्रयोज्येति वाक्यार्थः।।३।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३।। (कतीति।) इदमचिरं साम्प्रतं अनुपदं [५]कतिवारं न कथितम्। हरिं मा परिहर मा त्यज। कीदृशम्? अतिशयरुचिरं [६]अतिमनोहरम्। पुनः कीदृशं [७]हरिम्? अचिरं [८]विलम्बासहम्। पुनः कीदृशम्? अनुपद्यते[९] स्त्रीसमूहैरन्विष्यत इत्यनुपदम्।।३।।

१.रसोत्पादक-ज.श्रीकृष्णहस्तव्यापारपरिसेचनाभावात्-क.कृष्णहस्तव्यापार-परिशीलना-भावात्-ल.म. ३.नास्ति-ड.ल.म. ४.यस्मिन्-क. ५.कति न वारं कथितम्-अ.ब.कतिवारं किं न कथितम्-इ.फ.ग.ह.ज. ६.मनोहरम्-ग. ७.नास्ति-अ.ब. ८.विलम्बासहितम्-ग. ९.स्त्रीसहस्त्रे:समूहैर्वा-फ.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३।। कतीति। हे राधे! इदमनुपदं स्थाने अचिरं साम्प्रतं[१] कति कतिवारान् न कथितम्। किन्तु कथितमेव। किं तदित्यत आह, त्वं अतिशयरुतिरं अतिकमनीयं कृष्णं मा परिहर माऽवज्ञासीरिति।।३।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३।। कथितेति। अनुपदं प्रतिवचनं अचिरं शीघ्रं कथितकथितं वीप्सया अनेकवारं कथितं इदं वक्ष्यमाणं अतिशयरुचिरं अत्यन्तमोहनं हरिं मा परिहर मा मुञ्च। अधुनैव तमानयेति। द्वितीयकथितमुपदेशतया परिणमतीति अर्थान्तरसङ्क्रमितवाच्यत्वादुत्तमं काव्यम्।।३।।

## (९) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३।। न केवलमधुनेदमुच्यते। प्रागप्येतदुपदिष्टमितीत्थं स्वदोषं परिजिहीर्षुराह। कतिनेत्यादि। त्वां प्रति मया अनुपदं पदेपदे इदं वक्ष्यमाणं वचः अचिरमविलम्बं इदानीमेवेत्यर्थः। कति कति वारान् न कथितम्? अपितु बहुवारान् कथितमित्यर्थः। कतीति किमः संख्यापरिमाणे डति चेति डति प्रत्ययः। डति चेति षट्संज्ञायां तस्यां षड्भ्यो लुगिति शसो लुक्। कति वारानिति वारशब्दमध्याहृत्य योजनीयम्। किं तत् कथितमत्याह? हरिं मा परिहर न त्यज। किंविधम्? अतिशयरुचिरम्। अतिशयेन लावण्यवन्तं अथच अतिशयेन रुचिरम् अभिलाषप्रदम्। एतेनायं तव कामं पूरयिष्यतीति भावः। अत्र पक्षे रुचिरमिति रुचिं राति ददातीति रुचिरः। ''रालादाने'' इति धातुः।।७।।

## (११) पूजारी गोस्वामीकृत- बालबोधिनी

।।३।। तदुपदेशं विना इत्थं क्रियते इत्याह। इदम् अधुना एव अनुक्षणं कियद्वा न कथितं हरिं मनोहरणशीलं मा त्यज, यतो अतिशयेन सुन्दरम्।।३।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३।। पुनः साक्षेपमाह, कतीति। अचिरमविलम्बं कृष्णानुनयमुल्लंघ्य निर्गमनसमये एव इत्यर्थः। अनुपदं, वारंवारमिदं कति न कथितं, कियन्नोपदिष्टम्। इदमिति किम्, अतिशयरुचिरम्, त्वयी एव आयतां रुचिं प्रीतिमाददानं हरिं सर्वमनोहरं कृष्णं मा परिहर। परिहरन्ती पश्चाद् बहु तप्यन्ती सखीजनमायासयिष्यतीति कोपकवलितचित्तया त्वया नावधारितमिति भावः। 'अभिष्वङ्गे स्पृहायां च गभस्तौ च रुचिः स्त्रियाम्' **इत्यमरः**।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। कति न कथितेति; हे सखि! अतिशयं रुचिरं सुन्दरं हरिं मा त्यज। वारम्बार त्वं तस्यानुसरणं कृता असि। इदानीं समीपस्थं तं न जहिहि परिहारं न कुरु। त्वं तु वारम्बारं तस्यै उपालम्भनं दत्तवती असि। पुनः एवं मा कुरु। स समीपेऽस्ति।।३।।

**४-किमिति विषीदसि रोदिषि विकला।**
**विहसति युवतिसभा तव सकला।। माध०।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। विकला सति किमिति विषीदसि किम्वा रोदिषि इति वाक्यार्थः। कथमेवंविधेयमित्याह। विहसति युवतिसमा तव सकलेति युवतिसभेत्येतत्सभाराजे-त्यादिना क्लीवत्वं नास्त्येव अमनुष्यपूर्वत्वात् अराजपूर्वत्वाच्च सभाया इत्याह **धूर्तिदासः** तव समीक्षिताभिधानम्। सत्यश्वेवमाशालावेति क्लीवत्वमनिर्वार्य्यं स्यात्। अत्र केचिदाहुः युवतिकृता सभा युवतिसभेति मध्यपदलोपी कर्मधारयः इत्यनुवृत्तान्तः। वयमत्राचक्ष्महे। हे युवतीति राधासम्बोधनम्। हे युवति! राधे! तव तुल्यं सकला सभा विहसतीति वाक्यार्थः कथं सकलसभा विहसति तदुपदिशेत्याह।।४।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।४।। अपि च, किमितीति। हे सखि! इति अमुना प्रकारेण किं विषादं कुरुषेऽतिविकला सती किमिति रोदिषि? सकला युवतिसभा तव इति चेष्टितं हसति।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। एवं सुमुखीं प्रत्याह किमितीति विकला असावधानेन्द्रिया किमिति कस्मात् विषीदसि दुःखिता भवसि रोदिषि च क्रन्दसि मम दुःखनिराकरणात् इदानीं विषादरोदनञ्च व्यर्थमिति। सकला सम्पूर्णा युवतिसभा तरुणीसमाजः भवत्यविहसति उपहासं करोति तवेति कर्मण्यपीति केचिदिति षष्ठी।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। किमिति। त्वं किमिति किमर्थं विषीदसि विषण्णा भवसि? ननु नास्मि विषर्ण्णत्यत आह, रोदिषीति। विकला विह्वला सती रोदिषि रोदनं करोषि। अत एव सकला समस्ता युवतिसभा हरसीति भावः। यद्वा, इयं मानापनोदाय प्रणतमपि प्रियमुपेक्ष्य संप्रति रोदितीति मानपरिपाटीं न जानासि। सकला चतुःषष्टिकलासहिता युवतिसभा हसतीति भावः।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। किमितीति। हे सखि! राधे किमिति किमर्थं विषीदसि दुखमनुभवसीत्यर्थ:। विकला विकलचित्ता सती किमिति रोदिषि विषादरोदने त्याज्य इति भाव:। किमत्रमित्याशङ्क्याह विहसतीति। यत: सकला समग्रा सकल कलाभि: सम्पन्ना वा तव सम्वन्धिनी युवतिसभा अथवा तवेत्यत्र कर्मण्यपीति केचिदितिवचनात्। भजे शम्भोश्चरणयोरिति कर्मणि षष्ठी। अस्मिन् पक्षे युवतिसभायास्तदीयत्वं प्रकरणसिद्धम्। अत: प्रणयकोपात्कृष्णं पराभूय विषीदन्तीं त्वामवलोक्य सकलसखीजनो हसिष्यति, अतो माधवे मानं मा कुरु इत्यर्थ:। अथवा वर्त्तमानार्थो वा घटते ।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। विपक्षबाधकोपन्यासपुर:सरमनुनयति इति अनेन प्रकारेण विकला सती किं विषीदसि किमर्थ विषादं करोषि ? किं रोदिषि किमर्थं क्रन्दनं करोषि ? सकला समस्ता युवतिसभा तव कृते विहसति हास्यं करोति। 'सभा स्यात्सदने गोष्ठ्यां समूहेऽपि सभा मता।' तथा च विपक्षहास्यभीत्यपि मद्वचनानादरो न विधेय इति वाक्यार्थ:। अत्र सकलेति वचनाद्दासीसभं स्त्रीसममितिवत् युवतिसभमिति स्यात्। तत्र युवति सम्बाव्यपरतया व्याख्येम्। तथा च हे युवति! तव कृते सकला सभा विहसतीत्यन्वय इत्यवधेयम्।।

*'...कलशम्' इति पाठ।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। एवं श्रुत्वाऽश्रुमुखीमिवाह, किमिति। किमर्थं विषीदसि सन्तापं [२] प्राप्नोषि। [३] विकला [(४)] विगतकला [५] गतकौशला विह्वला वा सती रोदिषि। सम्प्रति [६] दु:खरोदनं व्यर्थमिति। सकला सर्वा युवतिसभा[७] तरुणीसभा समाजस्तव त्वां विहसति [८]विगतकौशलां त्वामुपहसतीति भाव:।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। किमितीति। विकला [(९)] असावधानेन्द्रिया त्वं किमिति[१०]कस्मात् विषीदसि दु:खिता भवसि रोदिषि च क्रन्दसि।[११] मदुक्तनिराकरणात् इदानीं विषादो रोदनञ्च व्यर्थमिति। सकला सम्पूर्णा युवतिसभा तरुणीसमाज: तव त्वां विहसति उपहसति। तवेति कर्मण्यपीति केचित् इति षष्ठी।।४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। किमितीति। विकला कान्तिहीना विह्वला किमिति किमर्थं विषीदसि विषादमाप्स्यसि। रोदिषि। सकला समस्ता युवतिसभा स्त्रीपरिषद् तव त्वां विहसति। अनुनयपरप्रियावमानेन मूर्खेति विहसतीति भाव:।।४।।

१.नास्ति-क. २.करोषि-अ.ब. ३.नास्ति-ग. ४,५.नास्ति-अ.ब. ६.दु:खं रोदनं च-इ.फ.ग.ह.ज. ७.तरुणीसमाज:-इ.फ.ग.ह.ज. ८.विहतकौशलां-इ. ९.अवसानेन्द्रिया-क. १०.कामात्-ड. ११.मदुक्ति-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। किमित्यादि। विकला सती कलाहीना वा किमिति विषीदसि ? किं वा रोदिषि इति वाक्यार्थ:। विषादरोदनयो: किमपि प्रयोजनं नास्तीति भाव:। प्रत्युत विहसति युवति सभा तव सकलेति। युवतिसभेत्यत्र सभाराजेत्यदिना क्लीबत्वं नास्त्येव। ''अराजपूर्वत्वादमनुष्यपूर्वत्वाच्च सभाया'' इत्याह **धृतिवास:**। तदसमीक्षिताभिधानं सत्यप्येवमशाला चेति क्लीबत्वमनिवार्यं स्यात्। अत्र केचिदाहु:। युवतिकृता सभा युवतिसभेति मध्यपदलोपी कर्मधारय:। तन्नात्रापि क्लीबत्वं नाशङ्कनीयम्। तत्पुरुषो नञ् कर्मधारयादित्यनुवृत्ते:। वयमत्राचक्ष्महे। हे युवतीति राधासम्बोधनम्। अत्र दीर्घेकारान्तो युवतिशब्द:। हे युवति ! राधे ! तव तुभ्यं सकला सभा हसतीति वाक्यार्थ:। विवक्षात: चतुर्थेऽर्थे षष्ठी। यद्वा तव सकला सभा त्वत्सम्बन्धिनी सकला गोष्ठी हसति त्वामिति शेष:। यद्यपि हसतीत्यनुचितं दु:खदशायां हासानौचित्यात् तथापि स्वेच्छया दु:खानुभवाद् विहसनमिति भाव:।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। एतत् श्रुत्वाश्रुमुखीं प्रत्याह-त्वमधुना किमिति विषीदसि ? विकला सती रोदिषि ? मा विषीद मा रोद इत्यर्थ:। कथं ? तव सकला प्रतिपक्षयुवतीसभा त्वन्मौग्ध्यदर्शने विशेषेण हसति।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। एवं सखीवचनोज्जृम्भितेन पूर्वावस्थासु कृष्णकृतप्रणयोपलालनस्मरणेनाश्रुभरितमुखीमतिव्याकुलां राधां सान्त्वयन्त्याह, किमिति, हे सखि ! किमिति कारणं विना प्रियतमे दोषमारोप्य विषीदसि, विषादं प्राप्नोषि। तथा विकला, व्याकुला, विगतकला वा सती रोदिषि। क्रन्दसि। पूर्वतोऽप्यधिकप्रणये प्रिये रोषेण दोषमारोप्य कथं दु:खितासीति भाव:। एवं त्वत् मौग्ध्यमालोक्य सकला, सकौशला, त्वच्छिद्रान्वेषणनिपुणा इत्यर्थ:। समस्ता वा युवतिसभा, विपक्षतरुणीसमाज:, तव त्वां विशेषेण हसति। कट्विङ्गितभाषणपूर्वमुपहसतीत्यर्थ:।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। किमितीति; सखि ! किमर्थं नायकाय रोदिषि क्रन्दसि पुन: विषीदसि विषादं कुरुसे। विकलाऽसि। विकला अति हृदयवैकल्यं दर्शयसि। त्वं किमिति रोदिषि।

कान्ते सम्मुखे काले सती इदानीं तव व्यवहारे सकलाः युवतयः युवतिसभा हसन्ति। तव व्यवहारपरिपाटी सर्वाभ्यः हासाय भवतीति।।४।।

**५-सजलनलिनीदलशीतलशयने।**
**हरिमवलोकय सफलय नयने।। माध०।।५।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।५।। सजलनलिनीदलशीलितशयने इति राधा सम्वोधनं, शाम्वपद्मपत्रैः शय्यां विरच्य किं तिष्ठसि नहीत्थमुपतापः शाम्यतीत्यर्थः। कथमुपतापः शाम्यतीत्याह। हरिमवलोकय सफलय नयने, इति अन्तः श्रृङ्गारसमाप्तौ तावन्नयनसुखमनु-भवेत्यर्थः।।५।।

**(२) राणाकुम्भकृत- रसिकप्रिया**

।।५।। अपि च, सजलेति। अत एव नयने सफलय ।।५।।

**(३) जगद्धरकृत- सारदीपिका**

।।५।। तर्हि किं करोमीत्यत आह मृदुनलिनी दलेन कोमलपत्रेण शीलिते कृते शयने शय्यायां स्थितं हरि कृष्णमवलोकय पश्य दर्शनान्नय नेत्रे सफलय सफलीकुरु ।।५।।

**(४) शंकरमिश्रकृत- रसमञ्जरी**

।।५।। तर्हि किमित्यत आह, सजलेति। हे सजलनलिनदलशीतलशयने! जलसहितानि यानि नलिनीदलानि कमलिनीपत्राणि तेषां शीतलं शयनं शय्या यस्यास्तादृशे! त्वं पुरःस्थितं हरिं कृष्णमवलोकय पश्य। अत एव नयने नेत्रे सफलय कृतार्थय। यद्वा, सजलेति सप्तमी। तथा च त्वया रचितं यत्सजलनलिनीदलशीतलशयनं तत्रोपविष्टं हरिमवलोकयेत्यर्थः। तथा च सत्कारपूर्वकं शयने उपवेश्य हरिं पश्येति भावः।।५।।

**(५) लक्ष्मीधरकृत- श्रुतिरञ्जनी**

।।५।। मृदुलेति। हे सखि! मृदुलानि कोमलानि नलिनदलानि कमलपलाशानि तैः शीलितं परिशीलितं परीतमिति यावत्। शीतलेति क्वचित्पाठः। तदा तापापनोदनाय पटुतरमित्यर्थः। एतादृशं यत् शयनं तस्मिन् हरिं श्रीकृष्णमवलोकय पश्य अवलोकनेन किं फलमित्याह। सफलयेति। नयने भवन्नेत्रे सफलाय साफल्ययुक्ते कुरु। यदि कोपं परिहाय कोटिकन्दर्परूपं श्रीकृष्णस्य दिव्यमङ्गलविग्रहं तदभ्यर्ण्णं गत्वा कुसुमशयनेन पश्यसि तर्हि नयनयोः जन्मैव वृथा स्यादित्यर्थः। अतश्च मानं मा कुर्वित्यर्थः।।५।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।। तथा सति किम्विधेयमित्याशंक्याह, सजलनलिनीदले जलसहितकमलपत्रे शीलितं कृतं शयनकर्म यया एतादृशि राधिके हरिं कृष्णम् अवलोकय पश्य। अतएव नयनेऽर्थात् स्वकीये सफलय फलसहिते कुरु। यद्वा नयने मम सफलय युवयोरनुरागावलोकितदर्शनेन सुखितं विधेहीत्यर्थः। तथा चैतादृशी त्वं स्वयं स्थितोऽयं हरिरेवमहमर्थयामीत्यत्रौदास्तं न युज्यत इति भावः। जगद्धरस्तु एवम्भूते शयने हरिमवलोकय इत्यन्वयमाह।।५।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।। [३] सजलेति। नलिनीपत्रसहितानि [४] यानि [५] जलानि तेषां शीलितमाश्रितं शयनं यया; तत्सम्बुद्धिः। अनेन तापाधिक्यं सूचितमित्रि [६]भावः। अथवेदृशे शयने हरिमागतमवलोक्य नयने [७] सफलय सफलीवुरुु। किमर्थं [८] मानाग्रहेण विरहसन्ताप[९]मनुभवसीति ध्वनिः (जनयसीति।) हे राधे! मनसि गरुखेदं महत्कष्टं किमिति जनयसि [१०] उत्पादयसि। तस्मान्मम वचनं वक्ष्यमाणं शृणु। कीदृशम्? अनीहितोऽनाकाङ्क्षितो भेदो वैरस्यं विरहो वा यत्र। यदि न करोषि[११] तदा वचनमपि तावच्छ्रृण्विति [१२] भावः।।५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। सजलेति। सजलेनार्द्रेण नलिनीदलेन कमलिनीपत्रेण शीलिते कृते शयने शय्यायां स्थितं हरिं कृष्णमवलोकय पश्य। [१३] दर्शनान्नयने नेत्रे सफलय सफले कुरु जनयसीति। हे राधे! त्वं [१४] मनसि गुरु महत् खेदं [१५]दुःखं किमिति जनयसि उत्पादयसि तस्मान्ममं वचनं वाक्यं शृणु आकर्णय। कीदृशं वचनम्? अनीहितः अनाकाङ्क्षितः भेदो विरहो येन। [१६]भवत्या हितमेव वचनं वदामीत्यर्थः अत एव शृणु।।५।।

१.शीलित-इ.ड.२.मनिहित-इ.३.हे सजलेति-इ.फ.ग.ह.ज.४.नास्ति-इ.फ.ग.ह.ज. ५.सजलानि-अ.ब.ध्वनिः-फ.ज.७.नास्ति-अ.ब.८.मानाग्रहणेन-इ.९.अनुभवतीति-फ.ज.१०.नास्ति-अ.ब.११.नास्ति-ग.१२.नास्ति-इ.फ.ग.ह.ज.१३.दर्शनान्नयने नेत्रे सफलय नेत्रे सफले कुरु-ड.दर्शनान्नयने नेत्रे सफलं कुरु-क.दर्शनान्तरं नेत्रे सफले कुरु-ल.म.१४.नास्ति-ड.१५.नास्ति-क.१६.भगवत्याः-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। सजलेति। सजलैर्जलयुक्तौः नलिनीदलैः शीलितं सहितं रचितमित्यर्थः। तस्माच्च तच्छयनं तस्मिन्। शीलितं शयनं ययेति सम्बुद्धिर्वा। हरिं माधवं अवलोकय

नयने सफलय। माधवावलोकनं विना नेत्रं व्यर्थमित्यर्थः। जनयसीति। मनसि गुरुखेदं महादुःखं किमिति जनयसि प्राप्नोषि। किं कर्तव्यमित्यत आह-अनिहितः निवर्तितः भेदः कलहकृतवियोगः येन तत् मम वचनं शृणु। श्रुत्वा तथा कुर्वित्यर्थः।।५ ।।

**(१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)**

।।५ ।। प्राप्तप्रणया दूती पुनराह, जनयसीत्यादि। किमितीति। किमर्थं गुरुखेदं महत्खेदं मनसि जनयसि नैवं विधेहि। किं करणीयमित्यत आह, मम वचनं शृण्विति। किंविधम्? अनीहितेति। न वाञ्छितो भेदस्तव कृष्णेन भेदो यत्र वचने तत्तथा। यद्वा अनीहितोऽचेष्टितो भेदस्तव च मम च परस्परबुद्धिभेदः। स्वपरलक्षणो यत्रेति श्रवणक्रियाविशेषणं वा।।५ ।।

**(११) पूजारी गोस्वामीकृत- बालवोधिनी**

।।५ ।। येथयं न विहसति तथोपदिश इत्याह। साम्बुजपत्रैः पद्मपत्रैर्रचितशय्यायां हरिमवलोकय। ततः किं स्यात्? नयने सफलय त्रिभुवने नयनमहोत्सवावलोकनात् अन्यत् फलं नास्तीत्यर्थः।।५ ।।

**(१२) लक्ष्मणकृत- रसिकरङ्गदा**

।।५ ।। एतदाकर्ण्य निजकरेणाश्रुमार्जनपूर्वं मनाक् अवलोकयन्ती किञ्चित् शान्ततामालोक्य सस्नेहमाह, मृदुलेति। अतिकोमलकमलपत्रैः शीलिते रचिते शयने तल्पे हरिं तापहारिणं कृष्णमवलोकय। तथा पश्यन्ती नयने तददर्शनसञ्जातवैफल्ये नेत्रे सफलय, कृतार्थय। तद्दर्शनं विना नयनयोरन्यत् फलं नास्तीति अर्थः। 'अक्षिन्वतां फलमिदं न परं विदामः' इत्याहुः।।५ ।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।५ ।। सजलेति; जलं शीतलं। नलिनी दलं पत्रम् जलवत् शीतलम्। पत्राणां शय्यायां शायिता त्वं हरिं दृष्ट्वा नयनं नेत्रं सफलीकुरु।।५ ।।

**६-जनयसि मनसि किमिति गुरुखेदम्।**
**श्रृणु मम वचनमनीहितभेदम्।। माध० ।।६ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।६ ।। प्राप्तप्रणया दूतीपुनराह। मनसि किमिति गुरुखेदं जनयसि, नैवं विधेहि। मम वचनमनीहितभेदं श्रृण्विति योजना। अनीहितभेदमिति अनभिमतभेदमच्छिदुर-मित्यर्थः।।६ ।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।६।। अपि च, जनयसीति। हे राधे! इत्येवं पूर्वोक्तप्रकारेण मनसि चित्ते महान्तं खेदं किं जनयसि? तर्हि किं किं विधेयमित्याशङ्क्याह, मम वचनं शृणु। किंभूतम्? अनीहितभेदम्। न ईहितश्चेप्सितो भेदः पार्थक्यं येन तत्तथा।।६।।

## (३) जगद्धरकृत- सारदीपिका

विचारयन्ती प्रत्याह हे राधे! त्वं मनसि गुरु महत् खेदं दुःखं किमिति जनयसि उत्पादयसि तस्मान्मम वचनं वाक्यं शुणु आकर्णय कीदृशं वचनम् अनीहितः अनाकाङ्क्षितो भेदो विरहीजन भवत्या हितमेव वचनं वदामीत्यर्थः अतएव श्रृणु ।।६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६।। जनयसीति। तस्मान्मनसि चित्ते गुरुखेदं महद्दुखं किमिति जनयसि? मम वचनं 'माधवे मानं मा कुरु' इति मम वाक्यं शृणु। कीदृशम्? अनीहितोऽनाकाङ्क्षतो युवयोर्भेद उपजाप एतादृशम्। तथा च मम वचनं युवयोः प्रीतिकारकं तदवश्यं त्वया श्रोतव्यमिति भावः। मया सह नाकाङ्क्षतं भेदं यथा स्यादेवं मम वचनं श्रृणु। इयं सखी मत्तोऽभिन्ना, मदनिष्टं न भवतीति बुध्या मद्वचनं शृण्विति भावः।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। जनयसीति। किञ्च हे सखि! आवयोर्मनसि अन्तरङ्गे गुरुखेदं प्रवलविक्षेपं किमिति किमर्थं किमर्थं जनयसि उत्पादयसि। किं तर्हि कर्त्तव्यम्? तत्राह। श्रृण्विति। अनीहितोऽन्यस्त अस्पष्टस्तिरष्कृत इति यावत् तादृशो भेदो युवयोर्वियोगावस्थारूपो यस्मिन् तादृशम्। उभयोरैक्यप्रतिपादकमित्यर्थः। तादृशं मम वचनं श्रृणु।।६।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६।। एतावत्कालं मया सन्तापित इति प्रथमं कथमहमेव प्रसन्ना स्यामिति राधाहृदयवैकल्यमाकलय्याह-इति अनेन प्रकारेण मनसि चित्ते गरुखेदं महद्दुःखं किं जनयसि किमुत्पादयसि? तथा सति किं कुर्य्यामित्याशंक्याह, मम वचनं श्रृशु, अर्थात् खेदशान्तये। कीदृशम्? अनीहितोऽनभिप्रेतो भेदो युवयोयत्र तत्। यद्वा अनीहितभेदम् अनभिप्रेतभेदं यथा स्यादेवं मम वचनं शृण्विति क्रियाविशेषणतया योज्यम्। तथा च नाहं तव भिन्नेत्यवधार्य्य ममोपदेशवचनमाकर्णय इति वाक्यार्थः।।६।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६।। (जनयसीति।) हे राधे! मनसि गरुखेदं महत्कष्टं किमिति जनयसि [१०] उत्पादयसि। तस्मान्मम वचनं वक्ष्यमाणं शृणु। कीदृशम्? अनीहितोऽनाकाङ्क्षितो

भेदो वैरस्यं विरहो वा यत्र। यदि न करोषि[११] तदा वचनमपि तावच्छृण्विति [१२] भावः।।६ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६ ।। जनयसीति। हे राधे! त्वं [१४] मनसि गुरु महत् खेदं [१५]दुःखं किमिति जनयसि उत्पादयसि तस्मान्ममं वचनं वाक्यं शृणु आकर्णय। कीदृशं वचनम्? अनीहितः अनाकाङ्क्षितः भेदो विरहो येन। [१६]भवत्या हितमेव वचनं वदामीत्यर्थः अत एव शृणु ।।६ ।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६ ।। जनयसीति। मनसि गुरुखेदं महादुःखं किमिति जनयसि प्राप्नोषि। किं कर्तव्यमित्यत आह, अनिहितः निवर्तितः भेदः कलहकृतवियोगः येन तत् मम वचनं शृणु। श्रुत्वा तथा कुर्वित्यर्थः ।।६ ।।

१ .मनो विधुरमतिवि लं-फ.ज. २ .तस्यास्ति-ग. ३ .कृष्णप्रणयनुबन्धः-इ.फ. ह.ज.कृष्णः प्रणयानुबन्धः-ग.४ .धने सुमानः-इ.ह.धने नु मान-फ.ज.५ .नास्ति-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

प्राप्तप्रणया दूती पुनराह, जनयसीत्यादि। किमितीति। किमर्थं गुरुखेदं महत्खेदं मनसि जनयसि नैवं विधेहि। किं करणीयमित्यत आह, मम वचनं शृण्विति। किंविधम्? अनीहितेति। न वाञ्छितो भेदस्तव कृष्णेन भेदो यत्र वचने तत्तथा। यद्वा अनीहितोऽचेष्टितो भेदस्तव च मम च परस्परबुद्धिभेदः। स्वपरलक्षणो यत्रेति श्रवणक्रियाविशेषणं वा।।६ ।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६ ।। एतद्श्रुत्वापि खिद्यन्तीं प्राह, मनसि गुरु खेदं किमिति जनयसि? नैव विधेयम्। मम वचनं शृणु। कीदृशं? अनीहितम् चेष्टितमनभिलषितमिति यावत्। प्रकृते तु अनीहितं विरहदुःखमेव तस्य भेदो यस्मात्तत्।।६ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६ ।। एवं प्रार्थनानन्तरं कोपकुटिलितकटाक्षेणात्मानं निरीक्ष्य चलदोष्ठतया परुषमिव किमप्यव्यक्त्तं कथयन्तीं राधां पुनराह, जनयसीति। मनसि रोषदूषिते चित्ते किमिति गुरुखेदं जनयसि। पूर्वं खलु बहुप्रार्थनया मामभिसार्य त्वयैव ईदृशी दशाऽऽपादितां। पुनर्महाकुहकस्य तस्य समयं नीत्वा किंवा सम्पादयिष्यसीति संशयोत्थं खेदं किमर्थं सम्पादयसि। मा सम्पादयेत्यर्थः मम त्वत्परमहितैषिण्या वचनं शृणु, निश्चितमवधेहि।

कीदृशम्, अनीहित:, असम्पादितो भेदो युवयोर्हृदयभेदो येन तत् । उभयो: सङ्गमसुखसम्पादकमित्यर्थ: ।।६ ।।

**( १ ३ ) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।६ ।। जनयसीति; हे सखि ! किमर्थ मनसि त्वच्चित्ते अतिशयदु:खभावं पोषयसि भो ! मम तावत् विहितवचनं तव हिताय ईप्सितां कथां श्रुणु ।।६ ।।

**७-हरिरुपयातु वदतु बहुमधुरम्।**
**किमिति करोषि हृदयमतिविधुरम् ।। माध० ।।७ ।।**

**( १ ) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।७ ।। किं ते वचनं श्रोतव्यं तदुपदिशेत्याह हरि: तव समीपं गच्छतु इति वाक्यार्थ: । वहतु वहुमधुरमिति बहु चाटुं करोत्वित्यर्थ: । किमिति करोषि हृदयमति विधुरमिति कृष्णचाटुना मोदमानं चित्तं न खेदयेत्यर्थ: ।।

न केवल मधुनेदमुच्यते । प्रागप्येतदुपदिष्टमितीत्थं स्वदोषं परिजिहीर्षुराह । श्रीजयदेवेन भणितं हरिचरितं कर्त्तृ रसिकजनं सुखयत्विति वाक्यार्थ: । वहतु बहुमधुरमिति बहु चाटुं करोत्वित्यर्थ: । किमिति करोषि हृदयमति विधुरमिति कृष्णचाटुना मोदमानं चित्तं न खेदयेत्यर्थ: ।।

न केवल मधुनेदमुच्यते । प्रागप्येतदुपदिष्टमितीत्थं स्वदोषं परिजिहीर्षुराह । श्रीजयदेवेन भणितं हरिचरितं कर्त्तृ रसिकजनं सुखयत्विति वाक्यार्थ: ।।७ ।।

**( २ ) राणाकुम्भकृत-रसिकप्रिया**

।।७ ।। अपि च, हरिरुपयात्वित । हे राधे ! हरिरुपयातु त्वत्समीपमायातु । बहु विस्तारं मधुरं चाटु वदतु । अनया रीत्या हृदयमतिविधुरं किं करोषि ? ।।७ ।।

**( ३ ) जगद्धरकृत-सारदीपिका**

।।७ ।। कीदृशं वचनमित्यत आह हरिरिति हरि: कृष्ण उपयातु त्वदन्तिकं आगच्छतु बहु मधुरं तवानुनय वचनं वदतु त्वं हृदयं मन: अति विधुरं अति विह्वलं किमिति करोषि न किञ्चित् प्रयोजनमित्यर्थ: ।।७ ।।

**( ४ ) शंकरमिश्रकृत-रसमञ्जरी**

।।७ ।। हरिरिति । हरि: कृष्ण उपयातु त्वदन्तिकं गच्छतु । बहुमधुरमतिसरसं यथा स्यादेवं वदतु । हृदयं स्वकीयं हृदयमतिविधुरमतिदु:खितं किमिति करोषि ? ।।७ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। हरिरिति। श्रोतव्यं वचनं किमित्याकाङ्क्षायामाह। हे सखि! हरिः श्रीकृष्णः उपयातु तव कुञ्जमध्यं प्रविशत्वित्यर्थः। नकेवलमुपगमनमपि तु हरिरेव बहुमधुरं तवात्यन्तहृदयङ्गमं यथा तथा वदतु। तव हृदयमतीवविधुरम् अत्यन्तविकलं किमिति किं निमित्तं करोषि। निरर्थकं हृदयकौटिल्यं परित्यज्य हरेर्भवदावासगमनमङ्गीकुरु। माधवे मानं मा कुर्वित्यर्थः।। श्रीजयदेवेति स्पष्टार्थमेतत्।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। तदेवाभिधत्ते। हरिः कृष्णः उपयातु तव समीपमायातु। बहु अधिकं मधुरं मनोहरम् अनुनयवचनमित्यर्थात् वदतु। हृदयं चित्तमित्यनेन प्रकारेणातिविधुर-मत्यन्तविकलं किङ्करोषि किमथङ्करोषीत्यर्थः। आह च 'विधुरन्तु परिश्लेषे विधुरो विकलेऽन्यवदि'ति। तवानुमतिमात्रमपेक्षणीयं स्वयमेव हरिस्तवानुनयं करिष्यतीति प्राथमिकस्वकीयप्रसादप्रकाशनमाशंक्य लज्जया हृदयं किं विकलं करोषीति वाक्यार्थः।।७।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७।। वचनमेवाह, हरिरिति। हरिर्मनोहर उपयातु तव समीपमागच्छतु किञ्च बहुमधुरं तवानुनयवचनं वदतु त्वं हृदयं [१] मनोऽतिविधुरमतिविह्वलं किमिति करोषि मानाग्रहेण। तद्यथा-

सौन्दर्यसारः सखि नन्दसूनु [२] स्तस्यापि राधा स्पृहणीयमूर्तिः।
तस्याश्च [३] कृष्णे प्रणयानुबन्धस्तस्याभिमानैक[४]धनेषु मानः।।इति।।७।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

कीदृशं [५]तव वचनमित्यत आह, हरिरिति। हरिरुपयातु आगच्छतु बहुमधुरं तवानुनयवचनं वदतु। त्वं हृदयं मनः अतिविधुरं अतिविह्वलं किमिति करोषि। न किञ्चित्प्रयोजन-मित्यर्थः।।७।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।७।। तदेवाह, हरिरिति। हरिः उपयातु ; मधुरं अनुनयवचनं बहु वदतु। ते न तव तापशान्तिर्भविष्यति। गृहागतं निस्सारितवती। हृदयमन्तःकरणं अतिविधुरं अत्यन्तशून्यं करोषि।।७।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। किं ते वचनं श्रोतव्यं तदुपदिशेत्याह, हरिरुपयात्विति। हरिस्तव समीपं गच्छतु इत्यर्थः। वदतु बहु मधुरमिति। बहुचाटु करोत्वित्यर्थः। इदं भिन्नपदमेकपदं वा।

किमिति करोषि हृदयमतिविधुरमिति । इह स्थित्वा हृदयमतिविधुरम् अतिशयेन विकलं किमिति किमर्थं करोषि ? कृष्णचाटुना मोदस्व चित्तं न खेदय इत्यर्थः ।।७।।

### (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७।। श्रोतव्यमेवाह, हरिरुपयातु समीपं यातु। वहु चाटु करोतु। हृदयमतिवञ्चितं किमिति करोषि। श्रीकृष्णस्य मधुर वचनेन मोदयस्व, चित्तं मा खेदय इत्यर्थः ।।७।।

### (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। किं तत्श्रोतव्यमिति भ्रूसंज्ञया श्रवणमभिनयन्तीं तामुन्मत्ताऽसि तव निर्मन्थन यामीति श्लाघापूर्वकमाह, हरिरिति। त्वच्चित्तविषादादिहरो हरिरुपयातु। त्वं यदि निजलघुतामाशंक्य गन्तुं नेच्छसि, तर्हि त्वत्समीपमागच्छतु। आगत्य किं करिष्यति, बहु मधुरं यथा तव मनोरञ्जनं स्यात्, तथा चाटुवादं वदतु । किमर्थं हृदयं स्वतः प्रसादशालिचित्तमतिविधुरं मानेनातिमलिनं करोषि। मा कुर्वित्यर्थः ।।७।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। हरीति; सखि हरिसमीपं त्वं तूर्णं शीघ्रं गच्छ। तस्मै मधुरावाणीं वद। तव हृदयमतिविधूरं जातम्। अतः शीघ्रं तत्समीपं गत्वा विरहावस्थायाः विनाशविधानं कुरु। तव हृदयं खिन्नम्। अतः किमेतत् विपरीतं करोषि ?

**८-श्रीजयदेवभणितमतिललितम्।**
**सुखयतु रसिकजनं हरिचरितम्।। माध० ।।८।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। न केवल मधुनेदमुच्यते। प्रागप्येतदुपदिष्टमितीत्थं स्वदोषं परिजिहीर्षुराह। श्रीजयदेवेन भणितं हरिचरितं कर्त्तृ रसिकजनं सुखयत्विति वाक्यार्थः। वहतु बहुमधुरमिति बहु चाटुं करोत्वित्यर्थः। किमिति करोषि हृदयमति विधुरमिति कृष्णचाटुना मोदमानं चित्तं न खेदयेत्यर्थः।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। अपि च, श्रीजयदेवभणितमिति। हरिचरितं रसिकजनं सुखयतु। किंभूतम् ? श्रीजयदेवभणितम्। पुनः किंभूतम् ? अतिललितम्। श्रुतिजातिग्रहलयसाम्यान्मनोहरम्। तथा च **संगीतराजे**, 'नट्टरागस्तृतीयाख्यस्तालो मध्ये क्वचित् क्वचित्। पदानां शोभयालापगुम्फानां गानहेतुकम्।। अन्ते पाटाः स्वरास्तेनास्तदन्ते पद्यगुम्फनम्। पद्यामन्दमुकुन्दद्यमकरन्दाभिधानवत्। प्रबन्धः प्रीतये गीतः श्रीपतेः कुम्भभूभुजा।।'

इति श्रीअमन्दमुकुन्दो नामाष्टादशः प्रबन्धः।। यदि कौतुकिनो गाने संगीते चातुरी यदि। रसकिाः कुम्भकर्णस्य शृण्वन्तु बुधसत्तमाः।।८।।

## (३) जगद्धरकृत-सारदीपिका

।।८।। श्रीजयदेवेति श्रीजयदेव भणितम् उक्तं हरिचरितं कर्तुः रसिकजनं कृष्णे भाविकं जनं सुखयतु सुखिनं करोतु कीदृशम् अति ललितं अतिमधुरं श्राव्यमित्यर्थः कीदृशं जनं सुविनीतम् अतिविनययुक्तं पाठे ।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।।श्रीजयदेवेति।श्रीजवदेवेन भणितं वर्णितं ललितं मनोहरं हरिचरितं रसिकजनं कृष्णभक्तिरसास्वादगृहीतं श्रृङ्गारादिरसास्वादपरं जनं सुखयतु आनन्दयतु।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।।श्रीजयदेवेति स्पष्टार्थमेतत्।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।।कीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति।श्रीजयदेवभणितं गीतं कर्तृ रसिकजनम्। रस इच्छा, स यस्यास्तीति स भवति रसिकः। तेन सामान्यत एव ऐहिकामुष्मिकं वा सुखमिच्छन्तम्, अत एव जनपदोपादानमपि। सुखयतु प्रीणातु। किम्भूतम्?हरिवलितं हरौ कृष्णो वलितं सम्बद्धम्।कलिवलिकाधेनु। तथा च हरिसम्बन्धादामुष्मिकसुखजनकत्वं दर्शितम्। पुनः किम्भूतम्? अतिललितं श्रृङ्गारादिरसेनातिमनोज्ञम्। एतेन ऐहिकसुखहेतुत्वं दर्शितम्। रसिकजनं श्रृङ्गारिजनमित्यन्ये।।८।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।८।। (श्रीजयदेवेति।) श्रीजयदेवेन भणितमुक्तं हरिचरितं रसिकजनं श्रीराधाकृष्णभक्तिभावनाचतुरं सुखयतु आनन्दयतु। कीदृशम्? अतिललितं [१] शृङ्गाररसस्निग्धमधुरवादादिगुणयुक्तम्। शृङ्गारप्रचुरा चेष्टा यत्र तल्ललितं विदुः इति।।८।।

[२]इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायामष्टादशः प्रबन्धः।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।८।।श्रीजयदेवेति।श्रीजयदेवेन भणितं उक्तं हरिचरितं कर्तृ रसिकजनं [३] भावुकजनं सुखयतु [४] सुखिनं [५] करोतु। कीदृशम्? अतिललितं अतिसुन्दरं सुश्राव्यमित्यर्थः।।८।।

[६]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायामष्टादशः प्रबन्धः।

### (९) कृष्ण पण्डितकृत-जयन्ती

।।८।। श्रीजयदेवेति। श्रीजयदेवस्य भणितं रचितं अतिललितं मृदुलं हरिचरितं (श्रीकृष्ण) चरित्रं रसिकः काव्यरसज्ञः स चासौ जनः तं सुखयतु ।।९।।

[७]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामष्टादशः प्रबन्धः।

१.शृङ्गारहारस्निग्धः-इ.शृङ्गारहासस्न्धिां-ग.शृङ्गारहासस्निग्ध-ह. २.नास्तीयं पुष्पिका-अ.ब.इ. फ.ग.ह.ज. ३.भाविकजनं-ड.नास्ति-क.ल.म.४,५.नास्ति-क. ६.इति अष्टादशसर्गः-ड.७.नास्तीयं पुष्पिका-इ.

### (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयदेवेत्यादि। श्रीजयदेवेन भणितं हरिचरितं कर्तृ रसिकजनं सुखयत्विति वाक्यार्थः। किंविधम्? अतिललितम् अतिमनोहरम्।।८।।

### (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।८।।श्रीजयदेव भणितं रसिकजनं सुखयतु। यतः हरेश्चरितं यत्र तत् अतएवातिललितम् ।।८।।

### (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। श्रीति। श्रीजयदेवेन भणितं हरिचरितमत एवातिशयेन ललितं रसिकजनं मधुरभक्त्यनुशीलनपरं सुखयतु।।८।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।।श्रीजयदेवेति; श्रीजयदेवस्येति कोमलं पद्यं भवतां सहृदयानां रसिकजनान् सुखयतु। सुखविधानं करोतु। अत्यन्तं सुखप्रदं भवतु।।८।।

**५१-स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि**
**द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन्प्रिये।**
**युक्तं तद्विपरीतकारिणि तव श्रीखण्डचर्चा विषं**
**शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः।।५१।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५१।। स्निग्धे! यत्परुषासि इति यस्मादनिष्ठुरे निष्ठुरासि इत्यर्थः, यत् प्रणमति स्तब्धासि इति यस्मात् प्रणये दण्ड़वत् स्तब्धा असि इत्यर्थः। यद्रागिणि द्वेषस्था असीति यस्मात् अनुरक्ते विरक्तासीत्यर्थः। यदुन्मुखे विमुखतां यात्यसीति यस्मादुन्मुखे प्रणयपराङ्मुखी। भूतासीत्यर्थः। तद्विपरीतकारिणि राधे यदेति वक्ष्यते तत्तेयुक्तमिति

वाक्यार्थ:। तं किमित्याह। श्रीखण्डेन चर्च्चेत्याह। चन्दनलेपो विषमिव उद्वेगजनक इत्यर्थ: शीतांशुस्तपन इति चन्द्र: सूर्य्यवत्तापकर इत्यर्थ:। हिमं हूतवह इति तुहिनं वह्निवत्तापक इत्यर्थ:। क्रीडामुदो यातना इति क्रीड़ा जनितहर्षा:। तीव्रवेदना इत्यर्थ:। ''यातना तीव्रवेदना **इत्यमर:**'' ।।५१ ।।

इति श्रीकविराज श्रीनारायणदासकृतायां श्रीगीतगोविन्दटीकायां सर्वाङ्गसुन्दर्य्यां-कलहान्तरिता वर्ण्णने मुग्ध मकुन्दो नाम नवमसर्ग: विवरणम्।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५१ ।। सखी तद्दुश्चेष्टितमनुवदन्ती तां राधां प्रति बोधयति, स्निग्ध इति। हे विपरीतकारिणि विपरीतकृतप्रतिकरणशीले ! यत्तव श्रीखण्डचर्चा चन्दनानुलेपो विषमिव भवति। यच्च शीतांशुश्चन्द्र: तपन इव भवति, यच्च हिमं नीहारो हुतवह इव भवति, यच्च क्रीडामुद: केलिप्रमोदास्तीव्रवेदना इव भवन्ति, एतद्युक्तम्। विपरीतं य आचरति यस्य सर्वं विपरीतमेव भवति। तदेव विपरीतमाचरणं दर्शयति, यत्तस्मिन्नपि तादृशप्रियकारिण्यपि हरौ स्निग्धे सस्नेहे परुषा रूक्षासि । सस्नेहे स्नेहराहित्यं वैपरीत्यम्। यच्च प्रणमति नतिशीले प्रिये स्तब्धासि। प्रणमत्यप्रवणत्वं वैपरीत्यम्। यच्च रागवति प्रद्वेषिण्यसि। अत्रापि तादृगेव वैपरीत्यम्। यच्च संमुखे प्रिये वैमुख्यं यातासि। संमुखे विमुखभावो वैपरीत्यम्। अत्र शार्दूलविक्रीडितं वृत्तम्। विरोधालंकार:।।५१ ।।

## (३) जगद्धरकृत-सारदीपिका

।।५१ ।। इदानीं प्रणतमपि प्रियातिरोषात्त्यजन्ती राधां निन्दन्ती सखी प्राह स्निग्ध इति। हे विपरीत कारिणि ! विपर्यय विधायिनि राधे ! त्वं स्निग्धे मधुरवादिनि तस्मिन्प्रिये कृष्णे यत्पुरुषासि निष्ठुरभाषिणी असि वर्तसे किञ्च तस्मिन् प्रिये प्रणमति सति विनययुक्ते सति यत्स्तध्बासि स्थाणुवत् स्थितासि यद्रागिणि सानुरागे प्रिये द्वेषस्थासि असन्तुष्ठासि यत् उन्मुखे सम्मुखे तस्मिन् प्रियोविमुखतां परावृत्त तां यातासि तस्मात् श्रीखण्डचर्च्चा-चन्दनकथा पित्वा विषमिवशीतांशु श्चन्द्रस्तपन: सूर्य इव हिमं तुषार: हुतवह: अग्निरिव क्रीडामुद: क्रीडासन्तोषा: यातना वेदना वृत्तियुक्तमेव योग्यमेव तव मदीय वचन विपरीतकारित्वात् विरोधालङ्कार: शार्दूलविक्रीडितं वृत्तम्।।५१ ।।

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकायां सारदीपिकायां मन्तमुकुन्दो नाम नवम: सर्ग:।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५१ ।। स्निग्ध इति। यद्यतो हेतो: स्निग्धे यस्मिन्प्रिये मधुरवचनै: स्नेहं प्रकाशयति सति परुषासि निष्ठुरभाषिण्यसि। यच्च प्रणमति तस्मिन्स्तब्धासि। यच्च रागिण्यनुरागवति

तस्मिंस्त्वं द्वेषस्थासि द्वेषमवलम्ब्य स्थितासि। यच्चोन्मुखे आलिङ्गनाय संमुखे तस्मिंस्त्वं विमुखतां यातासि पराङ्मुखतां गतासि। तद्धेतोर्हे विपरीतकारिणि! एतत्सर्वं विपरीतमेव। एतत्किम्? तव श्रीखण्डचर्चा चन्दनलेपो विषम्। यथा विषं भोक्तारं मूर्च्छयति तथा चन्दनलेपोऽन्येषां सुखदोऽपि त्वां मूर्च्छयतीति भावः। अथ च, शीतांशुस्तपनः सूर्यः। अन्येषां शीतलस्वभावोऽपि चन्द्रस्त्वयि तापप्रदत्वात्तपन इति भावः। हिमं तुषारोऽपि हुतवहोऽग्निः। अथ च, क्रीडामुदः सखीक्रीडाजन्या मुदः प्रमोदा यातनाः तीव्रवेदनाः। यस्तस्मिन्विपरीतमाचरति तस्य सर्वं विपरीतमेव भवतीति भावः। 'परुषं कर्वुरे रूक्षे स्यान्निष्ठुररवचस्यपि।' इति **विश्वः**। 'यातना तीव्रवेदना' **इत्यमरः**।।५१।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५१।। यदागतं हरिं न मानयसि तर्हि सकललोकसौख्यसम्पादकानां श्रीखण्डादीनां त्वद्विषयेऽसाघु कारित्वे न जनशोच्यमित्याह। स्निग्धे इति। हे विपरीतकारिणि! प्रतिकूलाचरणशीले। यत् यस्मात् कारणात् स्निग्धे त्वयि निष्कपटचित्ते तस्मिन् प्रिये श्रीकृष्णे परुषासि क्रूरहृदयासि यद् यस्मात्तस्निन्नेव प्रिये त्वां प्रणमति नमस्कुर्वति सति स्तव्धा निश्चलासि यत् यस्मात्तस्निन्नेव प्रिये अनुरागिणि त्वय्यनुरागवति सति द्वेषस्थासि तस्मिन् कोपाविष्टासि। यद् यस्मात्तस्मिन् प्रिये उन्मुखे त्वयि उन्मुखवति तस्मिन् विमुखतां वैमुख्यतां वैमुख्यमेव याता प्राप्तासि, तत्तस्मात्कारणादस्य सर्वेषु वाक्येष्वन्वयः। तव श्रीखण्डचर्च्चा मलयजलेपः विषं कालकूट वदनर्थकारीत्युक्तम्। तथा शीताशुः अमृतकिरणः तव तपनः शरीरतापकारी सूर्य्योजाः। तथा हिम नीहारस्तद्वद्देस्तत्कल्पो जातः इति इदमपि युक्तम्। तथा क्रीडा मुदः विनोदः सन्तोषः तव यातना तीब्रवेदनाकल्पाः इत्यपि च युक्तं तथा च क्ष्मापि सौख्यसमयाधःकृतः प्रभूणामिति न्यायेन महाप्रभुं स्निग्धत्वादिगुणसम्पन्नं भगवन्तं श्रीकृष्णं निष्कारुणं परिभूय तस्मिन्नेव पारुष्या चरणादिमहापराध कारिण्यास्तव सकलाह्लादकारिणा श्रीखण्डादिनापि सौख्याभावो युक्त इति भावः। अस्मिन्नपि कलहान्तरितैव नायिकामानस्य कलहजातत्वात्।।५१।।

इति श्रीगीतगोविन्दव्याख्यायां नवम सर्गः।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५१।। एतावताप्यनुनीय तां राधां विपक्षबाधकमुखैरप्यनुनयति हे विपरीतकारिणि विपरीतं विरुद्ध कर्त्तुं शीलं यस्या एतादृशि हे सखि! यत् यस्मात् स्निग्धे स्नेहवति तस्मिन् सकलकलादिकौशलमतिप्रिये कृष्णे पौरुषासि निष्ठुरासि। 'निष्ठुर'

परुषमित्यमरः। यद् यस्मात् प्रणमति नम्रे त्वं स्तब्धाासि अनम्रा भवसि। यद् यस्माद् रागिणि अनुरागभाजि प्रिये त्वं द्वेषस्थासि द्वेषवती भवसि। यद् यस्मादुन्मुखे सम्मुखे विमुखतां वैमुख्यं यातासि गतासि। तत्तस्मात्तव श्रीखण्डचर्चा चन्दनानुलेपो विषं तापकत्वात्। शीताशुः शीतकिरणः तपनः उष्णकिरणः तापकत्वात्। एवं हिमं तृषारो हुतवहो वह्निः दाहकत्वात्। क्रीडामुदः केलिप्रमोदाः यातनाः तीव्रवेदनाः। एतत् सर्वं युक्तं योग्यम्। 'यातना तीव्रवेदना' **इत्यमरः**। तथा च पूर्वं यद् विपरीतमाचरितं भवत्या तदेवैतानि विपरीतानि, अतोऽग्नेऽपि विपरीताचरणां नोचितमिति भावः। तस्मिन्नित्यत्र न नियमतो यत्पदमपेक्षते, केवलं सुभगादिषु न्यायेन यदित्यत्र बौद्धाधिकारफक्किकायां तथा दर्शनादिति।।५१ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५१ ।। गीतार्थं सङ्गृह्य श्लोकेनाह, स्निग्धेत्यादि। हे विपरीतकारिणि [१] विरुद्धकारिणि [२] तत्ततो हेतोस्त्वय्येतद्युक्तमेव। किं तत्? श्रीखण्डचर्चा चन्दनवार्ताऽपि तव विषमिव [३] गरलमिव दहति। किञ्च शीतांशुश्चन्द्रः [४] तपनः सूर्य इव सन्तापको भवति। किञ्च क्रीडामुदः [५]केलिप्रमोदाः यातनास्ती-व्रवेदना[६]प्रदाः। [७]कुतः एतद्विपरीतं[८]जातम्? तस्मिन् प्रिये[९] श्रीकृष्णचन्द्रे प्रणमति नमस्कुर्वति सति यतस्त्वं परुषाऽसि कठिनाऽसि, यतस्तब्धासि [१०] सगर्वाऽसि, यद्रागिणि सानुरागे [११] स्निग्धे प्रिये द्वेषस्थाऽसि असन्तुष्टाऽसि, यदुन्मुखे [१२] आलिङ्गनाय [१३] सम्मुखे विमुखतां पराङ्मुखतां याताऽसि [१४] इत्यर्थः।।५१ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५१।। वश्यं प्रियं कोपेन त्यजन्तीं राधां सखीदं [१५] प्राह, स्निग्ध इति। हे विपरीतकारिणि विपर्ययविधायिनि राधे त्वं स्निग्धे मधुरवादिनि तस्मिन् प्रिये कृष्णे [१६] यत्परुषाऽसि, यत्प्रणमति विनीते सति स्तब्धाऽसि दण्डवत् स्थिताऽसि, यद्रागिणि सानुरागे तस्मिन् प्रिये द्वेषस्थाऽसि असन्तुष्टाऽसि, यत् उन्मुखे प्रिये विमुखतां परावृत्तिं याताऽसि तत्तस्मात्कारणात् श्रीखण्डचर्चा चन्दनकथाऽपि तव विषमिव, शीतांशुश्चन्द्रस्तपनः सूर्य इव ; हिमं तुषारः हुतवहः अग्निरिव ; [१] क्रीडामुदः सन्तोषाः यातनास्तीव्रवेदना इति युक्तमेव योग्यमेव। तव मदीयवचनविपरीतकारित्वात्।।५१ ।।

[२] इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां मुग्धमुकुन्दो नाम नवमः सर्गः।।

१.विरुद्धविधायिनि-इ.फ.ग.ह.ज. २.तत्वतो हेतो:-ग. ३.नास्ति-अ.ब.ग. ४.नास्ति-अ.ब. ५.केलिप्रमोदयातना:-इ. ६.इव-अ.ब. ७.उत एतद्विपरीतं- -ग. ८.नास्ति-इ.फ.ग.ह.ज. ९.श्रीकृष्णे-इ.फ.ग.ह.ज. १०.स्निग्धे सानुरागे सगर्वाऽसि-इ.फ.ग.ह.ज. ११.नास्ति-इ.फ.ग.ह.ज. १२.नास्ति-अ.ब. १३.सन्मुखे-फ.ग.ह.ज.नास्ति-अ.ब. १४.नास्ति-इ.फ.ग.ह.ज. १५.प्रत्याह-ड. १६.यत्पुरुषादयुक्ताऽसि-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५१।। श्रीखण्डादे: सन्तापकत्वात् कथं कर्तव्यमित्याह, स्निग्धे इति। हे प्रिये हे राधे विपरीतकारिणि त्वं स्निग्धे इति। हे प्रिये हे राधे विपरीतकारिणि त्वं स्निग्धे स्नेहयुते तस्मिन् कृष्णे परुषाऽसि रूक्षाऽसीति यावत्। तस्मिन् प्रणमति सति नमस्कुर्वति स्तब्धाऽसि। अनुनयानङ्गीकारेण करध(च)रणालिङ्गनादिषु न नम्रासीति यावत्। तस्मिन् रागिणि सति द्वेषस्थाऽसि द्वेषजन्यकार्ये तिष्ठसीति द्वेषस्था द्वेषिणीति भाव:। यत् तस्मिन् उन्मुखे अभिमुखे सति विमुखस्य भाव: विमुखता तां वैमुख्यं चुम्बनादौ याताऽसि प्राप्ताऽसीति [३] तत्तस्मात्कारणात् हे विपरीतकारिणि उक्तरीत्या वैपरीत्यशालिनि तव विपरीतकारिण्या: श्रीखण्डस्य चर्चा लेपनं विषं भवति। शीतांशु: चन्द्र: तपन: सूर्य: अभवत्। हिमं स्रङ्मलयमारुतव्यजनादिशीतोपचार-समुदायरूपं हुतवह: वह्निर्भवति। क्रीडामुद: रतिप्रमोदसाधनसामग्रय: यातना: वेदनारूपा: भवन्ति इति तत्सर्वं युक्तम्। अत्र श्रीखण्डचन्द्रादेर्विषत्वाद्यारोपस्य विरुद्धत्वात् विरोधालङ्कार:। तल्लक्षणम्, ''विरोध: सोऽविरोधेऽपि विरुद्धत्वेन यद्वच:'' इति **काव्यप्रकाशे** (१०.२४)।।५१।।

[४]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां कलहन्तरितावर्णने मन्दमुकुन्दो नाम नवम: सर्ग:

१.क्रीडा:-ड.ल.म. २.इति श्रीगीतगोविन्दटीकायां पदद्योतनिकायां नवम: सर्ग-ड. ३.यत् तत्तस्मात्-इ. ४.इति गीतगोविन्दे कलहान्तरितावर्णने-इ.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५१।। विपरीतकर्मण: फलं विपरीतमिति प्रत्यापयन्नाह। स्निग्ध इति। यत् यस्मात् तस्मिन् प्रिये कृष्णे स्नेहवति अनिष्ठुरे सति त्वं निष्ठुरासीत्यर्थ:। यत् प्रणमति स्तब्धासीति, यस्मात् प्रिये प्रणते दण्डवत् स्थितासीत्यर्थ:। यद्रागिणि द्वेषस्थासीति यस्मात् प्रियेऽनुरक्ते विरक्तासीत्यर्थ:। यदुन्मुखे विमुखतां याता सीति यस्मात् प्रिये उन्मुखे पराङ्मुखीभूतासीत्यर्थ:। तत् तस्मात् विपरीतकारिणि राधे यदेतद् वक्ष्यते तत् ते युक्तमिति वाक्यार्थ:। तत् किमित्याह। श्रीखण्डचर्चेत्यादि। चन्दनलेपो विषमिव

उद्वेजकत्वात्। "चर्चास्थासकचित्त(न्त)यो" रिति विश्वः। शीतांशुस्तपन इति। चन्द्रः-सूर्यइव तापकत्वात्। हिमं हुतवहइति। तुहिनं वह्निरिव दाहजननात्। क्रीडामुदो यातना इति। क्रीडा जनितहर्षास्तीव्रवेदनाइत्यर्थः। "यातना तीव्रवेदना **इत्यमरः**" ।।५१ ।।

इतिश्री गीतगोविन्दटीकायां नवमसर्गविवरणम् ।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५१ ।। अथ तस्यामनुत्तरायां सेर्ष्यमेवाह स्निग्धे इति। तस्मिन् प्रिये निरुपाधिप्रेमानुवन्ध-वन्धुरे स्निग्धे चाटुवाक्प्रयोक्तरि यत् परुषासि निष्ठुरासि प्रणमति प्रणते स्तब्धासि दण्डवत् स्थितासि यद्रागिण्यनुरागयुक्ते द्वेषं यासि विरक्तासि, यदुन्मुखे त्वन्मुखा-वलोकनोत्सुके विमुखतां यातासि विमुखीभुतासि। हे विपरीतकारिणिः तदेतत्ते यद्विपरीतं यातं तद्युक्तमेव। तत् किमित्याह, चन्दनलेपो विषमिवोद्वेजकः तापापहारी चन्द्रः सूर्य्यवत्तापकः हिमं वह्निवद्दाहकं रतिजनकहर्षाः तीव्रवेदनाः विपरीतकृते विपरीतमेव फलं स्यादित्यर्थः।।५९ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५१ ।। एवमुपशान्त्विताऽपि तूष्णीं स्थितां राधामाक्षिपन्त्याह, स्निग्धेति। तस्मिन् त्वदेकवशतया प्रसिद्धे प्रिये, अकैतवप्रेमबन्धुरे श्रीकृष्णे सकरुणमनुनयति सति यत् यस्मात्त्वं परुषासि, रुक्षभाषणकठोराऽसि, ततो निजापराधमाशंक्य प्रणमति, त्वच्चरणे पतति सति, यतः स्तब्धासि, स्तम्भवन्निश्चला, अविनीताऽसि, ततोऽपि रागिणि, प्रौढानुरागशालितया क्रीतदासवत् विद्यमाने, यत् द्वेषस्थासि, दोषमारोप्य विरक्ताऽसि। ततश्च कियानसौ कोपः, क्षणिकः। मन्मुखविलोकनमात्रेणापयास्यतीति उन्मुखे सम्मुखावस्थिते यत् विमुखतां यातासि, विमुखीभूयावस्थितासि। हे विपरीतकारिणि । अनुकूले प्रतिकूलाचरणप्रवणे! तत् तस्मात् तवैतत् युक्तम्। समुचितमेव। किं तदित्यपेक्षायामाह, श्रीखण्डचर्च्चा, चन्दनालेपः, विषं कालकूटमिव, क्षोभकारी शीतांशुस्तुहिनकिरणस्तपनश्चण्डकर इव सन्तापकः। तथा हिमं तुषारः हुतवहो हुताशन इव दाहकः। क्रीडामुदो माधवीमाकन्दसन्तोलनमयूरनर्त्तनालोकनवीणावादन-रसिकव्याधूयनादिविनोदसुखानि यातनाः अतिक्रूरवेदना इव। स्मरणमात्रेणापि आतङ्कपादिका इत्यर्थः।।५१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५१ ।। स्निग्धे यत् परुषासि; सखी तदुच्चेष्टितां श्रीराधां प्रति वोधयति। हे स्निग्धे! स्नेहशीले! हे विपरीतकारिणि त्वं किमर्थं रुष्टा सती वामाचरणं करोषि? यत्तव

श्रीखण्डश्च चन्दनानुलेपः खलु गरलायते। शीतांशुचन्द्रः सूर्य इव ज्वालाप्रदःभवति। हिमकरका हुताशनमिव उत्तापायते। क्रीडामुदः केलिकलापः रतिक्रीडादयः यातनावत् कष्टं प्रयच्छन्ति। अपि च तव विपरीताचरणं कष्टाय भवति। कथमिति श्रीकृष्णचन्द्रस्य स्निग्धं कोमलवाक्यं प्रति तव परुषं कठोरवचनं। त्वयि प्रणमति श्रीकृष्णे त्वं स्तब्धासि किमपि च न वदसि। तच्च रागवती त्वं प्रद्वेषिण्यसि। प्रिये सम्मुखे वैमुखं तु विपरीतमेव तव व्यवहारः। सर्वं व्यत्यासेन परिणमते। शार्दूलविक्रीडितम्। विरोधालंकारः।।५१।।

**५१-क-सान्द्रानन्दपुरन्दरदिदिविषद्वृन्दैरमन्दादरा**
**दानम्रै र्मुकुटेन्द्रनिलमणिभिः सन्दर्शितेन्दिन्दिरम्।**
**स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं**
**श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे।।(पदद्योतनिका)।५१-क।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)**

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।५१- क।। इदानीं सर्गान्ते सर्वविघ्नोपशमनार्थं गोविन्दं प्रणमति-सान्द्रेति। श्रीगोविन्दपदारविन्दं वन्दामहे नमस्कुर्महे। किमर्थम्? अशुभस्कन्दाय अशुभनाशाय। किंविशिष्टम्? स्वच्छन्दं यथा स्यात्तथा मकरन्दसुन्दरा मकरन्दसदृशी गलन्ती या मन्दाकिनी गङ्गा तया सान्द्रं स्निग्धम्। अरविन्दे हि मकरन्दो भवति। तेन मन्दाकिनी उपमीयते इत्युपमालंकारः। पुनः किंभूतम्? सान्द्रानन्दा निबिडहर्षा ये पुरन्दरादि-दिविषदस्तेषां वृन्दैः मुकुटेन्द्रनीलमणिभिः संदर्शिता इन्दिन्दिरा मधुपा यत्र तत्तथा । अत्र चरणायोः कमलोपमा, मन्दाकिन्या मकरन्दोपमा, सुरवृन्दमौलीन्द्रनीलमणीनां भृङ्गोपमा। एवं चरणसरोजे मकरन्दजुषो नमत्सुरमौलिनीलमणि- व्याजेन भृङ्गा इव। किंविशिष्टैर्दिविषद्वृन्दैः? अमन्दादरात्प्रचुरादरवशतः आनम्रैः साष्टाङ्गप्रणिपातप्रवणैः। शार्दूलविक्रीडितम्।।५१-क।।

एवं कृत्वा द्वितयमथ नये सारमासाद्य तिस्रः
सम्यग्योगं चतुर्णां निपुणतरधिया पञ्च जित्वा विदित्वा।
षट्कं हित्वाथ सप्ताष्टकुलगिरिबलो गीतगोविन्दसर्गं
सूक्त्या कृत्वा निसर्गोज्ज्वलमिव नवमं कुम्भकर्णो जयीस्तात्।।

इति श्रीकुम्भकर्णविरचितायां गीतगोविन्दटीकायां (२) राणाकुम्भकृत-
रसिकप्रियायां कलहान्तरि-
तावर्णने मुग्धमुकुन्दो नाम नवमः सर्गः।

## (३) जगद्धरकृत-सारदीपिका (टीकानास्ति)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५१-क।। सर्गावसाने हृदयशान्त्यै कविर्मङ्गलमाशास्ते, सान्द्रेति। वयं श्रीगोविन्दस्य पदारविन्दं चरणसरोजं वन्दामहे नमस्कुर्महे। किमर्थम्? अशुभस्कन्दाय अशुभानां भक्तिप्रतिबन्धकांहसां स्कन्दाय नाशाय। तादर्थ्ये चतुर्थी। अत्र 'वयम्' इति बहुवचनं शिष्याद्यभिप्रायेण। पापनाशनसामर्थ्यं द्योतयति, स्वच्छन्दमित्यनेन। किंविशिष्टम्? स्वच्छन्दं यथा स्यादेवं मकरन्दवत् सुन्दरं यथा स्यादेवं गलन्त्याः स्रवन्त्या आकाश-गङ्गाया मेदुरं स्निग्धम्। तथा हियस्मान्निःसृता सुरसरित् विश्वं पावयति, किं वक्तव्यं तस्य सामर्थ्यमिति भावः। अरविन्दे हि मकरन्दो भवति, तेन मन्दाकिन्युपमीयत इत्युपमालङ्कारः। पुनः कीदृशम्? सान्द्रोऽतिनिबिड आनन्दो हर्षो येषां ते पुरन्दरादय इन्द्रादयो दिविषदा देवास्तेषां वृन्दैः समूहैरमन्दादरादादरातिशयात् आसमन्तान्नम्रैर्नति-युक्तैस्तैर्मुकुटेन्द्रनीलमणिभिः संदर्शिता इन्दिन्दिरा भृङ्गा यत्र तादृशम्। अनेन तद्वन्द्यत्व-मुक्तम्। अत्र चरणस्य कमलोपमा, मन्दाकिन्या मकरन्दोपमा, सुरवृन्दमौलिगतनील-मणीनां भृंगोपमा, एवमेव कमलरूपकता चरणस्योक्तो। तथा चात्र 'मन्दाकिनी' पदेन व्यापकतयाऽविरतप्रवाहरूपाच्च भगवतो यशो वर्णितम्।।५१-क।।

वात्स्यायनादिमतसंमतमत्र किं चिद्यत्कोषजातमथ शब्दनयप्रमेयम्।
यच्चाप्यलंकृतिरहस्यमलेखि तत्तच्चाम्नायमूलमिति सन्मतिभिर्विभाव्यम् ।।
इति श्रीशंकरमिश्रविरचितायां गीतगोविन्दटीकायां रसमञ्जर्यां।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५१-क।। विघ्नङ्कशया मध्येऽपि मङ्गलमाचरति। गां विन्दतीति गोविन्दः। तस्य पदारविन्दं पादपद्मम् अशुभस्कन्दाय अकल्याणशोषणाय वन्दामहे। स्कन्दिर गति-शोषणयोः। किम्भूतं पदारविन्दम्? स्वच्छन्दमप्रतिबन्धं यथा स्यादेवं मकरन्दसुन्दर-गलन्मन्दाकिन्याः पुष्परसवत् शोभनया गलन्त्या गङ्गया मेदुरं स्निग्धम्। 'मेदुरः स्निग्धशान्तयोः। मकरन्दः पुष्परस' **इत्यमरः**। अन्यस्मिन्नपि पद्मे मकरन्दो वर्तते, विष्णुपादपद्मे गङ्गेव मकरन्द इत्यर्थः। 'विष्णुपादार्घ्यसम्भूते गङ्गे' इति श्रवणात्। अपि किम्भूतम्? सान्द्रानन्दैः पुरन्दरादिदिविषद्वृन्दैः इन्द्रादिदेवसमूहैः आदरात् आ समन्तात् भावेन नम्रैः मुकुटे कीरिटे ये इन्द्रनीलमणयः तैः सन्दर्शिता इन्दिन्दिरा भ्रमरा यत्र। 'इन्दिन्दिरस्तु रोलम्ब' **इत्यमरः**। अन्यस्मिन्नपि पद्मे भ्रमरा वर्तन्ते, अत्र इन्द्रनीलमणय एव भ्रमरा इत्यर्थः। मन्दो मुकुन्दो यत्रेति व्युत्पत्त्या मन्दमुकुन्देति सर्गनाम।।५१-क।।

इति समस्तप्रक्रियाविगजमामहागजशुक्लध्वजविरचिलायां सारवत्यां गीत गोविन्दटीकायां मन्दमुकुन्दो नाम नवमः सर्गः।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५१-क।। सर्गान्ते हृदयशान्त्यै [४] मङ्गलमारचयति,सान्द्रेति। वयं [५] श्रीगोविन्दस्य चरणकमलमशुभस्कन्दाय [६] वन्दामहे भक्तिप्रतिबन्धकदुरितनाशाय वन्दामहे। कीदृशम्? स्वच्छन्दं स्वेच्छया मकरन्दवत्सुन्दरञ्च यथा स्यादेवं गलन्त्या [७] स्रवन्त्या मन्दाकिन्याऽऽकाशगङ्गया मेदुरं स्निग्धम्। (पुनः) [८] कीदृशम्? सान्द्रो निबिडो हर्षो येषां ते इन्द्रादयो दिविषदो देवास्तेषां वृन्दैस्समूहैः [९]अमन्दादरात् बद्धादरात् समन्तान्नम्रैर्नतियुक्तैर्मकुटेन्द्रनीलमणिभिः[१०] सन्दर्शितेन्दीवरम्।।५१-क।।

इति [११]श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[१२]शिवदासात्मजवनमालिभट्ट-विरचितायां[१३] वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां कलहान्तरितावर्णने [१४] मग्धमुकुन्दो नाम नवमः सर्गः।।

१.पद्यमिदं सव्याख्यं नोपलभ्यते-ड.ल.म.क. २.सन्दर्शितेन्दिन्दिरम्-इ. ३.नास्ति-अ.ब. अमन्दमुकुन्दोनाम-इ.फ.ग.ह.ज. ४.मङ्गलमाचरति-इ.फ.ग.ह.ज. ५.श्रीगीतगोविन्दस्य-अ.ब. ६.नास्ति-इ.फ.ग.ह.ज. ७,८.नास्ति-ग. ९.अमन्दादरादासमन्तान्नम्रैः-ग. १०.सन्दर्शिता इन्दिन्दिरा भ्रमरा यत्र तादृशम्-इ.फ.ग.ह.ज. ११.श्रीमत्-अ.ब. १२.श्रशिवदासपण्डितात्मज-ग.ह. १३.नास्ति-अ.ब. १४.अमन्दमुकुन्दो-अ.ब.इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५१-क।। सान्द्रेति। क्षेपकः। इन्दिन्दिरो भ्रमरः मकरन्दवत् पुष्परसवत् सुन्दरं यथा स्यात्तथा गलन्त्या मन्दाकिन्या वियद्गङ्गया मेदुरं स्निग्धमित्यर्थः। अशुभस्कन्दाय पापनाशाय। [१४]नागरश्चतुरः।।५१-क।।

## (९) कृष्ण पण्डितकृत- जयन्ती (टीकानास्ति)

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५१-क।। अथ श्रीकृष्णस्य राधिकां प्रति बक्ष्यमाण चाटूक्तिस्मरणेन श्रीराधिकामहिमस्फूर्त्त्यानन्दाविष्टः तत्सौभाग्यद्योतनाय श्रीकृष्णसौन्दर्य्यमाह, सान्द्रेति। श्रीगोविन्दस्य पदारविन्दमशुभानां भक्तिप्रतिवन्धकानां विनाशाय वन्दामहे। कीदृशं? बलेर्नियमान्निविड़ आनन्दो येषां तेषामिन्द्रादिदेवानां वृन्दैरधिकादरात् आनम्रैः मुकुटेन्द्रनीलमणिभिः सन्दर्शितः इन्दिवरं यत्र। तद् कुतो यतः स्वच्छन्दं यथा स्यात्तथा

मकरन्दवत् सुन्दरं यथा स्यात्तथा गलन्त्या आकाशगङ्गया स्निग्धं यसौकांशस्येदृङ्महिमा तेन श्रीकृष्णेन यच्चरणशिरोधारणं प्रार्थ्यते, तत्सौभाग्यं केन वर्णनीयमित्यर्थ:। अतएव श्रीराधाकामानोपशमनचिन्तया मुग्धो मुकुन्दो यत्र स इति।।५१-क।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

(........वृन्दैरमन्दादरा ......इति पाठान्तरम्)

अथ कविर्वर्णयिष्यमाणकृष्णकृतबहुविधचाटुवादै: राधासौभाग्यातिशयमनुस्मरन् तदुपोद्वलकतया तस्यैश्वर्यं दर्शयन् सर्गान्तं सूचयति। सान्द्रेति। श्रीगोविन्दस्य पदारविन्दम्, अशुभानां स्कन्दाय, उक्तिप्रतिबन्धकीभूतदुरितानां नाशाय वन्दामहे, अभिवादयाम:। कीदृशम्, बलिनियमनात् प्राप्तस्वस्वाधिकारतया सान्द्रो निविड आनन्दो येषामिन्द्रादिदिविषदां, शक्रप्रमुखदेवानां वृन्दै:, अत एवाधिक्यादरात्, आनम्रैरतिभक्तिवशात् प्रणमद्भि: कर्त्तृभि:, मुकुटस्थितेन्द्रनीलमणिभि:, किरणै: सन्दर्शिता इन्दिन्दिरा भ्रमरा यत्र तत्। प्रणामसमयसमुदितमुकुटखचितनीलमणिप्रकरप्रकटितानेकमधुकरसम्भ्रममित्यर्थ:। पुन: कीदृशम्, स्वच्छन्दं, स्वेच्छया मकरन्दवत् सुन्दरं यथा स्यात्तथा गलन्त्या मन्दाकिन्या स्वर्गङ्गया मेदुरं स्निग्धम् । यस्य चरणस्य ईदृग् महिमा, तेन कृष्णेन मम शिरसि पदपल्लवं धेहीति प्रार्थ्यते या, तस्या: सौभाग्यं किं वर्णयाम:, इति कवेर्हृदयस्थो भाव:।।५१- क।।

इति श्रीगीतगोविन्दे अमन्दमुकुन्दो नाम नवम: सर्ग:। अत एव श्रीराधायां
मानोपशमनस्पृहायाम् अमन्द: सोत्सुको मुकुन्दो यत्र सोऽयं सर्ग:।

।। इति रसिकरङ्गदाख्यायां श्रीगीतगोविन्दव्याख्यायां नवमसर्ग: समाप्त:।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५१-क।। सान्द्रानन्देति; गोविन्दस्य पदाब्जं वन्दामहे। नमस्कुर्महे। किमर्थं अशुभस्कन्धाय अमङ्गलं विनाशाय। किम्भूतं पादाब्जमिति ? यस्या: पादाब्जात् मकरन्दममृतं स्वर्गङ्गा च स्रवति। तस्मिन् पादयुगले इन्द्रादय: देवा: स्वस्य शिरोभूषणं नम्रंजनितंरत्नाशुं किञ्जल्किते नीलमणिभि: अङ्गुल्या इन्दीवरस्य भ्रम: जायते। अत्र **कालिदासस्य कुमारसम्भव**स्थितस्य पार्वतीकर्त्तृकस्य शिवमहिमाविवरणप्रसङ्गे उल्लिखितस्य श्लोकस्य साम्यमस्ति। तत् यथा,

असंपदस्तस्य वृषेण गच्छत: प्रभिन्नदिग्वरणावाहनो वृषा।
करोति पादावुपगम्य मौलिना विनिद्रमन्दाररजोरुणाङ्गुली।। (५/८०)

तथाभूतस्य पादयुगलस्य वन्दापनं सकलदु:खविघाताय प्रवर्तते। उपमालंकार:। शार्दूलविक्रीडितम् छन्द:।।


श्रीगुरुं सद्गुरुं नौमि पितामातामहेश्वरौ।
योगतन्त्रस्य साधनं सर्वं तयो: वितन्यते।।१ ।।
श्रीमाता जगदम्बिका हि विमला यस्या: कटाक्षेऽधुना।
यस्या: हास्यकलां विधत्ते सुतरां भूमौ भवेन्मण्डले
तन्मातृकृपाकटाक्षक्षरिता टीका तथा माधुरी।
स्वाद्य मोमुद्यते सुहृदततय: मीराप्रसादात्सदा।।२ ।।

श्रीरघुनाथस्य तनुजन्मन: श्रीकाशीनाथस्य तनयस्तथा श्रीप्रफुल्लकुमारस्य कृतीयं लोकानुबन्धनान् पुन: प्रणिनाय टिप्पणीयं मातृशक्ति प्रसादत:।।
इति श्रीप्रफुल्लमिश्रविरचितायां श्रीगीतगोविन्दस्य स्वर्णलताटिप्पण्यां श्रीराधायां मानोपशमनस्पृहायाम् अमनृमुकुन्दोनाम नवम: सर्ग:।।

❁ ❁ ❁

# ।। दशमः सर्गः ।।

## चतुरचतुर्भुजः



## ।। दशमः सर्गः ।।

### । चतुरचतुर्भुजः ।

**५२- अत्रान्तरे मसृणरोषवशामसीम-**
**निःश्वासनिःसहमुखीं सुमुखीमुपेत्य।**
**सव्रीडमीक्षितसखीवदनां दिनान्ते**
**सानन्दगद्गदपदं हरिरित्युवाच ।।५२।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५२।। अस्मिन् दशमे सर्गे मानिनी वर्ण्णनीया। मानस्य कलहजनकत्वात् कलहान्तरितत्वान्तरतायां मानिनी समाविशति। सम्भोगश्रृङ्गारमल्लयुद्धनिविड-गाढरागोरुस्फुटनिवद्धरणरागरञ्जितहृदयत्वात् चण्ड़चुम्बनापातविलिप्ताधररागात्तीक्ष्ण नखरालंकृतकलेवराल्ललाटिकाचुम्बन संक्रान्त नायिकोचितार्द्धनारीश्वरकामदेवे-तिलकत्वादनुमेय मानस्य व्यक्तिः। इह हि जयदेवो राधायाः चतुर्विधं मानं हृदि निधाय तदपनोदाय श्रीकृष्णस्य चाटुवचनद्वारेण वर्ण्णयितुमाह। अत्रेति। अत्रावसरे सुमुखीं राधां दिनान्ते प्रदोषसमये उपेत्य सानन्दगद्गदपदं यथा स्यादेवं हरिरुवाचेति वाक्यार्थः। कीदृशीं मसृणरोषवशां "चिक्कणं मसृणं स्निग्धमि**त्यमरः**" पुनः कीदृशीम्। असीमनिःश्वासानां निःसहमसहिष्णुमुखं यस्या इति विग्रहः पाण्डुवर्ण्णमुखीमित्यर्थः। पुनः कीदृशीं, सव्रीडमीक्षितसखीवदनां किमधुना विधेयमिति कृत्वा सव्रीडं यथा स्यादेवं सखीमुखं ददर्शेत्यर्थः। वसन्ततिलकं वृत्तम्।।५२।।

### (२) राणाकुम्भकृत- रसिकप्रिया

।।५२।। इदानीं सायं कृतसखीकृत्यां स्मरशरजर्जरितकोपां स्वयमनुनयति, अत्रान्तर इति। अत्रान्तरेऽस्मिन्नवसरे दिनान्ते हरिः सवीडं यथा स्यात्तथा सुमुखीं राधामुपेत्य सानन्दगद्गदपदं सहर्षविशकलिताक्षरं यथा स्यात्तथा इति वक्ष्यमाणमुवाच। पुनः कथं ? यथा स्यात्तथा। किंभूताम् ? मसृणरोषवशां स्निग्धरोषरागाम्। कोमलसखीवचनैः किंचिन्नमितरोषाम्। पुनः किंभूताम् ? अपारनिःश्वासनिःसहमुखीं विरहसहनासमर्थाननाम्। वसन्ततिलका वृत्तम्।।५२।।

## (३) जगद्धरकृत- सारदीपिका

।।५२।। इदानीं सोत्कण्ठः कृष्णो राधां दृष्ट्वा अनुनयन्नाह अत्रेति अत्रान्तरे अस्मिन्नवसरे हरिः दिनान्ते सन्ध्यासमये तां सुमुखीं राधा समुपेत्य समीपमागत्य सानन्दानि अत एव गद्गदानि कण्ठादल्पं निर्गच्छन्ति यस्यां क्रियायां तद्यथा भवति तथा वक्ष्यमाणम् उवाच कीदृशीं राधां मसृणस्य कर्कशस्य क्रोधस्य वशाम् अधीनां पुनः किम्भुताम् असीमस्य महतो निःश्वासस्य निःसहं सोढुम् असमर्थं मुखं यस्या सा तां कोपवदनामित्यर्थः पुनः किम्भुतां सव्रीडं सलज्जम् ईक्षितं दृष्टं सख्याः वदनं मुखं यया सा तां पश्य कृष्णचेष्टितमित्यर्थः ।।५२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५२।। अत्रान्तरा इति। अत्रान्तरेऽस्मिन्नवसरे हरिः राधां समुपेत्य समीपं गत्वा प्रदोषे रात्रिमुखे इति वक्ष्यमाणमुवाच। कीदृशम्? अमसृणः कर्कशो यो रोषस्तस्मादसीमोऽधिको निःश्वासस्तेन निःसहं विरहदुःखसहनाक्षमं मुखं यस्यास्ताम्। पुनः कीदृशीम्? सव्रीडं सलज्जं यथा स्यादेवमीक्षितं सख्या वदनं यया ताम्। कथं यथा स्यात्? सानन्दगद्गदपदम्। आनन्देन गद्गदपदं गलदक्षरवाक्सहितं यथा स्यात्।।५२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५२।। अथ गोविन्दः समागत्य मानिनीं प्रियां प्रियालापैः प्रार्थयते। अत्रान्तर इत्यादि। अत्रान्तरे अस्मिन्नेवावसरे हरिः श्रीकृष्णः मसृणः श्लक्ष्णः निविड इति यावत्। तादृशश्चासौ रोषश्चेति तस्य वशात्तन्निमित्तात् असीमः निमर्य्यादः उद्वेलोऽतिप्रवल इति यावत्। तादृशो यः निःश्वासः तेन निःसहं अप्रसन्नमित्यर्थः। तादृशं मुखं यस्याः तादृशीं स्वाङ्गादित्यादिना ङीप्। व्रीड़या वल्लभावमानजनितलज्जया सहितं यथा तथा सब्रीड़ानि वीक्षितान्यवलोकितानि सखीनां सख्या वा वदनानि यया तादृशीं सुमुखीं शोभनाननां दिनान्ते सायं काले उपेत्य प्राप्य समीपं गत्वेत्यर्थः। आनन्दः प्रियादर्शन-जनितसन्तोषस्तेन गद्गदानि पदानि प्रतिक्षणं जल्पितानि तैः सहितं यथा भवति तथा इति वक्ष्यमाणमुवाच उक्तवान्। वियुक्तसम्भाषणसमये गद्गदस्वरूपसम्भवात् तथोक्तमित्यवगन्तव्यम्।।५२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५२।। अथ कृष्णकृतराधानुनयं वर्णायितुं प्रसङ्गमवतारयति, अत्रान्तरे हरिरुवाच अवदत्। बहुमधुरमित्यादिसखीवचनावसरे दिनान्ते सन्ध्यायामुपेत्यागत्य सानन्दगद्गदं

यथा स्यादेवं हरिः कृष्णः सुमुखीमित्यग्रे वक्ष्यमाणमुवाच। पदस्य राधानुनयवचनत्वेन सानन्दत्वं भयाच्च गद्गदत्वमित्यवधेयम्। कीदृशीम्? तादृशसखोजनानुनयात् मसृणो मन्दोभूतो रोषवशः कोपावेशो यस्यास्ताम्। अतएवासीमनिःश्वासैः निःसहं नत्वनिःसहमानं मुखं यस्यास्ताम्। पुनः किम्भूताम्? एतावत्कालं सखीवचनप्रतिक्षेपात् सव्रीडं सलज्जं यथा स्यात्तथा ईक्षितसखीवदनाम्। अत्र सुमुखीपदापन्यासेन कोपमान्द्यस्यानुमेयत्वं दर्शितम्।।५२।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५२।। दशमे त्वथ निःश्वासम्लानबिम्बाधरद्युतिम्।
राधामुपेत्य कुपितां हरिरूचे सुधामुखीम्।।
तत्कोपशान्त्यै निपुणः स्वदण्डं स्वसुखप्रदम्।
तटस्थ इव गोविन्दो बहुरूपमवर्णयत्।।

साम्प्रतं श्रीकृष्णो राधामनुनयन्नाह, अत्रेति। [४]अत्रान्तरेऽस्मिन्नेवावसरे प्रदोषे रात्रिमुखे वा सुमुखीं राधामुपेत्य कोपहरस्तापहरो वा हरिः आनन्दसहितानि गद्गदानि रसावरूद्धकण्ठानि [५] पदानि यथा स्यात्तथा इति वक्ष्यमाणमुवाच। कीदृशीम्? मसृणस्य कर्कशस्य [६]रोषस्य क्रोधस्य वशामधीनाम्। (पुनः कीदृशाम्?) [७] असीमं दीर्घं यो निःश्वासस्तेन निःसहं विरहदुःखसहनाक्षमं मुखं यस्यास्ताम्। (पुनः)कीदृशीम्? सव्रीडं सलज्जं [८]ईक्षितं सखीवदनं यया ताम्।।५२।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५२।। इदानीं सोत्कण्ठः श्रीकृष्णो राधामनुनयन्नाह, अत्रेति। अत्रान्तरेऽस्मिन्नवसरे हरिर्दिनान्ते सन्ध्यासमये तां सुमुखीं [९]शोभनमुखीं राधां समुपेत्य [१०] समीपमागत्य सानन्दानि अत एव गद्गदानि कण्ठादल्पं निर्गच्छन्ति पदानि यस्यां क्रियायां तद्यथा भवति तथा [११]इति वक्ष्यमाणं [१२] उवाच। कीदृशीं ताम्? मसृणस्य[१७२] कर्कशस्य रोषस्य [१] क्रोधस्य वशाम् अधीनाम् पुनः कीदृशीं [२] ताम्? असीमस्य महतो निःश्वासस्य निःसहं [३] सोढुमशक्यं मुखं यस्याः ताम्। कोपवदनामित्यर्थः। पुनः कीदृशीम्? सव्रीडं सलज्जं ईक्षितं दृष्टं [४] सखीवदनं सखीमुखं यया ताम्। पश्य कृष्णचेष्टितमिति भावः।।५२।।

१.चतुरचतुर्भुजः-नि.सा. २.अपार-नि.सा.रोषरसामसीम-इ. ३.दिनान्ते-नि.सा. ४.अत्रास्मिन्नेवावसरे-अ.ब. ५.नास्ति-इ.फ.ग.ह.ज. ६.नास्ति-अ.ब. ७.असीमस्य दीर्घस्य-इ.फ.ग.ह.ज. ८.नास्ति-अ.ब. ९.नास्ति-क. १०.नास्ति-क.ल.म. ११.नास्ति-क. १२.आह-च.ल.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५२।। हरिरुपयातु बहु मधुरं वदत्विति सूचितमेवाह, अत्रान्तर इति। अत्रान्तरे एतावन्मध्ये सख्याः संवादसमये हरिः मसृणः अतिपोषितो रोषरसः गाढीकृतो रोषो यस्यास्ताम् असीमानः निर्मर्यादाः अगणिताः निःश्वासाःतैः निःसहं मुखं यस्यास्तां सुमुखीं राधामुपेत्य अभ्येत्य, व्रीडया लज्जया सहितं यथा तथा ईक्षित (तं) अवलोकितं सखीवदनं यथा तथा, आनन्देन सहितं गद्‌गदानि पदानि यस्मिन् यथा तथा दिनान्ते उवाच।।५२।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५२।।अत्र सर्गे मानिनी वर्ण्यते। तस्याः लक्षणम्, ''कृतदोषं प्रियं ज्ञात्वा कोपात् सन्नमितानना। नेक्षते नाभिधत्ते या मानिनी सा मता यथा।।'' इति। **अत्रान्तर** इति। अत्रान्तरे अस्मिन्नेवावसरे सुमुखीं राधाम् उपेत्य राधासमीपं गत्वा दिनान्ते प्रदोषसमये सानन्दगद्‌गदपदं यथा स्यादेवम् इति वक्ष्यमाणं वचो हरिरुवाचेति वाक्यार्थः। आनन्देन सहितं सानन्दं गद्‌गदं घर्घरस्वरयुक्तं पदं यत्र क्रियायाम्। सानन्दं च तत् गद्‌गदपदञ्चेति पश्चात्कर्मधारयः। सानन्दत्वेन गद्‌गदपदमित्यर्थः। किंविधाः? मसृणेत्यादि । मसृणोऽतीक्ष्णः यो रोषः तद्वशादर्थाद्वा दोषस्य कुण्ठाभाववशात् न विद्यते सीमा प्रान्तो येषाम् एवंविधैः निश्वासैर्निःसहं दीनं मुखं यस्याः, बहुतरफूत्कारविधुराननामित्यर्थः। असीमनिःश्वासानां निःसहमसहिष्णु मुखं यस्या इति विग्रहे वा। अत्र पक्षे पाण्डुवर्णमुखीमित्यर्थः। प्रायेण रोषस्य ह्रासदशायां प्रश्वासः प्रसरतितरामिति लौकिकोऽनुभवः। ''मसृणं चिक्कणं स्निग्धम्'' **इत्यमरः**। पुनः कीदृशीम्? सव्रीडवीक्षितसखीवदनामिति । किमधुना विधेयमिति कृत्वा सलज्जं यथा स्यादेवं सखीमुखं ददर्शेत्यर्थः।।५२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५२।। ततः प्रातरारभ्योक्तप्रकारेण दिवसे प्रवृत्ते सत्युपक्रान्ताम्वुदावृतेन्दुनिशादि-वृत्तमाह- अत्रेत्यादिना। अस्मिन्नवसरे प्रदोषसमये किंचित् कोपोपशमेन प्रसन्न वदनां श्रीराधां समीपमत्यानन्देन गलदक्षरपदसहितं यथा स्यात्तथा हरिरिति वक्षमाणमुवाच। कीदृशीम्। अतिनिःश्वासेन निःसहकान्तवचनादिरहितं मुखं यस्यास्ताम्। यतः शिथिलमानेन सख्यायत्तां अतएव किमधुना विधेयमिति सव्रीड़ं यथा स्यात्तथेक्षितं सखीवदनं यया ताम्।।५२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५२।। अथ श्रीराधाया माननिर्वासनाय तत्प्रेमैकवशीभूतस्य कृष्णस्य चाटूक्तिपरिपाटीमुद्घाटयितुं भूमिकामाह, अत्रेति ।अत्रान्तरे सखीप्रबोधनानन्तरं यावत् राधा प्रसादमन्थरतया किञ्चित् नातिभाषते, एतदभ्यन्तरे दिनान्ते सायंकाले, हरिश्चाटूक्तिपेशलतया अतिमनोहरः कृष्णः सुमुखीं, शोभनं कोपकालीनभ्रूकुञ्चितकुटिल-निरीक्षणादिविलक्षणशोभायुक्तं मुखं यस्याः तां राधामुपेत्य समीपमागत्य सानन्दगद्गदपदं, तादृशमुखदर्शनसञ्जातानन्देन प्रतिक्षणं गद्गदिकास्खलदक्षरं यत् पदं तेन सहितं यथा स्यात्तथेति वक्ष्यमाणवचनमुवाच, उक्तवान् । कीदृशीम्, मसृणः सान्द्रो यो रोषस्तद्वशादसीमः सीमातिक्रान्तः, सुदीर्घ इत्यर्थः । ईदृशेन निःश्वासेन निःसहमतिक्लान्तं मुखं यस्यास्ताम् । मानिन्याः खलु वल्लभाग्रे तु मानोदयाधिक्या-न्निसीमत्वं श्वसितस्य। पुनः कीदृशीम्, सव्रीडं, कथमिममवलोक्य विस्मृतसकलकोप-कृत्याऽन्यथा एव प्रतिभाति मे मनोवृत्तिः किं करोमि, किं वदामि, कथमङ्गीकरोम्यस्य वचनम्, कथं वा परिहरामीति विचारसमुदितलज्जासहितं यथा स्यात्तथेक्षितं सखीवदनं यया ताम्।।५२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

५२- अत्रान्तरेति; श्रीराधाया विरहकातररोषादनन्तरं सायं कृतसखीकृत्यां कन्दर्पज्वरा-क्रान्तां श्रीकृष्णस्योपरि कुपितां स्वयं श्रीकृष्णः अनुनयवचनं व्रूते। अत्रान्तरे अस्मिन्नवसरे दिनान्ते दिवसस्यावसाने सव्रीडं सल्लज्जं श्रीराधासमीपमुपेत्य सानन्दं गद्गदं सहर्षं विशकलिताक्षरे उवाच। किम्भूता श्रीराधायाः रोषकषायिता ? मसृणः रोषवशात् अर्थात् चिक्कणं स्निग्धं रोषणं क्रोधः यत्र प्रणयाधिक्यमस्ति। मसृणः सान्द्रः इति रसिकरङ्गदायाम्। मन्दीभूतः इति शुक्लध्वजः। कर्कशः इति अर्थः सञ्जीवनीटीकायामपि च पदद्योतनिकायां वर्तते। जयन्तीटीकायां तु मशृणस्य अतिपोषितो रोषरसः गाढीकृतरोषरसःइत्यपि वर्ण्यते। यत्र पाठान्तरे अमशृण पठ्यते तत्र कर्कशार्थस्तु याथार्थमावहति इति दिक्। अपारनिःश्वासनिःसहमुखी यस्याः दीर्घश्वासः तथा असहनता वर्तते। तथाभूतां सखीवदनं विलोक्य किञ्चिद्व्रीडावतीं श्रीकृष्णः उवाच। वसन्ततिलकावृत्तम्। स्वभावोक्तिरलंकारः।।५२।।

।। ऊनविंशप्रबन्धः/ गीतम् १९ ।।

।। देशवराडीरागाष्टतालीतालाभ्यां गीयते।।

**१-वदसि यदि किंचिदपि दन्तरुचिकौमुदी हरति दरतिमिरमतिघोरम्।**
**स्फुरदधरसीधवे तव वदनचन्द्रमा रोचयतु लोचनचकोरम्।।**
**प्रिये चारुशीले मुञ्च मयि मानमनिदानं**
**सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानम्।।ध्रुवम्।।१ ।।**

### (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।१ ।। देशी रागेण गीयते। अस्य लक्षणं,

कुन्देन्दुकान्ता तनुदेहवल्ली शुक्लाम्बरा पत्रवतातिवेशा।
भर्त्तुः स्मरन्ती शयनं विदग्धा संखिद्यमाना निशि देशिकेयम्।।

अपि च, आरब्धमौनमुद्रा निद्रया घूर्णिताननाब्जा।
स्मरतादिष्वपि दयिते मुनिभिः ख्यातापि देशीयम्।।

पूर्वमस्य स्वरूपमुक्तम्।

कक्कोलपल्लवं पाणौ विभ्राणाः स्वर्णकङ्कणाः।
चुम्बन्ति दयितं रागाद्देशी हेमगिरिप्रभा।।

किमुवाच हरिरित्याह। वदसीति। हे चारुशीले! हे प्रिये! मयि मानं मुञ्चेति योजना। किदृशमनिदानमकारणमित्यर्थः। चारुशीलायास्तव अकारणमानोऽनुचित इत्यभिप्रायः। उक्तं च,

या कुप्यति विनादोषैस्तुष्यत्यनुनयं विना।
अहेतुकप्रवृत्तिश्च चलच्चित्तेति साधमे।।

।।१ ।। कथं मानापहा वदसीत्याह, सपदि तत्क्षणात् तव मानाबधेरिति यावत्। मदनानलः कामाग्निर्मम मानसं दहति, ततो मुखकमलमधुपानं देहीत्यत्राह। भवत्योः वरवर्ण्णिन्योः दुःखिनां वेदनाच्छिद इत्यभिप्रायः। वदसीत्यादि, हे प्रिये! यदि किञ्चिदपि वदसि, तदा तव दन्तरुचिकौमुदी ममातिघोरं दरतिमिरं भयान्धकारं हरत्विति वाक्यार्थः। दन्तरुचिरेव कौमुदी दरमेवान्धकारम्। तव वदनचन्द्रमा नाम लोचनचकोरं स्फुरदधरसीधवे राचयत्वित्यपरो वाक्यार्थः। प्रिये! यदि मन्यसे तदा मम नयन-चकोरः त्वन्मुखचन्द्रस्याधरामृतपानं करोत्वितीव वस्त्वर्थः। स्फुरदधासीधवे इति तादर्थ्ये चतुर्थी, रुच्यर्थानां प्रीयमाण इति सूत्रं नात्र प्रवर्त्तते रुचेरप्यस्वतन्त्रत्वात्।।१ ।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।१ ।। तदेव वक्ष्यमाणमाह, वदसीति। तत्रानुरोधेन क्रमपरिपाटीं परित्यज्य पूर्वं ध्रुवपदं व्याक्रियते, प्रिये हीति। हे प्रिये! शोभनशीले! मयि विषये यो मानः तं मुञ्च परित्यज। किंभूतम्? अनिदानम् सपत्नी संभोगलक्षणकारणरहितम्। सपदि सांप्रतं भवतीति मानमपेक्ष्य मदनानलो मम मानसं दहति। तत्तापोपशान्त्यै मुखकमलमधुपानं देहीति ध्रुवः। अथ पदानि। वदसीति। हे प्रिये! किंचिदपि प्रियाप्रियनिरपेक्षं स्वल्पमपि वदसि। तदा तव दन्तरुचिकौमुदी मम दरतिमिरं भयान्धकारं हरति। किंभूतं भयान्धकारम्? अतीव घोरम्, अतीव भयानकहेतुत्वाद्भयानकम्। अत्र मयि स्थायी भवमेवोद्रिक्तः सन् भयानकतामेष्यतीति। 'विभावैरनुभावैश्च सात्विकैर्व्यभिचारिभिः। अनीयमानः स्थायित्वे स्यायीभावो रसः स्मृतः' इति। स च शृङ्गारविरोधी त्वया परिहरणीय एव। तव वदनचन्द्रमा मम लोचनचकोरं स्फुरन्योऽधरे शीधुस्तस्मै रोचयतु साभिलाषं करोतु। अधरशीधूचन्द्रिकार्थं चन्द्रमसः सान्निध्यान्मन्नेत्रचकोरस्य स्पृहा जायते।।१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ।। उक्तमर्थं गीतेनाह, वदसीति गीतस्यास्य देशोवराडीरागः अष्टतालीतालः राग लक्षणं ''आरब्धागमनमुद्रा निद्राघुर्णायमाननयनयुग्माढ्या सुखशायिनि निजदयिते देश वराडीभवेद्रौरिति लघुद्रुतौ लघुश्चेत्यष्टताली प्रकीर्त्तितेति''। गीतार्थस्तु हे चारुशीले! मनोहर सदृदे प्रियेराधे! त्वं मयि अनिदानम् अकारणमानं मुञ्च त्यज किमिति मानत्यागः तत्राह मदनानलः कामाग्निर्मानसं दहति अतः कारणात्सपदि दाहनान्तरमेव-मुखकमलमधुपानं मुखमेव पद्मं तत्सम्बन्धिमधुपानं देहि मधुना वह्निदाहः प्रशाम्यति ध्रुवपदं हे राधे! त्वं यदि यदा किञ्चिदपि वदसि तदा नवदन्तानां यारुचिः दीप्तिः सैव कौमुदी चन्द्रज्योत्स्ना अतिघोरम् अतिशयेन भयङ्करं दूरः भयं स एव तिमिरमन्धकारं हरति नाशयति अनु च तव वदनचन्द्र इव सः। स्फुरदधरसीधवे दीप्यमानाधरामृतार्थं ''तादर्थ्येचतुर्थी''। मम लोचनचकोरं नेत्र पक्षिविशेषं रोचयति रुचिम् इच्छां कारयति मम लोचन चकोर पक्षिविशेषः चन्द्रामृतलोलुपो भवत्येव ।।१ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।१ ।। तदेव गीतेन कथयति, वदसीति। गीतस्यास्य देशवराडीरागस्तालश्चाष्टतालः। गीतार्थस्तु, हे प्रिये राधे! चारु मनोहरं शीलं यस्यास्तादृशे, त्वं मयि मद्विषयेऽनिदानम-कारणकं मानं मुञ्च त्यज। सपदि त्वन्मानकाल एव मदनानलः कामाग्निर्मम मानसं

दहति तापयति। अतो मुखकमलममलं तत्संबन्धि यन्मधु तत्पानं देहि। चारुशीलत्वमेवा, वदसीति। त्वं यदि किंचिदपि उदासीनवचनमपि वदसि तदा दन्तरुचिकौमुदी तव दन्तानां या रुचिः सैव कोमुदी चन्द्रज्योत्स्ना सातिघोरमतिभीमं दरतिमिरं दरः साध्वसं स एव तिमिरमन्धकारः तद्धरति दूरीकरोति। अत्र साध्वसे सति पुरः स्थितमपि वस्तु न प्रकाशत इति साध्वसस्यान्धकारत्वेन निरूपणम्। दन्तरुचेश्च तन्नाशकत्वात्कौमुदीत्वेन निरूपणम्। अथ च, स्फुरन्कोपवशात्किंचिच्चलन्योऽधरः। तल्लक्षणं चोक्तम्। 'चन्द्रिकायां कौमुदी' इति विश्वः। 'दरः साध्वसगर्वयोः' इति च । 'घोरं भीमे हरे घोरः' इत्यपि। 'शीधु निभृतेऽमृते( ?)।' 'शीधु' शब्दः पुंस्यपि। पुन्नपुंसकशेषेऽमर-सिंहः, 'कुष्टं मुण्डं शीधु बुस्तम्' इति। अत्राधरशीधवे इत्यत्र तादर्थ्यविवक्षायां चतुर्थी। न च लोचनचकोरमित्यत्र 'रुच्यर्थानां प्रीयमाणः' इति (पा. १/४/ ३ ३) चतुर्थी। कुतो नेति चेत्, अन्यकर्तृकोऽभिलाषो रुचिः; इह तु वदनचन्द्रमसोर्न प्रीतिजनकत्वं विवक्षितम्।।१ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।१ ।। उक्तप्रकारमेव विषदयति। वदसीत्यादिना देशीरागेण गीयत इत्युक्तम्। तस्यायमभिपायः। पुरुषरागानन्तरं पत्नीं सूचयितुं तथोक्तमिति तत्पतिस्तु पदपञ्जररागः। तदुक्तम्, ''देशी च ललिता तोण्डीपदपञ्जरयोषित'' इति त्रिपुटतालेन गेयम्। तल्लक्षणंतु, ''द्रुतद्वन्द्वं लघुश्चैव त्रिपुटः परीकीर्त्तितः।'' इति झम्पा वा। अत्र प्रियेत्यादि मधुपानमित्यन्तं ध्रुवपदं व्याक्रियते। हे प्रिये! चारुशीले! बिमलस्वभावे! राधे! हेतुगर्भविशेषणद्वयमिदम्। तन्त्रन्यायेन मयि इत्यनेनापि योज्यम्। एतादृशे मयि अनिदानमनिमित्तं मानं मुञ्च त्यज। प्रियायाः चारुशीलायाः तव प्रिये चारुशीले च मयि आवयोराननुरूप्यादनिमित्ता-भिर्मानस्यायुक्तत्वादिति भावः। अथवा अचारुशीले इति वा पदच्छेदः। तदा आकारो विष्णुपरः तस्मिन् बिष्णौ अवक्रं शीलं यस्याः सा तादृशी, अतएव प्रिये! एवं बिधायास्तवानिमित्तमानस्यायुक्त त्वादिति भावः।

यद्वा अचारुशीले! दुःस्वभावे! दुःस्वभावश्चास्या अनिमित्तमानधारणादव-गन्तव्यः। न केवलं मानत्यागः अपितु मधुपानमपि देहीत्याह। देहीति। हे प्रिये! मुखमेव कमलं यस्याः तस्या मधुपुष्परसः माधुर्य्य साम्यादमृतं च ''मधुमद्येपुष्परस **इत्यमरः**।'' तस्य पानं देहि प्रवच्छ। किमर्थामित्याकाङ्क्षायामाह सपदीति। यस्मान्मदनानलः अनङ्गदहनः मम मानसं दहति ब्यथयति। तस्यास्तापनिवृत्त्यर्थमवश्यममृतपानेन

भवितव्यमित्यर्थः। वदसीति। हे प्रिये! यदि किञ्चिदपि स्वल्पमीप्सितमपि किमु अनल्पनर्मवचनादिकमिति भावः। वदसि यदि चेत् तर्हि दन्तरुचिकौमुदी दशनकान्तिः चन्द्रिका अतिघोरम् अतिभयङ्करं दरतिमिरं भयान्धकारं दरोऽस्त्रियांभयेष्वभ्रे **इत्यमरः**। हरति हरिष्यति लोकेऽपि प्रियालापस्य भीतिनिवर्त्तकत्वादिति भावः।

किञ्च हे चारुशीले! तव वदनचन्द्रमा लोचनचकोरं मम नयनजीवं जीवम् अत्र एकत्वमविवक्षितम्। स्फुरन् भासमानः योऽधरः सीधुवत् सीधुः सुधासीधुर्मद्यः। ''मैरयमासवः सीधुरित्यमरः।'' तं पातुं सीधबे पातुं सीधुं पातुमित्यर्थः। क्रियार्थोपपदस्येत्यादिना'' (२।३।४) कर्मणि चतुर्थी। रोचयतु रुचिमन्तं करोतु। अत्र तत्करोति तदाचष्टे इति रुचिमच्छवार्ण्णिति शाविष्टप्रतिपादिकेष्विति इष्टवद्भावे चिण्मतो लुगिति मतु लुक्।'' सम्भाषणपूर्वकं तव मुखकमलदर्शनेन मां सम्भाबयेति तात्पर्य्यम्।।१।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।१।। गीतस्यास्य देशवराडी रागः। आढतालः। हरिरित्युवाचेति यदुक्तं तद्दर्शयति, चारु शोभनं शीलं यस्या एवम्भूते प्रिये राधिके। अनिदानम् आदिकारणशून्यं मानं योषं मयि मुञ्च त्यज। तथा च चारुशीलायास्तवावान्तरकारणादेव रोषोऽनुचित इति वाक्यार्थः। 'विदानन्त्वादिकारणमि'त्यमरः। मम कोपेनापि भवतः किमित्याशंक्याह, सपदि तत्क्षणं मदनानलः कामाग्निः मम मानसं दहति। तर्हि मया किङ्कर्त्तव्यमित्याशंक्याह, मुखमेव यत्कमलं तस्य यत् मधुपानं देहि। तथा चान्तर्वर्त्तिनो दाहस्याधरमधुपानेन शान्तिं विधेहीति वाक्यार्थः। यदि किञ्चिदपि स्वल्पमपि वदसि तदा दन्दरुचिरेव विकाशितत्वात् कौमुदी चन्द्रज्योत्स्ना साऽतिघ्रोरमतिभयनाकं दरतिमिरं दरो भयमाच्छादकत्वेन ज्ञानवैपरीत्यादिजनकत्वेन। तदेव तिमिरं तद्धरति नाशयति। अन्ययाऽपि ज्योत्स्नया तिमिरमपनीयत एवेति ध्वनितम्। 'दरः स्याद् विवरे भये।' तव वदनमेव चन्द्रमा। लोचनमेव चकोरःतम्। स्फुरच्चासौ अधरश्चेति स्फुरदधरः, स एव मादकत्वात् सीधुः। तस्येव स्फुरदधरसीधवे रोचयति स्पृहयति। सीधव इत्यत्र कर्मप्राप्तौ स्पृहार्थयोगे* चतुर्थी चेति। सीधुर्मद्यविशेषः। तदुक्तम्, 'सीधुरिक्षुरसैः पङ्कक्राञ्जिकैरमिरौ भवेत्। मैरेयं धातकीपुष्पं गुडधानादिसंयुतम्।।' रुपकश्चात्रालंकारः।।१।।

T टीकानुसारं 'प्रदोषे' इत्यस्य स्थाने 'दिनान्ते' इ इत्येव पाठः स्यात्। ग्रन्थान्तरेऽपि 'दिनान्ते' इत्येव उपलभ्यते।

* 'रोचयतु' इति पाठ।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।१ ।। देशवराडीरागे अष्टतालीताले। ध्रुवपदम्। रागरूपम्,

[५]आरब्धगमनमुद्रा निद्राघूर्णायमाननयन६ युगा।।

[७]सुखशायिनि निजदयिते देशवराडी भवेत् गौरी।। इति ।।

।।१ ।। लघुद्रुतौ लघुश्चैवाष्टताली [१]सा प्रकीर्तिता इति तालरूपम्। हर्युक्तं गीतेनाह, वदसीति। हे प्रिये[२] वल्लभे [३]यदि [४] त्वं किञ्चिदपि सरोषं सप्रसादं वा वदसि तदा तव दन्तरुचिकौमुदी दन्तरुचिज्योत्स्ना अतिघोरं अतिभीमं दरतिमिरं साध्वसान्धकारं अपराधान्धकारं वा हरति नाशयति। हरतीत्यनेन [५] मुखे हास्यं प्रार्थितम्। किञ्च तव वदनचन्द्रमा मुखचन्द्रः स्फुरदधरसीधवे प्रकाशबहुलाधरा [६]मृतार्थे मल्लोचनचकोरं रोचयति [७] राधयति ; नेत्रं पक्षिणं करोति। अनेन [८] श्रीराधाधरामृतं प्रार्थितम्। एवं गम्भीरार्थमुक्त्वा वाञ्छितमाह, हे [९] प्रिये! हे चारुशीले सुन्दरस्वभावे मयि मानं मुञ्च त्यज। [१०]कीदृशम्? अनिदानमकारणं अन्ययुवतिभजनकारणरहितं वा। [११] चारुशीलाया नैतद्युक्तमिति गूढाभिप्रायेणोपालम्भ इति भावः। कीदृशे मयि? प्रिये वल्लभे चारुशीले मनोहरस्वभाव इति वा। मानात्यागे दोषमाह-मदनानलः कामाग्निरकाले मम मानसं दहति। नायं मानसमय इति भावः। अतः सपदि शीघ्रं [१२] मुखकमलमधुपानं देहि [१३] प्रयच्छ। अनेन [१४] सम्मुखीकरणं प्रार्थितम्।।१ ।।

१,२.नास्ति-ड.३.सोढुमसमर्थ-क.ल.म.४.नास्ति-क.५.आरब्धगमनमुन्निद्रा-अ.ब.६.युग्मा-अ.ब. इ.फ.ग.ह.ज. ७.सुखमयनिजजनदयिते-फ.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।१ ।। उक्तमर्थं गीतेनाह, (वदसीति।) [१५] अस्य देशवराडीरागस्तल्लक्षणम,

आरब्धगमनमुद्रा घूर्ण(र्णा)यमाननयनयुग्मा।

सुखशायिनि निजदयिते देशवराडी भवेद्गौरी।। इति।

हे चारुशीले मनोहरसद्वृत्ते प्रिये मयि अनिदानं अकारणं मानमभिमानं मुञ्च त्यज। किमिति मानत्यागस्तत्राह, मदनानलः कामाग्निः मम मानसं दहति। अतः कारणात्सपदि [१६] दाहानन्तरं [१७]मुखकमलमधुपानं [१]मुखपद्ममधुपानं देहि। [२]मधुना वह्निदाहः प्रशाम्यति। हे राधे त्वं यदि यदा किञ्चिदपि वदसि तदा तव दन्तरुचिकौमुदी दशनकान्तिरेव चन्द्रज्योत्स्ना अतिघोरं अतिशयेन भयङ्करं [३] दरतिमिरं [(४)] भयान्धकारं [५] हरति नाशयति। अनु च तव वदनचन्द्रमाः[६]मुखचन्द्रः स्फुरदधरसीधवे [७]देदीप्यमानाधरामृतार्थे लोचनचकोरं नेत्रपक्षिविशेषं [८]रोचयति[९]रुचिमिच्छां कारयति [१०] ।।१ ।।

१.नास्ति-इ.फ.ग.ह.ज. २.नास्ति-अ.ब. ३.त्वं यदि-इ.ग.ह.यदि-फ.ज. ४.त्वं वदसि किञ्चित्सरोषं-अ.ब. ५.सुखं हास्यं प्रार्थिते-अ.ब. ६.अमृतार्थं-इ.फ.ग.ह.ज. ७.नास्ति-अ.ब. ८.श्रीवृषभानुकुमाय-धरामृतं-ग. ९.नास्ति-इ.फ.ग.ह.ज. १०.नास्ति-इ.फ.ग.ह.ज. ११.चारुशीलाय-फ.ग.ह.ज. १२.मुख-कमलं मधुपानं च देहि-इ.फ.ग.ह.ज. १३.नास्ति-अ.ब. १४.सन्मुखीकरणं-फ.ग.ह.ज. १५.वराडी-देशीराग: रूपकतालेन गीयते। तल्लक्षणम्-क.म. १६.दाहानन्तरमेव-क.ल.म. १७.नास्ति-क.ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१।। वदसीति। किञ्चिदपि मृदु कठिनं वा वदसि यदि चेत् दन्तरुचिरेव कौमुदी ज्योत्स्ना अतिघोरं बहुगाढं दरमेव भयमेव तिमिरं अन्धकारं हरतु। त्वया अनादरपूर्वकमउक्तं चेदपि मम भयं यास्यति। मौनं त्याज्यमिति भाव:। तव वदनमेव चन्द्रमा: मुखचन्द्र:। लोचनमेव चकोर:। अर्थात् मम नेत्रं चकोरं स्फुरतु उद्भवतु। अधर एव सीधु: तस्मै। सुधात्वारोपे कर्तव्ये प्रमादकत्वात्सीधुशब्दप्रयोग:। आनन्दातिशयसम्बन्धेन सुधायां लक्षणा चन्द्रेऽभावान्न चकोराणामनास्वाद्यत्वात्। रोचयतु, सीधवे रुचिमुत्पादयितुं मुखं प्रदर्शयेति रूपकालङ्कारेण व्यज्यते। तत्र रूपकं वदनावयवे चन्द्रावयवारोपणात्सावयवम्।। ध्रुवपदम्। चारुशीले सम्यक्स्वभावे प्रिये कान्ते। प्रार्थनार्थं रञ्जनार्थं द्वि: पठनीयम्। मयि विषये अनिदानं निर्निमित्तं मानं कोपं मुञ्च त्यज। मदन एव अनल: मम मानसं चेत: दहति सन्तापयति। मुखमेव कमलं तस्य मधु अधररूपं तस्य पानं देहि। तवाधरमकरन्दास्वादात् मदनदाह: शाम्यतीति भाव:। इति ध्रुवाया व्याख्यानम्।।१।।

१.नास्ति-क.ल.म. २.अधुना-क. ३.नास्ति-ल.म. ४.नास्ति-क.ल.म. ५.हरतु नाशयतु-क. ६.नास्ति-ड. ७.देदीप्यमानाधरामृतार्थी-ल.म. ८.रोचयतु-क. ९.त: १०.पर्यन्तं नास्ति-क.ल.म.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।१।। देशीरागस्य लक्षणं यथा, ''कुन्देन्दुकान्तिस्तनुदेहयष्टि, शुक्लाम्बरा सा पतिता सुवेशा। भर्तु: स्मरन्ती शयने विदग्धा, संखिद्यमाना निशि देशिकेयम्।।'' इति। किमुवाचेत्याह, वदसीति। हे चारुशीले! रुचिरस्वभावे! अत एव हे प्रिये! प्रियकारिणि राधिके! मयि मद्विषये मानं वैमुख्यं मुञ्च त्यजेति योजना। मानं किंविधम्? अनिदानमिति। अविद्यमानं निदानं समुचितकारणं यस्य। असमुचितकारणमित्यर्थ:। चारुशीलायास्तव निर्हेतुको मानोऽनुचित इत्यभिप्रायेण चारुशीले इति सम्बोधनम्। यद्वा चारुशीले! निर्मलस्वभावे! मयि अनिदानं मानं निदानमन्तरेण यो मानस्तं मुञ्चेति। निदानस्याभावोऽनिदानमित्यभावेऽव्ययीभाव:। "शीलं स्वभावे सद्वृत्ते" इति। कथं मानापहानये वदसीत्याह - सपदीत्यादि। सपदि तत्क्षणात् तव मानावधेरिति यावत्। मदनानल: कामाग्निर्मम मानसं दहति, मदनस्यानन्दत्वं मानसदाहकत्वेन अनल:

खल्वाश्रयत्वात् यत्र शमीकाष्ठादौ जायते तदपि दहति। एवं मदनोऽपि मनसि जायमानो मदनोऽपि दहतीति सादृश्यातिशयो रूपको हेतुः। अतो मुखकमलमधुपानं देहीति। मुखमेव कमलं तस्य यन्मधु स्वादुरसविशेषः तस्य पानं प्रयच्छेत्यर्थः। अग्निदाहदुःख-मधुना शाम्यतीति कृत्वा मानसदाहे च मधुनः पानमेव उपकारकम्, न तु बहिर्लेपनमिति पानाभिप्रायः। दाहे सति तत्क्षणमेव उपयुक्तं मधु सम्यगुपकरोति, न पुनश्चिरेणेति कृत्वा सपदिपदस्य देहीत्युत्तरक्रियया समन्वयः। वदसीत्यादि। हे प्रिये ! यदि किञ्चिदपि वदसि तदा तव दन्तरुचिकौमुदी ममातिघोरम्, अत्यन्तं भयानकं दरतिमिरं[१७३] भयान्धकारं हरति, अपनयतीति वाक्यार्थः। दन्तरुचिरेव कौमुदी चन्द्रिका, दरमेवान्धकारम्। अपि च तव वदनमेव चन्द्रमाः मम लोचनमेव चकोरः, तं स्फुरदधरशीधवे सम्भाषणवशात् स्फुरद्वेपमानोऽधर एव शीधुस्तदर्थं रोचयति, अभिलाषयति धातूनामनेकार्थत्वात् प्रेरयति वा। शीधुशब्दो यद्यपि मद्यविशेषवाची तथाप्यत्र सुधामये चन्द्रमयूखे शीधुरुपचर्यते। यथा स्वादुर्मादकश्च शीधुस्तथैव चन्द्रमण्डलगलत् पीयूषरसोऽपि चकोरं प्रति स्वादुर्मादकश्चेति सादृश्यप्रतिपत्तिरुपचार-प्रयोजनम्। तथा च, ''प्रसिद्धन्यूनातिरिक्तभावस्यार्थस्य सादृश्यप्रतिपत्त्यर्थमन्यत्रारोप उपचारः'' इति **माहिमाचार्यः**। अयमभिप्रायः तव वदनं कर्तृ मदीयं लोचनं तवैव स्फुरतेऽधराय रोचयति पिपासयतीत्यर्थः। यथा चन्द्रश्चकोरनामानं पक्षिणं शीधुसादृश्याय निजमण्डलगलदमृतरसाय पिपासयति। लोचनस्य तु पानं नाम साकाङ्क्षमीक्षणमेव। तथा च **कालिदासः** ''वशिष्ठधेनोरनुयायिनं तमावर्तमानं वनिता वनान्तात्। पपौ निमेषालसपक्ष्मपङ्क्तिरुपोषिताभ्यामिवलोचनाभ्याम्।।'' इति। स्फुरदधरसीधवे इति ''तादर्थ्ये चतुर्थी'', ''रुच्यर्थानां प्रीयमाणः'' इति सूत्रं नात्र प्रवर्त्तते।।१ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।१ ।। किमुवाच तदाह वदसीत्यादिना। अस्य देशवराड़ी रागाष्टकतालीतालौ। ''लघुद्रुतो लघुश्चेति अष्टताली प्रकीर्त्ततः'' इति काललक्षणम्। हे प्रिये ! चारुशीले ! मयि मानं मुंच। कीदृशं ? अनिदानम् अकारणम्। चारुशीलया अकारणमानस्या युक्तत्वादित्यर्थः। यतः सपदि तत्क्षणं त्वन्मानसमकालमेव कामाग्निः मम मानसं दहति, ततो मुखकमलमधुपानं देहि, अन्तर्दाहस्य पानेनैव शान्तिरित्यर्थः।

दुरापमिदं दूरेऽस्तु। हे प्रिये ! त्वं यदि किंचिदपि वदसि तदा दन्तरुचिकौमुदी ममादिघोरं भयजनकं तिमिरं हन्ति तथा तव वदनचन्द्रमाश्च मम लोचनचकोरं भयजनकं स्फुरदधरसीधवे उच्छलिताधरसुधापानार्थं साभिलाषं करोति, नयनस्य चकोरत्वेन तदेकजीवनत्वमुक्तम्।।१ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।१।। यदुवाच तदाह, वदसीत्यादिना गीतेन। देशाख्यरागेण गीयत इत्युक्तम्। वदसीति। हे प्रिये! मत्प्रेमसर्वस्वभूते! हे चारुशीले! स्पृहणीयस्वभावे! मयि, त्वदीयाभिमानिनि जने, अनिदानं कारणशून्यं मानं मुञ्च। चारुशीलाया: अकारणमानकरणस्यातीवानौचित्यात्। मम मानेन ते किं दु:खमिति चेत् तत्राह, सपदि, त्वत्कोपसमय एव मदनानल:, अलक्षितान्तर्दाहक: कामाग्नि: मम त्वदुपेक्षितस्य मानसं दहति। अतोऽत्यार्त्त्या प्रार्थयामि, मुखकमलमधुपानं देहि। अन्तर्गतदाहस्य रसायनपानादेव निवृत्तिरिति भाव:। ननु मानिन्या अधरपानं न घटते। एवं चेत्, सत्यम्, अतिदुर्लभमिदं तिष्ठतु। किञ्च;

'स्निग्धमालपसि, रुक्षमेव वा त्वत् कथैव सखि! मे रसायनम्,
शीतलं सलिलमुष्ममेव वा पावकं हि शमयेदशंशयम्' इति।।

न्यायात्त्वं यदि किञ्चिदपि वदसि, तोषेण रोषेण वा भाषसे, तदा दन्तरुचिकौमुदी, दशनकान्तिचन्द्रिका, अतिघोरम्, इति कर्त्तव्यतानिराशकतया अतिक्रूरं दरतिमिरं, भयान्धकारं हरतु। दूरीकरोतु। तथा सति शिथिलितकोपायास्तव वदनचन्द्रमा: संलापोन्मुखसहजप्रसादशालिमुखसुधाकर:, लोचनमेव तद्दर्शनैकवृत्तितया चकोरस्तम्। स्फुरन् ईषत् चलन् योऽधरस्तस्य सीधुरिव । सीधुरिति लक्षणया सुधैव, तस्मै, अधरसुधां पातुमित्यर्थ। 'क्रियार्थोपपदे' इत्यादिना चतुर्थी, रोचयतु रुचिमन्तं करोतु। स्फुरणसूचित-चुम्बनाभिलाषाधरसुधारसास्वादनाय प्रोत्साहयत्वित्यर्थ:।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। वदसीति; पूर्वोक्तदशायां श्रीकृष्णस्य चाटूक्ति: समग्रे संस्कृतसाहित्ये अनन्येव भाति। अत: प्रियतमां प्रति नर्मोक्तिरियम्। हे प्रिये प्रियतमे चारुशीले कोमलस्वभाव-सम्पन्ने शोभनानने मयि तव मानं रोषं विमुञ्च त्यज। अनिदानमकारणं रोषं मुञ्च। अथवा अनिदानं सपत्नीसंभोगलक्षणकारणरहितममूलकम्। हे सुन्दरि प्रियतमे ममोपरि तवाकारणं मानं रोषं वा मुञ्च त्यज। सपदि इदानीं मदनानल: कन्दर्पाग्नि: कामार्ग्निवा मां दहति। ज्वालयति मम मानसम्। अत: तव मुखकमलस्य अधरनिस्यन्दितामृतपानं देहि। इत्येव ध्रुवपदम्। हे प्रियतमे चारु सुन्दरस्वभावसम्पन्ने मयि यत् मानमस्ति तत् त्यक्त्वा यदि किञ्चिद् व्रविषि तर्हि तव दन्तरुचिकौमुदी दशनपङ्क्तेरुज्ज्वलकिरणानि अतिघोरं नाम कुञ्जस्थितसान्ध्रतमसो दूरीकरणं भविष्यति। तेन भयापहरणं स्यात् चेत् विभावादि द्वारा गम्यस्थायीभावस्य शृङ्गारस्य विरोधि भयानकरसस्य परिहारो भविष्यति। दरत्रासौ भीतिर्भी: साध्वसं भयमि**त्यमर**:। दरोऽस्त्रियां भवे श्वभ्रे इति

**अमर**:। दरोऽस्त्री साध्वसे गर्ते कन्दरेतु दरीस्मृता। दराव्ययं मनागर्थे इति **मेदिनी**। तवाधर सीधु तवनिम्नोष्ठस्य मधु अमृतं तव वदनचन्द्रमसः स्फुरति नाम प्रवहति। तत् खलु अमृतं चकोरीभूतं मदीयं लोचनं प्रीणातु। स्पृहां जनयतु।। अत्र देशवराडी लक्षणं यथा;

आरब्धगमनमुद्रा घुर्णायमाननयनयुग्माढ्या।
सुखं शायिनी निजदयिते देशवराडी अवेदगौरी।
इति लघुदृतौ लघुश्चेति अष्टताली प्रकीर्तिता।।
इति काललक्षणं दीपिकाकारेण दत्तम्।

इयं अष्टपदी खलु बहुप्रसिद्धम्। तत्र किम्बदन्ती प्रचलति स्वयं कृष्ण देहि पदपलवे लिखित्वा पुरयामासः। परं संस्कृत साहित्य परम्परायामतद् नायिकानायकव्यवहारे सामान्यमेव।।१ ।।

**२-सत्यमेवासि यदि सुदति मयि कोपिनी देहि खरनखरशरघातम्।**
**घटय भुजबन्धनं जनय रदखण्डनं येन वा भवति सुखजातम्।। प्रिये० ।।२ ।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।२ ।। हे सुदति! राधे! मयि सत्यमेव यदि कोपिन्यसि, तदा खरनयनशरघातादिकं देहीति वाक्यार्थः। अन्यो यः क्रुद्धो भवति सोऽप्याघातादिकं करोतीत्यभिप्रायः। सुदतीति शोभना दन्ता यस्या इति विग्रहः। ''वयसि दन्तस्य दतृ'' अनेन दतृ इत्यादेशः। खरनयनशरघातमिति नयनमेव शरः प्राक् विग्रहः। तत खरश्चासौ नयनशरश्चेति कर्मधारयः। ततः खरनयनशरधातमिति षष्ठी समासः।।२ ।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।२ ।। अपि च, सत्यमिति। हे सुदति शोभनन्दन्ते! सत्यमेव यदि मयि कोपिन्यसि तर्हि सापराधे मयि खरनखरशरघातं देहि। भुजाभ्यां बन्धनं घटय। रदैः खण्डनं जनय। अथवा, किमुद्दिश्यते येन वा अपराधयोग्येन दण्डेन तव सुखजातं भवति स एव विधीयताम्। प्रभूणां हि सापराधेषु भृत्येषु ताडनबन्धनखण्डनादयो दण्डांः समुचिताः। अत्रैतदव्याजेन नखक्षतालिङ्गनचुम्बनादीन्प्रार्थयते।।२ ।।

## (३) जगद्धरकृत- सारदीपिका

।।२ ।। मृषारोषं प्रकारयन्तीमाह सत्यमिति हे सुदति! शोभनदन्ते यदि मयि विषये सत्यमेवासि कोपिनी क्रोधवती असि तदा खरा स्तीक्ष्णा येन खराः नखास्ते एव शराः नाराचास्तैर्घातं प्रहारं देहि तेनापि चेन्नतुष्यसि तर्हि भुजाभ्यां बन्धनं घटय कुरुरदैः दन्तखण्डनं घातं जनय विरचय वा अथवा येन मृष्ठ्यादिना सुखजातं सुखसमूहो

भवति तदेव कुरु प्रभूणां हि सापराधेषु जनेषु ताडनबन्धनखण्डनादयोदण्डा: समुचिता:।।२।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।२।। सत्यमेवेति। हे सुदति शोभनदशने! त्वं सत्यमेव यथार्थमेव यदि कोपवत्यसि तदा खरास्तीक्ष्णा ये नखास्त एव बाणास्तैर्घातं प्रहारं देहि। तेनापि यदि न तुष्यसि, तदा भुजाभ्यां बाहुभ्यां बन्धनं घटय; तेनाप्यसंतोषे रदखण्डनं रदैर्दशनै: खण्डनमधरे क्षतं जनय; येन वा सुखजातं सुखसमूहो भवति तदेव कुरु। तथा च मय्यपराधानुकूलं दण्डं विधाय कोपं मुञ्चेति भाव:। सुदति शोभना दन्ता अस्या इत्यस्य संबुद्धि:। दन्तस्य दत्रादेश:। 'जातं जात्योच्चजन्मसु' इति **विश्व**:।।२।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।२।। यदि कोपेन ममाशानुरूपम् उपकारं कर्त्तुं नेच्छसि ह्यर्तपकारमेतादृशं कुर्वित्याह। सत्यमिति। हे प्रिये, सुदति! शोभना दन्ता यस्या सा तादृशी तस्या: सम्बुद्धि:। ''वयसि दतीति'' दन्तशव्दस्य दत्रादेश:। दत्रादेशे उषितश्चेति नीप्। प्रियं वदे मयि कोषे एवासम्भावितोऽयुक्तश्च, तथापि विध्युपदेशरूपशिक्षणे न मामनुग्रहीतुं यदि सत्यमेव मयि कोपिनी कोपशीलासि। यद्वा कोपिन्यसीति यदि सत्यं यदिवान्वय: तर्हि कोपविषये मयि खरास्तीक्ष्णा: ये नयनरूपा: शरा: तैर्घातं प्रहारं देहि प्रयच्छ। यथा लोके कोपित: कोपविषयं शरैर्विध्ध्वा सन्तुष्टो भवति तथा त्वमपि नयनशरैर्मां विध्ध्वा सन्तुष्टा भवेति तात्पर्य्यम्। न केवलं प्रहारमात्रमपितु वन्धनं कुर्वित्याह। घटयेति। हे सुदति! भुजाभ्यां बन्धनं भुजयोर्वन्धनं घटय योजय। ''घटादयोमित्'' इति मित्संज्ञायामुपधा ह्रस्व:। न केवलं प्रहारवन्धने अपि तु दशनक्षतमपि कुर्बित्याह। जनयेति। हे सुदति! रदाभ्यां दन्ताभ्यां खण्ड़नं मदीयाधरभेदाधानं जनय सम्पादय। यथा लोके महाकोप: पुमान् कोपबिषयस्याङ्गच्छेदनं कृत्वा यथा निष्पापो भवति तथा त्वद्दन्ताग्रैर्मदीयमङ्गं च्छित्वा निरस्तकोपा भवदिति तात्पर्य्यम्। ननु लोकविरुद्धमात्मनि शरीघातादिकं कथं प्रार्थ्यत इत्याशङ्क्याह। येनेति। येन शरीराघातादिना सुखजातं सुखजन्म भवति। अथवा सुखजातं सुखसन्दोहो भवति तादृशशरघातादिप्रार्थनं न विरुद्धमिति भाव:। अथवा शरघातादिना मध्ये येन कार्य्येण तव सुखजातं भवति तज्जनयेत्यनुषङ्ग:।।२।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।२।। यद्यवान्तरकारणेनाप्यतिकुपितासि तदा मारणादिकं कोपकृत्यमेव क्रियता-मित्याह, हे सुदति शोभनदशने! सत्यमेव मयि त्वं यदि कोपिनी असि तदा

खरनखशरघातं तीक्ष्णनखनाराचघातं देहि। भुजाभ्यां बन्धनं घटय। रदखण्डनं जनय। अन्येनापि कोपेन शराघातं बन्धनखण्डनादिकञ्च क्रियत इत्युचितमेव। येन वा चरणप्रहारादिना तव सुखजातं सुखसमूहो भवति तदेवं कुरु। यद्वाऽहं कोपिनीति भवान् कथं मन्यत इति राधावचनमाशंक्याह येनैवेति। यदि न कोपिन्यसि तदा येनैव सुखजातं सुखसमूहो भवति ममेत्यर्थात्, तदेवं कुरु। तदत्र येनेति पदेन गुह्यकर्मापि प्राथितमिति। 'रदस्तु दशनो दन्त' **इत्यमर**:। 'समूहे उद्भवे जातमिति **धरणि**:।।२ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।२ ।। एवमप्रसन्नां दृष्ट्वा[१]सानुकूलं दण्डमेवादिशन्नाह सत्यमेवासीति। हे[३] सुदति शोभन[४]दशने सत्यमेव यथार्थं यदि मयि कोपिनी क्रोधवत्यसि तदा खरनखरशरघातं तीक्ष्ण[५]नखनाराचघातं देहि। अनेन नखप्रहारदानेन सुरतमेव ध्वनितम्। अयमेव [७] पुरो दण्ड:। [८]किञ्च[९]सापराधस्य [१०] भुजबन्धनमपि युक्तमेव। भुजबन्धनमेव घटय कुरु न [११] रज्ज्वादिना। किञ्च [१२] रदखण्डनं जनय विरचय। एतेन दण्डातिशय: प्रोक्त:। स यथा,

दयिताबाहुपाशस्य कुतोऽयमपरो विधि:।
जीवयत्यर्पित: [१३]कण्ठे मारयत्यपवर्जित:।।

येन [१४] तव सुख[१५]समूहो भवति तद्विधेहि।।२ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।२ ।। सत्यमिति। हे सुदति [१६] शोभनदन्ते यदि मयि विषये सत्यमेव कोपिनी क्रोधवती असि तदा[१७]खरनखरशरघातां तीक्ष्णनखं[१८]बाणघातं देहि। अनु च भुजबन्धनं घटय कुरु; रदखण्डनं दन्तघातं जनय [१९] विरचय। [२०] वा अथवा [२१]येन मुष्ट्यादिना सुखजातं सुखसमूहो भवति।।२ ।।

१.दर-अ.ब. २.सानुकूलदण्डमुपदिशन्नेवाह-इ.फ.ह.ज.स्वानुकूलदण्डमुपदिशन्नेवाह-ग. ३.सुन्दरि-अ.ब. ४.दर्शने-अ.ब. ५.नखर-ग. ६.दाने-अ.ब. ७.परो-इ.फ.ग.ह.ज. ८.नास्ति-अ.ब. ९.सापराधबन्धमपि-ग. १०.बन्धनमपि-इ.फ.ह.ज. ११.रक्षादिना-इ. १२.दर-अ.ब.ह. १३.कोषे-अ.ब. १४.तत्सुख-अ.ब. १५.संमोहो-ग. १६.शोभनदन्ति-क.ल.म. १७.खरघातं-ड.खरनखरघातं-ल. १८.बाणनाराचघातं-ड. १९.रचय-क. २०.नास्ति-क. २१.नास्ति-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२ ।। सत्यमेवेति। हे सुदति सुष्ठु शोभना: दन्ता: यस्यास्तत्सम्बोधनम्। दन्तशब्दस्य दतृ आदेशादनन्तरं ङीष्। त्वं मयि कोपिनी रोषवती सत्यमेव यथार्थमेव असि चेत्

खरा: तीक्ष्णा: नखरा एव शरा: तैर्घातं प्रहारं देहि। भुजाभ्यां बन्धनं घटय योजय ; रदै: खण्डनं दन्तै: अधरदंशमादिकं जनय कुरु येन नखघातादिना सुखजातं आनन्दसमुदाय:। जातिर्जातञ्च सामान्यम् **इत्यमर**: (१.५.३१)। भवति (इति) वाक्यालङ्कारे। कोपावेशेन नखप्रहारादिकरणे कोपस्य कृतकार्यत्वाच्छमो भवति तेन सुखं भवतीति भाव:। तेन स्वस्य अङ्गनालिङ्गनाद्यभीष्टप्राप्तिर्भवतीति वस्तुना वस्तुध्वनि:। कोपिनी यदीति कथनात्कोपाभावेऽपि आलिङ्गनादिकमावश्यकमिति भाव:। यद्यर्थोक्तत्वात्कोपो नास्त्येव ।।२।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।२।। सत्यमिति। हे सुदति! राधे! मयि मद्विषये सत्यमेव यदि कोपिन्यसि तत्त्वत एव यदि कोपनशीलासि न पुनरलीकतया तदा खरनयनशरघातं देहीति वाक्यार्थ:। कोपिनीति। कोपितुं शीलमस्या इति ताच्छीलिको णिनि। खरनयनशरघातमिति। खरस्तीक्ष्णो यो नयनशरश्चक्षुर्बाणस्तेन तस्य वा घातो हननं प्रहरणमिति यावत्। अन्योऽपि य: क्रुद्ध: अपराधिनं शरादिना हन्तीति व्याजार्थ:। मां निरीक्षस्वेति स्वरूपार्थ:। भुजाभ्यां बन्धनमालिङ्गनमिति तात्त्विकोऽर्थ:। रदखण्डनं जनयेति ।सापराधस्य खलु खण्डनं क्रियते इति व्याजोक्त्या अधरपानं कुरुष्वेत्यभिप्राय:। ''रदो विलेखने दन्त'' इति **विश्व**:। येन वा भवति सुखजातमिति । येन वा सुखजातं सुखोत्पत्ति: सुखसमूहो वा भवति तत् कुर्वित्यर्थ:। शरप्रहारबन्धनखण्डनेभ्योऽप्यधिकतरं यन्मनसि तवास्ते तत् कुरुष्वेति गुणाभिसन्धिरर्थ:। क्रोधविषये कथिते..... प्रतिपादनं दर्शनादिप्रस्तावे येन वा भवति सुखजातमित्यनेन सुरतमेव प्रतिपादितम्। ''जातं व्यक्तौ च जन्मसु'' इति।।२।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।२।। त्वदेकजीवने मयि रोषो न सम्भवति चेत्तर्हि एवं कुर्वित्याह। हे सुदति! प्रसन्नवदने! यदि सत्यमेव मयि कोपिन्यसि, तदाखरा एव नयनशरास्तै: प्रहारं कुरु, चेन्न तुष्यसि, तदा भुजाभ्यां वन्धनं घटय, तेनापि असन्तोषस्तदा रदनै: दशनै: खण्डनं जनय। किं वहुनोक्तेन, येन वा सुखजातं भवति सुखमुत्पद्यते तदेव कुरु। अत्र गूढ़ोऽभिप्राय: स्वीयेऽपराधिनि दण्ड एवोचितो नोपेक्षा इति भाव:।।२।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।२।। ननु कोपनाया: किञ्चिदपि भाषणमपि न सम्भवेदिति चेत्तर्हि दण्डविधानेन कोपं समापयेत्याह, सत्यमिति। हे सुदति! सुन्दरदन्ति! पूर्वं दन्तरुचिस्फुर्त्त्या सुदतीति

सम्बोधनम्। मयि विधेयजने यदि सत्यं कोपिनी एवासि, तर्हि खरनखरास्तीक्ष्णनखास्त एव शरास्तैर्घातं देहि। प्रहारं कुरु, इत्यर्थः। तेन चेन्न तुष्यसि, तदा भुजबन्धनं घटय। बाहुपाशाभ्यां बन्धं रचय। यदि चानेनाप्यसन्तोषस्तदा रदखण्डनं जनय। क्रोधवशाद-धरादिषु दन्तैर्दशनं कुरु इत्यर्थः। किं बहूक्तेन, येन वा विधानेन सुखं जातं, तव बहुसुखं भवति, भविष्यति, तदेव कुरु इति गूढोऽभिप्रायः। एवमपराधिनि जने दण्ड एवोचितो न चापेक्षेति भावः।।२ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२ ।। सत्येति; हे सुदति हे शोभनदन्तयुक्ते एतदेव सत्यं यत् त्वं यथा कोपं करोसि मयि तर्हि मयि खर तीक्ष्ण नखशराघातं नाम नखकृन्तनेन मां आघातं देहि। अथवा नयनशराधानं नाम नेत्रचालनेन शराधातं कुरु। तेन द्वितीयोदण्डः बन्धनं कुरु तव भुजेन पुनः रदखण्डनं जनय दण्डरूपेण दन्तखड्गेन मां खण्डविखण्डनं कुरु। येन केन वा तव सुखं भवति तदनुगुणं दण्डो विधीयताम्। अत्र नखरशराघातः पाठान्तरे खलु नयनशराघातमधिकं युज्यते।२ ।।

**३-त्वमसि मम भूषणं त्वमसि मम जीवनं त्वमसि मम भवजलधिरत्नम्।**
**भवतु भवतीह मयि सततमनुरोधिनी तत्र मम हृदयमतियत्नम्।। प्रिये० ।।३ ।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।३ ।। त्वमसीति मम भवजलधिरत्नमिति, भवः संसारः स एव जलधिः समुद्रः तत्र मे त्वं रत्नमसि सहस्रेषु श्रेष्ठेत्यर्थः। ''जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्षते'' इति **पदसागरः**। यतस्त्वं रत्नरूपा ततो भवत्विति तत्रार्थे, मम हृदयमतियत्नम्, अत्र वृद्धो यत्नो यस्येति विग्रहः।।३ ।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।३ ।। अपि च, त्वमसीति। तव अन्या एव सन्ति, ता एव प्रार्थ्यन्तामित्याशङ्क्याह, मम त्वमेव भूषणमसि। त्वयाऽलंकृतोऽहमन्यासु सौभाग्यवान्। अथ तिष्ठतु बाह्यभूषणम्। मम जीवनमपि त्वमेवासि। अथ जीवनमपि तिष्ठतु। जीवनेऽपि भवजलधौ रत्नं त्वमेव। 'भवजलधि' ग्रहणमन्यस्य परिग्रहस्य जडत्वद्योतनार्थम्। भवतीह विषये मयि सततमनुरोधिनी कृपापरा भवतु। अत्रैवार्थे मम हृदयमतीव यत्नपरं विद्यते।।३ ।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ।। ननु यात प्रिया सा द्रोह विदधातु किं मयाऽत आह त्वमसीति। हे राधे! त्वं मम जीवनं प्राणाऽसि त्वां विना स्थातुं शक्यत्वात् त्वं मम भूषणम् अलंकारोसि त्वं

मम भवजलधौ संसारसागरे रत्नमसि जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते इति स्त्रीरत्नम् उक्तम् इह एता दृशे मयि भवती सततं निरन्तरम् अनुरोधिनी अनुकुला भवतु तवानुकूल्ये मम हृदयं मनः अतियत्नम् अतिशययत्नयुक्तं भवति तवानुकुल्यार्थम् अतिशयं यत्नं करोमीत्यर्थः ।।३ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।३ ।। ननु या तव प्रिया तस्या मानं मोचय। मे मानत्यागे तव किं प्रयोजनमित्यत आह, त्वमसीति। त्वं मम जीवनमसि। त्वयि विषण्णायां मम विषादो भवति, प्रसन्नायां प्रसाद इति त्वमेव जीवनमिति भावः। त्वं मम भूषणमलंकरणमसि। त्वां विना न परमा कान्तिरिति त्वमेव मम लोकोत्तरं भूषणमिति भावः। भवजलधौ संसाररूपे रत्नाकरे त्वमेव मम रत्नमसि। यथा दरिद्रस्य रत्ने दृष्टे परमानन्दो भवति, एवं मम त्वय्यपि दृष्टायामिति भावः। भवत्विति। इह प्रणते मयि भवती सततं सदानुरोधिनी भवतु। तत्रार्थे मम हृदयमतियत्नवत्।।३ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।३ ।। इतोऽपि नयनप्रमुखप्रहारादिप्रार्थनां युक्तमित्याह, त्वमसीति। हे प्रिय! यतः मम भूषणम् अलङ्कारस्त्वदासीन केवलमलङ्कारमात्रमपि तु जीवनमेव त्वमेवासि। न केवलं जीवनमात्रमपितु मम भवः संसारः उत्पत्तिर्वा, स एव जलधिस्तत्र रत्नम्। रत्नमिव त्वमेव संसारसाफल्यसम्पादिका जन्म साफल्यसम्पादिका चेत्यर्थः। अत्र राधायां अनुरोधत्वे इह तु त्रयं क्रमेणाधिक्यद्योतनार्थं मुञ्च इत्यवगन्तव्यम्। अतश्चैवं बिधया राधया हृदयाद्जीवननयनप्रार्थनमुक्तमेवेतिभावः। अतः कारणात् इह मयि अस्मिन् मयि सततमनवरतमनुरोधिनी अनुसरणशीला भवतु, भवद्योगात् प्रथमपुरुषः। अनुवर्त्तनं किमर्थमुक्तमित्याकाङक्ष्यायामाह! तत्रेति। हे भवति! तत्र त्वत्कृतानुरोधे मम हृदयमतियत्नम् अतिशयेन साभिलाषं वर्त्तत इत्यर्थः। अतश्च मच्चित्तसन्तोषाय मदनुसरणं त्वया कार्य्यमिति तात्पर्य्यम्।।३ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।३ ।। पुनरनुकूलवचनेनानुनयति, त्वं मम जीवनं प्राणवायुरसि। तथा च त्वयि बहिर्भूतायां मम शरीरं सहसैव निश्चेष्टं स्यादिति वाक्यार्थः। त्वं मम भूषणमसि। तथा च भवदनासङ्गे तदैवेदं शरीरं न शोभां धास्यतीति वाक्यार्थः। त्वं मम भव एव जलधिरपारत्वात्, तदुत्पन्नं रत्नमसि अन्यदपि रत्नं समुद्रादुत्पद्यत इति ध्वनिः। तथा चान्येनापि विजातीयचिन्तामणिप्रभृतिरत्नेन सकलाभिमतसिद्धिर्भवति भवत्यापि तथेति

वाक्यार्थः। इह प्रस्तावे भवती मयि अनुरोधिनी अनुवर्तमाना भवतु। तत्र सततं वारम्बारं मम हृदयम् अतियत्नम् अत्यर्थेन यत्नो यस्यैतादृगित्यर्थः। तथाच जीवनाद्यनुवर्त्तनाय यत्नः समुचित एवेति भावः 'अनुरोधोऽनुवर्त्तनमि'**त्यमरः**।।३।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।३।। एवं कृतदण्डां [२]प्रतोष्याह, त्वमसीति। हे प्रिये! त्वं मम [३] जीवनं प्राणोऽसि। त्वां विना मम जीवनमपि दुर्लभमिति भावः। त्वं मम भूषणमलङ्कारोऽसि त्वां विना भूषण[४]मप्यभूषणमेव ; अङ्गभूषणं त्वदङ्गमेव। एतेनालिङ्गनविधिः[५]प्रार्थितः। किञ्च भवजलधौ संसारसमुद्रे त्वमेव मम रत्नमसि ; स्वजन्मरत्नाकरे त्वमेव मया रत्नं लब्धमिति भावः। किं बहूक्तेन [६] मया ; [७]यथा कश्चिद्रत्नाकरे प्रविश्य[८]संशोध्य महद्रत्नं प्राप्य[९]सुखी भवति तथा [१०] स्वजन्मरत्नाकरे [११] त्वां प्राप्याहमिति। [१२] इह त्वेक [१३]जीवने मयि भवती पूज्या सततं [१] निरन्तरमनुरोधिनी अनुकूला भवतु। [२] तवानुकूले प्रसादे मम हृदयमतियत्नमतिशय [३] यत्नयुक्तं भवति ।।३।।

१.त्वमसि मम भूषणं त्वमसि मम जीवनं-नि.सा. २.प्रत्याह-इ.फ.ग.ह.ज. ३.जीवितं-अ. ४.अभूषणं ममाङ्गभूषणं त्वदङ्गमेव-ग.अभूषणमेवाङ्गभूषणमेव त्वदङ्गम्-फ.ज. ५.प्रार्थिता-अ.ब. ६.नास्ति-इ.फ.ग.ह.ज. ७.नास्ति-अ.ब. ८.नास्ति-अ.इ.फ.ग.ह.ज. ९.प्रार्थिता-अ.ब. १०.त्वज्जन्मरत्नाकरे-इ.ह.मज्जन्मरत्नाकरे-ग.त्वां जन्मरत्नाकरे-फ.ज. ११.नास्ति-फ.ज. १२.इह त्वदेकजीवन–इ.फ.ग.ह.ज. १३.जीवनमपि-अ.ब.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।३।। त्वमसीति। हे राधे! त्वं मम जीवनं प्राणोऽसि त्वां विना स्थातुमशक्यत्वात्। त्वं मम भूषणं अलङ्कारोऽसि। त्वं मम भवजलधिरत्नं संसारसागरनिधिरसि। जातौ जातौ यदुत्कृष्टं तद्रत्नमभिधीयते इति; स्त्रीरत्नं त्वमुक्तम्। इह एतादृशे मयि भवती सततं निरन्तरं अनुरोधिनी अनुकूला भवतु। तत्रानुकूल्ये मम हृदयं [४] मनः अतियत्नं अतिशययत्नयुक्तं भवति। तवानुकूल्यार्थं अतिशयं यत्नं करोमीत्यर्थः।।३।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।३।। त्वमसीति। त्वं मम जीवनं प्राणसाधनं असि जीवितं वा। त्वं मम भूषणं कनककिरीटादिमण्डनं असि भवसि। जीवनस्यानन्तरत्वेन गूढत्वात् प्रसिद्धार्थं मण्डनत्वारोपः। त्वं मम भवः संसार एव जलधिः समुद्रः तद्रत्नम्। श्रेष्ठत्वेन मुक्तामणित्वारोपः। कनकादेरुत्कृष्टत्वात्। एकस्या राधायाः जीवनत्वभूषण-त्वरत्नत्वादीनां बहूनामारोपान्मालारूपकालङ्कारः। असीति क्रियापदस्य पुनः पुनरावर्तनादावृत्तिदीपकालङ्कारः। तेन च भवस्य समुद्रत्वारोपरूपकेण चाङ्गाङ्गिभावेन

सङ्कीर्ण:। हेति खेदे। भवती त्वमपि सततं सदा अनुरोधिनी अनुरागिणी मदनुकूलेति यावत् भवतु। तत्र आनुकूल्ये साभिलाषत्वे मम हृदयं अन्त:करणं अति अत्यर्थं यत्न: त्वत्सुखसमार्जनाय त्वदभीष्टानुष्ठानरूपो यस्तत्। तिष्ठतीति शेष:। एवं स्थिते त्वदनादर: कदा (अपि) न क्रियत इति भाव:। इह अस्मिन् कोपत्यागे इति वा।।३।।

१.निरन्तरमनुकूला-अ.ब. २.तत्र प्रसादे-इ.तव प्रसादे-ह.तत्र मम हृदयं-ग.फ.ज. ३.रत्नं-अ. ४.नास्ति-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।३।। त्वमसीति। हे प्रिये! त्वमसि मम भूषणं, त्वं ममालङ्कृतिरसि। त्वमसि मम जीवनं, त्वया प्राणवानहमित्यर्थ:। त्वमसि भवजलधिरत्नमिति । भव: संसार एव जलधिर्दुस्तरत्वादनन्तत्वाच्च अत्र त्वं रत्नमसि। स्त्रीजातिश्रेष्ठा वा। ''जातौ जातौ यदुत्कृष्टं तद्धि रत्नं प्रचक्ष्यते'' इति। इत्यु...नुरोधिनी भवतु। कामयुक्ता अनुवर्तिनी वा भवतु। ''अनौरुध: कामे'' इति। ''अनुरोधोऽनुवर्तनम्'' **इत्यमर**:। अत्र विषये म....करणे, मम हृदयमतियत्नम् अतिशयितनिबद्धम्। तदर्थमतितरां प्रवर्तित इत्यर्थ:।।३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।३।। ननु त्वयि मम कोपस्य क: प्रसङ्ग: दण्डस्य वा या तव प्रिया सैव दण्डं करोत्विति चेत्तत्राह। त्वमेव मम जीवनं असि त्वमेव मम भूषणमसि, त्वद्व्यतिरेकेण अन्यजीवनादिकमपि चेन्नास्ति तर्हि अन्याङ्गनानां का वार्त्तेत्यर्थ:। यतो भव: संसार: स एव जलधि: तत्र त्वं रत्नरूपा सर्वप्रेयसीश्रेष्ठेत्यर्थ:। यथा कश्चिद्रत्नाकरात् विचित्ररत्नं लव्ध्वा आत्मानं पूर्णं मनुते तथास्मिन् लोके स्त्रीरत्नं त्वां प्राप्य कुतार्थोऽस्मीतिभाव:। अतएव भवतीह निरन्तरं मय्यनुकूला भवतु इत्यर्थ:। मम हृदयमतिशयेन यत्नो यस्य तत्।।३।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।३।। ननु या तव प्रिया सैव दण्डं विदधातु, इत्याशंक्याह, त्वमसीति। हे प्रिये! त्वमेव मम, त्वद् विरहासहननिर्यत्प्राणस्य जीवनमसि, जीवननिदानमसि। त्वयि विमुखायामहं जीवन्नपि न जीवामीत्यवेहि। यथोक्तमन्यापदेशे;

'अयि किं गुणवति! पद्मिनि! जीवति भवतीं विनाऽपि असौ मधुप:।
अथ यदि जीवति, जीवितु। जीवनमपि जीवनाभास:।।'

इति न केवलं त्वं मम जीवननिदानमात्रम्। किं च शोभानिदानमपीत्याह, त्वमेव मम

भूषणमसि। सर्वातिशायिसौभाग्यनिदानालङ्कारभूतासि, इत्युक्त्वा कथं मुग्धाऽहमेकाकार-सन्निधानमात्रशोभाधायिना भूषणेन त्वां निरूपयामीत्यत्रापरितुष्यन्नाह, हे प्रिये! स्मरणदर्शनस्पर्शनादिसमयेषु निरूपमानन्दसन्दोहदायिनि! त्वं त्वत्प्रसादसौभाग्यभाजो मम भव एव जलधिस्तत्र रत्नमसि। सकलवस्तु सारभूतविविधमनोरथ-फलसाधनसर्वावस्थास्पृहणीयरत्नरूपासीत्यर्थः। यथा कश्चिन्महादरिद्रश्चिन्तामणिं प्राप्यात्मानं पूर्णं मनुते, तथाहं त्वां लब्ध्वा कृतार्थोऽस्मीति भावः। अतो भवती, त्वमिह त्वद्वशवर्त्तिनि मयि सततं निरन्तरमनुरोधिनी भवतु। प्रसादशिक्षणयोरेकतरेण दाक्षिण्यशालिनी भवतु। मम त्वदेकगतिकस्य हृदयं विचारचतुरं मनः तत्र भवद्दाक्षिण्ये अतियत्नम्, अतिशयेन यत्नं तात्पर्यं यस्य तादृशं वर्त्तत इति शेष।।३।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। त्वमसीति; त्वं मम भूषणमलंकारेति चाटूक्तिः। हे प्रियतमे त्वं मम भूषणं ममालंकारः, त्वं मम प्राणभूतं जीवनं त्वं मम भवसागरस्य नाम भवजलधेः त्वं मम रत्नं येन जीवाम्यहम्। यद् वा भवतु, भवती अत्र मयि दण्डादिना यदनुष्ठीय सुखमनुभवति तथैव करोतु।।३।।

**४-नीलनलिनाभमपि तन्वि तव लोचनं धारयति कोकनदरूपम्।**
**कुसुमशरबाणभावेन यदि रञ्जयसि कृष्णमिदमेतदनुरूपम्।। प्रिये०।।४।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।४।। हे तन्वि! तव लोचनं नीलनलिनाभमपि सम्प्रति कोलनदरूपं रक्तोत्पलसादृश्यं धारयति तदेतेन त्वयि लोहितलोहितीकरणविद्यास्तीत्यवधारितं मन्यते। यदि कृष्णं कृष्णभासं त्वं कुसुमशरवाणभावेन रञ्जयसि कामवाणेन लोहितीकुरुषेत्यर्थः। प्रायेण मन्मथवाणाः रक्तपुष्पविनिर्मिता इत्यागमः। नीलिम्नो लोहितकरणान्न महती प्रतिष्ठेत्यभिप्राय। छलतस्तु कृष्णनामानं मां यदि कुसुमशरवाणभावेन कटाक्षेण रञ्जयसि अनुरागिणं करोषीत्यर्थः प्रतिपादितः। ''भाव स्वभावनिर्मोक्ष निश्चयाध्याय सृष्टिष्वित्**यमरः**'' ।।४।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।४।। अपि च, नीलेति। हे तन्वि! नीलनलिनाभमपि कृष्णरूपमपि तव लोचनं कोकनदरूपं रक्त्तिमानं धारयति। अतो यदि कुसुमशरबाणचेष्टया कुसुमशरबाणाधीना

भूत्वा यदि मामपि कृष्णं रञ्जयसि तदा इदं रञ्जनमेतल्लोचनरञ्जनानुरूपं स्यात्। इदमाकूतम्, यथा मयि कोपेन त्वया कृष्णं लोचनं रक्तं कृतं तथा मयि प्रसादपरा भूत्वा कुसुमशरभावेन कामबाणानां कटाक्षादीनां चेष्टया मयि रक्तं कुरु, कोपं त्यक्त्वा प्रसादपरा भवेत्यर्थः। अथवा, कुसुमशरभावेन यदि नीलनलिनाभमपि लोचनं कोकनदरूपं धारयति तर्हि एतदिदं तवानुरूपम्।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। नीलेति हे तन्वि! कृशाङ्गि! नीलनलिनस्य नीलोत्पलस्येवाभाकान्ति यस्य तत्तवलोचनं कोकनदरुपं रक्तोपलसरुपतां धारयति धत्ते रोषारुणत्वात् यदि इदं चक्षुः कृष्णं श्यामं कुसुमशरः कामस्तस्य बाणः पुष्पाणि तेभ्यो भाव उत्पत्तिर्यस्य मधुनस्तेन रञ्जयसि रक्तं करोषि तदा एतद्रक्तं रुपम् अनुरुपं योग्यं भवति यदि मधुपानं करोषि तदा नेत्रस्य रक्तत्वमुचितं न रोषादिति भावः।।४।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।४।। नीलेति। हे तन्वि कृशाङ्गि! नीलनलिनस्य नीलोत्पलस्येवाभा दीप्तिर्यस्यैतादृशं तव लोचनं रोषारुणं यत्कोकनदरूपं रक्तोत्पलसौन्दर्यं धारयति। यदि च कुसुमशरः कामस्तस्य बाणभावेन बाणत्वेन तद्बाणाभिप्रायेण वा इमं कृष्णं च रञ्जयसि रक्तं करोषि। एतस्य चक्षुषोऽनुरूपं सदृशम्। शारा हि सततं परशरीरशदिनो रुधिभेक्तत्वेनारक्ता भवन्तीति भावः। यद्वा, कुसुमशरबाणभावेन कुसुमशरस्य बाणरूपो यो भावोऽभिप्रायस्तेन। यद्वा, कुसुमशरबाणभावेन तद्बाणस्वरूपेण चक्षुषा भित्त्वा कृष्णं मां यदि रञ्जयसि। इदं रञ्जनमेतस्यास्तवैतस्य बाणस्य चानुरूपं सदृशम्। श्यामे लौहित्यापादनसमर्थायास्ते मम रञ्जनमनुरूपमेवेति। यश्च बाणेन ताड्यते स रुधिरादिना रक्तो भवत्येवेति भावः। कुसुमशरबाणभावेनानेन नयनेन कृष्णं नन्दात्मजं मां रञ्जयसि प्रणयास्पदं करोषीति। इदमेतस्यास्तवानुरूपमेवेति प्रकृतार्थो भवेत्।
'कोकनदं रक्तकैरवे रक्तपङ्कजे' इति **विश्वः**।।४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।४।। स्फुटकोपमङ्गीकुर्वत्यास्तस्यानुरूपं कार्य्यं वर्ण्णयति नीलेति। हे तन्वि! प्रिये! तवलोचनं नयनं नीलनलिनाभं नीलोत्पलसमानवर्ण्णमपि कोकनदस्य रङ्गोत्पलस्य रङ्गोत्पलं कोकनदमित्यमरः। तस्य रूपं तत्समवर्ण्णमित्यर्थः धारयति धत्ते।

अरविन्दमशोकञ्च चूतञ्च नवमल्लिला।
तथा कोकनदं चैव पञ्चबाणस्य सायकाः।।

इति वचनान्मन्मथसायककोकनदभावं कोपेन तत्समानवर्ण्णं च धत्ते इत्यर्थः। इदं कोकनदरूपत्वेन परिदृश्यमानं नीलचक्षुः कुसुमशरस्य कामदेवस्य वाणभावेन वाणरूपकोकनदाकारत्वेन कृष्णं कृष्णाभिधानं नीलवर्ण्णं च मां यदि रञ्जयति अनुरक्तं करोति रक्तवर्ण्णं च करोति तदा तत्कोकनदरूपत्वम् अनुरुपमुचितं भवति। लोके रक्तं जवाकुसुमादिकं स्वसन्निधानादन्यं रञ्जयति। कामसायकः काममनुरञ्जयति। धृतकोकनदभावमिदं चक्षुः यदि स्वोचितकार्य्यं न करोति तदा स्वरूपमेव गच्छेत्। अत एव कोपं परित्यज्य मामनुरञ्जयेति भावः।।४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।४।। पुनरनुनयपुरःसरं निजानुरञ्जनमनुनयति, हे तन्वि कृशाङ्गि! नीलनलिनाभमपि तव लोचनं धारयति। कोकनदरूपं रक्तोत्पलरूपं धारयति। धृधातोः स्वार्थे इनच्। कुसुमशरबाणः कन्दर्पः। श्रृ हिंसायां धातुः। शरो हि हिंसा। कुसुममेव शरार्थो हिंसार्थो बाणो यस्येति व्युत्पत्तिः। तेन कुसुमशरबाणभारेण कामजनितकृष्णां मां यदि रञ्जर्यास तदा इदं मदनुरञ्जुकत्वमेतदनुरूपत्वम् एतस्याः कृष्णानुरञ्जिकायास्तवानुरूपं योग्यम्। तथा च स्वभावकृष्णलोचनं कोपेनारक्तं करीषीति श्यामानुरञ्जिकया भवत्या अहमपि कृष्णोऽनुरञ्जनीय इति शब्दच्छलेन प्रार्थनमिति वाक्यार्थः। 'रक्तोत्पलं कोकनदमि' **त्यमरः**।। 'रुच्यर्थयोगे' इति पाठः।।४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।४।। एवं स्वदण्डमुक्त्वा सम्प्रति सुरतोत्सवानु[३]कारि लोचनानुरागं वर्णयन्नाह नीलेति। हे तन्वि कृशाङ्गि नीलनलिनाभं नीलोत्पल [४] सदृशमपि तव लोचनं कोकनदरूपमतिरक्त-कमलसदृशं धारयति। मां प्रति रोषारुणत्वं धत्ते। एतेन[५]रागावलोकनं प्रार्थितमिति ध्वनिः। यदि इदं चक्षुः कृष्णं[६] श्यामं कृष्णं मां वा कुसुमशरस्य बाणभावेन बाणत्वेन रञ्जयसि [७] तद्युक्तं करोषि। तदेतच्चक्षु[८]रनुरूपं योग्यं [९]भवतीत्यर्थः।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। नीलेति। तन्वि कृशाङ्गि नीलनलिनाभमपि नीलोत्पलसदृशमपि तव लोचनं कोकनदरूपं रक्तोत्पलसरूपतां धारयति धत्ते; रोषारुणत्वात्। यदि इदं चक्षुः कृष्णं श्यामं सत् कुसुमशरः कामस्तस्य बाणाः पुष्पाणि तेभ्यो भाव उत्पत्तिर्यस्य [१०]मधुनस्तेन रञ्जयसि रक्तं करोषि[११]तदा एतद्रक्तरूपं अनुरूपं योग्यं भवति। यदि मया सह मधुपानं करोषि तदा नेत्रस्य रक्तत्वमुचितं न रोषादिति भावः।।४।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।४।। नीलेति। हे तन्वि मृद्वि सुकुमारे त्वं नीलनलिनं नीलोत्पलं तस्याभेवाभा यस्य तत् तव लोचनं कोकनद: रक्तोत्पलं तस्य रूपं आरक्तवर्णं धारयसि कारयसि। रोषवशात्तव लोचनमारक्तं जातमिति भाव:। कृष्णं नीलवर्णं इदं लोचनं कुसुमशरस्य मन्मथस्य बाणभावेन शरत्वेन रञ्जयसि यदि एतन्नेत्ररञ्जनं अनुरूपं युक्तम्। अत्र एतद्युक्तमित्यनेन सम्भाव्यमाने रञ्जनोत्प्रेक्षया गूढया रोषकृतारुण्यस्य निह्नवादपह्नवालङ्कारो व्यज्यते। रोषारुण्यं न भवति किन्तु रञ्जनारुण्यमिति। तेनापह्नवेन मयि कदाऽपि तव रोषो नास्तीति वस्तु व्यज्यत इत्यलङ्कारेण वस्तुध्वनि:।।४।।

१.धारयसि-इ.२.कृष्णमेतदनुरूपम्-अ.ब.३.कारी-फ.ग.ज.४.सदृशं-अ.ब.५.सरागावलोकनं-इ.फ.ग.ह.ज.६.स्यात्-ग.७.रागयउक्तं-इ.फ.ग.ह.ज.८.अनुकूलं-अ.ब.९.भवति-इ.फ.ग.ह.ज.१०.मधुरं जनयसि-ड.मनस्तेन रञ्जयसि-क.११.यदि इदं चक्षु: तदा एतद्रक्तं रूपं-क.एतद्रक्तं रूपं-ड.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।४।। नीलेति। हे तन्वि! तव लोचनं प्रकृत्या नीलनलिनाभमपि....कोकनदरूपं रक्तोत्पलसौन्दर्यं धारयति बिभर्ति। नीलं चक्षु: कोपात् सरागमित्यर्थ:। इदं नोचितम्। स्वरूपस्य वैरूप्यकरणात् प्रियस्य वशवर्तिनीत्वाच्च। तन्वीति योग्यपदोपादानं यदुचितं तदाह। यदि स्वभावात् कृष्णमिदं चक्षु: कुसुमशरबाणभावेन कामशराभिप्रायेण कोकनदरूपीभूतं रञ्जयसि सराग....तवानुरूपं युक्तमित्यर्थ:। प्रायेण मन्मथबाणा: रक्तपुष्पनिर्मिता इत्यागम:। ''भाव: सत्तास्वभावाभिप्रायचेष्टात्मजन्तुषु'' इति। किं वा कामबाणभावेन यदि सम्भावनायाम् इदं कृष्णं चक्षु: रक्तं करोषि एतद्युक्तम्। बाणानां प्रायो रक्तवर्णत्वात् कृष्णवर्णेन रक्तिमातिशयारोपणात् क्षतजनकत्वेन वासरक्त.....तव नीलनलिनाभमपि लोचनं कोकनदरूपं धारयति। अर्थात् कोपेन यदि कुसुमशरबाणभावेन कामशरसकाशात् यो भावश्चेष्टा सुरतमिति यावत्। तेन कृष्णं मां रञ्जयसि अर्थात् कामाधीना भूत्वा सुरतेन मां प्रीणयिष्यसि तदा इदं प्रीणनम् एतदनुरूपम् एतस्य त्वल्लोचनस्य सदृशं भवति। ध्वनिश्च नीलनलिनाभम् अर्थात् कृष्णवर्णं नयनं त्वया रक्तं कृतम् अहं कृष्ण: कृष्णवर्णस्तस्मान्मामपि रञ्जयन्तं कुरु इदमयुक्तं न भवतीत्यर्थ:।।४।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।४।। स्वगुणपरीक्षणोपकरणत्वेन चेन्मामङ्गीकरोषि, तथापि चरितार्थ: स्यामित्याह- हे तन्वि! तव लोचनं नीलनलिनाभमपि संप्रति रक्तोत्पलरूपं धारयति। यद्येतेन त्वयि

अनुरंजनविद्या अस्ति इत्यवधारितं, एषानुरंजनविद्या मयि परीक्ष्यताम्। परीक्षा प्रकारमाह, त्वं यदि कृष्णं कृष्णरूपं मां तेन लोचनेन कुसुमशरवाणभावेन सानुरागदृष्ट्या रंजयसि, तदिदमेव तस्य योग्यं भवति ।शिक्षिता विद्या प्रयोगेणैव ज्ञायते इत्यर्थः।।४।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।४।। एवमात्मनो विधेयतामभिधाय कोपारुणितनेत्रशोभामालोक्य वचनचातुर्येण सानुरागावलोकनं प्रार्थयते, नीलेति। हे तन्वि! मृद्वङ्गि! अनेन मानादिखेदासहनत्वं सूचितम्। तव लोचनं नीलनलिनाभमपि, नीलोत्पलसमानवर्णमपि कोकनदरूपं रक्तोत्पलवर्णं धारयति, विभर्त्ति। अनेन त्वयि काऽपि अपूर्वानुरञ्जनविद्याऽस्ति इति मन्ये। नीलवर्णस्यासम्भावितरक्तीकरणसम्भवात् एवं यदि कृष्णं, नीलवर्णं मां कुसुमशरबाणभावेन, विविधव्यापारशालिमदनबाणतात्पर्येण सानुरागं दृष्ट्या इति अभिप्रायः, रञ्जयसि, रक्तं करोषि, तदेदं रञ्जनम्, एतदनुरूपं, एतस्य नयनरञ्जन-स्यानुरूपमुचितं भवति। स्वसम्बन्धिनीलवर्णस्य सर्वस्यापि रञ्जनं कृतं भवतीत्यर्थः। अकारणकोपोदितनयनारुण्यस्य मत्प्रसादाङ्गीकरणविविधभावकटाक्षमोक्षणं समुचितमेवेति भावः।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। नीलनलिनाभमपीति; हे राधे! यद्यपि तव लोचनं नीलकमलवदस्ति। तथापि क्रोधेन कोकनदरूपं रक्तोत्पलमिव रक्तवर्णं प्रकटीकरोति। त्वं खलु नूतनरागेण रञ्जयितुं निपुणा दक्षाऽसि। तर्हि त्वमिदानीं ममेदं कृष्णवर्णशरीरं कामसंतप्तं मां मदनशराघातेन यदि रञ्जनं करिष्यसि अर्थात् तया कृष्णस्य मम शरीरमनुरञ्जितं चित्तञ्च तव प्रसन्नवदनेनानुरञ्जितञ्च भविष्यति।।४।।

**५-स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी रञ्जयतु तव हृदयदेशम्।**
**रसतु रशनापि तव घनजघनमण्डले घोषयतु मन्मथनिदेशम्।। प्रिये० ।।५।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।५।। कुचकुम्भोयोरुपरि मणिमञ्जरी स्फुरतु इति योजना। मणिमञ्जरीति मणयो मञ्जरी वेति विग्रहः। प्रवालविरचितहार इत्यर्थः। किमेवं सिद्धतीत्याह। रञ्जयतु तव हृदयदेशमिति शोभत्वित्यर्थः। न केबलमेव रसना काञ्ची घनजघनमण्डले रसतु शद्वायतां, किं शब्द कुरुतामित्याह। घोषयतु मन्मथनिदेशमिति। निद्देशः शिष्टिः। ''उच्च घृष्टं तु घोषणा'' **इत्यमरः**।।५।।

### (२) राणाकुम्भकृत- रसिकप्रिया

।।५।। अपि च, स्फुरत्विति। हे तन्वि! तव कुचकुम्भयोरुपरि मणिमञ्जरी मणिः मञ्जरीव स्फुरतु। स्फुरन्ती च किं करोत्वित्याह, तव हृदयदेशं रञ्जयतु। अपि च, रसनापि तव निबिडजघनमण्डले रसतु शब्दं करोतु। सा तथाविधा किं करोत्वित्याह- मन्मथनिदेशं 'सर्वा एव मानिन्यो मानं मुक्त्वा कामवशगा भवन्तु' इति कामाज्ञां घोषयन्तु।।५।।

### (३) जगद्धरकृत- सारदीपिका

।।५।। किं च त्वं प्रसन्नां वीक्ष्याह स्फुरत्विति हे राधे! मणिमञ्जरी हारलतात्व-त्कुचकुम्भयोः! कुचकलशयोरूपरि स्फुरतु शोभतां सा रत्नलता तव हृदयदेशं वक्षःप्रदेशं रञ्जयतु स्वरश्मिभिः शोभयतु तव जघनमण्डले निबिश्चकटिपुरोभागदेशे रशनापि काञ्च्यपि रसतु शब्दं करोतु सा काञ्चीर्मन्मथनिदेशं कामाज्ञां घोषयतु शोभयतां वचनचातुर्य्येण स्फुरतु मणिमञ्जरी रसतु रसना इत्यादि नाविपरीत तं याचते।५।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।५।। स्फुरत्विति। मणिमञ्जरी मणिपरम्परा कुचकुम्भयोः स्तनकलशयोरुपरि स्फुरतु चञ्चला भवतु। तव हृदयदेशं वक्षःप्रदेशं रञ्जयतु स्वरश्मिभिः शोभयतु। त्वन्नयननलिनं रक्तत्वं धत्ते, त्वं च कृष्णं मां रञ्जयसि। अतो मणिमञ्जरी अर्पिता वक्षो यदि रञ्जयति तदानुरूपं भवतीति भावः। अत्र केलीरूपशुभकर्मारम्भे मञ्जरीयुक्तपूर्णकल-स्थापनमुचितमेवेति सूचनाय कुचयोः कलशत्वेन रूपणं, मणिपरम्परायाश्च मञ्जरीत्वेन रूपणम्। तव घनजघनमण्डले मांसलजघनभागे रसनापि क्षुद्रघण्टिकापि रसतु शब्दायमाना भवतु, मन्मथनिदेशं कामाज्ञां घोषयतु वारं वारं कथयतु। कामाज्ञया 'भोः केलि कुरुत' इति कामाज्ञया सर्वे विलसिनो रमन्तामिति वा मन्मथनिदेशं घोषयत्विति भावः।।५।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५।। कोपपरित्यागे किं कार्य्यं तदाह। स्फुरत्विति। हे प्रिये! मणीनां मञ्जरी खचित पद्मराग सन्दोहा- निष्कख्यालङ्कारविशेषः। तव कुचकुम्भयोरुपरि स्फुरतु प्रकाशताम्। कोपं परित्यज्य निष्कधारणं कुर्विति तात्पर्य्यम्।

तद्धारणं किमर्थमित्याकाङ्क्षायामाह। रञ्जयतीति सा मणिमञ्जरी तव हृदयदेशं वक्षस्थलं स्तनदेशं रञ्जयति रंक्षति अनुरक्तवर्ण्णं करिष्यतीत्यर्थः। वर्त्तमानसामीप्ये वर्त्तमानवद् वेति भविष्यति लट्। मणिमञ्जरीधारणे तव हृदयं विषतपोपकदुष्टं सत्

मय्येव लग्नं भविष्यतीति तात्पर्य्यम्। रञ्जयत्विति। लोडन्तपाठे स्फुटोऽच:। किञ्च, रसना काञ्ची कलापोऽपि तव जघनमण्डले कटिपुरोभागे ''पश्चान्नितम्ब: स्त्रीकट्या: क्लीवे नु जघनं पुर:'' **इत्यमर**:। रसतु ध्वनतु रसशव्द इत्यस्माल्लोट्। कोपं परित्यज्य रसनां धृत्वा च परिसर तव पारेणतां ध्वनयेदिति तात्पर्य्यम्।

रसना रसनेन किं प्रयोजनमित्याकांक्षायामाह। घोषयत्विति। स्वनन्ती सा रसना मन्मथस्य रतिनाथस्य निदेशमाज्ञां घोषयतु उद्घोषयतु। इति एतादृशकर्माचरणे तव दण्डो भविष्यतीत्येवं रूपं मन्मथशासनं श्रावयत्वित्यर्थ: ।।५।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५।। पुनरनुनयपुर:सरं हारादिपरिधापनायाभ्यर्थयति, तव कुचकुम्भयोस्तन-कलसयोरुपरि मणिमञ्जरी हारस्थमणिरेव मञ्जरी स्फुरतु शोभताम्। अन्यस्मिन्नपि मङ्गलकलसे मञ्जरी स्फुरतीति ध्वनि:। तथा च कोपं परित्यक्तुं हारं गृह्णेति वाक्यार्थ:। किमर्थं तदुद्देश्यमित्यत आह, तव हृदयदेशं तव वक्ष:प्रदेशं रञ्जयतु। तथा च स्वहृदयानुरञ्जकत्वेन स उपादेय इति भाव:। प्रियसम्मुखजनकत्वमेवात्र फलमिति मञ्जरीपदेन सूच्यते। रसनापि काञ्च्यपि घनजघनमण्डले निविडनितम्बे रसतु शब्दं करोतु। रस शब्दे धातु:। किं तावतेत्य आह मन्यथनिदेशं कामदेवस्याज्ञां घोषयतु। तदनेन काञ्चीपरिधानवत्या: प्रार्थनं दर्शितम्। 'घन: काठिन्यसंयतावि'ति **विश्व**:। 'आज्ञा निदेश' **इत्यमर**:। 'उच्चैर्घुष्टन्तु घोषणा' इत्यपि। स्थानद्वयेऽपि तवेति पदं न दोषाय, अनुनयादौ पुनर्वचनस्याप्यदोषत्वादिति।।५।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५।। किञ्च स्फुरत्वित्यादि। हे प्रिये मणिमञ्जरी हारलता कुचकुम्भयोरूपरि स्फुरतु तरला भवतु। किञ्च सा लता तव[५]हृदयप्रदेशं रञ्जयतु[६]तन्मण्डनं करोतु। एतेन[७]पुरुषायितमेव सुरतं प्रार्थितमिति भाव:। किञ्च तव[८]घनजघनमण्डले निबिडकटि-प्रदेशे रशना काञ्च्यपि रसतु शब्दं करोतु। शृङ्गारादिरस[९]सहिता मन्मथनिदेशं कामाज्ञां घोषयतु। त्वया जितमिति मत्पराजयं घोषयत्विति ध्वनि:। अनेन विपरीत[१०]सुरतप्रार्थना प्रकटीकृता ।।५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५।। स्फुरत्विति। हे राधे ! मणिमञ्जरी हारलता [११] कुचकुम्भयो: स्तनकुम्भ-योरुपरि स्फुरतु[१२]शोभताम्।सा[१३]रत्नलता तव हृदयदेशं वक्ष:प्रदेशं रञ्जयतु अलङ्करोतु ; रश्मिभिरिति शेष:। तव घनजघनमण्डले निबिडकटिपुरोभागदेशे रशनाऽपि काञ्च्यपि रसतु शब्दं करोतु। सा काञ्ची मन्मथनिदेशं कामाज्ञां घोषयतु शब्दायताम्।।५।।

१.कुचयो-अ.ब.२.नास्ति-अ.ब.३.हृदयेशम्-अ.ब.४.वसतु-इ.५.हृदयप्रदेशे रञ्जयतु स्तनमण्डनं करोतु-इ.६.स्तनमण्डनं-ह.७.पुरुषांयितमिव-इ.८.जघनमण्डले-अ.ब.९.सहित-फ.ज.१०.रतप्रार्थना-इ.फ.ग.ह.ज.११.कुचकुम्भयोरुपरि-ड.क.१२.शोभतु-ल.म.१३.रक्तलता-.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५।। स्फुरत्विति। हे तन्वि! तव कुचावेव कुम्भौ तयोरुपरि मणिमञ्जरी मुक्तादिहारः स्फुरतु वसतु। भूषयत्विति यावत्। अथ एव सा मणिमञ्जरी तव हृदयदेशं वक्षःस्थलं रञ्जयतु स्वकान्त्या भूषयतु। कुचकुम्भस्थहारस्यैव वक्षःस्थलभ्रामकत्वेन मध्ये भूषणान्तरस्यानवकाशो व्यज्यत इति वस्तुध्वनिः। रशना काञ्ची। अपि समुच्चायकः। तव घनस्य विपुलस्य जघनस्य मण्डले वर्तुलाकारभागे वसतु। जघनावस्थानप्रयोजनमाह मन्मथस्य विदेशः आज्ञा निधुवनं कर्तव्यमिति तं घोषयतु सर्वत्रोच्चध्वनिना प्रकटयतु। अनेन सकिङ्किणीकध्वनिः मन्मथाज्ञोद्घोषणत्वेन सम्भावनाद् गूढोत्प्रेक्षया च पुरुषायितादिबन्धो व्यज्यते।।५।।

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५।। स्फुरत्विति। तव कुचकुम्भयोरुपरि उपरिष्टात् मणिमञ्जरी स्फुरतु। मञ्जरी प्रायेण लोहिता भवतीति कृत्वा मणिशब्दोऽत्र माणिक्यविद्रुमादिरूपस्य रत्नस्य वाचकः। यद्वा सामान्यतो रत्नानां रक्तत्वं वर्ण्यत इति कविसम्प्रदायः। अतस्तव हृदयदेशं रञ्जयतु सरागं करोतु। अथ च श्लेषोक्त्या मद्विषये तव हृदयदेशं मनः अनुरक्तं करोत्वित्यर्थः। नायिकाया अलङ्कारधारणस्य प्रियविषयकानुरागजनकत्वात्। रसनापि मेखलापि, ''स्त्री कट्यां मेखला काञ्ची सप्तकी रसना तथा'' **इत्यमरः**। तव घनजघनमण्डले रसतु शब्दं करोतु। ''रस शब्दे'' इति धातुः। घनं कठिनं दृढमिति यावत्। घनं च तत् जघनमण्डलं चेति विग्रहः। ''घनं सान्द्रे दृढे दीर्घे विस्तारे लौहमुद्गरे'' इति विश्वः। **मन्मथनिदेशमिति**। कामाज्ञां घोषयतु उच्चैः कृत्वा प्रतिपादयतु। अन्योऽपि रसनया जिह्वया निदेशं घोषयतीति शिष्टार्थस्य रसनाशब्दस्य प्रयोगः। ''रसज्ञा रसना जिह्वा'' **इत्यमरः**।। ''उच्चैर्घृष्टं तु घोषणा'' **इत्यमरः**। विपरीतसुरतप्रतिपादन-मेतत्।।५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५।। तच्छवणेन किंचित् प्रसन्नां वीक्ष्य चातुर्य्येणाभीष्टं प्रार्थयते। कुचकुम्भयोरुपरि ततश्च मणिमाला चञ्चला भवतु, तेन किं स्यात्तव हृदयदेशं शोभयतु, कांच्यपि घनजघनमण्डले शब्दायता शब्दं कुरुताम्। कीदृशं मन्मथस्याज्ञां घोषयतु वचनभङ्ग्या प्रार्थनाविशेषोऽयम्।।५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५ ।। तथाङ्गस्पर्शमभियाचते, स्फुरदिति, हे प्रिये ! कोपोत्सारितमणिमण्डनायास्तव कुचकुम्भयोरुपरि मणिमञ्जरी, माणिक्यपुञ्जनिर्मितमालाविशेषः स्फुरतु, शोभताम्। तेन किं स्यात्। हृदयस्य देशं, बहिरन्तश्च प्रदेशं रञ्जयतु। बहिः शोभयतु, अन्तश्च रागयुक्तं करोतु। रुष्टं हृदयं मत्करार्पितां तामुत्कोचमिव लब्ध्वां तुष्टं भवत्विति भावः। किं च तथा रसनाऽपि काञ्चीकलापोऽपि सुप्रसन्नायास्तव घनजघनमण्डले रसतु। तत्स्पर्शसञ्जातहर्षादिव उच्चैः शब्दं करोतु। रसशब्दे धातुः। तेनापि किं ? मन्मथनिदेशं घोषयतु। संग्रामाय सज्जीभवेति कामदेवाज्ञामनुश्रावयत्वित्यर्थः।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५ ।। स्फुरतु इति; तव कुचकुम्भयोरुपरि अर्थात् घटस्तनस्योपरि मणिमञ्जरी मणिः मञ्जरीव स्फुरतु शोभमानो भवतु। तेन तव हृदयदेशं सुशोभितं भविष्यति। तव कटीसूत्रं निविडघनजघनमण्डले पृथुले मांसले जघनस्थले रसनायां कटिमेखलायां स्थितानां क्षुत्रघण्टिकापि रसतु वा शब्दायमाना भवतु। कामक्रीडा खलु शुभकार्यम् यत्र घटस्थापनं घण्टादिवादनादयः भवन्ति। रतिक्रीडायां श्रीकृष्णस्य मनः तोषयतु कन्दर्पस्य निदेशं तदनुगुणं कर्म घोषयतु। घोषणां करोतु राधिकेति प्रार्थयते ।।५।।

**६-स्थलकमलगञ्जनं मम हृदयरञ्जनं जनितरतिरङ्गपरभागम्।**
**भण मसृणवाणि करवाणि पदपङ्कजं सरसलसदलक्तकरागम्।। प्रिये० ।।६।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।६ ।। हे मसृणवाणि ! पुरुषेतरवचने ! तव चरणद्वयं सरसरसदलक्तकरागं करोमीति भण ब्रूहि शाधीति यावत्। सरसो लसदलक्तकरागो यत्रेति विग्रहः। कीदृशं स्थलकमलगञ्जनम् आरक्तकत्वादित्यभिप्रायः। पुनः कीदृशं मम हृदयरञ्जनं वक्षबन्धविषये एतदधिगन्दब्यम्। पुनः कीदृशं जनितरतिरङ्गपरभागं जनितो रतिरङ्गस्य परभागः श्रेष्ठता येनेति विग्रहः। कदापि हरिणा करार्पितत्वात्कदापि वक्षस्यार्पितत्वादिति भावः।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६ ।। अपि च स्थलकमलेति। हे मसृणवाणि स्निग्धवाणि! भण आदिश। तव चरणद्वयं सरसलसदलक्तकरागं करवाणि। सरसः सस्नेहो लसन्योऽसावलक्तकस्तस्य रागो यत्र। अथवा सह रसेन शृङ्गारेण वर्तत इति सरसः, स चासौ तथा श्रृङ्गारोत्पत्तिद्वारेण

स्पृहाजनकश्चासौ लसत्कान्तिमांश्चेति ईदृशोऽलक्तकरागो यत्र । एतावता अलक्तकरञ्जनसमकालमेव शृङ्गारोत्पत्तिर्भवत्येव यूनाम्। किंभूतं चरणद्वयम्? स्थलकमलगञ्जनं पद्मरागस्पर्धि। पुन: किंभूतम्? जनित उत्पादितो रतिरङ्गस्य रमणप्रमोदस्य परभागो यत्र, कामोदेककारीत्यर्थ:।।६।।

## (३) जगद्धरकृत- सारदीपिका

।।६।। हे मसृणवाणि! स्निग्धवचने! भणाज्ञापय अहं तव चरणद्वयं सरस: सान्द्र: सह रसेन श्रृङ्गारेण वर्ते इति वासर सं यथा स्यादेवं लसत् शोभमान: अलक्तकरागोदलक्तयावकरागो यत्र एतादृशं करवाणि कुर्यां प्रार्थनायां लोट् कथंभूतं चरणद्वयं स्थलकमलस्य गञ्जनं तिरस्कार कंसदृशमित्यर्थ: पुन: कीदृशं मम हृदयरञ्जनं अनुराग कारकं पुन: कीदृशं जनित उत्पादितो रतिरङ्गे सुरतकौशले सम्भोगरागस्य वा परभाग: परस्परशोभा येन मयाऽलक्तकेन चेदिदं रज्यते तदेदमपि क्रौञ्च बन्धादौ मम हृदये लग्ने लग्नां मत्परां शोभां परस्परं दास्यतीति भाव: ।।६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।६।। स्थलेति। हे मसृणवाणि स्निग्धवचने! भण आज्ञां देहि। तव चरणद्वयं सरसगलदलक्तकरागं सरस: सान्द्रो लसन्नलक्तकरागो महारजनरागो यस्य तादृशं करवाणि कुर्याम्। कीदृशम्। स्थलकमलगञ्जनं स्थलोत्पन्नं यत्कमलं स्वकान्त्या तस्य तिरस्कारकम्। पुन: कीदृशम्? मम हृदयानुरागजनकम्। तथा चेदं मम हृदयं रञ्जयति। ममाप्यलक्तकेनैतद्रञ्जनमुचितमेवेति भाव:। अत एव जनितो रतिरङ्गे सुरतकौशले परभाग: परस्परशोभा येन तादृशम्। मयालक्तकेन चेदं रज्यते। तदेतत्क्रौञ्चवधादौ मम हृदयलग्नं सत्परमशोभां दास्यतीति भाव:। 'स्फुरतु मणिमञ्जरी' इत्यनेन भणनेन च विपरीतरतमत्राभिमतम्। 'परस्परं तु या कान्ति: परभाग: स कथ्यते' इति **धरणि**:। 'रङ्ग: कौशलरागयो:' इति च।।६।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६।। एवमुक्तेऽप्यसम्भाषमाणां त्वाम् असकृत् सेवारूपगुडजिह्वकया भाषणाय प्रार्थयते। स्थलेति। हे मसृणवाणि। मधुरालापे! भण कोपं परित्यज्य मया साकं सम्भाषयेत्यर्थ:। सम्भाषणे को लाभ: इत्याकाङक्षयामाह। स्थलेति। स्थलकमलस्य गञ्जनं तिरस्कारकं ततोऽप्यधिकं कोमलमित्यर्थ:। अतीवमृदुता सूचनाय स्थलग्रहणम्। अत एनं मम हृदयस्य रञ्जनं लाक्षारसद्वारा बक्षस्थलस्य रक्तापादकम्। कस्मिश्चिद्बन्ध-विशेषे प्रसाधनसमये वा स्त्रीपादद्वयस्य वक्षस्थलघटनाया: सम्भावितत्वादुक्तमित्यव-

गन्तव्यम्। अतएव जनित उत्पादित रतिरङ्गे काम संग्राम भूमौ अथवा रतौ नृत्यस्थले वा परभागकर्ण्णोत्कर्षो येन तत्तादृशं रतिकालीनमहोत्कर्षाथायकमित्यर्थः। एवं चरणद्वयं तव पदयुगलं सरसं सार्द्रं लसद्भासमानं यदलक्तकस्य तस्य रागो रक्तिमा यस्मिन् तादृशं करवाणि कुर्वे। करोतेर्लोट्। आभृतिमस्यापि चेत्यादि टिलोपात् णिरिति णिनिः। यावकेन तावकपादालङ्कारमेव फलमिति तात्पर्य्यम्।।६ ।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।६ ।। पुनरपि प्रणतिपूर्वकमनुनयति, हे घनमसृणवाणि घना अर्थकठिना मसृणा स्निग्धा वाणी यस्या एवम्भूते राधिके! तव चरणद्वयं पदद्वयं सरसः सार्द्रो लसत् शोभमानः अलक्तकरागोऽनुरक्तकरागो यत्रैतादृशं करवाणि करोमि। क्वचिच्च भणमसृणवाणीति पाठः। तत्र भण वद आज्ञापयेति यावदित्यर्थः। क्वचिच्च 'सरसगलदलक्तकरागमि'ति पाठः। तत्र सरसः सार्द्रः अतएव गलत्स्रवदलक्तकरागो यत्रेत्यर्थः। कीदृशं चरणद्वयम्? स्थलकमलं गुञ्जयति इति स्थलकमलगञ्जनम्। नन्द्यादित्वात् ल्युः। तदनेन पदयोरतिलौहित्यमति-सुकुमारत्वं दर्शितम्। पुनः किम्भूतम्? मम हृदयरञ्जनं क्रौञ्चबन्धादिना मम हृदयस्य रञ्जकमित्यर्थः। जनितरतिरङ्गपरभागं रतिरङ्गे सुरकौतुके जनितः परभागोऽन्योन्यशोभा येन स तथा। तथा च तव चरणद्वयं न केवलं तव शोभाजनकमपितु विविधरतिबन्धेन मदीयाङ्ग-सङ्गमासाद्य ममाप्यलक्तकरसेन तदनुरञ्जयामीति वाक्यार्थः। अत्रोत्तमनायिकायाश्चरण-स्पर्शेन रङ्गो भवतीति तदर्थमेतत्प्रार्थनमित्यवधेयम्। 'रङ्ग कोशलरागयोरि'**त्यमरः**। परस्परन्तु या कान्तिः परभागः स उच्यत' इति **धरणिः**। 'मसृणस्निग्ध चिक्कणमि'ति च।।६ ।।

+'जनितरङ्गपरागम्' इति पाठ।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।६ ।। किञ्च[३]कृतमौनां दृष्ट्वा वचनव्यापारं कारयितुं [४]सम्बोधयन्नाह (स्थलेति।) हे मसृणवाणि स्निग्धवचने भण ब्रूहि आज्ञापय वा। सरसः सान्द्रो गलदलक्तकरागो [५]गतयावकपङ्को यत्र तादृशं चरणद्वयं पादयुगलं करवाणि कुर्याम्। कीदृशम्? [६]स्थलकमलगञ्जनं[७] स्थलकमलस्यारुणत्वं[८] सुगन्धित्वसुकुमारत्वादिगुणैः स्वकान्त्या वा गञ्जनं शोभा तिरस्कारकम्। अत एव मम हृदयरञ्जनमनुरागप्रदम्। (पुनः) कीदृशम्? जनित उत्पादितो रतिरङ्गसुरतकौशले परभागः परस्परशोभा येन। क्रौञ्चबन्धादौ [१०]मम हृदये लग्न[११]मलक्तकं परस्परशोभां प्रदास्यतीति भावः। स यथाः,

''क्रौञ्चवद्यत्र सुरते बाहुपक्षयुगं वधूः।
[१]सन्धूनयति सुरते रमते क्रौञ्चकस्तु सः'' ।।

इति **कामसर्वस्वे**। अनेन चरणग्रहोऽनुनयः [२] कथित इति ध्वनिः।।६।।

१. धनमसृणवाणि-ड.२. लसदलक्त-नि.सा.३. धृतमौनां-इ.फ.ग.ह.ज.४.सम्बोध यति-इ.ग.ह. सम्बोधयति पुनररमिताऽपिमलयजपवनेन चन्दनवायुना च ज्वलतीति-फ.ज.५.गलद्यावक-इ.फ.ग.ह.ज. ६.नास्ति-अ.ब.इ.फ.ह.ज.७.जनितारुणत्व-अ.ब.८.सौगन्धित्व-ग.९.तिरस्कारम्-ग.१०.मद्धृदये-फ.ह.ज.११.अलक्तक सत्परस्परशोभां-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६।। स्थलेति। हे [३]राधे घनमसृणवाणि निबिडस्निग्धवचने अहं तव [४]पदपङ्कजं [५]चरणकमलं सरसः सान्द्रः [६]लसन् शोभमानः अलक्तकरागो यावकपङ्को यस्मिन्नेतादृशं करवाणि। प्रार्थनायां लोट्। कीदृशं [७] पदपङ्कजम्? स्थलकमलस्य गञ्जनं तिरस्कारकम्; [८]सदृशमित्यर्थः। पुनः कीदृशम्? मम हृदयरञ्जनं अनुरागकारकम्। पुनः कीदृशम्? जनितो रतिरङ्गे [९] सुरतकौशले परभागः परस्परशोभा येन [१०] मयाऽलक्त-केन चेदिदं रज्यते तदेदमपि क्रौञ्चबन्धादौ मम हृदये लग्नं सत् परां शोभां परस्परं दास्यतीति भावः।।६।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।६।। स्थलेति। हे मसृणा मधु (र) कोमला वाणी गीर्यस्यास्तत्सम्बुद्धिः। याहि माधवेत्यादि परुषवचनान्यपि स्वसन्तोषकरिणीति द्योतयितुं मर्मोद्घाटनार्थं वा। स्थलकमलं अपङ्कजं कमलं तस्य गञ्जनं भञ्जनं, तदपेक्षया मृदुलारुण्यात्। अत एव मम हृदयस्य रञ्जनं अन्तःकरणाह्लादकं वक्षःस्थलभूषकं वा। जनित उत्पादितः रतिरेव रङ्गः नाट्यभूमिः तस्याः परभागः उत्कृष्टप्रदेशः येन तत्। तव चरणद्वयं सरसः आर्द्रः गलन् स्यन्दन् अलक्तकः लाक्षा तस्य रागः रसः रक्तिमाधिक्यात् रागव्यपदेशो यस्मिन् तत्। विधेयविशेषणम्। करवाणि करोमि। आशिषि लोट्। भण आज्ञापय। पादसेवनमप्याज्ञां विना कर्तुं न शक्यमिति। (अनेन) अतिविधेयत्वमुक्तम्। अत्र स्थलकमलेत्यत्र व्यतिरेकालङ्कारः।।६।।

१.सन्धूनयन्ती-इ.२.कृत इति-इ.फ.ग.ह.ज.३.नास्ति-क.ल.म.४.पादपङ्कजम्-क.ल.म. ५.कमल-चरणं रसज्ञ-ड.६.लसत्-ड.ल.क.म.७.पादपङ्कजम्-क.ल.म.८.तत्सदृशमित्यर्थः-क.९.सुरत-कौशल्ये-क.१०.मदीयालक्तकेन-क.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।६।। स्थलेति। मसृणवाणि। परुषेतरवचने! भण ब्रूहि शाधीति यावत्। तव चरणद्वयं सरसलसदलक्तकरागं करवाणीति प्रार्थनायां लोट्। सरसो लसद् अलक्तकरागो

यत्र यस्येति वा विग्रहः। ''मसृणोऽकर्कशे स्निग्धे क्षमायां मसृणे स्मृतः'' इति विश्वः। किंविधम्? स्थलकमलगञ्जनमिति स्थलपद्मसदृशमित्यर्थः आरक्तत्वात्। पुनः किंवधम्? जनितेति। रतिरागस्य रमणकौतुकस्य परः श्रेष्ठो भागो येनेति विग्रहः। यस्य दर्शनमात्रेण रतिरङ्गो जायते सुरतविषये अभिलाषो भवतीत्यर्थः। यद्वा जनितो रतिरङ्गे परभागो गुणोत्कर्षो येन कदापि हरिणा करार्पितत्वात् कदापि वक्षस्यर्पित-त्वादित्यभिप्रायः। ''परभागो गुणोत्कर्षे'' इति।।६ ।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६ ।। तथाप्यनुत्तरामाह, हे स्निग्धवचने! भण आज्ञापय। किमाज्ञापयामि ? तव चरणद्वयं सरसेन लसतालक्तकेन रागो यत्र तादृशं करवाणि, यतः स्थलकमलगंजनं गंजयतीति गंजनं तिरस्कारकमित्यर्थः। आरक्तत्वात् कौमल्याच, अत एव मम हृदयरंजनं, तो जनितो रतिरङ्गे परभागः परमशोभा येन तत्।।६ ।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६ ।। एवमुक्त्वातिसाहसिकोऽहं यच्चरणसेवां विनाऽन्यदभिलषामीति तदर्थमनुज्ञामभियाचते। स्थलेति। हे मसृणवाणि! मधुरकोमलालापे प्रिये! भण अनुज्ञापय। किमर्थम्, तत्राह, तव चरणद्वयं निःसृतयावकचित्रं पादयुगं सरसं त्वच्चरणसेवाभिलाषि सद्रवं वा। लसद् भासमानम्, तच्चरणयोग्यकान्तियुक्तमित्यर्थः। एवंविधं यदलक्तकं, लाक्षारसस्तस्य रागो रक्तिमा यत्र तादृशं करवाणि, करिष्यामीति प्रार्थयामि। प्रार्थनायां लोट्। विशेषणत्रयेण, चरणसौभाग्यमनुमोदते, कीदृशीम्, स्थलकमलस्य, रक्तपद्मानुकारि स्थलसम्भवकोमलपुष्पविशेषस्य गञ्जनं तिरस्कारि। ततोऽप्यधिकरमणीयमित्यर्थः। किं च त्वद्विचित्राकल्पकल्पनाकुशलस्य मम हृदयस्य, मनसो रञ्जनं, रतिजनकं, किंवा वक्षः स्थलस्यारुण्योत्पादकम्। यावकदानसमये, अत्यादरेण चरणस्य, वक्षसि संघटितत्वात्। किं च व्यञ्जितविविधहृदयहारिव्यापारतया जनित उत्पादितो रतिरङ्गस्य रतिविशेषकौतुकस्य परभागः उत्कर्षः येन तत्। तत्र चरणस्य व्यापारविशेषबाहुल्यात्।।६ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६ ।। स्थलकमलेति; मम हृदयस्य रञ्जनं शोभाविधानार्थं तव पादयुगलं स्थलकमलायन्ते। हे श्रीराधे मसृणवाणी रागसुलभां वाणी भव। तव चरणयुगल-मलक्तकरागेणाहं रञ्जयिष्यामि। शोणवर्णयावकेन ते चरणं चित्रितं करिष्यामीति। यत्र रसस्य सञ्चारो भविष्यति।।६ ।।

**७-स्मरगरलखण्डनं मम शिरसि मण्डनं देहि पदपल्लवमुदारम्।**
**ज्वलति मयि दारुणो मदनकदनारुणो हरतु तदुपाहितविकारम्।। प्रिय०।।७।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।७।। मम शिरसि पदपल्लवं देहि अर्पयेति वाक्यार्थ:। कीदृशं मण्डनमलङ्कारमरूपं, पुन: कीदृशं स्मरगलखण्डनं स्मर एव गरलं विषम् उपतापकत्वात्तद्विनाशकमित्यर्थ:। कथमेव प्रार्थयसेत्याह। ज्वलतीत्यादि। मदनकदनं कामसन्ताप: तदेवारुण: सूर्य्य: मयि ज्वलति। पदपल्लवं शिरसि पतितं सत् तदुपाहितबिकारं नाशयत्वित्यिर्थ:। ''कदनं कर्द्दनं पापे परितापे च दृश्यते'' इति पदसागर:।।७।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।७।। अपि च, स्मरेति । हे राधे ! मम शिरसि उदारं चरणलक्षणैर्महत्पदपल्लवं पदं पल्लव इव लौहित्यकौमल्यशैत्यादिना मण्डनमिव धेहि आरोपय। किंभूतं पदपल्लवम्? स्मरगरलखण्डनं कामविषतापशमनम्। मयि विषये दारुणो मदनस्य यत्कदनं तदेवारुण इव सूर्य इव ज्वलति दीप्यते। स चरणपल्लव: मम शिरसि निहित: सन् । तेन मदनकदनारुणजनिततापेन उपाहितविकारमारोपितविकृतिं संतापं हरतु । अत्रान्तरेत्यादौ प्रौढा मानवती नायिका । अनुकूलो नायक:।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। स्मरेति त्वम् उदारं मनोहरं पदपल्लवं मम शिरसि मण्डनम् अलङ्कारमिवदेहि अर्पय कीदृशं पदपल्लवं स्मरगरलस्य कामविषस्य खण्डनं नाशकं कामपीडानिवर्त्तकमित्यर्थ:। मयि दारुण: क्रूरकर्मा मदनकदनानल: कामपरितापवह्नि: ज्वलति दीप्यते पदपल्लवं कर्तृ: तदुपहितविकारं मदन कृतोऽपताप: हरतु शिर:पीडानिवर्त्तनेन शरीरपीडानिवृत्तिरिति शिरसि दानम् अथवा पल्लवाच्छादित शिरस: सूर्यतापो न भवतीति।।७।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।७।। स्मरेति। हे प्रिये! उदारं सुन्दरं पदपल्लवं चरणकिसलयं मम शिरसि धेहि स्थापय। कीदृशम्? मण्डनं मम मस्तकस्यालंकरणम्। पुन: कीदृशम्? स्मरस्य यद्गरलं विषं तस्य खण्डनं नाशनम्। विरहिणं मूर्च्छादिप्रदानेन मलयानिले स्मरगरलत्वरूपणात्स्मरस्य सर्पत्वमाक्षिप्यते। 'चरणपल्लवं विधेदि' इत्यनेन नायिकाया गारुडिकत्वं चेत्याक्षेपरूपकमिदम्। अपरमपि सर्पादिविषं गारुडिकचरणाघातेनाभिमन्त्रितपल्लवारो-

पणेन च शाम्यतीति ध्वनिः। किं च मयि दारुणो दुःसहो मदनकदनारुणो मदनः कामस्तज्जनितं यत्कदनं तापः स एवारुणः सूर्यो ज्वलति। अतस्तेनोपहितं जनितं विकारं श्रान्त्यादिरूपं हरतु दूरीकरोतु। अन्य सूर्यसंतापः शिरसि पल्लवादिस्थापनेन शाम्यतीति ध्वनिः। 'अरुणोऽस्फुटरागे स्यात्सूर्ये सूर्यस्य सारथौ।' इति **विश्वः**। 'कदनं कलुषे तापे' इति च।।७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।७।। तस्या औन्मुख्याय तदनुकूलं स्वस्य कर्त्तव्यानन्तरं प्रार्थयते। स्मरेति हे प्रिये! स्मरगरलस्य मन्मथरूपविषस्य खण्डनं भेदकं स्मरकृतपीडानिवर्त्तकमित्यर्थः। अतएव मम शिरसि मण्डनमलङ्कारं शिरोभूषणकल्पमित्यर्थः। एतच्च प्रणयकलहानन्तरं प्रणामाचरणेन शिरश्चरणयोः संश्लेषसम्भावान्न विरुद्धम्। अतएव उदारम् इष्टार्थदम्। तद्वन्मनोहरमित्यर्थः। एतादृशं पादपल्लवं चरणकिशलयं देहि प्रयच्छ। अत्रौचित्याच्छिरस्येव तस्य दानत्वम्, धेहीति क्वचित्पाठः।

तदा मण्डनं ममालकंरणं शिरसि धेहि निधेहीत्यर्थः। यथा लोके महासर्पदष्टस्य विषसर्वाङ्गीणे सति क्षुरेण ब्रह्मरन्ध्रप्रदेशं शनैरुत्खाट्य शिरसि बिषनिवर्त्तनसमर्थं महौषधिं निक्षिपन्ति तद्वत्सर्वाङ्गीणस्मरगरलनिवर्त्तनसमर्थं पदपल्लवं मम मूर्ध्नि देहीत्यर्थः।

नन्विदानीं निवर्त्त्याभावात्पदपल्लवौषधं किमर्थं देयमित्याकाङ्क्षायामाह। ज्वलतीति। हे प्रिये दारुणो भयङ्करः प्रयासासाध्य इत्यर्थः। मदनकदनानलः कामसङ्गर दहनः सम्भोवादौषधमिदानीमेवावश्यं देयमित्यर्थः। तर्हि तेन किं न स्यादित्याह। हरत्विति। तव पादएव पल्लवः तेन मदनानलेन उपाहित समनन्तरमेव न्यस्ते। यो विकारः शरीरकम्पादि तं हरतु निवर्त्तयतु यथा लोके विषनिर्हरणाय प्रयुक्तमौषधं विषनिवर्त्तनद्वारा तत्कृतशरीरकम्पादिकं निवर्त्तयति तथा भवदीय पादपल्लवमपि मदीय सम्भोगाभिलाषरूपमहाव्याधिनिराशद्वारा तत्कृतशरीरतापादिकं निवर्त्तयत्वित्यर्थः।।७।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।७।। पुनरतिप्रणतिपुरःसरमनुनयति, उदारं श्रेष्ठं पदपल्लवं चरणावेव पलवं ममशिरसि देहि अर्पय। कीदृशम् मण्डनम्, मम शिरस इत्यर्थात्। पुनः किम्भूतम्? स्मरगरलस्य कामकालकूटस्य खण्डनं खण्डकमित्यर्थः। अन्योऽपि पल्लवादिदानेन विषमपहरतीति ध्वनिः। एवमन्यदपि प्रयोजनमस्तीति दर्शयति, मदनेन कामेन कदनं दुःखं तदेवारुणः सूर्यः तापकत्वात् दारुण क्रूरकर्मा मयि ज्वलति दीप्यते। अतः

तदुपाहितं तेन मदनकदनारुणे नोपाहितं विकारं हरतु। अन्यत्रापि सूर्यादिकृतसन्तापशान्तिजनकत्वं शिर:स्थितपल्लवे दृष्टमेवेति। अत्र शिरसि पदार्पणप्रार्थनं पादपतनान्त एव मानिनीनां मानमित्यभिप्रायेण। यद्वा 'कक्षयोरन्तरे बाहू कृत्वा पृष्ठगते प्रिये। स्त्रिय: पादौ शिरस्येव मूर्द्ध बन्ध: प्रकीर्त्तित' इति बन्धविशेष भिप्रायेण। 'पल्लवोऽस्त्री किसलयमि'**त्यमर:**। 'अरुण: स्फुटवाण: स्यात् सूर्ये सूर्यस्य सारथाविति **विश्व:**। 'कदनं कलुषे ताप' इति च।।७।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।७।।[३] उपक्रान्तो चरणप्रसादं प्रार्थयते, [४]स्मरेति। [५]हे राधे! उदारं रतिजनकं पदपल्लवं चरणकिसलयं शिरसि धेहि धारय। कीदृशम्? मम मण्डनमलङ्करणम्। मण्डनस्यापि मण्डन [६]मिति भाव:। पुन: कीदृशम्? स्मरगरलखण्डनं कामतापनाशनम्; आवश्यकमेत[७]त्कर्तव्यम्। मयि मदनस्य कामस्य यत्कदनं सन्तापस्स एवानलोऽग्निर्ज्वलति। कीदृश:? दारुण: सन्तापक:। अत एव तव पदपल्लवं तदुपहितविकारं मदनकृतोपतापं हरतु। शिरस्सन्तापनिवर्तनेन सर्वाङ्गपीडानिवृत्तिरितिवत्। [८]मणिदारुण इति पाठे दारुकमणिभ्योप्यतिसन्तापक:। पल्लवाच्छादितस्य सन्तापो[९]न भवति; तद्वदत्रापि।।७।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७।। स्मरेति। त्वमुदारं मनोहरं पदपल्लवं चरणपल्लवं मम शिरसि मण्डनं अलङ्कारमिव देहि [१०]अर्पय। कीदृशम्?[११] स्मरगरलस्य कामविषस्य खण्डनं नाशकम्; कामपीडानिवर्तकमित्यर्थ:। मयि दारुणकर्मा मदनकदनानल: कामपरितापवह्नि: ज्वलति दीप्यते। [१२] तत्पादपल्लवं [१३] कर्तृ तदुपहितविकारं मदनकृतोपतापं हरतु। शिर:पीडानिवर्तनेन सर्वशरीरपीडानिवृत्तिरिति शिरसि दानम्। अथ वा पल्लवाच्छादितशिरस:[१४]सूर्यतापो न भवतीति।।७।।

१.देहि-ह.ड. २.नारुणो-नि.सा. ३.उपक्रान्ते चरणप्रसादे-इ.उपक्रान्ते चरणप्रसादं-फ.ग.ह.ज. ४.नास्ति-अ.ब.इ.फ.ग.ह.ज. ५.हे वृषभानुसुते-ग. ६.इत्यर्थ:-इ.फ.ग.ह.ज. ७.कर्तव्यमेव-इ.फ.ग.ह.ज. ८.मणि: इति पाठे दारुक: प्राणिभ्योऽप्यतिसन्तापक-इ.मणि: पाठे दारुकमणिभ्योऽप्यतिसन्तापक-ग.मणि: इति पाठे दारुकमणिभ्योऽप्यतिसन्तापक:-ह.मणिरिति पाठे दारुण: प्राणिभ्योऽप्युपसन्तापक:-फ.ज. १०.नास्ति-ड. ११.गरलस्य-क.स्मरस्य-ल.म. १२.तत्पदपल्लवं-क. १३.नास्ति-ड. १४.सूर्यतापो भवतीति-ल.म.सन्तापो भवतीति भाव:-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।७।। स्मरेति। स्मर एव गरलं विषं खण्डनं नाशकम्। लोके पल्लवादेर्विषहरत्वं वर्तत इति। मम शिरसि मण्डनं अलङ्कार: प्रणामकाले उत्तानपादसंज्ञकबन्धसुखकाले

वा मूर्ध्नि तिष्ठतीति शिरोमण्डनत्वम्। उदारं उत्कृष्टं पदमेव पल्लवः नवकिसलयः तदेव हि लाक्षानुगुणं करिष्यामि (इति) पूर्ववाक्यस्थेनान्वयः। मयि तदेव सेवनार्थितमिति वा देहि यच्छ। तेन किं तव स्यादित्यतः प्रभावमाह मयि मदनकदनं प्रणयकलहः स एव अनलो वह्निः मदनकदनं सुरतं तदेव अनलः अप्राप्तत्वात्। ज्वलति वाञ्छारूपेण तापयति। तदुपहितः तत्कृतः विकारः विरहलक्षणाग्निसन्तापादिः तं हरतु नाशयतु। प्रणामार्थं शिरसि मया धृतं चेच्चरणद्वयं तव कोपशान्तिर्भविष्यति तेन मम सन्तापः शाम्यतीति भावः। ईर्ष्याकृतगुरुकोपस्य प्रार्थनावधिकत्वात्।।७।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।७।। स्मरेत्यादि। ममेति। मम शिरसि उदारम् उत्कृष्टलक्षणान्वितं पदपल्लवं देहि अर्पयेति वाक्यार्थः। पदमेव पल्लवं कोमलत्वात्। विशेषणद्वारा रूपकहेतुमाह। किंविधम्? स्मर एव गरलं विषम् उपतापकत्वात्, तस्य खण्डनं विनाशकमिति यावत्। पुनः किंविधम्? मण्डनं भूषणमिव अर्थात् शिरसि एव। अथवा पदपल्लवं मम शिरसि मण्डनं देहि। अन्यदपि पदोपस्कृतं पल्लवं शिरसि निहितं सत् गरलं खण्डयतीति सूचितम्। पदं शब्दः मन्त्र इति यावत्। कथमेवं प्रार्थयसे इत्याह, ज्वलतीति। मयि मद्विषये मदनकदनारुणः ज्वलति वितपते। अतः कारणात् तदुत्पादितविकारं तेन मदनारुणेन उपहितः समर्पितः योऽसौ विकारः परितापरूपस्तं हरतु। अस्मादत्र तव पल्लवमेव कर्तृत्वेनानुयुज्यते। मदनकदनारुण इति। मदनस्य सम्बन्धिकदनं परितापः तदेवारुणः सूर्यः। ''कदनं कर्दमे पापे परितापे च दृश्यते'' इति **पदसागरः**। ''अरुणः व्यक्तरागेऽर्के सन्ध्यारागेऽर्कसारथौ'' इति **विश्वः**। अन्यदपि पल्लवं शिरसि निहितं सत् सूर्यतापं वारयतीति ध्वनिः। गोपालत्वेन तदनुभवात्। मदनकदनारुणः किंविधः दारुणः भयानकः। अथवा तदिति भिन्नपदम्। तन्मदनकदनं मदनाद् वैक्लव्यं हरतु सर्वनाम्नार्थैकदेशोऽपि परामृश्यते इति। तच्छब्देनात्र समस्यमानमदनं कदनशब्दस्य परामर्शः। तथा च **कालिदासः**, ''स्वयं विशीर्णद्रुमपत्रवृत्तिता, परा हि काष्ठा तपसस्तया पुनः। तदप्यपाकीर्णमतः प्रियंवदाम्, वदन्त्यपर्णामिति तां पुरा विदुः।'' इति। तच्च मदनकदनं किंविधम्? उपाहितेति। उपाहितोऽर्पितो विकारो दैन्यरूपो येनेति विग्रहः। एतेन न कर्मधारयो बहुव्रीहिप्रतिपत्तिकर इति दोषो निराकृतो भवति।।७।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।७।। अतस्तदङ्गीकारेणैव मम तापोपशमनमिति सर्वविजयितद्गुणस्फूर्त्तिपरवशः सन् प्रार्थयते। हे प्रिये! मम शिरसि पदपल्लवमर्पय। कीदृशमुदारं बांछितप्रदम् अतो

महत्। किमर्थं स्मरगरलं खण्डयतीति तत्। न केवलमिदं खण्डनं भूषणं च। कथमेवं प्रार्थयसे इत्याह। कामक्लेश एव दारुणोऽरुणः सूर्य्यः मयि ज्वलति, अतस्तेनोपाहित-विकारं हरतु, तद्धारणमात्रेण तापोऽपयास्यतीत्यर्थः 'अरुणः स्फुटरागे स्यात् सूर्य्ये सूर्यस्य सारथौ इति **विश्वः**।।७।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।७।। एवमनुनीतामपि अनुत्तरां तां प्रति, हे मानिनि! त्वं यदि न प्रसीदसि, तदा सम्प्रति पादस्पर्शेणापि मामुज्जीवयेति सदैन्यमाह, स्मरेति ।हे प्रिये! मम त्वदधीनस्य शिरसि त्वच्चरणानते मूर्धनि पदपल्लवं चरणकिसलयं देह्यर्पय। इदमयुक्तमिति चेत्तत्रास्य युक्तत्वमुपपादयति। कीदृशम्, मण्डनं, मदङ्गीकार, सौभाग्याभिवृद्धिकारितया मम चूडामणिरूपमित्यर्थः। अत एवमुदारं परमोत्कृष्टतया शिरोधारणयोग्यम्। तत्प्रभावमप्याह स्मरगरलस्य खण्डनं स्मरणमात्रेणापि अहितकारी यः कन्दर्पगरलः तस्य खण्डनं, स्पर्शमात्रेण नाशकम्। चरणकमलेन शिरसि ताडयन्ती मामपगतविषवेगं कुर्वित्यर्थः।

किञ्च मयि दारुणो विविधातङ्कापादको मदनकदनानलः कामक्लेश-वह्निर्ज्वलति ।अप्रतिहततया समृद्धो भवति ।तदुपाहितविकारं तेन ज्वलनेन उत्पादितं विकारं, ''तिष्ठामि किम्, गच्छामि किम्, जागर्मि किम्, मृतोऽस्मि किम्'' इत्यादि ज्ञानतिरोधानरूपं व्यामोहं हरतु, दूरीकरोतु। 'मदनकदनारुण' इति पाठे तपनो ज्वलतीत्यर्थः।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।।स्मरगरलेति; हे श्रीराधे मम मस्तकस्य मण्डनाय तथा स्मरगरलकन्दर्पवाधा-प्रशमनाय मम शिरसः मण्डनाय तव चरणपल्लवं कोमलपदपुष्पदलानि मम मस्तके स्थापय। इदानीं मम शरीरं क्रूरकन्दर्पपीडया ज्वलति। अतः त्वं तस्य प्रशमनोपायं विधाय तव चरणद्वयं मन्मस्तके स्थापय दक्षिणनायकसुलभचाटुक्तीयम् दक्षिणनायक-सुलभचाटुक्तीयम्।।७।।

**८-इति चटुलचाटुपटुचारु मुरवैरिणो राधिकामधि वचनजातम्।**
**जयति पद्मावतीरमणजयदेवकविभारतीभणितमतिशातम्।। प्रिय०।।८।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।८।। इत्युक्तप्रकारं मुरवैरिणो राधिकामधिलक्षीकृत्य वचनजातं जयतीति योजना। कीदृश, चटुल चाटु पटु चञ्चलं चञ्चलमनेकप्रकारमिति यावत्। चाटु पटुरिति प्रसिद्धः। चटुल चाटुनो पटिविति बिग्रहः। गर्वितशोभनमित्यर्थः। चारु शोभनमतिशातमिति अतिसुखप्रदमित्यर्थः। 'सुन्दरं रुचिरं चारु शर्मशातसुखानि च' **इत्यमरः**। पुनः कीदृशं पद्मावतीरमणाजयदेवकविभारतीभणितं, पद्मावतीरमणश्चासौ जयदेवकविश्चेति विग्रहः। एतेनान्यङ्गनावैमुख्यं जयदेवकविनात्मनः प्रतिपादितम्। शेषार्थं श्लोकेन सूचयति।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। अपि च, इतीति। इत्यमुना प्रकारेण चटुलचाटुपटुचारु मुरवैरिणो राधिका-मधिकृत्य वचनजातम्। जयदेवकविभारतीभूषितम्। पुनः किंभूतम्? मानिनीजनजनित-शातम् मानिनीजनस्य जनितमुत्पादितं शातं सुखं येन।। 'ललितापि पद्यरचना न धातुयोगादृते विभाति शुभा। इति कुम्भकर्णनृपतिर्गायति तां गीतगोविन्दे।।' तथा च **सङ्गीतराजे**, 'तालो वर्णयती रागाः क्रमादष्टादश स्मृताः। मध्यमादिश्च ललितो वसन्तो गुर्जरी तथा।। धनाश्री भैरवो गौण्डकृतिर्देशाङ्किकापि च। मालवश्रीश्च केदारमालवीयादि-गौण्डकौ।। स्थानगौण्डश्च श्रीरागो मह्लारश्च वराटिका। मेघरागश्च भद्रावद्धोरणीनियता इमे। यावद्रागं पदानि स्युः प्रान्ते पाटस्वराणि तु। क्वचित्क्वचिद्गतालापभूषितानि यथारुचि। मिथः प्रियोक्त्तिसंभारविप्रलम्भरसानि च। यत्र स्यात्स प्रबन्धोऽयं रागराजिविराजितः।।' इति चतुरचतुर्भुजरागराजिचन्द्रोद्योतनामा एकोनविंशः प्रबन्धः।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।। इतीति इत्यमुना प्रकारेण मुरवैरिणः कृष्णस्य राधिकाम् अधि अनुराधिकां लक्षीकृतप्रोक्तं वचनजातं वाक्यसमुहो जयति उत्कर्षेण वर्द्धते कीदृशं चटुलं चाटुप्रतियुक्तं चटु चतुरं चारु सुकुमारं पुनः कीदृशं जयदेवकवेः भारत्या वाण्याः भूषितं मानिनीजनस्य जनितं शातं सुखं येन तत्तादृशं जयति पद्मावती रमणजयदेवक-विभारती भणितमतिशान्तमिति पाठान्तरे । पद्मावती जयदेवस्य पत्नी तस्याः रमणो वल्लभःयो जयदेवस्तेन भारती संज्ञायाः कवित्वं वर्णितं पुनः कीदृशम् अतिशान्त

अतिशयितसुखं यस्मात्तादृशमिति व्याख्यानं मन्दं तथा सति पौनरुक्त्यापत्तेः प्रथमपाठस्तु समीचीन एव ।।८।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।८।। इत्यनेन प्रकारेण मुरवैरिणः कृष्णस्य राधिकामधि लक्षीकृत्य वचनजातं वाक्यसमूहो जयति सर्वोत्कर्षेण वर्तताम्। कीदृशम्? चटुलं मनोहरं चाटु प्रीतियुक्तं पटु चतुरं चारु सुकुमारम्। पुनः कीदृशम्? पद्मावती जयदेवपत्नी तस्याः रमणो वल्लभो यो जयदेवः तेन कविभारत्या भारतीसंज्ञया कवित्ववृत्त्या भणितं वर्णितम्। जयदेवकवेर्भारत्या भणितमिति तु व्याख्यानं मन्दम्; तथा पौनरुक्त्यापत्तेः। जयदेवकविभणित-मित्यस्यैव सम्यक्त्वात्। पुनः कीदृशम्? अतिशातमतिशयितं सुखं यस्मात्तदृशम्। भारतीवृत्तिलक्षणं **शृङ्गारतिलके** (३/४४) 'प्रधानपुरुषप्राया साद्वक्रोक्तिनिरन्तरा। भारतीयं भवेद्वृत्तिर्वीरहास्याद्भुताश्रया।।' इति। **रसार्णवसुधा-करेऽपि**, 'शृङ्गारादिषु सर्वेषु रसेष्विष्टा हि भारती।' इति। 'चटुलः सुन्दरे चले' इति **धरणिः**। 'चटु चाटु प्रियं वाक्यम्' इति **हरिश्चन्द्रः**। 'पटुस्तीक्ष्णे नीरोगे चतुरेऽन्यवत्' इति **विश्वः**। 'शर्मशातसुखानि च' **इत्यमरः**।।८।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।८।। इतीति।। इति पूर्वोक्तप्रकारेण मुरवैरिणः श्रीकृष्णस्य चटुलमस्थिरं यश्चाटुप्रियं प्रियस्यास्थिरत्वं, तस्य बहुवल्लभत्वादवगन्तव्यम्। तत्र प्रिये पटुः समर्थः, तेन प्रियकपटचाटुघटितमित्यर्थः। चारु मनोहरं च राधिकामाधि राधामधिकृत्य प्रवर्तमानं यद्वचनजातं तद्रूपम्। किञ्च पद्मावतीनाम जयदेवस्य निजनायिका तस्याः रमणः रन्ता जयदेवः तस्य भारती वाणी, तया भणितं कथितमिति गीतमेवंविधं गीतम् जयतु सर्वोत्कर्षेण वर्ततां सर्वजनमनोहरो भवत्वित्यर्थः।।८।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।८।। कीर्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकमाशीर्दानेन गीतमुपसंहरति। इति अनेन प्रकारेण राधिकामधि लक्षीकृत्य मुरवैरिणः श्रीकृष्णस्य वचनजातं वाक्यसमूहोजयति उत्कर्षेण वर्द्धताम्। किम्भूतम्? चटुलचाटु चटुलाः सुन्दराः सुश्रव्या इति यावत्, चाटवः प्रियोक्तयो यस्मिन् एवम्भूतम्। 'चटुलः सुन्दरे चल' इति **धरणिः**। 'चाटुः पुंसि प्रियोक्तिः स्यादि'ति **विश्वः**। पुनः कीदृशम्? पटु प्रकृतकर्मकुशलमित्यर्थः, **प्रतिभायोगीति** वा। तथा च पटुः 'पटोलमात्रे स्यात्प्रतिभागुणयोगिनी'ति। 'आरोग्ये वक्तरि श्रेष्ठे पटुः शूरेऽभिधेयवदि'ति **पीतमुण्डी**। पुनः कीदृशम्? अतएव चारु मनोहरम्। पुनः कीदृशम्? जयदेवनाम्नः कवेर्भारत्या वाण्या भूषितं निबन्धनेनालंकृत-

मित्यर्थः। पुनः किम्भूतम्? मानिनीजनस्य राधायाः जनितं शातं सुखं येन तत्तथा। 'भारतो भाषा गीर्वाग्वाणी सरस्वती'**त्यमरः**। 'शमशातसुखानि चे'ति। जयतीति लोट् जयतेरनभिधानादिति त्वनिषेधः।।८।।

* 'जयति पद्मावतीरमणजयदेवकविभारतीभणितमतिशातम्' इति पाठ।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।८।। किञ्च [२] फलभूतार्थमाह, इतीति। [३] इति पूर्वोक्तप्रकारेण मुरवैरिणः श्रीकृष्णस्य राधिकां अधि राधां लक्षीकृत्यं वचनजातं [४] साभिप्रायवचनसमूहो जयति उत्कर्षेण वर्धताम्। कीदृशम्? चटुलं मनोहरं, चाटु प्रेमयुक्तं, पटु[५]चतुरं, चारु सुकुमारम्। पुनः कीदृशम्? [६]जयदेवकविभारतीभूषितं [७] जयदेवकवेः [८] भारत्या [९] वाण्या भूषितमलङ्कृतम्। पुनः कीदृशम्? मानिनीजनसमूहस्य श्रीराधाख्यस्य वा जनितमुत्पादितं शातं सुखं [१०] येनेति भावः।।८।।

[१] इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायामेकोनविंशः प्रबन्धः।

१.जयति पद्मावतीरमणजयदेवकविभारतीभणितमपि गीतम्-इ.ड. २.फलभूतमर्थमाह-इ.फ.ग.ह.ज. ३.इतीति-फ.ज. ४.साभिप्रायं-इ.अभिप्राय-फ.ज. ५.नास्ति-अ.ब. ६.नास्ति-अ.ब.इ.फ.ह.ज. ७.जयदेवस्य कवेः-इ.फ.ह.ज. ८.नास्ति-ग. ९.वाण्यामलङ्कृतम्-ग. १०.येन तत्-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।८।। इतीति। मधुवैरिणः कृष्णस्य राधिकामधि अनु राधिकां लक्षीकृत्य[२]इति [३] वचनजातं [४] इति वचनसमूहः जयतु उत्कर्षेण [५] वर्तताम्। कीदृशम्? चटुलं मनोहरं चाटु प्रीतियुक्तं पटु चरुरं चारु सुकुमारम्। पुनः कीदृशम्? जयदेवकवेर्भारत्या भूषितमलङ्कृतम्। पुनः कीदृशम्? मानिनीजनस्य [६] भामिनीसमूहस्य जनितं शातं सुखं येन ।।८।।

[७]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायामेकोनविंशः प्रबन्धः।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।८।। इतीति। इति उक्तप्रकारेण चटुलं मृदु चाटु प्रियं पटु समर्थं चारु मनोहरं राधिकामधि राधिकां प्रति मुरवैरिणः माधवस्य वचनजातं वाक्यसमुदायः पद्मावत्याः तत्संज्ञकायाः रमणः कान्तः जयदेवकविः तस्य भारती वाणी तया भणितं प्रकटितं ग्रथितं गीतमपि गायनोपयोगितया रचितं जयति उत्कर्षेण वर्तते ।।८।।

[८] इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामेकोनविंशः प्रबन्धः।

१.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज. २,३.नास्ति-क.ल.म.४.इति समूहः-ड.५.वर्धताम्-क.ल.म. ६.मानिनीसमूहस्य-क.ल.म.७.पुष्पिकेयं नास्ति-ड.क.ल.म.८.पुष्पिकेयं नास्ति-इ.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।८।। इतीति। मुरेति। मुरवैरिणो वासुदेवस्य राधिकामधिवचनजातं वचनसमूहं जयति जययुक्तं भवत्विति योजना। ''समूहे जातमस्त्रियाम्'' **इत्यमरः**। अधिशब्दस्य कर्मप्रवचनीयत्वात्तद्योगे द्वितीया। तथा च सूत्रम्, ''अधिपरी अनर्थकौ'' इति। अनर्थकौ अर्थान्तरमनभिधानौ अधिपरी शब्दौ कर्मप्रवचनामधिशब्दः स्वार्थे वर्तते। स्वार्थश्च वशीकरणलक्षणो गृह्यते। तथा चोक्तम्, ''अधिवशीकरणाधिष्ठानाध्ययनैश्वर्याधिक्येषु, रणे अधिकरोति रथ्यराति निन्योपसर्गवृत्तौ।'' इति। तेन राधिकामधिकुर्वद् वशीकुर्वद् वचनजातमित्यर्थः। इदं व्याख्यानं केचिद् भाष्यविरुद्धं वदन्ति। तथाहि, तस्मिन् सूत्रे भाष्ये के वित्युच्यते। अर्थान्तरवाचिनाइद्रनट(ना)र्थकधातुनोक्तां क्रियामाहतुः। तस्मादत्रायमधिशब्दो जयेत्यर्थमेव ब्रूते। तदयमभिसम्बन्धः मुरवैरिणो वचनजातं राधिकामधिजयति। राधिकां जयेत्यर्थः। एकसंज्ञाधिकारे कर्मप्रवचनीये च गत्युपसर्गसंज्ञयोर्बाधितत्वादन्ते प्राग्गतेरिति नियमो नास्तीति कृष्ण...रवः। तथा च, अगत्युपसर्गसंज्ञाबाधनार्थं कर्मप्रवचनीयसंज्ञा विधीयत इति तस्मिन्नेव सूत्रे जयादित्यः। वचनजातं किंविधम्? इति चटुलचाटु इति। पूर्वोक्तश्चटुलो मनोहरश्चाटुर्गुणवर्णनं यत्रेति विग्रहः। पुनः किंविधम्? पटुर्दक्षः मानप्रशमनायेति शेषः। यद्वा चटुलचाटुना पटुकार्यसाधनसमर्थम्। पुनः किंविधम्? मुरवैरिण इति एकपदम्। तदा चटुलेन चाटुना पटुः चारुश्च यो मुरवैरी तस्येत्यर्थः। ''चटुलश्चञ्चले वारौ'' इति। ''चटुः चाटुश्च चिपिटे भूषादिगुणवर्णने'' इति **कुमुदाकरः**। ''पटुर्दक्षे च नीरोगे चतुरेऽप्यभिधेयवत्'' इति **मेदिनी**। पुनः किंविधम्? पद्मावतीत्यादि। पद्मावतीरमणस्य जयदेवकवेः भारत्या सरस्वत्या भणितं प्रतिपादितम्। पद्मावतीरमणविशेषणोपादानान्वितप्रेयस्यामनन्यसाधारणमात्मनः सौभाग्यातिशयमात्मनि तस्याः प्रणयातिरेकं च क्वचिद्दर्शितवान्। तेन च निजशृङ्गारित्वं परस्त्रीपराङ्मुखत्वं च प्रकटितवानित्यवगम्यते। पुनः किंविधम्? अतिशातमिति। अतिशायितं शातं सुखं यस्मात्। अतितरां सुखजनकमित्यर्थः। ''शर्मशातसुखानि च'' **इत्यमरः**।।८।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।८।। इत्युक्तप्रकारं मुरवैरिणो राधिकां लक्ष्यीकृत्य वचनसमूहो जयति, सर्वोत्कर्षेण वर्त्तते। परमप्रेयसीविषयत्वादिति कीदृशम्? चटुलं चञ्चलं अनेकप्रकारमिति यावत्।

चटुलचाटुना पटु मानापनयनसमर्थं चारु अनुरागशोभनम्। पुनः कीदृशम्। पद्मावती श्रीराधिका तत्परतया तथानाम्नी श्रीजयदेवपत्नी तद्गुणवर्णनादिना तस्या रमणस्य जयदेवकवेः भारत्या भणितम्।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।। एवं विनयोक्तिपराकाष्ठां वर्णयित्वा गीतमुपसंहरति, इतीति इत्येवं प्रकारं मुरवैरिणः श्रीकृष्णस्य राधिकामधिकृत्य वचनजातमुक्तिकदम्बं जयति। सर्वोत्कर्षेण वर्त्तते। परमप्रेयसीविषयत्वात्। कीदृशम्, चटुलचाटुपटु, चटुलं चञ्चलं बहुविधत्वाद-स्थिरमित्यर्थः। ईदृशं यत् चाटु, विनयोक्तिस्तेन पटु, मानापहरणसमर्थमित्यर्थः। अत एव चारु मनोज्ञम्। अतिशातं, परमसुखरूपं च । पुनः कीदृशम्। पद्मावतीनाम्नी जयदेवजाया तस्या रमणः। हरिलीलादिकथनादिना प्रीतिकरो यो जयदेवकविस्तस्य भारत्या, वाण्या, भणितं प्रकाशितमित्यर्थः। अत्रैवं प्रथास्ति एकदा जयदेवः 'मम शिरसि मण्डनं देहि पदपल्लवम्' इति अत्र चाटूक्तिविशेषवर्णने संदिग्धचित्तस्त-ल्लिखनाद् विरम्य पुस्तकलेखनीं गृहे स्थापयित्वा स्नानाय गतः। एतदभ्यन्तरे श्रीकृष्णो जयदेवरूपेणागत्य पद्मावतीपुरतस्तदेव लिखन्नन्तर्हितः। तदनन्तरं सः समागत्य पुस्तके तदद्भुतलिखिताक्षरं दृष्ट्वा केन लिखितमिति सविस्मितं पद्मावतीं पप्रच्छ। त्वमेवेदानीं लिखित्वा गत इति तत्कथितमाकर्ण्यातिहृष्टेन तेन भगवदिच्छेयमिति मनसि सम्भाव्य 'धन्यासि त्वम्' तं साक्षात्कृतवतीति सा बहुश्लाघिताऽऽसीदिति। अतोऽत्र पद्मावतीपदं प्रयुक्तम्। तथा जयति क्रियाप्रयोगेण अस्य चाटूक्तिकदम्बस्य सर्वोत्कर्षवत्त्वं साधितमिति।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। इतिचटुलति; एवं क्रमेण मुरवैरिणा मुरारिणा चटुल कोमलनर्मगर्भचाटूक्त्या राधिकायाः संन्तोषविधानं कृतमासीत्। एवम्भूता मानिनीराधाकृष्णसम्बलिता जयदेवभारती जनानां शातं दुःखं हरतु इति। **संगीतराजे** तालः वर्णयति, रागाः क्रमादष्टादशस्मृताः।

मध्यमादिश्च ललित वसन्तो गुज्जरी तथा।।

धनाश्री भैरवो गौण्डश्च श्रीरागो मह्लारश्च वराटिका।

मेघरागश्च भद्रा वद्धोरणी नियता इमे।।

यावद्रागं पदानि स्युः प्रान्ते पाटस्वराणी तु।

क्वचित् क्वचिद्गतालापभूषितानि यथा रुचिः।।

मिथ: प्रियोक्ति: संभारविप्रलम्भरसानि च।
यत्र स्यात् स प्रबन्धोऽयं रागराजिविराजित:।। ८।।

प्रतिद्ध गीतस्य सप्तमपदम्। यत्र स्मरगरल खण्डनं मम शिरसि मन्डनं देहि पदपल्लवमुदारमिति लेखन्तुं संकोचमनुभूय: लेखनिपुस्तीं च त्यक्ता स्नानार्थं नदीतीरं ययौ। तस्मिन्नेवावसरे स्वंय श्रीकृष्ण: जयदेवरूपेणागत्य पदं पूरयित्वा भोजनं च कृत्वा शायित आसीत्। अस्मिन् समये जयदेव स्नात्वा आगत्य भोजनाय व्रवीति स्वभार्याम्। परं सा हतचकिता सति प्रागागमनस्य सूचनामददात्। जयदेव: पद्मावत्या झटित्येव स्वशयनागारं गत्वा हतचकितोऽभूत्। कवि: जयदेव: कृतकृत्यश्चाभूत्। इतीयंकथा उत्कलप्रान्ते लोकेषु प्रचलति।।८।।

**५३-परिहर कृतातङ्के शङ्कां त्वया सततं घन-**
**स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि।**
**विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं**
**स्तनभरपरीरम्भारम्भे विधेहि विधेयताम्।।५३।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।५३।। हे कृतातङ्के! शङ्कां परिहरेतियोजना अन्यस्त्रीसम्भोगवितर्कशङ्का कृतातङ्के इति। कृत: आतङ्क: शङ्का ययेति विग्रह:। ''आतङ्को रोसन्तापशङ्कास्विति **विश्व:**''। कथं शङ्कात्याज्या इत्याह। त्वयेत्यादि। त्वयाक्रान्ते यन्त्रिते स्वान्ते मनसि मम अन्तरमन्त:करणं धन्य: कोऽपि पदार्थो न विशतीत्यर्थ:। मनोद्वारेणेवान्त:करणं प्रविश्यते। मनश्चेत्त्वया यन्त्रितं केन पथा प्रवेष्टव्यमित्यभिप्राय: मनस्तापवदुभयविषयं युगपन्न गृह्णाति, तच्चेत् त्वय्यासक्तं कथमन्यामभिनषिष्यतीति। अतएव परा नवकाशिनीत्युक्तम्। वितानोरन्य इति कामस्त्वनङ्गत्वात् प्रवेष्टु शक्त इत्यर्थ:। ननु त्यक्तैव शङ्का, सम्प्रति किं कार्य्यं तदुपदिशेत्याह, स्तनभरेत्यादि। विधेयतामिति कर्त्तव्यतामित्यर्थ:। हरिणीनाम वृत्तम्।।५३।।

**(२) राणाकुम्भकृत- रसिकप्रिया**

।।५३।। इदानीमात्मानं गतदोषं ज्ञापयन्संभोगार्थं प्रोत्साहयन्नाह, परिहरेति। हे कृतातङ्के कृतान्यवनितासङ्गशङ्के! मयि शङ्कां त्यज। अथवा, मयि कृतातङ्के त्वद्वियोगदर्शनसंजात-संतापे शङ्कां त्यज। त्वां मयि संजातमनोविकल्पां दृष्ट्वा मयि संतापो जायत इत्यर्थ:। अत्र ममेति षष्ठ्यन्तमर्थवशात्सप्तम्या विपरिणम्यते। कथं शङ्का परिहरणीयेति

वाक्यार्थद्वारेण हेतुमाह। 'सतत'ग्रहणेन जीवितावधि त्वदृतेऽन्या काचन मम हृदयमाश्रित्य न वर्तत इति बोधयति। हे प्रणयिनि ! मम स्वान्ते घनस्तनजघनया त्वया सततमाक्रान्ते अत एवान्यानवकाशवति वितनोरनङ्गादन्यो धन्यस्तादृशसौभाग्ययोग्य: कोऽप्यन्य: स्त्रीलक्षणो जनोऽन्तरं पश्चान्न विशति। साङ्गस्य प्रवेशाभाव इति तां शङ्कां मा कृथा इत्यर्थ:। शङ्कांमुक्त्वा किं कुर्वित्याहपरीरम्भारम्भ आलिङ्गनारम्भे विधेयतां दासतां विधेहि। अथवैवं योजनाप्रणयिनीति काकाक्षिगोलकन्यायेनोभयत्र संबध्यते। त्वयि योगो न युक्त इति प्रणयिनि मयि स्नेहपरे परीरम्भारम्भे विधेयतां किंकरतां विधेहि। त्वयानुमतोऽहमालिङ्गनार्थं प्रयतेय तथा कुरु। हरिणी वृत्तम्। अत्र काव्यलिङ्गमलंकार:। प्रणयिनीति पदौचित्यं वर्णानुप्रासश्च। प्रौढा नायिका। प्रगल्भो नायक:। विप्रलम्भे सङ्गसिद्धि: ।।५ ३ ।।

### (३) जगद्धरकृत- सारदीपिका (टिकानोपलब्धा)

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।५ ३ ।। परिहरेति। हे कृतातङ्के विहितसंतापे ! अन्यनायिकासङ्गसंशयं परिहर त्यज, यतो मम स्वान्ते चित्तेऽभ्यन्तरे वितनोस्तनुशून्यात्कामादन्यो धन्यो जनो न विशति न प्रविशति। कुतो न प्रविशतीत्यत आह, परेति। परानवकाशिनि इतरावकाशशून्ये। तत्र हेतुमाहत्वयेति। घने निबिडे स्तनजघने यस्यास्तादृश्या त्वया सतताक्रान्ते व्याप्ते। तथा च सदा त्वया पूरिते मदीये स्वान्तेऽन्यस्य प्रवेष्टुमेवावकाशो नास्ति। अनङ्ग एव परान्प्रविशति; तस्याङ्गाभावादित्यर्थ:। तस्मात्परीरम्भारम्भे आलिङ्गनारम्भे विधेयतां वचनग्राहितां विधेहि कुरु, परिरम्भमाचरेति मद्वचनं कुर्वित्यर्थ:। 'रुक्तापशङ्कास्वातङ्क:' **इत्यमर**: ।।५ ३ ।।

### (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५ ३ ।। एवं प्रियालापै: प्रियां राधामुपलाल्य स्वस्यान्यासक्त्तिं परिहरन् तस्या: सन्तोषाय स्वाचितकृत्यं प्रार्थयते। परिहरेति। हे राधे। कुतस्त बया निष्पादित आतङ्क: पीडा यस्मिन् तादृशे, मयि शङ्का मन्यासङ्गसन्देहं परिहर परित्यज। अथवा कृतातङ्कम् इति राधाविशेषणम्, तदा मयि निष्पादित आतङ्को यस्या: सम्बोधनं, हे कृतातङ्के अस्मिन् पक्षे शङ्कां परिहरेत्यत्र मयि इति शेष:। कुत इत्याकाङ्क्षायामाह। हे राधे । स्तनजघनं ''प्राण्यङ्गत्वादेकवद्भाव:'' । घनं पृथुलं स्तनजघनं यस्यास्तया अत्र जघनग्रहणं आक्रमणेऽन्यानवकाशं सूचनार्थम् सौन्दर्य्यातिशयद्योतनार्थं वा।

तादृश्या त्वया आक्रान्ते आवृत्ते इत्यर्थः। तादृशे स्वान्ते समान्तःकरणे परेषां भवव्द्यतिरिक्तछनानामनबकाशिनि अवस्थानावकाशहीनु अन्यानव काशित्वं च स्वान्तस्यसूक्ष्मत्वात्। घनस्तनजघनाक्रान्तत्वादवगन्तव्यम्।

वितनोरनङ्गादन्यः धन्यस्त्वमिव पुण्यात्मा कोऽपि स्त्रीजनः समान्तरं न विशति। बाधकत्वेनाधन्यो मन्मथ एव केवलं प्रविष्टः। वेदनानिवर्त्तकत्वेन धन्यः पुण्यात्मा भवादृशस्तु जनो ससान्तरं न प्रविष्टः। तथा च, त्वया मय्यन्यासक्तिशङ्केव न कार्य्येति तात्पर्य्यम् अत्र बितनुशब्देन मन्मथवोधनं तस्या स्वान्ते प्रवेश सौकर्य्यार्थम्। अङ्गहीनत्वेन प्रवेशस्तस्य निर्लज्जता सूचनार्थम्। वितनोरधन्यत्वं च पितृचित्तक्षोभकारित्वा दवगन्तव्यम्। एवमन्यासक्तिशङ्कांव निरस्य स्वेप्सितं कृत्यमाह। स्तनेति। हे राधे स्तनभरस्य कुचभारस्य स्तनमण्डलस्येत्यर्थः। परीरम्भ आलिङ्गनम् ''उपसर्गस्य यञ्मनुष्ये'' (६।३।१२) बहुलमिति दीर्घः। तस्यारम्भे निर्माणे प्रणयिनि परीरम्भेति क्वचित्पाठः। तदा हे प्रणयितित्यत्र मम बिधेयतामनुकूलभावं बिधेहि प्रकाशय। त्वं हृष्टा गाढालिङ्गनरूपकार्य्ये मां नियोज्य कृतार्थयेत्यर्थः। काव्यलिङ्गमलङ्कारः।।५३।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५३।। सामान्यासक्तमाशंक्य मृषैव कुप्यसीति दर्शयन् पुररनुयति, कृतः आतङ्कः क्रोधः यया सा तथा। हे कृतातङ्के! मद्विषयकान्याङ्गनाभावितशङ्कां परिहर त्यज। मम स्वान्ते मनसि सततमनवरतं घने निविडे स्तनजघने यस्या एतादृश्या त्वया आक्रान्ते, अतएव परानवकाशिनि सति ममान्तरं हृदयं वितनोरङ्गादन्यः धन्योऽपि कोऽपि जनः न विशति अधन्यानान्तु का कथेति भावः। तस्मात् प्रणयिनि मयि परिरम्भारम्भे सति विधेयताम् आयत्ततां विधेहि। तथा च परिरम्भारम्भमात्रेण ममायत्ततां विधेहीत्यर्थः। वितनुपनदेन कामस्य प्रवेशयोग्यता दर्शिता। तदनेन प्रबन्धेन मच्चित्ते भवती परं तिष्ठति कामश्च सन्तापयतीति+ दर्शितम्। 'आतङ्कः क्रोधशङ्कयोरि'ति **विश्वः**।।५३।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५३।। प्रसन्नां दृष्ट्वाऽऽत्मनः [४]सम्प्रसन्नतामाह, परिहरेति। हे[५]कृतातङ्के हे[६]कृतककोपे अन्यवधूभजनसन्तापशङ्कां परिहर त्यज। यतो मम स्वान्ते हृदये अन्तरमभ्यन्तरं वितनोः कामादन्यः कोऽपि धन्यः सुभगः [७] स्त्रीलक्षणोऽपि न विशति [८] प्रविशति। [९] एतेनात्मनि अन्यनायिकापरिहार उक्तः। कीदृशे स्वान्ते ? त्वया सततं [१०]सदा-ऽऽक्रान्ते व्याप्ते। कीदृश्या ? घनस्तनजघनया[११]घने निबिडेऽनवकाशे कठिने वा स्तनजघने यस्याः तया। पुनः कीदृशे ? परानवकाशिनि अन्यस्यावकाशशून्ये।

पुनः कीदृशे ? प्रणयिनि त्वत्प्रणयपूर्णे। [१२] परीरम्भारम्भे [१३] कृतालिङ्गनाद्योगे [१४] तं विधेयतां सुरतकर्तव्यतां विधेहि कुरु। विधेहीत्यनेन [१५] स (र्व) कलाकुशलत्वं नायिकाया उक्तम्। ''आतङ्क क्रोध [१६] शङ्कयोः'' इति धरणिः।।५ ३ ।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५ ३ ।। परिहरेति। हे कृतातङ्के [१७]विहितकोपापराधे [१८] राधे त्वं शङ्कां अन्यनायिका-सम्भोगजां परिहर त्यज। मम स्वान्ते हृदये त्वया सततमाक्रान्ते व्याप्ते सति वितनोः कामादन्यः कोऽपि धन्यः ममान्तरमभ्यन्तरं न विशति [१९]न[२०]प्रविशति। कीदृश्या त्वया ? घने कठिने स्तनजघने यस्याः कीदृशे स्वान्ते ? अत एव परानवकाशिनि अन्यस्यावकाशशून्ये। यतो ममान्तरं [२१]काम एव विशति [२] अतः स्तनभरपरीरम्भारम्भे तेनातिशयालिङ्गनाद्योगे विधेयतां [३] कर्तव्यत्तां विधेहि; आलिङ्गयेत्यर्थः।।५ ३ ।।

१ .कृतातङ्कां-इ. २ .सततं विना-इ. ३ .स्तनघनभराक्रान्ते-इ. ४ .सम्पन्नतां निरूपयति-इ.फ.ह. ५ .नास्ति-ग. ६ .कृतकामकोपे-इ. ७ .स्त्रीलक्षणो-अ.ब. ८ .नास्ति-अ.ब. ९ .एतेनान्यनायिक–इ.फ.ग.ज.एतेनात्मनि नायिका-अ.ब. १ ० .सर्वदा-इ.फ.ग.ह.ज. १ १ .नास्ति-अ.ब. १ २ .पुनः कीदृशे परीरम्भारम्भे-अ.ब. कीदृशे परीरम्भारम्भे-इ.फ.ग.ह.ज. १ ३ .कृतालिङ्गनयोगे-अ.ब. १ ४ .नास्ति-फ.ज. १ ५ .कलाकुशलत्वं -इ.फ.ग.ह.ज. १ ६ .शोकयोः-इ. १ ७ .नास्ति-क.विहितकोपे-ल.म. १ ८ .नास्ति-ड.ल.म. २ ० .नास्ति-ल. २ १ .कामो वसति-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५ ३ ।। परिहरेति। हे प्रणयिनि प्रणयः स्नेहोऽस्यामस्तीति प्रणयिनी तत्सम्बोधनम्। हे कान्ते ! कृतः उत्पादितः चातङ्कः सन्तापरूपो यया तां शङ्का अन्याङ्गनासहां परिहर त्यज। कुत इत्यत आह त्वया सन्ततं निरन्तरम्। घनौ च तौ स्तनौ च जघनञ्च घनस्तनजघनम्। द्वन्द्वैकवद्भावः प्राण्यङ्गत्वात्। तस्य भरेण क्रान्ते व्याप्ते अत एव परस्याः अन्यस्त्रियः अनवकाशे अवकाशाभावोऽस्यास्तीति अनवकाशी तस्मिन् जाते सति। विगता तनुर्यस्य सो (सः)वितनुः अनङ्गःतस्मात् अन्यः कोऽपि धन्यो जनःमम अन्तरं अन्तःकरणं न विशति। परीरम्भस्य आलिङ्गनस्य आरम्भे उपक्रमे विधेयतां अप्रतिकूलतां विधेहि स्वीकुरु। अत्र स्तनजघनाक्रान्तत्वं परानवकाशे हेतुरिति पदार्थहेतुककाव्यलिङ्गमलङ्कारः। तेन तव स्तनजघनासक्तचित्तस्य त्वदेकाग्रता व्यज्यते। तेनासदृशजघनादिसौन्दर्यं च व्यज्यत इति वस्तुध्वनिः। मन्मथमात्रस्यान्तरप्रवेशं प्रति वितनुत्वं शरीरभावपरत्वे साभिप्रायमिति तस्य विशेषणम्। परिकराङ्कुरालङ्कारः। तेन त्वदाकाङ्क्षारूपकामस्यैव प्रवेशो नान्यस्येति। स्तनजघनेति कृते गणभङ्गो भवतीति स्तनघनेति पाठः।[४]स्तनयोर्घनः अतिशयितभारस्तेनेति योजनम्।।५ ३ ।।

१.स्तनभरपरी-ड.२.अतः स्तनपरिरम्भारम्भे[१८३] तेनातिशयालिङ्गनोद्योगे-क.अतः स्तनभर-परिरम्भारम्भे स्तनातिशयालिङ्गनोद्योगे-ल.म.अतः स्तनभरपरीरम्भारम्भे स्तनातिलिङ्गनोद्योगे-ड. ३.नास्ति-क.ल.म.४.स्तन जघन इत्यनेन गणभङ्गो न भवत्येव। हरिणी वृत्तम्।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५३।। परीति। हे कृतातङ्के! शङ्कां परिहरेति योजना। कान्तान्तराधिष्ठितमनसा मयि वितर्कं मा कृथा इत्यर्थः। कृतातङ्क इति। कृतः आतङ्कः शङ्का सन्तापो वा ययेति विग्रहः। "आतङ्को रोगसन्तापशङ्कासु" इति **मेदिनी**। कथं शङ्का त्याज्येत्याह, स्वान्तेति। मनसि त्वया सततम् आक्रान्ते यन्त्रिते सति मम अन्तरम् अन्तःकरणं वितनोरन्यः धन्यः कोऽपि न विशतीत्यर्थः। मनोद्वारैवान्तःकरणं प्रविश्यते। मनश्चेत्त्वया यन्त्रितं केन पथा प्रवेष्टव्यम् इत्यभिप्रायः। माम् अपावृत्य कोऽपि प्रविशेदित्याशङ्क्याह। त्वया किंविधया? स्तनजघनेति। स्तनौ च जघनं चेति प्राण्यङ्गत्वात्समाहारः। घनं कठिनस्तनजघनं यस्या इति विग्रहः। एतेन मनसो दृढवस्तुना विरुद्धत्वं सूचितम्। अदृढवस्तुन एव चाञ्चल्यसम्भवात् मनस्तावदुभयविषयं युगपन्न गृह्णाति, तच्चेत् घनस्तनजघनवैशिष्ट्यवत् सौन्दर्यवत्यां त्वयि आसक्तं कथमन्यामभिलसिष्यतीति वस्त्वर्थः। अत एव परानवकाशिनीति स्वान्तर्विशेषणम्। परस्यानवकाशो यत्रेति विग्रहः। वितनोरन्य इति कामस्त्वनङ्गत्वात् प्रवेष्टुं शक्त इत्यर्थः। ननु त्यक्तैव शङ्का, सम्प्रति किं कार्यं तदुपदिशेत्याहस्तनभरेत्यादि। स्तनभरस्य स्तनाभोगस्य परीरम्भारम्भे आश्लेषोपक्रमे विधेयतां विनयग्रहितां विधेहि। "स्तनाभोगः स्तनभरः" इति त्रिकाण्डः। अन्तरमित्युपकरणमिति यद् व्याख्यातं तस्य देहमध्ये तात्पर्यम्। करणशब्दस्य देहपर्यायत्वात्। हरिणी नाम वृत्तम्।।५३।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५३।। तदर्थं त्वपरं कृत्यं विज्ञापयितुमाह, परीति। अन्यस्त्रीसम्भोगवितर्कः शङ्काकृतः आतङ्कः शङ्का यया हि तादृशि, शङ्कां परिहर। कथं त्वया निरन्तरं व्याप्ते मनसि अन्तरमभ्यन्तरं वितनोस्तनुशून्यात् कामादन्यो धन्यस्तादृक् सौभाग्यवान् जनः कोऽपि न प्रविशति। मनोद्वारेणैव एतदभ्यन्तरं प्रविशति मे मनः चेतः त्वया व्याप्तं केन पथा प्रवेष्टव्यमित्यर्थः। अतएवावकाशशून्योः इतरावकाशावसरो न चेन्मनसि आस्तां तत् कथं त्वयि साधारणदृष्टिः स्यादित्यर्थः। शङ्कां त्यक्त्वा च किं कर्त्तव्यम्? हे प्रणयिनि! परिरम्भस्यारम्भे इति कर्त्तव्यतां कुरु।।५३।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५ ३ ।। एवमनुनीतामपि अन्यासङ्गशङ्कापङ्किलितचित्ततया प्रसादमन्थरामालक्ष्य तां प्रबोधयन्नाह, परिहरेति। हे कृतातङ्के। कृतः स्वयमेव मिथ्यावितर्केणापादित आतङ्को मदन्यासङ्गरूपाशङ्का यया तथाविधे राधे! किं वा कृतो मदन्यासङ्गहेतुकः सन्तापो यया। 'रुक्तापशङ्कास्वातङ्कः' **इत्यमरः**। शङ्कां परिहर मयीति शेषः। मया सह तनुभेदमप्यसहमानस्यास्य मनसि कथमुद्भटकटुकपटनटनारभटीप्रकटनघटनपटीयसी काऽपि धृष्टा प्रविष्टा। चिरसञ्चितनिजवचनासञ्चयदीक्षां ग्राहीतवतीति संशयं त्यज। मम त्वदेकप्रणयाधीनस्य स्तनौ च जघनं च स्तनजघनं, घनं निविडं स्तनजघनं यस्यास्तथाविधया त्वया सततमनवरतं आक्रान्ते व्याप्ते। अत एव परा सामान्या सा प्रवेशयानवकाशिनि, नास्ति अवकाशो यत्र तादृशि स्वान्ते, त्वदेकाधारे मनसि, वितनोरङ्गादन्यो धन्यः कोऽपि न विशति, न प्रविशति। केवलं स एव विशतीत्यर्थः। अङ्गहीनत्वादन्तः प्रवेशसामर्थ्यात् धन्यत्वम्। अतनोरन्यः कोऽप्यधन्य इति वा। किन्तु स एव दग्धशरीरत्वात् लज्जात्यागात् विगर्हितः सन् प्रविष्टः इत्यर्थः। अतः प्रणयिनि! त्वदेकप्रणये निरपराधे मयि परीरम्भारम्भे त्वत्कृते मत्कृते वा आश्लेषनिर्माणे विधेयतामानुकूल्यं विधेहि, कुरु। उपसर्गस्य घञ् मनुष्ये बहुलमिति दीर्घः।।५ ३ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५ ३ ।। परिहर कृतातङ्केति; हे श्रीराधे! कृतं आतङ्कं भयं यस्याःराधिकाया अस्ति तस्याः। किम्भूतोभयः परस्त्रीसम्भोगजन्यो भयः तवास्ति यत् तत् वृथाशङ्कां परिहर। तव अत्युन्नतौ कुचौ तथा घनं सान्ध्रं जघनं मम हृदि व्याप्तं हृदयकपाटं इत्थमवरुणद्धि यत्र खलु अन्यनारीप्रवेशःसम्भव इति। न काऽपि अन्या धन्या त्वदृग्भाग्यवती अन्तः प्रविशति। केवलमशरीरत्वात् कन्दर्पः मम हृदि प्रविश्य पीडयति माम्। हे सखि तव स्तनमण्डलस्य पर्यन्तालिङ्गनार्थं मामनुमतिं प्रयच्छ। हरिणीवृत्तम्। काव्यलिङ्गमलंकारः। प्रौढानायिका प्रगल्भनायकः। विप्रलम्भे सङ्गसिद्धिरिति **कुम्भकर्णः**।। ५ ३ ।।

**५४-मुग्धे विधेहि मयि निर्दयदन्तदंश-**
**दोर्वल्लिबन्धनिबिडस्तनपीडनानि।**
**चण्डि त्वमेव मुदमुञ्च न पञ्चबाण-**
**चण्डालकाण्डदलनादसवः प्रयान्तु।।५४।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।५४।। सुन्दरि! चण्डि! कोपने! वत मुञ्च खेदं त्यजेत्यर्थः। "खेदानुकम्पा सन्तोषविस्मया मन्त्रणेवतेत्यमरः"। ननु अत्यजमेव खेदं सम्प्रति किं कार्य्यं तदुपदिशेत्याह। बिधेहि मयीत्यादि। किमेतावता प्रेप्सितं सिध्यतीत्याह। न पञ्चवाणेत्यादि, काम एव चण्डालो दृष्टचेतनत्वात् तस्य स्थाने मरणात् गतिरिति स्यादित्यभिप्रायः। वसन्ततिलकं वृत्तम्।।५४।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।५४।। इदानीं सापराधित्वमभ्युपगम्याप्याह, मुग्धे इति। हे मुग्धे आत्महितानभिज्ञे! अहमपराधीति चेत्तर्हि मय्यपराधयोग्यं दण्डं निर्दयदन्तदंशदोर्वल्लिबन्धनिबिडस्तन-पीडनानि विधेहि। अथवा, कोपैकशरणेति चेत्तर्हि संबोधनमुखेनानुरूपं विशेषणमाह, हे चण्डि कोपने! पञ्चबाणश्चाण्डालः तस्य काण्डैः शरैर्दलनान्ममासवः प्रयान्ति। किं पुनस्तस्य पौरुषेण? त्वमेव मुदमुद्वह मया जितोऽयमिति जयपटहं वादय इत्यन्वयः। अथवा, हे चण्डि! त्वं मुदमुद्वह एव; नान्योऽवकाशः, चण्डित्वं त्यज। त्वया चण्डित्वे ध्रियमाणे पञ्चबाणचाण्डालकाण्डदलनान्ममासवः प्रयान्ति। वसन्ततिलकावृत्तम्। रतिर्भावो व्यङ्ग्यः। तेन रसवदलंकारता। अनुकूलो नायिकः। मुग्धा नायिका। प्रसादो गुणः। वैदर्भी रीतिः।।५४।।

## (३) जगद्धरकृत- सारदीपिका (टीकानास्ति)

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५४।। मुग्धे इत्यादि। मुग्धे सुन्दरि! निर्दयं दयारहितं दन्तदंशं दन्तक्षतम्। अथ च दोर्वल्लिबन्धं भुजलताबन्धं निबिडं गाढं स्तनाभ्यां पीडनं च विधेहि कुरु। ततो हे चण्डि कोपने! त्वमेव मुदमानन्दमञ्चय प्राप्नुहि। मम पुनः पञ्चबाणः कामः स एव निरपराधमादृग्जनहिंसकत्वेन चाण्डालः, तस्य काण्डदलनान्नाराचप्रहरणादसवः प्राणाः प्रयान्तु निर्गच्छन्तु। चाण्डालप्रहरणेन मरणे न समीचीना गतिः। अतस्त्वया साक्षादेव यथोचितदण्डाचरणं विधेयमिति भावः। 'चण्डी कात्यायनीदेव्यां हिंस्रकोपनयोषितोः' इति **विश्वः**।।५४।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५४।। प्रकारान्तरेण तामेव प्रार्थयते। मुग्ध इति। हे मुग्धे! युक्तायुक्तविचारशून्ये तच्छून्यत्वं वाधाप्रतिकाराज्ञस्तेन कौशलाभावादवगन्तव्यम्। वाधाप्रकारं स्वयमेवोपदिशति। मयि अपराधकारिणि स्वस्मिन् दन्तदंशो दन्तक्षतं दोर्बलिभ्यां बन्धो निरोधः निविडाभ्यां स्तनाभ्यां पीडनं मर्द्दनं च निर्द्दयानि दयापराङ्मुखानि च दन्तदंशदोर्वल्लिवक्षनिविड़स्तनपीडनानि अथवा निर्द्दयं यथा भवति तथा दन्तदंशादीनिति दन्तदंशादिक्रियाविशेषणं वा। एतानि विधेहि कुरु। हे चण्डि! कोपशीले! त्वमेव मुदमानन्दमुञ्च प्राप्नुहि। यथा लोके कस्मिश्चिद्देशविशेषे कश्चित् कोपशीलो जनः अपराधकारिणं स्वजनं दन्तैरुपदंश्य रज्ज्वादिभिर्वध्वा कठिनैः पाषाणादिभिरुपपीड्य स्वयमेव प्रशान्त कोपः सन् सन्तुष्टो भवति तथा त्वमपीति भावः। तर्हि प्राणहानिर्यत्र मया कर्त्तव्येत्याशङ्कायामाह। नेत्यादि। हे चण्डि! पञ्चववाणो मन्मथः स एव चण्डालः दिवाकीर्त्तिः तस्य चण्डालत्वं पुरुषगौरवमनालोच्य वाधकत्वान्निर्द्दयत्वात्पितृवाधकत्वाच्चावगन्तव्यम्। तस्य काण्डानि बाणास्तै र्दलनाद्विदारणाद्धेतोः असवः मम प्राणाः न प्रयान्तु न गच्छन्तु। अत्रासव इति बहुवचनप्रयोगाद्जात्यसंख्यानुगुण्याय पञ्चबाण इत्युक्तमित्यवगन्तव्यम्। हनुं जीवयितुं च। समर्थे जने विद्यमाने तदितरशास्त्रं निषिध्य चण्डालकृतवाधाया अयुक्तत्वादि भावः। एवं च सति शास्त्रमुल्लंध्यानेन वाधयत्यास्तव मुग्धत्वं सुव्यक्तमेवेति भावः।।५४।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५४।। आलिङ्गनप्रथनानन्तरमधरपानं प्रार्थयन्नेव पुनरनुनयति हे शशिमुखि! तव भङ्गुरभ्रूयुवजनानां वजनानां मोहाय कराला भीषणा कालाख्या याः सर्पी सर्पवधूर्भाति शोभते। अत्र करालकालसर्पीति विशेषणैरतिकठिनत्वं सूचितम्। तदुदितभयभञ्जनाय तस्यामुदितं यद् भयं तस्य भञ्जनाय त्वदधर एव सीधुर्मद्यं मादकत्वात्। तदेव सुधा तत्कार्यकारित्वात्। सैव सिद्धमन्त्रः कालसर्पी भयदायकसिद्धमन्त्र इव। नान्य इत्येवकारार्थः। तथा चास्माकमपि भीतिरस्तीति अधरसुधासिद्धमन्त्रेण तापमपनयेति वाक्यार्थः।।५४।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५४।। यद्यालिङ्गने मौनमाचरसि तत्परिहराय [४] ममानुरूपं दण्डमाचरेत्याह मुग्धे इति। हे मुग्धे सुन्दरि मयि निर्दयं दयारहितं [५] दन्तदंशं दन्तैर्दंशं खण्डनम्; दोर्वल्लिबन्धः भुजलताबन्धश्च ; निबिडं गाढं स्तनाभ्यां [६]पीडनानि आलिङ्गनानि च विधेहि कुरु।

कृतापराधे मयि [७] सर्वे दण्डाः कर्तव्याः। [८]नात्र [९]सङ्कोचः कार्यः। किञ्च हे चण्डि कोपनस्वभावे [१०]सुरतोद्भटे वा ममापराधिनो [११] त्वमेव [१२]मुदमानन्दं अञ्च [१३] प्राप्नुहि। न [१४] त्वन्यस्यां ममानुराग इत्यर्थः। नो चे[१५]त्पञ्चबाणचण्डालस्तस्य काण्डदलनात् बाणप्रहरणादसवः [१६]प्राणाः प्रयान्तु [१७] गच्छन्तु। अतो मयि प्रसन्ना भवेति प्रार्थना। चण्डी च सुरतोद्भटा इति महोदधिः।।५४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५४।। मुग्ध इति। हे मुग्धे मूढे सुन्दरि वा मयि निर्दयं दयारहितं दन्तदंशं दन्तक्षतं विधेहि [१८]कुरु। किञ्च दोर्वल्लिबन्धो भुजलताबन्धः तेन निबिडं यथा [१९]स्यात्तथा स्तनाभ्यां पीडनान्यालिङ्गनानि विधेहि। हे चण्डि कोपनशीले त्वमेव मम [२०] मुदं प्रीतिमञ्चय जनय[२१]न त्वन्यस्यां ममानुराग इत्यर्थः। उद्वहेति पाठे कुरु। नो चेत् पञ्चबाणः [२२] कामः स एव चण्डालस्तस्य काण्डदलनात् [२३] बाणक्षतात् असवः मम प्राणाः प्रयान्ति गच्छन्ति। अतो मयि प्रसीदेत्यर्थः।।५४।।

१.चण्डि त्वमेव वद मुञ्च रुषं न काम-इ. २.मुदमुद्वह-नि.सा.ड.मुदमञ्चय-अ.ब. ३.प्रयान्ति-ड.४.ममानुरूपमिदमाचरेत्याह-ग.५.दन्तदंशनं दन्तैः खण्डनं-इ.दन्तदंशैः खण्डनः-ग.दन्तदंशं दन्तेन खण्डनं-फ.ज.दन्तदंशं दन्तैः खण्डनं-इ.६.पीडिताभ्यां आलिङ्गनानि-अ.ब.७.सर्वदण्डा:इ.८.माऽत्र-इ.ग.९.शङ्का च कार्या-फ.ज.१०.नास्ति-अ.ब.११.त्वमेव हे चण्डि सुरतोद्भवे मुदमानन्दं-अ.ब.१२.मुदमञ्च आनन्दं प्राप्नुहि-फ.ज.१३.प्राप्नोति-अ.ब.१४.त्वन्यस्यामनुराग इत्यर्थः-ग.१५.पञ्चबाणः पञ्चचाण्डालः-इ.ग.ह.पञ्चबाणः चाण्डालः-फ.ज.१६.नास्ति-अ.ब.१७.नास्ति-अ.ब.१८.नास्ति-क.१९-२२.नास्ति-ड.२३.नास्ति-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५४।। सत्यमेवास्तीति गीतार्थं श्लोकेन ग्रथयति मुग्ध इति। हे मुग्धे स्वहितानभिज्ञे मयि निर्गता दया यस्मिन् कर्मणि तथा निर्दयं पुनः समासाद्विभक्तिलोपः। निर्दयं दन्तद(दं)शाश्च दोरेव वल्लिः भुजलता तया बन्धः स च निबिडस्तनाभ्यां पीडनं घट्टनं च तानि विधेहि। हे चण्डि अनिवार्यकोपे त्वमेव वद मया किमपि नोच्यते। मौनं त्यज रुषं मुञ्च कोपं त्यज। काम एव मन्मथ एव चण्डालः घातुकत्वाच्चण्डालत्वारोपः। तस्य काण्डाः शराः तैः दलनं भेदनं तस्मात् असवः प्राणाः न प्रयान्तु न गच्छन्तु नोत्क्रामन्तु। यद्वा हे चण्डि रुषं न मुञ्च किन्तु कामचण्डालशराघातान्ममासवः प्रयान्तु। किन्तु त्वमेव वद। कोपं न मुञ्चसि चेत् मम प्राणोत्क्रमणं स्यादिति भावः। पूर्वार्धे प्रकृतगम्यसाधर्म्यतुल्ययोगिता। वसन्ततिलकावृत्तम्।।५४।।

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५४।। यदि मद्वचनान्न प्रत्येषि, तर्हि स्वयमेव दण्डमाचरेत्याह मुग्धे इति। स्वीये दण्डमकुर्वाणे मुग्धे इति सम्वोधनं कोपावेशात्। नैतद्वुध्यसे इति चण्डीति त्वमेव मुदमञ्च सुखं प्राप्नुहीत्यर्थ:। तत्प्रकारमाह मयि निर्द्दयदन्तदंशदोर्वल्लिबन्ध-निविड़स्तनपीड़नानि विधेहि। एतानि विधाय मुदमाप्नुहीत्यर्थ:। किमेतावता सेत्स्यति ? पञ्चवाण एव चाण्डाल: दुष्टचेष्टत्वात्तस्य वाणप्रहरणात् मम प्राण: न प्रयान्तु।।५४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५४।। ननु त्वदङ्गे सम्भोगचिह्नानि स्फुटं दृष्टानि सन्ति। तत्कथं शङ्कां परिहरयामि। एवं चेन्निश्चिनोषि तर्हि त्वमेव दण्डं विधेहि। न तु मन्मथेन मारयेत्याह, मुग्धेति। हे मुग्धे! दण्डविधानेन त्वमेव मुदं सुखं अञ्च, आप्नुहि। न च पञ्चबाणस्य सर्वाण्यप्यस्त्राणि युगपदेव मोक्तुं प्रवृत्तस्य मन्मथस्य अत एव चण्डालस्यातिनिकृष्टस्य काण्डानां शोषणसन्तापनादिविविधशक्तिमतां सायकानां दलनात् पीडनात् असवस्तुत्वदधीना: प्राणा: न प्रयान्तु न निर्गच्छन्तु। विधेयजनस्य नीचेन घातनमत्यनुचितमिति ते मौग्ध्यमिति भाव:। कीदृग् दण्डं विदधामीति चेत् तत्राह, हे चण्डि! महाक्रोधने! निर्दयानि दयारहितानि तव यथा रुचिप्रदानीत्यर्थ:। तथा विधानि दन्तदंशबाहुलताबन्धनिविडस्तनपीडनानि विधेहि। अनेनातृप्तिश्चेदन्यदपि कुर्विति भाव:।।५४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५४।। मुग्धे विधेहीति; अत्र कामशास्त्रं नाम वास्त्यायनस्य मार्गमवलम्ब्य क्रमेण नायिकामनुकूलयति नायक:। हे मुग्धे! अनभिज्ञे आत्महितान्न जानासि। यदि त्वदृष्ट्याऽहंमपराधीति ज्ञायसे तर्हि तदनुगुणं दण्डविधानं विधेहि। निर्दयतया दन्तदंश दन्तेन च्छेदं कुरु। कोपेन चेत् यदि तर्हि तीव्रदन्ताघातेन दंशनं कुरु। दोर्बल्या तव भुजवल्या निविडबन्धनं कुरु येन स्तनेन मां पीडय। अनेन व्यथादानेन मोदय। पुन: हे चण्डि! त्वं मुद्वह सुखस्यानुभवं कुरु। परन्तु मत्पीडया तव किं सुखं भवेदिति चण्डस्वभावं मुञ्च। हे चण्डि! चण्डालस्वभावसम्पन्न: कन्दर्प: मयि तीक्ष्णसायकं क्षिपति। तेन एतत् असव: तव प्राणा: निर्गच्छन्तु। परन्तु एतत् सर्वं त्यक्त्वा साक्षात् यथोचितदण्डविधानं कुरु। वसन्ततिलकवृत्तम्। रतिर्भाव: व्यङ्ग्य:। रसवदलंकारता। अनुकुलोनायक:। मुग्धानायिका। प्रसादगुण:। वैदर्भीरीति:।।५४।।

**५४-क- शशीमुखि तव भाति भङ्गुरभ्रु**
**र्युवजनमोह करालकालसर्पी।**
**तदुदितभयभञ्जनाय यूनां**
**त्वदधरसीधुसुधैव सिद्धमन्त्रः।।५४-क।।(संजीवनी)।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।५४-क।। शशिमुखीति। हे चन्द्रवदने तव भङ्गुरभ्रूर्भातीति योजना। कीदृशी, युवजनमोहनकरालकालसर्पी, तर्हि महाननर्थः। तया दृष्टानां यूनामौषधभावान्मरणा पत्तेरित्याह। तदुदितेत्यादि। तदुदितसुमहाविपत्तिर्मोहः तच्छास्त्यै त्वदधरसीधुसुधेति, सीधुशब्देनैव गतार्थत्वात्सुधाशब्देन संघातनिशो वाक्यार्थः। यथा वज्राशनिसमस्वनमिति विष्णुपुराणे। पुष्पिताग्रावृत्तम्।।५४-क।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।५४-क।। इदानीं वात्स्यायनन्यायमाश्रित्य क्रमेणानुकूलयति, शशिमुखीति। हे शशिमुखि! तव भङ्गुरभ्रूर्युवजनमोहकरालकालसर्पी विद्यते। युक्तोऽयमर्थः; शशिनो हिंसार्थश्रवणात्। या हिंस्रमुखी भवति तस्या मुखे भ्रूः कृष्णसर्पी भवत्येव। यूनां तरुणानां यतः सर्पादुदितभयभञ्जनाय त्वदधरसीधुसुधैव त्वदधरसीधुः, स एव सुधा। तव किलामृतबुद्ध्या तत्सन्निधौ कृष्णसर्प्या अवस्था न युज्यते इति योजना ।अथवा,- हे शशमिुखि! तव मुखे भ्रूस्तावत्सर्पीत्यनुमीयते। यतो यदुदितभयभञ्जनाय यूनां त्वदधर एव सीधुः, पानसाधर्म्यात् स एव सुधामधुरत्वाद्विषनाशनाय सिद्धमन्त्रः। अत्र सुधाया आस्वाद्यत्वेन ओषधित्वे वक्तव्ये यन्मन्त्रोपादानं तत्सर्वयुवसाधारण्येन शृङ्गाराभासव्यावृत्त्यर्थम्; अतिसौन्दर्यात्। अन्ये स्मरन्तु नाम उपभोगयोग्यत्वं हरेरेवेति। पुष्पिताग्रा वृत्तम्। अत्र कल्पितोपमारूपकालंकारौ। तमेव क्रमशब्दार्थं विशिनष्टि आसर्गपरिसमाप्तेः।।५४-क।।

## (३) जगद्धरकृत- सारदीपिका(टीकानोपलब्धा)

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५४-क।। ननु कोपो मम नास्त्येवेति आह, शशिमुखीत्यादि। हे शशिमुखि चन्द्रानने! तव भङ्गुरभ्रूः भाति। कीदृशः? युवजनानां तरुणजनानां मोहनाय करालो भीषणः कालसर्पः। भुजंगो दष्ट्वा मोहयति, इयं दृष्ट्वा मोहयतीत्येतस्य करालत्वम्।

अतस्तदुदितविषभञ्जनाय तत्सकाशादुदितमुद्गतं यद्विषं तस्य भञ्जनाय नाशाय यूनां तरुणजनानां त्वदधरसीधुसुधैव त्वदीयाधर एव सीधुर्मदिराविशेषः स एवामृतं तदेव सिद्धः साधितो मन्त्रः। अन्यो जपादिना विषं नाशयति अयं त्वासादित एवेति एतस्यान्यमन्त्रापेक्षया सिद्धत्वम्। तथा चायमपि तव भ्रूकालसर्प विषमूर्च्छितस्तस्या-प्यौषधत्वेन तवाधरः सुधायाः समान इति भावः। 'करालो भीषणेऽन्यवत्' इति **विश्वः**।।५४-क।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानोपलब्धा)

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५४-क।।आलिङ्गनप्रार्थनानन्तरमधरपानं प्रार्थयन्नेव पुनरनुनयति हे शशिमुखि! तव भङ्गुरभुय्वजनानां मोहाय कराला भोषणा कालाख्या याः सर्पे सर्पवधूर्भाति शोभते। अत्र करालकालसर्पेति विशेषणै रतिकठिनत्वं सूचितम्। तदुदितभयभञ्जनाय तस्याम् उदितं यद् भयं तस्य भञ्जनाय त्वदघर एव सीधुर्मद्यं मादकत्वात्। तदेव सुधा तत्कार्यकारित्वात्। सेव सिद्धमन्त्रः कालसर्पे भयदायकासिद्धमन्त्र इव। नान्य इत्येवकारार्थः। तथा चास्माकमापि भीतिरस्तोति अधरसुधासिद्धमन्त्रेण तापमपनयेति वाक्यार्थः।।५४-क।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५४-क।। (शशिमुखीति।) किञ्च हे शशिमुखि[५]चन्द्रवदने तव [६]भङ्गुरा कुटिला चासौ भ्रूश्च सा भाति शोभते। [७]कीदृशी सा? यूनां जनो युवजनस्तस्य मोहस्तत्र करालो भयङ्करो यः कालसर्पः सोऽस्यास्तीति। यथा स तन्मोहसमर्थो भवति तद्वत्। अथ तन्नाशने सिद्धमणिमन्त्राद्यपेक्षितं तत्राह- तदिति। यूनां तरुणजनानां तेनोदितं यद्भयं तद्भञ्जनाय (ना) शाय तव यदधरं तस्य यन्मदामृतमेव सिद्धमन्त्रो भवति नान्य इत्यर्थः। [८]रूपकोऽयमलङ्कारः। ''भीतिर्भीस्साध्वसं भयम्'' **इत्यमरः** (१.७.२१)। [९]''करालश्च भयङ्करे'' इति **विश्वः** [१०] (१०५.१०६)।।५४-क।।

१.पद्यमिदं सव्याख्यं नास्ति-अ.२.करालकासर्पः-इ.३.यदुदित-इ.ड.४.तदधर-ब. ५.चन्द्रानने-इ.फ.ग.ह.ज.६.भङ्गुरभ्रूः वक्रभ्रूः भाति शोभते-इ.फ.ग.ह.ज.७.कीदृशी? युवजनानां तरुणजनानां सम्मोहनाय कराला भीषणा कालसर्पी कृष्णाहिवधूः। अन्या भुजङ्गी दंशेन जनं विमोहयति; त्वं तु भ्रूभङ्गमात्रेणेति भावः। किञ्च तदुदितभय भञ्जनाय तस्या भ्रुवः सकाशादुदितं उत्पन्नं तस्य भञ्जनाय नाशाय यूनां तरुणानां मादृशां त्वदधरसीधुः त्वदीयाधरसीधुः त्वदीयाधरसीधुः मदिरा सैव सुधाऽमृतमेव सिद्धमन्त्रः साधितो मन्त्रः प्रभावयुक्तो वा-इ.फ.ग.ह.ज.८.तः१०.पर्यन्तं नास्ति-इ.फ.ग.ह.ज. ९.करालश्च कुठेरके-विश्वः।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५४-क।। शशीति। हे शशिमुखि चन्द्रवदने तव भङ्गुरभ्रूर्वक्रभ्रूलता भाति शोभते युवजन [१] मोहाय [२] कराला भीषणा कालसर्पी कृष्णसर्पस्त्री। किञ्च तस्या भ्रुवः उदितं उत्पन्नं यद्भयं तस्य भञ्जनाय नाशाय यूनां तरुणानां तवाधरसीधु मद्यं तदेव [३] सुधापानसाम्यान्माधुर्याच्च [४] सिद्धमंत्रः विषापहरणार्थम्।।५४-क।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५४-क।। शशिमुखीति। शशीव मुखं यस्याः तत्सम्बोधनम्। हे शशिमुखि! तव भङ्गुरा भञ्जनशीला वक्रेत्यर्थः। भ्रूः व्यस्तरूपा। युवानश्च ते जनास्तेषां मोहे मूर्छने करालश्चासौ सर्पः। भिन्नपदव्यस्तरूपकम्। भाति शोभते। यूनां तरुणानां यस्मात् सर्पात् उदितं उत्पन्नं भयं भञ्जनाय नाशनाय त्वत्तव अधर एव सीधुसुधा सुरारूपपीयूषः हर्षातिशयसाधनत्वात् सीधुत्वारोपः। सैव सिद्धमन्त्रः। क्षिप्रनिवर्तकत्वात् मन्त्रत्वारोपः। इति परम्परितरूपकालङ्कारः। तव भ्रूसमालोकनोद्दीपितमदनभयनाशः त्वदधरपानादेव भवतीत्यर्थः।।५४-क।।

१.मोहनाय-क.ल.म. २.करालो भीषणः कालसर्पः कृष्णसर्पः-क. ३.सुधापानं-क. ४.सैव सिद्धमन्त्रः-क.ल.म.

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)(टीकानास्ति)

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५४-क।। मम कोपो नास्ति एवेति चेत्तत्राह शशीति। हे शशिमुखि! तवभङ्गुरभ्रूः भाति। कोपिनी चेन्नासि तत् कुतो भ्रूवोर्भङ्गुरत्वमितिभावः। सहजैव भ्रूर्भङ्गुरा न कोपात् इति चेत्तत्राह युवजनस्य मम मोहनाय भयङ्करी कालसर्पी भीत्युत्पादनं कोपादेवेत्यर्थः। तर्हिं तया दष्टस्य भवौषधाभावादनर्थापत्तिरेव स्यादत आह। तस्या उदितस्य भयस्य नाशाय यूनामस्माकं बहुवचनं तस्याः प्रसन्नतामालक्ष्यात्मनो बहुमानित्वात् त्वदधरसीधु-सुधैव सिद्धमन्त्रः। नान्यत् किञ्चिदस्तीत्येवशब्दार्थः, मादकत्वात् सीधु इति मधुरत्वात् सुधेत्युक्तम्। कालसर्पदष्टस्यामृतादेव जीवनं नान्याथा इति अनन्यगतिकत्वञ्च वोधितम्।।५४-क।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५४-क।। एवं निवेदितदैन्योक्तिश्रवणसञ्जातभावभङ्गुरितभ्रूशोभितमुखीं समालक्ष्य सोल्लासमाह, शशिमुखीति। हे शशिमुखि! तव भङ्गुरभ्रूः कुटिलितचिल्लीलता भाति। शोभते। इयं युवजनस्य, त्वन्निरनुरोधतया लोकस्य मान्यतामापन्नस्य मम मोहाय

चेतनाध्वंसनाय कराला अतिभीषणा कालसर्पी, महाविषकृष्णभुजङ्गी। तदा एतया दष्टस्यानर्थापत्तिः स्यात्तत्राह, तत् सकाशादुदितस्य भयस्य भञ्जनाय, नाशाय यूनामस्माकं, बहुवचनम्, तस्याः प्रसादमालक्ष्यात्मनो बहुमानादिति मन्तव्यम्। त्वदधरसीधुसुधैव सिद्धमन्त्रः। मादकत्वांशेन सीधुशब्दस्य उपन्यासः। अन्यसर्पदष्टस्य सिद्धमन्त्रपठनात् विषमोक्षणं स्यात्। एतद्भ्रूकालसर्पीविषोपशमनं त्वदधरसुधापानेन एव न चान्येन । अप्रस्तुतात् सामान्याप्रस्तुतात् विशेषस्य प्रतीतेरप्रस्तुतप्रशंसा।

अन्तःप्रसादामपि बहिरनुत्तरामाह; व्यथयतीति। हे तन्वि! वाङ्निरोधखेदासहने! वृथा मौनं तव निर्हेतुकमसम्भाषणं व्यथयति, खेदयति। अत्र कर्मानुक्तिः। पशुपक्षिसाधारण्येन सर्वानेव व्यथयतीति व्यनक्ति। अतो हे तरुणि! साहजिकमधुर-विविधभावसम्पन्ने। मधुराः कर्णरसायनाः हे आलापाः प्रणयोक्तयस्तैः पञ्चमं, पञ्चमाख्यस्वरविशेषं प्रपञ्चय। यावता मम तृप्तिः स्यात्तथा विस्तारयेत्यर्थः। अनेन मन्मथतर्जनानुकारिपिकस्वरसम्पादितकर्णज्वरोऽपगच्छत्विति भावः। तथा दृष्टिभिः प्रेमगर्भितविलास विलोकनैस्तापं, मृगखञ्जननलिनेन्दीवरादिदुर्दर्शनोदितनेत्रसन्तापं विनोदय, निर्वापय। न केवलं श्रवणदर्शनयोस्तापमपहरेति वदामि, किन्तु सकलाङ्गानामित्याह, हे सुमुखि! सहजप्रसादस्मेराननने! अनेन मानशैथिल्यं सूचितम्। विमुखीभावं सकलसन्तापकारणं दुःशङ्कापादितं वैमुख्यं तावत् साकल्येन मुञ्च। मां त्वद्दर्शनातिकातरं न मुञ्च। मुञ्चन्ती सती दारुणदर्पककार्मुकदुर्वारदुर्विलसितं मा विधेहीति भावः। ननु प्रतिकूलस्यापेक्षणमुचितमेवं चेत्तत्राह; हे मुग्धे! युक्तायुक्तविचारमूढे। अतिशयस्निग्धस्त्वत्प्रणयोपलालनैकप्रवणः प्रियः त्वत्प्रेमैकविषयताया लब्धनिःसीमसौभाग्यः, अयं त्वत्प्रसादं प्रतीक्षमाणोऽहं स्वयमुपस्थितः। अनाहूतः एवागत्य त्वत्समीपे बहुविरचितानुनयः वर्त्तत इत्यर्थः।।५४-क।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५४-क।। शशिमुखीति; मयि रुष्टत्वं साक्षात् दण्डविधानं कुरु। हे शशीमुखि चन्द्रमुखि! तव भति प्रतिभाति भङ्गुरभ्रूकुटीभ्रू युवजनानां तरुणानां मोहस्य कराल-कालसर्पी उत्फणीव आक्रमणं करोति। अतः भङ्गुरभ्रुवः कालसर्पणीव हिंस्राचरणम्। सा हिंस्रमुखीभवति। तस्य सर्पिणी विषहरणाय त्वदधरसुधापानमिष्यते। सुधाया आस्वाद्यत्वेन औषधित्वे वक्तव्ये यन्मन्त्रोपादानं तत्सर्वयुवसाधारण्येन शृङ्गाराभासव्या-वृत्यर्थम् अतिसौन्दर्यात्। पुष्पिताग्रावृतम्। कल्पितोपमा रूपकालंकारौ।।५४-क।।

**५५-व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं**
**तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः।**
**सुमुखि विमुखीभावं तावद्विमुञ्च न मुञ्च मां**
**स्वयमतिशयस्निग्धो मुग्धे प्रियोऽहमुपस्थितः ।।५५।।**

### (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।५५।। व्यथयति वृथा मौनं तन्वीति मामानालप्य त्वमपि कृशासीत्यभिप्रायः। प्रपञ्चय पञ्चमं तरुणिःमधुरालाप तिति। ''पञ्चमो रागभेदे स्यात्पञ्चपामपि पूरणे'' इति **विश्वः**। तापं विनोदय दृष्टिभिरिति। तरुणि! अत्रापि सम्बोध्यते। युवत्या एव कटाक्षदाने न चातुर्य्यादित्यभिप्रायः। सुमुखि! विमुखीभावं तद्विमुञ्चेति, सुमुख्या वैमुख्यस्यानुचितत्वात्यन्ताप्रतिभावनादित्यभिप्रायः। न मुञ्च मामिति परीरम्भादिना मामनुगृह्णीष्वेति भावः। किं कारणमित्याह स्वयमित्यादिः।।५५।।

### (२) राणाकुम्भकृत- रसिकप्रिया

।।५५।। व्यथयतीति। हे तन्वि कृशाङ्गि! तवैतद्वृथा मौनं मां व्यथयति। त्वया तनुत्वाद्वक्तुमशक्यत्वेन मौनं न ध्रियते, किंतु निरपराधे सापराधोऽयमिति 'वृथा' शब्दद्योत्यम्; अत एव व्यथयतिं। हे तरुणि! मधुरालापैः पञ्चमं पञ्चमस्वरं प्रपञ्चय विस्तारय। पञ्चमोपादानेन वसन्तसमयसंजातरुचिरालापकोकिलजेतृत्वं सूचितम्। वसन्ते हि कामिन्यः स्वैरं प्रियमनुसरन्तीति व्यज्यते। हे तरुणि! मौनं वचनशक्तौ सत्यामवचनमर्थान्तरापाति तत्त्यजेति। अपि च, दृष्टिभिरित्यत्र 'दृशिर् प्रेक्षणे' इत्यत्र 'प्र'शब्दो दर्शनप्रकर्षं स्निग्धत्वादि वदति। तेन स्निग्धलोचनैस्तापं विनोदयेति विशिष्टोऽर्थे लभ्यते। हे सुमुखि! तावद्विमुखीभावं विमुञ्च। सुमुख्या विमुखीभावो न युक्तः। हे मुग्धे! अयमहमतिशयस्निग्धः स्नेहवान्प्रीतिमांश्च उपस्थित इति मां न वञ्च इति न, अपि तु वञ्च जानीहि। 'अयम्' इति औदासीन्यव्यावृत्त्यर्थो निर्देशः। अत्र मुग्धत्वं न घटते। चातुर्यमुपेत्य मां त्वदेकतानं जानीहीत्यर्थः। अत्र हरिणीवृत्तम्। यथासंख्यमलंकारः। अनुकूलो नायकः। प्रसादो गुणः। कैशिकी वृत्तिः। वैदर्भी रीतिः। मागधी गीतिः।।५५।।

### (३) जगद्धरकृत- सारदीपिका

।।५५।। व्यथयतीति हे तन्वि! सुन्दरि! तव वृथा मौनं मां व्यथयति मामिति ज्ञातव्यं तस्मात् हे तरुणि मधुरालापैः कोमलवचनैः पञ्चमरागं प्रपञ्चय उद्गिर दृष्टिभिः

अवलोकनैस्तापं मानसं तापं विनोदय अपसारय हे सुमुखि सुवदने विमुखी भावं दुष्टदृष्टि त्वां विमुञ्च त्यज हे मुग्धे ! ज्ञानशून्ये ! अहं प्रियः स्वयम् अकारणं विनैव उपस्थितः आगतः अतएव मे वचनं नवं चयनोल्लङ्घस्व कीदृशः प्रियः अतिशय स्निग्धः महावत्सलः स्वयमागतः हातुं नोचितमिति भावः ।।५५ ।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५५ ।। व्यथयतीत्यादि। हे तन्वि ! तव वृथा मौनमकारणवाग्वन्धनं मां व्यथयति पीडयति। किंच, हे तरुणि ! मधुरालापैः पञ्चमं स्वरविशेषं प्रपञ्चय विस्तारय। किंच, दृष्टिभिरवलोकनैस्तापं संतापं विनोदय विशेषतोऽपसारय। हे सुमुखि ! विमुखीभावं त्यज मयि विमुखतां तावद्विमुञ्च। सुमुख्यास्ते वैमुख्यमनुचितमिति भावः। मानं मुञ्च त्यज। हे मुग्धे ! अयं प्रियोऽनाकाङ्क्षित एवोपस्थित आगतः। कीदृशः ? अतिशय-स्निग्धोऽतिशयेन स्नेहवान्। तथा च स्वयमागतः प्रियः (इति) हेतुर्नोचित इति भावः ।।५५ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५५ ।। पुनरपि पदार्थविधया स्वाभिमत प्रार्थयन्ननुनयति। हे तान्वि। वृथा निरर्थकं मौनम् अर्थात्तव, व्यथयति पीडयत्यर्थान्मान्। तव मौनस्यास्मत्तारुण्यनिरूपणां फलम्। तत् जातमेवेति वृथेत्युक्तम्। तर्हि मया किङ्कर्त्तव्यमित्यत आह, हे तरुणि युवति ! मधुरालापैः पञ्चमं रागविशेषं प्रपञ्चय विस्तारय। आलापैरित्यनेन येन केनापि आलापेन भवत्याः पञ्चमविस्तारो भवतीति दर्शितम्। दृष्टिभिर्दर्शनैस्तापं मनःखेदं विनोदय अपसारय। विनोदयेति नुद प्रेरणे धातोर्निजन्तलोटि रूपम्। हे सुमुखि ! विमुखीभावं विमुञ्च। सुमुखीनां वैमुख्यस्यातिबिरुद्धत्वादिति भावः। मां न मुञ्च न परिहर। अपरिहार्यताप्रयोजकमाह, हे मुग्धे ! अयमेतादृगायातः स्निग्धो वत्सलः प्रियः स्वय-मनाह्वानेनैवोपस्थितः समागतः यत्र इत्यध्याहार्थम्। तथा च मानेनाप्येतदेव साध्यमतः परं मानालम्बनं नोचितमिति ध्वनिः। अत एव मुग्धेत्युक्तम्। 'पञ्चमो रागभेदे स्यात् पञ्चानामपि पूरणमिति विश्वः। 'सकलार्थे परिप्रश्ने प्रक्रमे तावदव्ययमि'ति च।मुग्धावज्ञमनोहरावित्य**मरः** ।।५५ ।।

## (७) वनमालि भट्टकृत- सञ्जीवनी

।।५५ ।। [२]व्यथयतीति। [३] मौनं कर्तृ वृथा व्यथयति दुःखं करोति। तन्वीति सम्बोधनम्। मधुरालापैः मनोहरध्वनिभिः पञ्चमं स्वरविशेषं प्रपञ्चय मनोविषयं कुर्वित्यर्थः। हे

तरुणि! दृष्टिभि: अक्षिपातै: तापं सन्तापं विनोदय दूरीकुरु। सुमुखि! तावदिति वाक्यालङ्कारे ; वि (मुखी) भावं मुञ्च त्यज मां च न मुञ्च मा त्यज ; त्वत्सङ्गमाभावे ममापि भवत्या: सुखं नास्ति। स्वयमेव न तु दूत्यादिद्वारा। अतिशयस्निग्ध: अतिमनोहर: प्रियश्च, मुग्धे रसानभिज्ञे अयमुपस्थित: समीपमाप्त:। पञ्चमश्चेत्यमी **इत्यमर:** (१.७.१)। नायिका मानवती। शेषं सुगमम्।।५५।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५५।। व्यथयतीति। हे तन्वि सुन्दरि तव वृथा मौनं [४] व्यथयति [५] मामित्यर्थात्। तस्मात् हे तरुणि! मधुरालापै: कोमलवचनै: पञ्चमरागं प्रपञ्चय [६] उद्गिर। दृष्टिभिरवलोकनैस्तापं विनोदय अपसारय। हे सुमुखि [१]सुवदने [२]राधे तावत् सम्पूर्णं विमुखीभावं दत्तपृष्ठत्वं विमुञ्च त्यज। हे मुग्धे ज्ञानशून्ये अहं प्रिय: स्वयमकारणं (कारणं) विनैवोपस्थित: [३] आगत:। [४]अत एव मां न वञ्च मा वञ्चय। कीदृश: प्रिय: ? अतिशयस्निग्धो[५]महावत्सल:।।५५।।

१.पद्यमिदं सव्याख्यं नास्ति-अ.२.एवं धृतमौनां प्रत्याह-व्यथयतीति-इ.फ.ग.ह.ज.३.हे तन्वि कृशाङ्गि तव मौनं वृथा निष्कारणं व्यथयति। किञ्च हे तरुणि कामिनि मधुरालापैरमृतवचनै: पञ्चमं रागं प्रपञ्चय विस्तारय। किञ्च कटाक्षै: कामजं तापं नाशय। हे शोभनवदने विमुखीभावं दत्तपुष्ठत्वं विमुञ्च त्यज। सुमुख्यास्तवैतदनुचितमिति भाव:। अत एव मां न मुञ्च मा त्यज। हे मुग्धे सुन्दरि मूढे वा। अहं प्रिय: स्वयमेव अनाहूत उपस्थित: समागत:। कीदृशोऽहम् ? अतिशयस्निग्ध: सम्पूर्णस्नेहो महावत्सलो वा। तावत् मानाग्रहो न कर्तव्य: प्राप्तफलत्वादिति भाव:-इ.फ.ग.ह.ज.४.नास्ति-ड.५.मामित्यर्थ:-क.६.उदीरय-क.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५५।। व्यथयतीति। हे तन्वि सुकुमारे वृथा मौनं मुनिव्रतं तूष्णीम्भाव: अकारणासम्भाषणं व्यथयति क्लेशयति। पञ्चमं कोकिलस्वरं प्रपञ्चय विस्तारय। तव सल्लापस्य पञ्चमस्वरात्मकत्वात्तमुच्चारयेति। पञ्चमरागवत् रञ्जनं मम भविष्यतीति भाव:। हे तरूणि यौवनमदोद्रिक्ते मधुरै: कोमलै: आलापै: कुशलप्रश्नपूर्वकरहोवचनै: तापं विनोदय; णुद प्रेरण इत्यस्माद्धातो: नोदनार्थकत्वात् ; विनाशय। वातनुदित्यादि वैद्यके प्रयोगात्। विनाशयेति शेषाध्याहारो वा। प्रविश पिडा(ण्डी)मित्यत्रेव गृहं भक्षयेत्यध्याहार: (प्रविश गृहं पिण्डीं भक्षय) दृष्टिभिर्विनोदय। कटाक्षालोकनै: विनोदय आनन्दय हर्षय। पूर्वव्याख्याने मध्यमणिन्यायेन विनोदयेति उयभत्रान्वय:। एकत्र विनाशार्थ:, अपरत्र कौतुकार्थ:। सहार्थकतृतीयया आलापसहिताभिर्दृष्टिभिर्विनोदयेति वाऽर्थ: क्लिष्ट:। हे सुमुखि सुष्ठु शोभनं मुखं यस्या: सा तत्सम्बोधनम्। विमुखाभावं

वैमुख्यं मुखपरावर्तनं चुम्बनादौ तावत् आदौ विमुञ्च त्यज। वैमुख्यमनुचितमित्यर्थः। सौमुख्यं मा न मुञ्च मा त्यज। अत्र हेतुमाह, स्वयमिति। हे मुग्धे स्वहितानभिज्ञे अतिशयेन स्निग्धः स्नेहातिशयवान् अयं प्रियः मद्रूपः कान्तः स्वयमेव अनाहूत एव उपस्थितः। अयाचितप्राप्तार्थत्यागो न युक्त इति भावः। अत्र स्वस्य त्यागे स्वयमित्यादिवाक्यार्थस्य हेतुत्वाद्वाक्यार्थहेतुकः काव्यलिङ्गमलङ्कारः। सुमुखीत्यत्र साभिप्रायकत्वात्परिकरः। हरिणी वृत्तम्।।५५।।

१,२.नास्ति-ड.ल.म.३.नास्ति-ड.४.अत एव मा वञ्चय-ड.५.मांसलः-ड.महावत्सल इत्यर्थः-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५५।। व्यथयतीति। हे तन्वि! तव वृथा मौनं व्यथयतीति मामनालप्य त्वमपि कृशासीत्यभिप्रायः। अत एव तरुणि! मधुरालापैः पञ्चमं पञ्चमस्वरं प्रपञ्चय विस्तारय। दृष्टिभिर्दर्शनैस्तापं विनोदय प्रेरय। तरुणि! सम्बोधनम् अत्रापि सम्बोध्यते। युवत्या एव कटाक्षदाने चातुर्यात्। ''दृष्टिः स्त्रियां लोचने दर्शनेऽपि च'' इति। सुमुखीति। हे सुमुखि! विमुखीभावं पराङ्मुखत्वं तावद् विमुञ्चेति सुमुख्या वैमुख्यस्यात्यन्ताप्रतिभानात्। न मुञ्च मामिति परीरम्भादिना मां समनुगृहाणेति भावः। किं कारणमित्यत आह, मुग्धेति। हे मुग्धे! अतिशयस्निग्धः अतिस्नेहवान् अयं प्रियः अर्थादहं स्वयमुपस्थितः उपसन्नः। मुग्धे इति हेतुगर्भसम्बोधनम्। यतः स्वयमुपस्थिते स्नेहयुक्ते कान्ते रतिं न निबध्नासि तस्मान्मूढासि त्वम्।।५५।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५५।। एवमुक्तेऽप्यनुत्तरामाह व्यथयतीति। हे तन्वि! मदलाभात् त्वमपि कृशासीत्यर्थः। यस्माद् वृथा मौनं मां व्यथयति तस्मात् पञ्चमं स्वरं प्रपञ्चय विस्तारय, मधुरं वद इत्यर्थः। तेन किं स्यात्? हे तरुणी! मधुरालापैस्तापमपसारय। किञ्च हे सुमुख! कृपावलोकैस्तावदौदास्यं त्यज, मां न मुञ्च, सुमुख्या विमुखीभावो न युक्त इत्यर्थः। कथमेवं करोमि तत्राह हे मुग्धे! विचारानभिज्ञे! प्रियोऽर्द्धहमतिशयस्निग्धः। कथं स्निग्धज्ञानम्? स्वयमनाहूत एवागतः अतस्त्यागे मूढ़तैवेत्यर्थः।।५५।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५५।। अन्तःप्रसादामपि बहिरनुत्तरामाह; व्यथयतीति। हे तन्वि! वाङ्निरोध, खेदासहने! वृथा मौनं तव निर्हेतुकम् सम्भाषणं व्यथयति, खेदयति। अत्र कर्मानुक्तिः। पशुपक्षिसाधारण्येन सर्वानेव व्यथयतीति व्यनक्ति। अतो हे तरुणि! साहजिकमधुर-

विविधभावसम्पन्ने। मधुरा: कर्णरसायना: हे आलापा: प्रणयोक्तयस्तै: पञ्चमं, पञ्चमाख्यस्वरविशेषं प्रपञ्चय । यावता मम तृप्ति: स्यात्तथा विस्तारयेत्यर्थ:। अनेन मन्मथतर्जनानुकारिपिकस्वरसम्पादितकर्णज्वरोऽपगच्छत्विति भाव:। तथा दृष्टिभि: प्रेमगर्भितविलासविलोकनैस्तापं, मृगखञ्जननलिनेन्दीवरादिदुर्दर्शनोदितनेत्रसन्तापं विनोदय, निर्वापय। न केवलं श्रवणदर्शनयोस्तापमपहरेति वदामि, किन्तु सकलाङ्गाना-मित्याह, हे सुमुखि! सहजप्रसादस्मेरानने! अनेन मानशैथिल्यं सूचितम्। विमुखीभावं सकलसन्तापकारणं दु:शङ्कापादितं वैमुख्यं तावत् साकल्येन मुञ्च। मां त्वद्दर्शनातिकातरं न मुञ्च । मुञ्चन्ती सती दारुणदर्पककार्मुकदुर्वारदुर्विलसितं मा विधेहीति भाव। ननु प्रतिकूलस्यापेक्षणमुचितमेवं चेत्तत्राह; हे मुग्धे! युक्तायुक्तविचारमूढे। अतिशय-स्निग्धस्त्वत्प्रणयोपलालनैकप्रवण: प्रिय: त्वत्प्रेमैकविषयताया लब्धनि:सीमसौभाग्य:, अयं त्वत्प्रसादं प्रतीक्षमाणोऽहं स्वयमुपस्थित:। अनाहूत: एवागत्य त्वत्समीपे बहुविरचितानुनय: वर्त्तत इत्यर्थ:।।५५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५५।। व्यथयतीति; हे तन्वि! कृशाङ्गि राधिके! वृथा निष्फलं मौनं तूष्णीं मां व्यथयति पीडयति। अहं खलु निर्दुष्ट: अस्मि। त्वं पञ्चमालापं कुरु हे कोकिलकण्ठि! त्वं तव तूष्णीं मोचय मधुरालापे अर्थात् कोमलया गिरा मां मोदय। मम तापं दु:खं च मोचय। आनन्दाय देहि। हे सुमुखि उत्तममुखसम्पन्ना सुन्दरि! विमुखीभावं विपरीतभावस्य परित्यागं कुरु न मम परित्यागं कुरु। हे अतिशयस्निग्धे अतिशयकोमले मुग्धे अनभिज्ञे! अहं तवप्रिय त्वत्पुर: समुपस्थित: तव सेवायामुपगत:। हरिणी वृत्तम्। यथासंख्यमलंकार:। अनुकुलो नायक:। प्रसादगुण:। कैशिकी वृत्ति:। वैदर्भी रीति:। मागधी रीति: इत्येव कुम्भकर्ण:। चाटुवचनेऽपि अतिकोमलताभिव्यज्यते।।५५।।

**५६-बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छविर्**
**गण्डश्चण्डि चकास्ति नीलनलिनश्रीमोचनं लोचनम्।**
**नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति प्रिये**
**प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुधः ।।५६।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।५६।। हे प्रिये ! चण्डि ! कोपने ! त्वन्मुखसेवया स पुष्पायुधो कामो विश्वं विजयते। इति एतदहं उत्प्रेक्षे। ''मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः।।'' इति **काव्यादर्शः**।

पुष्पाणि त्वमुन्खे सन्तीति पुष्पायुधस्य त्वन्मुखसेवोत्प्रेक्षितः। नीलनलिनश्रीमोचनं लोचनमिति कार्ष्ण्यात्साम्यम्। नासान्वेति तिलप्रसूनपदवीम् इति आकृत्या तत्साम्यम्। कुन्दाभदन्तीति तत्सम्वोधनम्। कुन्दाभौ दन्तौ यस्या इति विग्रहः। शौक्ल्यात् साम्यम्। चकास्तीति चकासृ दीप्तौ।।५६।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।५६।। बन्धूकेति। 'हे चण्डि' इति सांप्रतं कोपहानावपि भूतपूर्वकोपाश्रयणेन संबुद्धिः। 'प्रिय' इति वितर्के। अहमिति जाने। स पुष्पायुधस्त्वन्मुखसेवया विश्वं विजयते। 'सः' इत्यनेन स बाणोऽपीश्वरदग्धः स्मर्यते । स तथाविधः सांप्रतं पुष्पैरपि आश्रयविशेषेण साधकैः सुरासुरैर्दुर्जयमपि विश्वं विजयते । तानेव त्वन्मुखसेविपौष्पान्पञ्चबाणानुद्दिशति। हे चण्डि! अयं तवाधरो बन्धूकद्युतिबान्धवः बन्धुजीवकान्तिसदृशः। अनेन रक्ताकर्षणवाण उक्तः। अपि च, तव गण्डः स्निग्धो मधूकच्छविश्चकास्ति। विरहिणीनां हि गण्डे पीतिमा भवति। अनेन पीतो वशीकारबाण उक्तो भवन्ति। अपि च, तव लोचनं नीलनलिनकान्तिपराकरणशीलं चकास्ति। अनेन कृष्णवर्ण उन्मादनवाणोऽभाणि। अपि च, तवेयं नासा तिलप्रसून पदवीमत्येति अतिक्रामति। अनेन द्रावणबाण उक्तः। अपि च, हे प्रिये ! कुन्दाभदन्ति कुन्दवदुज्ज्वलदशने !। अनेन शोषणबाण उक्त। एवमेतैः पञ्चभिर्बाणैर्भवत्याः सेवको भूत्वा विश्वजेवा भवतीति। शार्दूलविक्रीडितवृत्तम्। उपमाविशेषोऽलंकार। अनुप्रासो वर्णालंकारः। असमस्तपदां वैदर्भीरीति। प्रसादो गुणः। स्थितलयं गानम्। संभाविता गीतिः। कैशिकी वृत्तिः।।५६।।

## (३) जगद्धरकृत- सारदीपिका

।।५६।। अधुना मानापनोदनाय दतङ्गस्तुतिं करोति बन्धूकेति हे चण्डि ! कोपनशीले ! तवायमधरः बन्धूकपुष्पस्य द्युतिः कान्तिस्तस्या बान्धवो मित्रसदृशश्चकास्ति शोभते

तथा स्निग्धश्चिक्कण: गण्ड: कपोलश्चकास्ति कीदृश: मधुपपुष्पवत् छवि र्दीप्ति: यस्य स: तथा तव लोचनं नेत्रं नील नलिन श्रियं नीलोत्पलस्य कान्तिं मोचयति तव नाशा नासिका तिलप्रसूनस्य तिलपुष्पस्य पदवीं मार्गं सादृश्यमित्यर्थ:। अभ्येति प्राप्नोति हे कुन्दाभदन्ति। कुन्द पुष्पस्वभावा येषां तादृशादन्ता यस्यास्तादृशि हे प्रिये वल्लभे प्राय इति तर्कयामि प्रसिद्ध: पुष्पायुध: पुष्पमेवायुधं शस्त्रं यस्य स: कामस्त्वन्मुखसेवया विश्वं जगद्विजयते वशीकरोतीत्यर्थ:। या निकामस्य पुष्पायुधानि तानि बन्धूक मधूक निलोत्पलतिलकुन्दपुष्पादीनि त्वन्मुखे वर्त्तन्त इति सेवासत्कार बन्धूक इति दुपहरियामधूक इति महुआम् इति कान्यकुब्जभाषायाम्।।५६।।

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५६।। संप्रति त्वयि मानवत्यां त्वन्मुखेनैव कामो मां पीडयति। अतस्त्वं प्रसीदेत्याशयेनाह-बन्धूकेत्यादि। अतिकोपने! अयं तवाधरो, बन्धूकद्युतिबान्धवो बन्धूकस्य पुष्पविशेषस्य या द्युतिर्दीप्तिस्तस्या बान्धव: सुहृत्। अत्र तद्बान्धवरूपणेन बन्धूकद्युतिसमाधेरनित्यस्थितिर्व्यज्यते। अयं स्निग्धो गण्ड: कपोलो मधूकच्छविर्मधूक-पुष्पस्येव छवि: कान्तिर्यस्य एतादृशश्चकास्ति शोभते। लोचनं नीलनलिनश्रीमोचनं स्वकान्त्या नीलनलिनस्य नीलोत्पलस्य श्रियं कान्तिं मोचयति त्याजयति। हे कुन्दाभदन्ति! कुन्दपुष्पस्येवाभा दीप्तिर्येषां ते दन्तास्तादृशि । तव नासा तिलप्रसूनपदवीं तिलपुष्पपद्धतिमभ्येति। प्राय इति तर्कयामि। स प्रसिद्ध: पुष्पायुध: पुष्पमेवायुधं शस्त्रं यस्य स: कामस्त्वन्मुखसेनया त्वन्मुखमेव सेना कटकं तेन विश्वं विजयते । काम: पञ्चभि: शसैविश्वं जयति। त्वन्मुखे बन्धूकमधूकनीलोत्पलति-लकुन्दपुष्पाणि पञ्च सन्तीति त्वन्मुखेनैष कामो विश्वं जयतीति भाव:।। 'बन्धूकं बन्धुजीवे स्यात्' (इति **मेदिनी** ।) 'मधुपुष्पो मधूकश्च गुडपुष्पो मधुद्रुम:' इति हारावली।।५६।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५६।। ननु पञ्चबाणस्य ममापि वाधकत्वात्तव वाधकत्वमपि तस्यै व युक्तमित्याशङ्क्य तस्य पराधीनविश्वविजयकारित्वमाह। वन्धूकेति। हे प्रिये! राधे! स्निग्धो निर्मल: अधरो दन्तवास: वन्ध्कूनाम रक्तपुष्पम्। पल्वलावस्थायिवन्धूजीबकाख्यो गुल्मविशेष:। तस्य पुष्पं वन्धूकम्। बन्धूको बन्धुजीवक:" **इत्यमर**:। तस्य द्युति: कान्तिरस्या: बान्धवो बन्धु:। प्रज्ञादित्वात् स्वार्थेऽचि प्रत्यय: तत्किल्प इत्यर्थ:। हे चण्डि! कोपशीले! गण्डे तव कपोलभागे मधूकछवि: गुडपुष्पसमानकान्ति: चकास्ति प्रकाशते। मधूकवत् कोमलप्रदेशो भातीत्यर्थ:। हे प्रिये! तव लोचनं नीलनलिनश्रियो नीलोत्पल कान्तेर्मोचन:

तापसारणहेतुः। ततोऽप्यतिमनोहरमित्यर्थः। यत् सा तव नासा तिलप्रसूनस्य पदवीमन्वेत्यनुसरति तिलकुसुमसमानमनुदर्त्तत इत्यर्थः। अनेन पद्मिनी जाति सूचिता। तदुक्तं रतिरहस्ये स्त्रीजाति निर्ण्णयस्थले।

तिलकुसुमानां नासिका विभ्रति येति। कुन्दाभदन्ता यस्याः सा कुन्दाभदन्ती ''नासिकोऽधरौष्ठेत्यादिना (४।१।५५) ङीष् तस्य सम्बुद्धौ हे कुन्दाभदन्ति ! स प्रसिद्धः पुष्पायुधः बन्धूकादिकुसुमसमान भवदधरादिरूप कुसुमशरः त्वन्मुखसेवया पूर्वोक्तबन्धूककुसुमादिसमाना धरादिशराधार भवन्मुखसेवनेन वैरित्वेन यत् विश्वं लोकत्रयं विजयते जयति। अथवा विश्वक्नामानं मां तन्नामकं च तस्य विश्वं विष्णुर्वषट्कार इति वचनादवगन्तव्यम् अतः स्वतन्त्रया भवत्या दन्तदंशादिभिरयं जनो वाध्यताम्। न तु पराधीनविजयेन मदनचण्डालेन वाध्यतामिति भावः। उपमा समासोक्तिश्च।।५६।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५६।। पुनस्तुतिपुरःसरमनुनयति। हे कुन्दाभदन्ति। कुन्दस्यैव आभा कान्तिर्येषाम् एवम्भूता दन्ता यस्या एतादृशि ! स पुष्पायुधः कामः प्रायः उत्प्रेक्षे त्वन्मुसेवया बिश्वं जगत् बिजयते। अत्रोपपादकं दर्शयति, हे चण्डि कोपने ! तवायमधरी बन्धुकस्य द्युत्या बान्ध्वो मित्रसदृशमिति यावत्। अनेनाधरस्य स्वाभाविकद्युतिप्रतिपादनेन कोपशान्तिर्लक्षितेति ध्वनिः। स्निग्धः चिक्कणो मधूकच्छविर्मधूकपुष्पसदृशः गण्डः चकास्ति शोभते। तथा च तादृक्कान्तिदर्शनेन मानिन्याः अपि ते विरहदुःखं वर्त्तत एवेति ध्वनितम्। लोचनं चक्षुः नीलनलिनश्रीमोचनं श्यामपद्मकान्तिमोचकं तवेत्यर्थादिति सर्वत्रान्वितम्। तथा च पूर्वं कोकनदरूपं धारयसीत्यनेन लोचनस्य रक्तत्वं दर्शितम्। अधुना श्यामत्वप्रतिपादने कोपशान्तिर्यातेति सूचितम्। नासा तवेत्यर्थात्, तिलप्रसूनपदवीं तिलपुष्पपदवीमभ्येति गच्छति।

अत्र विश्वविजये कामः पुष्पायुधानि व्यापारयति, तानि च त्वद्वदन एव सन्तीत्युत्प्रेक्षितमिति **जगद्धरः**। तन्नमनोहम्, सुखावयवानां पुष्पत्वेन प्राप्तेः। तथा च पुष्पायुधो विश्व पुष्पायुधैरेव जयति तेषां पुष्पानां प्रतिपक्षाणि त्वन्मुख एव सन्तीति भवद्वदनसाहार्यमनासाद्य कथं पुष्पायुधानि प्रभवेयुरिति त्वन्मुखसेवयेत्युत्प्रेक्षितमिति परमार्थः। एतेन कामस्यापि चेत् त्वन्मुखसेवा तथा सत्यहं वराकः त्वत्क्रोधेन कथं जीवामीति ध्वनितम्। 'स्निग्धो वत्सलचिक्कण' इति **विश्वः**। प्रायः शब्द उत्प्रेक्षावाचकः, 'मन्ये शङ्केध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिव-

शब्दोऽपि तादृश' इति **दण्डिवचनात्**। विजयते 'विपराभ्यां जेरि'त्यात्मनेपदम्। स इति तत्प्रसिद्धौ। अतो यच्छब्दाकांक्षा नात्र 'तस्मै नमः परमकारणकारणये'-त्यादिरिव।।५६।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५६।। (बन्धूकेति।) [५]किञ्च बन्धूको वृक्षविशेषः तस्य या द्युतिस्तस्या बान्धवः अयं ते अधरो भातीति शेषः। स्निग्धो मनोहरः मधूकच्छविः मधूकस्य छविरिव छविर्यस्य। वाचक (स्य) लुप्तत्वात् लुप्तोपमालङ्कारः। एतादृशो यो गण्डः कपोलस्थलम्। चण्डीति सकोपायाः सम्बोधनम् चकास्ति शोभते। नीलगुणवच्छिन्नं यत् नलिनं पद्मं तस्य या श्रीस्तां मोचयति त्याजयति। एतादृशलोचनमस्तीति ; निदर्शनाभेदः। नासा नासिका तिलप्रसूनं तिलपुष्पं तस्य पदवीं मार्गमभ्येति अतिक्रमणं करोति। कुन्दस्याभेव भा येषामेतादृशा दन्ता यस्यास्तत्सम्बोधनम्। हे प्रिये प्रायः तव मुखस्य स पुष्पायुधः कामः विश्वं विजयते। विपराभ्यां जेः (पा.सू. १.३.१९) इत्यात्मनेपदम्। ''सर्जकासनबन्धूकपुष्पप्रियकजीवकाः'' **इत्यमरः** (२.४.४४)। ''वा पुंसि पद्मं नलिनम्'' (**इत्यमरः** १.१०.३९)। वस्तुतः सेवायास्तस्याभावाद-सद्विषया हेतूत्प्रेक्षा ।।६।।

१.पद्यमिदं सव्याख्यं नोपलभ्यते-अ. २.गण्डे चण्डि-इ. ३.श्रीमोचनं लोचनं-इ. ४.शोभया-इ. ५.सम्प्रति मानिन्या अङ्गानि स्पर्शयन् (?) प्रियो ब्रूते, बन्धूकेति। हे चण्डि कोपनशीले सुरतोद्भटे वा। तवाधरोऽयं बन्धूकस्य द्युतिः कान्तिस्तस्या बान्धवो मित्रं सदृशश्चकास्ति शोभते। किञ्च स्निग्धश्चिक्कणो गण्डः कपोलश्चकास्ति। कीदृशः ? मधूकपुष्पवद्दीप्तिर्यस्य; तथा तव लोचनं नीलोत्पलशोभां मोचयति त्याजयतीति तच्चकास्ति। एतेन लोचनस्य मनोहरत्वमुक्तम्। तथा तव नासा नासिका तिलप्रसूनपदवीं शोभाश्रेणीं अभ्येति प्राप्नोति। हे कुन्दाभदन्ति कुन्दपुष्पसदृशेन इत्यनेन दन्ता एव उज्ज्वला मनस्तु श्याममिति ध्वनिः। हे प्रिये वल्लभे स पुष्पायुधः कामः प्रायो बाहुल्येन तव मुखसेवया विश्वं जगत् विजयते वशीकरोति। पुष्पायुधस्य आयुधानि तव मुखे वर्तन्त इति सेवाकारणमुक्तम्-इ.फ.ग.ह.ज.।।५६।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५६।। अधुना मानिनीप्रबोधाय प्रियं ब्रूते, बन्धूकेति। हे चण्डि [१] कोपनशीले तवायमधरो बन्धूकपुष्पद्युतिः कान्तिस्तस्या बान्धवो मित्रसदृशश्चकास्ति शोभते। तथा स्निग्धश्चिक्कणो गण्डः [२]कपोलः कीदृशः ? [३]मधूकपुष्पवच्छविः दीप्तिर्यस्त

सः। तथा लोचनं [४] नेत्रं [५]नीलनलिनश्रियं नीलोत्पलकान्तिं[६]मोचयति त्याजयतीति चकास्ति। [७]ते नासा[८]नासिका[९]तिलप्रसूनस्य तिलपुष्पस्य पदवीं [१०]मार्गं[११] सादृश्यमित्यर्थः [१२] अभ्येति प्राप्नोति। हे कुन्दाभदन्ति कुन्दपुष्प [१३]सदृशकान्तिदशने प्रिये वल्लभे, [१४] प्राय इत्यूहा शङ्के स पुष्पायुधः कामस्त्वन्मुखसेवया विश्वं जगत् विजयते वशीकरोतीत्यर्थः। यानि कामस्य पुष्पायुधानि तानि त्वन्मुखे वर्तन्त इति सेवाकारणम्। बन्धूकमिति दुपहरिया इति कान्यकुब्जभाषायां व्यवहारः। मधूकमिति महुवा इति।।५६।।

## (९) कृष्ण पण्डितकृत- जयन्ती

।।५६।। बन्धूकेति। हे चण्डि राधे तव अधरः अयं परिदृश्यमानः सुरक्तः। अधरः ओष्ठस्पर्शनपरः बन्धूकस्य जपाकुसुमस्य द्युतेः बान्धवः सदृशः। बन्धुश्चोरस्सुहृद्वादी-सोदराद्या इवार्थकाः इति केदारवचनात्। आर्थी धर्मलुप्तोपमा। गण्डे स्निग्धा स्नेहयुक्ता मधूकस्य मधूकपुष्पस्य छविः कान्तिः चकास्ति दीप्यते। गण्डः मधूकपुष्पवद्धेमवर्ण इति भावः। नीलनलिनस्य कुवलयस्य श्रियं मोचयति चोरयतीति मोचनं अपहारकं लोचनम्। अत्र कुवलयसदृशं नेत्रमित्यर्थः। अत्रापि नैल्यधर्मानुपादानाद्धर्मलोपः। मोचनपदस्यार्थतः सादृश्यवाचकत्वात्। नासा नासिका तिलप्रसूनस्य तिलपुष्पस्य पदवीं आकृतिं अभ्येति प्राप्नोति; तिलकु सुमाकृतिरित्यर्थः। अत्रापि पदवीपदस्य अर्थतः सादृश्यवाचकत्वात् आर्थी वाचकलुप्तोपमा। सादृश्यवाचकपदस्य समस्तत्वात् अभिन्नवाक्यत्वे न वाक्यगा। हे प्रिये राधे कुन्दस्य माघ्यकुसुमस्य आभेव आभा येषां ते कुन्दाभाः दन्ताः यस्याः सा तत्सम्बोधनम्। अन्यशोभायाः अन्यत्रासम्भवात् उपमायां पर्यवसानात्पदार्थगतो निर्देश इति प्राञ्चः। पुष्पाणि अरविन्दादीनि आयुधानि बाणाः यस्य स मदनः। प्रायः बहुशः विश्वं युवलोकत्वात् तव मुखस्य शोभया कान्त्या कारणेन विजयते। त्वन्मुखावलोकनात्सर्वे कामातुरा भवन्तीति भावः। अत्र पुष्पपदमसारत्वाभिप्रायकम्। तेन अस्मिन् सत्यपि त्वन्मुखावलोकनात्सर्वे कामातुरा भवन्तीति भावः। अत्र पुष्पपदमसारत्वाभिप्रायकम्। तेन अस्मिन् सत्यपि त्वन्मुखस्याधरराग(ज) कारणत्वकथनात् अप्रतिहतायुधत्वं व्यज्यते। मुखे बन्धूकमधूकनीलोत्पलकुन्दप्रसून्दप्रसूनाभ्यधिकाङ्गानि सन्तीति इदमेवोत्कृष्टम्। समस्तबाणवदिति। विश्वं विष्णुरिति विष्णुवाचकत्वात् तद्देवावतारं विश्वं मां विजयते वशीकरोति। पुष्पायुधो विष्णुपुत्रोपि त्वन्मुखरूपायुधसम्पत्त्या पितरमपि जयति। आयुधधारणं निषिद्धं तद्धारणेन हननेच्छा (या) उदयात्। शार्दूलविक्रीडितं वृत्तम्।।५६।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां मानिनीवर्णने (चतुर) चतुर्भुजो नाम दशमः सर्गः।।

१.नास्ति-ड.२.कपोलश्चकास्ति-ल.म.३.छविः-ड.४-६.नास्ति-ड.७.तथा तव नासा-क.तव नासा-ल.म.८,९. नास्ति-ड.१०.अधिकारं-क.११.तः१२.पर्यन्तं नास्ति-क.१३.सदृशदशने-क.ल.म. १४.प्राय इति शङ्के-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५६।। बन्धूकेत्यादि। हे चण्डि! कोपने!, ''चण्डी कोपाङ्गनेश्वरे'' इति त्रिकाण्डः। त्वन्मुखसेवया स प्रसिद्धपुष्पायुधो विश्वं समस्तं विजयते इति प्रायः अहमुत्प्रेक्षे। ''मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः। उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः।।'' इति **काव्यादर्शः**। समस्तं विश्वमखिलं निश्शेषं निखिलं पुनरिति सः पुष्पायुध इति। पुष्पमायुधं यस्येति युक्तः पदोपन्यासः। विश्वविजये पुष्पाण्येवायुधानि मनोभुवः। तानि चेत् पुष्पाणि बहूनि तव मुखे सन्तीति तदेव सेवते इत्युत्प्रेक्षा। केन प्रकारेण सन्तीत्याह, अयमधर इति। अतो वायमधरो बन्धूकद्युतिबान्धवः। ''बन्धूको बन्धुजीवकः'' इति। बन्धूकस्य पुष्पं बन्धूकम्, तस्य द्युतिः कान्तिस्तस्या बान्धवः। तत्तुल्य इत्यर्थः। बान्धवशब्दोऽत्र सादृश्यप्रतिपत्तिकरः। तथा स्निग्धा मधूकच्छविर्गण्डे गण्डस्थले स्निग्धा मसृणा मधूकपुष्पशोभा चकास्ति शोभते। विरहिजनस्य हि गण्डः पाण्डुरो भवति। तथा लोचनं नीलनलिनश्रीमोचनं नीलोत्पलशोभात्याजकं, तथा तव नासा नासिकातिलप्रसूनपदवीं तिलपुष्पपद्धतिमन्वेति अनुगच्छति, तिलपुष्पमिव शोभते इत्यर्थः। हे कुन्दाभदन्ति! हे प्रिये! इति कुन्दकुसुमस्येवाभा येषामीदृशा दन्ता यस्या इति। ''स्वाङ्गादप्रधानात् ङीप्''। अत्राधरादीनां बन्धूककुसुमादिरूपत्वप्रतिपादनं बान्धवादिशब्दैः समासोऽयमतिमात्रप्रतिपादकैः न निर्वहति, किन्तु वर्णसाम्यमात्रम्। वर्णसाम्येन तद्वत् प्रतिपत्तिर्न भवति। तद्वत् प्रतिपत्तावेव तु समीचीनार्थसङ्गतिः स्यात्। तेन रूपकमेवालङ्कारोऽत्रार्थसङ्गतिं प्रति समर्थयति। तथाहि, ''धर्मिसाम्यविवक्षायां धर्ममात्राभिधायिनाम्। नेष्टः प्रयोगः शब्दानां समासोपमितौ यथा।।'' इति **व्यक्ति-विवेकः**। प्रत्युदाहरणं च यथा, ''पतिते पतङ्गमृगराजि निजप्रतिबिम्बरोषित इवाम्बुनिधौ। अथ नागयूथमलिनानि वियत्पुरितच्च स्त(त)मांसि परितस्त(स्थि)रे।।'' इति माघः। अत्रापि नागयूथमलिनत्वेन तमसां तद्वत् प्रतिपादनं न सम्भवति। येन तमांसि..... बन्धूकादेर्द्युतिप्रभृतिः साम्येनाधरादीनां गुणान्तरलाभः। येन कामस्य जगद्विजयसाधन-बाणभूताः प्रतिपादयितुमभिपे....। यथा निर्वृष्टेऽपि बहिर्घनेन चिरमत्यन्तजर्जरद्वेश्मनो

लतातन्तुगतिच्छिदो मधुस्पृशत्पिङ्गाः पयोबिन्दव इत्यत्र पयोबिन्दूनां मधुस्पृशत्वपिङ्गत्व-सहचरितस्य बहु तस्य सह.....दत्रापि सहभावप्रपित्त्या तत्तु तत्तु कुसुमत्वमधिगंस्यत इति। एतदपि मतिमत्तामसम्मतं दृष्टासिद्धेः। सैधव्यमाधुर्यदि.....त्। तदिदमसमीचीनमेव पद्यमित्यनेन मन्यन्ते। अत्र सन्नपि दोषः शक्त्या सम्वृत इत्येके। तद्यथा, ''अव्युत्पत्ति-कृतो दोषः शक्त्या सम्व्रियते कवेः'' इति।। ...... साम्येनैव बन्धूककुसुमादिभि-रुपमालङ्कारप्रतिपादनमात्रं कृतमिति सत्यमेवैतत्। अधरादीनामुत्कर्षप्रतिपादितत्वाच्च समासोऽयमतिमात्रप्रतिपादकैर्बन्धूकादिशब्दैः प्रशंसापरत्वात्। उत्कृष्टाश्च स्त्र्यवयवाः कामसन्दीपकतया विश्वस्यापि मोहनाय भवन्तीति युक्तमुक्तम्। प्रायस्त्वन्मुखसेवया विजयते विश्वं स पुष्पायुध इति। तस्मादत्र बन्धूकादिशब्दैरधरादीनां कुसुमत्वप्रतीतिर्न क्रियते। किं तर्हि उत्कर्षप्रतिपत्तिरेव क्रियत इति साम्प्रतम्। किं च यानि वस्तूनि कुसुमव्यतिरिक्तान्यपि कामोद्दीपकानि भवन्ति, तानि कामस्य जगद्विजयसाधन-त्वादस्त्राणि भवितुमर्हन्त्येव। पुष्पायुधश्चात्र कामपर्यायो रूढ एवात्र गृह्यते न पुनरन्वितार्थः। पुष्पाणि आयुधानि यस्येति विग्रहः। तदलमिह दोषघोषणया।।५६।।

## (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।५६।। अतः पञ्चपुष्पाञ्चितमास्यं ते अनङ्गः पुष्पायुधविलासेन मां दुनोतीति भङ्ग्यास्तदङ्गानि स्तौति वन्धूकेति। हे चण्डि! हे प्रिये! सः प्रसिद्धः पुष्पायुधस्त्वन्-मुखसेवया विश्वं विजयते अभिभवति। एतदुत्प्रेक्षे पुष्काणि त्वन्मुखे सन्तीति। पुष्पायुधस्य त्वन्मुखसेवोत्प्रेक्षिताः कानि पुष्पाणि ? तवायमधरो बन्धूकपुष्पस्य द्युतेर्बान्धिवः लोहितत्वात् साम्यम्। गण्डे मधूकपुष्पस्य छविश्चकास्ति पाण्डुत्वादत्र साम्यम्। नीलनलिनश्रीमोचने लोचने काष्ण्र्यादत्र साम्यम्। नासातिलप्रसून-पदवीमन्वेति अत्राकृत्या साम्यम्। हे कुन्दाभवन्ति! अत्र शौक्ल्यात् साम्यम्। त्वन्मुखसेवयैतानि पुष्पाणि लब्ध्वा तैरेवायुधैः विश्वंजयती- त्यर्थः।।५६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।५६।।अनन्तरं तस्याः मानापगमात्सहजकान्तिमन्तं मुखचन्द्रमालोक्य कामार्दित-मनास्तामेव स्तौति। बन्धूकेति! हे प्रिये! उत्कूलप्रेमविषयभूते! हे चण्डि! कोपनिराकृतमदनुरोधे राधे। प्रसादसमयेऽपि स्वामिनीत्वेन मदनस्यानुकूल्यसम्पादनात् त्वं मयि कोपं न जहासीति चण्डित्वेन सम्बोधनम्। यस्यानुकूल्याय त्वमेवं मौनमुद्रामालम्बसे, सः किं वा सः प्रसिद्धः पुष्पायुधः जगत्जययोग्यानि कुसुमान्यत्र सन्तीति त्वन्मुखसेवया प्रसादातिमधुरत्वद्वदनानुजीवनेनैव विश्वं प्रायो बाहुल्येन विजयते।

वशीकरोति। मद्विजयस्तु सुतरां ईषत्कर इति भाव:। एतदेव सोपपत्तिकमुपमया समासोक्त्या चोपपादयति। हे कुन्दाभदन्ति! कुन्दकलिकाकल्पदशने! स्मितविकसित-दन्तशोभापहृतमन्मानसे। अत्राकृतिशौक्ल्याभ्यां साम्यम्। अयं ताम्बूलरसरुक्षोऽप्यधर ओष्ठ: बन्धूकद्युतिबान्धव:। बन्धूककुसुमकान्तिसदृश: चकास्ति, भाति ।अत्रारुण्यात् साम्यम्। गण्डे कपोलस्थले, स्निग्धाऽतिचिक्कणा मधूकच्छवि:, गुडपुष्पस्य कान्तिश्चकास्ति। पाण्डुत्वादत्र साम्यम्। 'मधूके तु गुडपुष्पमधुद्रुमौ' **इत्यमर**:। लोचने, अञ्जनविहीने अपि, नीलनलिनश्रिय:, उत्फुल्लनीलोत्पलशोभाया मोचने खण्डने, तथा नासा श्वासभरोद्वहनोत्पीडनप्रणुन्ना त्वन्नासिका ईषदवनताञ्चलतिलप्रसूनस्य पदवीं स्वरूपपरिपाटीं अन्वेति, अनुकरोति। अत्राकृत्या साम्यम्।।५६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५६।। बन्धुकद्युतिबान्धवोऽयमिति; हे चण्डि! चण्डीशब्देन कोपस्य हानेऽपि पूर्वकोपाधारेण संबुद्धि:। स्नेहेनापि चण्डीशब्द: व्यपदिष्ट:। स प्रसिद्ध: पुष्पायुध: कन्दर्प: त्वन्मुखं तव मुखसेवया सामग्रीं विश्वे विजयलाभं करोति। इदानीं पुष्पाणां स्थिति: त्वन्मुखे कथमन्तेति वर्ण्यते भगवता श्रीकृष्णेन। तवाधर: बन्धूकद्युतिं धारतति बन्धुकपुष्पं रक्ताधरस्य साद्दृस्यम्। तव गण्डप्रदेश: चिक्कणं मधुकपुष्पं नाम महुल इति भाषायां तस्य प्रसिद्धि:। मधुकपुष्पं मादकयुक्तं चिक्कणं नायिकाया गौरं गण्डस्थलमिव चकास्ति शोभते। लोचने नयनयुगलं नीलपद्म शोभा शोभमानं द्दृश्यते। नाशापुष्पं तिलकुसुम इव शोभते अंला पुष्प इति भाषायाम्। कुन्दपुष्पमिव धवलकान्तियुतदन्तपंक्त्या समग्रं दीप्तिं कामदेव: जेतुं समर्थ:।। शार्दूलविक्रीडितं च्छन्द:। उपमाविशेषोऽलंकार! अनुप्रासश्च। असमस्तपदां वैदर्भीरीति:। प्रसादो गुण:। स्थितलयं गानम्। संभाविता गीति:। कैशिकी वृत्ति:।।५६।।

**५७-दृशौ तव मदालसे वदनमिन्दुसंदीपकं**
**गतिर्जनमनोरमा विधुतरम्भमूरुद्वयम्।**
**रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवाव्**
**अहो विबुधयौवतं वहसि तन्वि पृथ्वीगता ।।५७।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।५७।। इदानीं मानीनिप्रबोधनाय चाटुवचन पूर्वकमात्मनोऽशक्यत्वमाणादयितुमाह। दृशाविति। हे तन्वि! पृथ्वीगता सती बिवुधयौवतं देवयुवतिवृन्दं वहसीत्यहो आश्चर्य्यम्। वहने प्रकारमाह, दृशावित्यादि। दृशौ मदालसे इति विग्रहः। गन्धर्वकन्या च मदालसा, वदनमिन्दुमत्युज्ज्वलमतिक्रम्य रदनमित्यर्थः। देवस्त्री च मनोरमा। विधृतरम्भमूरु-द्वयमिति दधति रम्भा कदलीकाण्डश्री येनेति विग्रहः। स्वर्वेश्या रम्भा, रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवाविति रुचिरचित्रलेखा लेखा इति विग्रहः। अप्सरोवरा च चित्रलेखा। वृत्तं चास्य पृथ्वीगता। ''जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः''।।५७।।

इति श्रीकविराजश्रीनारायणदासकृतायां श्रीगीतगोविन्दटीकायां सर्वाङ्गसुन्दर्य्यां मानिनीवर्ण्णने चतुरचतुर्भजो नाम दशमसर्गविवरणम्।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।५७।। दृशाविति। 'अहो' इति आश्चर्ये। त्वं पृथ्वीगतापिं दिव्यस्त्रीसमूहं वहसि। क्व कामित्याह, तव दृशौ मदेनालसे वर्तेते। अनेन मदालसतां वहसीत्युक्तम्। अपि च, तव वदनं चन्द्रवद्दीप्तिमद्वर्तते। अनेन इन्दुमतीनाम्नी अप्सराः कथिता। अपि च, तव गतिर्जनमनांसि रमयतीति। अनेन मनोरमा काचन सुरस्त्री भणिता। अपि च, तवोरुद्वयं विजितकदलीकाण्डं वर्तते। अनेन रम्भोक्ता। अपि च, तव रतिः संभोगः कलावती हावभावकिलकिञ्चितमोट्टायितविव्वोकादिमतो वर्तते। अनेन कलावती काचिद्देवनायिकोक्ता। अपि च, तव भ्रुवौ रुचिरे चित्रे लेखे ययोस्ते तादृश्यौ। अनेन रुचिरा चित्रलेखा च वर्णिता।। 'असौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुः' इति पृथ्वीछन्दः। कल्पितोपमालंकारः।।५७।।

## (३) जगद्धरकृत- सारदीपिका

।।५७।। दृशाविति अहो इत्याश्चर्ये हे तन्वि! सुन्दरि! त्वं पृथ्वीगता भूम्यां स्थितापि विबुधयौवनं देवयुवतीनां समूहं वहसि केन प्रकारेणेत्यत आह तव दृशौ नयने मन्देनालसे

मन्थरे अवलोकनाय मन्दायत: तव वदनं मुखम् इन्दुमत्या चन्द्रबुध्या अन्वितं युक्तं त्वन्मुखदर्शनेन सादृश्याच्चन्द्रबृद्धिर्भवतीत्यर्थ:। तव गति: गमनं जनमनोरमा तवोरुद्वयं जङ्घयुग्मं विद्युतास्वशोभयाति स्कूरता रम्भाकदली येन तव रति: सुरतक्रीडा कलावती कामकलाकौशलयुक्ता तव भ्रुवौ रुचिरचित्राणां लेखा ययोस्ते यथा चित्रे श्यामलेखा विलिख्यते तथेति तदनया पदयो: जनेन मदालसा इन्दुमती मनोरमा रम्भा कलावती-चित्रलेखा संज्ञका: अप्सरस: प्रतिपादिता: पृथ्वीगतेत्यपिच एकस्यामपि त्वयि सर्वासामप्सरसां गुणा: वर्तन्त इत्याश्चर्यं प्रेयोनामालङ्कार: पृथ्वी छन्द:।।५७।।

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकायां सारदीपिकायां चतुरचतुर्भुजो नाम

## (४) शंकरमिश्रकृत- रसमञ्जरी

।।५७।। दृशाविति। हे तन्वि ! त्वं पृथ्वीगता पृथ्व्यां भुवि गता प्राप्ता ती विबुधयौवतं देवयुवतीसमूहमाश्चर्येण वहसि धारयसि। तदेवाह, दृशाविति। तव दृशौ नेत्रे मदालसे मदेन हर्षेणालसे मन्यरे। अथ च मदालसा स्वर्वेश्या। तथा च स्वर्गे एकैव मदालसा, त्वं तु एकवद्वे मदालसे दधासीत्याश्चर्यमिति भाव। तव वदनमिन्दुमत्यास्पदमिन्दुविषयिणी या मतिस्तस्या आस्पदं विषय इत्यर्थ:। तव मुखेऽयमिन्दुरिति मतिर्भवति। अमरलोकानामिन्दुमती काचन देवाङ्गना तस्या आश्रय:। तव गतिर्जनानां मनोरमा मनोहारिणी। अथ च, मनोरमानाम्नी या देवाङ्गना तदात्मिका। अथवा, रमा लक्ष्मीस्तदात्मिकेत्यर्थ:। तथा तवोरुद्वयमूरुयुग्मं विधुते स्वशोभया तिरस्कृते रम्भे कदल्यौ येन तादृशम्। अथ च, रम्भा स्वर्वेश्या। स्वर्गे एकैव रम्भा त्वमूरुद्वयात्मकं रम्भाद्वयं दधासीति भाव:। अथ च, तव रति: सुरतकेलि: कलावती कौशलशालिनी। अथ च, तव रति: कामपत्नी। अस्ति कलावतीनाम्नी देवाङ्गना। ते भ्रुवौ रचितचित्रलेखे रचिता मयि कोपवशाच्चित्रा विचित्रा लेखा भ्रुकुटी याभ्यां तादृशे। तथा च स्वर्गे एकैव चित्रलेखा, त्वद्भ्रूभ्यां तु चित्रलेखाद्वयं रचितमित्याश्चर्यमिति भाव:। प्रेयोना-मायमलङ्कार:। तदुक्तं **दण्डिना** (का. २/ २७५) 'प्रेय: प्रियतराख्यानं रसवद्रसपेशलम्' इति। पृथ्वीनामकं चेदं छन्दस्तल्लक्षणं **वृत्तरत्नाकरे**। 'रम्भा कदल्यप्सरसो:' इति विश्व:। युवतीनां समूहो यौवतम्। 'भिक्षादिभ्योऽण्।' (पा. ४/ २/ ३८) 'गार्भिणं यौवतं गणे' **इत्यमर**:।।५७।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५७।। ननु मय्येव किमर्थमासक्ति:, मद्व्यतिरिक्तानामतिरूपवतीनामप्सरप्रभृतीनाम अन्यासां दीप्तमानत्वादित्याशङ्क्याह। दृशाविति। हे तन्वि ! तव दृशौ मदेन यौवन

दर्पेणालसे मन्दगती मदालसा नाम काचिदप्सरसेव वदनं मदालसे तवाननम्। इन्दुरितिमतिरिन्दु मतिश्चन्द्र इति बुद्धिरित्यर्थ:। तयोरुन्नतं सर्वोत्कृष्टतया भासमानम् अथवा इन्दुमतिक्रम्य उन्नतमुत्कृष्टम्। इन्दोरप्यति मनोहरमित्यर्थ:। इन्दुमत्युज्ज्वलमिती क्वचित्पाठ:। तदप्ययमर्थ: समान:।

इन्दुमती नाम काचिदप्सरा तद्वदुज्ज्वलं तद्वदनकल्पं च। गतिस्तव गमनक्रिया जननां प्राणिनां मनोरमा चित्तसन्तोषकारिणी, मनोरमा नाम काचिदमरकामिनी तद्वन्मनोरमेति च तद्गतिकल्पेत्यर्थ:। ऊरुद्वया तवोरुयुगलं विधृततरं कृतारम्भा कदलोतरुर्येन तादृशं, रम्भा नाम स्वर्वेश्या तव रति: सुरतं कलावती कामशास्त्रप्रसिद्ध-कलासम्पन्ना कलाभिव्यक्तिमतीत्यर्थ:।

कलावती नाम काचिदमराङ्गना च तव भ्रुवौ रुचिरं रमणीयं तच्च चित्रं लेखकर्म तस्य लेखे इब रेखे ययोस्ते तादृशे चित्रलेखा नाम काचित्त्रिदशतरुणी, अतश्च हे तिन्व ! पृथ्वीगता भूलोकवासिन्यपि त्वं पृथ्वीगतमिति क्वचित्पाठ:। तथा यौवतविशेषणम्।

युवतीनां समूहो यौवतं विवुधकामिनीकदम्वकमित्यर्थ:। तद्वहसि धारयसि अहो आश्चर्य्यम्। स्वर्लोकवासिनीनां मदालसाप्रभृतीनां भूलोकवासिन्यां त्वयि दृगादिगतमदालसत्वादि धर्मसम्बन्ध व्याजेनावस्थानम् अत्यन्तमाश्चर्य्यकरमित्यर्थ:। तथाच अप्सर: प्रभृतय: सकलकामिनीर्विहायत्वय्येवानुरक्तिर्युक्तेति तात्पर्य्यम्। यौवतमित्यत्र ''भैक्षादित्वादचि'' प्रत्यय: न चात्र भस्यादेतद्धिति पुंवद्भाव:। युवतिशब्दसामर्थ्यात् श्लेषानुप्राणित उत्प्रेक्षालङ्कार: कवि कौशलेन निहितं छन्दोऽपि पृथ्वी। ''जसौ जसयलावसुग्रहयतिश्च पृथ्वी गुरु:'' इति लक्षणात्।।५७।।

इति श्रीगीतगोबिन्दव्याख्यायां दशम: सर्ग:।।

## (६) शुक्लध्वजनृपतिकृत- सारवती

।।५७।। पुनरपि चाटुवचनपूर्वकमनुनयति। हे तन्वि कृशाङ्गि ! अहो आश्चर्ये। त्वं पृथ्वीगता भूमिस्थितापि विबुधानां देवानां यौवतं युवतीनां समूहं वहसि। एका तन्वि पृथ्वीगता देवस्त्रीसमूहं वहसीत्याश्चर्यम्। शब्दच्छलेन तदेव दर्शयति, तव दृशौ चक्षुषी मदेनालसे मन्दयत्ने। तव वदनम् इन्दुमत्या चन्द्रज्ञानेनान्वितम्। तव मुखे चन्द्रसादृश्येन तद्बुद्धि: सर्वेषा भवतीत्यर्थ:। तव गतिजनानां मनोरमा मनो रमयतीति मनोरमा चित्तानन्दजननीत्यर्थ:। तव उरुद्वयं विजिता रम्भा कदली येन तत्तथा। तव रति: सुरतक्रीडा कलावती चतु:षष्ठिकामकलायुक्तेत्यर्थ:। तव भ्रुवौ रुचिरा

चित्राणां लेखा ययोस्ते तथा। अथ च शब्दच्छलेन मदालसेन्दुमतीमनोरमारम्भा-कलावतीचित्रलेखासंज्ञका अप्सरसः शरीरसम्बद्धाः प्रतिपादिताः। पृथ्वीगतेति पृथ्वीच्छन्दोऽपीति ध्वनितम्। प्रेयो नामालङ्कारः। 'त्रिदशा विबुधाः सुरा' **इत्यमर**ः। 'यौवतं युवतीवृन्दा'- विति च।।५७।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५७।। किञ्च (दृशाविति।) तव दृशौ मदालसे[५]अवलोकनाय मन्दयत्ने द्वे; स्वर्गे त्वेकैव मदालसा। वदनं तव मुखं इन्दुमत्याश्चन्द्रबुद्ध्याः आस्पदं स्थानम्। [६]त्वन्मुखदर्शनाच्चन्द्रबुद्धिर्भवतीत्यर्थः। सा त्वनेकधा स्वर्गे त्वेकेन्दुमती। तव गतिर्गमनं जनस्य मादृशस्य वा मनोरमा मनोहारिणी; सा बहुविधा स्वर्गे त्वेकैव मनोरमा। तवोरुद्वयं विधुतरम्भं तिरस्कृतकदलीकम्; [७]कदलीनां बहुत्वात्तस्यापि बहुत्वम्[८]; स्वर्गे त्वेकैव रम्भेति। तव रतिः सुरतक्रीडा कलावती [१] नानाकामकलाकौशलयुक्ता। स्वर्गे त्वेका कला। तव भ्रुवौ रचितचित्रलेखे, विरचिते सौन्दर्याय चित्रलेखे द्वे। स्वर्गे त्वेकैव चित्रलेखा। अहो इत्याश्चर्ये। हे तन्वि सुन्दरि पृथ्वीं गता सती त्वं विविधयौवतं नानायुवतिकदम्ब[२]भावं वहसि धारयसि।।५७।।

१.पद्यमिदं सर्गान्त्यत्वेन दृश्यते-इ.एतस्मात् श्लोकात्पूर्वं नि.सा.ग्रन्थे, फ.ग.ह.ज.ग्रन्थेषु च (१) शशिमुखि, (२) व्यथयति, (३) बन्धूकद्युति इत्यादिकश्लोकत्रयं दृश्यते; ब.इ.ड.ग्रन्थेषु तु भिन्नस्थानेषु दृश्यते २.सन्दीपनम्-अ.ब.गत्युच्छ्रितम्-इ.मत्यान्वितम्-ड.३.विजित-नि.स. ४.रुचिर-नि.सा.ड.५.नास्ति-अ.ब.६.त्वन्मुखदर्शनेन सादृश्यात्-इ.फ.ग.ह.ज.७.तः८.पर्यन्तं नास्ति-अ.ब.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।५७।। दृशाविति। अहो इत्याश्चर्ये। हे तन्वि सुन्दरि पृथ्वीगता भूमिस्थाऽपि त्वं विविधयौवतं देवयुवतीवृन्दं अप्सरस्समूहं वहसि। केन प्रकारेणेत्यत आह, तव दृशौ नयने मदालसे [३] अवलोकनाय मन्दयत्ने। [४] वदनं तव मुखं इन्दुमत्या चन्द्रबुद्ध्याऽन्वितं युक्तम्। त्वन्मुखदर्शने सादृश्याच्चन्द्रबुद्धिर्भवतीत्यर्थः। तव गतिर्गमनं जनमनो [५]लोकमनो रमयतीति जनमनोरमा। तवोरुद्वयं [६]जङ्घाद्वय [७] विधुतरम्भं जितकदलीकम्। तव रतिः सुरतविलासः[८]कलावती कामकलाकौशल[९]युता। [१०] ते भ्रुवौ [११] रुचिरचित्रलेखे [१२]रुचिराणां चित्राणां लेखा ययोस्ते। यथा चित्रे [१३]कृष्णा रेखा लिख्यते [१४]तथेति। तदनया पदयोजनया मदालसा इन्दुमतीमनोरमारम्भाकलावतीचित्रलेखासंज्ञका अप्सरसः प्रतिपादिताः। पृथ्वीगतेत्यपि च एकस्यामपि त्वयि सर्वासामप्सरसां गुणा वर्तन्त [१५] इत्याश्चर्यम्।।५७।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५७।। दृशाविति। हे तन्वि सुकुमारे तव दृशौ मदेन यौवनदर्पेण अलसे अवलोकनाक्षमे। वदनं मुखं इन्दुश्चन्द्रः तस्य गतिः अवस्था कान्तिरिति यावत् ; तदपेक्षया उच्छ्रितं ऊर्जितं श्रेष्ठम्। गतिः गमनं जनानां मनोहरा सविलासेत्यर्थः। ऊर्वोः द्वयं ऊरुयुगं विधुता कम्पिता भीषिता विजितेति यावत् ; रम्भा येप तत्। तव रतिः रहः क्रीडा कलावती अनेकबन्धातिचातुर्यवती। भ्रुवौ रुचिरे मनोहरे च चित्रलिखितनानावल्लिदलाकृतिरेखे। अहो आश्चर्यम्। पृथ्वीं गता क्षोणीं प्राप्ता। ते चित्ररेखे विविधं नानाप्रकारं यौवनं वयो विलासयुतत्वाद्यौवनमिति। वहसि प्राप्नोषि। एतादृशसौन्दर्यशालि (नी) पृथिव्यां दुर्लभा ; त्वं पृथिव्यां तिष्ठसीति आश्चर्यम्। अत एवाद्भुतरसः। अलसत्वादिकमुद्दीपनविभावाः। राधैवालम्बनम्। विस्मयः स्थायी भावः। स्तिमि (त) त्वादिकाः अनुभावा ऊह्याः। अत्र पृथ्वीपदेन वृत्तनामपि सूचितमिति सूचनालङ्कारः।।५७।।

१.कामकला-अ.ब. २.नावं-अ.ब. ३.अवलोकनानन्दजनके महत्प्रयत्नेन-क. ४.तव वदनं-क. ५.नास्ति-ड. ६.नास्ति-क.ल.म. ७.नास्ति-ल.म. ८.नास्ति-ड. ९.युक्ता-क.ल.म. १०.तव-क.ल.म. ११.नास्ति-ड. १२.रुचिरे चित्राणां लेखे-ड.रुचिराणां लेखा-क.रुचिरा चित्राणां लेखा-क.रुचिरा चित्राणां लेखा-ल.म. १३.कृष्णरेखश-ड.श्यामा रेखा-क.ल.म. १४.नास्ति-ड. १५.इत्यर्थः-क.

## (१०) धनञ्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)

।।५७।। दृशाविति। हे तन्वि कृशाङ्गि, त्वं पृथ्वीगता सती विबुधयौवतं देवयुवतीवृन्दं वहसीत्यहो आश्चर्यम्। भूस्थितायाः विबुधयौवतवहनासम्भवात् तन्वा अपि बहुभारवहने सामर्थ्याभावाच्च आश्चर्य मिति तात्पर्यम्। युवतीनां समूहः यौवतं, तस्य समूह इत्यण्। वहने प्रकारमाह। दृशौ तव मदालसे इति। मदेन अलसे आलस्ययुक्ते इति विग्रहः। देवयुवती च मदालसानाम्ना एका गन्धर्वकन्या, अपरा महेश्वर सम्भवा वदनमिन्दुमत्यन्वितमिति। तव वदनं कर्त्तृ इन्दुम् अतिशयेन अनुगतं सदृशमित्यर्थः। श्लेषोक्त्या देवाङ्गना चेन्दुमती तया अन्वितं युक्तमित्यर्थ। गतिस्तव मनोरमा इति । तव गतिः मनोरमा मनोहरा। देवस्त्री च मनोरमानाम्नी। विधुतरम्भमूरुद्वयमिति। तव ऊरुद्वयं विधुतरम्भं, विधुता अभिभूता रम्भा वृत्तानुपूर्वतया कदलीकाण्डं येनेति विग्रहः। देवस्त्री च रम्भा स्वर्वेश्या। अत्रपक्षे अविधूता अकम्पिता अर्थात् अचलिता रम्भा यत्रेति विग्रहः। कम्पिता रम्भा यत्रेति वा। रतिस्तव कलावती कलायुक्ता। कला शृङ्गारकला चतुःषष्टि संख्यक कामकलाविशेषो वा। देवस्त्री च कलावतीनाम्नी। रुचिरचित्रलेखे

भ्रुवाविति। रुचिरा मनोहरा चित्ररूपालेखा ययोरिति विग्रहः। देवस्त्रियौ चित्रलेखानाम्न्यौ एकाप्सरोवरा द्वितीया उषासखी योगिनी।।५७।।

इतिश्रीगीतगोविन्दटीकायां दशमसर्गविवरणम् ।।१०।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५७।। किंच हे तन्वि! क्षीणापि त्वं पृथिवीगतापि अतिदुर्लभं देवयुवतीसमूहं वहसीत्यहो आश्चर्य्यम्। तत्प्रकारमाह, तव दृशौ मदालसे मदजन्यहर्षेण अलसे, स्वर्गे त्वकैव मदालसानाम्नी अङ्गना त्वं मदालसे द्वे दृशौ धारयसीत्याश्चर्य्यमित्यर्थः। तवेति सर्वत्रान्वेति तथा वदनमिन्दुं सन्दीपयतीति तत् तत्रेन्दुसन्दीपनीनाम्नी। किंच गतिर्जनस्य मम मनोरमा तत्र मनोरमानाम्नी। अपरं च ऊरुत्वयं तिरस्कृता कदली येन तत् तत्र रम्भानाम्नी। रतिकौशलवती तत्र कलावतीनाम्नी। भ्रूवौ रुचिते चित्रलेखे इव तत्र एका चित्रलेखा इति।।५७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५७।। ननु सुरसुन्दरीसहायेनैव कामस्य विश्वजयः। इत्थं मन्मुखसेवयेति चेत् तत्राह; दृशाविति। हे तन्वि! त्वं पृथ्वीगता, पृथिव्या एकदेशे स्थिताऽपि विवुधयौवतं, देवयुवतिसमूहं वहसि, शासनीयत्वेनाङ्गीकरोषीत्यर्थः। अहो! आश्चर्यं कथमित्यपेक्षायां तत्प्रकारं श्लेषेणोपपादयति। सकलसौन्दर्य- निराजितचरणसरोजायास्तव दृशौ नेत्रे मदेन तारुण्यगर्वेणालसे, मन्दसञ्चारिसूचितभावविशेषे इत्यर्थः। अनेन मदालसाख्ये देवाङ्गने सूचिते। वदनमिन्दुमतिक्रम्योन्नतमुत्कृष्टम्, इन्दुतोऽप्यधिक- शोभनमित्यर्थः। इन्दुमत्युज्ज्वलमिति पाठे स एवार्थः। यद्वा इन्दुमती नाम देवाङ्गना। ततोऽप्यर्थात् तद्वदनतोऽपि तव वदनमुत्कृष्टमित्यपि ध्वनितम्। अत्र इन्दुमती नाम देवाङ्गना सूचिता। तव गतिः स्वभावमन्थरगमनं जनस्य सपक्षविपक्षसाधारणजनमात्रस्य मनसि रमत इति मनोरमा, मनोहारिणीत्यर्थः। अत्र मनोरमा नाम काचिद्देवाङ्गना सूचिता। तथा तव ऊरुद्वयं विधुतरम्भम्। विशेषेण धुता कम्पिता रम्भा कदलीतरुप्रकाण्डो येन तादृशम्। पक्षे तिरस्कृता रम्भानामास्परा येन तत्। तथा तव रतिः, सुरतक्रीडा कलावती, चतुःषष्ठि कामकलाशालिनी। अत्र कलावती नाम देवाङ्गना सूचिता। तथा तव भ्रुवौ चिल्लीलते, रुचिरचित्रलेखे। मनोहरचित्रकृतरेखे इव दर्शनीये इत्यर्थः। अत्र चित्रलेखा-भिख्या देवाङ्गना सूचिता। यौवतशब्दसामर्थ्यात् श्लेषानुप्राणितोत्प्रेक्षा।।५७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५७।। दृशौ तव मदालसेति; ननु सुरसुन्दरी सहायेन कामस्य विश्वविजयः। हे तन्वि! तव स्वर्गसुलभशरीरमिदानीं मर्त्ये वर्त्तते इति आश्चर्यचकितस्य विषयः।

किमिति? त्वच्छरीरे हे मदालसे! षडप्सरसः वर्त्तन्ते। कथमिति? तत् खलु श्लेषेणोपन्यस्यते। सकलसौन्दर्यनिराजित-चरण-सरोजायास्तव दृशौ नेत्रे मदेव तारुण्यगर्वो पाल्यते। मदसञ्चारीसूचिते भावविशेषे मदालादसारूपे देवाङ्गने सूचिते। वदनेन्दुः मुखचन्द्रः। इन्दुतोपि अधिकमुन्नतमस्ति। अत्र इन्दु-सन्दीपनी देवकन्याद्वयं वसति। गतिस्तव मनोरमा। अर्थात् तव सुरम्ये गमने मनोरमा नाम्नी स्वर्गाङ्गना व्यज्यते। तव ऊरुयुगं विधूतरम्भम्। अर्थात् धूतः कम्पितोरुयुगलं यथा कम्पिता रम्भातरुवत् प्रकाण्डमस्ति। सा च रम्भा तव ऊरुयुगले वर्त्तते। अर्थात् तव ऊरुयुगलस्य शोभा रम्भायाः सौन्दर्यं तिरस्करोति। तव रतिः कामक्रीडा कलाविभूषिता चतुःषष्ठीकामकलासमन्विता अस्ति। पक्षे तव रतिरङ्गे कलावतीनाम्नी देवाङ्गना सूचिता। तथा तव भ्रूयुगले रुचिरे शोभने स्तः। एका रुचिरा अन्या चित्रलेखा देवाङ्गने स्तः। अतः एताभिः रूपयौवनसम्पन्नाभिः त्वं समन्तिता अथ च तान् तिरस्कृत्य मर्त्त्ये तिष्ठ इति अथ श्लेषमूलः उत्प्रेक्षालंकारः इति।।५७।।

(प्रणम्य शिरसा शिष्टमिष्टफलप्रदायिनम्। सिद्धबुद्ध्या विवर्द्धते मातरं लोकमातरम्।। श्रीमातृकृपया यत्र टीकाग्रन्थः प्रतन्यते। तस्यादेशवलादत्र दशमः सर्गः वर्ण्यते।।)

**५७-क-प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्धं रणे**
**राधापीनपयोधरस्मरणकृत्कुम्भेन सम्भोदवान्।**
**यत्र स्विद्यति मीलति प्रपतति प्रीत्या हरौ तत्क्षणं**
**कंसस्यालंमभूत् जितं जितमिति व्यामोहकोलाहलः।।५७-क।। (सञ्जीवनी)**

**(१) नारायणदाशकृत- सर्वाङ्गसुन्दरी (टीकानास्ति)**

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।५७-क।। स प्रीतिमिति। स हरिर्जगतां प्रीतिं तनुतां हर्ष विस्तारयतु। कीदृशो हरिः? कुवलयापीडेन कंसदन्तिना सार्धं रणे संभेदवान्संगमवान्। किंविशिष्टेन कुवलयापीडेन? राधापीनपयोधरयोः स्मरणकरौ कुम्भौ यस्य तेन। क इत्यपेक्षायामाह- यत्र हराविति हेतोः राधापीनपयोधरस्मरणादेव सात्विकभावोद्रेकात्क्षणं स्विद्यति स्वेदयति। मीलतीति। भ्रान्त्या चक्षुषि निमीलति सति कंसस्य तदालोकनात्तत्य तथाविधस्य दर्शनाद्व्यामोहेन भ्रान्त्या क्षिप्रं वेगेन जितं जितमिति कोलाहलो भवति स्म। भ्रान्तिमदाशिषावलंकारौ। शृङ्गारवीरयाः संकरश्च। शार्दूलविक्रीडितं वृत्तम् ।।५७-क।।

आनन्दकन्दलीकन्दं मुकुन्दं नन्दनन्दनम्।
प्रणम्य दशमं सर्गं व्याकरोत्कुम्भभूपतिः।।

इति श्रीचित्रकूटाधीश्वरराजाधिराजमहाराजश्रीकुम्भकर्णविरचितायां
(२) राणाकुम्भकृत-रसिकप्रियायां चतुरचतुर्भुजो नाम दशमः सर्गः।।

## (३) जगद्धरकृत- सारदीपिका (टीकानास्ति)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५७-क।। अथ सर्गान्ते कविराशिषं प्रयुङ्क्ते-प्रीतिमिति। हरिः श्रीकृष्णो वो युष्माकं पठतां गायतां श्रृण्वतां च प्रीतिमानन्दं तनुतां विस्तारयतु, यतो भक्तानां क्लेशहारी हरिः। कीदृशः ? रणे रतिसंग्रामे राधायाः पीनौ पयोधरौ तयोः स्मरणवत् संस्करबोधो याभ्यां तादृशौ कुंभौ यस्य तथोक्तेन कुवलयापीडेन हस्तिना सार्धं संमेदवान् संसर्गवान्। अत्र प्रचुरशृंगारित्वं तथा च श्रीराधायां सर्वाधिकभावं, श्रीकृष्णस्याद्भुतवीर्यत्वं शृङ्गारविरोधिभयानकहेतुमहासत्त्वं हस्तिसंग्रामे शृङ्गाररसस्याविर्भावेन वर्णितमिति ज्ञेयम्। तदेवाह-यत्र यस्मिन्रणे तत्कुम्भस्थलदर्शनोद्बोधसात्त्विकविकारेण स्विद्यति स्वेदं कृतवति पुनः केनापि सुखोदयेन क्षणं मिलति सति। अथ अथानन्तरं तत्क्षणमेव द्विपे क्षिप्ते हते सति कंसस्यालमतिशयेन जितं जितमावेगेन द्विरुक्तिः; इति व्यामोहकोलाहलः अभूत्। अयमर्थः, जितं प्रथमस्तावत्खेदमिलिताभ्यां कंससभाया-मानन्दो जातः। पश्चात्तत्क्षणमेव हते द्विपे आवेगाच्छत्रुणा जितं जितमिति। अमुना प्रकारेण व्यामोहो मूर्च्छाकोलाहलो हाहाशब्दश्चाभवदित्यर्थः। यद्वा, उदितसात्त्विक-विकारे तादृशस्य दर्शनात् व्यामोहाद्भ्रान्त्या 'जितं जितम्' इति कोलाहलोऽ-भवदित्यर्थः।।५७-क।।

स्फुटीकृतरसोत्करां प्रथितशालिनाथोल्लस-
त्सुरद्रुमसमुद्भवां विबुधवर्गदत्तोत्सवाम्।
नृणां सरसमाधवोत्तमगुणैः प्रमोदप्रदां
लिहन्तु रसमञ्जरीं रसिकचञ्चरीका मुहुः ।।१।।

इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां श्रीशालिनाथकारितायां
गीतगोविन्दटीकायां रसमञ्जरीसमाख्यायां दशमः सर्गः ।।

इति श्रीगीतगोविन्दे मानिनीवर्णने चतुरचतुर्भुजो नाम दशमः सर्गः।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५७-क।। ग्रन्थप्रक्रमं विहाय सर्गान्ते मङ्गलमाचरति। वो युस्माकं हरि: कृष्ण: प्रीतिं तनुतां विस्तारयतु। किम्भूत: ? कुवलयापीडेण कंसकरिणा सार्धं सह रणे संग्रामे सम्भेदवान् सम्बद्ध:। किम्भूतेन ? राधाया: पीनयोर्मांसलयो: पयोधरयो: स्मरणकृत् स्मरणकारी कुम्भो यस्य एतादृशा। तदुक्तम्, 'सादृष्टचिन्ता या स्मृतिबीजस्य बोधका इति। अतएव तत् स्मरणादेव कृष्णे स्विद्यति सात्त्विकस्वेदं विभ्रति क्षणं मीलति चक्षुर्मुद्दनभाजिं। अथानन्तरं तत्क्षणात् द्विपे हस्तिनि क्षिप्ते सति कृष्णेनेत्यर्थात्, कंसस्य प्राथमिकस्वेदादिमात्रदशिनो जितं जितमिति व्यामोहात् कोलाहल: अतएव अलं व्यर्थोऽभूज्जात इत्यर्थ:। यत्र स्विद्यतीति बहूषु पाठ: तत्पक्षे यत्र रणे स्विद्यतीति बहूषु पाठ: तत्पक्षे यत्र रणे स्विद्यत्यर्थात् कृष्ण इत्यर्थ:। तथा च श्लोकार्धविच्छेदात् नत्केशलेशोऽपीत्यवधेयम्। क्वचिच्च कंसरणो जितं जितमिति व्यालोलकोलाहल इति पाठ:। तत्पक्षे कंसरणे जितं जितञ्जितं पश्येति वक्तव्ये सम्भ्रमात् कंसरणेजितं जितमिति व्यालोलानां विशेषतो व्याकुलतया लोलानां चञ्चलानां कोलाहल: वो युष्माकं प्रीति तनुतामित्यन्वय:। कस्मिन् सति कोलाहल: तत्राह, हरि: कुवलयापीडेण कंसकरिणा सार्धं रणे सम्भेदवान् सम्बद्ध:। कथम्भूतेन ? राधापीनपयोधरस्मरणकृत्-कुम्भेनेति व्याख्यातप्रायम्। अथानन्तरं कृष्णे स्विद्यति सति क्षणं मीलति सति। स्वेदमीलनयोर्हेतुरुक्त एव। तत्क्षणात् क्षिप्तद्विपे क्षिप्तहस्तिनि सतीत्यर्थात्। अत्र पक्षे कुवलयापीडजयेनेव कंसजयो न बालानां वाक्यार्थत्वदोष इत्यवधेयम्। मानिनीमाना-पनयने चतुर: चतुर्भुजो यत्रेति व्युत्पत्त्या चतुरचतुर्भुजेति सर्गनाम।।५७-क।।

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्दटीकायां चतुरचतुर्भुजो नाम दशम: सर्ग:।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५७-क।। सर्गान्ते कविराशिषमाशास्ते, प्रीतिमिति। हरिर्मनोहरस्तापहरो वा वो युष्माकं गायतां शृण्वताञ्च प्रीतिं [१] भक्तिविषयां तनुतां विस्तारयतु। कीदृश: ? [२] राधापीनपयोधरस्मरणकारी। पुन: कीदृश:[३] ? [४]कुवलयापीडेन कुम्भेन कुम्भस्थलेन सार्धं रणे संसर्गवान् [५] सम्भेदवान्। [६]कुवलयापीडसंसर्गेण राधापीनस्तनस्मरणकृदित्यर्थ:। कुम्भशब्दोऽत्र [७] श्रीराधास्तनस्मारक इति। यत्र यस्मिन् रणे हरि: स्विद्यति स्वेदयुक्तो भवति। अथोऽनन्तरं [८]क्षणं क्षणमात्रं केनापि सुखोदयेन मीलति लोचने मुद्रिते करोति। तत्तस्मिन् क्षिप्तद्विपे [९] क्षिप्तहस्तिनि तत्क्षणात् कंसस्यालमतिशयेन [१०] असूक्षितं [११] त्यक्तजीवितं जितं जितमिति वेगेन व्यामोहकोलाहलो[१२]मरणभयोत्पन्नशब्दोऽभूत्।

पक्षे द्वाभ्यां श्रीराधा [१३] कृष्णाभ्यां सुरतरसं पिबति स द्विपः कामः। तस्मिन् क्षिप्ते जिते द्विपे कं सस्य [१४] सुखकूजितस्य व्यामोहकोलाहलः परमसुखप्रदः किङ्किणी-[१५] नूपुरध्वनिसङ्घातकृतः जितं जितमिति परस्परं तयोरभूत्। कीदृशो हरिः ? कुवलयं नीलोत्पलं तस्यापीडो माला शिरस्संवेष्टनं वा तेन; संमोदवानिति पाठः। शेषं समानम्। कंसोऽसुरे स्मरकृते कूजिते तत्सुखेऽपि च इति **कोशचूडामणिः**।।५७-क।।

[१६]इति [१७]श्रीकृष्णचन्द्रसेवकोदीच्यावतंस[१८]शिवदासात्मज, श्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां गीतगोविन्दटीकायां मानिनीमानापनोदने मुग्धमधुसूदनो नाम दशमः सर्गः।।

१.स प्रीतिं-नि.सा. २.सम्भेदवान्-ड. ३.सम्भेदवान्-नि.सा.सार्धं रणे-ड. ४.क्षणमपिक्षिप्रं तदालोकनात्-नि.सा.क्षणमथ क्षिप्रं द्विपे तत्क्षणात्-ड. ५.व्यामोहेन जितं जितं जितमभूत्कंसस्य कोलाहलः-नि.सा.कंसं बालजितं जितं जितमिति व्यालोलकोलाहलः-ड.कंसस्यालमसूञ्जितं जितमिति व्यामोहकोलाहलः-ग. ६.पदमिदं नास्ति-फ.ग.ह.ज.इयं पुष्पिकैव नास्ति-इ.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५७-क।। प्रीतिं व इति। क्षेपकः। [१९]सम्भेदवान् सम्बन्धः वचनकौशलेन मानिनीमाना- पनोदनाच्चतुरः।।५७-क।।

इति श्रीगीतगोविन्दटीकायां नारायणपण्डित[२०]विरचितायां (मुग्धमधुसूदनो नाम) दशमः सर्गः।।

१.भक्ति विषयणीं-इ.ग.ह.अनुरागं-फ.ज. २.तः ३.पर्यंतं नास्ति २.राधायाः पीनपयोधर-स्मरणकारी-अ.ब.राधापीनपयोधरस्मरणकृत स्मरणकार-ग. ४.कुवलया-पीडकुम्भेन-इ.ग. ५.नास्ति-ग. ६.कुवलयापीडकुम्भसंसर्गेन-इ.फ.ग.ह.ज. ७.श्रीवृषभानुसुता-ग. ८.नास्ति-इ.ग. ९.नास्ति-अ.ग.प्रक्षिप्तहस्तिनि-इ.फ.ग.ह.ज. १०.अभूज्जितं-ग. ११.त्यक्तजीविताशां-इ.फ.ग.ह.ज. १२.मरणभयोऽन्यत्र शब्दोऽभूत्-इ. १३.नन्दसूनूभ्यां-ग. १४.मुखे कूजितस्य-अ.ब. १५.मुपुरसङ्घात-कृत-अ.ब.नूपुरध्वनिः सङ्वातकृत-ग. १६.इति श्रीगीतगोविन्दटीकायां-अ.ब. १७.श्रीमत्कृष्ण-इ.फ.ग.ह.ज. १८.शिवदासपण्डितात्मज-ग.ज. १९.इतो नास्ति-क. २०.कृतायां पदद्योतनिकायां दशमः सर्गः-ड.

## (९) कृष्ण पण्डितकृत-जयन्ती

## (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन)(टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५७-क।। स्वप्रियागुणकीर्त्तनावेशात् महासङ्कटस्थानेषु तत्स्पर्शसुखस्मरणपरवशं श्रीकृष्णं वर्णयन्नाशास्ते प्रीतिमिति। हरिर्वो युष्माकं प्रीतिं तनुताम्। कीदृशः ? रणे कुवलयापीड़ेन सम्भेदवान् आसङ्गवान्। कीदृशेन ? श्रीराधायाः पीनपयोधरयोः

स्मरणकृतौ सादृश्येन संस्कारोद्वोधकतया स्मरकौ कुम्भौ यस्य तेन। यत्र सम्भेदे तत् स्पर्शसुखेन सात्त्विकोदयात् श्रीकृष्णे क्षणं स्विद्यति सति मीलति च सति कंसस्यास्माभिर्जितं जितमिति व्यामोहकोलाहलोऽभूत्। तेनावहितेन श्रीकृष्णेन क्षिप्ते द्विपे सति तत्क्षणात् अनेन जितं जितमिति व्यामोहकोलाहलोऽभूत् इति। पूर्वत्र व्यामोह आनन्देन उत्तरत्र तु शोकेनेति ज्ञेयम्। अतएव सर्गोऽयं श्रीराधास्मरण विकारवर्णनेन मुग्धो मनोहरो माधवो यत्र स:।।५७-क।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५७-क।। एवं विचित्रचाटूक्तिकदम्बेन राधाप्रसादं सूचयित्वा श्रीकृष्णस्य राधामाधुर्यस्मृतौ देशकालानपेक्षितां प्रदर्शयन् उत्तरलीलावर्णनव्यग्र: सर्गमुपसंहरति। प्रीतिमिति। हरिर्वो श्रोतृणां प्रीतिं स्वविषयां तनुतां, विस्तारयतु। कीदृश: कुवलयापीडेन, तन्नामप्रसिद्धकरिराजेन सार्धं रणे युद्धे सम्भेदवान्। आसङ्गवान् । कीदृशेन राधाया: पीनपयोधरयो: स्मरणकृतौ सादृश्येन तत्सौन्दर्यस्मृत्युद्बोधकौ कुचौ यस्य, तादृशेन । तदेवोपपादयति। यत्र रणे हरौ प्रीत्या करिकुम्भसंस्मारितप्रियाकुचमाधुर्यस्मृतिसम्पादित-प्रीतिकार्यभूतसात्त्विकोदयेन इत्यर्थ:। कार्यकारणयोरभेदोपचारात्। स्विद्यति, स्वेदयुक्ते सति, मीलति, निमीलितनेत्रे सति, तथा प्रपतति, प्रकर्षेण पतति, स्खलति सति, तत्क्षणं कंसस्य जितं, जितमिति अलमित्यर्थं व्यर्थं वा, आनन्दव्यामोहेन कोलाहल: कलकलध्वनिरभूत्।।५७-क।।

इति श्रीगीतगोविन्दे मुग्धमधुसूदनो नाम दशम: सर्ग:। श्रीराधाप्रसादनिपुणतया मुग्धो मनोहरो मधुसूदनो यत्र तथाऽयं सर्ग:।

।। इति रसिकरङ्गदाख्यायां श्रीगीतगोविन्दव्याख्यायां दशमसर्ग: समाप्त:।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५७-क।। स प्रीतीति; स:हरिर्जगतां संसारस्य प्रीतिवर्द्धनं साधयतु हर्षवर्द्धनं करोतु। संसारस्य मङ्गलविधानं विदधातु। तनोतु विस्तारयतु। स किंभूत: हरिरिति जिज्ञासायां तस्य कृतय: कविनाऽत्र तन्यते। कुवलया नामधेयस्य मत्तहस्तिन: कुम्भस्य पीडनं यथानेन विहितं तथैव श्रीराधाकुचकुम्भपीडनवत् स्मरणेन करीकुम्भीकुम्भविदारणं मर्दनं वा साधितम्। एवंभूतस्य कंसस्य अथवा कंसकर्तृकस्य श्रीकृष्णमारणनिमित्तं प्रेरितं मत्तहस्तिकुम्भविदारणं मोदाय श्रीराधाकुचमर्दनं नर्मप्रदं स्वेदादि सत्त्वविकारं प्रतीयते। अहो वीरत्वम् द्वितीयत: कंसस्य कोलाहले पुन: तस्यावलोकनम् अर्थात् स व्यामोहेन भ्रान्त्या क्षिप्रवेगेन जितं जितमिति। अहो असौ हस्ती जित: इति कोलाहले

श्रीकृष्णः क्षिप्रवेगेन स्वस्य कौशलं दर्शयता श्रीकृष्णेन स्वस्य सरूपं सर्वमयं कारितं फलतः जनाः हतचकिताः संजाताः। तथाभूतस्य हरेः लीला भवतां सहृदयानां मङ्गलविधानं करोतु इति। यतो हि शृङ्गारभावोदयातपरं वीररसप्रसङ्गो न युज्यते। स्वेदसात्त्विवेकेन देहलीदीपकन्यायेन उभयरसो वितन्यते। परन्तु उभयोः रसयोःपरस्परविरोधात् तद्यथा **साहित्यदर्पणे**, आद्यकरुणवीभत्सरौद्रवीरभयानकैः ।।३/२५४।। अत्र गन्धगन्धकयोरिव विवेकिभ्यः रसो न स्वाद्यते। भ्रान्तिमदलंकारः आशिषालंकारोपि। शृङ्गारवीरयोः शंकरश्चः शार्दूलविक्रीडितं छन्दः इति **कुम्भकर्णः**। परन्तु अत्र मत्तहस्तिनः मर्दनं स्तनमर्दनवदिति भयानकस्यापि संचारः। अतः कृते साहसे शृङ्गारभावागते स्वेदसात्विके वीरोपि नानाभावसम्मिश्रणं कस्यापि पोषणं न करोति रसानां परस्परविरुद्ध भावात्।। ५७-क।।

(प्रणम्य शिरसा शिष्टमिष्टफलप्रदायिनम्। सिद्धबुद्ध्या विवर्द्धते मातरं लोकमातरम्।। श्रीमातृकृपया यत्र टीकाग्रन्थः प्रतन्यते। तस्यादेशवलादत्र दशमः सर्गः वर्ण्यते।।)

इति श्रीगीतगोविन्दे कविः प्रफुल्लमिश्रविरचिते स्वर्णलताटिप्पण्यां मुग्धमधुसूदनो नाम दशमः सर्गः।।

❀ ❀ ❀

# ।। एकादशः सर्गः ।।

## सानन्ददामोदर



# ।। एकादशः सर्गः ।।

।सानन्ददामोदरः।

**५८-सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं**
**गतवति कृतवेशे केशवे कुञ्जशय्याम्।।**
**चितरुचिरभूषां दृष्टिमोषे प्रदोषे**
**स्फुरति निरवसादां कापि राधां जगाद।।५८।।**

**।। सानन्दगोविन्दः[१] ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५८।। अस्मिन् सर्गे गोविन्दवचनेन श्रीराधामानभङ्गे जातेऽपि सखीगणेषु लज्जन्तीं माघवसमीपं न गच्छन्तीं राधिकां प्रति सखी जगाद। एतदेवाह। श्लोकेन गीतं संजनयति। सुचिरमिति। दृष्टिमोषे प्रदोषे स्फुरति सति कापि सखी राधां जगादेत्येवं योजना। प्रदोषे कथं भूते, दृष्टिमोषे दृष्टिं दर्शनं मोषयते खण्डयते, खण्डयतीति कर्मण्यण्। मुषखण्ड़ने इति वचनात्। सुचिरमनुनयेनेत्यादि, कीदृशीं राधां रचितरुचिरभूषां, पुनः कीदृशीं निरवसादाम्, अनुनयेन मानभङ्गादित्यभिप्रायः। मालिनीभि नाम वृत्तम् ।।५८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५८।। इदानीं कृतानुनयां राधां कापि सखी हरिमभिगमनाय प्रोत्साहयति- सुचिरेति। कापि सखी राधां जगाद। क्व सति ? प्रदोषे रजनीमुखे स्फुरति सति। किंभूते प्रदोषे ? दृष्टिं मुष्णातीति कर्मण्यम्। अभिसारिकाभिसरणावसान इत्यर्थः। किंभूतां राधाम् ? निरवसादामङ्गीकृतानुनयेन गतखेदाम्। पुनः किंभूताम् ? रचितनीलनिचोलाद्यभिसरणयोग्यवेषाम्। क्व सति ? कृतवेशे कृतनेपथ्ये, अथ वा कृतग्रहे कृष्णे कुञ्जशय्यां गतवति सति। किं कृत्वा ? बहुकालानुनयेन मृगाक्षीमनुकूलयित्वा। मालिनीवृत्तम्।।५८।।

## (३) जगद्धरकृत- सारदीपिका

।।५८।। अधुना राधां प्रति सखी ब्रुते रुचिरमिति कापि सखी प्रदोषे रजनिमुखे स्फुरति दीप्यमाने सति प्राप्ते इत्यर्थः। राधां जगाद वक्ष्यमाणमिति शेषः कस्मिन्सति केशवे कृष्णे अनुनयेन प्रीतिवचनेन रुचिरं बहुकालं मृगाक्षीं राधां प्रीणयित्वा सन्तोषयित्वा

कुञ्जशय्यां लतागृहशयनं गतवति सति कीदृशे केशवे कृतवेषे कृतश्रृङ्गारालङ्कारे राधाया इति। कीदृशीं राधां रचिता कृता रुचिरा मनोहरा भूषालङ्कारो यया कृष्णस्येति अन्योन्यालङ्कार नान्योन्यराग: उचित: कीदृशे प्रदेशे अन्धकाराधिक्येन दृष्टिमुष्णातीति दर्शरोचके पुन: कीदृशीं राधां निरवसादां निगर्त: मानसभङ्ग रुपोऽवसाद: उपतापो यस्यास्ताम्।।५८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५८।। सुचिरेति। कापि सखी राधां जगादोवाच। क्व सति ? प्रदोषे स्फुरति सति। कीदृशे ? दृग्विमोषे दृशौ विमुष्णाति चोरयति विषयग्रहणासमर्थे करोति तादृशे। गाढान्धकारे इत्यर्थ:। पुन: क्व सति ? केशवे मृगाक्षीं हरिणनयनां राधां सुचिरं बहुकालं यथानुनयेन प्रीणयित्वा कुञ्जशय्यां लतावेष्टितकुटीराभ्यन्तरस्थशयनीयं गतवति गते सति कीदृशे केशवे ? कृतवेशे कृतालंकरणे। कीदृशीं राधाम् ? रचिता रुचिरा मनोहरा भूषालंकृतिर्यया ताम्। पुन: कीदृशीम् ? निरवसादां निर्गतोऽवाद: कृष्णानागमनजन्यं दु:खं यस्यास्ताम्।।५८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५८।। कृष्ण सान्त्वनानन्तरं कृत्यमाह सुचिरमिति। सुचिरं बहुकालम् अनुनयेन बहुप्रकारप्रियोक्तया मृगस्याक्षिणीव विशाले अक्षिणी यस्या: सा तथोक्ता बहुब्रीहौ सक्थ्यक्ष्णोरत्यौशसि (५।४।११३) समासान्ते णित्वान्मयट्। एवं विधां राधां प्रीणयित्वा सन्तोष्य स्वाभिसरणोन्मुखीकृत्य इति यावत्। कृतवेशे धृतकामुकालङ्कार-सम्पदकेशवे कृष्णे कुञ्जे संकेतीकृतलतागृहे शय्यां पल्लवतल्पं प्रति गतवति प्रयाते सति दृष्टीनां मोष: अपसरणं निरोधो यत्र तादृशे दृग्व्यापारप्रतिबन्धकगाढ़ान्धकारे इत्यर्थ:।

एतादृशे प्रदोषे रजनीमुखे ''प्रदोषो रजनीमुख**मित्यमर**:। स्फुरति आविर्भूते सति रचिता धृता रुचिरा रमणीया भूषा उद्दीपकालङ्कारा: केयूरादय: यया तादृशीं निर्गत: अवसाद: कृष्णस्य कार्य्य संसिद्धि: यस्या: सकाशात् तादृशीं तत्समये मानवशात् वा निष्फलीकृत कृष्णप्रार्थनामनोरथामित्यर्थ:।

राधा संसिद्धेतो घञिप्रत्यय:। निरवसादामिति केषुचित् पाठ:। स तु अनुप्रास ननु गुण:। तथापि व्याक्रियते निर्गतोऽवसाद: खेदशेषो यस्या: सकाशात् निरादयो गताद्यर्थे पञ्चम्येतत्समास:। कृष्णसान्त्वनेनापगतखेदामित्यर्थ:। एवंविधां कापि काचित् सखी जगाद उचे।।५८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५८।। प्रियसङ्गमोत्कण्ठिताप्यन्यवचनमपेक्षितुं विदग्धेति तत्प्रबोधनार्थंसखी-वचनप्रस्तावं रचयति। तदाह कामतन्त्रे सन्नायिकाप्रस्तावे 'उत्कण्ठितापि वनिता* प्रियसङ्गमाय मानं न मुञ्चति+ विनावचनं सखीनामिति। पद्यार्थस्तु, कापि सखी राधां जगाद उक्तवती। कस्मिन् सति ? प्रदोषे रजन्यारम्भकाले स्फुरति शोभमाने। तदा, 'प्रदोषो रजनीमुखमिति। स्फुरतीत्यनेन प्रदोषतारुण्यकालो दर्शितः। प्रदोष इत्युक्ते तच्चरमभागेऽप्यधि- करणतासिद्धेः न तदर्थलाभ इति। अत्र मानस्य दीर्घत्वसूचनाय प्रदोषोपादानम्। तथा च तादृशमानस्य दीर्घकालानुनयेनाप्यपगमे क्रीडाकालस्तिष्ठेदेवेति हृदयम्। कीदृशे ? दृष्टिं दर्शनं मुष्णातीति कर्मण्यण, तस्मिन्। अत्र च प्रदोषस्यैव दर्शनमोषकत्वे निशि ततोऽप्यधिकान्धकारः स्यादिति अभिसारोचितरात्रित्वं सूचितम्। कीदृशीम् ? निरवसादाम्। अवसादो हरिविरहजनितक्षैण्यंम्, तस्मान्निर्गतामपगताम्। पुनः कीदृशीम् ? रचिता विविधा नानारूपा भूषा अलंकरणं यया सा तथा ताम्। कस्मिन् सति ? सुचिरं बहुकालं मृगाक्षीं हरिणनयनाम् अनुनयेन विनयकर्मणा प्रीणयित्वा प्रीतिं कृत्वा केशवे कृष्णे कुञ्जशय्यां लतापिहिततल्पं गतवति सति यातवति सतीत्यर्थः। कीदृशे ? कृतो विहितो वेशोऽलङ्करणं येन तादृशे। तदनेन उभयोरलङ्करणप्रदर्शनेन उभयोरन्योन्यसङ्गमसाकांक्षत्वेनान्योन्यानुरागप्रदर्शनेन रसाधिक्यं सूचितम्। तदाह, 'महानुदयते यूनो रसोऽन्योऽन्यानुरागत' इति।।५८।।

†'सानन्दगोविन्दः' इति पाठ। क्वचित् 'सानन्ददामोदरः' इत्यपि पाठो दृश्यते।

*'नायिका' इति पाठ।

+'न मुञ्चति' इत्यस्य स्थाने 'मुञ्चति' इति पाठ।

## (७) वनमालि भट्टकृत-सञ्जीवनी

एकादशेऽनुनयतः प्रसन्नां संविभाव्य ताम् ।

उवाच काचिद्रजनीमुखे राधां सखी वचः ।।

।।५८।। एवं वल्लभानुनयप्रसन्नां राधां प्रति सख्याह, सुचिरमिति। काऽपि सखी प्रदोषे रचनीमुखे स्फुरति दीप्यमाने सति राधां जगाद उवाच। वक्ष्यमाणमिति शेषः। कीदृशे प्रदोषे ?[१] दृष्टिमोषे दर्शनचोरके। कस्मिन् सति ? केशवे श्रीकृष्णे सुचिरं बहुकालमनुनयेन मृगाक्षीं प्रीणयित्वां प्रसादयित्वा कुञ्जशय्यां लतागृहशयनं गतवति प्राप्ते सति। [२]कीदृशे ? कृतवेशे कृताभिसारोचितवेशे ; श्रीराधायां स्वस्मिन्वा सम्भोगसम्पादनाय कृतालङ्करण इत्यर्थः। कीदृशीं राधाम् ? रचिता कृता [३] रुचिरा

मनोहरा भूषालङ्कारो यया सा ताम्। कृष्णस्य स्वस्य वेति परस्परालङ्कारकरणेन परस्परं स्नेह: सूचित:। पुन: कीदृशीम्? निरवसादां निर्गतो मानभङ्गादिरूपेऽवसाद उपतापो यस्यास्ताम। प्रसन्नामित्यर्थ:। वेशो वेषेऽथ भूषायां वेशो वेश्मनि [४] कथ्यते इति [५]यादव:।।५८।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५८।। अधुना राधां प्रति सखी ब्रूते, सुचिरमिति। काऽपि सखी प्रदोषे रजनीमुखे स्फुरति दीप्यमाने सति [६] प्राप्त इत्यर्थ:। राधां जगाद वक्ष्यमाणमिति शेष:। कस्मिन् सति? केशवे कृष्णे अनुनयेन प्रीतिवचसा सुचिरं बहुकालं मृगाक्षीं राधां प्रीणयित्वा [७] सन्तोष्य कुञ्जशय्यां लतागृहशयनं [८] गतवति प्राप्ते सति। कीदृशे केशवे? कृतवेशे [३]कृतशृङ्गारालङ्कारे, राधाया इति। कीदृशीं राधाम्? रचिता कृता रुचिरा मनोहरा भूषाऽलङ्कारो, [४]यया, कृष्णस्येति अन्योन्यालङ्करणेनान्योन्यराग: सूचित:। कीदृशे प्रदोषे? अन्धकाराधिक्येन दृष्टिमोषे दर्शनचोरके। पुन: कीदृशीम्? निरवसादां निर्गतो मानभङ्गादिरूपोऽवसाद उपतापो यस्या: [५] ताम्।।५८।।

१.नास्ति-ग. २.कीदृशे केशवे-इ.फ.ग.ह.ज. ३.नास्ति-अ.ब. ४.नास्ति-फ.ज. ५.विश्व:-फ.ज. ६.प्राप्यमित्यर्थ:-क. ७.सन्तुष्य-ड. ८.गतवति सति-क.ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५८।। उत्तराष्टपदीमवतारयितुं सङ्गतिमाह, सुचिरमिति। सुचिरं बहुकालं अनुनयेन क्षमापनेन मृगस्य अक्षिणीवाक्षिणी यस्यास्तां मृगाक्षीं प्रीणयित्वा प्रीतिमुत्पादयित्वा; कृत: वेश: संवेश: वेषो वा स्रक्चन्दनादिशोभित: तस्मिन् केशवे कुञ्जे शय्यां शयनं गतवति प्राप्ते सति रचिता: कृता: रुचिरा: भूषा: वस्त्रादिका: ताटङ्कादिकाश्चालङकृतय: तासु दृष्टिमोक्षो नेत्रप्रसारो यया ताम्। अवलोकितभूषामित्यर्थ:। प्रदोषे सन्ध्याकाले स्फुरति उदयति सति निगेत: अवसाद: सन्तापो यस्यास्ताम्। शान्तकोपामित्यर्थ:। काऽपि राधां जगाद अवोचत्। अनुनीत्वा(य) सङ्केतकुञ्जे तिष्ठामीति गते कृष्णे अभिसर्तुं उद्यतां अवोचदिति भाव:। काव्यलिङ्गालङ्कार:।।५८।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५८।। पूर्वसर्गोक्त कृष्णवचसा मानभङ्गे जातेऽपि विहारस्थाने स्थितस्य कृष्णस्य समीपमागन्तुं लज्जमानां राधां प्रति लज्जामृदुत्वकरणाय कस्याश्चित् सख्या: समुचितमेव वचनं वर्णयितुं कविरुपक्रमते। सुचिरमित्यादि। दृष्टिमोषे प्रदोषे स्फुरति सती कापि सखी राधशं जगाद। वक्ष्यमाणमुक्तयतीति योजना। दृष्टिमोष इति। दृष्टिं दर्शनं मोषयति खण्डयतीति विग्रह:। तमस: प्रचुरत्वात्। अत्र कर्मण्यम्। कस्मिन् सति जगा-

देत्याह सुचिरमिति। वहुकालम् अनुनयेन परिसान्त्वनेन मृगाक्षीं राधां प्रीणयित्वा प्रीतां कृत्वा कृतवेशे गृहीतनेपथ्ये केशवे कुञ्जशय्यां लतागृहास्तीर्णशायनीयं गतवति सति। राधां किंविधाम्? रचितरुचिरभूषामिति। रचिता कृता रुचिरा भूषा मण्डनं ययेति विग्रहः। पुनः किंविधाम्? निरवसादामिति निर्गतावसादां दृष्टामित्यर्थः। अवसादविपर्ययो हि हर्ष उच्यते। अनुनयेन मानभङ्गादित्यभिप्रायः।।५८।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५८।। एवं प्रियां प्रसाद्य मेघैर्मेदुरमित्युपक्रान्तवचनात् सखीसम्मतिञ्चालक्ष्य कुञ्जशय्यां श्रीकृष्णे गतवति सति सखी श्रीराधामाह, सुचिरमिति। दृष्टिं मुष्णाति तमसावृणोति दृष्टिमोषः तस्मिन् प्रदोषे स्फुरति सति केशवे च कुञ्जशय्यां गतवति सति कापि राधां जगाद। किं कृत्वा? वहुकालं व्याप्य अनुनयेन मृगाक्षीं प्रीणयित्वा। कीदृशीं? रचिता प्रियरुचिकरी भूषा यया ताम्। पुनः कीदृशीं? निरवसादां प्रियाप्राप्तिजन्यात् दुःखात् निर्गतम्। कीदृशे? कृतः प्रियामनोहरो वेशो येन तस्मिन्।।५८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५८।। अथ प्रसादानन्तरचरितमाह सुचिरमिति। सुचिरं बहुसमयमभिव्याप्य अनुनयेन प्रगाढमाना- पनोदननिदानबहुविधशपथपादपतन, पूर्वकप्रियोक्तिसञ्चयेन मृगाक्षीं प्रसादसूचकातिमनोहरविलासेक्षणां प्रियां प्रीणयित्वा, ईर्ष्यारहितप्रणयैकसारां विधाय कृतवेशे, तत्सङ्गमौत्सुक्यव्यंजकपरिमितभूषणादिग्रहणाधिकविद्योतमानसहजसौन्दर्ये केशवे कुञ्जशय्यां, राधासखीनिर्मिताभिनवमञ्जुलवञ्जुल कुञ्जमध्यसङ्केततल्पं गतवति, प्रियासमागमनिश्चयेन प्रयाते सति, निरवसादां निजप्रयत्नमन्तरेण यथाभिलषितफल-लाभोदितहर्षाम्। रचिता सखिभिः निर्मिता रुचिरा श्रीकृष्णरुचिप्रदा भूषा भूषणं यस्यास्तां राधां दृष्टिमोषे, तमोबाहुल्यादृष्टिप्रसरापहारिणि प्रदोषे रजनीमुखे स्फुरति, गमनत्वरोद्-बोधकतया विजृम्भमाणे सति काऽपि प्रगल्भप्रियनर्मसखी जगाद, बभाषे।।५८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५८।। सुचिरमनुनयेनेति; सुचिरं बहुकालपर्यन्तमनुनयेन विनीतवाक्येन प्रीणयित्वा मोदयित्वा तां श्रीराधां मृगाक्षीं मृगनयनां सन्तोषयति। श्रीकृष्णः सुवेशो भूत्वा कुञ्जशय्यायां लतावेश्मनि स्थितायां शय्यायां श्रीराधामपेक्षमाणा चासीत्। रचितरुचिरभूषां सुन्दरभूषणेन सुसज्जिता साऽपि तस्मिन् दृष्टिमोक्षे दृष्टि विवर्जिते अन्धकारे प्रदोषे सायंकाले यदा निरवसादा अवसादशून्या आसीत्तस्मिन् समये सा प्रियनर्मसखी श्रीराधां जगाद सा तस्यै उवाच मालिनीनाम वृतम्।।५८।।

।। विंश: प्रबन्ध: / गीतम् २० ।।

।। वसन्तराग यतितालाभ्यं गीयते ।।

**१-विरचितचाटुवचनरचनं चरणे रचितप्रणिपातम्।**
**संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम्।।**
**मुग्धे मधुमथनमनुगतमनुसर राधिके।। ध्रुवम्।।१ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१ ।। हे मुग्धे ! हे राधिके ! अनुगतं मधुमथनम् अनुसरेति योजना। हरेरनुगतत्वं प्रकटयन्नाह। विरचिता नानाभङ्ग्या प्रतिपादिता चाटुवचनस्य रचना येनेति विग्रह:। पुन: कीदृशम्, मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातं, मञ्जुलवञ्जुलसीमनीति मनोज्ञवेतसपर्य्यन्ते, निकुञ्जे इति यावत्।।१ ।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। तदेव प्रोत्साहमनुवदति, विरचितेति। तत्र पूर्वं ध्रुव:। मुग्ध इति। हे मुग्धेप्रियाभिसरणकालानभिज्ञे राधिके ! बालत्वद्योतनाय कप्रत्यय:। अनुगतमनुकूलं मधुमथनमनुसर। मा विलम्बं विधेहीत्यर्थ:। इति ध्रुव:। अथ पदानि। विरचितेति ध्रुवेणान्वय:। किंभूतं मधुमथनम् ? संप्रति इदानीमेव मनोरमवञ्जुलसीम्नि केलिशयन-मनुप्राप्तम्। वञ्जुलादीनांविभावत्वेन परिणमनात्तद्द्योतनार्थत्वान्निकुञ्जोपादानम्। पुन: किंभूतम्। विरचितचाटुवचनरचनम्। पुन: किंभूतम् ? चरणे रचितप्रणिपातम्।।१ ।।

### (३) जगद्धरकृत- सारदीपिका

।।१ ।। वसन्तराग: उक्तार्थं गीतेनाह विरचितेति हे राधिके ! मुग्धे ! मूढे अनुगतम् अनुकूलं मधुमथनं कृष्णम् अनुसर अनुगच्छ विरचिता उक्ता चाटु प्रिया वचन रचना परंपरा येन तं पुन: कीदृशं चरणे पादे रचित: कृत: प्रणिपात: प्रणामो येन तं तन्मानभङ्गाय पुन: कीदृशं सम्प्रति इदानीं मञ्जुलो मनो हरोऽशोको वेतसो वातस्य सीमनि पर्यन्ते तटे केलिशयनं सुरतार्थं शय्यामनुयातं प्राप्तमित्यर्थ: अतस्त्वया शीघ्रं गन्तव्य-मिति।।१ ।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। तदेव गीतेन कथयति, विरचितेति। गीतस्यास्य वसन्तरागो यतिताल:। गीतार्थस्तु, हे मुग्धे राधे ! मधुमथनंकृष्णमनुसर। कीदृशम् ? अनुगतं त्वामनुसृतम्। अनुगतत्वमेव, विरचितेति। विरचिता विहिता चाटुवचनस्य रचना संदर्भो येन तादृशम्।

पुनः कीदृशम्? तव चरणे रचितः प्रणिपातः प्रणामो येन तादृशम्। तर्हि संप्रति कुत्रास्तीत्यत आह, संप्रतीति। संप्रत्यधुना वञ्जुलो वेतसस्तस्य सीमनि पर्यन्ते यत्केलिशयनं क्रीडाशय्या तामनु लक्षीकृत्य यातं गतम्, त्वां तत्रस्थः प्रतीक्षत इत्यर्थः।।१।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१।। जगादेत्युक्तं तत्प्रकारमेव विशदयति विरचितेत्यादिना। वसन्तरागेण गीयते इत्युक्तं तस्यायमभिप्रायः केल्युपयोगित्वात् कवेः प्रियत्वाद्वा पुनरुपादानमिति। एकतालीतालेन रूपकतालेन वा गेयम् इति तत्र मुग्धे इत्यादिराधिकेत्यन्तं ध्रुवपदम्।

तस्यार्थः, हे मुग्धे! हिताहितानभिज्ञे! तदनभिज्ञत्वं च प्रियम्बवदतात्यङ्गीकरणा-दवगन्तव्यम् एवं विघे हे राधिके! अनुगतमनुकूलं बशम्बदमित्यर्थः। मधुमथनं श्रीकृष्णम्, अत्र मधुमथनशब्देन कृष्णाभिधानं पौरुषाधिक्यप्रकाशनद्वारा सौन्दर्य्येण बसन्तमथनसूचनद्वारा च तस्यार्थवश्यानुसरणीयतासूचनार्थमित्य- वगन्तव्यम्। अनुगतमित्येतदवश्यभजनीयता सूचनार्थमेतद्बोद्धव्यम्। अनुचर भजस्व। अनु सरेति क्वचित्पाठः। तदानुसरानुयाहि अनुभजेति पाठः स्फुटः। कीदृशं कृष्णमित्याशङ्कायामाह। विरचितेत्यादि। विरचिता विशेषेणं निर्मिता चाटुवचनरचना प्रियोक्तिप्रपञ्चा येन तादृशं चरणे पादयुगले रचितः प्रणिपातः दण्डप्रणामे येन, अनेनात्यन्तमान्यता सूचिता। लोकेऽपि ह्येतादृस्यैवातिमान्यता दर्शनात् सम्प्रतीदानीं मञ्जुला रमणीया पादाङ्गुलसीमा वानीरदेशः तस्यां वर्त्तमानं यत् केलिशयनम् विहारशय्या तदनुयातम् अनुगतं भवन्तमित्यर्थ। एतादृशं मधुमथनम् अनुसरेत्त्वन्वयः।।१।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१।। किं जगादेत्याकांक्षायां गीतेनाह। गीतस्यास्य वसन्तरागः, रूपकतालः। रागलक्षणं प्रागुक्तमेव। नायिका चात्राभिसारिकैव, तल्लक्षणमिह नोच्यते पूर्वोक्तत्वादेव। हे राधिके! मुग्धे सुन्दरि अज्ञे वा। 'मुग्धः सुन्दरमूढयोरि'**त्यमर**। अनुगतम् अनुकूलं मधुसूदनं मधुनाम्नो दैत्यस्य सूदनं खण्डनं कृतं येन तं कृष्णम् अनुसर अनुगच्छ। मधुसूदनपदेन वीरताप्रतिपादनेन राधाया अनुरागवीजं प्रदर्शितम्। तदाह-'प्रायो वीररताः स्त्रिय' इति। कीदृशम्? विरचितानि चाटुवचनानि येन तम्। पुनः कीदृशम्? चरणेऽर्थात्तव रचितः प्रणिपातः पतनं येन स तथा तम्। तथा च तावदेव विदग्धाया मानमित्यतः परं मानं मुञ्च। तदाह 'पादपातावधिः प्रोक्तो मानो मुग्धमृगीदृशामि'ति। कुत्रानुसर्त्तव्यमित्याकांक्षायामाह, पुनः कीदृशम्? सम्प्रति इदानीं मञ्जुलस्य मनोहरस्य

वञ्जुलस्य वेतसस्याशोकस्य सोमनि पर्यन्ते तट इति यावत्, केलिशयनं क्रीडार्थशय्यां उपलक्षीकृत्य यातं गतम्। अत्र केलिशयनं लक्षीकृत्य गतं न तु केलिशयनं गतमित्यनेन रचिता शय्या म्लाना स्यादिति त्वां विना नारोहतोत्यभिनिवेशप्रदर्शनम्।।१ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।१ ।। उक्तमर्थं गीतेन प्रपञ्चयति, विरचितेति। [६]वसन्तरागे रूपकताले। ध्रुवाया लक्षणमुक्तमेव [७]। हे मुग्धे सुन्दरि राधिके मधु अधरामृतरसं वसन्तं वा स्वमाधुर्य-सौन्दर्यादि[८] गुणेन मथ्नाति क्षोभयतीति मधुमथन:[९] शृङ्गाररसास्वादनचतुर: तमनुसर अभिगच्छ। [१]नन्वनाकारिता कथं व्रजामीति चेत् तत्राह न हि शृङ्गाररसास्वादनचतुरं श्रयन्त्यास्तव मानभङ्ग किन्तु गौरवमेव। कीदृशम्? त्वद्गुणैस्त्वामेवानुगतमनुसृतम्। तत्र हेतुमाह। कीदृशम्? विरचिता प्राणेश्वरि प्रसीदेत्यादि [२]चाटु प्रियवचनरचना वचनपरम्परा येन तम्। अनुगतत्वमेवाह, चरणे त्वच्चरणे रचित: कृत: प्रणिपात: प्रणामो येन तम्। तवानयनाय [३] मम चरणे कृतनमस्कार इति वा। पुन: कीदृशम्? सम्प्रति इदानीं त्वां प्रति मां सम्प्रेष्य मञ्जुलो मनोहरो वेतस: तस्य सीमनि मर्यादाविधौ निकुञ्जे यत्केलिशयनं [४] क्रीडार्थं शय्या तामनुयातं प्राप्तम्। अतस्त्वया शीघ्रं गन्तव्यमिति [५] मम प्रार्थना।।१ ।।

१.वसन्तरागयतितालाभ्यां गीयते-नि.सा वसन्तरागेण एकतालीतालेन गीयते-इ. २.चरणवि चरणविरचित-इ.३.शृङ्गारालङ्कारे-ड.४.यया ताम्-क.५.सा-ड.६.त: ७.पर्यन्तं नास्ति-इ.६.वसन्तरागरूलपकताल-ध्रुवास्तत्पूर्वमुक्तमेव-ग.वसन्तरागे रूपकताले। वसन्तरागरूपकताल-ध्रुवानां स्वरूपं उक्तमेव-फ.ज.ज.८.गुणै:-ग.९.शृङ्गररसास्वादन: चतुर:-अ.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१ ।। उक्तार्थं गीतेनाह-विरचितेति। हे राधे मुग्धे मूढे अनुगतं [६]अनुकूलं मधुमथनं कृष्णं अनुसर अनुगच्छ। [७]कीदृशम्? सम्प्रति इदानीं मञ्जुलो मनोहरो[८]वञ्जुलोऽशोको वेतसो वा तस्य सीमनि पर्यन्ततटे केलिशयनं [९] सुरतार्थे शय्यां अनुयातं प्राप्तमित्यर्थ:। अतस्त्वया शीघ्रं [१०]गन्तव्यमिति।।१ ।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१ ।। विरचितेति। ध्रुवाया व्याख्यानम्। हे मुग्धे राधिके अनुगतं अनुकूलं मधुमथनं मधुनामदैत्यसंहारकं माधवं अनुसर तं प्रति याहि। कीदृशमित्याकाङ्क्षाया विरचितेत्यादीनि विशेषणानि। विरचिता कृता चाटु वचनानां प्रियवाक्यानां रचना सन्दर्भरूपा त्वमसि मम जीवनमित्यादिरूपा येन तम्। चरणयो: विरचित: प्रणिपात: नमस्कारो येन। विरचितपदस्य पुनरावृत्या कथितपदत्वदोषो नोद्घाटनीय:। संख्याया:

कार्यव्यग्रत्वात्। सम्प्रति अधुना मञ्जुलाः पल्लवितत्वेन रमणीयाः कार्यव्यग्रत्वात्। सम्प्रति अधुना मञ्जुलाः पल्लवितत्वेन रमणीयाः वञ्जुलाः तेषां सीमनि तत्प्रान्तकुञ्ज इत्यर्थः। ''निकुञ्जकुञ्जौ वा क्लीबे लतादिपिहितोदरे'' **इत्यमरः** (२.४.८)। सीमशब्दे कुञ्जभ्रान्तिर्न कार्या। केलिशयनं क्रीडाशय्यम् अनुयातं अनुप्राप्तम्।।१।।

१.नन्वाकारिता-ग.२.बहु-इ.३.त्वच्चरणे कृतदण्डवत् इति वा-इ.मच्चरणे कृतदण्डवत् इति वा-फ.ग.ह.ज.४.नास्ति-इ.५.नास्ति-ग.६.नास्ति-क.७.कीदृशं मधुमथनम्-क.८.अशोको-ड.९.सुरतार्थं-क.ल.म.१०.गन्तव्यमित्यर्थः-क.ल.

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१।। किं जगादेत्याह। विरचितेति। हे मुग्धे! मूढे हे! राधिके! अनुगतं मधुमथनं कृष्णं प्रति अनुसर अनुगच्छ, अनुकूलिनी भवेदित्यनेन एवंविधपौरुषोऽपि स भगवान् भवती मनुगतमित्यभिप्रेतम्। कृष्णस्यानुगतत्वं प्रकटयन्नाह विरचितेत्यादि। विरचिता नानाभङ्ग्या प्रतिपादिता चाटुवचनस्य रचना घटना येनेति विग्रहः। तथा चरणे रचितप्रणिपातं, त्वदीयपादतले कृष्णप्रणिपातं प्रकर्षेण नीचै पतनंः प्रणिपातः। पुनः किंविधम्? सम्प्रतीति। मञ्जुलस्य मनोज्ञस्य वञ्जुलस्य वेतसस्याशोकस्य वा सीमनि पर्यन्ते केलिशयनं क्रीडार्थं शयनम् अनुयातं प्रपन्नम्। यद्वा केलिशयनमनुलक्ष्मीकृत्य मञ्जुलवञ्जुलसीमनि यातम्। ''वञ्जुलो वेतसेऽशोके'' इति विश्वः। मनोज्ञं मञ्जु मञ्जुलम्'', मुग्धः ''सुन्दर मूढयोः'' **इत्यमरः**।।१।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१।। किं जगाद तदाह विरचितेत्यादिना। अस्यापि वसन्तरागयतितालौ। हे मुग्धे! संप्रति अनुगतं मधुमथनमनुगच्छ। अनुगतानुगमनशैथिल्यान्मुग्ध इति सम्बोधनम्। अनुगतिमाह विरचिता भङ्ग्या प्रतिपादिता चाटुवचनानां रचना येन तम्। चाटुवचन मात्रेण कथं ज्ञेयानुगतिः? चरणे रचितः प्रणिपातः प्रणतः येन तं तत्समीपस्थितायां मयि कथं प्रार्थ्यते? संप्रति तव प्रसादमालक्ष्य मनोहरवंजुलकुंजस्य सीमनि मध्यभागे यत् केलिशयनं तत्र गतम्।।१।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१।। यज्जागाद तदेव स्पष्टयति, विरचितेत्यादिना गीतेन। वसन्तरागेण गीयते इति। प्रस्तुतरसोद्दीपकत्वाभिप्रायेण उक्तम्, कथमुपयामि तदन्तिकम्। न खलु स्वयमुपगमने मामधीरामेता मन्येरन्, इति विलम्बमानां तां कृष्णचरितमनुवदन्ती सखी प्राह, विरचितेति। हे मुग्धे! समयोचितकार्यानभिज्ञे! राधिके! अनुगतं त्वदेकप्रवणं

मधुमथनं श्रीकृष्णम्, अनेन स्वाभीष्टकेलिपर्याप्तिप्रवीणतासूचनेन प्रोत्साहनं ध्वनितम्, अनुसर। अनुसरन्ती तदभीष्टं साधयेत्यर्थ:। कथमनुगतमत आह, विशेषेण रचिता त्वत् कोपापसरणाक्षमतया निर्मिता चाटुवचनरचना, विविधदैन्यव्यञ्जकप्रियोक्तिक्रमो येन तम्। किं च चरणे मानसमयोपवेशेन सञ्जातकिञ्चित् पुर:प्रसारणे त्वद्वामचरणे रचितो यावत्त्वत् प्रसाददृष्टिपातं विहित: प्रणिपातो निजानन्यगतिकत्वव्यञ्जकप्रणामो येन तम्। त्वत्प्रसादानन्तरं सम्प्रति मञ्जुलवञ्जुलसीमनि, मनोहरवेतसीतरुतलप्रदेशे केलिशयनं, क्रीडार्थं रचिततल्पमुपयातं त्वदपेक्षया तत्समीप एवांवस्थितं, त्वद्विना तदवस्थाने सुखानुपपत्तेरिति भाव: ।अतस्तं त्वरितमनुसरेत्यर्थ:।।१ ।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणा

।।१ ।। हे मुग्धे! प्रियाभिशरणकालानभिज्ञे! राधिके! बालत्वात् कन् प्रत्यय: तेन मुग्धानायिकात्व प्रतिपादयत्यपि अनुगतमनुकूलम्। मधुमथनमनुसर मधुराक्षसहन्तुरमनु-गमनं कुरु। इति ध्रुवम्। अथ पदानि। विरचितं चाटुवचनं प्रणिपातश्च येन तदनुगुणं रचनं परिप्रकटनं भवति। पुन: चरणे पदयुगले प्रणिपातस्य रचनं प्रणामं व्यक्तीकरोति। अर्थात् पादयो: वन्दनमपि करोति। संप्रति इदानीं मञ्जुले शोभने वञ्जुले वेतसकुञ्जे सीमनि पर्यन्ते क्रीडाशय्यां विरचय्य तत्र तवानुगतो नायकोऽस्ति, तत्पर्यन्तमनुसर शीघ्रम्।।१ ।।

**२-घनजघनस्तनभारभरे दरमन्थरचरणविहारम्।**
**मुखरितमणिमञ्जीरमुपैहि विधेहि मरालविकारम्।। मुग्धे० ।।२ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२ ।। हे राधे! घनजघनस्तनभारभरे! दरमन्थरचरणं विहारं यथा स्यादेवमुपैहीति योजना। घनजघनस्य स्तनभारस्य चातिभरो यस्यास्तस्या इति बिग्रह:। तथा, दरमन्थरयो: चरणयोर्विहारो यत्रेति विग्रह:। मुखरितमणिमञ्जीरमित्यपि क्रियाविशेषणम्। मुखरितौ मणिमञ्जीरौ यत्रेति विग्रह:, विधेहि मरालविकारं, मरालो हंस: पादकटकस्तस्य विकारो ध्वनिस्तं बिधेहि कुर्वित्यर्थ:। धातूनामनेकार्थत्वात् विपूर्व करोति पदार्थ:। मरालशब्दो हंसपर्य्याय:। मरालिचरणेन नूपुरकारित्वादित्यभिप्राय:। तदुक्तं **श्रीनिवासेन**

इह हि सरसि सायं चारुपत्रं विधुन्वन्
दरतरलिततिर्य्यक् चञ्चुकण्डुयिताङ्ग:।

अनुसरति सरागः प्रेयसीमुत्प्रयाती-
मनुपदसमुदञ्चत्कण्ठनादो मरालः।।२।।

मरालो हंसपक्षिणीति **विश्वः**।।२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। अपि च, घनेति। हे घनजघनस्तनभारभरे! जघने च स्तनौ च जघनस्तनम्, घनं च तज्जघनस्तनं च, तस्य देशे भरोऽतिशयो यस्यास्तस्याः संबुद्धिः। मुखरितमणि-मञ्जीरं नूपुरं यथा स्यात्तथा उपैहि आगच्छ। तेन चागमनेन मरालानां हंसानां निकारं जयं विधेहि। कथं विधेहीति चेत् दरमन्थरेति। ईषन्मन्थरचरणविन्यासं यथा स्यात्तथा।।२।।

## (३) जगद्धरकृत- सारदीपिका

।।२।। तां प्रोत्साहयन्ती त्वरयति घनेति घनयोर्मांसलयोर्जघन स्तनयोर्भारस्य भरोभाराधिक्यं यस्यास्तत्सम्बोघने दरमन्थर ईषन्मन्दश्चरेण विहारः पादक्रमो यस्यां क्रियायां मुखरितः शब्दितः मणिमञ्जीरो मणिसहित मञ्जीरो यस्यां क्रियायां तं कृष्णमुपैहि उपगच्छ अतएव मरालानां राजहंसानां विकारं विलासं विधेहि कुरु।।२।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२।। तां प्रोत्साहयन्ती सखी प्राह घनेति। हे राधे! उपैहि कृष्णमुपगच्छ। कथं यथा स्यात्? मुखरितः सशब्दः कृतो मणिमञ्जीरो मणिखचितो मञ्जीरो नूपुरो यत्र गमने एवं यथा स्यात्। पुनः कथं यथा स्यात्? दरेण साध्वसेन मन्थरश्चरणविहारः पदविन्यासो यत्रैवं यथा स्यात्। तत्र हेत्वन्तरगर्भविशेषणमाह, घनेति। घनयोर्निबिडयोर्जघनस्तनयो-र्भारस्य भरोऽतिशयो यस्यास्तादृशी। मरालानां हंसानां स्वकीयमन्थरगमनेन मञ्जीरादिशब्देन च निकारं तिरस्कारं विधेहि कुरु। संप्रति मरालेषु शब्दायमानेषु सत्सु मञ्जीरादिध्वनिरपि मरालशब्दत्वेनैव लोके ग्राह्य इति संप्रति योग्योऽभिसारक्षण इति ध्वनिः। अथ संप्रति हंसस्य शब्दो यात्रायां शुभं सूचयतीति गमनं प्रति विलम्बो न कार्य इत्यपि ध्वनितम्। तदुक्तं **वसन्तराजीये**, 'कृष्णासु सर्वास्वपि दर्शनेन हंसस्य शब्देन च सर्वसिद्धिः।' इति। 'मरालो राजहंसे स्यान्मरालो हंसमात्रके' इति **धरणिः**। 'निकारः स्यात्परिभवे धान्यस्योत्क्षेपणेऽपि च' इति **विश्वः**।।२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२।। घनेति, हे मुग्धे! जघने स्तनौ च जघनस्तनं प्राण्यङ्गत्वादेकवद्भावः। घनं पृथुलं यद् जघनस्तनं तत् एव भारो गुरुद्रव्यं तस्य भरे भरणे सति, अथवा, भारः भरः जघनादीनां भारातिशयः "अप्यथातिशयो भरः" **इत्यमरः**। अत्यन्तभार इत्यर्थः।

तस्मित् सतीति वा राधायाः सम्बोधनं वा घनग्रहणं च विहारस्य मान्द्यातातघटनार्थमित्यव-गन्तव्यम्। अतएव, दरमीषन्मन्थरः मन्दीभूतः चरणबिहारः पादन्यासो यस्मिन् कर्मणि तद्यथा भवति तथा अत एव मुखरितं नादितं मणिमञ्जीरं रत्नखचितनूपुरं यस्मिन् कर्मणि तद् यथा भवति तथा मधुमथनमुषेहि प्राप्नुहि। अथच, मरालस्य राजहं सस्य विहार इव विहारे गतिविशेषस्तं बिधेहि, आचरणविहारमिति विशेष्यं द्वितीयान्तं श्लिष्टं तद्विशेषणं निकारमिति पाठे निकारं तिरस्कारं विधेहि कुरु गमनेन मरालं निराकुर्वित्यर्थः।।२।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२।। अनुसरणप्रकारमुपदर्शयति, हे घनजघनस्तनभारभरे राधे! घनयोर्निविडयोः जघनयोः स्तनयोश्च भारेणातिशयेन भरो यस्यास्तादृशि। दरमन्थर ईषन्मन्थरश्चरणविहारो यथा स्यादेवम्। तदा, 'ईषदर्थे दराव्ययमिति। मुखरितो ध्वनितो मणियुतो मञ्जीरो नूपुरं यत्र एवं यथा स्यात्तथा उपैहि उपगच्छ अर्थात् कृष्णम्। अत एव मरालविकारं राज हंसतिरस्कारं विधेहि। तव मन्थरगमनेन राजहंसस्य तिरस्कारः स्यादिति भावः। धातूनामनेकार्थत्वात् विपूर्वस्य करोतेस्तिरस्कारार्थता। 'मरालो राजहंसे स्यात् मरालोहं समात्रक' इति **धरणिः**।।२।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२।। (घनेति।) [२]घने निबिडे जघनस्तने[(३)]कटिस्तनप्रदेशे यो भारभरो भाराधिक्यं यस्यास्तत्सम्बोधनम्। श्रीकृष्णार्पणं विना जघनस्तनं केवलं भारमात्रमिति ध्वनिः। अतः [४] मुखरितं कृतरणत्कारं[५]मणिरचितं मञ्जीरं नूपुरं यथा स्यात्तथा उपैहि समीपं गच्छ। किञ्च [६] दर ईषत् मन्थरं [७] मन्दगतिः चरणविहारः पादन्यासो यथा स्यात्तथा मरालानां राजहंसानां विकारं विलासं विधेहि कुरु। एवं राजहंसगत्या प्रियं रञ्जयेत्यर्थः। [८]अथ वा क्रीदृशं मधुमथनम्? दरं त्वत्कोपेन मन्थरा मन्दा चरणयोर्विहारो गतिर्यस्य तम् [९]। अथ वा कीदृशम्? मुखरिता कृतरणत्कारा मणिमयी मञ्जीरा मेखला यस्य तम्। पुनः कीदृशम्? मरालस्य कामस्य विकारो पीडा यस्य तम्। कामस्य नामान्तरं मराल इति। मम मनोरञ्जनाय न तु सर्वेषाम्।।२।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२।। घनेति। हे घनजघनस्तनभारभरे घनयोर्मांसलयोर्जघनस्तनयोर्भारभरो भाराधिक्यं [१०] यस्यास्तत्सम्बुद्धिः। त्वं दरमन्थरः ईषन्मन्थरः चरणविहारः पादक्रमो यस्यां क्रियायाम्; मुखरितः शब्दितः मणिमञ्जीरो [११] मणिसहितनूपुरो यस्यां क्रियायां तद्यथा उपैहि [१२] उपगच्छ। अत एव मरालविकारं राजहंसविलासं विधेहि कुरु।।२।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२।। घनेति। घन: सान्द्र: जघनश्च स्तनौ च जघनस्तनं; प्राण्यङ्गत्वादेकवद्भावो नपुंसकत्वं (च)। तस्य भार: गरुत्वं तेन भरा पूर्णा तत्सम्बुद्धि:। अत एव दर ईषत् मन्थर: मन्द: चरणयोर्विहार: सञ्चार: तम्। गमनमिति यावत्। मुखरिता: मणिमञ्जीरा: पादकटकविशेषा: यस्मिन् तम्। उपैहि प्राप्नुहि। आगच्छेत्यर्थ:। त्वमिति शेष:। मरालस्य हंसस्य विकारं गत्यनुकरणं न तस्य विकारं परिहासरूपं विधेहि। हंसगमनाधिकगति-विलासव (ती) त्यर्थ:। अत्र गमनार्थं चरणविहाररूपकथनादग्राम्यत्वं, उदाराख्यगुणश्च। शब्द: अर्थश्च हंसानुकृतौ।।२।।

१.निकारम्-नि.सा. २.किञ्च घने-फ.ज. ३.कठिनस्तन-अ.ब. ४.श्रीमुखरितं रणत्कारं-अ.ब.श्रीकृष्ण-मुखरितं कृतरणत्कारं-इ.फ.ग.ह.ज. ५.मणिखचितं-इ.फ.ग.ह.ज. ६.दरं-फ.ज. ७.मन्दगतिचरणविहारं-ग.मन्दगतिं चरणविहारं-इ.फ.ह.ज.८.त:९.पर्यन्तं नास्ति-अ.ब.८.यद्वा-ग.१०.यस्या: सा तत्सम्बोधनम्-क.११.मणिसहितो नूपुरो-क.ल.म.१२.तमुपागच्छ-क.ल.म.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।। घनेत्यादि। घनं निबिडं च तत् जघनस्तनं चेति तदेव भारभरो भरातिशयो यस्या: तस्या: सम्बोधने हे घनजघनस्तनभारभरे। दरमन्थरचरणविहारंमुखरितमणिमञ्जीरं यथा स्यादेवमुपेहि उपगच्छेति योजना। दरमन्थरो मनाङ्न्यस्तश्चरणविहारो यस्मिन्नुपगमे इति विग्रह:। तथा मुखरितौ शब्दितौ मणिमञ्जीरौ मणिखचितनूपुरौ यत्रेति विग्रह:। अत एव विधेहि मरालनिकारमिति हंसस्य पराभवं कुर्वित्यर्थ:। निकारोऽन्यक्कार:। तद्गतेर्मरालगतिनिन्दकत्वात्। नूपुरध्वनेस्तदध्वनिनिन्दकत्वाच्चेत्यभिप्राय:। ''मरालो हंसपक्षिणी'' इति **विश्व:**।।२।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२।। एतन्निशम्य मौनेन सम्वतिमूहमाना शीघ्रं गमनप्रकारमाहघनेत्यादिना। जघने च स्तनौ च जघनस्तनं घनं सङ्गतं यज्जघनस्तनं तस्य भारस्य भरोऽतिशयो यस्या: हे तादृशि ! अत एव दरमन्थरचरणविहारं यथा स्यात्तथा प्रियसमीपं गछ, तथा मुखरितौ मणिमञ्जीरौ यत्र तच्च यथा स्यात्तथा तेन हंसपरिभवं कुरु। नूपुरध्वने: हंसपरिभावित्वात् इत्यर्थ:। मरालो हंसपक्षिणि निकार: स्यात् परिभवे इति **विश्व:**।।२।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२।। पुन: शीघ्रगमनाय प्रोत्साहयन्त्याह, घनेति। हे घनजघनस्तनभारभरे ! पृथुलश्रोणीकुचमण्डलभारातिशयविवशीकृतसहजालसगमने ! इत्यर्थ:। अत एव दरमन्थरचरणविहार मीषन्मन्दीभूतचरणविन्यासविलासं मुखरितमणिमञ्जीरं तादृशगमन-

वाचालीकृतरत्ननूपुरं च यथा स्यात्तथा उपैहि, प्रियसमीपं याहि। तथाभिसरन्ती मरालस्य हंसस्य निकारं परिभवं विधेहि। त्वद्विरहदशायां कृतत्वदुद्वेगं मरालं न्यक्कुर्वन्ती वैरनिर्य्यातनेन सन्तोषयेति भाव:। 'निकार: स्यात् परिभव' इति धरणि:।।२ ।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

२ - घनजघनेति; हे राधिके! घनं पृथुलं जघनं कट्या: पुरोभाग: जंघस्योपरिभाग: जघन: तं तथा पीनं पृथुलं स्तनभारं उभयो: स्तनजघनयो: पृथुलत्वात् भारायमानयो: गति: मन्थरायते। अर्थात् दरमन्थरचरणविहारम् इषदधीरपदपातगत्या उपैति। हि चल। मणिमञ्जरी गमनसमये मुखरितं करोति मणिखचितालंकारविशेषं नूपुरं शब्दायमानेन हंसस्य स्वनं न्यक्करोति। तेन कलहंसस्वनं मङ्गलाय भवतीतिध्वनि:।।२ ।।

**३-शृणु रमणीयतरं तरुणीजनमोहनमधुपविरावम्।**
**कुसुमशरासनशासनबन्दिनि पिकनिकरे भज भावम्।। मुग्धे ० ।।३ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।३ ।। तरुणीजनमोहनमधुरिपुरावं शृण्वितीतियोजना। किं भूतं रमणीयतरं, पिकनिकरे भजभावं कुर्वित्यर्थ:। विरहे यद्यसौ यन्मन: वैपरीत्यं तदपयात्विति यावत्। कीदृशे कुसुमशरासनशासनवन्दिनि कामाज्ञास्तावकेत्यर्थ:। भो युवत्य: कान्तसन्नाहमन्तरेण मद्बाणादन्योऽविषाद: तन्मानं विजहतेति कामाज्ञा।।३ ।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।३ ।। अपि च, श्रृण्विति। हे मुग्धे! रमणीयतरं तरुणीजनमोहनं मधुपानां विरुतं श्रृणु। अपि च, कामाज्ञास्तुतिपाठके पिकसमूहे भावमभिप्रायं भज। किमुक्तं भवति? 'मधुप' शब्देन कृष्ण उपलक्ष्यते वर्णत: साम्येन त्वदोष्ठमधुपानेन च। अथ मधोर्दैत्यस्य पातनाच्छोषणान्मधुप: कृष्ण:। तरुणीजनमोहनश्चासौ मधुपश्च तस्य भवत्सङ्गमे विशिष्टान्सीत्कृतादिशब्दाञ्शृणु। अनु च त्वमपि तदा स्वात्मगतं रोषं त्यक्त्वा कोकिलस्वरा तमानन्दयेत्यर्थ:। कुसुमशरासनशासनबन्दिनीति तेषां विभावत्वमुक्तम्।।३ ।।

**(३) जगद्धरकृत- सारदीपिका**

।।३ ।। अन्यमप्युद्दीपन विभावं वर्णयति शृण्विति त्वं रमणीयतरम् अतिमनोहरं श्राव्यं तरुणी जनानां मोहनं मधुरिपो: कृष्णस्य रावं वंशीशब्दं शृण्वाकर्णय मधुप विरापमिति पाठे भ्रमरशब्दं किं च पिकनिकरे कोकिलसमूहे कुसुमान्येवसरासनं

धनुर्यस्य तादृशः कामस्तदाज्ञात यावन्तिनि स्तावके सति भाव कृष्णेऽनुरागं भज आश्रय हे मानिन्यमानं त्यक्त्वा यूयं भजनं कुरुतेति कोकिला घोषयन्तीत्यर्थः।।३।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।३।। शृण्विति। तरुणीजनानां मोह तनकं मधुरिपोः कृष्णस्य रावं शब्दं शृणु। कीदृशम्? रमणीयतरमतिशयेन रमणीयम्। पिकनिकरे कोकिलसमूहे कुसुमशरासन-बन्दिनि सति। कुसुमान्येव शरासनं धनुर्यस्य तादृशः कामस्तच्छासनस्य तदाज्ञाया बन्दिनि स्तावके सति। यद्वा, कुसुमशरासनं वन्दितुं नमस्कर्तुं शीलमस्य तादृशे कामाज्ञाकारिणि सतीत्यर्थः। भावं कृष्णेनुरागं भजाश्रय। अत्र पिकनिकरझंकारेण कृष्णमधुरालापस्य परैरलक्ष्यतया तदीयनिःशङ्कभाषितान्यपि त्वं तत्रागता सती श्रोष्यसीति ध्यनितम्। अथ च पिकस्य मधुरस्वरो यात्रायां शकुन इत्यपि ध्यनितम्। 'बन्दिनः स्तुतिपाठकाः' **इत्यमरः**।।३।।

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३।।अनेन हेतुनाऽवश्यमङ्गीकरणीयं मद्वचनमित्याह। शृण्विति। कामिनीजनस्य मोहनः परवश्यः जनको यो मधुपविरावः भ्रमरझङ्कारः तं शृणु आकर्ण्णय अन्यथा तव श्रवणसद्भाव एव वृथा स्यादितिभावः। किञ्च हे मुग्धे! कुसुमशरासनस्य मदनमहाराजस्य शासनमाज्ञां तस्य वन्दिनि वैतालिके मदनमहाराजस्याज्ञा नोल्लंघनीयेति युवतिरतिविकारं प्रत्युद्घोषक इत्यर्थः। एवंबिधे पिकनिकरे कोकिलनिकुरुम्बे अधिकरणे भावमन्तःकरणं भज। कूजति पिकनिकरेऽन्तःकरणं निधेहीत्यर्थः अथवा पिकनिकरे कुसुमशरासनवन्दिनि सति भावं भज। सम्भोगशृङ्गारस्थायीभावरतिभावं कुर्वित्यर्थ। अन्यथा महानपराधः कुसुमशरपीडा स्यादिति भावः। एतत्सूचनार्थमेव कुसुमशरासने-त्युक्तमिति ज्ञेयम्।।३।।

अतश्च विरहिजनकर्ण्णशूलायमानमधुपकोकिलालापे श्रूयमाने सति वल्लभं मधु मथनमबश्यमनुसरेति भावः।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।३।। पुनरभ्यर्थयति। तरुणीजनस्य मोहकं मधुरिपोः कृष्णस्य रावं शब्दं श्रुणु आकर्णय। कीदृशम्? रमणीयतरम् अतिमनोहरम्। पिकनिकरे कोकिलसमूहे भावं स्नेहं भज संश्रय। तथा च इदानीमपि विवहारस्तु स्वाभाव्यं परिहरेत्यर्थः। ननु तथापि सन्तापके पिकनिकरे कथं स्नेहवती स्यामित्याशङ्क्याह, कथम्भूते? कुसुमशरासन-शासनवन्दिनि पुष्पधनुषः शासनमाज्ञां वन्दितुं शोलं यस्य तस्मिन्। तथा च

प्रियवियुक्तजनं सन्तापयेति कामाज्ञया तेन तथा विहितमत: परन्तु तव सुखादय एव भविष्यन्तीति भाव: ।।३ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।३ ।। [३] एवं तदनुगतत्वं प्रपञ्च्य तदुद्दीपन [४] विभावमाहश्रृण्वित्यादिना। तरुणी-जनमोहनस्य मधुरिपोस्तव विरहेण [५] मधु अन्यनायिकाधरामृतं मधुर्वसन्तो वा रिपुर्यस्य तस्य कृष्णस्य रावं मुरलीरणत्कारं तत्र गत्वा श्रृणु। कीदृशम्? रमणीयतरं अतिशयेन मनोहरं [६]भज। [७]किञ्च पिकनिकरे कोकिलसमूहे भावं[८]श्रीकृष्णसम्भोगानुरागं [९]व्रज; श्रीकृष्णे अभिप्रायं विधेहि इति भाव:। कीदृशे? कुसुमशरासनस्य कामस्य शासनमाज्ञा तस्या बन्दिनि[१९७] स्तावके। एतेन पिकगणा: [१०] कामाज्ञया [११] मृदुवचनैस्तव ध्यानं [१२] कुर्वन्ति। [१३]मानं हित्वा श्रीकृष्णभजनं कर्तव्यमिति च घोषयन्तीति च घोषयन्तीति भाव: [१४] ।।३ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।३ ।।श्रृण्विति। त्वं रमणीयतरं अतिमनोहरं[१५]सुश्राव्यं तरुणीजनमोहनं मधुरिपो: [१६] कृष्णस्य रावं [१७] वंशशब्दं तत्र गत्वा श्रृणु। [१८]मधुपविरावमिति वा पाठ:[१९]। किञ्च [२०] पिकनिकरे [२१] कोकिलसमूहे कुसुमशरासन: कामस्तदाज्ञाबन्दिनि स्तावके सति [२२] कृष्णे भावं अनुरागं भज आश्रय। हे मानिन्य:! मानं त्यक्त्वा यूनां भजनं कर्तव्यम् इति कोकिला घोषयन्तीत्यर्थ: ।।३ ।।

१.मधुपविरावम्-नि.सा. २.मन्त्रिणि-इ. ३.एतदनुगतत्वं-इ.फ.ह.ज.एतदनुरागतत्वं-ग. ४.विभावनामाह-अ.विभावानाह-इ.फ.ग.ह.ज. ५.मन्युना-अ.ब. ६.नास्ति-इ.फ.ग.ह.ज. ७.त: १४.पर्यन्तं नास्ति-अ.ब. ८.श्रीकृष्णभोगानुरागं-ग. ९.भज-इ.फ.ग.ह.ज. १०.कामात्ततया-इ. ११.मृदुवचनैस्तवाध्यानं-इ.मृदुवचनैस्तवाह्वानं-फ.ग.ह.ज. १२.कुर्वन्तीत्युत्प्रेक्षते इति-फ.ग. १३.त:१४.पर्यन्तं नास्ति-फ.ज. १५.श्राव्यं-क.ल.म. १६.नास्ति-ड. १७.शब्दं-ड. १८.मधुपविरावमिति पाठे भ्रमरशब्द:-क. १९.भ्रमरशब्द:-म.घनशब्द:-ल. १०.पिकसमूहे-ड. १२.नास्ति-ड. २२.भावं कृष्णे अनुरागम्-क.ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।३ ।। शृण्विति। रमणीयतरं अतिशयाकर्णनीयं तरुणीजनस्य युवतीगणस्य मोहन: चित्ताकर्षक: स चासौ मधुरिपो: केशवस्य राव: ध्वनि: कण्ठज: वेणुजो वा तं शृणु। तदाकर्णनेन अन्यास्तं यास्यन्तीति बिभीषिका। कुसुममेव शरासनं धनु: तस्य पुष्पधन्वन: शासनं आज्ञा तस्य मन्त्रिणि आज्ञाधोषणाधिकारिणि पिकनिकरे कोकिलसमुदाये भावं आदरं भज। प्रियनिकटे गन्तव्यमिति मदनाज्ञारूप कोकिलनादानादरे विरहतापरूपशासनं स्यादिति भाव: ।।३ ।।

### (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३ ।। शृण्विति। हे सखि! तरुणीजनस्य मोहनं मधुरिपोः कृष्णस्य रावं, शब्दम् अज्ञानमिति यावत्। शृण्विति योजना। किंविधम्? रमणीयतरम् अतिरम्यम् अन्यच्च पिकनिकरे भज भावमिति। कोकिलनिचये भावं स्वभावं भज सद्भावं कुर्वित्यर्थः। विरहे यन्मनसो वैपरीत्यं तदुपयात्विति यावत्। कीदृशे? कुसुमेति। कुसुमशरासबन्दिनि कामाज्ञास्तावके इत्यर्थः। भो युवत्यः। कान्तसन्नाहमन्तरेण मद्बाणादन्योऽविता नास्ति तन्मानं विजहतेति कामाज्ञा। यद्वा पिकनिकरे कुसुमशरासनशासनबन्दिनि सति। अर्थान्मन्मथनिदेशं प्रतिपादयति सति भावं लीलां भज।।३ ।।

### (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।३ ।। तत्र गत्वा किं करोमि? मधुरिपो रावं शृणु। कीदृशम्? अतिरमणीयम् अत एव तरुणीजनानां मोहनजनकम्। ततः कोलिकसमूहे कृतं द्वेषं त्यक्त्वा भावं प्रीतिं कुरु। कुसुमशरासनवन्दिनि हे युवत्यः! कान्तसन्नाहमन्तरेण मद्वाणादन्यो रक्षिता नास्त्यतो मानं त्यजत, इति कामाज्ञा तस्याः स्तावके।।३ ।।

### (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।३ ।। पुनरतिशयेन प्रोत्साहयति, शृणु इति। हे मुग्धे तरुणीजनस्य दुर्वाराभिमानशालि-युवतिजनस्य मोहनं मोहकं मधुपस्य विरावं विशेषेण रावं मङ्गलशंखस्वनमिवेत्यर्थः। शृणु, समाकर्णय। कीदृशम्, रमणीयतरम्, अतिशयेन श्रवणसुखसम्पदकं तथा पिकनिकरे कोकिलसमूहे भावं भज। पूर्वकृतदोषमपहाय प्रीतिं कुरु । एतच्च हेतूपन्यासेन द्रढयति, कीदृशे कुसुमशरासनस्य महाप्रतापिमन्मथराजस्य शासनवन्दिनि। हे युवतिजनाः! कान्तसन्नाहमन्तरेण मद्बाणानां वारकः कोऽपि नास्ति। अतोऽतिशीघ्रं सावधाना भवत, इत्याज्ञासमुद्घोषके इत्यर्थः। अतस्तस्याज्ञालङ्घनमकृत्वा शीघ्रमभिसरेति भावः। काव्यलिङ्गानुप्राणितोपमा।।३ ।।

### (१३) प्रफुल्लमिश्रकृत-स्वर्णलता टिप्पणी

।।३ ।। शृणु इति; हे श्रीराधे श्रीकृष्णस्य तरुणि! मधुरिपोः रावं शृणु। अथवा मधुपविरावं भ्रमराणां गुंजनं शृणु। यत् खलु रमणीयतरं शोभनीयतरं भवति। येन तरुण्यः मुग्धाः भवन्ति। कुशुमशरासनः कन्दर्पस्यशासनादेशं प्राप्य पिकादयः वन्दिन्यः भवन्ति। अतः तेषामुपरि कोपं त्यज। शीघ्रं श्रीकृष्णसमीपमपेहि।।३ ।।

**४-अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्बम्।**
**प्रेरणमिव करभोरु करोति गतिं प्रतिमुञ्च विलम्बम्।। मुग्धे० ।।४।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। हे करभोरु! लतानिकुरम्बमनिलतरलकिशलयनिकरेण करेण तव प्रेरणमिव करोति, तस्माद्गतिं प्रतिविलम्बं मुञ्चेति योजना। अनिलतरलकिशलयनिकरेण करेण इत्यसमस्तरूपकं लतानिकुरम्बमिति व्रततिचय इत्यर्थ:। ''स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बकमि**त्यमर:**''। उरुत्तरपदादौपम्ये इति उङ् प्रत्यय:। पूर्वानुवृत्ता पूर्वत-यारामरहितेन च उरो: करभोपमानता, ''मणिबन्धादाकनिष्टं करस्य करभो बहिरि**त्यमर:**''।।४।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, अनिलेति। हे करभोरु! करभवदूरू यस्या: सा। 'मणिबन्धादाकनिष्ठं करस्य करभो बहि:।' लतानिकुरम्बं लतासमूह:। अनिलतरलकिसलयनिकरेणेव करेण। गतिं प्रति प्रेरणमिव करोति। अतो विलम्बं मुञ्च। यत्र अचेतना अपि चेतनवत्प्रतिबोधयन्ति तत्रेष्टसिद्धिरवश्यंभाविनी। अत्र करसान्निध्यात् 'लता'शब्देन सख्य: त्वां त्वरयन्तीति द्योत्यते।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। अनिलेति हे करभोरु! निष्टान्तो मणिबन्धपर्यन्तं करस्य वहिर्भागस्तद्वदुरुर्जङ्घाद्वयं यस्या स्तत्सम्बोधनं गतिं गमनं प्रति विलम्ब मुञ्च शीघ्रं गच्छेति यावत् यत: लतानिकुञ्जं बलतासमूहम् अनिलेन तरलश्चञ्चलो य: किशलयनिकर: पल्लवसमूहस्तद्रुपेण करेण हस्तेन तव प्रेरणमिव करोति अचेतनालता अपि त्वां प्रेरयति किं पुनरहम्।।४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। अनिलेति। हे करभोरु! करभ: कनिष्ठान्तो मणिबन्धपर्यन्त: करस्य बहिर्भागस्तद्वन्नितोन्न तौ ऊरु यस्यास्तादृशि। गतिं गमनं प्रति विलम्बं कालक्षेपं मुञ्च। अनिलतरलकिसलयनिकरेण करेण अनिलेन वायुना तरलश्चञ्चलो य: किसलयनिकरो नवपल्लवसमूहस्तत्स्वरूपेण करेण लतानिकुरम्बं लतासमूहस्तव प्रेरणमिव करेति। किसलयकम्पच्छलेनासमञ्जसमसहमानो लतासमूहोऽपि त्वां प्रेरयतीति भाव:। अथवाऽग्रे पल्लवितबृक्षादिदर्शनं यात्रायां फलसिद्धिसूचकम्। अतो गमनं प्रति विलम्बो न कार्य इति ध्वनितम्। तदुक्तं शकुनशास्त्रे 'वामे मधुरवाक्पक्षी वृक्ष: पल्लवितोऽग्रत:।

अनुकूलो वहन्वायुः प्रयाणे शुभसूचकः' इति। 'समूहो निकुरम्बं कदम्बकम्' **इत्यमरः**। 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इति च।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। अनिलेति। करभो नाम मणिबन्धकनिष्ठयोर्मध्यवर्त्तिदेशविशेषः। ''मणिबन्धादाकनिष्ठं करस्य करभो वहिरित्यमरः''। स इव उरुर्यस्या सा तथोक्ता तस्याः सम्वुद्धौ हे करभोरु! उरुत्तरपदादौपम्य इति उङ् अम्बार्थो नद्योर्हस्व इति ह्रस्वः। एतादृशे हे मुग्धे! राधे! लतानिकुरम्बं वल्लिकदम्बकं कर्त्तृ अनिलेन पवमानेन तरलानि चञ्चलानि किशलयानि तेषां निकरः समूहः तद्रूपेण करेण व्यस्तरूपकमेतत्, गतिं कृष्णवासगमनं प्रतिप्रेरणम् औन्मुख्यं करोति वा। अतश्च विलम्बं कृष्णाभिसरणे आलस्यं मुञ्च त्यज। अचेतनादिभिरपि भवत्कर्त्तृककृष्णानुसरणमनुमोदितं किल। अचेतनावत्यानुमोदितव्यमिति किमु वक्तव्यम्। तथा च बिलम्बं विहाय कृष्णाभिसरणं कर्त्तव्यमिति तात्पर्य्यम्। उत्प्रेक्षानुप्राणितासमासोक्तिरलंकृतिः रूपकंच।।४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।४।। यात्रायामानुकूल्यं सूचयन्नेव पुनरनुनयति, हे करभोरु। गति प्रति कृष्णसमीपगमनं प्रति विलम्बमपेक्षां मुञ्च त्यज। तत्र हेतुमाह, लतानिकुरम्बं वल्लीसमूहः अनिलतरलेन किसलयनिकरेण प्रेरणमिव करोति, तवेत्यर्थात्। तथा च अचतना अपि एवमुपदिशन्ति किं पुनः सख्य इति ध्वनितम्।।४।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।४।। (अनिलेति।) [१] किञ्च हे करभोरु, कनिष्ठातो मणिबन्धपर्यन्तः करभस्तस्य बहिर्भागस्तद्वन्निम्नोन्नते ऊरू [२] तरुणजनानां मोहने वशीकरणे [३]द्वे यस्यास्तत्सम्बोधनम्। गतिं गमनं प्रति विलम्बं मुञ्च त्यज[४]। यतो लतानिकुरुम्बं लतासमूहः [५] अनिलेन वायुना तरल [६] श्चपलो यः किसलयनिकरः पल्लवसमूहस्तद्रूपेण [७] करेण प्रेरणमिव तव [८] याचनामिव [९] करोतीति भावः। [१०] अनेन [११] अचेतना अपि वृन्दावनगततरुलताः श्रीकृष्णानुरागोदये त्वामेव प्रेरयन्ति त्वय्यनुरागञ्च बोधयन्ति। किमस्माकं चेतनानां सखीनां चित्रमिति भावः[१२]। [१३]अतस्तव महद्भाग्यमिति ध्वनिश्च। ''मणिबन्धादाकनिष्ठं करभो बहिः'' **इत्यमरः** (२.६.८१)। ''निकुरुम्बं कदम्बकम्''[१४]**इत्यमरः** (२.४.३१)। ''समूहे निकुरुम्बं स्यात्कूजितेऽपि च'' इति [१५] **हलायुधः**। पिकादय [१६]उद्दीपनविभावाः।।४।।

१.तः४.पर्यन्तं नास्ति-अ.ब.२.तरुणीजनानां मनोहरत्वेन प्रसिद्धयोस्तत्सम्बोधनम्-फ.ज.
३.द्वये-इ.५.चलनवायुना-अ.ब.६.चञ्चलः-इ.७.नास्ति-ग.८.ज्ञापनमिव-फ.यापनमिव-ह.ज.

९.करोति-इ.फ.ग.ह.ज.१०.त:१२.पर्यन्तं नास्ति-अ.ब.(इ.पुस्तकगतोऽयं पाठं) ११.अचेतनेनापि-इ.१३.अतस्तवैव महद्भाग्यमिति ध्वनि:-फ.ग.ह.ज.१४. इत्यपि-इ.फ.ह.ज. १५.नास्ति-**हलायुधे**१६.उद्दीपनमिति भाव:-ग.उद्दीपनविभाव:-फ.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।४।। अनिलेति। हे करभोरु [२] कनिष्ठातो मणिबन्धपर्यन्तं करस्य बहिर्भाग: [३]करभस्तद्वदूरुद्वयं जङ्घे यस्यास्तत्सम्बोधनम्। हे राधे! गतिं गमनं प्रति विलम्बं मुञ्च शीघ्रं गच्छेति यावत्। यतो लतानिकुरुम्बं लतासमूहं अनिलेन वायुना तरलश्चञ्चल: किसलयनिकर: पल्लवसमूहस्तद्रूपेण करेण [४] हस्तेन तव प्रेरणमिव[५]यापनमिव करोति। अचेतना लताऽपि त्वां प्रेरयति ; किं पुनरहम्।।४।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।४।। अनिलेति। हे करभोरु, रलयोरभेदात्करभ: त्रिंशद्वर्षगज: तस्य शुण्डावत् ऊरू यस्या: सेति। गजशुण्डोरु: मृगाक्षीवेति त्रिलोपसमासगोपमा, तद्वदत्र व्याख्याने गजोरुसमोरुत्वं न शुण्डासाम्यं, मध्यमपदलोपे शुण्डपदस्मारकपदाभावात्। मृगाक्षीत्यत्राक्षिशब्दस्तिष्ठतीति समर्थत्वा (द) दोष इति। मणिबन्धादाकनिष्ठं करस्य करभो बहि: इति कोशात् (**अमर**:२.६.८१)। करभवत् ऊरू यस्यास्तत्सम्बोधनम्। लतानां वल्लीनां निकुरुम्बं समुदाय: अनिलेन तरल: चञ्चल: किसयलनिकरो गण: तेनेव करेण हस्तेन प्रेरणं करोतीव प्रेरयतीव। अत: त्वं गतिं प्रति गमनमुद्दिश्य विलम्बं आलस्यं मुञ्च शीघ्रं व्रजेति भाव:। अत्र किसलयगणस्य करत्वारोपेण लतासमुदायस्य सखीजनत्वं प्रतीयत इति एकदेशविवर्तिरूपकम्। तच्च प्रेरणं करोतीवेति प्रेरणधर्मोत्प्रेक्षाया: अङ्गम्। इव शब्दस्य क्रियान्वये धर्मोत्प्रेक्षेति **वाग्भटात्**।।४।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।।अनिलेत्यादि। हे करभोरु लतानिकुरम्बं व्रततिसमूह: ''स्त्रियां तु संहतिर्वृन्दं निकुरम्बं कदम्बक मि**त्यमर**:।'' अनिलतरलकिसलयनिकरेण करेण तव प्रेरणमिव करोति। अनिलेन वायुना तरलश्चञ्चलश्चासौ किसलयनिकरश्चेति विग्रह:। स एव करो हस्त इत्यसमस्त रूपकं, तस्मात् अचेतनाया लताया अपि प्रेरणमधिगत्य गतिं प्रतिविलम्बकालापेक्षां मुञ्च शीघ्रं गच्छेत्यर्थ: अनेनार्त्तव कामोद्दीपककालोऽपि सूचित:। करभ इव ऊरू यस्या इति विग्रह:। ऊरूत्तरपदादौपम्ये इति ऊङ् प्रत्यय:। वृत्तानुपूर्वतया रोमग्रहित्वेन च ऊरो: करभोपमानता। अम्बार्थनद्योर्ह्रस्वइति सम्बोधने ह्रस्व: ''मणिबन्धादाकनिकं करस्य करभो वहिरि**त्यमर**:।।४।।

**(११) पूजारी गोस्वामीकृत-बालवोधिनी**

।।४।। मद्वचनमनुमोदमाना अचेतनापि लता त्वां प्रेरयतीत्याह-हे करभोरु! लतासमूहोऽप्यनिल तरकिशलयनिकरेण करेण तव प्रेरणं करोति, तस्माद् गतिं प्रति विलम्वं मुञ्च। अचेतनानुकूल्येनापि तच्चेतो न द्रवतीत्यभिप्रायः। वस्तुतस्तु उद्दीपनमेवैतत् सर्वम्।।४।।

**(१२) लक्ष्मणकृत-रसिकरङ्गदा**

।।४।।अत एव लतातातिरपि तदनुमोदमाना त्वां प्रेरयतीत्याह, अनिलेति। हे करभोरु! करभौ इव ऊरू यस्या हे तादृशि। अव्याजाभिरूप्यमोहितकृष्णाचित्ते राधे! 'मणिबन्धादाकनिष्ठं करस्य करभो बहिः' इति **अमर**ः। लतानिकुरम्बं वल्लीततिरनिल-तरलकिसलयनिकरेण, मन्दानिलचलायमाननवपल्लवसञ्चयेन तेनैव करेण प्रेरणं करोतीव। मन्मथाज्ञामनुल्लंघ्य तूर्णं प्रियमभिसरेति। स्नेहवशेन त्वां प्रेरयतीवेत्यर्थः। अतो गतिं प्रति विलम्बं, कथं तत्समीपं यामीति पुनः पुनः सखीमुखनिरीक्षाव्यापाररूपं मुञ्च त्यज। तूर्णमभिसृत्य प्रियं परितोषयन्ती आत्मानं सफलयेति भावः। उत्प्रेक्षानुप्राणिता समासोक्तिः।।४।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।४।। अनिलेति; तरलेन अनिलेन अर्थात् सुखस्पर्शदात्रा किशलयेन। आलस्यं परिहिय लतासमूहं धीरं सञ्चालयति। हे मुग्धे ! करभोरु हस्तीवत् ऊरू शोभना जंघा यस्याः नायिकायाः ताः लताः धीरं धीरं चलमानाः त्वां मलयानिलसञ्चारिणा नायकसमीपं चल। मणिबन्धाकनिष्ठं करस्य करभो बहिः इति कोशात् (**अमर**:२.६.८१)। ''निकुरुम्बं कदम्बकम्''[१४]**इत्यमरः** (२.४.३१)। ''समूहे निकुरुम्बं स्यात्कूजितेऽपि च'' इति [१५] **हलायुध**ः। विलम्बं मा कुरु। यत्र चलाः लताः पवनेन गमनोद्यमां त्वं कथं चिरयसे। शीघ्रंगच्छ इति।।४।।

**५-स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम्।**
**पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम्।। मुग्धे०।।५।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।५।। यदि मद्वाक्यं न करिष्यसि तदात्मीय कुचकुम्भं पृच्छेत्युपदिशन्त्याह। स्फुरितेति। हे सखि ! कुचकुम्भममुं पृच्छेति योजना। कीदृशमनङ्गतरङ्गवशात् स्फुरितं कामवशात् कम्पितमित्यर्थः। पुनः कीदृशं, मनोहरहारविमलजलधारं मनोहरहार एव

विमलजलधारा यत्रेति विग्रहः। यो हि पूर्णकुम्भश्चलति तन्मुखात् जलधारा पतति। कुचश्चायं कुम्भत्वे निरूपितं कम्पितश्चानङ्गकल्लोलत्वेन तस्माज्जलधारात्वेन हारो रूपित:। उत्प्रेक्ष्यते सूचित हरिपरिरम्भमिवेति स्तनकम्पनं नार्य्या: प्रियसङ्गमं सूचयतीत्यस्ति स्मृतिरेषा।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। अपि च, स्फुरितमिति। हे सखि! अमुं कुचकुम्भं पृच्छ। प्रियकरस्पर्शलालस-कुचकुम्भचेष्टां ज्ञातुमिच्छां कुरु। भाविप्रियावेदक: कुचकलशोऽपि त्वां प्रेरयतीत्यर्थ:। किंभूतं कुचकुम्भम्? स्फुरितम्। कुचस्फुरणं प्रियसंगममावेदयतीति सामुद्रिकज्ञा:। कस्मादिव? कामोर्मिवशादिव। किंभूतम्? सूचित: कथितो हरे: परिरम्भो येन। अपि किंभूतम्? मनोहरो हार एव विमलजलधारा यत्र। शकुनकलशेऽपि तरङ्गवशात्सूचितप्रियप्राप्तिर्भवति। विमलजलधारोऽपि, खण्डश्लेषालंकार:।।५।।

## (३) जगद्धरकृत- सारदीपिका

।।५।। अपि च स्फुरितमिति हे राधे! त्वम् अमुं कुचकुम्भस्तनद्वयं पृच्छ सम्यगतिवर्तुलत्वात्काठिन्यत्वाच्च कुम्भसाम्यं कीदृशं कुचकुम्भम् अनङ्गस्य कामस्य ये तरङ्गा विकारा स्तद्वशादिव स्फुरितं सकम्पंम् अतएव सूचित: हरे: परिरम्भ: आलिङ्गनं येन अन्योऽपि कलशो नद्यान्तरङ्गै: प्रेर्य्यमाण: सङ्गमो भवति इव शब्दोऽत्रोत्प्रेक्षकाद्योतक: पुन: कीदृशं मनोहरो य: हार: स एव विमला निर्मला जलधारा यत्र।।५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। स्फुरितेति। अमुं कुचकुम्भं स्तनकलशं पृच्छ सखी समीचीनं वा वदतीति प्रश्नं कुरु। कीदृशम्? स्फुरितं सकम्पम्। कस्मादिव? अनङ्गतरङ्गवशादिव, अनङ्गस्य कामस्य यस्तरङ्ग ऊर्मिस्तद्वशादिव। अत्रानङ्गेत्यनेन तस्या रसतरङ्गिणीत्वमाक्षिप्यते। अन्योऽपि कुम्भो नद्यास्तरङ्गै: प्रेर्यमाण: सकम्पो भवतीत्ययमपि ते कुचकुम्भस्त्वयि रसतरङ्गिण्यामनङ्गतरङ्गै: प्रेरणादिव सकम्प इति भाव:। 'इव' शब्द उत्प्रेक्षाद्योतक:। पुन: कीदृशं कुचकुम्भम्? मनोहरो यो हार: स एव निर्मला जलधारा यत्र तादृशम्। अत्र स्तनोपरि स्थितस्य हारस्य जलधारास्वरूपणात्स्तनयो: पूर्णकलशत्वेन रूपणमाक्षिप्यते। पूर्णादिव कलशात्तरङ्गैरान्दोलने सति बहिर्जलधारानि:सरणसंभवात्। पुन: कीदृशम्? सूचित: हरे: कृष्णस्य परिरम्भ आलिङ्गनं येन तम्। नारीणां स्तनकम्प: प्रियं सूचयतीति शाकुनिका:। तदुक्तम्, 'नित्य नार्या: स्तने कम्प: प्रियसंगमसूचक:' इति। पूर्णकलशत्वेन स्तनरूपणमपि यात्रायां पूर्णकलशदर्शनं प्रियसूचनाय।।५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५।। स्फुरितमिति। हे मुग्धे! अनङ्गस्य कामदेवस्य तरङ्गा इव तरङ्गा निरन्तरमन्मथोद्दीपनोद्रेकपरम्परा इत्यर्थः। तद्वशादिव तन्निमित्तादिव स्फुरितं कम्पितम्, अत एव सूचितः ज्ञापितः हरिपरीरम्भः कृष्णालिङ्गनं येन तादृशम्। यत्र बामभाग-स्फुरणमङ्गीकार्य्यम्। तस्यैव स्त्रीणां शुभसूचकत्वात्। ''कुचस्यन्दात्प्रियाश्लेषा-दूरुस्पन्दात् पतिं लभेत्'' इति।

मनोहारश्चित्ताकर्षको यो हारः मुक्ताहारः स एव विमला धारा यस्मिन् तादृशं जलाधारकल्पहारालङ्कृतमित्यर्थः। एतादृशं कुचकुम्भं स्तनकलशं पृच्छ आपृच्छ। समनन्तरमेव। मम प्रियालिङ्गनं भविष्यति किमिति, स्फुरितकुचकलशं प्रति प्रश्नं कुर्वित्यर्थः। कुचकुम्भमित्यत्रोपमानरूपकम्। तथा आरोप्यमाणप्राधान्ये तस्यैव प्रश्नकर्मत्वं स्यात्। तत्तु विरुद्धं स्फुरितविरोधादिति तदुक्तम् उपमायां हि पूर्वस्य पदार्थस्य प्रधानतारूपके तूत्तरपदार्थस्य प्राधान्यमिष्यते।।५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५।। तवापि कृष्णासङ्गमोत्कण्ठा जातेव विलम्बेन केवलमस्माकमवधीरणमिव भङ्ग्या दर्शयति, हे राधे अमुं कुचकुम्भंस्तनकलसं पृच्छ अर्थात् गमनपरामर्षम्। कीदृशम्? अनङ्गस्य तरङ्गं चलनं तस्य वश आयत्तता ततः स्फुरितं कम्पितमित्यर्थः। अतएव सूचितो हरेः कृष्णस्य परिरम्भो येन तम्। तदाह वात्सायणः, 'अचिरप्रिय-समागमसूचनाय स्तनकम्पो युवतीनां भवतीति। पुनः कीदृशम्? मनोहरो मनोज्ञः स्यापि हार एव विमलजलधारा यत्र तादृशम्। अन्य रसपूर्णकलसाद् बहिर्जलधारा वलति इति ध्वनिः। अत्र हरिपरिरम्भाय स्फुरतः प्रष्टव्यकुचकुम्भस्यानुमतिः स्फुटैवेति दर्शितम्। एवञ्च त्वमप्यतिसाकांक्षासीत्यनेनागमने मम नैवापेक्षामात्रमित्यपि सूचितम्। उत्प्रेक्षा चात्रालङ्कारः।।५।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५।। (स्फुरितेति।) किञ्च हे प्रिये! [६] त्वं अमुं कुचकुम्भं प्रियागमनमङ्गलकलशं [७] पृच्छ सहचरी सम्यग्वदति न वेति [८] प्रश्नं कुरु। वर्तुलत्वात्पीनत्वाच्च[९]कुचस्य कुम्भसाम्यम्। कीदृशम्? अनङ्गस्य कामस्य तरङ्गवशादिव स्फुरितं सकम्पम्। कामोऽत्र पयोधिस्थानीयः; कलशस्तरङ्गनिपतितः स्फुरतीति भावः। पुनः कीदृशम्? सूचितहरिपरिरम्भं सूचितो ज्ञापितो हरेः श्रीकृष्णस्य परिरम्भः आलिङ्गनं येन [१] तम्। [२] हरिजलनिधेः तव कुचकलशः पूर्णो भविष्यतीति कलशशब्दग्रहणमिति ध्वनिः। पुनः कीदृशम्? मनोहरो यो हारो मुक्ताहारः स एव विमला जलधारा यत्र तादृशम्।

एतेन स्तनकलशस्य [३] यौवनपूर्णत्वं सूचितम्। कम्प: सात्त्विकभावज: प्रियागमनशंसी। [४] नार्या: स्तने कम्प: प्रियसङ्गमसूचक: इति भरते।।५।।

१.पश्य-इ. २.कनिष्ठान्तो-क. ३.स करभ:-क. ४.नास्ति-ड. ५.प्रापणमिव-ड.ज्ञापनमिव-क. ६,७.नास्ति-फ.ज. ८.पृच्छ प्रश्नं कुरु-फ.ज. ९.कुम्भसाम्यं कुचस्य-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५।। स्फुरितमिति। हे राधे! त्वं अमुं कुचकुम्भं स्तनद्वयं पृच्छ सखी सम्यग्वक्तीति। वर्तुलत्वात्पीत्वाच्च कुम्भसाम्यम्। कीदृशं कुचकुम्भम्? अनङ्गस्य कामस्य ये तरङ्गा विकारास्तद्वशादिव स्फुरितं सकम्पम्। अत एव सूचित: हरे: परिरम्भ आलिङ्गनं येन। अन्योऽपि कलशो नद्यां तरङ्गै: प्रेर्यमाण: सकम्पो भवति। पुन: कीदृशम्? मनोहरो यो हार: स एव विमला निर्मला जलधारा यस्मिन्।

''वामे मधुरवाक्यानि वृक्ष: पल्लवितोऽग्रत:।
[५]अनुकूलवहो वायु: प्रयाणे शूभसूचका:'' ।।५।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५।। स्फुरितेति। मनोहर: रमणीयो हार: मुक्तादिमणिसम्बन्धभव: स इव विमला स्वच्छा जलधारा स्वेदाम्बुपङ्क्ति: यस्मिन् तम्। अमुं कुचकुम्भं पश्य। कुम्भस्य जलभरणयोग्यत्वाज्जलधारावत्त्वोक्त्या स्वेदरूपसात्विकभाव: सूचित:। सूचित: ज्ञापित: हरे: कृष्णस्य परिरम्भ: आश्लेष: येन तम्। अनङ्गस्य तरङ्ग: उद्वेलनं तद्वशादिव स्फुरितं स्फुरणं प्रस्तुतत्वाद्बाह्याद्यङ्गस्फुरणञ्च पश्य अवलोकय। अत्र स्फुरणं प्रति अनङ्गतरङ्गस्यैव हेतुत्वेन सम्भावनाद्धेतूत्प्रेक्षा। अनङ्गस्य तरङ्गाभावादसिद्धास्पदा। स्फुरणयुक्तं स्फुरितमिति कुचकुम्भस्य विशेषणत्वे तेन विशेषणत्वेन सूचितादिपदं योजनीयम्। तथा च कुचकुम्भमात्रस्फुरणं स्यादिति पार्थक्येन योजना।।५।।

१.तत्-ग. २.हरिजलनिधेरेव तव कलश:-इ.फ.ग.ह.ज. ३.यौवनरसपूर्णत्वं ध्वनितम्-इ.फ.ग.ह.ज. ४.भार्यास्तने-फ.ज. ५.अनुकूलावहो-ड.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। यदि मद्वाक्यमनात्मीयत्वादहितं मन्यसे तदात्मीयं कुचकुम्भं पृच्छेत्युपशब्द-शक्त्याह। स्फुरितमिति। हे सखि तव अमुं कुचकुम्भं पृच्छ पर्यनुयुंक्ष्व हरिं प्रति यास्यामि न वेति प्रश्न: क्रियतामित्यर्थ:। किंविधम्? अनङ्गेति अनङ्ग: कामस्तस्य तरङ्गाधिक्यमिति यावत्। तद्वशात् तदायत्ततयेवं स्फुरितं कम्पितम्। अत एव सूचितहरिपरिरम्भमिति। सूचित: हरे: परिरम्भो येन स तम्। ''जघनं च स्तनश्चैव नेत्रं

चैव नत (तु) भ्रुवाम्। कम्पते यदि कान्तस्य सङ्गमः स्याददूरतः। इति स्तनस्फुरणं प्रियालिङ्गनसूचकमिति रतिसागरः। तेन हरिपरिरम्भसूचकं स्तनस्फुरणम् अनङ्गतरङ्ग-वशादिवेत्यन्यथोत्प्रेक्षितम्। इति स्वरूपभेदोत्प्रेक्षालङ्कारः। विना कामविकारेण स्त्रियास्तनौ निश्चलाविति हरिरहस्यम्। यद्वा कुचकुम्भं किंविधम्? अनङ्गतरङ्ग वशात् स्फुरितम्। उत्प्रेक्ष्यते। सूचितहरिपरिरम्भमिवेति। अत्र अनङ्गविकारजनितस्तनस्फुरणं हरिपरिरम्भसूचकं सुस्फुरणत्वेन उत्प्रेक्षितम्। पुनः किंविधम्? अत एव मनोहरहार एव विमला स्वच्छा जलधारा यस्य यत्र वेति विग्रहः। यो हि पूर्णकुम्भश्चलति तन्मुखाज्जलधारा पततीति स्वभावः। पूर्णकुम्भस्तु यात्राणां मङ्गलाय भवतीति शीघ्रं गच्छेतितात्पर्यम्। अत्र कुचे कुम्भत्वमारोपितं तदाकारत्वात्। तस्य कम्पितत्वात् हारे तन्मुखनिर्गलितजलधारात्वमारोपितं शुक्लत्वात्। यदुक्तं, ''सामान्यग्रहणे शौक्ल्यं छत्राम्भःपुष्पवासनाम्'' इति।।५।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५।। एवं भावमुद्दीप्य विकारान् दर्शयति। यदि मद्वचनमनात्मीयमिति मन्यसे हे सखि! तद्वात्मीयममुं कुचकुम्भं पृच्छ। कीदृशं? अनङ्गतरङ्गवशात् कंपितमिव। पुनः कीदृशं? मनोहरो हार एव विमला जलधारा यत्र तम्। कुचोऽयं कलसत्वेन निरूपितः। कंपितः च अनङ्गतरङ्गवशात् तस्माद् हारोऽपि जलधारात्वेन निरूपितः। अत्र उत्पेक्ष्यते सूचितं हरिपरिरम्भमिवेति। बामस्तनकंपनं हि नार्य्याः प्रियसङ्गमं सूचयतीति प्रसिद्धेरयमेव जिज्ञास्य इत्यर्थः।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।। आस्तां तावदन्यत्सर्वम्। त्वदङ्गान्येव त्वामुद्बोधयन्तीत्याह स्फुरितमिति। हे मुग्धे! अनङ्गतरङ्गवशादिव स्फुरितं मदनसम्बन्धिबहुबाधाभिलाषोद्रेकादिव सञ्जातास्पदम्। अत एव सूचितं हरिपरिरम्भम्, अचिरभाविप्रियालिङ्गनव्यञ्जकं तथा चिरप्राप्तत्वत्कुचसम्बन्धसौभाग्यवशमनोहरमुक्ताहाररूपविमलजलधारासम्भृतं कुचकुम्भं वामस्तनकलसं पृच्छ। नह्ययं प्रियालिङ्गनकौतुककृतस्पृहो निमेषमात्रमपि विलम्बं सहते। कामिनीनां वामकुचस्पन्दनं, जलपूर्णकुम्भदर्शनं च चिराभिलषित-प्रियाश्लेषप्राप्तिसूचकमिति प्रशस्तं निमित्तम्। तथा चोक्तम्;

'वामभागश्च नारीणां श्रेष्ठः पूंसा तु दक्षिणः।' इति

'कुचस्पन्दात् प्रियाश्लेषमूरुस्पन्दात् पतिं विन्देत्।'

किंच - 'वामे शवशिवाकुम्भा दक्षिणे गोमृगद्विजाः। सर्वकार्यकराः ज्ञेया' इति।

कुचकुम्भमित्यत्र उपमा एव, न रूपकम्। तथारोप्यमाणसाम्ये तूत्तरपदार्थप्राधान्यात् कुम्भस्य एव प्रश्नकर्मत्वं स्यात्। तत्तु विरुद्धं तस्य स्फुरणासम्भवात्। तदुक्तम्,

उपमायां हि पूर्वस्य पदार्थस्य प्रधानता।

रूपके तूत्तरपदार्थस्य प्राधान्यमिष्यते।। इति।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। स्फुरितेति; हे सखि यदि मम वचने न विश्वसिसि तर्हि पश्य तव शरीरे अनङ्ग - तरङ्गवशात् कामलहरीकावशात् स हरिं परिरम्भ हरे परिरम्भणं सूचयति। कथमिव ? मनोहर हारः मनोमुग्धकरः स्वच्छगलमाला प्रवहमानजलधारवत् त्वदीये कुचकुम्भे शोभते। तव किं वाम कुचकुम्भस्य स्फुरणात् कम्पनात् सूच्यते ? शुभलक्षणं यत्र जलपूर्णकुम्भः पुनः वामाङ्गस्फुरणं भवति। तथा च शकुनशास्त्रेषु प्रशस्तम्। वामभागश्च नारीणां श्रेष्ठः पुंसां तु दक्षिणः। इति। अपि च कुचस्पन्दात् प्रियाश्लेषमुरुस्पन्दात् पतिं विन्देत्। तथा चोक्तम्;

'वामभागश्च नारीणां श्रेष्ठः पूंसा तु दक्षिणः।' इति

'कुचस्पन्दात् प्रियाश्लेषमूरुस्पन्दात् पतिं विन्देत्।'

किञ्च - वामे शवशिवा कुम्भाः दक्षिणे गोमृगद्विजाः सर्वकार्यकरा ज्ञेया।। इति।।

कुचकुम्भमित्यत्र उपमा न रूपकम्। तथा रोप्यमाणसाम्ये तूत्तरपदार्थप्राधान्यात् कुम्भस्य एव प्रश्न कर्मत्वं स्यात् तत्तु विरुद्धं तस्य स्फुरणासम्भवात् तदुक्तम्, उपमायां हि पूर्वस्य पदार्थस्य प्रधानता। रूपके तूत्तरपदार्थस्य प्राधान्यमिष्यते।। इति।।५।।

**६-अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जम्।**
**चण्डि रसितरशना-रव-डिण्डिममभिसर सरसमलज्जम्।। मुग्धे०।।६।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। सम्प्रति माधवानुसरणे काञ्च्यादिभूषाग्रहणं प्रत्यक्षमप्यनुमानमाह। अधिगतेति। हे चण्डि! हे कोपने ! तवेदं वपुरपि रतिरणसज्जम् इत्यखिलसखीभिरधिगतं कथमन्यथा काञ्च्यादिग्रहणमिति भावः। वपुरपीत्यत्रापि शब्दात् न केवलं मनो रतिरणसज्जमिति। वपुरपि तस्मादलज्जं लज्जां त्यक्त्वा सरसं यथा स्यात्तथाभिसरेति वाक्यार्थः। रसितरसनारवडिण्डिममित्यपि क्रियाविशेषणम्। रसिता या रसना तया रव एव ड़िण्डिमो वाद्यविशेषो यत्रेति विग्रहः। "वाद्य प्रभेदा ड़मरु मड्डुडिण्डिमझर्झरा **इत्यमरः**" ।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।।अपि च, अधिगतमिति। हे चण्डि! सखीसकाशाल्लज्जारहितं यथा स्यात्तथा अभिसर। अर्थात्कृष्णवसतिम्। यतोऽखिलसखीभिरिदमधिगतं ज्ञातम्। इदमिति किम्? तव वपुरतीव रतिरणाय विहितसामग्रीकं वर्तते इति सखीनामग्रे वपुषैव निवेदितम्। अतो लज्जां मा कुरु। किंभूतं वपुः? रसितो रशनावलिरेव डिण्डिमः पणववाद्यविशेषो येन। अपि च किंभूतम्? सरसं सरागम्। अत एव रणोद्यतायाश्चण्डीति विशेषण-मुचितम्।।६।।

## (३) जगद्धरकृत- सारदीपिका

।।६।। अधिगतमिति हे चण्डि! अत्यन्तकोपेन इत्याक्षेपे सम्बोधनम् अखिल सखीभिरुऽपि तवेदं वपुः शरीरं रतिरणे सुरत संग्रामे सज्जं सन्नद्ध अधिगतं ज्ञातं तव मनसि अभिमानो नास्तीत्यर्थः एवं सति रसिता शब्दिता रसना क्षुद्रघण्टिकासौ वारवडिंडिमोवाद्य विशेषो यस्यां क्रियायां सरसं सोत्कण्ठं यथा स्यात्तथा अलज्जं लज्जारहितं यथा स्यातथाऽभिसर कृष्णमित्यध्याहारः।।६।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६।। ननु सखीजनेषु पश्यत्सु, कथं मया गन्तव्यमित्यत आह, अधिगतमिति। इदं तव वपुः सखीभिरतिशयेन रतिप्रसङ्गाय सुरतप्रसङ्गाय सज्जं कृतालंकरणादिकृत्य-विधानमधिगतं ज्ञातम्। तथा च सखीभिर्दृष्टमेवाधुना किं विलम्बेनेति भावः। यद्वा, सखीभिरिदं तव वपुर्बहुधा रतिरणे सम्यगधिगतं ज्ञातम्। तथा च तासां का लज्जेति भावः।अतो हे चण्डि कोपने! रसितः शब्दायमानः कृतो रसनावलिः क्षुद्रघण्टिकावलिरेव डिण्डिमो वाद्यविशेषो यत्रैवं यथा स्यादेवमभिसर कृष्णसंकेतभूमिमुपैहि। अन्यत्रापि रणे डिण्डिमस्ताड्यत एवेति ध्वनिः। पुनः कथं यथा स्यात्? सरसस(म?) लज्जम्। रसः शृङ्गाररसस्तत्सहितं लज्जास (र?) रहितं च यथा स्यादेवम्।।६।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६।। अधिगतमिति। हे मुग्धे! अखिलसखीभिः समस्ताभिरालीभिः न त्वक्यैव केवलमित्यथः। तव वपुः शरीरमपि रतिरणे मुखनखप्रहारादिरूपसुरतकदने सज्जं सन्नद्धमिति इहमधिगत विज्ञातमतश्च त्वया हृदयगोपनं न कार्य्यमिति तात्पर्य्यम्। हे चण्डि! कोपनशीले! हृदि स्थितार्थप्रकाशनेऽसम्भावितद्योतनार्थमेतत्सम्बोधनमित्यव-गन्तव्यम्। रसिता शब्दायमाना या रसना काञ्ची रसशब्द इत्यस्मात्पर्त्तरिक्त: कर्मणि वा, तस्याः रवः स्वरः स्वनः स एव डिण्डिमो वाद्यविशेषः यस्मिन् कर्मणि तद् यथा

तथा "वाद्य भेदाड़मरु मड्डुडिण्डिमझझरा **इत्यमर:**।" सरसं साभिलाषं यथा स्यात्तथा अलज्जं निलज्जं यथा स्यात्तथाभिसर कृष्णसमीपं प्रतियाहि।।६।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६।। सखीभिरवगतेऽपि तवाशये विलम्बनमनुचितमिति दर्शयति, हे चण्डि कोपने! तव वपु: शरीरम् अतिरतिरणसज्जम् अत्यन्तानङ्गरङ्गसङ्गरसन्नद्धम् इदमखिलाभि: सखीमिरधिगतं ज्ञातम्। सर्वे गत्यर्था: सोपसर्था: ज्ञानार्था:। तस्मादलज्जं व्रीडाविहीनं यथा स्यादेवम् अत एव रसितरसनारण्या शब्दायमानकाञ्चीश्रेण्या डिण्डिमो व्यक्तरावो यत्र तत्तथा। एवं यथा स्यात् सरसं रससहितं च यथा स्यादेवम् अभिसर अभिसारं कुरू। डिण्डिमो वाद्यभेदे स्यादित्युपचारात्। प्रकृते डिण्डिमशब्दो अभिप्रेत इत्यवधेयम्। तथा चान्यच्चाङ्गितिरोधनार्थमभिसारे सङ्गोपनं क्रियते। प्रकृते तदभावात् स्वच्छन्दमभिसरेति वाक्यार्थ:।।६।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६।। एवं वचनप्रसन्ना[२]मालज्जन्तीं[३]प्रत्याह, अधिगतमिति। हे चण्डि कोपने सुरतोद्भटे वा। इदं तव वपुरखिलसखीभिरतिशयेन रतिरणे सुरतसङ्ग्रामे सज्जं[४]कृतालङ्करणादिसन्नद्धं वा अधिगतं[५]ज्ञातम्। [६]तस्माद्बहुविधं विज्ञातेऽर्थे का लज्जेति भाव:। कीदृशं वपु: ? रसिता शब्दायमाना रसना क्षुद्रघण्टिका च सैव रवो ध्वनि: डिण्डिमो वाद्यविशेषो यत्र तादृशं कृष्णमभिसर[७]गच्छ। कीदृशम्? [८]सरसं शृङ्गाररससहितम्। (पुन:) कीदृशम्? अलज्जं सुरते[९]गतत्रपम्। अथ वा क्रियाविशेषणं [१०] वपुर्विशेषणञ्च पदत्रयम्।।६।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६।। अधिगतमिति। हे चण्डि कोपने इत्याक्षेपे सम्बोधनम्। हे राधे! [११] अखिलसखीभिरपि। [१२] समस्तसखीभिरपि [१३] तवेदं वपु: शरीरं रतिरणे [१४]सुरतयुद्धे सज्जं सन्नद्धं अधिगतं ज्ञातम्। तव मनस्यभिमानो [१५]माऽस्त्वित्यर्थ:। एवं सति [१६] रसिता शब्दिता रसना क्षुद्रघण्टिका सैव [१७]आरवडिण्डिम: [१८] शब्दप्रधानो डिण्डिमो वाद्यविशेषो यस्यां क्रियायां सरसं सोत्कण्ठं यथा स्यात्तथा अलज्जं लज्जारहितं यथा [१९]तथाऽभितर[२०]कृष्णमिति शेष:।।६।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६।। अधिगतमिति। हे सखि! अखिला: असङ्ख्या: सख्य: ताभि: इदं तव वपु: अङ्गमपि रतिरणे सन्नद्धं स्रक्चन्दनमकरिकापत्रादियुक्तं अधिगतं प्रत्यक्षदृष्टम्। हे चण्डि

अप्रतीकारकोपवति। कथं ज्ञापितमित्या-काङ्क्षायामाह रसिता नादिता या रशना काञ्ची तस्या: आरव: शब्द: तेन डिण्डिमं तेन ज्ञातमिति भाव:। अत एव अलज्जं सरसञ्च अभिसर। अज्ञाते लज्जोचिता।।६।।

१.वपुरति-नि.सा.इ.ड.२.आलक्ष्य लज्जितां प्रत्याह-इ.ग.ह.आलक्ष्य अतिलज्जितां प्रत्याह-फ.ज.३.प्रीत्याह-अ.ब.४.कृतालङ्कारादि-ग.५.नास्ति-अ.ब.६.तासां बहुधा विज्ञाते अर्थे-इ.फ.ग.ह.ज.७.शीघ्रं गच्छ-इ.फ.ग.ह.ज.८.रस: शृङ्गाररससहितम्-ज.९.सुरतनि-श्शङ्कं-इ.फ.ग.ह.ज.१०.नास्ति-अ.ब.११.नास्ति-ड.१२.नास्ति-क.ल.म.१३.तव वपु:-क. १४.सुरतियुद्धे-ड.सुरतसङ्ग्रामे-क.ल.म.१५.नास्तीत्यर्थ:-ड.क.ल.म.१६.रणिता-क.ल.म. १७.अखण्डडिण्डिम:-क.ल.म.१८.शब्दप्रधानडिण्डिमो-ड.नास्ति-क.१९.स्यात्तथा-क.नास्ति-ल.म.२०.कृष्णमित्यध्याहार:-क.ल.म.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। सम्प्रति माधवानुसरणं काञ्च्यादिभूषणग्रहणे न प्रत्यक्षमपि अनुमितमेवाह, अधीति। हे चण्डि! कोपने! तवेदं वपु:...मायसन्नद्धम् अखिलसखिभि: समस्तालिभिरधिगतं ज्ञातं सर्वे गत्यर्था ज्ञानार्था कथमन्यथा काञ्च्यादिग्रहणमिति भाव:। वपुरपीत्यत्रापि शब्दात् न केवलं मनोरतिरणसज्जं किन्तु वपुरपि। न केवलं स्तनकम्पनमिति पूर्ववाक्यार्थताऽपेक्षया समुच्चयार्थद्योतको वापिशब्द:। तस्मान्नि:शङ्कं याहीत्यभिप्रायेणाह। रसितेत्यादि। रसितरसनारवडिण्डिमं यथा स्यादेवम् रसिताया: शब्दिताया: रसनाया: रव एव डिण्डिमो वाद्यविशेषो यत्र एवं यथास्यादेवम् अर्थाल्लजां त्यक्त्वा अभिसर हरिमिति शेष:। रसितरसनारवडिण्डिममित्यत्र सोपचारोपादानलक्षणाया: धर्मगतत्वेन तत्स्वन एव डिण्डिमपदस्य पर्य्यवसानम्।।६।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६।। संप्रति माधवानुसरेण काञ्च्यादि भूषणमेव त्वां वाद्यं व्यनक्तीत्याह। तदेवं वपुरपि रतिरणसज्जमित्यखिलसखीभि: अपि ज्ञातम्। कथमन्यथा काञ्च्यादिग्रहणमितिभाव:। न केवलं मन एव वपुरपीत्यर्थ:। ततो हे चण्डि! रणप्रवीणे अलज्जं लज्जारहितं सरसं सोत्सहं रणिता रसना सैव रवड़िण्डिमो वाद्यभाण्डविशेषो यत्र, एतच्च यथा स्यात्तथाभिसर प्रियाभिमुखमनङ्गरङ्गं याहि, रणसज्जितस्य विलम्बो भयाशङ्कामासञ्जयतीत्यर्थ:।।६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६।। गमनोत्सुकामपीतरसखीभ्यो गोपनाय विलम्बमानामालक्ष्याह अधिगतमिति। हे राधे! गमनौत्सुक्यव्यञ्जकविविधविलासशालिन्यास्तवेदं गोपनीयत्वेनाभिमतमाना-

नन्तरसम्भोगस्पृहाहर्षनिर्भरं वपु: शरीरमपि रतिरणे, सुरतयुद्धप्रसङ्गे सज्जं, सन्नद्धमिति अखिलसखीभिरिङ्गिताभिज्ञसमस्तवयस्याभिस्त्वदङ्गप्रसाधनमुखप्रसन्नतादि नैवाधिगतम्, विदितम्, अतस्तव गोपनेनालम्। हे चण्डि! रणप्रवीणे! सरसमुत्साहेनाभिलाषेण वा सहितमल्लज्जं, गमनकालीनालिजनपरिहासोदितलज्जारहितं रसितरसनारसडिण्डिमं सविलासगमनरणितमेखलाकलापध्वनिपटहनिनादं च यथा स्यात्तथाभिसर प्रियाभिमुखं प्रयाहि। रणसज्जजनस्य विलम्बोऽनुचित इति भाव:।।६।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। अधिगतमखिल सखीति; गमनौत्सुक्यापि इतरसखिभ्य: गोपनाय विलम्बमानामालक्ष्याह। हे श्रीराधे इदं तव वपु: सखिभिरतिशयेन रतिप्रसङ्गाय सुरतप्रसङ्गाय सज्जं कृतालंकाणादि कृत्यविधानमधिगतं ज्ञानम्। अर्थात् तव सख्य: कामक्रीडानिमित्तं त्वां सज्जीकृत्य वर्तन्ते। तत् सर्वं त्वया अधिगतं ज्ञातम्। अत: लज्जां मा कुरु। हे चण्डि सखिसकाशात् लज्जारहितं त्रपारहितं यथा स्यात् तथैव अभिसर। सर्वं सखिभिरेतदधिगतं ज्ञातम्। किमधिगतं इति जाते प्रश्ने उच्यते। हे श्रीराधे तव वपुरतीव रतिरणाय विहितसामग्रीकं वर्तते इति सखीनामग्रे वपुष्येव निवेदितम्। अत: मा लज्ज। तव वपु: किम्भूतमस्तीति जिज्ञासायामुच्यते; रसनावलीरेव डिण्डिम: पणववाद्यविशेषो येन। अपि च। सरसं सरागं अतएव रणोद्यमताया: चण्डीति विशेषणमुचितम्। रसितेत्यत्र सविलासगमनरणितमेखलाकलाप ध्वनि: पटहनिनादश्च भयाभिसारम्। रणसज्जायाम् विलम्ब: नोचित:।।६।।

**७-स्मरशरसुभगनखेन करेण सखीमवलम्ब्य सलीलम्।**
**चल वलयक्वणितैरवबोधय हरिमपि निजगतिशीलम्।। मुग्धे०।।७।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। हे सखि! हे राधिके! करेण सखीमवलम्ब्य सलीलं चलेति योजना। कीदृशेन करेण स्मरशरसुभगनखेन अन्धकारे गच्छन्त्या भीतिं स्यादिति कामशास्त्रग्रहणम्। वलयक्वणितैरवबोधय हरिमपि निजगतिशीलमिति न केवलं चलेत्यपि शब्दार्थ:। स्वभावचपलो हरिस्तव विलम्बात्काचिदन्यामभिसरिष्यतीति दूरतो हरौ निजगतिवोधन-मुचितत्।।७।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, स्मरशरेति। हे सखि! करेण सखीमवलम्ब्य सलीलं चल। अपिश्चार्थे। च पुन:। निगदितशीलं निगदितं तव प्रतीक्षया सुभटं व्याख्यातं शीलं यस्य। अथवा,

पूर्वपददोषत्वेन सखाभिज्ञानपरं निगदितं च तच्छीलं च भवत्याश्चरित्रं तत्। हरिमपि बोधयेति 'अपि' शब्दार्थः। किंभूतेन ? स्मरशरसुभगनखेन स्मरशरवत्पुष्पवत्सुभगा नखा यास्मिंस्तादृशेन।।७।।

## (३) जगद्धरकृत- सारदीपिका

।।७।। स्मरेति हे राधे ! त्वं करेण हस्ते न सखीम् अवलम्ब्य सलीलं सविलासं यथा स्यातथा चल गच्छ कीदृशेन करेण स्मरशरवत्कामबाणवत्सुभगानि सुन्दराणि नखानि यस्मिन् रणे शस्त्राणि भवति रतिरणे तु त्वन्नखान्येव स्मरस्य शस्त्राणीति भावः। गत्वा च वलयक्वाणितैः कङ्कणशब्दैः हरि कृष्णं बोधय अहमागतेति ज्ञापयेत्यर्थः अपि क्रियासमुच्चये कथं भूतं हरि निजे आत्मनि गतिर्यस्य स निजगतिः कामस्तस्मिन् शील समाधिश्चिते काम्यं यस्य काम परवशमित्यर्थः।।७।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।। स्मरेति। करेण सखीमवलम्ब्य सलीलं लीलासहितं यथा स्यादेवं चल गच्छ। कीदृशेन करेण ? स्मरस्य कामस्य ये शरास्तद्वत्सुभगाः सुन्दरा नखा यस्मिंस्तादृशेन। अन्यस्मिन्नपि रणे शस्त्रास्त्राणि भवन्ति; रतिरणे तु त्वन्नखा एव स्मरस्य शस्त्रणीति भावः। अथ सलयक्वणितैः कङ्कणशब्दैर्हरिमपि निजगतिशीलं स्वीयगमनस्वरूपमव-बोधय ज्ञापय। अन्यत्र समीचीनो योधः प्रतिभटमवहितं कृत्वैव युध्यत इति ध्वनितम्।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। ननु युद्धसाधनं सहायञ्च विना एकाकिन्या मया कथं गन्तव्यमित्याकाङ्क्षायामाह। स्मरेति। हे मुग्धे ! स्मरस्य कामदेवस्य शरा बाणास्तद्वत्सुभगाः संख्याकारेण च रमणीया नखा यस्मिन् तादृशेन करेण, सलीलं साभिलाषं यथा स्यात्तथा सखीमाली-मबलम्ब्य सख्या; प्रकोष्ठं गृहीत्वेत्यर्थः। एतच्च विलापद्योतनार्थमित्यवगन्तव्यम्। चल कृष्णावासं प्रतिगच्छत्येनं केवलं चौरवद्जमनमात्रं, किन्तु प्रतिभट्टरूपं हरिं रणाय सन्नाहयेत्यर्थः। कलयेति। हे राधे ! वलयक्वणितैः कङ्कणरवैः निजगति शीलमात्मगमन-परिपाटीं हरिमपि अधिवोधय ज्ञापय "गतिवुद्धी (१।४।५) त्यादिना" द्विकर्मकत्वम्। यथा लोके कश्चिदेकाकी युद्धाय गञ्छन् धृतासीत्याद्यनेकप्रहरणः कस्यचित् भट्टस्य प्रकोष्टं गृहीत्वा रणस्थलमभिगम्य स्वानुवृत्तिडिण्डिमघोषैः स्वागमनं ज्ञापयन् प्रतिभटं युद्धाय सन्नाह्वयति तद्वत्त्वमपीति भावः। दीपकालङ्कारः समासोक्तिः वा।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। कथमेवम्बिधं मानं विहाय स्वयमेव यास्यामीत्याशंक्योपदिशति, सखीं करेणावलम्ब्या सलीलं सक्रीड़ं यथा स्यादेवं चल सञ्चर। कीदृशेन करेण ? स्मरशरवत् कामवाणवत् कन्दर्पवाणवत् सुभग: सुन्दरो नखो यस्य तादृशेन। तत्र गता लज्जापरवशा प्रथमं किं कुर्यामित्याशंक्याह, वलयक्वणितै: हरिमपि अवरोधय ज्ञापय। अहमा-गतेत्यर्थात्। कीदृशम्? निगदित शीलं यस्य तम्। तच्च हरिरभिमानीत्यादिना निगदितम्। तथा च तवानागमनेनगमिष्यतीति ध्वनि:। यद्वा पतति पतत्र इत्यादिना त्वन्मात्रदत्तशीलं स्वभावो यस्य तम्। तथा च पक्षे सखीप्रेरितैर्यास्यसि, तत्र च सञ्चारादिजनितव-लयक्वणितेन अतिसावधानो हरिभविष्यति, आगतामवेद्य स्वयमेव अनुनेष्यतीति न प्रथमं तवार्त्तिप्रकाशनसम्भवनापीति वाक्यार्थ:। 'शीलं स्वभावे समाधावपी' इति **धरणि**:।।७।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७।। अभिसरणमेवाह, (स्मरशरेति।) हे प्रिये! करेण सखीमवलम्ब्य [२]सलीलं शृङ्गारचेष्टया सहितं यथा स्यात्तथा चल गच्छ। कीदृशेन[३] करेण? स्मरशरवत् कामबाणवत् सुभगा: सुन्दरा नखा यत्र। अन्यत्रापि सङ्ग्रामेऽस्त्राणि भवन्ति। [४]अत्रापि त्वन्नखा [५] एवेति स्मरसहायैव गच्छेति भाव:। किञ्च तत्र गत्वा वलयक्वणितै: कङ्कणझङ्कारैर्हरिमपि अहमागतेत्यवहितं बोधय ज्ञापय। अन्योऽपि वीर: प्रतिभटमवहितं कृत्वां युद्ध्यत इति [६]भाव:। कीदृशम्? [७]निजगतिशीलं निजगत्या निजगमनेन [८] तव समीपमागन्तुं शीलं स्वभावो यस्य। [९]यद्वा निजे आत्मनि [१०] गतिर्गमनं यस्य स: निजगति: काम: तस्मिन् शीलं [११] स्वभावो [१२] चित्तैकाग्रयं यस्य। [१३] स्मराधीन-मित्यर्थ:।।७।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७।। स्मरेति। हे राधे! त्वं करेण हस्तेन सखीमवलम्ब्य सलीलं सविलासं चल गच्छ। कीदृशेन करेण ? स्मरशरवत्कामबाणवत्सुभगानि सुन्दराणि नखानि यस्मिन्। गत्वा च वलयक्वणितै: कङ्कणशब्दै: हरिं कृष्णं [१४] अवबोधय अहमागतेति [१५]ज्ञापयेत्यर्थ:। अपि क्रियासमुच्चये। कीदृशं [१६]हरिम्? निजे आत्मनि गतिर्यस्य स निजगति: काम: तस्मिन् शीलं समाधिश्चित्तैकाग्र्यं यस्य; कामपरवशमित्यर्थ:।।७।।

१.निगदितशीलम्-इ.२.सलीलं लीला शृङ्गारचेष्टा वा तया सहितं यथा तथा चल गच्छ-इ.फ.ह.ज.सलीलं लीला शृङ्गारचेष्टा तत्सहितं यथा तथा चल गच्छ-ग.३.इ.फ.ग.ह.ज.४.अत्र-

इ.फ.ग.ह.ज.५.एवेत्यत:-इ.फ.ग.ह.ज.६.ध्वनि:-इ.फ.ग.ह.ज.७.नास्ति-इ.फ.ग.ह.ज. ८.नास्ति-फ.ज.९.अथ वा-इ.फ.ह.ज.१०.गतिर्यस्य स-ग.गतिर्ज्ञानं यस्य-फ.ज.गतिर्गमनं यस्य-ह.११.नास्ति-इ.फ.ग.ह.ज.१२.चित्तैकाग्र्यसमाधिर्यस्य-फ.चित्तैकाग्र्यसमाधिरित्यर्थ:-ज. १३.नास्ति-फ.ज.१४.प्रबोधय-क.१५.विज्ञापयेत्यर्थ:-क.१६.हरिं कृष्णम्-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।७।। स्मरशरेति। स्मरस्य शरवत् सुभगा: सुन्दरा: नखा: यस्मिन् तेन करेण सखीं अवलम्ब्य लीलया सहितं (यथा) स्यात्तथा चल व्रज। वलयानां क्वणितै: सिञ्जितै: निगदितं प्रोक्तं शीलं मञ्जुलवञ्जुलकेलिशयनादिस्वभावं हरिमपि अधिबोधय। त्वदागमतन्द्रालसोऽपि कङ्कणशब्दाकर्णनादेव उत्थास्यतीति भाव:।।७।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। स्मरशरेति। हे सखि! करेण सखीमवलम्ब्य उपश्रित्य सलीलं यथा स्यादेवं चल गच्छेति योजना। एतेन निविडान्धकारे गच्छन्त्या भीत: स्यादिति कथितम् सह लीलया प्रागुक्तया वर्त्तत इति सतीलम्। किं विधेन ? स्मरशरेत्यादि। कामशरवत् सुभगा: पञ्चसंख्यकत्वेन तीक्ष्णाग्रत्वेन वा नखा यस्य यत्रेति वा विग्रह:। रतिरणसज्जत्वात् कामास्त्रग्रहणम्। शरसाम्यान्नखस्य तीक्ष्णताकरणमपि सूचितम्। वलयक्वणितै र्वलयानां सिञ्जितैर्हरिमपिबोधय अहमागतास्मीति ज्ञापय। न केवलं चल किन्तु हरिमपि बोधयेत्यपि शब्दार्थ:। हरेर्बोधने कार्यमाह। किंविधम्? निजगते: स्वकीयगमनस्य शीलना यत्र हरौ निजगतिं शीलयतीति विग्रहो वा। अत: स्वभावचपलो हरिस्तव विलम्बात् कदाचिदन्यामभिसरिष्यतीति दूरतो हरौ निजगतबोधनम्। अपिशब्दो विरोधे वा। तदा निजगतिशीलमपि हरिं वलयक्वणितैर्बोधयेति सम्बन्ध:। निजेन आत्मना गति ज्ञानं परानपेक्षज्ञानं सा निजगति: सैव शीलं स्वभावो यस्य स निजगतिशील: स्वयं ज्योति: स्वभाव: पुरुषस्तमपि हरिं बोधयेति विरोध: प्रतीयते। एतेन तादृशोऽपि भगवान् भवतीमपेक्ष्य तिष्ठतीत्युक्तम्। निजं नित्ये स्वकात्मीये इति **कुमुदाकर**:। ''गति: स्त्री मार्गदशयोर्ज्ञाने यात्राभ्युपाययो'' इति **मेदिनी**।।७।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७।। अथ गमन प्रकारमाह। हे सखि! करेण सखीमवलम्ब्य सलीलं यथा स्यात्तथा चल। कीदृशेन स्वरशरसुभगनखेन संग्रामार्थं पञ्चनखा एव मोहनादिकामास्त्राणि तानि गृहीत्वा गेच्छत्यर्थ:। गत्वा च वलयक्वणितै: हरिमपि अववोधय रणाय सावधानं कुरु। कीदृशं ? निजगतौ त्वत् प्राप्तौ शीलं समाधिर्यस्य। समीचीनो हि योद्धा प्रतिभटं अवहितं कृत्वैव युध्यते इत्यर्थ:।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। ननु शस्त्रं विना कथं रणसिद्धिरित्यत आह, स्मरेति। पृथुलकुचनितम्बभारेण मन्दायमानतया उत्कण्ठाभरेण सत्वरया च पदस्खलनशङ्किता त्वं स्मरस्य, स्मरणमात्रेण सकलकलाकौशलदेशिकस्य कामस्य ये शराः, मोहनवशीकरणनिपुणाः पञ्चबाणाः तेभ्योऽपि सुभगाः सौभाग्यप्रकटनपटीयांसः पञ्चनखा यत्र तादृशेन करेण सखीमवलम्ब्य करं तत्प्रकोष्ठे विन्यस्य इत्यर्थः, सलीलमुत्कण्ठासम्भ्रमादि-व्यञ्जकविलासमनोहरं यथा स्यात्तथा, चल, प्रियाभिमुखं गच्छ। तथा चलन्ती निजोत्तरीयादिसमीकरण-कालीनभुजलताप्रक्षेपणवशजायमानैर्वलयक्वणितैः कङ्कणकलापशिञ्जितैर्हरिं रतियुद्धे प्रतिवीरत्वेन मनोहरं श्रीकृष्णम् अवबोधय। ज्ञापय। स्वागमनसूचकवाद्यघोषैरिव युद्धाय प्रोत्साहयेत्यर्थः। कीदृशं निजगतौ त्वत्प्राप्तौ शीलं समाधिर्यस्य तम्। शील समाधौ धातुः।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। स्मरशरसुभगेति; अथ गमनप्रकारमाह। हे सखि! करेण सखीमवलम्ब्य सलीलं चल। अपिचार्थे। सखीपरिवेष्टितेन तव गमनं भवतु। त्वं लीलया यथा भवेत्तथा चल। कीदृशेन ? स्मरशरसुभगनखेन तव नखाः करोरुहाः कन्दर्पस्य बाणा इव। वलयक्वणितेन रणितेन शब्दितेन वा गमनार्थं हरिं निगदित वोधय तव शीलं स्वभावम्। अथवा पाठान्तरे रतिसङ्गरसज्जं रतिरणनिमित्तं यथा प्रस्तूयते तथा। रणनिमित्तं वलयझणत्कारस्तथा नखायुधादयः भावी संग्रामं नाम रतिसंग्रामं सूचयति। प्रकटितो भटविहितं ध्वनितम्। अत्र संग्रामरूपव्यवहारस्य समारोपात् समासोक्तिरलंकारः। तल्लक्षणं समासोक्तिः समैर्यत्र कार्यलिङ्गविशेषणैः। व्यवहारः समारोपः समासोक्ति-स्ततो त्रिधा **(साहित्यदर्पणः)** ।।७।।

**८-श्रीजयदेवभणितमधरीकृतहारमुदासितवामम्।**
**हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामम्।। मुग्धे० ।।८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। श्रीजयदेवभणितं कर्त्तृ हरिविनिहितमनसां जनानां कण्ठतटीमभिरामं यथा स्यात्तथाधितिष्ठत्विति योजना। अधिशीङ्स्थासां कर्म इति कर्मत्वम्। ननु कथमभिरामं यदा कदापि हारार्पणेन कदापि कामिन्यार्पणेन विच्छेदादित्याह। अधरी कृतहारमित्यर्थः। ''अधस्तादपि चाधरः'' **इत्यमरः**। पुनः कीदृशम्। उदासितवामं हरीकृतकामिनीकं इतोऽप्यधिकरसत्वादित्यभिप्रायः।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।।अपि च, श्रीजयदेवेति। इदं श्रीजयदेवभणितं हरावारोपितमनसामविराममविच्छेदं कण्ठतटीमधितिष्ठति। अधरीकृतो हारो मुक्तादिग्रथितो येन। पक्षेऽधरीकृतो हारः शुद्धं वचनं येन। पुनः किंभूतम्? उदासितवामम्। उदासिता वामा स्त्री येन। अथवा उदासितं हरिभक्तिप्रतीपं वचनं येन। वा उदासितं निराकृतमन्यदपि सुन्दरं येन इति। हारनारीसुन्दरादीनां परिहारेणेदमेवैकं कण्ठे धारणीयमित्यर्थः। तथा च **सङ्गीतराजे**- 'आदितालः प्रथमतः प्रतिमण्ठस्ततः परम्। चतुर्मात्राह्वमण्ठश्च तुर्यः स्यादड्डुतालकः।। तालो वर्णयतिः पश्चान्नवमात्रिकमण्ठकः। निसारश्च तथा झम्पा द्रुतमण्ठश्च रूपकः।। प्रतितालस्त्रिपुटक एकतालीति संज्ञया। त्रयोदश क्रमात्ताला: प्रतितालं पदानि च।। यथा शोभालप्तियुञ्जि तावन्त्येव ततः परम्। काहली तुण्डकिन्यौ च भुक्ता च शृङ्गशङ्खकौ।। पटहश्च हुडु क्कं च मुरजः करटापि च। रुण्डा च डमरूढक्का पाटा एतत्समुद्भवाः। निःसारौ पटहो ढक्का मर्दलस्त्रिवली तथा। करटेति तथैतस्यां प्रधानाक्षरयोजना। एकताल्या ढक्कखी च त्रिवली दुन्दुभिस्तथा। घटश्चतुर्वर्ण्यकः स्यादधिका पाठसन्ततिः।। प्रतितालं प्रयोगोऽपि रागो नन्दो निगद्यते। शृङ्गारो विप्रलम्भाख्यो रस उत्तमनायकः।। दूतीसंवादकथनं नायिकायामिहेष्यते। एतत्स्वाल्लक्षणं यच्च तालराजिरसः स्मृतः।। प्रबन्धः कुम्भभूपेन हरिप्रवणचेतसा।। इति श्रीहरितालराजिजलधरविलसितनामा विंशतितमः प्रबन्धः।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।।श्रीजयदेवेति श्रीजयदेवेन भणितं गीतं हरौ कृष्णे विनिहितमारोपितं मनश्चित्तं यैस्तेषां भक्तानां कण्ठतटीम् अविरामं सर्वदा अधितिष्ठतु कण्ठदेशे वसत्वित्यर्थः। अधिशीङ्स्थाषामाधारिकर्म कीदृशं भणितम् आधारीकृतः स्वगुणै हीनः कृतः मुक्ताहारो येन पुनः कीदृशम् उदासीनता स्वगुणैस्तिरस्कृता वामा सुन्दरी येन यद्यपि हारस्य रमणं च कण्ठदेशस्थितस्य या शोभा तत्प्रदत्वं सम्भवति तथापि तयोरागिणामेव शोभाप्रदत्वं न तु मुमुक्षुणां तत्रापि तारुण्य एव न तु सर्वदा जयदेवभणितं तु कृष्णकथात्वेन हारापेक्षया चाधिक्यमित्यर्थः।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।।श्रीजयदेवेति। इदं श्रीजयदेवेन भणितं हरिविनिहितमनसां हरौ विनिहितं तत्परं मनो येषां तादृशानामविराममनवरतं कण्ठतटीमधितिष्ठतु कण्ठदेशे वसत्वित्यर्थः। कीदृशम्? अधरीकृतः स्वगुणैर्हीनीकृतो हारो येन तादृशम्। पुनः कीदृशम्? उदासिता

स्वगुणैस्तिरस्कृता रामा येन तादृशम्। यद्यपि हारस्य रामाणां च कण्ठदेशस्थित्या शोभाप्रदत्वं संभवति, तथापि तयो रागिणामेव शाभाप्रदत्वं न मुमुक्षूणाम्। तत्रापि तारुण्य एव न तु सर्वदा। जयदेवभणितं तु कृष्णकथात्वेन च सर्ववयस्सु शोभाप्रदमिति हारापेक्षया नायिकापेक्षया चेदमधिकमिति भाव:। कण्ठतटीमित्यत्र 'अधिशीङ्स्थासां कर्म' (पा. १/४/४६) इत्यधिकरणे द्वितीया।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।। श्रीजयदेवेति। उदासित: स्थिरीकृत: वाम: वक्रभाव: यत् तादृशं हारस्य कण्ठसीमायां वक्राकारत्वेन लम्बमानत्वात् सूक्तिमालिकायास्तद्वैलक्षण्यसूचनार्थमिदं बिशेषणमवगन्तव्यम्। अतएवाधरीकृत: सूक्तिमालिकया तिरस्कृत: हार: वक्राकार: मुक्ताहारो येन तादृशं श्रीजयदेवभणितसूक्तिमालिकारूपं गीतं अथवा जयदेवभणित मुक्तरूपं गीतं वा हरौ श्रीकृष्णे विनिहितानि विशेषणे न्यस्तानि मनांसि यैस्तेषां हरिप्रवणचित्तानामित्यर्थ:। कण्ठतटीं कण्ठसीमानं अविरामं न विद्यते विरामो यस्मिन् कर्मणि तद् यथातथा निरन्तरमित्यर्थ:। अभिराम इति क्वचित्पाठ:, तदा गीतविशेषणं क्रियाविशेषणं वा अधितिष्ठत्वधिवसतु निरन्तरं हारवत् कण्ठदेशे तिष्ठत्वित्यर्थ:। अधिशीङ्स्थासां कर्मे (१।४।४६) त्यादिना कर्मसंज्ञा।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। कीर्त्त्यनवृत्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। श्रीजयदेवभणितमिदं गीतं कर्त्तृ हरौ विशेषतो निहितमारोपितं मनो यैस्तेषाम् अविरामं यथा स्यादेवं कण्ठतटीं कण्ठस्थलीमधितिष्ठत्वाश्रयत्वित्यर्थ:। अधिशीङ स्थासां कर्मेति कण्ठतव्या: कमता। कीदृशम्? अधरीकृतो हारो येन तत्। उदासिता औदास्यं प्रापिता रामा सुन्दरी येन तत्। तथा च एतादृशं सरसं गीतं यत्कण्ठगतं हारं रोमाञ्च लंघयतीति वाक्यार्थ:।।८।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।८।। (श्री जयदेवेति।) [३] श्रीजयदेवेन भणितं [४] गीतं [५]हरिविनिहित मनसां [६] कृष्णनिविष्टचित्तानां अविरामं[७]निरन्तरं[८]कण्ठतटीं कण्ठप्रदेशेऽधितिष्ठतु[९]आश्रयतु। [१०]''अधिशीङ्स्थासां कर्म'' (पा.सू.१.४.४६) इत्यधिकरणे द्वितीया। [११]एतद्धारणमात्रेण कण्ठशोभा भवतीति भाव:। कीदृशम्? अधरो कृत: स्वगुणैर्हीनीकृतो हारो मुक्ताहारो येन। पुन: कीदृशम्? उदासिता: [१२] स्वगुणै: स्वकृता वामा: [१३]सुन्दर्यो येन। हरिसुरतवर्णनेन जयदेवभणितं मणिहारादिभ्यो वाऽधिकमिति भाव:।।८।।

[१४] इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मज श्रीवनमालिभट्ट-विरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां विंशः प्रबन्धः।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।८।।श्रीजयदेवेति।श्रीजयदेवेन भणितं गीतं हरौ कृष्णे विनिहितमारोपितं मनश्चित्तं यैस्तेषां[१५]भक्तानां कण्ठतटीं अविरामं सर्वदाऽधितिष्ठतु आश्रयतु। कीदृशं भणितम्? अधरीकृतः स्वगुणै[१६]र्नीचीकृतः हारो मुक्ताहारो येन। [१७]पुनः [१८]कीदृशम् उदासिता। स्वगुणैस्तिरस्कृता वामा सुन्दरी येन। यद्यपि हारस्य रामाणाञ्च कण्ठदेशे स्थित्या शोभाप्रदत्वं सम्भवति तथापि [९] तयो रागिणामेव [१०] शोभाप्रदत्वं न तु मुमुक्षूणां तत्रापि तारुण्य एव न तु सर्वदा। [११] जयदेवभणितं तु कृष्णकथात्वेन हारापेक्षया चाधिकमित्यर्थः [१२]।।८।।

[१३]इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां विंशः प्रबन्धः।

१.मुपहसितवामम्-इ. २.कण्ठनलिनमविरामम्-इ. ३.श्रीजयदेवभणितं-इ. ४.नास्ति-इ.फ.ग.ह.ज. ५.विनिहितमनसां-ज. ६,७.नास्ति-अ.ब. ८.नास्ति-अ.ब.इ.ग.ह. ९.समीपं वसतु-फ.ज. १०.कर्मण्यधिकरणे द्वितीया-फ.ज. ११.एतद्धारणे कण्ठशोभा-ग. १२.नास्ति-फ. १३.सौन्दर्यादिगुणा-अ.ब. १४.पुष्पिकेयं नास्ति-अ.ब.इ.फ.ग.ह.ज. १५.नास्ति-क. १६ नीचः कृतः-क. १७.नास्ति-ल.म. १८.नास्ति-ड.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।८।।श्रीजयदेवेति।श्रीजयदेवस्य भणितं वचनं अधरीकृतः हारो येन तम्।उपहसितः वामः येन तम्। हारौ कृष्णे विनिहितं मनो यैः तेषां कृष्णभक्तानां कण्ठ एव नलिनं कमलं; जातावेकवचनम्। अविरामं अवसानं न विद्यते यस्मिन् तथा अविश्रान्तं अधिगच्छतु।अत्यन्तसंयोगे द्वितीया।।८।।

[१४]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां विंशः प्रबन्धः।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्री जयेति।श्रीजयेदवभणितं कर्त्तृ हरिविनिहितमनसां कृष्णार्पितचित्तानां जनानां कण्ठतटीम् अविरामं यथास्यादेवम् अधितिष्ठतु, अधिरोहत्वित्यर्थः।अधिशीङ्स्थासां कर्मेति आधारस्य कण्ठतटीशब्दस्य कर्मता, ''तटं नपुंसकं क्षेत्रे प्रतीरे च तटी त्रिषु'' इति **मेदिनी**।अधरीकृतहारमुदासितारामा मिति द्वयं भणितविशेषणम् अधिष्ठानक्रिया-विशेषणं वा अधरीकृतस्तिरस्कृतः हारो येन यत्र क्रियायां वा। उदासिता दूरीकृताविक्षिप्ता) ? वा रामाः सुन्दर्यो येन यत्र क्रियायां वा।हारो रामा च कण्ठतटे प्रीयते।तदेतदुभयमपि दूरीकृत्य श्रीजयदेवभणितिः अविरामं कण्ठतटीमधिरोहत्विति

समुदितार्थ: (यद्वा आगत प्रायेति मत्वा त्वां पश्यति अर्थाद्दूरमवलोकयति) एतेन कण्ठयोग्याभ्यां हारस्त्रिभ्यामप्यस्यगीतस्याधिक रम्यत्वमुक्तम्। एतत् आसाद्य वैष्णवा हारस्त्रियावपि त्यजन्तीत्यर्थ: आशंसायां लोट्। सुन्दरीरमणीरामेत्यमर:।।८।।

### (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।८।।श्रीजयदेवभणितं हरिविनिहितमनसां जनानां कण्ठतटीमविरामं यथा स्यात्तथा अधितिष्ठतु। हारादे: सद्भावे कथमस्याविरामतासिद्धिस्तत्राह। अधरीकृतो हारो यन तत् इदमेव परमं कण्ठभूषणमित्यर्थ: भूषणवैतृष्ण्येण वामासक्त्या विच्छेद: स्यात् तत्राह। दूरीकृता वामा प्रकृष्टा रमणी येन तत् हृद्रोगमाश्वपहिनोतीत्युक्ते:।।८।।

### (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।।श्रीति। श्रजियदेवभणितं गीतमिदं हरौ विशेषेण निहितानि अर्पितानि मनांसि यैस्तेषां हरिलीला कृष्टचित्तानामित्यर्थ:। कण्ठतटीमविरामं विरामरहितं निरन्तर-मित्यर्थ:, अधितिष्ठतु, निवसतु। तेषां सदा गानविषयो भवत्वित्यर्थ:। 'अधिशीङ् स्थासां कर्म' इति कण्ठतट्या: कर्मत्वम्। सदावस्थाने हेतुद्वयम्। कीदृशम्, अधरीकृत: स्वमाधुर्यलोभोदितविषयवैतृष्ण्यं संपादय भूमौ पातितो हारो येन तम् । तथा उदासिता, दूरीकारिता वामा उत्कृष्टरमणी येन तत्। अभिराममिति क्वचित् पाठ:, तदा यतोऽतिरमणीयमित्यनयोर्हेतुत्वेन व्याख्येय:। यथोक्तं **श्रीभ्रमरगीतायाम्,**

यदनुचरितलीलाकर्णपीयूषविपृट्
सकृद्दनविधूतद्वन्द्वधर्मा विनष्टा:।
सपदि गृहकुटुम्बं दीनमुत्सृज्य दीना
बहव इव विहङ्गा भिक्षुचर्यां चरन्ति।।

किं च यथा **भक्तिरसामृतसिन्धौ-**

यदवधि मम चेत: कृष्णपादारविन्दे,
नवनवरसधामन्युद्यतं रन्तुमासीत्।
तदवधिनवनारीसङ्गमे स्मर्यमाणे,
भवति मुखविकार: सुष्ठु निष्ठीवनं च।। इति ।।८।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।।श्रीजयदेवेति; श्रीजयदेवस्य कवेरिदं हरिविनिहितमनसा जनानां भक्तानां कण्ठतटे सदाविलसतु। अविरामगत्या तन्नामोच्चारणं भवतु। कण्ठे लम्वितहारात् श्रेष्ठं भवतु हरेर्नाम। नामस्मरणे वाराङ्गना वा स्थानं न लभ्यते। इति। हार: नारीसुन्दरादीनां

परिहारेणेदमेवैकं कण्ठे धारणीयमित्यर्थः। तथा च **संगीतराजे** आदितालः प्रथमतः प्रतिमण्ठस्ततः परम्। चतुर्मात्रा ह्वमण्ठश्चतुर्यः स्यादट्टतालकः।।
तालो वर्णयति पञ्चान्नवमात्रिक मण्ठकः। निसारश्च तथा झम्पा द्रुतमण्ठश्च रूपकः।।
प्रतितालस्त्रिपुरक एकतालीति संज्ञया। त्रयोदश क्रमाताला: प्रतितालं पदानि च।।
यथा शोभालप्तियुञ्जि तावत्येव ततः परम्। काहली तुण्डकिन्यौ च भुक्ता च शृङ्गशङ्खकौ।।

पटहश्च हुडुक्कं च मुरजः करटापि च। रुण्डा च डमरुढक्का मर्दलस्त्रिवली तथा।।
करटेति तथैतस्यां प्रधानाक्षरयोजना। एकताल्या ढक्कखी च त्रवली दुन्दुभिस्तथा।।
घटश्चतुर्वण्यकः स्यादधिक पाठसन्ततिः। प्रतितालं प्रयोगोऽपि राग नन्दो निगधते।।
शृङ्गारो विप्रलम्भाख्यो रस उत्तमनायकः। दूती संवादकथनं नायिकायामिहेष्यते।।
एतस्थात् लक्षणं यच्च तालराजि रसः स्मृतः। प्रबन्धः कुम्भभूपेन हरिप्रवणचेतसा।।
इति।।

श्रीहरितालराजिजलधरविलसितनामा विंशतितमः प्रबन्धः। इत्येवं कुम्भनरपतेः मतं प्रपञ्चितम्।।८।।

**५९-सा मां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यङ्गमालिङ्गनैः**
**प्रीतिं यास्यति रंस्यते सखि! समागत्येति चिन्ताकुलः।**
**स त्वां पश्यति वेपते पुलकयत्यानन्दति स्विद्यति**
**प्रत्युद्गच्छति मूर्च्छति स्थिरतमःपुञ्जे निकुञ्जे प्रियः।।५९।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५९।। सम्प्रति राधायां हरेरुत्कण्ठां सखी कथयत्याह। सखीनायकस्यानुरागं रञ्जयति। सा मामिति। समागत्य द्रक्ष्यति इत्यादिकं विचिन्त्य स्थिरतमः कुञ्जे निकुञ्जे प्रिया हरिः स त्वां पश्यति इत्यादि योजना। स त्वां पश्यति इति वेपते। पुलकयत्यानन्दति स्विद्यति प्रत्युद्गच्छति, मूर्च्छति, स्थिरतमः तत् सात्त्विकभावादित्यधिगन्तव्यम्। प्रत्युद्गच्छतीति सैषा प्रिया समागता इति कृत्वा ससम्भ्रममभ्युत्थानं करोति। मूर्च्छतीति अनन्तरध्यानं ध्यानभङ्गात् त्वामदृष्ट्वा।।५९।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।५९।। इदानीं तच्चेष्टाकथनव्याजेन गन्तुं व्याकुलयति, सा मामिति। हे सखि! प्रियः कृष्णो निकुञ्जे भवत्वा अपेक्षयेत्येवं कुर्वन्नास्ते। किंभूते निकुञ्जे ? स्थिरतमःपुञ्जे

स्थिरान्धकारचये। इतीति किम्? सा प्रिया समागत्य मां द्रक्ष्यतीति चिन्ताकुलो भवति, दूरं च पश्यति। एतावता हि सात्विकभावौ स्तम्भवैवर्ण्ये संजातौ भवत इति सूचितम्। चिन्तया स्तम्भं दूरदर्शनेन वैवर्ण्यमाप्नोति। दृष्ट्वा च स्मरकथां वक्ष्यतीति वेपते पुलकयति च। एवं द्वावपरौ सात्त्विकौ वेपथू रोमाञ्चश्चेति। कथा: कृत्वा प्रत्यङ्गमालिङ्गनै: प्रीतिं यास्यतीत्यानन्दति आनन्दाश्रु मुञ्चति स्विद्यति च। एवमश्रुस्वेदावुक्तौ। आलिङ्ग्य च नानारतोपचारै रंस्यते। चिन्तया आह्वानाशक्तत्वे प्रत्युद्गच्छति। त्वेदलाभे मूर्च्छति च। एवं स्वरभङ्गप्रलयौ दर्शितौ। एवं स कृष्णस्त्वदभिकाङ्क्ष्याऽष्टावपि सात्विकान्भावाननुभवन्नास्ते। प्रत्यङ्गालिङ्गनेन स्थितालिङ्गनं वृक्षाधिरूढमुक्तं भवति। तल्लक्षणं यथा, 'रमणचरणमेकेनाङ्घ्रिणाक्रम्य खिन्नं श्वसितमपरपादेनाश्रयन्ती तदूरुम्। निजमथ भुजमेनं प्राञ्चयन्ती तदंसं तरुमिव कमितारं चुम्बनार्थाधिरोढुम्।। यदभिलषति नारी तच्च वृक्षाधिरूढम्।।' शार्दूलविक्रीडितं वृत्तम्। दीपकमलंकार:।।५९।।

## (३) जगद्धरकृत- सारदीपिका

।।५९।। इदानीं सखी कृष्णस्य स्नेहातिशयमाह सामिति हे राधे! स प्रिय: कृष्ण: स्थिर: निश्चल: तम: कुञ्जे अन्धकारसमूहे अन्यत्र तस्मिन्निकुञ्जे लतागृहे त्वां पश्यति ध्यानेन दृष्ट्वापि किमियं पुरुषं मधुरं वदुष्यतीति भयात् वेपते कम्पते पुलकयति अङ्गानीत्यर्थात् ध्याने नैव त्वदालिङ्गनं परिकल्प्य स रोमाञ्चो भवतीत्यर्थ:। उद्यानेन त्वत्सुरतकेलिं परिकल्प्य स्विद्यति पश्चात्केलिं कृत्वा उत्थाय गन्तुं प्रवृत्ता यां त्वयि प्रत्युद्गच्छति प्रत्युत्थानं करोति तत: ध्यानेन विच्छेदे द्रक्ष्यति अनुकुलतया ईक्षते दृष्ट्वा च प्रियकथां मनोहरां कथां वक्ष्यति वदिष्यति उक्त्वा प्रत्यङ्गं प्रति आलिङ्गनै: प्रतिं सन्तोषं प्राप्स्यति समागम्य मिलित्वा रम्यते। मया सह क्रीडिष्यति इति प्रश्ने समागम्येति पूर्वार्द्धं सर्वत्रयोज्यं दीपकालङ्कार: शार्दूलविक्रीडितं वृत्तम्।।५९।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५९।। इदानीं हरेरुत्कण्ठाधिक्यमाह, सा मामिति। हे सखि! राधा आगत्य मां द्रक्ष्यति ईक्षिष्यते। दृष्ट्वापि मां स्मरकथां वक्ष्यति कथयिष्यति। स्मरकथामुक्त्वापि सा प्रत्यङ्गावयवं ममालिङ्गनै: प्रीतिं यास्यति। प्रीतियुक्तापि मया सह रंस्यते केलिं करिष्यति इति चिन्ताकुल: सन्कृष्ण: स्थिरतम:पुञ्जे स्थिरान्धकारसमूहे निकुञ्जे त्वां पश्यति ध्यानदृष्ट्या। किमियं परुषं वदिष्यति चेति भिया साध्वसेन वेपते कम्पते। पुलकयति, अङ्गानीत्यर्थात्। ध्यानेनैव तवालिङ्गनं परिकल्प्य साध्वसेन रोमाञ्चयुक्तो भवतीति भाव:। पश्चाद्ध्यानेनैव त्वत्सुरतकेलिं परिकल्प्यानन्दयुक्तो भवतीति। ततो

ध्यानेनैव सुरतसुखं परिकल्प्य स्विद्यति प्रस्वेदयुक्तो भवति। पश्चात्केलिं कृत्वोत्थाय गन्तुं प्रवृत्तायां त्वयि प्रत्युद्गच्छति प्रत्युत्थानं करोति। पश्चाद्ध्यानविच्छेदे त्वामदृष्ट्वा मूर्च्छां प्राप्नोति।।५९।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५९।। त्वया शीघ्रमभिसरणं न क्रियते चेत् प्रियचित्तव्यामोहो भविष्यतीत्याह। सामिति। हे सखि! राधे स प्रियः श्रीकृष्णः सा मया कृतापराधा राधा समागत्य मत्समीपं प्राप्य अस्य सर्वत्रान्वयः। मां द्रक्ष्यति रोषं परित्यज्य वीक्षते। न केवलं दर्शनमात्रं तदनन्तरकृत्यं च सम्भाषणमपि सम्भविष्यतीत्याह। स्मरेति। स्मरकथां मन्मथोद्दीपकरतस्य वार्त्तां वक्ष्यति वदिष्यति न केवलमुद्दीपककथामात्रकरणम् अपि त्वनन्तरकृत्यमालिङ्गनमपि सम्भविष्यतीत्याह। प्रत्यङ्गमालिङ्गनैः प्रीतिं यास्यति। न केवलमालिङ्गनमात्रमपितु सम्भोगं करिष्यतीत्याह। रंस्यत रति रंस्यते सुरतसम्बन्ध-विशेषैः क्रीडिष्यत इति चिन्ताकुलः पूर्वोक्तविचार परम्पराव्याकुलितचित्तः सन् त्वां पश्यति। चिन्तावशात् पुरः प्रादुर्भूतां भवतीं वीक्षिष्यते। भविष्यति लट्। अथवा चिन्तावशात् सन्निधानेन लट्। प्रयोगोपपत्तिर्न केवलं दर्शनमात्रम् अपि तु वेपते भबद्दर्शनात्कम्पिष्यते, अन्यसम्भोगरूपापकारिणः प्रियावलोकने कम्पस्य युक्तत्वादितिभावः। न केवलं कम्पनमात्रम् अपितु पुलकयति भवद्दर्शनजनित-सात्त्विकोदयवशात् गात्रं पुलकवत् करोतीत्यर्थः। विरहपूर्वक्रिया दर्शनस्य रोमोद्गमत्वादिति भावः। पुलकयतीत्यत्र तत्करोति णिचिति णिच्। न केवलं पुलकजननमात्रं किन्तु उत्पुलकीभावानन्तरमनन्दोऽस्तीत्याह। आनन्देति। आ नन्दति मत्कृता पराधपरम्परामविगणय्यैव चिरपरिचितं मां विचार्य्य आगतेत्यन्तरमेव न केवल मानन्दमात्रं तदनुगुणस्वेदाख्यसात्त्विकभावोऽप्यस्तीति आह। स्विद्यतीति। स्विद्यति भवद्दर्श नजनित-सात्त्विकभावानुकूलकृत्यमस्तीत्याह। प्रत्युद्गेति प्रत्युद्गच्छति चिन्तावशात् पुरः प्रादुर्भूता त्वमागतेति प्रत्युत्थानं करोतीत्यर्थः अन्यथा सात्त्विकोदयस्य नैरर्थक्यं स्यादिति भावः। प्रत्युद्गमनान्तरं कृत्यामाह मूर्च्छतीति। तमः पुञ्जे उक्तवर्ण्णनानुकूलमोहपटले सति निकुञ्जे लतामन्दिरे मूर्च्छति मूर्च्छां प्राप्नोति, त्वदागमनहेतुनेति शेषः। अथवा तमसोऽन्धकारस्य पुञ्जं समूहो यस्मिन्निति व्युत्पत्त्या इदं कुञ्जविशेषणं वा। अतश्च त्वया शीघ्रमेवाभिसर्त्तव्यमिति तात्पर्य्यम् यत्राष्टमे नवमेऽनङ्गावस्थे अनुसम्बन्धेषु सात्त्विकेषु मध्यरोमाञ्चाद्वयः कति च न बोद्धव्याः, वेपते पुलकयतीत्यादिक्रियापदेषु पश्यतीत्यत्रैव प्रक्रियानुसन्धेया, अत्र सञ्चारिभावानां मध्ये केषांचच्छलवतानुसन्धेया।।५९।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५९।। तत्र गमनेऽपि यदि कदाचित् कृष्णो न मीलति यदि वा न सम्भाषते तदा द्विगुण: परिताप: स्यादित्याशङ्कायामाह, हे राधे ! निकुञ्जे लतागृहे प्रिय: कृष्ण: एतत् सर्वमाचरति। कीदृशे निकुञ्जे ? स्थिरतम:पुञ्जे स्थिर: स्थायी निविड इति यावत्, तम:पुञ्जो यत्र तादृशे। एतेन निविडान्धकारो दर्शित:। कीदृश: हे सखि ! सा राधा मां समागत्य द्रक्ष्यति ईक्षिष्यते, स्मरकथां कामजनितकथां वक्ष्यति कथयिष्यति, प्रत्यङ्गं प्रत्यवयवम् आलिङ्गनै: आलिङ्गय प्रीति यास्यति प्रीता भविष्यति रस्यते रमणां करिष्यतीत्यनेन प्रकारेण चिन्तान्वित: चिन्तायुक्त:। राधासख्या: निरुपदसखिपदेन सम्बोधनेन तदभेद: सूचित:। हे सखि राधे इति सखीवचनतया न योजनोयम्। तथा सति विरोधिव्यवधानेनान्वयबोधशैथिल्येन रसमङ्ग: स्यादिति। राधासम्बाध्यता च प्रकरणादेव यास्यतीति किं किमाचरतीत्याह, दूरं पश्यति तवागमनशङ्कया पर्यन्तमीक्षते, अनन्तरं त्वामुपगतामिवाशंक्य तव भयात् सात्त्विकभावात् वेपते, कम्पते पुलकयति अङ्गमित्यर्थात्, नन्दति हृष्यति, स्विद्यति स्वेदवान् भवति, तत: प्रत्युदगच्छति तत: त्वामनवाप्य मूर्च्छति मूर्च्छां गच्छति। तथा चेदानीमपि विविधारम्भ: भवत्परायणो कुञ्ज एव वसति तिष्ठतीति वाक्यार्थ:।।५९।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५९।। एवमनभिगच्छन्तीं श्रीकृष्णस्य [१५] तदुत्कण्ठामाह सामामित्यादिना। हे सखि ! सा राधा मां द्रक्ष्यति  आदरेण द्रक्षिष्यते। [१६]दृष्ट्वा [१७] प्रियकथां मनोहरानन्दकेलिवार्तां च वक्ष्यति वदिष्यति। अनङ्गालापं कृत्वा [१८] प्रत्यङ्गं प्रत्यवयवं प्रति आलिङ्गनै: [१] प्रीतिं [२] स्नेह यास्यति प्राप्स्यति। प्रीता सती मया सह रंस्यते [३] केलिं करिष्यति। इत्यनेन प्रकारेण चिन्ताकुल: [(४)] चिन्तायुक्त: स प्रियो वल्लभ: श्रीकृष्णो निकुञ्जे [५]लतामन्दिरे स्थिरतम:पुञ्जे निश्चलान्धकारसमूहे [६] त्वां पश्यति त्वद्भिया वेपते कम्पते। एतेन[७]प्रथमसमा[८]गमावस्थामनुभवतीति ध्वनि:। तच्चिह्णमाह पुलकयत्यङ्गानि [९] तवालिङ्गनाय सम्भाव्य त्वत्स्पर्शसुखेन [१०] पुलकिताङ्गो भवतीति ध्वनि:। किञ्चसुरतकेलिं सम्भाव्यानन्दति सानन्दो भवति। किञ्च सुरतसुखं विभाव्य स्विद्यति [११] प्रस्वेदयुक्तो भवति। [१२] किञ्च त्वामागतां पुरतो विभाव्य प्रत्युद्गच्छति प्रत्युत्थानं करोति। किञ्च त्वामदृष्ट्वा मूर्च्छति क्लेशं प्राप्नोति। [१३] किं बहुधा कर्तव्यम् ? गोपालभूपस्यान्तिकं त्वया गन्तव्यमिति [१४] मम प्रार्थना।।५९।।

१.प्रियकथां-ड.२.समासम्येति-ड.३.सञ्चिन्तयन्-इ.४.दूरं पश्यति-इ.सत्वां पश्यति-ड. ५.कम्पते-ड.६.त्यानन्दने-इ.७.खिद्यति-इ.८.प्रियतम: कुञ्जे निकुजे प्रिय:-ड.९.तत्र-क.

१०.शोभाप्रदत्वं वक्ष्यति-क.११.त:१२.पर्यन्तं नास्ति-ड.१३.नास्तीयं पुष्पिका-ड.क.ल.म. १४.पुष्पिकेयं नास्ति-इ.१५.तदुक्तं च निरूपयति-इ.तदुत्कण्ठां निरूपयति-फ.ग.ह.ज.१६.अतो दृष्ट्वा-फ.ज.१७.स्मरकथां मनोहरानङ्गकेलिवार्तां-इ.फ.ग.ह.ज.१८.प्रत्यङ्गावयवं-अ.ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५९।। इदानीं सखी कृष्णस्य स्नेहातिशयमाह, सा मामिति। हे [१५] राधे! स प्रियः कृष्णः [१६]स्थिरो निश्चलस्तम पुञ्जोऽन्धकारस्तोमः यत्र निकुञ्जे त्वां पश्यति; ध्यानेन दृष्ट्वाऽपि किमियं परुषं मधुरं वा वदिष्यतीति भयात्कम्पते। [१७]पुलकयत्यङ्गानि। ध्यानेनैव त्वदालिङ्ग नं परिकल्प्य [१८] सरोमाञ्चः। [१९] ध्यानेन त्वत्सुरतकेलिं- [२०]परिकल्प्यानन्दति सानन्दो भवति। सुरतसुखं सङ्कल्प्य [२१] स्विद्यति प्रस्वेदयुक्तो भवति। पश्चात्केलिं कृत्वा [२२] उत्थाय गन्तुं प्रवृत्तायां त्वयि [२३] प्रत्युद्गच्छति प्रत्युत्थानं करोति। ततो ध्यानविच्छेदे त्वामदृष्ट्वा मूर्च्छति। कीदृशः [२४]प्रियः? [२५] इति चिन्ताकुलः चिन्तायुक्तः। इति [२६] किम्? हे सखि! सा राधा मां प्रक्ष्यति अनुकूलतया ईक्षिष्यते, दृष्ट्वा च प्रियकथां मनोहरां कथां वक्ष्यति वदिष्यति, उक्त्वा च [४] प्रत्यङ्गं प्रत्यवयवं [५] प्रत्यालिङ्गनैः प्रीतिं [६] सन्तोषं [७] यास्यति [८] प्राप्स्यति। समागम्य [९] मिलित्वा रंस्यते मया सह क्रीडिष्यतीति प्रश्ने समागम्येति पूर्वार्धे सर्वत्र योज्यम्।।५९।।

१.प्रीतिं यास्यति-ग.२.त:५.पर्यन्तं नास्ति-ज.३.क्रीडिष्यति-इ.फ.ग.ह.ज.४.चिन्ताकुलः-अ.६.समागत्य त्वां पश्यति-इ.ग.ह.त्वां समागत्या पश्यति-फ.ज.७.समागमस्थामनुभवतीति ध्वनि-ग.८.गतावस्थां-अ.ब.९.तवालिङ्गनं विभाव्य-इ.ग.ह.तवालिङ्गनान्तं विभाव्य-फ.ज.१०पुलकाङ्गो-अ.ब.इ.फ.ग.ह.ज.११.स्वेदयुक्तो-फ.ज.प्रस्वेदनपुलकाङ्गो-ग.१२.नास्ति-अ.ब.१३.किञ्च-अ.ब.१४.प्रार्थना मम-ग.१५.सखि-क.ल.म.१६.स्थिरोऽचलस्तमः:पुञ्जोऽन्धकारसमूहो यस्मिन् निकुञ्जे लतागृहे त्वां पश्यति-क. निश्चलस्तम पुञ्जोऽन्धकारसमूहो यस्मिन् निकुञ्जे लतागृहे त्वां पश्यति-ल.म.१७.पुलकयत्यङ्गानीत्यर्थः-क.ल.म.१८.सरोमाञ्चो भवतीत्यर्थः-क.ल.म. १९.नास्ति-ड. २०.कल्प्य सानन्दः-ड.२१.स्विद्यते-ड.२२-२४.नास्ति-ड.२५.रतिचिन्ताकुलः सुरतचिन्तायुक्तः२६.नास्ति-ड.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५९।। सेति। हे सखि! सा राधा समागत्य मां द्रक्ष्यति आलोकयिष्यति। स्मरस्य कथां विरहकाले मदनबाधादिकं मनस्सङ्कल्परूपं वक्ष्यति व्या(ख्या) स्यति। प्रत्यङ्गं अङ्गमङ्गं आलिङ्गनैः प्रीतिं हर्षं यास्यति प्राप्नोति। रंस्यते च, रमेरात्मनेपदप्रयोगः। सुरतं करिष्यति; आलिङ्गनस्य प्रागुक्तत्वात्। इति सञ्चिन्तयन् प्रियः कृष्णः स्थिरो गाढवान् तमसः पुञ्जो यस्मिन् तस्मिन् निकुञ्जे दूरं पश्यति मार्गमवलोकते। वेपते कम्पते। पुलकयति रोमाञ्चयति। आनन्दते हर्षति। सञ्जातानन्द इवाचरति। खिद्यति

खिन्नो भवति। प्रत्युद्गच्छति समागताऽसीति सम्मुखं याति। मूर्च्छति अनागमान्मूर्च्छां याति। अत्र पूर्वार्धे सेति कारकस्य चतुर्णां तिङां दीपकत्वात्कारकदीपकालङ्कार:। उत्तरार्धे प्रिय इति कारकस्य सप्तानां तिङां अन्वयेन प्रकाशकत्वात्कारकदीपकालङ्कार:। अनयोर्निरपेक्षत्वात्संसृष्टि: ।सञ्चारीभाव: सात्त्विकभावश्च तत्तत्क्रियाभिर्व्यज्यते।।५९।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५९।। सम्प्रति राधायां हरेरुत्कण्ठां सखी कथयन्त्याह। सा मामिति। हे सखी निकुञ्जे स तव प्रिय: इति चिन्ताकुलम् एवं विधया चिन्तया पूर्ण:सन् त्वां पश्यति आगतप्राये तिमत्वा दूरमवलोकयतीत्यर्थ:। अतो वेपते अदृष्टा च स्मरवेगात् पुनस्त्वां सङ्कल्पेत्यधिगन्तव्यम्। सात्त्विकाद् वा तस्यां महद् विप्रियं मयाचरितमिति कृत्वा वा। पुलकयति आनन्दति स्विद्यतीति सात्त्विकभावादित्यधिगन्तव्यम्। प्रत्युद्गच्छतीति त्वामागतां बुद्ध्वा ससंभ्रममभ्युत्थानं करोतीत्यर्थ:। मूर्च्छतीति तदन्यथाभावात् त्वामदृष्ट्वा मोहमापद्यत इत्यर्थ:। यया चिन्तया तस्य अमी कामविकारा जाता स्तदाह। सा राधिका समागत्य मां द्रक्ष्यति मानं विमुच्य मयि दृष्टिपातं करिष्यति। स्मरकथां वक्ष्यति कथयिष्यति। प्रत्यङ्गमालिङ्गनै: प्रीतिं यास्यति। प्रीता भविष्यति। प्रत्यङ्गमिति वीप्सायामव्ययीभाव:। रंस्यते रमणं करिष्यति क्रीडामुत्पादयिष्यतीति एवमादि चिन्तयन्नित्यर्थ:। अत्र प्रथमतो दर्शनं तदनन्तरमालापस्तत:परं प्रीत्यतिशयेन आलिङ्गनम्। तस्मात् सुरतमिति परंपराया युक्तियुक्तप्रार्थनया अभिलषितमिति मन्तव्यम्। निकुञ्जे किंविधे ? स्थिरतम: पुञ्जे, स्थिरनिश्चलस्तम: पुञ्जस्तिमिरराशिर्यत्रेति विग्रह:। स्यान्निकाय: पुञ्ज: राशी**त्यमर:**।।५९।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५९।। पुन: त्वरयितुं श्रीकृष्णस्यात्युत्कण्ठामाह सा मामिति । सा प्रिया समागत्य मां द्रक्ष्यति, दृष्ट्वा च स्मरकथां वक्ष्यति, प्रेमालापं कृत्वा च प्रत्यङ्गमालिङ्गनै: प्रीतिं प्राप्स्यति, प्रीतीयुक्ता सती मया सह रंस्यते इति संचिन्तयन् स्थिरतम:पुञ्जे तमालवनान्धकारनिविड़े तरुच्छायान्धकारस्यैव स्थितत्वात् ''तम: प्रविष्टमालक्ष्य'' इति **श्रीशुकोक्तिवत्** निकुञ्जे स प्रिय: श्रीकृष्ण: त्वां पश्यति, दृष्ट्वा च मुदा वेपते पुलकयति, आनन्दति, स्विद्यति, सैषा प्रिया आगतेति प्रत्युद्गच्छति, ततश्चानन्दावेशेन मूर्च्छति ।।५९।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५९।। कीदृशं तस्य सङ्गतिशीलत्वमित्यत आह, सेति। हे सखि! स्थिरतम: पुञ्जे, स्थिरचन्द्रोदयेऽपि अनाहततम:पुञ्ज: यत्र तादृशे निकुञ्जे, गाढान्धकारावृत-

नीरन्ध्रलतामन्दिरे त्वदागमनं प्रतिपालयन् स्थित: स: प्रिय: श्रीकृष्ण: इति, चिन्ताकुल:, ईदृग्विधमनोरथपरीतचित्तस्त्वां पश्यति। कथमधुनाऽपि प्रियतमा नागतेति, चरणाग्ररुद्धवसुध उद्ग्रीवं त्वदागमनमार्गस्य दूरे दृष्टिमुत्क्षिप्य उत्कण्ठातिशयस्फुर्त्ति-विशेषेण त्वामागतामालोकते। तथा वेपते, सम्भ्रमातिरेकवशात् कम्पते। तथा पुलकयति, त्वत्स्पर्शसुखस्मरणेन रोमाञ्चिताङ्गो भवति। तथा पुन: स्विद्यति, न खलु पुन: कोऽप्यपराध: स्यादिति भयशङ्कया स्वेदयुक्त: सम्पद्यते। तथा प्रत्युद्गच्छति। तव समीपागमनं निश्चिन्वानस्त्वरयाभियाति। एवं हर्षातिभूमिमारूढस्त्वामपश्यन् मूर्च्छति मूर्च्छां प्राप्नोति। कीदृशास्ते मनोरथा इत्यत आह; सेत्यादिना। सा विविधचाटुवादाङ्गी-कृतप्रसादा राधा समागत्य सविलासमन्थरगमनेन मत्समीपं प्राप्येति सर्वत्रापि योज्यम्। चकोरवत्त्वन्मुखचन्द्रमवलोकयन्तं मां द्रक्ष्यति। विकसितापाङ्गितक्वणितादिविविध-भङ्गीबन्धुरमवलोकयिष्यति। तथा स्मरकथां वक्ष्यति। मया धृतकरकमला शय्यामानीता, 'प्रणयिनि। कथं ते मनोरथा आसन्' इति सविनयं पृष्टा, 'प्राणेश! त्वन्मनोरथा एव मम मनोरथा इत्यादि स्मरसम्बन्धिस्मितसुधास्नपितभावगर्भितभारती भणिष्यति। तथा प्रत्यङ्गमालिङ्गनै: स्वाङ्कमारोप्य सन्तापनिवृत्तये प्रतिप्रतिकं मया विरचितैराश्लेषै: प्रीतिं निरतिशयानन्दं यास्यति, प्राप्स्यति। तथा रंस्यते, वक्ष्यसि समारोप्य चुम्बनाद्युपलालिता यथापूर्वप्रस्तुततत्समयोचितसमस्तवैज्यात्यकृत्या क्रीडिष्यतीति। औत्सुक्यचित्तहर्षादीनां शावल्यम्।।५९।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५९।। सा मां द्रक्षतीति; इदानीं चेष्टाकथनेन गन्तुं व्याकुलयति, हे सखि! तवागमनव्याकुलचित्तेन नायक: श्रीकृष्ण: किं करोति तत्र कुञ्जे ? चिन्तयति, तस्या: आगमनानन्तरं सा मां द्रक्ष्यति नेत्रयो: मिलनं करिष्यति। मधुरस्मरकथां वक्ष्यति कामक्रीडाविषये वदिष्यति। मम प्रत्यङ्गं समग्रशरीरमालिङ्गनं करिष्यति। प्रीत्या मां रंस्यते रमणं करिष्यति। एवं सखी समागता इत्येवं चिन्तयति वारम्बारं श्रीकृष्ण:। नायिकानायकयो: रह: मीलनेन या: शृङ्गार चेष्टा: भवन्ति तासां सोपानानि अत्र वर्णितमस्ति। पुन: हे राधे तवानन्दागमने स चिन्तयति यत् तवागमनेन तस्य अष्टसत्वविकारा: प्रस्तूयन्ते। तद्यथा तस्या: शरीरं पुलकयति रोमाञ्चति। आनन्देन स्विद्यति अर्थात् स्वेद: प्रवहति। स्तम्भस्वेदरोमाञ्चितेन तस्य मूर्च्छादशाप्यनुभूयते। अत: सात्विकभावातिशयोऽपि द्योत्यते इति। स्वभावोक्तिरलंकार:। अभिलाष: इति कामिन: प्रथमा दशा। दीपकालंकार:। शार्दूलविक्रीडितम् वृत्तम्।।५९।।

**६०-अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलीं**
**मूर्ध्नि श्यामसरोजदाम कुचयो: कस्तूरिकापत्रकम्।**
**धूर्तानामभिसारसत्वरहृदां विष्वङ्निकुञ्जे सखि**
**ध्वान्तं नीलनिचोलचारुसुदृशां प्रत्यङ्गमालिङ्गति।।६०।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६०।। सम्प्रत्यन्धकारनैविड्यमभिसारोचितं प्रतिपादयन्त्याह। इदादीं शीघ्रगमनायानुकूलार्थं श्लोकैर्दर्शयति। हे सखि! राधिके! विष्वक् सर्वतो व्यापि ध्वान्तं सुदृशां प्रत्यङ्गमालिङ्गतीति योजना। ''समन्तस्तु परित: सर्वतो विष्वगित्यपी**त्यमर:**।'' कीदृशं नीलनिचोलचारु नीलवसनरुचिरं ननु सुदृशी भूषणं किं नास्त्येव येनान्धकारमलङ्कृत्य इत्याह।अभिसारसत्वरहृदामिति।अभिसारे सत्वरमलङ्कार ग्रहणेऽप्यविलम्बकं हृन्मानसं यासामीति विग्रह:, पुन: कीदृशानां धूर्त्तानां पापो धूर्त्तस्तु वञ्चक **इत्यमर:**। यथान्त:पुरस्त्री प्रसादयति सौविदल्लादौ। धूर्त्ता वस्त्रं विरहय्य प्रत्यङ्गमालिङ्गनसुखमाप्नुवन्तीत्यभिप्राय:।।६०।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६०।। इदानीमभिसारिकासमयमाह, अक्ष्णोरिति। हे सखि! विष्वक् चतुर्दिक्षु नीलप्रच्छदपटसदृग्ध्वान्तं सुदृश: प्रत्यङ्गमालिङ्गति। नीलप्रच्छदपटवदाच्छाद्य अदृश्यां करोतीत्यर्थ:। किं कुर्वन्? धूर्तानां मायाविनामभिसारे संभ्रमं वेगं भजन्तीनामुत्कोचमिवाक्ष्णोरञ्जनं निक्षिपत्। एतदेतत्कुर्वस्तदाह, अपि च, कुचयो: कस्तूरिकापत्रावलिरचनाविशेषमिव निक्षिपत्। अत्र 'धूर्ता'ग्रहणेन निक्षेप औचित्यमावहति। यतो मायाविनो माययैव साध्या:। अत्र च क्रमेण तमसो वृद्धिर्ज्ञेया। पूर्वं प्रादुर्भावेऽक्ष्णोरञ्जनम्, किंचिद्वृद्धे कर्णाभरणाच्छादनम्, तत एव प्रवृद्धे शिरोमुकुटवृत्ति। ईषदापरिसमाप्ते: कुचयोर्हारादिलोप:। क्रमेण प्रवृद्धं सत्सर्वशरीरं व्याप्य वर्तत इति क्रमवृद्धिर्दर्शिता। अत्र 'धूर्त' ग्रहणेन ता अपश्यन्त्यो भवतीं न कस्यचिदग्रे कथयिष्यन्तीति नि:शङ्कं व्रज। शार्दूलविक्रीडितं वृत्तम्। यथासंख्यमलंकार:।।६०।।

## (३) जगद्धरकृत- सारदीपिका

।।६०।। गमनकालयोग्यम् अन्धकारं वर्णयति अक्ष्णोरिति हे सखि राधे ध्वान्तम् अन्धकार: सदृशं नायिकानां प्रत्यङ्गं प्रत्यवयवम् आलिङ्गति आश्लिष्यति किं कुर्वत् अक्ष्णोर्नेत्रयोरञ्जनं कज्जलं निक्षिपद्विन्यस्यत् श्रवणयो: कर्णयो: तापिच्छगुच्छावलीं तमालपुष्पस्तबकं कर्णपूरपङ्क्ति निक्षिप्त कुचयो: स्तनयो: कस्तूरिकापत्रकं

मृगमदपत्रावलीं निक्षिपत्मस्तके श्यामसरोजदामनीलकमलमालां निक्षिपत् कीदृशीनां सदृशां धूर्तानां परिवञ्चकानां पुनः कीदृशीनां विष्वक् सर्वत्र निकुञ्जलतागृहे अभिसार सत्वरङ्गमनाय साहसं हृत् यासां तास्तासां कीदृशं ध्वान्तं नीलनिचोलवत् श्यामवस्त्रवत् चारु सदृशमित्यर्थः। नीलवस्त्रस्थाने ध्वान्तं जातमित्यर्थः अतोभूषणादिनिर्माणेनापि कालातिक्रमो न युक्त इति भावः।।६०।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६०।। नन्वलंकरणरचनां विधाय गन्तव्यमित्यत आह, अक्ष्णोरिति। अभिसारसाहस-कृतामभिसाररूपं साहसं कुर्वन्तीत्यभिसारसाहसकृतः, तासामत एव धूर्तानां शठानां सुदृशां नायिकानां ध्वान्तं तमो निकुञ्जे विष्वक्सर्वतः प्रत्यङ्गमङ्गमङ्गं प्रति आश्लिष्यति। तदेव विशेषणैराह, अक्ष्णोरिति। किं कुर्वत्तमः? अक्ष्णोर्नयनयोरञ्जनं कज्जलं निक्षिपदर्पयत्। श्रवणयोस्तापिच्छगुच्छावली तापिच्छस्य तमालस्य गुच्छस्तवकपरम्परां निक्षिपत्। मूर्ध्नि मस्तके श्यामसरोजदाम कमलमालां निक्षिपत्। कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगमदरचनां निक्षिपत्। कीदृशं ध्वान्तम्? नीलनिचाालचारुनील-निचोलवत् कञ्चुकवच्चारु मनोहरम्। तथा च तवाभिसारयोग्याभरणानि तम एवार्पयिष्यतीति किमलंकरणे विलम्बेनेति भावः। अत्र स्त्रीणामलंकरणादिरचनाधिकारो नपुंसकादीनामेवेति नपुंसकनिर्देशेन ध्वनितम्। 'कालस्कन्धस्तमालः स्यात्तापिच्छः' **इत्यमरः**। 'स्याद्गुच्छः स्तबके त्वन्धे हारमेदकलापयोः' इति **विश्वः**।।६०।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६०।। ननु सर्वेषु पश्यत्सु अकृतभूषणया च जारिण्या मया प्रियावसं प्रति कथमभिसर्त्तव्यमित्याशङ्क्याह। अक्ष्णोरिति। हे सखि! राधे विषु अञ्चतीति विष्वक् सर्वतो व्यापी, ध्वान्तं गाढान्धकारः। निकुञ्जे सङ्केतस्थाने लतागृहेषु निकुञ्ज इति जातावेकवचनम्। अभिमारो नाम सङ्केतस्थलगमनं तत्र सत्वरहृदां त्वरमाणमानसानां कितवाख्यानां धूर्त्तानां पत्यादिवञ्चनशीलानामिति यावत्। एतादृशां सुदृशां कामिनीनाम् अक्ष्णोः नयनयोः अञ्जनं कज्जलं निक्षिपत् निवधत् तद्भ्रान्तिं कुर्वन्नित्यर्थः। श्रवणयोः कर्ण्णयोः तापिञ्छगुच्छावलीं तमालस्तवकपुञ्जं निक्षिपत् मूर्ध्नि मस्तके श्यामसरोजदाम नीलोत्पलमालिकां निक्षिपत् कुचयोः कस्तूरिकापत्रकं मृगनाभिपत्रावलीर्निक्षिपत् नीलः नीलवर्ण्णः निचोलः अन्यदर्शनप्रतिबन्धकप्रच्छदपटः तद्वच्चारु रमणीयं सत् तमः एव प्रत्यङ्ग प्रत्यवयवं आलिङ्गति आवृणोति। तथा चान्धकारस्यैवालङ्कारस्थानीय-त्वात् सर्वदृष्टिविधायकावरणपटरूपत्वाच्चावश्यमिदानीमेवावगन्तव्यमिति तात्पर्य्यम्।।६०।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६०।। पुनरभिसारसामग्रीमुपदर्शयति, हे सखि ध्वान्तं गाढं तम: सुदृशां सुनयनानां प्रत्यङ्गमालिङ्गति। कीदृशीनाम्? धूर्तानाम् अभिसारनिमित्तं निजगुरुजनप्रतारिकानाम्। तदेव कुत इत्यत आह, अभिसारे सत्वरं त्वरितं हृत् हृदयं यासां तासाम्। 'स्वान्तं हृन्मानसं मन' **इत्यमर:**। कुत्र? विष्वक् सर्वत्र निकुञ्जे लतागृहे? कीदृशम्। नीलनिचोलवत् श्यामप्रच्छदपटवत् चारु मनोज्ञम्। 'निचोलं प्रच्छदपट' **इत्यमर:**। पुन: कीदृशम्? अक्ष्णोर्नयनयो: अञ्जलं कज्जलं नि:क्षिपत्, अर्पयदित्युत्प्रेक्षा। श्रवणयो: कर्णयो: तापिञ्चगुच्छावलीं तमालस्तवकश्रेणीं निक्षिपत्। 'गुच्छस्तवक इत्यपीत्य'मर:। मूर्घ्नि मस्तके श्यामसरोजदाम नीलकमलमालां निक्षिपत्, कुचयो: स्तनयो: कस्तूरिकापत्रकं मृगमदविशेषकं निक्षिपदित्यादि इत्यनेन कुलजाभिसारसामग्री दर्शिता। तथा च गाढं तमो जातम् अभिसारिकाभिसाराय च प्रयातम् अलंकरणादिकञ्च अन्धकारेणैव विहितं तम: परं कृतमपक्षेयेति तात्पर्यार्थ:। एवञ्च नपुंसकमप्यचेतनमपि ध्वान्तमङ्गनालिङ्गनपरम् ईदृशो मादक: समय: कथमत्र स कृष्ण: त्वत्समीक्षितं न सम्पादयिष्यतीति ध्वनि:।।६०।।

* 'तापिच्छ' इति पुस्तकान्तरे पाठ:। 'तापिञ्च' इति च पाठान्तरम्।

+ 'अनालिङ्गनपरम्' इति पाठ।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६०।। गमनकाले योग्यमन्धकारं वर्णयति, अक्ष्णोरिति। हे सखि राधे ध्वान्तं [१०]निबिडान्धकारं विष्वङ् निकुञ्जे सर्वत: [११] कुञ्जलतामण्डपे सुदृशां सुन्दराक्षीणां अवयवं प्रति आलिङ्गति। तद्वदालिङ्गनव्याजेनास्मिन् त्वया गन्तव्यमिति भाव:। कीदृशं ध्वान्तम्? अक्ष्णोर्नेत्रयोरञ्जनं [१]कज्जलं निक्षिपत् विन्यस्यत्। श्रवणयो: कर्णयोस्तापिच्छगुच्छावलीं तमालस्तबकश्रेणीं निक्षिपदिति सर्वत्र योज्यम्। किञ्च मूर्ध्नि श्यामसरोजदाम नीलोत्पलमालाम्। किञ्च कुचयो: कस्तूरिकापत्रकं मृगमदपत्ररचनाम्। कीदृशं ध्वान्तम्? नीलनिचोलचारु नीलवस्त्रवत(त्) चारु मनोहरं [२]सुन्दरम्। कीदृशानां सुदृशाम्? धूर्तानां परवञ्चकानाम्। धूर्तानां परवञ्चकानाम्। पुन:कीदृशानां[३]सुदृशाम्? अभिसारे सत्वरं शीघ्रं हृच्चेतो यासां तास्तासाम् [४] धूर्त: स्याद्वञ्चने लोभे इति हारावली। तापिच्छस्तु तमालक: इत्यपि [५] कोशे।।६०।।

१.कज्जलं-इ. २.सम्भ्रमजुषां नि:शेषकुञ्जे सखि-इ. ३.नीलविलोल-इ. ४.नास्ति-क. ५.आलिङ्गनै:-क. ६.नास्ति-ड. ७.पश्यति-ड. ८.नास्ति-ड. ९.नास्ति-ड. १०.नास्ति-अ.ब. ११.लतामण्डप-ग.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६०।। गमनकाले योग्यं अन्धकारं वर्णयति, अक्ष्णोरिति। हे [६] सखि [७] राधे ध्वान्तं सुदृशां[८]नायिकानां[९]प्रत्यङ्गं प्रत्यवयवमालिङ्गति। कीदृशं ध्वान्तम्? अक्ष्णोः[१०]नेत्रयोरञ्जनं कज्जलं निक्षिपत् विन्यस्यत्। श्रवणयोः तापिच्छगुच्छावलिं तमालपुष्पस्तबकं कर्णपूरपङ्क्तिं निक्षिपत्। मूर्ध्नि[११]मस्तके श्यामसरोजदाम नीलकमलमालां निक्षिपत्। [१२]कुचयोः स्तनयोः कस्तूरिकापत्रकं मृगमदपत्रावलिं निक्षिपत् [१३]। कीदृशीनां सुदृशाम्? धूर्तानां परवञ्चकानाम्। पुनः [१४] कीदृशीनाम्? विष्वक् सर्वत्र निकुञ्जे लतागृहे अभिसारसत्वरगमनाय सत्वरं हृत् यासां ताः तासाम्। कीदृशं ध्वान्तम्? नीलनिचोलवत् श्यामकञ्चुकवत् मनोहरं श्यामवस्त्रवच्चारु ; सदृशमित्यर्थः। नीलवस्त्रस्थाने ध्वान्तं जातमित्यर्थः।।६०।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६०।। राधाया गौराङ्गित्वादन्धकारे स्फुटीभावः स्यादिति सञ्छादनोपायमाह अक्ष्णोरिति। हे सखि राधे कज्जलं अक्ष्णोः नेत्रयोः निक्षिप अञ्जनं अञ्जय। श्रवणयोः तापिच्छस्य तमालस्य गुच्छाः पुष्पोत्कराः। तमालपुष्पस्य कृष्णवर्णत्वं प्रसिद्धम्। तेषां आवलीं निक्षिप। मूर्ध्नि श्यामानां सरोजानां नीलोत्पलानां दाम शिरःसञ्छादक-पूर्तिस्त्रग्विशेषः। तत् निक्षिप। कुचयोः कस्तूरिकया लिखितं पत्रकं पत्राकृतिचित्रं निक्षिप। लिखापयेति भावः। ननु कथमेतैः स्पष्टत न स्यादित्यत आह-धूर्तानामिति। निःशेषः समस्तः कुञ्जःतस्मिन् ; जातावेकवचनम्। निखिलसङ्केतभवनेष्वित्यर्थः। ध्वान्तं गाढतमः। धूर्तानां अभिसारे क्रियादक्षाणां अभिसारे प्रियानुगमने सम्भ्रमः सन्तोषातिशयेन गोपनागोपनविभ्रमं जुषन्तीति जुषः तासाम्। नीलाश्च ताः विलोलाश्च ताः सुष्ठु दृशो यासां तासां प्रत्यङ्गे अवयवनिकायं आलिङ्गति श्लिष्यति। अन्धकारस्य सर्वावयवगोपकत्वान्नी- लाभरणादिकं सामान्यान्न दृश्यत इति भावः।।६०।।

१.नास्ति-अ.ब.२,३.नास्ति-इ.फ.ग.ह.ज.४.धूर्तः स्याद्वेवके लोभे-इ.धूर्तं स्याद्वञ्चके लोके लोभे चेति-फ.५.नास्ति-इ.फ.ग.ह.ज.६.नास्ति–ड.७.नास्ति-क.८.नास्ति-ड. ९.प्रत्यङ्गमालिङ्गति-ल.म.१०.नयनयोः-क.११.नास्ति-ड.१२.तः१३.पर्यन्तं नास्ति-ड. १४.नास्ति-ड.

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६०।। संप्रति अंधकारनैबिडयमभिसारोचितं प्रतिपादयनन्नाह, अक्षणोरित्यादि। हे सखि! विष्वक् सर्वतोव्यापि ध्वान्तमन्धकार....त्वासां प्रतिवचनेन जारकरणात् सुदृशां सुलोचनानां प्रत्यङ्ग प्रत्यवयवम् आलिङ्गति आवृणोतीति योजना। किंविधं ध्वान्तम्? निकुञ्ज इति। कुञ्जप्रदेशे नीलनिचोलचारू नीलप्रच्छदपटवन्मनोहरं जवनिका

व्यवधायकमतिसान्द्रमिति यावत्। किंविधानाम्? अतएव अभिसारसत्वरहृदामिति। अभिसारे सत्वरं त्वरासहितं हृन्मनो यासाम्। ''स्वान्तं हृन्मानसं मन **इत्यमर**ः।'' अथवा धूर्त्तानां धूर्त्तनायकानां सुदृशां याः सुदृशोऽभिसारिण्यस्तासामित्यर्थः। प्रत्यङ्गमालिङ्गति ।धूर्त्तनायकानां किंविधानाम्? अतएव अभिसारसत्वरहृदाम् अभिसारे सा नायिका शीघ्रम् त्वरा सहितचेतसां निकुञ्जे ध्वान्ते नालिङ्गितत्वात् गगने कोऽपि न द्रक्ष्यतीत्यभिप्रायः। किं कुर्वन्? सुदृश्यां प्रत्यङ्गमालिङ्गतीत्याह। अक्ष्णोः निक्षिपदञ्जनं चक्षुषोः कज्जलं निक्षिपत् श्रवणयो स्तापिच्छं गुच्छावलीं कर्णयोस्तमालगुच्छश्रेणीं निक्षिपदिति सर्वत्रानुषङ्गः। मूर्ध्नि श्यामसरोजदाम, मस्तके नीलोत्पलस्रजं, कुचयोः कस्तूरिकापत्रकं मृगमदसम्बन्धिपत्रावली विशेषकमिति यावत्। ननु सुदृशां भूषणं किं नास्ति यतोऽन्धकारं एव भूषणम् उच्यते। अत्राभिसारसत्वर हृदामिति अभिसारागमन-त्वरायां तासां नेपथ्यकरणानपेक्षताप्रतिपादकम्। तदलङ्कारकरणं तमसापि निर्वक्ष्यतीति सख्याः प्रेरणम्। नायकपक्षे अभिसारसत्वरमात्रसत्वेन धूर्त्ता यतः सा नेपथ्यमपि न करिष्यतीति अक्ष्णोर्निक्षिपदञ्जन मित्यादिना प्रतिपादितम् । यद्यपि नीलनिचोलचारुत्वेन सर्वाङ्गव्यापकत्वं तमसः प्रतिपादितं तथाप्यलङ्कारकरणाय विलम्बं न करोत्वित्यभिप्राय-मुद्भावयन्ती सखी प्रेरयति यत् किञ्चिदेते कालोचित प्रसाधनम् अन्धकार एव तत् करिष्यतीत्यलं विलम्बेन। दीपकोऽयमलङ्कारः।''जातिक्रियागुणद्रव्यवाचिनैकत्र वर्त्तना। सर्ववाक्योपकारश्चेत्तमाहुर्दीपकं बुधाः'' ''इति **दण्डी**।'' विषु इत्यव्ययमखिलवाचकं मूर्द्धन्यन्तः। तत्र विषु अञ्चतीति विष्वगिति अञ्चुधातोः क्विप् अखिलव्यापी-त्यर्थः।।६०।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६०।। अथान्धकाराभिसारोचितवेशोपकरणमप्येतदेवेत्याह अक्ष्णोरिति। हे सखि! सर्वतो व्यापि ध्वान्तं सुदृशां प्रत्यङ्गमालिङ्गति प्रियाभिसारानुकूल्येन सुखं ददातीत्यर्थः। कीदृशं? नीलनिचोलादपि चारु सर्वाङ्गारवकत्वेनालिङ्गनमुत्प्रेक्षितम्। कीदृशीनां? धूर्त्तानां परवंञ्चूकानां अतएवाभिसारे सत्वरं हृदयं यासां परवंचकतया काचित् कदाचित् सत्वरमभिसरेदित्यतो विलम्बो न कार्य्य इत्यर्थः। किं कुर्वत्? अक्ष्णोरंजनं श्रवणयोस्त-मालस्तवकश्रेणीं मूद्र्ध्नि श्यामसरोजानां दाम कुचयोः कस्तूरिकापत्रकं पत्रभङ्गलेखां च निक्षिपत् दूरं प्रेरयत्।।६०।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६०।। तिमिराभिसारिकाणां वेशोपकरणत्वेनान्धकारं वर्णयति। अक्ष्णोरिति। हे सखि! विषु अञ्चतीति, विष्वक्, सर्वतोव्याप्तमित्यर्थः। 'समन्ततस्तु परितः सर्वतो

विष्वगित्यपि' **इत्यमर**:। ईदृशं ध्वान्तं गाढान्धकार: धूर्त्तानां पत्यादिवञ्चनचतुराणां, अत एव निकुञ्जे सङ्केतकुञ्जविषये योऽभिसारस्तस्मिन् सत्वरं त्वरासहितं हृत्, मनो यासां तासां सुदृशां व्रजसुन्दरीणामक्ष्णोर्नेत्रयो:रञ्जनं कज्जलं तथा श्रवणयोस्तापिच्छगुच्छ-गुच्छावलीं तमालस्तवकावलीं तथा मूर्ध्नि शिरसि श्यामसरोजदाम, नीलोत्पलमालिकां, कुचयो: कस्तुरिकापत्रकं निक्षिपत्, विन्यसत्, अर्थात् अभ्रान्तं कुर्वत् नीलनिचोल:, अन्यदृष्टिनिरोधकावगुण्ठनपटस्तवचारु रमणीयं सत् प्रत्यङ्गं प्रत्यवयवमालिङ्गति, सर्वाङ्गावरकत्वेनाभिसारिकानुकूल्यं करोतीत्यर्थ:। अत: काचन धूर्त्ताऽत्र समये वा तमभिसरेत्। विलम्बं मा कुर्विति भाव:।।६०।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

६० - अक्ष्णोनिक्षिपदञ्जनमिति; अत्र कृष्णाभिसारिकाणां तमसाच्छवि: कथमलं-करणस्योपकरणं भवति तन्निरूप्यते। अन्धकार: खलु चतु:पार्श्वे परिव्याप्यालिङ्गनं निक्षिपति। यथा **दण्डिना** लिम्पतीव तमोङ्गानि वर्षतिवाञ्जनं नभ: इति उच्यते तथैव। न केवलं तत् सर्वं खलु कृष्णाभिसारिकाणां नेत्रे अञ्जनं मस्तके नीलकमलं कर्णे तापिच्छगुच्छं तमालपत्राणि। दामकुचयो: कस्तुरीकापत्रावली सज्जीभवति तथैव। क्षिपति नाम कृष्णाभिसारिकाणां सज्जं करोति। विन्यासं करोति। सकलानाकूलयति इयं रात्री। अत: धूर्त्तानां वञ्चनार्थमपि अनुकूलं भवति। अथ च व्रजसुन्दरीणां तत्र गमनं सुकरं भवति। किञ्च हे सुन्दरि तत्र न कापि धूर्त्ता अन्धकारस्यानुकूल्येन श्रीकृष्णमभिसरेत। सखि! अत्र नालं विलम्बेनेति ध्वनि:। पक्षे तु अत्र धूर्त्त ग्रहणेन अन्धकारस्य सहायेन धूर्त्तं वारयित्वा कुञ्जं प्रति नि:शंकं व्रज। यथासंख्यमलंकार:। शार्दूलविक्रीडितंवृत्तम्।।६०।।

**६१-काश्मीरगौरवपुषामभिसारिकाणाम्**
**आबद्धरेखमभितो रुचिमञ्जरीभि:।**
**एतत्तमालदलनीलतमं तमिस्रं**
**तत्प्रेमहेमनिकषोपलतां तनोति।।६१।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।६१।। एतत्तामिस्रमभिसारिकाणां रुचिमञ्जरीभिराबद्धरेखं तत्प्रेमहेमनिकषोपलतां तनोतीति योजना। यथा सुवर्ण्णस्य निकषपाषाणे शुद्धिजिज्ञासा। तथा तत्प्रेम्णापि घनान्धकारे नि:साध्वसतया शुद्धिर्जिज्ञासेति भाव:। एतेनाप्यन्धकारनैविड्यं प्रतिपादितम्। काश्मीरं कुङ्कुमे प्रोक्तं टङ्क पुरष्करमूलयो:।।६१।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६१ ।। इदानीं तमस्यपि त्वामेव प्रतीक्षत इत्याह, काश्मीरेति। हे सखि ! एतत्तमिस्रं तस्य श्रीकृष्णस्य त्वयि यत्प्रेम तदेव हेम तन्निकषोपलतां तनोति। तमस्यपि बह्वीनामभिसारिकाणां प्राप्त्यवसरेऽपि त्वय्येव तस्य प्रेमेति निकषोपलहेमपरीक्षाश्म-साम्यम्। किंभूतं तमिस्रम् ? अभितो रुचिमञ्जरीभि: कुङ्कुमगौरवपुषां स्वैरिणीनामाबद्धा रेखा आभोगो विस्तारो येन। किंभूतं तमिस्रम् ? तमालदलनीलतमम्। एतावता तमसोऽतीव प्रवृद्धावभिसरेति प्रेरणम्। वसन्ततिलका वृत्तम्। अत्रोपमालंकार:।।६१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।६१ ।। अन्धकारमेव वर्णयति कास्मीरेति हे राधे ! एतत्तमिस्रम् अन्धकार: तत्प्रेमता सामभि सारिकाणां यत्प्रेम प्रीतिस्तदेव हेमसुवर्णं तस्य निकषोपलतां घर्षणपाषाणतान्तनोति विस्तारयति कीदृशं तमिस्रकाश्मीरकुङ्कुमं तद्वद्गौरं पीतं वपुर्यासां तासामभिसारिकाणां स्त्रीणां मञ्जरीभि: मणिकिरणै: अभित: सर्वत: आबद्धा कृतरेखा यस्मिन् तमालदलं नूतनपत्रं तद्वन्नीलतमम् अतिश्यामं कान्तार्थिनी तु या याति सङ्केतं ''साभिसारिकेत्यमर:'' इत्यभिसारिका लक्षणं अभिसारिकाणां प्रेमपरीक्षा सङ्केतं साभिसारिकेत्यमर: प्रेमपरीक्षासमयस्त्वयमेव यदन्धतमसि गमनमिति।।६१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६१ ।। किंच संप्रति मणिसुवर्णाभरणं नोपादेयमित्यत आह, काश्मीरेति। काश्मीरवत्कुङ्कुमवद्गौरं वपु: शरीरं यासां तादृशामभिसारपराणां नायिकानामभित उभयतो मणिमञ्जरीभिर्मणिपरम्पराभिराबद्धा रेखा येन तादृशमेतत्तमालदलनीलतमं तत्तमालदल-वत्तमालपल्लववदतिशयेन नीलं तमिस्रमन्धकारं तत्प्रेमहेमनि- कषोपलतां तनोति विस्तारयति । संकेतभूमिं व्रजन्तीनामभिसारिकाणां ताटङ्ककङ्कणमञ्जीरादिखचित मणिदीप्तिभिरुभयपार्श्वे उद्द्योते सति रेखाकारतया लक्ष्यमाणातिगौरतराङ्गकान्ति-रन्धकाररूपकषपट्टिकायां तत्प्रेम सुवर्णरेखेव भातीति भाव:। अथ चैतादृश्यपि गाढान्धकारे कान्तारा सर्वं मुक्त्वैकान्ताभिसारप्रस्थानेन प्रेम्ण: शुद्धिं परीक्षत इति ध्वनि:। 'पाषाणप्रस्तरग्रावोपलाश्मान: शिला दृषत्' **इत्यमर:**।।६१ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६१ ।। पुनरपि अभिसरणानुकूलं तमेव वर्ण्णयति। काश्मीरेति। हे सखि ! राधे ! काश्मीरेण कुङ्कुमेन काश्मीरवद्गौराणि पीतवर्ण्णनि वपूंषि शरीराणि यासां तादृशीनां ''पीतो गौरो हरिद्राभ:'' **इत्यमर:**। अभिसारिकाणां स्वैरिणीना रुचिमञ्जरीभि: कान्तिपुच्छै: अभित: सर्वत: आवद्धा रेखा यस्मिन् तादृशं, तमालदलानीव

तापिञ्छपर्ण्णानीव नीलतममन्यन्तनीलमेतत् प्रतीयमानं तमिस्रं कर्त्तृ, तस्मिन् श्रीकृष्णे प्रेमैव हेमसुवर्ण्णं तस्य निकषोपलतां परीक्षाप्रस्तरभावं तनोतीव काश्मीररुषित गौरवपुः स्वैरिणी कषायकान्तिरेखालङ्कृतमिस्रं हेमरेखां निकषोपले इव कृष्णप्रेमातिशयम-भिसारिकाणामभिव्यञ्जयतीत्यर्थः। अतश्च त्वयापीदानीमेवावश्यं गन्तव्यमिति तात्पर्य्यम्। अत्र काव्यलिङ्गोत्प्रेक्षालङ्कारः।।६१।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६१।। प्रेमहेमपरीक्षाकालस्त्वयमेवेत्याह, एतत्तमिश्रमन्धकारः तासामभिसारिकानां प्रेमान्येव दुर्लभत्वात् नाशे शाकहेतुत्वाच्च हेमानि, तेषां निकषोपलतां कषपट्टिकाप्रस्तरतां तनोति विस्तारयति। 'निकषः कषपट्टिके'**त्यमरः**। 'हिरण्यं हेमहाटकमिति च। कीदृशम्? तमालदलवन्नीलतममतिश्यामम्। पुनः कीदृशम्? अभिसारिकाणां रुचिमञ्जरीभिः कान्तिश्रेणीभिः अभितः सर्वतः आबद्धा रेखा यत्र तादृशम्। 'ततिस्तु मञ्जरी श्रेणी धोरणी पंक्तिरावलिरिति **वृद्धामरः**। कीदृशानाम्। काश्मीरवत् कुङ्कुमवत् गौरं पीतं वपुः शरीरं यासां तादृशीनाम्। 'पीतो गौरो हरिद्राभ' **इत्यमरः**। 'काश्मीरं कुङ्कमे प्रोक्तं कुचपुष्करमूलयोरिति। अत्रोत्प्रेक्षालङ्कारः। एतस्मादपि तवापि प्रेमपरीक्ष स्यादिति ध्वनिः।।६१।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६१।। आस्तां तावदभिसरणं त्वत्प्रणयपरीक्षार्थमेतदुच्यते, काश्मीरेति। हे राधे! एतत्तमिस्रमन्धकारं तत्प्रेम [१] तासामभिसारिकाणां प्रेम प्रीतिः तदेव हेम सुवर्णं तस्य निकषोपलतां [२]घर्षणपाषाणतां तनोति विस्तारयति। ध्वान्तालिङ्गनं यदि ईदृशं तर्हि कृष्णालिङ्गनं [३] कीदृग्भविष्यतीत्यमूल्यप्रणयः सूचित इति ध्वनिः। कीदृशम्? [४] तमालपल्लवनीलतममतिशयेन श्यामम्। पुनः कीदृशं [५] तत्प्रेम? अभिसारिकाणां स्त्रीणां अभितः सर्वतः रुचिमञ्जरीभिः कान्तिकिरणैराबद्धा [६] कृता रेखा येन। कीदृशीनाम्? काश्मीरं कुङ्कुमं तद्वद्गौरं पीतं [७] वपुर्यासाम्। एतेन सौन्दर्यप्रभावबाहुल्यं चाभिसारिकाणां सूचितमिति ध्वनिः। तादृशेऽन्धकारेऽभिसरन्तीत्यभिसारिकाः।।६१।।

१.तादृशरसिकाणां प्रेम-फ.ज. २.घर्षणतां-ग. ३.ईदृग्भविष्यतीति-इ. ४.तमाल-दलनीलतमं तमालपल्लववन्नीलतममतिशयेन श्यामम्-फ.ज. ५.तत्प्रेमहेम-अ.ब.ह. ६.नास्ति-अ.ब. ७.वपुर्यस्याः सा-इ.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६१।। अन्धकारमेव वर्णयति, काश्मीरेति। हे राधे! एतत्तमिस्रमन्धकारस्तत्प्रेम तासामभिसारिकाणां [१] यत्प्रेम प्रीतिः तदेव हेमसुवर्णं तस्य निकषोपलतां [२]घर्षणपाषाणतां

तनोति विस्तारयति। कीदृशं तमिस्रम्? अभिसारिकाणां स्त्रीणां मणिमञ्जरीभि: मणिकिरणैरभित: [३]सर्वत: आबद्धा कृता रेखा यत्र। कीदृशीनामभिसारिकाणाम्[४]? [५]काश्मीरं कुङ्कुमं तद्वद्गौरं पीतं [६]वपुर्यासाम्। पुन: कीदृशं तमिस्रम्? [७]तमालस्य दलं नूतनं पत्रं तद्वन्नीलतमं [८]अतिश्यामम्। कान्तार्थिनी तु या याति सङ्केतं साभिसारिका इति [९]लक्षणम्। अभिसारिकाणां प्रेमपरीक्षासमयस्त्वयमेव यदन्धन्त(त)मसि गमनमिति ।।३।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६१।। काश्मीरेति। एतत्पुरोवर्ति तमालदलवत् नीलतमं अतिश्यामं आबद्धरेखं तमिस्रं कर्तृ, काश्मीरवत् कुङ्कुमकेसरवत् गौराणि वपूंषि यासां तासां अभिसारिकाणां प्रियनिवासस्थलयायिनीनां रुचिमञ्जरीभि: शरीरकान्तिसमुदायै: अभित: परीक्षार्थं तत्प्रेमहेमनिकषोपलतां कषणशिलात्वं तनोति करोति यातीत्यर्थ:। अत्र आबद्धरेखत्वनिमित्तेन तमिस्रस्य निकषोपलत्वसम्भावनादुत्प्रेक्षालङ्कार:। वाचकाभावाद्गम्य:। आबद्धरेखात्वे शीघ्रगमनत्वं व्यज्यते। अन्यथा बिन्दुतावगम: स्यात्। अभिसारिकाणामिति बहुवचनेन तत्प्रेमेत्येकवचनेन वृन्दावनस्था सर्वा अपि तमेवाभिसरन्ति। कज्जलादिसामग्रीं विनैव कष (कृष्ण) रेखाबद्धा समाना इवेति तव कृतोपायवशान्न प्रकटीभाव इति भाव:। वसन्ततिलकावृत्तम्। अलातचक्ररेखावत् ।।६१।।

१.त:४.पर्यन्तं नास्ति-ड.२.नास्ति-क.३.सर्वत्र-ल.म.५.काश्मीरकुङ्कुमं-ड.६.वपुर्यासां तासाम्-क.७.तमालदलं-क.८.नास्ति-क.९.नास्ति-क.इत्यभिसारिकालक्षणम्-ल.म.

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६१।। काश्मीरेति। एतत् तमिस्रं तत्प्रेमहेमनिकषोपलतां तनोतीति योजना। तत्प्रेमता सामर्थ्या दभिसारिकाणां प्रेम अतिशय प्रीतिरेव हेमं सुवर्णम्। महार्घत्वाद् वर्णसाम्याच्च तस्य निकषोपलं कर्षणपाषाणं तस्य भावस्तरत्ताम्। यथा सुवर्णस्य निकषपाषाणेशुद्धे र्जिज्ञासा, सा तथा तासां प्रेम्णोऽपि घनान्धकारे नि:साध्वसतया शुद्धेर्जिज्ञासेति भाव:। तत्प्रेम्णोऽपि सर्वनाम्नो वृत्ति मात्रे पुंवद्भाव:। किंविधम् सत् काश्मीरं कुङ्कुमं तद्वद्गौराङ्गवपूंषि यासामिति विग्रह:। एवं विधानामभिसारिकाणां रुचिमञ्जरीभिराबद्धलेखं सत् । ''काश्मीरं कुङ्कुमे प्रोक्तं टङ्कपुष्करमूलयोरिति **विश्व**:।'' ईदृशामर्थात्तासामेवाभिसारिकाणां कान्तिपरंपराभि: अभित: आबद्धरेखा यत्रेति विग्रह:। निकषपाषाणेऽपि स्वर्णघर्षणेन पीतरेखा तिष्ठत्येव। पुन: किंविधम्? तमालदलनीलतम

तमालपत्रवदतिनीलं, कषपाषाणोऽप्यतिनीलो भवति। एतेनान्धकारनैविड्यं प्रतिपादितम्।।६१।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६१।। किं च प्रेमपरीक्षणकारणमप्येतदेवेत्याह काश्मीरेति। एतत् तमिस्त्रं अभितः अभिसारिकाणां रुचिमञ्जरीभिरावद्धरेखं सत् प्रेमहेम्नो निकषपाषाणतां तनोति। कीदृशीनां ? काश्मीरगौरवद् गौरं वपुर्यासां तासाम्। यथा निकषपाषाणे सुवर्णशुद्धि-जिज्ञासा तथा तासां घनान्धकारे निःसाध्वसतया गमनजिज्ञासेति भावः। किदृशं ? तमालदलवन्नीलतमम्। एतेनान्धकारस्य नैविड़्यं प्रतिपादितं तमालवनविहारं च।।६१।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६१।। किं च प्रेमवती नामेतदेव प्रेमपरीक्षणमित्याह, काश्मीरेति। हे सखि! तमालदलनीलतमं तापिच्छपत्रवदतिनीलवर्णमेतत्तमिस्त्रं गाढान्धकारं तत्प्रेमहेमनिकषो पलतां, तस्मिन् श्रीकृष्णे यत्प्रेमतदेव हेम, शुद्धसुवर्णं, तस्य निकषोपलतां परीक्षाशिलारूपतां तनोति, विस्तारयति। तत्र हेतुगर्भविशेषणम्। कीदृशम्। काश्मीरगौरवपुषां कुङ्कुमगौराङ्गीणामभिसारिकाणां रुचिमञ्जरीभिः, कान्तिकन्दली-भिरभितः, सर्वत आवद्धा रेखा यत्र तादृशम्। यथा हि सुवर्णस्य विशुद्धनिकषशिला-घर्षणेनैव परीक्ष्यते, तथा त्वमपीदृशे गाढतमसि भयशङ्कामविगणय्य निजाङ्गकान्त्य-पसारिततमिस्त्रा तमभिसरन्ती प्रणयोत्कर्षं प्रकटयेति भावः । अप्रस्तुतप्रशंसा, काव्यलिङ्गोत्प्रेक्षा।।६१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६१।। काश्मीरेति; इदानीं तमसा रूपं तत्र अभिसारिकाणां च गमनं सूचयति यत् काश्मीरगौर नाम हैमवर्णा अभिसारिका नाम शुक्लाभिससारिका। सखी ! श्रीकृष्णस्य त्वयि यत् प्रेम हेमसुवर्णःतन्निकषोपलतां तनोति। अर्थात् वहति नाम अभिसारिकाणां प्राप्त्यवसरोऽपि त्वयि तस्य प्रेमेति निकषोपलस्योपरि हेम्नः यथा रेखा लेखा वा तदवत् श्रीराधाकृष्णयुगलस्य साम्यमस्ति। अन्धकारस्य तमिस्त्रस्य तमालपत्रेण सह साम्यम्। पुनः तद्वत् नीलतमालपत्रमिव अन्धकारस्य सान्ध्रतां द्योतयति। वसन्ततिलकावृत्तम्। उपमालंकारः।।६१।।

**६२-हारावलीतरलकाञ्चनकाञ्चिदाम-**
**केयूरकङ्कणमणिद्युतिदीपितस्य।**
**द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य**
**व्रीडावतीमथ सखी निजगाद राधाम् ।।६२।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६२।। सम्प्रति संकेतस्थानं गत्वा लज्जावशात् प्रियपार्श्वमभजमानां राधां सखी ग्राह। हारावलीति। निकुञ्जालयस्य द्वारे हरिं निरीक्ष्य ब्रीडावतीं राधामियं दूती वक्षमाणमुवाचेति योजना। कीदृशस्य हारावली तरलकाञ्चनकाञ्चीदाममञ्जीरकङ्कण-मणिद्युतिर्दीपितस्य "तरलो हारमध्यग:" **इत्यमर:**। हारावली तरलश्च काञ्चनकाञ्चीदाम्न मञ्जीरश्च कङ्कणमणिश्च इति द्वन्द्व:।।६२।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६२।। इदानीं भावान्तरेण तं पुष्णाति, हारावलीति। इयं दूती राधां प्रति वक्ष्यमाणमुवाच। किं कृत्वा ? निकुञ्जनिलयस्य द्वारे हरिं निरीक्ष्य। किंभूतां राधाम् ? व्रीडावतीम्। कामवतीनामपि युवतीनां प्रथमसंगमे लज्जा किमपि कामातिशयं विदधाति। किंभूतस्य निलयस्य ? हारावल्यास्तरलो मध्यमणि: काञ्चनस्य काञ्ची मेखला दाम च मञ्जीरौ कङ्कणे च तेषु मणय: तेषां द्युत्या दीपितस्य। वसन्ततिलकावृत्तम्। अतिशयोक्तिरलंकार:।।६२।।

## (३) जगद्धरकृत- सारदीपिका

।।६२।। हारावलीति अथानन्तरं सखी राधां निजगाद पुनरपि उवाच कथं भूतां राधां निकुञ्जनिलयस्य लतागृहेमेव निलयां निभृत गृहं तस्य द्वारे हरिकृष्णं निरीक्ष्य दृष्ट्वा व्रीडावर्तीं सलज्जाम् अस्मिन्मया निष्ठुराणि वचांसि उक्तानि सम्प्रति तत्समक्षं कथयामति लज्जा कीदृशस्य निलयस्य मुक्ता हारमध्यद्युमणे: द्युत्या काञ्च्यामणयस्तेषां द्युत्यास्तु ये मणयस्तेषां द्युत्या दीपितस्य प्रकाशितस्य एतेन ध्वान्तेपि दर्शनयोग्यता उक्तम्।।६२।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६२।। हारावलीति। अथानन्तरमियं दूती सखीं राधामिति वक्ष्यमाणमुवाच। कीदृशीं सखीम् ? निकुञ्जनिलयस्य निकुञ्ज एव निलयो निभृतगृहं तस्य द्वारे हरिं निरीक्ष्य दृष्ट्वा। व्रीडावतीं लज्जावतीमेतस्मै कति निष्ठुराणि वचांसि मयोक्तानि, संप्रति कथं

तत्समक्षं यामीति लज्जया युक्ताम्। कीदृशस्य निकुञ्जनिलयस्य। हारावल्यो हारपङ्क्तयस्तरलो हारमध्यगमणि: काञ्चनकाञ्चिदाम सुवर्णखचितमेखला दाम मञ्जीरो नूपुर: कङ्कणं करभूषणमेतेषु खचिता ये मणयस्तेषां द्युत्या कान्त्या दीपितस्य प्रकाशितस्य। 'तरलश्चञ्चले षिङ्गे हारमध्यमणावपि' इति **विश्वप्रकाश**:।।६२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६२।। वर्णितान्धकारानन्तरकृत्यमाह। हारेति। अथानन्तरं काञ्चनस्य सुवर्ण्णस्य काञ्चिदाम रसनाकलाप: स च मञ्जीरश्च कङ्कणं च तानि तेषु मणय: तरला: हारमध्यमणय: हारावल्यश्च मणयश्चेति द्वन्द्व: तेषां द्युतिभिर्दीप्तिभि: दीपितस्य प्रकाशितस्य निकुञ्जनिलयस्य लतामन्दिरस्य द्वारे स्थितमिति शेष:। हरिं श्रीकृष्णं निरीक्ष्य ब्रीडावतीं सखीं राधां स्वीया सखी इति वक्ष्यमाणमुवाच उचे। अत्र हारादय: कृष्णसम्बन्धिन: एव ग्राह्या:। न राधासम्बन्धिन: एवाभिसारिकाणां कङ्कणमञ्जीरादेरसमीचीनत्वात्। यद्वा, उपपतिसमीपागमने उद्दीपकनूपुरादिधारणस्याविरोधाद्राधा, सम्बन्धिन एव ग्राह्या:।।६२।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६२।।अभिसारोचितव्यापारालङ्करणादिकमन्याभिसारिकावर्णनप्रसङ्गादेव वर्णितमत: तदुत्प्रेक्ष्य सङ्केतनिकेतनगमनान्तरोचितचरितवर्णनाय प्रसङ्गमवतारयति। अथानन्तरं सखी राधां निजगाद उक्तवती। कीदृशीम्? निकुञ्जनिलयस्य निकुञ्जगृहस्य द्वारे हरिं कृष्णं निरोक्ष्य दृष्ट्वा व्रीडावतीं लज्जावतीम्। 'ह्रीस्तु लज्जा त्रपा व्रीडेति **वृद्धामर**:। अत्र द्वारपदेनोत्कण्ठातिशयो दर्शित:। किम्भूतस्य? हारावली हारसमूह: तरलं चञ्चलं काञ्चनकाञ्चीदाम हेमरसनादाम च मञ्जीरो नूपुरश्च कङ्कणं बाह्वलङ्करणञ्च तेषां ये मण्य: तेषां द्युतिभि: कान्तिभिर्दीपितस्य प्रकाशितस्येत्यर्थ:। अत्र च तरलपदेन कम्पद्वारा स्मरविकारो दर्शित:। कम्पस्य सकलावयवचलताहेतुत्वेऽपि हारावलीमपहायान्येषां विशेषणतया तरलपदस्योपादानेन करचरणादीनामितस्ततो गतेऽपि हृदयस्य प्रियैकरसतया निश्चलतेति सूचितम्।।६२।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६२।। किञ्च हारावलीति। अथ अनन्तरं सखी राधां निजगाद पुनरप्युवाच। [३]कीदृशीम्? निकुञ्जनिलयस्य [४] चोरमन्दिरस्य [५] द्वारे स्वाङ्गदीप्त्याऽन्धकारे हरिं निरीक्ष्य व्रीडावतीं लज्जावतीम्। कीदृशस्य? हारावल्यो [६] मुक्ताहारश्रेण्यस्तासां तरलो यो [७] मध्यमणिर्मध्यनायक: काञ्चनस्य सुवर्णस्य काञ्चीदाम मेखलादाम मञ्जीरं नूपुरं कङ्कणं

[८]करभूषणमेतेषु खचिता ये मणयस्तेषां द्युत्या दीप्त्या दीपितस्य प्रकाशितस्य। [९]निनीय इति वा पाठ:। प्रियमित्युवाचेति पाठ:। [१०]व्रीडावतीं [११]राधामानीय प्रियं हरिमुवाचेति वा योजना। [१२]तरलश्चञ्चले स्वङ्गे हारमध्यमणावपि इति **विश्व:** (१०५.५१)। निलयश्चोरमन्दिरे इति हारावली [१३] ।।६२।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६२।। हारावलीति।[१४] अथानन्तरं सखीं राधां [१५]निजगाद पुनरप्युवाच। किम्भूतां राधाम्? निकुञ्जनिलयस्य लतागृहमेव निलयं [१६] निर्भयं निभृतगृहं तस्य द्वारे हरि निरीक्ष्य [१७] दृष्ट्वा व्रीडावतीं [१८] सलज्जाम्; अस्मिन् मया कति निष्ठुराणि वचांसि (प्र) युक्तानि सम्प्रति कथं यामीति सलज्जा। कीदृशस्य [१९]निलयस्य? हारावलीतरलस्य मुक्ताहारमध्यमणेर्युक्त्या काञ्चनकाञ्चिदाम्न: सुवर्णकाञ्चिरसनाया द्युत्या [२०] केयूरस्य बाहुभूषणस्य कङ्कणस्य ये मणयस्तेषां द्युत्या च दीपितस्य प्रकाशितस्य। एतेन ध्वान्तेऽपि दर्शनयोग्यतोक्ता ।।६२।।

१.केयूरकङ्कण:-नि.सा. २.सखीमियमित्युवाच-नि.सा.सखीं निजगाद राधा-इ. ३.नास्ति-ग. ४.चोरमन्दिरे-अ.ब. ५.नास्ति-अ.ब. ६.मुक्ताहारस्य श्रेण्य-इ. ७.मध्यमणि:-ग. ८.नास्ति-अ.ब. ९.निनीय वा पाठ:-अ.ब.ग.इ. १०.तत्र व्रीडावतीं-फ.ज. ११.राधां निनीय-ग.राधां निनीय आनीय-फ.ज. १२.त:१३.पर्यन्तं नास्ति-अ.ब. १२.तरल: खङ्गे-इ.ग.ह. १४.अनन्तरं-क. १५.पुनर्निजगाद-ड. १६.नास्ति-क.ल.म. १७,१८.नास्ति-ड. १९.नास्ति-ड. २०.केयूरस्य हारावलीतरलस्य बाहुभूषणस्य-ड.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६२।। एवमभिसारोद्योगे विलम्बे जाते स्वयमेवागत इति। सङ्गतिमाह हारावलीति। अथ सखीवचननिर्गमनामन्तरम्। हारावलीनां मौक्तिकहाराणां तरला मध्यमणयश्च काञ्चनदाम्न: सुवर्णकाञ्चिदाम्नश्च मञ्जरीणां नूपुराणां कङ्कणानां मणयश्च तेषां द्युतिभि: दीपित: उज्ज्वलित: तस्य निकुञ्जनिलयस्य कुटीरगृहस्य द्वारे हरिं निरीक्ष्य आलोक्य व्रीडावतीं कृष्णाधिष्ठितकुञ्ज प्रत्यागमनात् ह्रियमाणां राधां सखी निजगाद ।।६२।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६२।। सम्प्रति सङ्केतस्थानं गत्वा लज्जावशात् प्रियपार्श्वमभजमानां राधां सखी प्राह। हारेत्यादि। अथाभिसरणानन्तरं निकुञ्जनिलयस्य द्वारे द्वारप्रदेशे स्थितां हरिं निकुञ्जनिलयान्तर्वर्त्तिनं निरीक्ष्य व्रीडावतीं लज्जितां सखीं राधा इयं सहचरी पूर्वप्रकान्ता इति वक्ष्यमाणं वच उवाचेति योजना। अन्धकारे हरिदर्शनं कथं जातमित्याह। निकुञ्जनिलयस्य किंविधस्य? हारावल्यास्तरलो मध्यभागस्थो मणि:। ''तरलं चञ्चलेसिंहे

हारमध्यमणावपि। भासुरे चाथ तरलायवागुसुरतयो रपीति **विश्व**:।'' काञ्चनकाञ्चिदाम सुवर्णमयमेखलागुणं मञ्जीरो नूपुर: कङ्कणकाञ्चनकाञ्चिदामादीनां त्रयाणां मणयो रत्नानि हारावली तरलश्च काञ्चनकाञ्चिदाममञ्जीरकङ्कणमणयश्च तेषां द्युतिभि र्दीपितस्य प्रकाशितस्य। एतद्विशेषणप्रकर्षेण निविडान्धकारेऽपि कृष्णस्य दर्शनं सूचितम्। अन्धकारवुद्ध्या गमनप्रवृत्ताया: कृष्णालङ्कारलोकै स्तं दृष्ट्वा लज्जया गमननिर्वृत्तिरिति भाव:।।६२।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६२।। इदानीं तन्निकटं गत्वा अत्युत्सुकं श्रीकृष्णं वीक्ष्य गन्तुमुद्यतामपि लज्जया तत्पार्श्वमभजमानां सखी प्राह हारेति। निकुञ्जनिलयस्य द्वारे हरिं विलोक्य अथान्तरमियं सखी लज्जावतीं सखीमिति बक्ष्यमाणमुवाच। कीदृशस्य ? हारावलेर्मध्यगानां मणीनां काञ्चनकाञ्चिदाम्नो मञ्जीरयो: कङ्कणयोश्च मणीनां द्युतिभिर्दीपितस्य। तरलो हारमध्यग **इत्यमर**:।।६२।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६२।। एवमुपदेशसम्बलितबहुविधवचनेन सङ्केतवसतिपर्यन्तमभिसारिकां लज्जावनतमुखीं तां पुनरुवाच, इत्याह, हारावलीति। अथ सङ्केतद्वारपर्यन्त-गमनानन्तरमियं समागमप्रयत्ना सखी निकुञ्जनिलयस्य सङ्केतकुञ्जगृहस्य द्वारे हरि तत्समयोचितप्रत्युद्गमनादिभि: निजचित्तहरं श्रीकृष्णं निरीक्ष्य व्रीडावतीं लज्जावनतमुखीं सखीं राधामिति वक्ष्यमाणमुवाच उक्तवती। ननु तिमिरावृतकुञ्जस्य द्वारि कथं झटिति हरिदर्शनमित्यत्राह-हारेति। कीदृशस्य। हारावले: च तरलानां तन्मध्यगमणीनां च काञ्चननिर्मितकाञ्चीदाममञ्जीरकङ्कणसम्बन्धिनां मणीनां हीरकपद्मरागादिरत्नानां च द्युतिभि: किरणैर्दीपितस्य प्रकाशितस्य। 'तरलो हारमध्यग' **इत्यमर**:।।६२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

६२- हारावलीति; कुञ्जद्वारे हरिं निरीक्ष्य अवलोक्य व्रीडावती सञ्जाता लज्जां नाटयति श्रीराधा। तं सखीं प्राह। किंभूता श्रीराधा इत्यत्र श्रीराधाया: सुवेशं तथाभिसारिकारूपं वर्णयति कवि:। हारावली गले स्यात्। तरलो चञ्चलो। पक्षे मध्यमणि:। काञ्चनस्य सुवर्णस्य काञ्चीमेखला कटीसूत्रं वा दाम शोभनं कटीसूत्रं वा। केयूरं वाहुभूषणं कंकणो वा। तेषु स्थिता: मणय: तेषां द्युत्या दीपितस्य रूपस्य छवि: कुञ्जं तत्र श्रीराधा हरीमवलोक्य लज्जते। व्रीडाया: कारणं किमिति ? कामवतीनामपि युवतीनां प्रथमसंगमे लज्जा किमपि कामातिशयं विदधाति। इति **कुम्भकर्ण**:। वसन्तनिलकावृत्तम्। अतिशयोक्तिरलंकार:।।६२।।

।। एकविंशप्रबन्धः / गीतम् २१ ।।

।। वराडीरागरूपकताले प्रतिमण्टताले एकताले वा गीयते।।

**१-मञ्जुतरकुञ्जतलकेलिसदने।**
**विलस रतिरभस हसितवदने।।**
**प्रविश राधे माधवसमीपमिह।। ध्रुवम्।।१ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१ ।। किमुवाच दूतीत्याह। वक्ष्यमाणं चेत्याह। मञ्जुतरेति। हे राधे! माधव समीपं प्रविश, इह मञ्जुतरकुञ्जतलसदने विलस चेति सर्वत्र वाक्यार्थः। मञ्जुतरकुञ्जतलमेव केलिसदनमिति विग्रहः। रतिरभसहसितवदने! इति सम्बोधनम्। रतिरभसेन हसितं वदनं यस्या इति विग्रहः।।१ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।। तदेव सखीवाक्यं विवृणोति, मञ्जुतरेति ।अत्राष्टपद्यामुद्ग्राहापेक्षया ध्रुवस्य बाहुल्यम्। तत्रापि च प्रतिपादमन्तिमं खण्डं पदान्तरापेक्षया नवं नवमेवेति बोद्धव्यम् । तत्रापि राधाविशेषणानि सर्वाण्यनुभावत्वेन बोद्धव्यानि, स्थानविशेषणानि च विभावत्वेनेति। प्रविशेत्यादि। हे राधे! माधवसमीपं प्रविश। इह निकुञ्जे विलस गमनागमनादिचेष्टाः कुरु। किंभूते राधे ? रतिरभसेन रतिहर्षेण हसितं वदनं यस्याः। एतावद्ध्रुवस्थानीयम्। तदनुस्यूतं त्वमेवपदमिहेत्यस्य विशेषणम्। किंभूते ? मञ्जुतरं मनोहरं यत्कुञ्जतलं कुञ्जस्याधरप्रदेशस्तदेव केलिसदनं यत्र।।१ ।।

## (३) जगद्धरकृत- सारदीपिका

।।१ ।। तदेव गीतेनाह वराडीरागे मञ्जुतरेति हे राधे ! रतिरभसेन सुरतोत्साहेन हसितं हास्ययुक्तं वदनं मुखं यस्यास्तत्सम्बोधनम् इह अस्मिन् मञ्जुतरं मनोहरं निकुञ्जाभ्यन्तर-देशस्त देवकेलिसदनं क्रीडागृहं तस्मिन् माधवसमीपं प्रविश गच्छ पश्चाद्विलासक्रीडां कुरु।।१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। तदेव गीतेनाह, मञ्जुतरेति। गीतस्यास्य वराडीरागो मण्ठतालश्च। गीतार्थस्तु, हे राधे! माधवसमीपं कृष्णान्तिकदेशं प्रविश। इह मञ्जुतरकुञ्जतलकेलिसदने मञ्जुतरं यत्कुञ्जतलं निकुञ्जाभ्यन्तरदेशस्तदेव यत्केलिसदनं लीलागृहं तत्र विलस विलासं कुरु। कीदृशि ? रतिरभसेन सुरतोत्साहेन हसितं हास्ययुक्तं वदनं मुखं यस्यास्तादृशि।

प्रविश राधे ! माधवसमीपमिह विलसेत्युक्तम्।। ध्रुवपदमनुवर्तमानत्वात् यद्वा, इह माधवे विलस। कीदृशे माधवे ? मञ्जुतरकुञ्जतलं केलिसदनं यस्य तादृशे। पुनः कीदृशे ? रतिरभसेन हसितं वदनं यस्य तादृशे। कीदृशे केलिसदने ?।।१ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१ ।। उक्तप्रकारमेय विषदयति। मञ्जुतरेत्यादि। वरालीरागेण गीयते इत्युक्तम्। तस्यायमभिप्राय:। पूर्वगीते वसन्तस्य उद्दीपकत्वात्। बरालिकायास्तत्पत्नीत्वात्तदनन्तरम् अस्या अवस्थानं युक्तमिति तदुक्तमिति ''रामक्रिया वराली च कौशी वासन्तयोषित'' इति, झम्पातालेन गेयम्। तल्लक्षणं तु,

द्रुतद्वयक्षं विरामान्तं लश्च झम्पा प्रकीर्त्तित इति। रतिरभसेन सुरतार्थचापलेन सम्भ्रमेणेत्यर्थ:। यद्यपि हसितं तद्वदने यस्या दरहसितवदना यस्या: सम्बुद्धि:। हे राधे ! मञ्जुतरमत्यन्तमनोहरं कुञ्जतटे केलिसदनं तस्मिन्। कुञ्जरूपविहारमन्दिरे माधवस्य लक्ष्मीपतिरूपश्रीकृष्णस्य समीपमभ्यर्ण्णं लोके हि प्रायेण प्रेमवाजिक: सम्पन्नवल्लभानु-सरणप्रवेशो भवति। तद्वत् प्रकृतेऽपि द्योतयितुं साधकसमीपमित्युक्तमिति ज्ञेयम्। यद्वा प्रवेशे विलम्बे क्रियमाणे सतुल्यलक्ष्मीसकाशं प्रति गमिष्यतीति भयसूचनार्थ माधवेत्युक्तमिति ज्ञेयम्। प्रविश इह रह:स्थले विलस विहर विलासं कुर्वित्यर्थ:।।१ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१ ।। किं जगादेत्याकांक्षायां गीतेनाह। गीतस्यास्य वराडी राग:। एकतालीताल:। तल्लक्षणं प्रागुक्तम्। नायिकात्राभिसारिका, लक्षणमप्युक्तम्। गीतार्थस्तु हे रतिरभसहसितवदने राधे! रतिरभसेन भविष्यत्क्रीडाकौतुकेन हसितं हासयुक्तं वदनमाननं यस्यास्तादृशि राधिके ! माधवसमीपं प्रविश श्रीकृष्णपार्श्वे प्रविष्टा भव। इह अत्र स्थाने विलस विलासं कुरु। इह कीदृशे ? मञ्जुतरोऽतिमनोहर: कुञ्जतरोऽति-शयितकुञ्ज: स एव केलिसदनं क्रीडागृहमिव यत्र तादृशे ? मञ्जुतरोऽतिशयितकुञ्ज: स एव केलिसदनं क्रीडागृहमिव यत्र तादृशे। तथा च त्वं तावत् रतिरभसहसित वदना, इदञ्च स्थानं ललितं विजनञ्च, हरिश्च क्रीडोत्वण्ठित एव। तदविलम्बितं विधेयं विधेहीति ध्वनि: एवं प्रतिपादमेव पूर्वार्द्धं स्थानविशेषणम्।अपरार्द्धनेहान्तरदानं सम्बोधनम्। तत्पूर्वदलञ्चैकमेवेति बोद्धव्यमिति।।१ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।१ ।। वराडीरागमण्ठतालध्रुवपदानां लक्षणमुक्तमेव। श्लोकोक्तं गीतेनाह,[६] मञ्जुतरेत्यादिना। हे राधे ! इहाऽस्मिन् मञ्जुतरं[७] मनोहरतरं[८] यन्निकुञ्जतलं लताभ्यन्तर-

देशस्तदेव केलिसदनं क्रीडामन्दिरं तस्मिन् माधवसमीपं [९] प्रति प्रविश गच्छ, तत्र विलस विहारं कुरु। [१०]एतेन विहारातिशय उक्त:। कीदृशे केलिमन्दिरे ? राधे र: [११] कामोऽधि अधिको यत्र तादृशे। रतिरभसेन सुरतोत्साहेन हसितं वदनं यस्यास्तत्सम्बुद्धि:।।१ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१ ।। [१२] वराडीराग:। मञ्जुतरेति। हे राधे ! रतिरभसेन सुरतोत्साहेन हसितं हास्ययुक्तं वदनं मुखं यस्यास्तत्सम्बुद्धि:। इहाऽस्मिन् मञ्जुतरं मनोहरं[४]निकुञ्जाभ्यन्तरदेशस्तदेव केलिसदनं क्रीडागृहं तस्मिन् माधव[५]समीपं प्रविश गच्छ पश्चाद्विलासक्रीडां कुरु।।१ ।।

१.रुपकताले-नि.सा प्रतिमण्ठतालेन-इ. २,४.पङ्क्तिद्वयमिदं व्यत्यस्तम्-नि.सा.ड. ३.इह नास्ति-ड.४.इह विलस सरतिरभसवदने-ड.५.वराडीरागे मण्ठताले ध्रुवपदानां लक्षणमुक्तमेव-ग.वराडीरागमण्ठताले ध्रुवपदानां लक्षणमेव पूर्वमुक्तम्-ज.वराडीरागमण्ठतालध्रुव-पदानां लक्षणमेव पूर्वमुक्तम्-फ.वराडीरागमण्ठताले। रागतालध्रुवपदानां लक्षणमुक्त मेव-ह. ६.नास्ति-ग.७.मनोहरं-ग.८.यन्निकुञ्जतलाभ्यन्तरदेश:-अ.ब.९.नास्ति-इ.फ.ग.ह.ज. १०.अनेन-इ.११.कामोऽधिको यत्र-ग.१२.वराडीराग: भैरवी वा-ड.वराडरागेण अडतालेन-क. वराडीराग: भैरवी वा-ड.वराडरागेण अडतालेन-क. वरारिरागेण गीयते अडताले-ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१ ।। मञ्जुतरेति। मञ्जुतरं सुन्दरतरं कुञ्जतले केलिशयनं क्रीडशय्या तस्मिन्। इह अत्रैव माधवसमीपं कृष्णनिकटं प्रविश विलस। अत एव शोभां इहि। हे (रतिरभसहसितवदने ! रति) रभसेन प्रेमातिशयेन हसितं वदनं यस्यास्तत्सम्बोधनम्। हे राधे! मया किमर्थं गन्तव्यं स्वयमेवागत इति हर्षातिशय:। अत्र प्रविश राधे माधवसमीपमिह विलसेति ध्रुवा। आभोगे प्रतिपदं रभसादिभागस्य परिवर्तनं बोध्यम्।।१ ।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१ ।। किमुवाचेत्याह। मञ्जुतरेति। हे राधे माधवसमीपं प्रविश इह मञ्जुतरकुञ्जतल-केलिसदने विलस चेति सर्वत्र वाक्यार्थ:। मञ्जुतरं यत् कुञ्जतलं तदेव केलिसदनमिति विग्रह:। अथवा इह विलसेत्यङ्गुल्या निर्दिष्टं स्थानविशेषमिह शब्द आचष्टे। तेन तस्य विशेषणानि सर्वाणि सप्तम्यन्तपदानि तथाहि। कुञ्जतलं केलिसदनं यत्र स्थाने इति विग्रह:। एवं च बहुव्रीहिणा न कर्मधारयो बहुव्रीहिप्रतिपत्तिकर इति दूषणमपि निरस्तं भवति। राधाया: सम्बोधनपदोपन्यासेन प्रतिपदमुत्कर्षं प्रतिपिपादयिषुराह। रतिरभसह-सितवदने, रतिरभसेन हसितं हासयुक्तं वदनं यस्या इति विग्रह:। अत्र कुञ्जशब्दोपादानात्

सुरताशया एतावद् दूरपर्यन्तम् आगताया रत्युत्साहहसिताया स्तवलज्जावलम्बनमनुचितमिति सोल्लुण्ठोत्साहनम्। उद्दीपना लम्बनरूपेण विभावद्वयं च प्रतिपादितमुपदर्शितम्। स्थानविशेषस्य विशेषणद्वारेणोत्कर्षं कथयन्नायिकाया मनसि शृङ्गाररसस्योद्दीपनम्। तेन च स्थानविशेषोत्कर्षेण राधायाश्च सौन्दर्यातिशयवर्णनाया मनस्यालम्बनोद्दीपनरूपेण विभावद्वयेन शृङ्गाररसप्रादुर्भाव इति प्रकाशितम्।।१।।

## (११) पूजारी गोस्वामीकृत-बालबोधिनी

।।१।। किमुवाच सखीत्याह, मञ्जुतरेत्यादिना। अस्यापि वराड़ीरागरूपकतालौ। हे राधे माधवसमीपं प्रविश, प्रविश्य च इह मञ्जुतरकुञ्जतलमेव केलिसदनं तत्र विलस, रतिरभसेन हसितं वदनं यस्या हे तादृशि। तव उच्छलितं मनः अत्युत्सुकतया हास्यमिषेण प्रियमिलनाय वहिर्निर्गतमिति भावः।।१।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१।। यदुवाच तदाह, मञ्जुतरेत्यादिना गीतेन। इदमपि वराडीरागेण गीयत इति। पूर्वप्रयुक्तवसन्तस्य पत्नीत्वेनास्यास्तत् समीपावस्थानौचित्यात् साधूक्तम्। मञ्जुतरेति। अत्र प्रवेशेत्यादि विलसेत्यन्तस्य ध्रुवस्य पदमध्यगध्रुवत्वेन कवे रचनाविशेषः। रतिः शृङ्गारस्य स्थायिभावः तस्य रभसेन, प्रियदर्शनहेतुकहर्षोदयेन हसितं सञ्जातमन्दहासं वदनं यस्या हे तथाविधे राधे! तवान्तरो भावो हासमिषेण प्रियमिलनाय बहिरुद्गतस्ततो वाम्यं भा कुर्विति भावः। इह सङ्केतीकृतेऽतिमनोहरकुञ्जतलरूपे, केलिसदने, क्रीडागृहे माधवस्य समीपं प्रविश। न केवलं प्रविश, किन्तु प्रविशन्ती विलस विलासं कुरु। यौवनगुरूपदिष्टविलासवैदग्ध्यमिह प्रकाशयेदित्यर्थः।।१।।

## (१३) प्रफुल्लमिश्रकृत-स्वर्णलता टिप्पणी

।।१।। मञ्जुतरकुञ्जतलेति; मञ्जुतरः सुन्दरतरः। कुञ्जतले कुञ्जे। केलिसदने कन्दर्पगृहे। हे राधे रभसा वेगेन प्रवेशं कुरु। रभो वेगः इति कोषः। हसितवदने नायकः इच्छति। नायिका खलु सदा स्मितमुखी तस्य समीपे स्यात्। हे श्रीराधे इदानीं माधवसमीपमिह गछ। माधवसमीपं कुञ्जे प्रविश प्रवेशंकुरु इति ध्रुवपदम्। अत्र राधाविशेषणानि सर्वाण्यनुभावत्वेन वोद्धव्यानि। स्थानविशेषणानि च विभावत्वेनेति।।१।।

**२-नवभवदशोकदलशयनसारे।**

**विलस कुचकलशतरलहारे।। प्रविश० ।।२।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२।। अत्रापि पूर्ववन्मुखबन्धयोजना, मञ्जुतरकुञ्जतलकेलिसदने, कीदृशे, नवभवदशोकदलशयनसारे, नवभवदशोकदलमेव शयनसारः श्रेष्ठशय्या यत्रेति विग्रहः। कुचकलशतरलहारे इति सम्बोधनम् ।।२।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। अपि च, नवभवेति। हे कुचकलशतरलहारे! कुचकलशे तरलश्चलो हारो यस्यास्तस्याः संबुद्धिः। इहेत्यस्य विशेषणम्। किंभूते इह? नवं भवद्यदशोक दलानां शयनं तेन सारमुत्कृष्टं तस्मिन्।।२।।

### (३) जगद्धरकृत- सारदीपिका

।।२।। अपि च नवेति हे कुचकलशयोश्चञ्चलहारो मुक्ताहारो यस्यास्तत्सम्बोधनं हे राधे इह क्रीडागृहे माधवसमीपं प्रविश विलस च कीदृशे इह नवानि नूतनानि भवन्ति यानि अशोकदलानि पर्णानि तं त्वत्कृताशय्या कृष्णशय्या तदेव सा महाधनं यस्मिन् ।।२।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।२।। नवेति। नवं नूतनमथ च लसच्छोभमानं यदशोकदलमशोकपल्लवं यस्य तच्छयनं शय्या तदेव सारो महाधनं यत्र तादृशे। त्वं कीदृशी? कुचकलशयोः स्तनकलशयोस्तरलश्चञ्चलो हारो यस्यास्तादृशी। अपरस्मिन्नपि गृहे महाधनं तिष्ठतीति ध्वनितम्। यद्वा, नवलसदित्यपि 'राधे' इत्यस्यैव विशेषणम्। तदा नवलसदशोकदलशयनमेव सारो यस्यास्तादृशि। यद्वा, इह माधवे विलस । कीदृशे माधवे? नवलसदशोकदलमेव सारो यस्य तादृशे।।२।।

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२।। नव भवोति। कुचकलशयोः पयोधरकुम्भयोः तरला रतिरभसादिना चञ्चला हारा यस्याः सम्बुद्धिः इदं तु भाविसुरतम्, अथवा तरलो नायकः रमणी प्रधाना हारा यस्यास्तस्या सम्बुद्धिः, शाकपार्थिवादित्वान्मध्यपदलोपि समासः। "तरलो हार मध्यगः" **इत्यमरः**। एतादृशे हे राधे! माधवसमीपं प्रविश। किञ्च नवंनूतनं यथा भवन्ति तथा भवन्ति उत्पद्यमानानि यान्यशोकदलानि पल्लवा इत्यर्थः। अशोकेति दलविशेषणं यौगिकं वा पदं तैः कृतः शयनसारस्तल्पोत्तमो यत्र तादृशे इह लतामन्दिरे विलस इत्यन्वयः।।२।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२।। सुकुमारायास्तव सख्या: समुचितं शयनं रचितमेवास्ति तत् किम्बिलम्बेनेत्याह कुचावेव कलसाविति रूपकम्, तत्र तरलो हारो यस्या: तादृशि राधे। माधवसमीपं प्रविश। मोट्टायितभावदर्शनेन हारस्य तरलतेति भगीरथ:। नवं मनोज्ञं यत् भवदशोकदलशयनं भवत्सम्बन्धिनी अशोकदलशय्या तथा सारे श्रेष्ठे इति स्थानवशेषणम्। 'कोषे सारं बले सारं श्रेष्ठे सारं प्रकीर्तितमि'ति **वृद्धामर**:। अत्राशोकपदोपादानेन शोकशमनत्वं सूचितम्।।२।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२।। (नवेति।) [६]कीदृशे (केलिमन्दिरे)? [७]नवं नूतनं लसच्छोभमानं यदशोकदलं पत्रं [८] तन्निर्मितशयने शय्यायां सारो रत्नं यत्र [९] तादृशे।[१०] राधाविशेषणं कुञ्जविशेषणं वा। [११]पुन: कीदृशे? कुचयो: [१२] स्तनयोर्मध्ये निपतितश्चञ्चलो वा हारो[१३]मुक्ताहारो यत्र [१४]तादृशे। [१५]राधाविशेषणं कुञ्जविशेषणं वा[१६]। [१७] श्रीकृष्णपक्षे [१८] काकाक्षिगोलकन्यायेन श्रीराधासम्बोधनं सदनविशेषणञ्च। [१९]हे माधव समीपं [२०] प्रकरणात् राधाया: समीपमिह [२१] कुञ्जसदनं प्रविश विहरेति च सर्वत्र योजना ज्ञातव्या।।२।।

१.नवभवदशोक-नि.सा. २.पङ्क्तिरियं तृतीया-नि.सा. ३.इह विलस-ड.इयं-पङ्क्तिस्सर्वेषु पदेषु दृश्यते-ड. ४.निकुञ्जतरं कुञ्जाभ्यन्तरप्रदेश:-क.ड.निकुञ्जाभ्यन्तरदेश:-ल.म. ५.समीपे-ड. ६.कीदृग्विशेषणं वा-ग. ७.नवभूते-इ.नवं नूत्नं-ह. ८.तन्निर्मिते शयने-इ. ९.तादृशम्-इ.फ.ग.ह.ज. १०.राधासम्बोधनं-इ.ग.ह.सम्बोधनं-फ.ज. ११.त:१३.पर्यन्तं नास्ति-फ.ज. १२.तरलो मध्ये-ग. १३.नास्ति-अ.ब. १४.तादृशम्-इ.ग.ह. १५.सम्बोधनं-इ.ग.ह. १७.श्रीनन्दकुमारपक्षे-ग. १८ काकाक्ष-ग. १९.प्रविश नीत्वा हे माधव-अ.ब. २०.प्रकरणात्तु-फ.ज. २१.कुञ्जसदने-फ.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२।। नवेति। हे (कुचकलशतरलहारे) कुचकलशयोस्तरलश्चञ्चल: हारो मुक्ताहारो यस्यास्तत्सम्बुद्धि:। हे राधे! इह क्रीडागृहे माधवसमीपं प्रविश विलस च। कीदृशे इह? नवानि नूतनानि भवन्ति यानि अशोकदलानि पर्णानि तेषां शयनं तत्कृता शय्या [४] कृष्णशय्या तदेव सारो महाधनं यस्मिन्।।२।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२।। नवभवदिति। नवं (वानि) भवन्ति अशोकदलानि तेषां शयनमेव सार: उत्कर्ष: तस्मिन् प्रविश। हे (कुचकलशतरलहारे) कुचकलशयोस्तरलश्चञ्चल: हारो यस्या: तत्सम्बोधनम्। विलस।।२।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।। नवेति ।अत्र पूर्ववन्मुखबन्धयोजना ।मञ्जुतरकुञ्जकेलिसदने इह स्थानविशेषे वा। किंविधे ? नवं भवत् नवभवदिति क्रियाविशेषण......नवभवता अभिनवजन्मना अशोकदलेन निर्मितं यच्छयनं शय्या तेन सारे श्रेष्ठो। यद्वा नवभवदशोकदलमेव शयनसारः श्रेष्ठशय्या यत्रेति विग्रहः। कुचकलशहार इति सम्बोधनम्। कुचकलशहार इति सम्बोधनम्। कुचकलशयोरुपरि तरलश्चञ्चलो हारो यस्या इति विग्रहः ।एतेन स्तनकम्पनात् सात्त्विकभावः सूचितः।।२।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२।। न मन्मन उछलितं, किन्तु अस्य तव नागरस्य वैकल्यमाकलय्य मद्वदनं हसितं तत्राह। सर्वत्र पूर्ववत् मुखवन्धयोजना प्रतिपदे शेषार्द्धं ध्रुवम्। केलि सदने कीदृशे नवभवदशोकदलैः पल्लवैः रचितं शयनश्रेष्ठं यत्र तस्मिन्। कुचकलसयोः कंपेन तरलो हारो यस्याः हे तादृशि। कुजकंपेनान्तर्वृत्तिर्व्यक्ता अतो वाम्यं न कुर्वित्यर्थः।।२।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२।। नवेति। कुचकुम्भयोस्तरला श्चञ्चला हारा यस्य हे तथाविधे राधे! अत्र कुचस्पन्दसूचकहारचापल्येन हृद्गतो भावः सम्यग् व्यज्यते। अतः सर्वथा वाम्यं त्यजेति भावः। इहातिमञ्जुलकुञ्जकेलिसदने विलसेत्यन्वयः नवं यथा स्यात्तथा भवन्ति उद्भवन्ति यान्यशोकस्य दलानि पत्राणि, नूतनप्रभवतयाऽतिकोमलानीत्यर्थः। तैः कृतः शयनसारः शय्याश्रेष्ठो यत्र। ईदृशे इह मञ्जुलकुञ्जकेलिसदने त्वं विलसेति पूर्ववत् अन्वयः।।२।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। नवभवेति; नवभवदशोकदलं अशोकबृक्षस्य नूतनांकुरितादीनि कोमलपत्राणि शय्यारूपेण सारः श्रेष्ठो भवति। कुचकलशस्योपरि लम्बितः हारोऽपि तरले मेघमणिविशिष्टे चञ्चलकिरणविशिष्टे वा शोभा वर्द्धते ।। २।।

**३-कुसुमचयरचितशुचिवासगेहे।**
**विलस कुसुमसुकुमारदेहे।। प्रविश०।।३।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३।।अत्रापि पूर्ववन्मुखबन्धयोजना। पुन: कीदृशे, कुसुमचय-रचित-शचिवासगेहे। कुसुमचयेन रचितं शुचिवासगेहं यत्रेति विग्रह:। निकुञ्जाभ्यन्तरे पुष्पगृहरचना विशेष इति पुनरूक्तशङ्काम्। कुसुमसुकुमारदेहे इति सम्बोधनम्।।३।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।३।।अपि च, कुसुमेति। हे कुसुमसुकुमारदेहे! इह विलस। किंभूते इह? कुसुमानां चयस्तेन रुचिरं शुचि च वासार्थं गेहं यस्मिन्निकुञ्जतले। अत्र सर्वत्र एकैकं राधाविशेषणं एकैकं निकुञ्जविशेषणम्।।३।।

### (३) जगद्धरकृत- सारदीपिका

।।३।।कुसुमेति हे कुसुमवत्सुकुमार देहो यस्यास्तत्सम्बोधनं कीदृशे इह कुसुमचयेन पुष्पसमूहेन रचितं कृतं शुचि अनुपहतं नायिकान्तरेणानुपभुक्तं यद्वासगृहं तत्र विलस।।३।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।३।।कुसुमेति। हे राधे! इह कुसुमचयेन पुष्पसमूहेन रचितं विरचितं शुचि अनुपहतं नायिकान्तरेणानुपभुक्तं यद्वासगेहं लीलागृहं तत्र विलस। यद्वा, कुसुमचयेन रचितमर्थात्कृष्णेन निर्मितं शुचि वासगेहं यस्यास्तादृशी इति 'राधे' इत्यस्यैव विशेषणम्। पुन: कीदृशी त्वम्? कुसुमवत्सुकुमार: कोमलो देहो यस्यास्तादृशी। यद्वा,–इह, माधवे विलस। कीदृशे माधवे? कुसुमचयेन रचितं शुचि वासगेहं येन तादृशे। कीदृशे माधवे? कुसुमवत्सुकुमारो देहो यस्य तादृशे। 'शुचि अनुपहते' इति **विश्वप्रकाश:**।।३।।

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३।।कुसुमेति। हे कुसुमसुकुमारदेहे कुसुमवत्कोमलशरीरे राधे! माधवसमीपं प्रविश। न केवलं प्रबेशमात्रम् अपितु कुसुमचयेन सुमन: स्तोमेन रचितं निर्मितम् अत एव शुचि: पवित्रं मनोहरमिति यावत्। वासगेहं गर्भागारं यस्य तस्मिन् इह लतागृहे विलसेत्यन्वय:।।३।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३ ।। शय्यारमणीयतां दर्शयित्वा गृहरमणीयतां दर्शयति। कुसुमवत् सुकुमारं कोमल देहं यस्याः तादृशि राधे! कुसुमचयेन रचितं शुचिवासगेहं शुद्धवासमन्दिरं यत्रेति स्थानविशेषणम्। तथा च त्वं कुसुमसुकुमाराङ्गी इदञ्च कुसुमरचितमन्दिरम्। तुदत्रैव युक्ता तव क्रीडेति भावः।।३ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।३ ।। किञ्च कुसुमेति। कीदृशे [५]इह? कुसुमचयेन पुष्पसमूहेन [६] रचितं कृतं शुचिः शृङ्गारस्तद्भोगाय वासगृहं शयनमन्दिरं यत्र। पुनः कीदृशे? [७]विमलं यत् कुसुमं तद्वत्सुकुमारो देहो यस्याऽतिमृदुले। श्रीराधाविशेषणं वा। अन्यत्पूर्ववत्। [८] रः कामोत्पादके कम्पे [९] युद्धेऽधःकम्पने तथा इत्यनेकार्थः [१०]।।३ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।३ ।। कुसुमेति। हे (कुसुमसुकुमारदेहे) कुसुमवत्सुकुमारो देहो यस्यास्तत्सम्बुद्धिः। कीदृशे इह? कुसुमचयेन पुष्पसमूहेन रचितं [११]कृतं शुचि अनुपहतं नायिकान्तरेणानुपभुक्तं यद्वासगृहं तत्र विलस। [१२]श्रीकृष्णेन सह रतिक्रीडां कुर्विति भावः [१३]।।३ ।।

१.रुचिशुचिनिवासगेहे-इ.२.पङ्क्तिरियं तृतीया-नि.सा.३.इह विलस-ड.विमलकुसुम-अ.ब.४.कृष्णा शय्या-ल.म.५.नास्ति-अ.ब.६.विरचितं-अ.ब.७.कुसुमवत् सुकुमारो देहो यस्याति-मृदुले-इ.फ.ग.ह.ज.८.तः१०.पर्यन्तं नास्ति-अ.ब.९.युद्धौघे-फ.ज.११.नास्ति-ड.१२.तः-१३.पर्यन्तं नास्ति-ड.ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।३ ।। कुसुमेति। कुसुमचयैः पुष्पगणैः रुचि (रं) रमणीयं शुचि प्रशस्तं निवासगेहं तस्मिन् प्रविश। हे (कुसुमसुकुमारदेहे) कुसुमवत्सुकुमारः कष्टानर्हः देहः यस्याः तत्सम्बोधनम्। विलस।।३ ।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३ ।। कुसुमेति। अत्रापि पूर्ववन्मुखबन्धयोजना। पुनः कीदृशे? कुसुमचयेन रचितं निर्मितम्, अत एव शुचि शुभं वासगृहं यत्रेति विग्रहः। केलिसदनवासगेहयोः। पुनरुक्तिशङ्का न कार्या निकुञ्जगृहाभ्यन्तरे पुष्पगृहरचनाविशेष इत्यदोषात्। कुसुममिव सुकुमारो देहो यस्या इति सम्बाधनम्।।३ ।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।३ ।। तस्याभिप्रायविशेषावकलनात् कंपोऽयमित्यत आह। पुनः कीदृशे? कुसुमचयेन रचितं शुचेः शृङ्गारस्य वासगेहं यत्र तस्मिन्। निकुञ्जाभ्यन्तरे पुष्पगृहरचना विशेष

इति न पौनरुक्त्यम्। कुसुमेभ्योऽपि सुकुमारो देहो यस्याः हे तादृशि। निकुञ्जद्वारगतः प्रियस्त्वां प्रतीक्षते त्वं कुसुमसुकुमारतनुरतो वास्यमयुक्तमिति भावः।।३।।

**(१२) लक्ष्मणकृत-रसिकरङ्गदा**

।।३।। कुसुमेति। कुसुमेभ्यः शिरीषादिभ्योऽपि सुकुमारो देहो यस्या हे तथाविधे राधे! पुष्पसमूहेन निर्मितं शुचेः शृङ्गारस्य शुचि मनोहरं वा वासगृहं गर्भागारं यत्र तादृशे कुञ्जमध्ये पुष्पगृहरचना विशेषे इति न पौनरुक्त्यम्। कुसुमसुकुमारायाः कुसुमगृहावस्थानमेवोचितमिति भावः।।३।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।३।। कुसुमचयेति, कुसुम पुष्पसमूहेन रचित शोभित पवित्रवासगेहे शयनागारे कुञ्जे त्वं विलस। भोगं कुरु। किम्भूते देहे कुसुमसुकुमारे देहे । एतस्यार्थः पुष्पमिव कोमले देहे एतद् कुञ्जं भुञ्जस्व।। ३।।

**४-चलमलयवनपवनसुरभिशीते।**
**विलस रसवलितललितगीते।। प्रविश०।।४।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।४।। अत्रापि पूर्ववन्मुखबन्धयोजना। चलमलयवनपवनसुरभिशीते, चलस्य मलयवनस्य पवनेन सुरभि च तत् शीतं चेति विग्रहः। रसरसितललितगीते इति सम्बोधनम्।।४।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।४।। अपि च, मृदुचलेति। हे राधे! इह विलस। किंभूते राधे? मदनशरनिकराद्भीति-र्भयं यस्याः तस्याः संबुद्धिः। इह मृदुयथा स्यात्तथा चलो यो मलयपवनस्तेन सुरभि च तच्छीतं च मृदुपवनेन सुरभिशीतम्।।४।।

**(३) जगद्धरकृत- सारदीपिका**

।।४।। मृदुचलेति हे रसवलितं कृतं ललितं मनोहरं गीतं यया तत्सम्बद्धिः हे राधे! इह केलिसदनो विलस कीदृशे इह चलश्चञ्चलो यो मलय पवनस्तेन सम्पर्क्कवशात्सुरभि एवं भूतं सः शीतलं तस्मिन्।

प्रेमातिशयोदर्शितः नृतन्यस्याः पुनः कीदृशे भणति च गुणान्वदति क्वचिप्रविश राधामाधवसमीप भणितेति पाठः।।४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। चलेति। हे राधे! माधवसमीपं चल व्रज। इह केलिसदने प्रविश विलस। कीदृशे केलिसदने? मलयपवनसुरभिशीते मलयसंबन्धी यः पवनस्तेन सुरभि सुगन्धं शीतलं च तस्मिन्। यद्वा, इह माधवे विलस। कीदृशे माधवे? मलयपवनसुरभिशीते मलयसंबन्धी यः पवनो वायुस्तेन सुरभिशीतले वा। यद्वा, च 'चल' इत्यपि पवनस्यैव विशेषणम्। तथा च चलश्चञ्चलो यो मलयपवनस्तेन सुरभिशीतले इत्यर्थः। 'चल' इत्यनेन ईषच्चाञ्चल्यमुक्तम्; तेन मान्द्यमुक्तम्। त्वं कीदृशी? रतिवलितललितगीते, रतौ वलितं ललितं मनोहरं गीतम् ।लालित्यं हावविशेषः यस्यास्तादृशि। यद्वा,–कृष्णे विलस। कीदृशे कृष्णे? रतिललितं मनोहरं वलितं संभक्तं गीतं यस्य तादृशे। क्वचित्सरसेति पाठः। ललितलक्षणं तु 'नानाविधमनाहार्य स्वभावेन मनोहरम्। शृङ्गारचेष्टितं स्त्रीणां ललितं संप्रचक्षते'।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। चलेति। रसेन शृङ्गारादिना वलिता संजाता रसभरितेत्यर्थ। वलितेत्यत्र तारकादित्वादच यस्येति चेतीकारलोपः।अत एव ललिता रमणीया गीतिर्गानं यस्याः सा तादृशी न वरसम्पन्ना गानचतुयेत्यर्थः। तस्याः सम्बुद्धिरिति केषुचित्पाठः। तदा रतिस्वभावो यस्याः सा तस्याः सम्बुद्धिः।अनेन राधाया गानचातुरी सूचिता। एतादृशे हे राधे! चलश्चञ्चलस्वभावो यः मलयवनपवनः चन्दनवनानिलस्तेन सुरभिः शीतः शीतलः तादृशे इह लतामन्दिरविशेषणं वा। तदा गीतं भ्रमरीमङ्गी कर्त्तव्यम्।।४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।४।। रतिश्रमशमनो मलयपवनोऽप्यत्र समुचित एवेति दर्शयति। रसः श्रृङ्गारादिः, तेन बलिता सहिता ललिता मनोहरा गीतिर्गानं यस्याः तादृशि राधे हे! चलमलयपवनस्य पवनेन सुरभि सौरभयुक्तं शीतं शीतलञ्चं यत् तत्तया तस्मिन्निति स्यानविशेषणम्।।४।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।४।। एवमनभिगच्छन्तीं प्रत्याह, (चलेति।) किञ्च कीदृशे इह? चलः सञ्चारी यो मलयपवन[४]श्चन्दनवायुस्तेन सुरभौ सुगन्धे [५] शीते च। [६]शीतमन्दसुगन्धिसेविते [७]इत्यर्थः। पुनः कीदृशे? रतौ [८]सुरते वलितं कृतं ललितं मनोहरं गीतं यत्र। राधासम्बोधनं वा। ललितलक्षणम्,

नानाविध[९]मनाहार्यं स्वभावजमनोहरम्-
शृङ्गारचेष्टितं स्त्रीणां ललितं सम्प्रचक्षते।। इति।। कृष्णपक्षे सर्वं पूर्ववत्।।४।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।४।। चलेति। हे (वलितललितगीते) वलितं कृतं ललितं मनोहरं गीतं [१०] यस्यास्तत्सम्बुद्धिः। कीदृशे इह? चलो यो [११] मलयपवनस्तेन सम्पर्कवशात्सुरभि, एवम्भूतं सत् शीतं शीतलं तस्मिन्।।४।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।४।। चलेति। चलः मन्दसञ्चारः स चासौ मलयपवनः दक्षिणवायुः तेन सुरभि च तत् शीतलञ्च तस्मिन्। शैत्यमान्द्यसौरभ्यविशिष्टवायु शालिनीत्यर्थः। प्रविश। वलिततया चलितं कम्पितयुक्तं कलं अव्यक्तमधुरं ललितगीतं मङ्गलगीतं यस्याः तत्सम्बोधनम्। विलस।।४।।

१.मृदुचल - नि.सा. २.इह विलस-ड. ३.मदनशरनिकरभीते -नि.सा. चलितकल-ललितगीते - इ.रसवलितललितगीते-ड. ४.वायु-ग. ५.सुगन्धे शीते चन्दनमिश्रवायुसुगन्धसेविते इत्यर्थः-फ.ज. ६, ७.नास्ति-अ.ब. ८.सुरतौ-इ.फ.ग.ह.ज. ९.मनाहार्ये-अ.ब.मनोहार्यं-ह. १०.यया-क. ११.मलयज-पवनः-क.ल.म.

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। चलेति अत्रापि पूर्ववन्मुखबन्धयोजना। चलस्य चञ्चलस्य मलयपर्वत सम्बन्धिवनस्य संसर्गिणा पवनेन सुरभि च तत् शीतलं चेति विग्रहः। मलयवनकम्पनेन मान्द्यमपि इतरद्वयं व्यक्तम्। रसेन रागेण वलितं प्रबलीकृतं ललितं रम्यगीतं शब्दितं यस्या इति सम्बोधनम्। ''गीतं शब्दितं गानयोरिति **मेदिनी**।'' ''रसवलितललित रीते इति पाठे'' ललितं नाम हावविशेषः। तस्य रीतिः प्रकारः। ''रीतिः स्यन्दे प्रकारे च लोह कीटारकूटयो'' रिति **कुमुदाकरः**। रसवलिता ललिता रीतिर्यस्या इति विग्रहः। यद्वा रसेन प्रवलीकृता ललिता मनोहरा रीतिः प्रकारो यस्या इति विग्रहः।।४।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।४।। अथोद्धीपनायातिशयेन केलिसदनमेव वर्णयति। चलेन मलयवनस्य पवनेन सुरभि शीतलं च यत्तस्मिन् रतौ वलितं रतियोग्यं ललितं गीतं यस्याः हे तादृशि। अतोऽस्मिन् प्रविश्य तदाचरेत्यर्थः।।४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।४।। चलेति, रसेन शृङ्गाररसेन वलितं सङ्घटितं गीतं गानं यस्याः। रीतेरिति पाठे, रीतिः स्वभावो यस्या हे तथाविधे राधे! चलेन मन्दसञ्चारिणा मलयाचलसम्बन्धि यद्

वनं तत्सम्बन्धिना पवनेन सुगन्धिनि शीतले च इह विलसेति पूर्ववत्। अनेन रतिश्रमापनोदनत्वं सूचितम्।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। मृदुचलेति; अत्र कुञ्जं प्रति मृदु धीरं चल। येन त्वं मलयपवनस्य मलयानिलस्य सुरभिं सेविष्यसे। तेन पवनेन शीतलताऽस्ति। तव गमनजन्यस्वेदवारि शोषितुं समर्थ: इति ध्वनि:। तत्र मदनशराघानेन कन्दर्पस्य वहुशराघातेन भीतस्त्रस्तं श्रीकृष्णसमीपं विलस सम्भोगं कुरु।।४।।

**५-मधुमुदितमधुपकुलकलितरावे।**
**विलस मदनरससरसभावे।। प्रविश०।।५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। अत्रापि पूर्ववम्मुखबन्धयोजना। पुन: कीदृशे, मधुमुदितमधुपकुलेन कलित: कृतो रावो यत्रेति विग्रह:। मदनशरसरसभावे इति सम्बोधनम्। मदनशरेण सरसो भावो यस्या इति विग्रह:।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। अपि च, मधुमुदितेति। हे राधे! इह विलस। किंभूते राधे? कुसुमशरे कामे रसो राग: साभिलाषो भावोऽभिप्रायो यस्यास्तस्या: संबुद्धि:। किंभूते इह? मधुना मुदितं यन्मधुपकुलं तेन कलितो रावो गुञ्जारवो यत्र।।५।।

## (३) जगद्धरकृत- सारदीपिका (टीकानोपालब्धा)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। मधुमुदितेति। कीदृशे केलिसदने? मधुना पुष्परसेन मुदितान्यानन्दितानि यानि मधुपकुलानि भ्रमरसमूहास्तै: कलितो विहितो राव: शब्दो यत्र तादृशे। त्वं कीदृशी? मदनरसरभसभावे मदनस्य कामस्य यो रस: शृङ्गाराख्यस्तत्र यो रभस उत्साहस्तेनोपलक्षितो भावो यस्यास्तादृशि। यद्वा, इह राधे ! माधवे विलस। कीदृशे माधवे? मदनरसेन यो रभसस्तेनोपलक्षितो भावो यस्य तादृशे इत्यर्थ:। यद्यपि मधुपेनैव मधुपानकर्तृत्वं प्राप्तं तथापि इदानीं मधुपानप्राप्तये मधुमुदितेत्युपात्तम्।।५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५।। मधुमुदितेति। मदनशरा: कामबाणा: तै: रभस: सुरतकरणवेग: ''तृतीया तत्कृते (२।१।३०) त्यादिना समास:''। रभसेन भाव:। प्रियसङ्गमाभिप्रायो यस्या तस्या सम्बुद्धौ। रभसभावे तत्रापि समास: पूर्ववत्। अथवा मदनशरै: रभसभाव:

शीघ्रप्रियसङ्गमाभिप्रायो यस्याः तस्याः सम्बुद्धिः। अथवा मदनशरैः रभसश्चञ्चलाभावः अन्तः करणं यस्यास्तादृशी कामशरकृत चित्तचाञ्चल्येत्यर्थः। तस्याः सम्बुद्धिः चित्तचाञ्चल्यज्ञानं तु चेष्टावशादवगन्तव्यम्। अत एव सम्बुध्युपपत्तिः, मदनरसविवश भावेति क्वचित्पाठः। तदा मदनेन कामदेवेन रसः सम्भोगवाञ्छा "शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रसः" **इत्यमरः**। समासः पूर्ववत्। तेन विवशभावः परायत्तं पारवश्यं वा यस्यास्तस्याः सम्बुद्धिः एवंविधे राधे मधुना मकरन्देन मुदिताः सन्तुष्टाः ये मधुपाः मधुब्रताः तेषां कुलेन संघातेन कलितः कृतः रावो झङ्कारो यक्ततादृशे। मधुकर झङ्कारकुल इत्यर्थः। उद्दीपनार्थमिदं गृहीतमिति मन्तव्यम् इह इत्यादि पूर्ववत्।।५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५।। मधुपध्वनिरूपमुद्दीपनविभावमनुभावयन्ती त्वरयति। मदनरसो मन्मथजनितेच्छा, तेन यो रभसो हर्षस्तेन भावा सात्त्विकाः व्यभिचारिणश्च यस्यास्तादृशि राधे! मदेन मत्ततया मुदितं हर्षितं यन्मधुपकुलं भ्रमरकुलं तेन कलितः कृतो रावःशब्दो यत्रेति स्थानविशेषणम्। तथाच मदयतेति मदनः, तत्र सदृष्टायास्तव मदमुदिते मधुपकुले समानशीलतयाऽनुरागो युज्यत इति ध्वनिः।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५।। किञ्च मध्विति। कीदृशे इह? मधुना वसन्तेन पुष्परसेन वा[९] मुदितानि मधुपकुलानि भ्रमरसमूहास्तैः कलितो विरचितो रावः शब्दो यत्र तादृशे? मदनस्य कामस्य यो रसः शृङ्गारस्तत्र यो रभसः[१०] उत्साहस्तेनोपलक्षितो [११] भावोऽभिप्रायो यस्मिन्; सम्बोधनं वा। अन्यत्पूर्ववत्।।५।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५।। माध्विति। हे (मदनरभसरसभावे) मदनस्य कामस्य रभस [१५]आवेगस्तस्य [१६] रसभावः शृङ्गारभावोऽभिप्रायो यस्यास्तत्सम्बुद्धिः। कीदृशे इह? मधुनि पुष्परसे मुदितानि [१७] तत्पानार्थं हर्षयुक्तानि[१८]यानि मधुपकुलानि भ्रमरसमूहास्तैः कलितः कृतो रावः शब्दः यस्मिन्।।५।।

१.इह विलस-ड.२.चिरमलस-नि.सा अलसपीनजघने-इ.चिरमिलित-ड.३.जनित-ललित-रावे-इ.४.इह विलस-ड.५.समरसभावे-इ.रभसरसभावे-ड.६.विस्तीर्णैर्वितितैर्बहुवल्लीनां-अ.७.बहुलवल्लीनां-ग.८.पल्लवैः-अ.ब.ह.९.मुदिता ये मधुपकुला भ्रमरसमूहाः-अ.ब. १०, ११.नास्ति-अ.ब.१२.चिरमिलिते बहुकालमन्योन्यसम्बन्धे पीने मांसले जघने यस्यास्तत्सम्बुद्धिः-क.ल.म.१३.बहुकालसामान्योन्य-ड.१४.नास्ति-ड.१५.वेग-ग. १६.सरसभाव-ड.ल.म. १७.तस्यास्ते-क.१८.नास्ति-ड.

**(९) कृष्ण पण्डितकृत-जयन्ती**

।।५ ।। मध्विति। मधुना वसन्तेन मुदिता: मधुपा: भ्रमरा: तेषां कुलेन जनित: उत्पादित: ललित: मधुर: रावो यस्यास्तत्सम्बोधनम्। प्रविश राधे। मदनरसेन कामानुरागेण समरसभाव: एकीभाव: यस्यास्तत्सम्बोधनम्। विलस।।५ ।।

**(१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)**

।।५ ।। पुन: किंविधे ? मध्वित्यादि। अत्रापि पूर्ववन्मुखबन्धयोजना। मधुभिर्मकरन्दैर्मुदितेन हृष्टेन मधुपकुलेन भ्रमरनिकरेण कलित: सम्पादितो रावो झङ्काररुतं यत्रेति विग्रह:। मदनशरेण सरस: सरागो भावश्चेष्टा यस्या इति सम्बोधनम्। ''मदन रस सरस भाव'इति पाठे मदनप्रधानो मदनभरितो वा रसो मदनरस:, शृङ्गाररस्तेन सरस: सानुरागो भावोऽभिप्रायो यस्या इति विग्रह:।।५ ।।

**(११) पूजारी गोस्वामीकृत-बालवोधिनी**

।।५ ।। पुन:कीदृशे ? मधुना मुदितेन मधुपकुलेन विहत: शब्दो यत्र तस्मिन्। मदनरसेन शृङ्गाररसेन सरसभाव: सारस्यं यस्या: हे तादृशि ! ईदृक् प्रभावायास्तव तन्निकटप्रवेश एव योग्य इति भाव:।।५ ।।

**(१२) लक्ष्मणकृत-रसिकरङ्गदा**

।।५ ।। मधु मुदितेति। मदनरसे शृङ्गाररसे सरस: साभिलाषो भावोऽभिप्रायो यस्या:। 'मदनशररभसभावे' इति पाठे, मदनशरवेगेन पुन: पुन: कामोदयेन भाव:, प्रियसङ्गमाभिलाषो यस्या:, हे तथाविधे राधे ! मधुमुदितानां मकरन्दपानतुष्टानां मधुपानां कुलै: सङ्घै कलित: कृतो रावो यत्र तादृशे इह विलस।।५ ।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।५ ।। मधुमुदितेति; केलिसदने यानि पुष्पाणि प्रस्फुटितानि सन्ति तत्र मदुपकुलं मधुना मुदित: हर्षित: मधुपानेन प्रमत्तं गुणुगुणायन्ते तेषां कलितरावेण खलु श्रीकृष्ण: मुदित: हर्षितो भवति। तर्हि हे सखि ! राधिके त्वं कुसुमशरे पुष्पशरसंघाते रसपूर्णे सरसे भावे विलासं कुरु। भोगं कुरु ।। ५ ।।

**६-मधुरतरपिकनिकरनिनदमुखरे।**
**विलस दशनरुचिरुचिरशिखरे।। प्रविश०।।६ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।६ ।। अत्रापि पूर्ववन्मुखबन्धयोजना। पुन: कीदृशे, मधुरतरपिकनिकरनिनादमुखरे, मधुरौ स्वादुशोभनावित्यमर:। दशनरुचिरुचिरशिखरे इति सम्बोधनम्। दशनरुच्या

रुचिरं शिखरं माणिक्यविशेषो यस्या इति विग्रहः। ''पक्व दाडिमवीजाभं माणिक्यं शिखरं विदुः''।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। अपि च, मधुरतरेति। हे राधे! इह विलस। किंभूते राधे? सुचीनि रूचिराणी दशनशिखराणि यस्यातस्याः संबुद्धिः। किंभूते इह? मधुरतरो यः पिकनिकरस्य निनदस्तेन मुखरे।।६।।

## (३) जगद्धरकृत-सारदीपिका (टीकानास्ति)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६।। मधुरतरेति। कीदृशे केलिसदने? मधुरतरो यः पिकनिकराणां कोकिलसमूहानां निनदः शब्दस्तेन मुखरे वाचाले। यद्वा, एतदपि 'राधे' इत्यस्यैव विशेषणम्। तदा मधुरतरपिकनिकराणामिव यो निनदः सुरते कण्ठकूजितं तेन मुखरमित्यर्थः। पुनः कीदृशि? दशनरुचिर्दन्तकान्तिरेव रुचिरं शिखरं माणिक्यविशेषो यस्यास्तादृशि। यद्वा, दशनरुचिवद्रुचिरं शिखरं माणिक्यविशेषो यस्यास्तादृशि । यद्वा, इह माधवे विलस। कीदृशे माधवे? दशनरुचिरुचिरशिखरे। 'दशनरुचि' इत्यत्र द्वितीयव्याख्याने प्रसिद्धशिखरस्योपमेयतयाऽस्य विपर्यासोपमा बोध्या। तदुक्तं **दण्डिना** (का. २/१७)'त्वदाननमिवोन्निद्रमरविन्दमभूदिति। सा प्रसिद्धविपर्यासाद्विपर्यासोपमेष्यते।।' इति। 'पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुः।' इति **शाश्वतः**।।६।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६।। मध्विति। दशनानां रुच्या कान्त्या रुचिराणि मनोहराणि शिखराणि यस्यास्तस्याः सम्बुद्धिः, अत्र पदसन्निधानान्निषदस्थपतिन्यायेन शिखराणां दन्त्यत्वमवगन्तव्यम्। रुचिरविजितशिखरेति क्वचित्पाठः। रुच्या विजितानि शिखराणि शृङ्गाणि यस्या इति विग्रहः। कूटोऽस्त्री शिखरं शृङ्गमित्यमरः। अत्र तीक्ष्णाग्रहणेन शृङ्गसाम्यमवगन्तव्यम्। एतादृशे हे राधे! मधुना मकरन्देन मधुमद्ये पुष्परसेत्यमरः। अथवा मधुना बसन्तेन तरलाः कूजनचपलाः ये पिकाः कोकिलास्तेषां निकरस्य निकुरम्बस्य निनदेन निनादेन मुखरे मधुना तरलः चञ्चलः द्रुतानुद्रुतक इति यावत् तादृशपिकनिनदं प्रति वा योजना। मधुतरपिकनिनद इति क्वचित्पाठः। तदा मधुरतरः अत्यन्त सुखावह इत्यर्थः। एतादृशे इह निकुञ्जे शेषं पूर्ववत्।।६।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६।। पुनरपि कोकिलनिनदरूपमुद्दीपनविभावमनुभावयन्ती त्वरयति। दशनरुचिर्दन्त-कान्तिः, सैव रुचिरं मनोज्ञं शिखरं माणिक्यं यस्या एवम्भूते राधे! मधुतरपिकनिकर-

निनदेन मुखरे शब्दायमाने इह स्थान इत्यर्थः। 'पक्वदाडिमबीजाभं माणिक्यं शिखरं विदुरिति **शाश्वतः**। शब्दे निनादनिनदध्वनिध्वानरवस्वना' **इत्यमरः**।।६।।

### (७) वनमालि भट्टकृत-सञ्जीवनी

।।६।। किञ्च मधुरेति। कीदृशे इह ? (मधुरतरपिकनिकरनिनदमुखरे) [४]मधुरतरोऽतिशयेन मधुरो यः पिकनिकराणां कोकिलसमूहानां निनदः शब्दः तेन मुखरे वाचाले। श्रीवृषभानुजासम्बोधनञ्च। दशना दन्तास्तद्रुचिवत् रूचिरं मनोहरं माणिक्यं [५] दाडिमीबीजाभं तादृशी दन्तकान्तिर्यस्यास्तत्सम्बोधनम्। [६]पक्वदाडिमभीजाभ (भं) माणिक्यं शिखरं विदुः इति [७]**शाश्वतः**।।६।।

### (८) नारायण पण्डितकृत-पदद्योतनिका

।।६।। मधुतरलेति। हे (दशनरुचिरुचिरशिखरे) दशन[८]रुचिरेव दन्त[९]दीप्तिरेव रूचिरं शिखरं माणिक्यविशेषो यस्यास्तत्सम्बुद्धिः। कीदृशे इह ? मधुना पुष्परसेन तरलश्चञ्चलः पिकनिकरः कोकिल[१०]वृन्दस्तस्य निनदेन [११] शब्देन मुखरे शब्दान्विते। ''पक्व[१२]दाडिमबीजाभं माणिक्यं शिखरं विदुः'' (इति)।।६।।

१.मधुतरपिक-फ.ग.ज.मधुतरलपिक-इ.ड.२.इह विलस-ड.३.दशनरुचिरशिखरे-इ.४.मधुतरो-फ.ग.ज.५.दाडिमबीजाभं-इ.६.पक्वदाडिम-फ.ह.ज.७.शाश्वते नास्ति शिखरं शैलवृक्षाग्रकक्षापुलककोटिषु। पक्वदाडिमबीजाभमाणिक्यशकलेऽपि च (विश्वः १०१.१०४) ८.रुचिरिव-क.९.दीप्तिरिव-क.१०.समूहः-क.ल.म.११.शब्देनान्विते युक्ते-क.१२.दाडिम्ब-क.

### (९) कृष्ण पण्डितकृत-जयन्ती

।।६।। मधुतरलेति। मधुः वसन्तः तस्मिन् तरलाः सञ्चारशीलाः पिकानां निकराः तेषां निनदैः मुखरे नादिते। प्रविश। दशनानां रुचिराणि शिखराणि अग्राणि यस्यास्तत्सम्बोधनम्। विलस।।६।।

### (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। मधुतरलेति। अत्रापि पूर्ववन्मुखबन्धयोजना। मधुना वसन्तेन तरलाश्चञ्चला अर्थान्मत्ताः जल्पका वा ये पिकनिकरास्तेषां निनदेन मुखरे दशरुच्या विजितं शिखरं पक्वदाडिमबीजाभमाणिक्यखण्डं ययेति सम्बोधनम्। पक्वदाडिमबीजाभमणिक्यं शिखरं विदुः।।६।।

### (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६।। पुनः कीदृशे ? मधुरतरैः पिकनिकरनिनदैः मुखरे। दशना एव रुच्या रुचिरमाणिक्यविशेषा यस्याः हे तादृशि ! ईदृग् दशनायाः तव क्रियाविशेषकृत्यमेव योग्यमिति भावः। पक्वदाड़िमवीजाभं माणिक्यं शिखरं विदुः' इति **हारावली**।।६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६।। मधुतरलेति, दन्तकान्त्या तिरस्कृतं शिखरं माणिक्यविशेषो यया हे तथाविधे! 'उक्तं च पक्वदाडिमबीजाभं माणिक्यं शिखरं विदु:' इति मधुना वसन्तेन हेतुना तरला उत्सुका इति यावत्, ईदृशानां पिकानां निनदैर्ध्वनिभिर्मुखरे शब्दिते, 'मधुरतरपिकनिकरे' इति पाठे अतिमधुराभि: पिकनिकरध्वनिभिरित्यर्थ:। इह विलस। केलिकुञ्जस्य भृङ्गकोकिलध्वनिप्रयुक्तत्वादुद्दीपकत्वं सूचितम्।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

६ - मधुरतरेति, भ्रमरगानादपि मधुरतरं पिकसमुदायस्य गानं भवति। तस्मिन् मुखरितं भवति वनभूमि:। अत: तत्र त्वं विलासं कुरु। अत्र सुरतव्यापारेऽपि पिकविरुति: प्रसिद्धा। तस्यानुकरणं कुरु इति ध्वनि:। पुन: दशनं दन्तपङ्क्ति रुचिरे सुन्दरे तस्य शिखरं माणिक्यविशेष: यस्या:। तादृशे श्रीकृष्णे विलासं कुरु।। पक्वदाण्डिमवीजाभं माणिक्यं शिखरं विदु:। इति शाश्वत:। अत्र विपर्यासालंकार:। **दण्डिना** उक्तम् **काव्यादर्शे**। त्वदाननमिवोन्निद्रमरविन्दमभूदिति। सा प्रसिद्धविपर्यासाद्विपर्यासोपमेष्यते ।।२/१७।।६।।

**७-विततबहुवल्लिनवपल्लवघने।**
**विलस चिरमलसपीननजघने।। प्रविश०।।७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। अत्रापि पूर्वबन्मुखबन्धयोजना। पुन: कीदृशे, वितत बहुवल्लिनवपल्लवघने, विततानां बहुवल्लीनां नवल्लवेन घने सान्द्रे ''घनं निरन्तरं सान्द्रमि**त्यमर**:'' । चिरमिति बिलस क्रियाविशेषणम्। अलसपीनजघने इति सम्बोधनम्। अलसं पीनं जघनं यस्या इति विग्रह: ।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, विततेति। हे राधे! इह चिरं विलस। किं भूते राधे? अलसं पीनं जघनं यस्यास्तस्या: संबुद्धि:। किंभूते इह? विततानि बहूनि वल्लीनां नवपल्लवानि तैर्घने।

## (३) जगद्धरकृत- सारदीपिका (टीका नोपलब्धा)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।। विततेति। हे राधे! माधवसमीपं प्रविश। इह केलिसदने चिरं विलस च। कीदृशे केलिसदने? विततर्विस्तीर्णैर्बहुभिर्वल्लीनां लतानां नवपल्लवैर्घने सान्द्रे। त्वं कीदृशी? अलसपीनजघने। अलसे मन्थरे पीने मांसले जघने यस्यास्तादृशि।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। वितततेति। कुचौ कुम्भाविव कुचकुम्भौ जघने च कुचकुम्भजघनं प्राण्यङ्गत्वादेकवद्भावः। अथवा पीनं पीवरं वर्त्तुलं वा कुचं जघनं यस्याः तस्याः सम्बुद्धिः। अत्र जघनयोर्मन्दगतिहेतुरलसत्वमित्यवगन्तव्यम्। अलसाः मन्दगतिः सा च पीनजघनेति योजना। पीनजघनत्वादेवास्याः मन्दगतिरवगन्तव्या। जघनेति न जाड्ये याहीति प्रतिषेधः। एतादृशे हे राधे ! वितता विस्तृता या बहुवल्लयः अनेकलता तासां पल्लवैः नूतनकिशलयैः तत्र विततबहुग्रहणं छाया बाहुल्याच्चौरानुकूल्यार्थं नवग्रहणं पल्लवानामत्यन्तमृदुलता द्योतनार्थमित्यवगन्तव्यम्। घने निविडे इह कुञ्जे इत्यादि पूर्ववत्।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। स्थानस्य निभृतत्वं दर्शयन्ती प्रेरयति। पीनौ कुचकलसौ जघने च यस्याः तादृशि राधे हे ! वितता विस्तीर्णा अनेकलता यासां नवैर्नूतनैः पल्लवैघने निविड इति स्थानविशेषणम्।।७।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७।। किञ्च वितततेति। सुचिरं बहुकालं विलसेति सम्बन्धः। पुनः कीदृशे इह ? विततै [६]र्विस्तीर्णै[७]र्बहुवल्लीनां नानालतानां[८]नवपल्लवैर्घने निबिडे। अलसे सालसे पीने स्थूले जघने यस्यास्तत्सम्बोधनम्। शयनविशेषणं वा। हे माधवेत्यादि पूर्ववत्। ''वलितं सरसं प्रोक्तं वलितं चेष्टितं तथा'' इति **मेदिनी**कारः।।७।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७।। वितततेति। हे (चिरमिलितपीनजघने)[१२] चिरमिलितेन[१३] बहुकालसमागममान्योन्यसम्बन्धेन पीनं (मां)मासलं जघनं यस्यास्तत्सम्बुद्धिः। कीदृशे इह ? [१४] वितता इतस्ततो विस्तीर्णा बहुपल्लववल्ल्यस्तासां नवाः पल्लवाः तैर्घने निबिडे। शयन इत्यध्याहारः।।७।।

१.इह विलस-ड.२.चिरमलस-नि.सा अलसपीनजघने-इ.चिरमिलित-ड.३.जनित-ललितरावे-इ.४.इह विलस-ड.५.समरसभावे-इ.रभसरसभावे-ड.६.विस्तीर्णैर्विततैर्बहुवल्लीनां-अ.७.बहुलवल्लीनां-ग.८.पल्लवैः-अ.ब.ह.९.मुदिता ये मधुपकुला भ्रमरसमूहाः-अ.ब. १०, ११.नास्ति-अ.ब.१२.चिरमिलिते बहुकालमन्योन्यसम्बन्धे पीने मांसले जघने यस्यास्तत्सम्बुद्धिः-क.ल.म.१३.बहुकालसामान्योन्य-ड.१४.नास्ति-ड.१५.वेग-ग. १६.सरसभाव-ड.ल.म. १७.तस्यास्ते-क.१८.नास्ति-ड.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।७।। विहितेति। विहित: रचित: बहुवल्लीनां नवपल्लवै: घन: तस्मिन् वने प्रविश। अलसं गतिमान्द्यकरं पीनं जघनं यस्यास्तत्सम्बोधनम्। चिरं विलस।।७।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। पुन: कीदृशे ? विततेत्यादि। अत्रापि पूर्ववन्मुखबन्धयोजना। विततबहुवल्लीनवपल्लवघने। विततानां विस्तारितानां वह्वीनां वल्लीनां नवपल्लवैर्घने सान्द्रे। ''घनं निरन्तरं सान्द्रमि**त्यमर:**''। चिरमिति विलसनक्रिया विशेषणम्। अलसं मन्दगतिं, पीनजघनं यस्या इति सम्बोधनम्। यद्वा अलसा चासौ पीनजघना चेति कर्मधारय:।।७।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७।। पुन: कीदृशे ? विततानां वहुवल्लीनां नवपल्लवैर्घने निविड़े अलसं च पीनं च जघनं यस्या: हे तादृशि। चिरमिति विलासक्रियाविशेषणं ईदृग् जघनं सफलं कुर्वित्यर्थ:।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। विततेति, कुचकुम्भौ च जघनं च कुचकुम्भजघनं, तत् पीनं पृथुलं यस्या हे तथाविधे, राधे! चिरमलसपीनजघनेति क्वचित्। तदा चिरमिति क्रियाविशेषणम्। अलसा च पीनजघना चेति समास:। विततानां विस्तृतानां बहुवल्लीनामनेकलतानां नवपल्लवैर्नूतनकिसलयैर्घने निविडे। शोभाग्रहणाय नवशब्दस्योपन्यास:। इतरजनदृष्टिनिवारणार्थं घनशब्दस्यापि। इह विलस। स्तनपीडनादिपरिरम्भणेन निजतारुण्यं सफलयेति भाव:।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

७ - विततवहुवल्लीति; हे राधे! इह विलस। किम्भूते राधे ? अलसं पीनं जघनं यस्यास्तस्या: सम्बद्धि:। किम्भूते इह ? विततानि वहूनि वल्लीनां नवपल्लवानि तै: घने निविडे सान्द्रे शय्यायां तव पीनं मांसलं जघनं अलसायते। कामपीडायां शरीरे आलस्यं भवति। फलत: मोदायिताद्यवस्था समुदेति।।७।।

**८-विहितपद्मावतीसुखसमाजे।**
**कुरु मुरारे मङ्गलशतानि**
**भणति जयदेवकविराजे।। प्रविश०।।८।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। हे मुरारे! भणति जयदेवकविराजराजे मङ्गलशतानि कुर्विति योजना। कीदृशे, बिहित: पद्मावती सुखसमाजे, विहित: पद्मावत्या निजप्रेयस्या: सुखसमाज: सुखचयो येनेति विग्रह:। एतेन शृङ्गारित्वमात्मन: प्रतिपादितम्। उक्तं च,

शृङ्गारी चेत्कविकाव्ये जातं रसमयं जगत्।
स एव चेदशृङ्गारी नीरसं सर्वमेव तत्।।

गीतार्थं श्लोकेन संक्षिप्याह।।८।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।८।। अपि च, विहितेति। इदानीमष्टपदीं परमेश्वरे समर्पयन्नाह; हे मुरारे! जयदेव-कविराजे मङ्गलशतानि कुरु। किंभूते? विहितं कृतं पद्मावत्या लक्ष्म्या: सुखं सुखरूपं समाजं स्थानं प्रासादो येन। किन्दुबिल्वे जयदेवकारितो महालक्ष्म्या: प्रासादोऽस्तीति प्रसिद्धि:। लक्ष्मीभक्त्या हरिस्तुष्यतीति।।८।।

### (३) जगद्धरकृत- सारदीपिका (टीका नोपलब्धा)

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।। विहितेति। हे मुरारे! जयदेवकविराजराजे जयदेव एव कवीनां राजराज: सार्वभौमस्तत्र मङ्गलशतानि कल्याणशतानि कुरू। कीदृशे? भणति तव गुणान्वदति। पुन: कीदृशे? विहित: पद्मावत्या: सुखसमाज: सुखसमूहो येन तादृशे। एतेन स्वस्त्रीतत्परत्वकथनेन परस्त्रीवैमुख्यं ध्वनितम्। राजराज: कुबेरेऽपि सार्वभौमे सुधाकरे। इति **विश्व:**।।८।।

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।। विहितेति। हे मुरारे! श्रीकृष्ण! बिहित: नृत्यानुकूलताघटनाकृत: पद्मावत्या: निजदयिताया: सुख समाज: नानाविधसुखसन्दोहो येन जयदेवकविराजे जयदेवाख्ये कविश्रेष्ठे भणति भगवद्रत्यर्थं गीतं गदति सति मङ्गलशतानिकल्याणपरम्परां विधेहि कुरु। मद्विरचितगीते प्रीत: सन् श्रोतृणां मम च श्रेयपरम्पराम् अनुकूलयेत्यर्थ:। समाजेत्यत्र मुदो रज:पशुष्विति पशुसंघटनावोपनीयमितित्वादत्र घञ् प्रत्यय:। कविराजेत्यत्र राजाह (५।४।९१) इत्यादिना टच् प्रत्यय: समासान्त:।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। कीर्त्यर्नुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। हे मुरारे कृष्ण! मङ्गलशतानि कुरु। कविराजस्य राजा कविराजराजः जयदेवनामा वासौ कविराजराजश्चेति स तथा, तस्मिन् भणति सति। कीदृशे ? विहितः कृतः पद्मावती तत्कान्ता तस्याः सुखस्य समाजः सान्निध्यं येन तादृशे। राजराज इत्यत्र 'राजाहःसखिभ्यष्टजिति टच्। अत्र लोके नामविज्ञापनार्थं निजभार्जा वर्णिता। राजदत्तपदप्रकाशनाथं कविराजराजपदेन स्वकीयोपन्यासः कृत इत्यवधेयम्।।८।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।८।। गीतोक्तां लीलां मङ्गलत्वेन निरूपयति, विहितेति। हे राधे! [३]जयदेवकविराजराजे [(४)]कविनृपनृपे [५]श्रोतृणां पाठकानाञ्च मङ्गलशतानि भणति सति कुरु ; श्रीकृष्णं प्रति गमनमिति शेषः। अथ वा हे मुरारे हे कृष्ण त्वं जयदेवकविराजराजे भणति सति श्रोतृणां पाठकानाञ्च मङ्गलशतानि कुरु। कीदृशे ? विहितः [६]कृतः [७]पद्मावत्याः [८]सुखस्य समाजः समूहो यत्र तादृशे। अनेन स्वनायिकायां प्रेमातिशयः न त्वन्यस्यामिति भावः।।८।।

[९] इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां एकविंशः प्रबन्धः।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।८।। विहितेति। हे मुरारे कृष्ण त्वं जयदेवकविराजे मङ्गलशतानि कुरु। कीदृशे जयदेवकविराजे ? विहितः कृतः पद्मावत्याः स्वस्त्रियः सुखस्य समाजः समूहो येन। सुखसमाज इति पाठे सुखस्य[१०]समाजः सान्निध्यं येन तस्मिन्। एतेन स्वनायिकायामेव प्रेमातिशयो दर्शितः। न त्वन्यस्याम्। पुनः कीदृशे ? भणति। तव गुणान् वदति[११] ।।७।।

१.कुरु मुरारे-अ.ब.ड. २.कविराजे-अ. ३.जयदेवकविराजे भणति सति श्रोतृणां पाठकानाञ्च कविनृपे मङ्गलशतानि-अ.ब.४.नृपनृपे-ग.५.नास्ति-ग.६.कृतः पद्मावत्याः सुखसमाजः सुखसमूहो-ग.७,८.नास्ति-अ.ब.९.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज.१०.नास्ति-क.ल.म.११.क्वचित्प्रविश राधे माधवसमीपमिह भणतीति पाठः। अयं भागो नास्ति-ड.

(इतिश्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां एकविंशः प्रबन्धः।)

## (९) कृष्ण पण्डितकृत-जयन्ती

।।८।। विहितेति। हे मुरारे त्वं विहितः कृतः पद्मावत्यै सुखसमाजः आनन्दसन्तानं येन तस्मिन्। जयदेव इति कविराजे कविश्रेष्ठे भणति सङ्कीर्तयति सति मङ्गलशतानि

अनेकमङ्गलानि कुरु। मङ्गलशतानि भिन्नपदत्वात् मध्यमणिन्यायेन भणतीत्यत्राप्यनुषञ्जनीयम्।।८।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायामेकविंशः प्रबन्धः।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।। विहितेति। हे मुरारे भगवन् जयदेवकविराजराजे भणति सतिमङ्गलशतानि कुरु। अपरिमित कल्याणानि विधेहि। जगतामिति अविशेषाद्गम्यते, शतशब्दोऽत्र संख्यावाची। किंवा भणति भणनशीले जयदेवे मयि आधारार्थे सप्तमी। मङ्गलशतानि कुरु। कवीनां ये राजानस्तेषामपिराजा कविराजराजः। जयदेवनामा कविराजराजः। मध्यपदलोपी समासः, स तस्मिन्। कीदृशे ? विहितः कृतः पद्मावत्याः निज प्रेयस्याः सुखसमाजः सुखचयो येनेति विग्रह। एतेन शृङ्गारित्वमात्मनः कविना प्रतिपादितम्। उक्तं च, ''शृङ्गरीचेत् कविः काव्ये जातं रसमयं जगत्। स एव चेदशृङ्गारी नीरसं सर्वमेवतदिति।।८।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।८।। हे मुरारे ! जयदेव-कविराज-राजे भणति सति तदर्थसखीप्रार्थनामिति शेषः। मङ्गलाशतानि कुरु। कथं विहितः पद्मावत्याः श्रीराधायाः सुखसमूहो येन तस्मिन्। निजेष्टदेवोपासनायामित्यर्थः। नित्यत्वसर्वोत्तमत्वनिश्चयावेशेनात्मानं वहुमन्यमानस्य कविराजराज इति प्रौढ़ोक्तिरियम्।।८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। गीतं समापयन् कविः श्रोतृणां मङ्गलमाशास्ते। विहितेति, हे मुरारे ! जयदेवनामनि कविराजराजे कविराजश्रेष्ठे, भणति सति, एतद्रहस्यचरितमिति शेषः। मङ्गलशतानि बहुमङ्गलानि कुरु। आस्वादकानामिति शेषः। कीदृशे, विहितः श्रीराधाभिसारचरितवर्णनेन कृतः पद्मावत्या निजोपास्यमूत श्रीराधाविरहश्रवणविषण्णाननाया निजजायायाः सुखसमाजः सन्तोषसन्ततिर्येन तस्मिन्।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।। विहितेति; पद्मावत्याः सुखसमाजे हे मुरारे ! मङ्गलशतानि कुरु। जयदेवस्योक्त्या य खलु जयदेवस्य इदं पद्यं गीतं वा पठिष्यति तं मुरारिः लक्ष्याः सुखरूपे समाजे स्थानं दास्यति। तत्र किन्दुविल्वे महालक्ष्म्याः प्रसादोऽस्ति तस्य प्रसादस्य भोगं सहृदयः करिष्यतीति प्रतिज्ञा पद्मावत्याः सुखं नाम शृङ्गारचेष्टाविरोषम् वोध्यम्। आह **आग्नेये पुराणे ;** शृङ्गारीचेत् कविः काव्ये जातं रसमयं जगत्। स एव वीतरागश्चेत् नीरसं सर्वमेव हि।।८।।

**६३-त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः**
**कन्दर्पेण तु पातुमिच्छति सुधासंबाधबिम्बाधरम्।**
**अस्याङ्गं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव-**
**क्रीते दास इवोपसेवितपदाम्भोजे कुतः सम्भ्रमः।।६३।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६३।। त्वां चित्तेन हरिश्चिरं वहन्नयमिति श्रान्त इति पीनस्तन श्रोणिभारगुरुत्वादित्यर्था-दधिगन्तव्यम्। गुरुद्रव्यं हि चिर वहतो जनस्य श्रमो भवत्येवेत्यभिप्रायः। भृशं तापितः कन्दर्पेण च पातुमिच्छति सुधा सम्वोधविम्बाधरमिति। श्रान्तस्य सन्तप्तस्य च पिपासा भवत्येवेत्यभिप्रायः। ''संकटं नातु सम्बाध'' **इत्यमरः**। अस्याङ्गं तदलं कुर्विति तस्मादस्य क्रोडं भजस्वेत्यर्थः।

ननु मत्कृतेऽयं श्रान्तः सन्तप्तश्च, ततोऽहं स्फुट यगतस्मादस्याङ्गं प्रवेष्टुं विभेमीत्याह। इहेत्यादि। इह कृष्णे सेवितपदाम्भोजे दास इव भ्रूक्षेप लक्ष्मीलवक्रीते कुतः सम्भ्रमो भविता, क्रयक्रीते भृत्ये भयं न भवतीत्यभिप्रायः। भ्रूक्षेपलक्ष्मी लवक्रीत इति भ्रुवो क्षेपः चलनं स एव लक्ष्मीः ऋद्धिस्तस्या लवेन लेशेन क्रीत इति विग्रहः। उत्तरगीतस्य सङ्गमाह।।६३।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६३।। इदानीं त्रपानिरसनायाह, त्वामिति। हे राधे! अयं श्रीकृष्णस्तव सुधासंबाधं सुधायाः संकटं बिम्बाधरं पातुमिच्छति। किंभूतोऽयम्? त्वामेवंविधां दुर्वहां चित्तेन वहन्नतिश्रान्तः श्रमं प्राप्तः अत एव भृशं तापितः। यतः यः श्रान्तस्तप्तश्च भवति स तदुपशान्त्यै सुधादिपानं कर्तुमिच्छति। तत्तस्मादस्य मुरारेरङ्कं क्षणमलंकुरु। कथं मयास्य तादृशस्य महानुभावस्यैतत्कर्तुं युज्यत इति वदसि चेदित्याशङ्क्याह, इह तावत्संभ्रम आदरः कुतः? किंभूते इह? भ्रूक्षेप एव यो लक्ष्मीलवस्तेन क्रीते। एतावता मूल्येन गृहीते आदरो न कर्तव्य इति। अत एव दास इव। उपसेवितं तव पदाम्भोजं येन तस्मिन्। शार्दूलविक्रीडितम्। रूपकोत्प्रेक्षे अलंकृती।।६३।।

## (३) जगद्धरकृत- सारदीपिका

।।६३।। त्वामिति हे राधे! अयं कृष्णस्तवसुधाऽमृतेन सम्बधनं गहनं बिम्बाधरं पातुमिच्छति कीदृशः कृष्णः यतः चित्तेन मनसा त्वां चिरं वहन् अति श्रान्तः यतः कन्दर्पेण भृशं तापितः अन्योऽपि भारवाही सूर्यतापितश्च जलानिपातुम् इच्छति

तद्वदित्यर्थ:। तत्तस्मादस्य कृष्णस्य कं क्रोडं क्षणं मुहूर्तमात्रम् अलङ्कुरु भूषय तत्समीपं गन्तुं विभेमीत्यत आह इह कृष्णे सम्भ्रम: भयं कुत: कीदृशे इह दास इव सेवक इव स्थिते पुन: कीदृशे भ्रूक्षेप: कटाक्षक्षेप: स एव लक्ष्मी: सम्पद् द्रव्यं तेन लवक्रीते नूतन: क्रीतोदासोऽतिभीतो भवतीति भाव:। अतएव उपसेवितं पदाम्भोजं चरणकमलं येन।।६ ३ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६ ३ ।। कृष्णोत्कण्ठाधिक्यमाह, त्वामिति। अयं कृष्णस्त्वां चित्तेन मनसा वहन्नतिश्रान्तोऽतिशयेन श्रमयुक्तो जात:। कन्दर्पेण कामेन च भृशमतिशयेन तापित: संतापित:। अतिसूक्ष्मे चित्ते पीनस्तनजघनवत्या: स्तनधारणेन श्रमो युक्त एव। अन्योऽपि यो गुरुतरभारोद्वहनं करोति, तस्याप्यतिश्रमो भवतीति भाव:। अतस्तव सुधयाऽमृतेन संबाधं संकटं बिम्बाधरं बिम्बफलमधरमोष्ठं पातुमिच्छति । तस्माद्धेतोस्तस्य कृष्णस्याङ्कं क्रोडं क्षणं त्वमलंकुरु भूषय। नन्वयं बहुनायिकानुरक्त:, अतस्तदङ्कारोहणे बिमेमीत्यत आह, इहेति। इह कृष्णे कुत: कस्माद्धेतो: संभ्रमो भयम्? कीदृशे कृष्णे? सेवितं त्वदीयपदाम्भोजं त्वदीयचरणकमलं येन तादृशे। अत एव दासजनेऽपि। तत्र हेतुगर्भ-विशेषणमाह, भ्रूक्षेपेति। भ्रूक्षेपस्य भ्रुव: चालनस्य या लक्ष्मी संपत्तस्या लवो लेशस्तेन क्रीते। 'संकटं ना सुसंबाध:' **इत्यमर**:। 'लवलेशकणाणव:' **इत्यमर**:।।६ ३ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६ ३ ।। अन्यासङ्गिनस्तस्य समीपं कथं प्रविशामि इत्याकांक्षायामाह। त्वामिति। हे राधे! यस्मात्कारणादयं श्रीकृष्ण: चिरं बहुकालम् अतिभारद्योतनार्थमेवमुक्त-मित्यवगन्तव्यम्। त्वां पृथुस्तनभारां भवतीं चित्तेन वहन् धरन् अतिश्रान्तो अत्यन्तखिन्नो जात इति शेष:। न केवलश्रान्तिमात्रम् अपितु कन्दर्पेण वामेन कुम्भितदर्पेण कामेन इत्यर्थ:। कन्दर्पत्वं च तस्य वाध्यवाधकविवेकराहित्यादवगन्तव्यम्। भृशं तापवान् कृत: सन् अत एव सुधयामृतेन सम्बाध: सं बाधो यत्र तादृश: त्सुधारसभरित इत्यर्थ:। विम्बकल्पाधर: बिम्बाधर: शाकपार्थिवत्वान्मध्यमपदलोपि समास:। उक्तं च वामनेनविम्बाधराद्यौ वृत्तौ मध्यपदलोपिन्यामिति। सुधासम्बाधश्चासौ बिम्बाधरश्च तं चामृतविम्बाधरमित्यर्थ:। पातुमिच्छति वाञ्छते। ''इषुगमियमांच्छ: (७।३।७७) इति च्छादेश:। यथा लोके कश्चिन्महाभारवस्तु मस्तकादिना वहन् श्रान्त: कन्दर्पेण कुत्सित दर्पेण मदनेत्यर्थ:। तापितश्च सन् अत्यातुर: सुधाकल्पं जलं पातुमिच्छति तद्वदयमपीति भाव:। इतश्चन्यासक्तिशङ्का न कार्य्येति तात्पर्य्यम्। तत्तस्मात्कारणादिह

लता मन्दिरे अस्य श्रीकृष्णस्याङ्कसमीपमलं कुरु तत्र गत्वा मण्डयेत्यर्थः। अथवा अलं विहारपर्य्याप्तिं कुरु अङ्गमिति क्वचित्पाठः। तदा अङ्गं शरीरमलङ्कुरु आश्लेषादिना सम्भावयेत्यर्थः। अन्यथा तथावयव एव निरर्थकः स्यादिति भावः। इतोऽप्ययं सम्भावनीत इत्याह। भ्रूक्षेपेति। हे राधे! तव क्षणं क्षणमात्रम् अत्यन्तसंयोगे द्वितीया। भ्रूक्षेपः कटाक्षवीक्षणं तस्य लक्ष्म्या लवः सम्पदेकदेशः तेन क्रीते कटाक्षपतनगात्रेणैव वशीकृत इत्यर्थः। अनेनात्यन्तसौरभ्यं सूचितम्। अत एव दास इव भृत्य इव उपसेवित पदाम्भोजे आराधितभवच्चरणारविन्द। 'उपमानादित्यादिना' समासः। अनेन तस्याति विनय सम्पत्तिः सूचिता, तादृशे श्रीकृष्णे तव कुतः सम्भ्रमः। कस्मात्कोपारम्भः। यथाधीने क्रीते सेवितपदाम्भोजे वशम्बदे च गर्भदासे कोपो न युक्तस्तद्वदस्मिन् कोपो न युक्त इत्यर्थ। अथवा दासजनोपसेवित पदाम्भोजे भृत्यवर्गाराधित चरणारविन्दे महाप्रभावित्यर्थः। एतादृशेऽपि भ्रूक्षेप लक्ष्मी लवक्रीते सति तस्मिन् सम्भ्रमः। कुतः विशम्बदे महाप्रभौ कोपस्यायुक्तत्वादितिभावः। तथा च शीघ्रमेव तत्समीपं प्रतिगन्तव्यमिति तात्पर्य्यम्। काव्यलिङ्गोपमयो संसृष्टिः।।६३।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६३।। एतावत्कालसन्तापिता किमुद्दिशतीति भीतिपरवशां राधिकामाह, हे राधे! अयं कृष्णः तव सुधया अमृतेन सम्बाधः सङ्कुलः यो विम्बप्रायोऽधरः तं पातुमिच्छति। तदाह, 'सम्बाधः सङ्कुले मत' इति **रत्नकोषः**। यद्वा सुधां सम्बाधत इति सुधासम्बाध इति भावे घञ्। तथा चामृतादप्युत्कृष्ट इत्यर्थः। कीदृशः ? त्वां चित्तेन चेतसा चिरं चिरकालं व्याप्य वहन् इति हेतोरतिश्रान्तः। पुनः कीदृशः ? भृशम् अत्यर्थेन कन्दर्पेण सन्तापितः सन्तापं प्रापितः। अन्योऽपि भारहारी सूर्यादितापवांश्च जनादिकं पातुमीहत एव। एवञ्च त्वामुद्वहन् श्रान्तः त्वया चास्य दृट् शमयितुं युज्यत एवेति ध्वनिः। तस्मात्तस्य कृष्णस्याङ्गं क्रोडं क्षणं व्याप्य अलङ्कुरु भूषय। इह कृष्णेदास इव कुतः कस्मात् सम्भ्रमो भीतिरित्यर्थः। तदाह, 'सम्भ्रमस्त्वादरे भीतौ सद्वंशे आदरेऽपि चेति **विश्वः**। अत्रोपपादकं विशेषणमाह, कीदृशे ? भ्रुवोः क्षेपः चालनमिति यावत्, स एव लक्ष्मीः सम्पत्तिः, तया नवक्रीते नूतनक्रीते। अत्राभिनवक्रीते दासे सर्वेषां स्नेहो भवतीति दर्शयितुं नवपदोपादानम्। पुनः कीदृशे ? उपसेवितमाराधितम् अर्थात्त्वदीयं पदाम्भोजं येन तादृशे। अनेनातिभक्तत्वप्रतिपादनेन कृपापात्रत्वं दर्शितम्। एवञ्च सेवितपदाम्भोज इति विशेषणेन कृष्णस्य चरणपतनस्मारणेन प्रियपादपातावधिरेव कुलीनानां मान इति दर्शितम्। तदाह भरतः, 'मानः प्रोक्तः कुलस्त्रीणां चरणानमनावधिरिति।।६३।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६ ३ ।। एवमप्यप्रसन्नां पुन: [४] प्रसादयन्त्याह, त्वामित्यादिना। [५]हे सखि अन्यव्रजवधूजन [६] दुरापोऽयं [७]कृष्णस्तवैव सुलभ:। तव सुधयाऽमृतेन सम्बाधं सान्द्रं बिम्बधरं पातुं पानं कर्तुमिच्छति। कीदृश: ? त्वां चित्तेन मनसा चिरं सर्वदा वहन्नतिश्रान्तोऽतिशयश्रमयुक्त:। किन्तु कन्दर्पेण[८] कामाग्निना च भृशमतिशयेन तापितो दग्ध:। अन्योऽपि भाराक्रान्तो[९]मधुरपानादिना [१०] स्वामिन्या च जीव्यत इति भाव:। तत्तस्मादेवमनुरक्तस्यास्य कृष्णस्याङ्कमुत्सङ्गं क्षणं[११] क्षणमात्रं अलङ्कुरु[१२]भूषय। बहुवल्लभोऽयं कृष्ण इति मत्वा [१३] इह [१४]अस्मिन् कृष्णे कुत: सम्भ्रम: सन्देह:। तत्र हेतु:। [१५]कीदृशे ? दास इव सेवके। पुन: कीदृशे ? भ्रूक्षेप: कटाक्षपातो मदीयोऽयमिति[१]विलोकनं तस्य या लक्ष्मी: शोभा [२] तदेव धनं तस्य यो [३] लव: अल्पमूल्यं [४५]नेत्रकोणनिरीक्षणं तेन [६] क्रीते गृहीते। पुन: कीदृशे ? तवै[७]वोपसेवितं पदाम्भोजं चरणकमलं येन।।६ ३ ।।

१ .च-नि.सा.ड.इ. २ .अस्याङ्गं-अ. ३ .नव-ड. ४ .प्रसादयन् प्रत्याह-ग. ५ .हे सखि राधे-फ.ज. ६ .दुरापोऽप्ययं-फ.ग.ह.ज. ७ .श्रीनन्दकुमार-ग. ८ .कामेन च-ग. ९ .यथा मधुरपानादिना जीवन इति भाव:-ग. १ ० .नास्ति-अ.ब. १ १ .क्षणमाण-अ.ब. १ २ .भूषणं कुरु-अ.ब. १ ३ .नास्ति-अ.ब. १ ४ .नास्ति-अ.ब. १ ५ .नास्ति-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६ ३ ।। त्वां चित्तेनेति। हे राधे अयं कृष्णस्तव सुधयाऽमृतेन ८ सम्बाधं गहनं बिम्बाधरं पातुमिच्छति। कीदृश: [९]कृष्ण: ? [१०] यतश्चित्तेन मनसा त्वां चिरं वहन् अतिश्रान्त: [११] यत:कन्दर्पेण भृशं तापित:। अन्योऽपि भारवाही सूर्यतापितश्च जलानि पातुमिच्छति तद्वदित्यर्थ:। [१२]तत्तस्मादस्य कृष्णस्याङ्कं क्रोडं क्षणं मुहूर्तमात्रं अलङ्कुरु भूषय। तत्समीपं गन्तुं[१३]बिभेमीत्युक्तौ तत्राह। [१४]इह कृष्णे सम्भ्रमो भयं कुत:। कीदृशे [१५] इह ? [१६]दासवत् सेवकवत् स्थिते। पुन: [१७]कीदृशे ? भ्रूक्षेप: [१८]कटाक्षक्षेप: स एव लक्ष्मी: सम्पत् द्रव्यं तेन विक्रीते नूतनक्रीते। दासोऽतिभीतो भवतीति भाव:। अत एवोपसेवितं पदाम्भोजं चरणकमलं येन।।६ ३ ।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६ ३ ।। त्वामिति। हे राधे इति शेष:। अयं कृष्ण: चित्तेन त्वां चिरं वहन् ध्यायन्नित्यर्थ: अतिश्रान्त:। वहन्नित्यस्य पृष्ठादिना वहन् (इति तस्य) श्रमजनकत्वम्। पृष्ठमस्तकादेर्बहिरङ्गत्वात् दृढत्वम्। चित्तस्य त्वन्तरङ्गत्वाच्छ्रमाधिक्यं व्यज्यते। कन्दर्पेण मदनेन

भृशं तापित: सन् सुधाया: सम्बाध: सम्मर्द: समुदाय इति यावत् यस्मिन् स चासौ बिम्बाधर: बिम्बफलोपमाधर: तं पातुमिच्छति। अत्र कन्दर्पस्य तापनक्रियायामनन्वया-दनलत्वेनारोपपर्यवसायित्वेन परिणामालङ्कार:। यद्यपि परिणाम: क्रियार्थवद्विषयी विषयात्मनेति लक्षणेनाप्रस्तुतस्य प्रस्तुतक्रियाकारित्वं **विद्यानाथा** दिभिरुदाहृतमिति। तत् तस्मात्कारणात्। त्वदर्थश्रान्तत्वादिति भाव:। अस्य केशवस्य अङ्गं अलङ्कुरु शोभय। अधरसुधापानेन सत्कारक्षणं कुरु। लोके श्रान्तानां वासोदानादिना सत्कारकरणं दृष्टं, तथा कुरु। भ्रुवो: क्षेप: चमत्कारविक्षेप: तस्य लक्ष्मी: शोभा लीलेति यावत्। तस्या: लवेन लेशेन क्रीते वशीकृते। अत एव दास इव उपसेवितं संवाहितं नमस्कृतं पदाम्भोजं येन तस्मिन्। इह कृष्णे सम्भ्रम:। अवश्यमङ्गीकार्य इति भाव:। अत्र लवक्रीतत्वरूपपदार्थहेतुककाव्यलिङ्गालङ्कारेण दासत्वोपमा सिद्ध्यतीति तयोरङ्गाङ्गी-भावेन सङ्कर:। सा चोपमा उपसेवितत्वरूपसाधारणधर्मस्य इव शब्दस्य चतुर्णा-मुपादानात्पूर्णा।।६३।।

१.मदीयोऽयमित्यवलोकनं-ग.२.त:४.पर्यन्तं नास्ति-अ.ब.३.लवश्चाल्पमूल्यं यो नेत्रकोणनिरीक्षणं तं न कृते-इ.५.नेत्रकोणं-फ.ज.६.नास्ति-ग.७.तवैव सेवितं-अ.ब.८.सम्बाध्यं व्याप्तं-क.९.नास्ति-ड.१०.यतचित्तने-क.११.अत:-क.१२.ततस्तस्मात्-क.१३.बिभेमीत्यत आह-ड.क.१४.नास्ति-ल.१५.नास्ति-ड.१६.दासवत् स्थिते-ड.१७.नास्ति-ल.१८.नास्ति-ड.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६३।। त्वामित्यादि। हे सखि त्वां दूरगतामपि चित्तेन चिरं वहन्नयं कृष्णोऽतिशान्त इति पीनस्तनश्रोणिभार गुरुत्वादित्यर्थादधिगन्तव्यम्। गुरुद्रव्यं हि चिरं वहतो जनस्य श्रमो भवत्येवेत्यभिप्राय:। भृशं तापित: कन्दर्पेणेति। त्वत्पार्श्वमलभमान: भृशमत्यर्थं कामेन तापं प्रापितश्चेत्यर्थ:। अतस्तव सुधासम्बाधबिम्बाधरं पातुमिच्छति। सुधया सम्बाध: सङ्कीर्णं सङ्कटमिति यावत् बिम्बोपमाधरो बिम्बाधर: सुधासम्बाधश्चासौ बिम्बाधर श्चेति ।यद्वा सुधाया: सम्बाध: यस्मात् अधरान्न्यूनत्वात् एवंविधो बिम्बाधरस्तं पिपासति। ''सङ्कटं ना तु सम्बाधमित्यमर:''। अन्योऽपि श्रान्त: सन्तप्तश्च स्वादुरसं पातुमिच्छतीत्य-भिप्राय:। अस्याङ्गं तदलं कुर्विति तत्तस्मादस्य कृष्णस्याङ्गं प्रतीकं क्षणमलंकुरु। त्वदालिङ्गनमेव तस्यावयवेऽलङ्कार: ननु मत्कृतोऽयं श्रान्त: सन्तप्तश्च ततोऽहं स्फुटागस्तत् समीपं प्रवेष्टुं बिभेमिचेन्मन्यसे तर्हि शृणु। इह कृष्णे दास इव उपसेवितपदाम्भोजे कुत: सम्भ्रम: कुतोभयं भविता, उपसेवितं पदाम्भोजं त्वदीयमेव येनेति विग्रह:। भृत्यसमे भयं न युज्यते इत्यर्थ:। ''सम्भ्रम: साध्वसेऽपिस्यात्

संवेगादरयो रपीति **मेदिनी** ।'' किंविधे ? भ्रुवो: क्षेपश्चालनं तस्य लक्ष्मीरेव लक्ष्मी: ऋद्धिस्तस्या लवो लेशस्तेन क्रीत: इति विग्रह:। विशेषतस्तु क्रयक्रीते जने किमपि भयं न सम्भवतीति भाव:। ''सम्पत्तिश्रीश्चलक्ष्मीश्चेत्य**मर**:'' ।।६ ३ ।।

## (१ १) पूजारी गोस्वामीकृत-बालवोधिनी

।।६ ३ ।। अथ सखी प्रसादमालक्ष्य कौतुकेन सनर्म्नाहत्वामिति। अयं त्वां चित्तेन वहन् अतिश्रान्त: पीनस्तनश्रेणीगुरुतयेत्यर्थ:। कन्दर्पेण च भृशं तापित:, अत: श्रमेण तापेन च पिपासित:। सुधया सम्बाधं संकटं व्याप्तमिति यावत् विम्वाधरं पातुमिच्छति तस्मात् अस्य अङ्कं क्षणं शोभय। अन्तस्थितायाः वहि:स्थितस्य पानानुपपत्तेरितिभाव:। अविदिताभिप्रायस्य अङ्कप्रवेशे मन्नमन: संकुचत्यत आह, भ्रुवो: क्षेप: चालनं स एव लक्ष्मीर्ऋद्धि: तस्या लेशेन क्रीते कुत: संकोच:। कस्मिन्निव ? अल्पमूल्यक्रीते दास भव क्रयक्रीते शङ्का न युक्ता इति भाव:। क्रीतत्वे हेतु:, सेविते पदाम्भोजे येन तस्मिन्। क्रीतस्यैव सेवोपयोगादित्यर्थ:।।६ ३ ।।

## (१ २) लक्ष्मणकृत-रसिकरङ्गदा

।।६ ३ ।। अथ तामतितुष्टामालक्ष्य सपरिहासमाह, त्वामिति। अयं ते प्रियस्त्वां चित्तेन चिरं वहन्नतिश्रान्तस्तव पृथुलस्तननितम्बगुरुतया इति भाव:। तथा कन्दर्पेण कृत्याकृत्यविचारमूढेन भृशमत्यर्थं तापितश्च। अत: श्रमसन्तापपीडिततया पिपासित: सन् सुधाया: संवाध: सम्मर्दो यत्र तादृशं सुधापूर्णमित्यर्थ:। बिम्बाधरं पातुमास्वादयितुमिच्छति। इच्छामात्रं करोति। न तु त्वदभिमतं विना प्राप्नोतीति भाव:। तत् तस्मादिह समये अस्याङ्कमुत्सङ्गं क्षणमलङ्कुरु, उपविश्य शोभयेत्यर्थ:। वामस्वभावाया: वैमुख्यशङ्कया चिरमित्यनुक्त्वा क्षणमित्युक्तम्। ननु अविदिताभिप्रायस्याङ्कारोहणे मन: शङ्केति, चेत्, तत्राह, भ्रूक्षेपेति, आस्तां तावद्दूरे भ्रूवोर्विलास:, नर्त्तनादिकम्। विक्षेपस्य चालनमात्रस्य या लक्ष्मी: सम्पत्ति:, शोभा वा तस्या लवो लेश: तेन मूल्येन क्रीते, स्वाधीनीकृते इत्यर्थ:। अत एव दास इव सेवितपदाम्भोजे, आराधितत्वच्चरणकमलेऽस्मिन्, कुत: कारणात् सम्भ्रमो, न कुतोऽपीत्यर्थ:।।६ ३ ।।

## (१ ३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

६ ३ - त्वां चित्तेनेति; राधा अतितुष्टा जाता इति सपरिहासं सख्य: ऊचु:। अयं ते प्रियतम: त्वां चित्तेन हृदये धारयित्वा मनसि निधाय वा तव पीनपयोधरेण तथा घनजघनभारेण श्रान्त: क्लान्त: भृशं वहुश: तापित: पीडादग्ध:। स च तव मुखसुधारस:

तवाधरचुम्बनं कर्त्तुं कन्दर्पस्य कामदेवस्येच्छा वलवती भवति। तस्याङ्कं तस्य श्रीकृष्णस्य क्रोडं कियत् कालपर्यन्तं अलंकुरु तत्र तस्योत्सङ्गे उपविश। भ्रूविक्षेपे भ्रूविलासं तव अमूल्यमस्ति तद् लक्ष्मी: तद्धनस्य लोभेन स्वल्पीयसा नेत्रवक्त्रविकारेण त्वया खल्वसौ स: तव क्रीतदास: वर्त्तते। अत: क्रीतदासस्य समीपे तवचरणसेवानिमित्तं प्रस्तूते दासे पुन: संकोचयसि किमर्थम्? **कालिदासेनापि** शिवपार्वतीसम्वादे **कुमारसम्भवे** प्रस्तुतमस्ति, यत् चमत्कारितया एतेन साम्यमर्हति। तद्यथा पञ्चमसर्गे,

अद्यप्रभृत्यवनताङ्गि! तवास्मिदास: क्रीततपोभिरिति वादिनि चन्द्रमौलौ।
अह्नाय सा नियमजं क्लममुत्ससर्ज क्लेश: फलेन हि पुर्ननवतां विधत्ते।।५/८६

कुत: सम्भ्रम: कुत्र: लज्जा इत्यर्थ:। रूपकोत्प्रेक्षा परिणामालंकारा: शार्दूल-विक्रीडितं छन्द:।।६३।।

**६४- सा ससाध्वससानन्दं गोविन्दे लोललोचना।**
**सिञ्जानमञ्जुमञ्जीरं प्रविवेश निवेशनम्।।६४।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६४।। उत्तरगीतस्य सङ्गमाह। सा सिञ्जानमञ्जुमञ्जीरं यथा स्यादेवं निवेशनं लतागृहं विवेशेतिं वाक्यार्थ:। ससाध्वससानन्दमित्यपि क्रियाविशेषणम्। सन्तापितोऽयमिति साध्वसं चिरादद्यसमागमोऽभवदित्यानन्द:। गोविन्दे लोललोचनेति हरौ सतृष्ण-लोचनेत्यर्थ:। लोकश्चलसतृष्णयोरि**त्यमर**:। पथ्यावक्त्रं नाम वृत्तम्।।६४।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६४।। इदानीं त्रपानाशकृदुचितं कर्माह, सेति। सा राधा अभिवेशनं रतायोपकल्पित-केलिगृहं प्रविवेश। कथं यथा स्यात्तथा? सिञ्जानौ सशब्दौ मञ्जुमञ्जीरौ यत्र तद्यथा स्यात्। किंभूता सा? ससाध्वसं च सानन्दं च ससाध्वससानन्दं यथा स्यात्तथा। गोविन्दे लोले सतृष्णे लोचने च यस्या: सा। साध्वसेन चले। आनन्देन साभिलाषे। अत्र ससाध्वसानन्दमिति एकेनैव 'सह'शब्देन कृते प्रत्येकमुपादानं चलसतृष्णयो: पृथग्योगार्थम्। अनुष्टुप्पथ्यावृत्तम्।।६४।।

### (३) जगद्धरकृत- सारदीपिका

।।६४।। सेति सा राधा निवेशनं लतागृहं प्रविवेश सखीवचनात् कीदृशी राधा स साध्वस: विदग्ध: कृष्ण: कथं मया रञ्जनिय इति। सानन्दं सहर्षं च इति नैकट्यात् गोविन्दे कृष्णे लोले लोचने यस्या: सलज्जत्वात् पुन: कीदृशी मनोहर शब्दयुक्तं

मञ्जीरं नूपुरं सिञ्जाना गमनवशात् सशब्दं कुर्व्वन्ती क्वचित्साध्वस सानन्दगोविन्दे इति पाठे:। तदा स साध्वस: पूर्वापराध: सानन्द: राधाया: आगमनात् एवं नागरयो: समागमे रसोत्पत्तिरुक्ता।।६४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६४।। सा ससाध्वसेति। सा राधा निकेतनं लीलागृहं प्रविवेश प्रविष्टा। किं कुर्वती ? मञ्जुर्मनोहरो यो मञ्जीरो नूपुरस्तं सिञ्जाना शब्दं कुर्वती। कथं यथा स्यात् ? सासाध्वसं साध्वससहितं सानन्दमानन्दसहितं च यथा स्यादित्यर्थ:। कीदृशी सा ? गोविन्दे लोले चञ्चले लोचने यस्या: सा।।६४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६४।। एवं राधा सखीप्रतिबोधिता सती तदुचितार्थमाचरति। सेति। गा: दृशो विन्दति प्राप्नोतीति गोविन्दस्तस्मिन् श्रीकृष्णे समनन्तरवक्षमाणार्थानुग्रहार्थम् अनेन कृष्णाभिधानमित्यवगन्तव्यम्। अत एव लोके सतृष्णे लोचने यस्या: सा तादृशी श्रीकृष्णदर्शन लालसेत्यर्थ:। ''लोलश्चलसतृष्णयोरित्यमर:'' ।एवं विधा राधा आनन्देन कृष्णादिव्यमङ्गल सम्बन्धसमनन्तरसम्भविष्यद्दर्शन जनितसन्तोषेणेह वर्त्तितमिति। संसाध्यसूचनात्तमानन्दं च। चूतं अवद्धि पूर्वपक्षद......एतावत् पर्य्यन्तं श्रीकृष्ण विषयपरिभवजन्ति मित्यनु सम्देयम्। आनन्दमिश्राद्भुतसाध्वसमित्यर्थ:। तेन सहितं यथा तथा। सिञ्जानं शव्दायमानं मञ्जु लोकोत्तरं च मञ्जीरं नूपुरं च यस्मिन् कर्मणि तथा। निवेशनं कृष्णवासभूतलताकुञ्जं प्रविवेश प्रविष्टवती। अत्र प्रवेश समयएव मञ्जीरग्रहणं ग्राह्यम्। तथा च मार्गेऽभिसरण कालानुगुण मञ्जीरत्याग प्रतिपादक, त्यज मञ्जीरमित्यादि न विरोध इत्यवगन्तव्यम्।।६४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६४।। सखीप्रेरिताया राधाया: केलिसदनप्रवेशं वर्णयति। सा राधा सिञ्जानमञ्जुमञ्जीरं शब्दायमानमनोहरनूपुरं यथा स्यादेवं निवेशनं केलिगृहं प्रविवेश। तत: कीदृशी ? ससाध्वसं सभयं सानन्दं सहषञ्च यथा स्यादेवं गोविन्दे च लोलं चञ्चलं लोचनं यस्या: तादृशीत्यर्थ:। अत्र कथमयमेवं मया सन्तापित इति साध्वसं चिरेणाद्य ममातिविदग्धेन मुकुन्देन सङ्गम: स्यादित्यानन्द इति भाव:। 'मञ्जोरो नूपुरोऽस्त्रियामि**त्यमर**:।।६४।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६४।। एवमनुनयसन्तुष्टा निकुञ्जं प्रविवेशेत्याह, सेति। सा राधा निवेशनं केलिमन्दिरं प्रविवेश। किं कुर्वती ? मञ्जु [३]मञ्जीरं मनोहरनूपुरं सिञ्जाना वादयन्ती। [४]अतिसात्त्विक-

कम्पेन चरणस्खलनं कुर्वतीति [५] ससाध्वसं सुरतभयसहित [६]सानन्दमानन्दसहितं यथा स्यात्तथा। कीदृशी ? गोविन्दे लोले चञ्चले लोचने[७] नेत्रे यस्याः। सिञ्जानेति सात्त्विकम्। कम्पेन चरणस्खलनम्। साध्व [८] सहर्षेति व्यभिचारिभावः। लोललोचनेति[९] रसानुभावः कटाक्षः। एतेन [१०] श्रृङ्गाररसः साङ्गस्तयोर्मिलने सञ्जात इति [११] निरूपितम् ।।६४।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६४।। सा ससाध्वसेति। सा राधा [१२]निवेशनं [१३] लतागृहं विवेश [१४] विशति (स्म) [१५] सखीवचनात् इति शेषः [१६]। कीदृशी राधा ? [१७] ससाध्वसं रतिविदग्धः कृष्णः कथं मया रञ्जनीय इति सभयं सानन्दं [१८]हर्षविषादयोरुत्पादात् गोविन्दे कृष्णे लोललोचना चञ्चलनयना सलज्जत्वात्। पुनः कीदृशी ? मनोहरशब्द[१९]युक्तं मञ्जीरं नूपुरं सिञ्जानां [२०]गमनवशात्सशब्दं कुर्वती। क्वचित् [३]ससाध्वससानन्दगोविन्देति पाठस्तदा ससाध्वसः पूर्वापराधात् सानन्दो राधाया आगमनात् ।।६४।।

१.ससाध्वससानन्दं-नि.सा.ससाध्वससानन्दे-अ.२.प्रविवेशाभिवेशनम्-नि.सा.३.मञ्जीरं नूपुरं-अ.ब.४.तः ५.पर्यन्तं नास्ति-अ.ब.इ.ग.ह.६.नास्ति-अ.ब.७.नास्ति-अ.ब.फ.ग.ह.ज.८.हर्षो व्यभिचारिभावौ-इ.फ.ग.ह.ज.९.रसानुभवः-अ.ब.१०.शृङ्गार रसनाङ्गस्तयोर्मितत्वे सिञ्जानेति-अ.११.रूपितः-फ.ग.१२.नास्ति-ड.१३.इति स्थानं-फ. १४.नास्ति-ड.१५.तः १६.पर्यन्तं नास्ति-क.१७.साध्वसं-ड.१८.सहर्षं चरति नैकट्यात्-ल.म.सहर्षं चरित-क.१९.युक्तमञ्जीरं-ड.२०.गमनवशाच्छब्दवती-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६४।। अष्टपदीसङ्गतिमाह। साध्वसेन सहितश्चासौ सानन्दः तस्मिन्। भयानन्दयुक्ते गोविन्दे लोले आसक्ते लोचने यस्याः सा। सा राधा निवेशनं कुञ्जगृहं सिञ्जानौ नदन्तौ मञ्जू मनोहरौ मञ्जीरौ यस्मिन् कर्मणि तथा प्रविवेश। सहेलं सङ्केतस्थानं अवाप ।।६४।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६४।। सेत्यादि। सा राधा सिञ्जानमञ्जु मञ्जीरं यथा स्यादेवं निवेशनं सङ्केतलतागृहं प्रविवेश प्रविष्टवती। सिञ्जानौ शब्दायमानौ मञ्जुमञ्जीरौ मनोज्ञनूपुरौ यत्रेति विग्रहः। सा किंविधा ? ससाध्वससानन्दं यथास्यादेवं गोविन्दे लोललोचना सह साध्वसेन वर्त्तत इति ससाध्वसम्। सह आनन्देन वर्त्तत इति सानन्दम् उभयमपि लोचनक्रियाविशेषणम्। ससाध्वसं च तत् सानन्दं चेति खोडखञ्जादिवत् विशेषणसमासः। मया सन्तापितोऽयमीति साध्वसं चिरादद्य समागमो भावीति आनन्दः। गोविन्दे कृष्णे लोलं चञ्चलं सतृष्णं च लोचनं दर्शनं दृक्क्रिया यस्या इति विग्रहः। साध्वसपक्षे हरिविषये चञ्चलविलोचनम् आनन्दपक्षे सतृष्ण विलोचनं च। ''लोलश्चल सतृष्णयोरि**त्यमरः**।।६४।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६४।। इति सखीवचनोच्छलितचित्ता कुञ्जं प्रविवेशेत्याह सेति। सा सिञ्जानमञ्जुमञ्जीरं ससाध्वसं सानन्दं च यथा स्यात्तथा कुञ्जगृहं प्रविवेश। प्रथमसमागमवत्समाध्वसं विच्छेदान्तर प्राप्त्य सानन्दमितिज्ञेयम्, अत एव गोविन्दे लोले सतृष्णे लोचने यस्या: सा।।६४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६४।। एवं सखीवचनेन प्रेमोत्तरलितचित्ता कुञ्जं विवेशेत्याह, सेति। सा सकलसौभाग्यमाधुरीधुरीणा राधा गोविन्दे, सकलेन्द्रियकृत्यावर्जनचतुरे श्रीकृष्णे, लोले सतृष्णे लोचने यस्या: सा। भावोद्बोधकविविधविलासमनोहरकटाक्षेण तं परितोषयन्तीत्यर्थ:। ससाध्वससानन्दमित्यत्र समाहारे द्वन्द्वश्चिन्तनीय:। ससाध्वसं च सानन्दं च यथा स्यात्तथा इत्यर्थ:। मानानन्तरनवीनसमागमात् ससाध्वसं भाविसम्भोग-सुखस्मरणात् सानन्दमिति ज्ञेयम्। शिञ्जानौ, गतिविलासद्योतकतया शब्दायमानौ मञ्जुमञ्जीरौ चारुनूपुरौ यत्र तत् यथा स्यात्तथा निवेशनं, कुञ्जगृहं प्रविवेश। प्रविष्टवतीत्यर्थ:।।६४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६४।। सा ससाध्वसानन्देति; अत्र त्रपानाशकृदुचितं कर्मेति प्रतिपाद्यते। सा श्रीराधा लीलागृहं प्रविवेश प्रविष्टा। कथं प्रविष्टा ? ससाध्वसं भयसहितं दरत्रासौ भीतिर्भी: साध्वसं भयमि**त्यमर**:। आशंका साध्वसं दर: भिया च इति **हैम**। त्रासोत्रासौ दरोभीत: मातङ्कोभीश्चसाध्वसम्। इति **शब्दार्णव**:। अत्र मानानन्तर नवीनसमागमात् ससाध्वसमिति **रसिकरङ्गदायां** लक्ष्मण:। परन्तु ससाध्वसं पुन: सानन्दं भाविसंभोगसुख स्मरणात् सानन्दमिति भयहर्षयो: मिथुनीकृते भावे श्रीराधा मञ्जुं सुन्दरं मञ्जीरं नूपुरं चारु नूपुरौ। सिञ्जानं शब्दीकुर्वन् तथैव राधा निवेशनं कुञ्जगृहं प्रविवेश। जगाम। अनुष्टुप्पथ्यावक्त्रवृत्तम्।।६४।।

।।द्वाविंश: प्रबन्ध: गीतम् वराडीरागयतिताल/रुपकतालाभ्यां वा गीयते।।

रात्रौ प्रथमप्रहरे

।।द्वाविंश प्रबन्ध: / गीतम् २२।।

।।वराडिराग: यतितालाभ्यां गीयते।।

(रात्रौ प्रथमप्रहरे गीयते)

**१-राधावदनविलोकनविकसितविविधविकारविभङ्गम्।**
**जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम्।।**
**हरिमेकरसं चिरमभिलषितविलासं**
**सा ददर्श गुरुहर्षवशंवदवदनमनङ्गनिवासम्।। ध्रुवम्।।१।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१।। वराडी रागेण गीयते। अस्य लक्षणं प्रागुक्तम्। राधा वदनेति। सा हरिं ददर्शेत्येवं योजना। कीदृशमेकरसम्, एको रसो यस्येति विग्रह:। राधाया: यो रस: स एव कृष्णसेत्यर्थ:। पुन: कीदृशम्, अनङ्ग निकाशं कामसदृशं राधेत्यादि। राधावदन-विलोकनेन विकसितो विवधविकारो विभङ्गन्ये रोमाञ्चादि भङ्गी यत्रेति विग्रह:। अत्रोपमानमाह। जलनिधिमिव चन्द्रमण्डलदर्शन तरलित तरङ्गमिति अत्र कृष्ण समुद्रयो: राधा वदनचन्द्रयोर्विकारो वस्तुना साम्यम्।।१।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।१।। आर्योक्तमेव विवृणोति, राधावदनेति। तत्र पूर्वं ध्रुवपदम्। हरिमेकरसमिति। सा राधा हरिं वदति स्म भोक्तृत्वेन हरिस्वरूपेण संवादं प्राप्नोति स्म। किंभूतं हरिम्? एकरसमेक एव राधाविषये रसो रागो यस्य । पुन: किंभूतम्? चिरमभिलषितो राधासंबन्धी विलासो येन। पुन: किंभूतम्? गुरूर्यो राधाया आगमननिमित्तो हर्षस्तस्य वशं वदं वशं वदनं यस्य। पुन: किंभूतम्? अनङ्गनिवासं कामाश्रयम्। इति ध्रुव:।। अथ पदानि। किंभूतं हरिम्? राधावदनविलोकनेन विकसिता उल्लसिता विविधा विकाराणां सात्विकभावानां विभङ्गा यत्र। एतेन राधामुखदर्शनादक्रममेव स्तम्भादय: प्रादुर्भूता इत्यर्थ:। कमिव? जलनिधिमिव। किंभूतं जलनिधिम्? विधुमण्डलदर्शनेन तरलिता ललिता मनोहरास्तरङ्गा यत्र। अत्र 'मण्डल'ग्रहणं समुद्रबृद्धिहेतुत्वं ज्ञापयति।।१।।

### (३) जगद्धरकृत- सारदीपिका

।।१।। लीलागृहप्रवेशं निरुप्येदानीं दर्शनमहोत्सवेन रसविक्रियां गीतेनाह वराडीराग: रुपकताल: सा राधा एवंभूतं हरि ददर्श सप्तपद्यां सर्वाणि हरिविशेषणानि कीदृशं हरि

राधावदनं विलोकनेन विकसित: प्रकाशित: विविध: नानाप्रकार: विभाग: विभङ्गोकटाक्षादि रचना येन तं पुन: कीदृशं जलनिधिं समुद्रमिवस्थितं कीदृशं जलनिधिं विधुमण्डलदर्शनेन चन्द्रमण्डलालोकेन तरलिताश्चञ्चलीकृता: तरङ्गा: कल्लोला यस्य तं पुन: कीदृशं एकरसम् एकस्यां राधायामेव रस: प्रीतिर्यस्य तं पुन: कीदृशं चिरं बहुकालम् अभिलषित: प्रार्थित: विलास: केलिर्येन तं पुन: कीदृशं गुरुहर्षस्यातिशयस्य हर्षस्य वंशवदम् अधीनं वदनं मुखं यस्य सानन्द मुखमित्यर्थ: । पुन: कीदृशम् अनङ्गस्य कामस्य निवासं स्थानभूतं कन्दर्प कोटिलावण्वमित्यर्थ: । अत्रागाधशृङ्गार-रसाश्रयत्वेन कृष्णस्य जलनिधिसाम्यं राधामुखस्याह्लादकारित्वादिना चन्द्र साम्यं बोध्यम् उपमालङ्कारश्च ।।१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। राधेति। गीतस्यास्य वराडीरागो रूपकताल:। गीतार्थस्तु, सा राधा हरिं कृष्णं ददर्श दृष्टवती। कीदृशम् ? एकरसं एको मुख्य: शृङ्गाराख्यो रसो यस्य तम्। यद्वा, एकस्तुल्यो रसो यस्य तम्। राधाया यादृश: शृङ्गाररस: कृष्णस्यापि तादृश एवेति भाव:। पुन: कीदृशम् ? चिरं बहुकालं व्याप्यामिलषितो वाञ्छितो विलास: केलिर्येन तम्। पुन: कीदृशम् ? गुरुर्महान्यो हर्ष आनन्दस्तस्य वशंवदमायत्तं वदनं यस्य तम्। पुन: कीदृशं हरिम् ? अनङ्गविकाशम्। ''क्वचित् अनङ्गविकास'' इति पाठ:। तदानङ्गस्य कामस्य विकास: स्फुटता यत्र तम्। राधेति। पुन: कीदृशं हरिम् ? राधाया वदनं मुखं तस्य विलोकनेन वीक्षणेन विकसिता: प्रकटिता विविधा नानाविधा विकारा जृम्भणापाङ्गक्षेपणकरविमर्शादिरूपास्त एव विभङ्गा विशिष्टोर्मयो येन तम्। कमिव ? जलनिधिमिव। कीदृशं जलनिधिम् ? विधुमण्डलस्य चन्द्रमण्डलस्य दर्शनेन तरलिताश्चञ्चलीकृतास्तुङ्गा अत्युच्चास्तरङ्गा ऊर्मयो यस्य तादृशम्। अत्रागाधशृङ्गार-रसाश्रयत्वेन कृष्णस्य जलनिधिसाम्यम्। राधामुखस्य चाह्लादकारित्वादिना चन्द्रसाभ्यम्। जृम्भणादिरूपाङ्गविकारस्योत्तरोत्पन्नतया तरङ्गस्य साम्यम्। 'भङ्गस्तरङ्गे भेदे तु भङ्गो जयविपर्यये' इति **विश्व**:।।१ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१ ।। प्रवेशानन्तरं कृत्यमाह। राधेत्यादिना। वराडीरागेण गीयते। अटतालेन गेयम्। अस्य लक्षणं प्रागेव कथितम् चारतालेनेत्यन्ये। तल्लक्षणं तु,

''चाराभिसञ्ज्ञकं तालं तु गुरुरेक: प्रकीर्त्तित:''। आदितालेनेत्यन्ये। आदितालेन लघुर्मतेति। अत्र हरिमित्यारभ्यानङ्ग विकाशमित्यन्तं ध्रुवपदमिदम्। तदादौ व्याक्रियते।

रस्यते आस्वाद्यते इति रस:, सुखम् एकोऽद्वितीय: स चासौ रसश्च, अद्वितीय सुखस्वरूपमित्यर्थ:। अथवा एको मुख्य स्वरूपमिति वा तस्य सुखत्वं नाम निरुपाधिकत्वम्। एके मुख्यान्यकेवला **इत्यमर:**। हरे रसरूपत्वे ''रसो वै: स:'' ''रस एवायं लव्धानन्दा भवतीति श्रुतिप्रमाणम्। रसगुणमित्यत्र रसगुणकमिति वा एक शब्द: पूर्ववत् सर्वपथिका: कवय इति न्यायमनुसृत्य स्वरूपगुणपक्ष व्याख्यानम्। अथवा एको रस: शृङ्गारे यत्र तादृशं शृङ्गारैकपरायणमित्यर्थ: शृङ्गारैकरूपं वा। उक्तमनेकं विना ''शृङ्गार: सखिमूर्त्तिमानिव मधौ मुग्धो हरि: क्रीडति।'' ''शृङ्गारादौ विषे वीर्य्ये गुणे रागे द्रवे रस:'' **इत्यमर:** ।।

अथवा एको मुख्यो रसो राधायामनुरागो यस्य तादृशम्। अत एव चिरं चिरकालमारम्य अभिलषितो बिलासो राधाविषयो केलिर्येन तादृशम्। अतएवानङ्गस्य कामदेवस्य विकाश उद्रेक आविर्भावो यत्र तादृशम्। अतएव गुरु: प्रवलो यो हर्ष: समनन्तरमेव राधासम्भोग: सम्भविष्यतीति सन्तोष:। तस्य वशम्वदं स्वायत्तं तदाक्रान्तमित्यर्थ:। तादृशं वदनं मुखं यस्य तादृशं स्मेराननमित्यर्थ:। हर्षस्य गुरुत्वं च विरहानन्तर सम्भोगस्यातिप्रियत्वादवगन्तव्यम्। तदुक्तं **रतिरहस्ये** ''अख्याता विरहान्यसङ्गमविधौ क्रुद्ध:। प्रसन्ना ऋतुस्नातेति।'' वशम्वदेत्यत्र ''प्रियवशे वद: खचिति खच्। खित्यनव्ययस्येति (६।३।)'' मुम्। एतादृशं हरिं सा राधा। ददर्श। पुन: किंविधमित्याकाङ्क्षायाह। राधेति। राधाया: वदनविलोकनं मुखावलोकनं तेन विकसिता उल्लसिता विविधा नानाप्रकारा ये विकारा: शृङ्गारचेष्टा: तेषां वित्तङ्गो विरचनं यस्य तादृशम्। राधाविषयरससूचकानुभावाक्रान्तमित्यर्थ:। राधेति भिन्नं वा पदं तदा तस्य ध्रुवपदस्थस्य इत्यनेनान्वय:। अत्र तुल्यधर्मवर्ण्णना मुखचद्रस्य चावगन्तव्या। तरलितेत्यत्र तरलशब्दात् तत् करोति णिचिति कर्मणि क्त:''।।१।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१।। तुल्याकांक्षयोरपि प्रथमं नायकस्यैव तारुण्यमुल्लसतीति विविधसङ्गीत-शास्त्रस्वरमेन तद्वर्णनपूर्वकं राधाया: कृष्णदर्शनं वर्णयति। तदाह, 'गाढाकांक्षापि वामाक्षी सुरतादिषु पण्डिता। रतप्रवृत्तौ कान्तस्य व्यापारं समपेक्षत' इति **भरत:**।। गीतस्यास्य वराडी राग:। रागलक्षणमुक्तमेव। रूपकताल:। नायिका चात्राभिसारिकैव, तल्लक्षणमप्युक्तम्। सा राधा हरिं ददर्श कृष्णं विलोकयामास। कीदृशम्? एको रसो यस्य अर्थात् शृङ्गार:। यद्वा एक: एकविषय: रस इच्छा यस्य तम्। पुन: कीदृशम्?

चिरं चिरकालं व्याप्य अभिलषित: ईहितो विलासो रतिर्येन तम्। पुन: कीदृशम्? गुरुहर्षस्यातिप्रमोदस्य वशम्वदमधीन वदनमाननं यस्य तम्। पुन: कीदृशम्? अनङ्गस्य स्मरस्य विकासोऽभिव्यक्तिर्यस्य तमिति हरिविशेषणमिति **जगद्धर:**। वस्तुतस्तु क्रियाविशेषणतयैव सङ्गच्छते। राधावदनेत्यादिनैव हरिकृतस्मरविकारस्य प्राप्तत्वेन पुनस्तदुपादानस्य विफलत्वात्। किञ्च क्रियाविशेषणेनान्योन्याधिकारप्रदर्शनेन रसाधिक्यं सूचितं भवतीति। तदाह, 'अन्योन्यस्यानुरागेण तथान्योन्यविकारत:। रस: स्थिरतर: कोऽपि प्रेयसोरूपचीयत' इति। कीदृशम्? राधावदनविलोकनेन विकसितो विकासं व्यक्तं प्राप्तो विविधो नानाविधो विकारविभङ्ग: स्वेदस्तम्भादेविशेषतो भङ्गस्तरङ्गो यस्य तम्। कमिव? विधुमण्डलस्य चन्द्रबिम्बस्य दर्शनेन विलोकनेन तरलित: चञ्चलीभूत: तुङ्ग: उच्च: तरङ्ग: कल्लोलो यस्य एतादृशं जलनिधिमिव पयोनिधिमिवेत्यर्थ। 'विधु: सुधांशु: शुभ्रांशुरि'**त्यमर:**। 'बिम्बोऽस्त्रीमण्डलं त्रिष्वि'ति च। 'भङ्गस्तरङ्ग ऊर्मि वे'ति च। एतेन राधावदनविलोकनोपचितविकारस्य हरे: विधुबिम्बवीक्षणजनिततुङ्गतरङ्गजलनिधिदृष्टान्तेन राधावदनस्य चन्द्रमण्डलसादृश्ययं हरेश्च गाम्भीर्यं सूचितमिति तेनापि तथाभूतस्यापि कृष्णस्य तदवलोकनजनितविकारवर्णनेन राधाया: निखिलनायिकानिकरादाधिक्यं सूचितमिति संक्षेप:।।१ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।१ ।। रागतालध्रुवपदानि पूर्ववत्। एवं निकुञ्जमन्दिरे प्रवेश्य तां सम्प्रति हरिदर्शन[४]महोत्सवमाह, राधेति। सा राधा हरिं ददर्श। कीदृशम्? राधा वदनचन्द्रविलोकनेन विकसिता ये [५]नानाविधा विकारा [६] जृम्भाङ्गविमर्दनाद्यास्त एव विशिष्टोर्मयो यत्र [७]तम। कमिव? जलनिधिमिव सुमुद्रमिव। कीदृशं जलनिधिम्? विधुमण्डलदर्शनेन चन्द्रमण्डलावलोकनेन तरलिताश्चञ्चलीकृतास्तुङ्गा[८]अत्युच्चास्तरङ्गा ऊर्मयो यत्र तम्। अत्रागाधशृङ्गाररसत्वेन जलनिधिसाम्यम्। श्रीराधामुखस्य चन्द्रसाम्यम्। [९]जृम्भाङ्गसम्मर्दादीनां तरङ्गसाम्यम्। कीदृशम्? एक: शृङ्गाराख्यो रस: [१०] अनुरागो यस्य तम्। [११]यद्वा एकस्यां [१२] राधायां रसोऽनुरागो यस्य नान्यासु [१३] तम्। कीदृशम्? [१] तिरं बहुकालं अभिलषितो वाञ्छितो विलास: केलिर्येन तम्। [२] अथ वा चिरमभिलषित: प्रार्थितो विलासो राधा[३]सम्बन्धिनी क्रीडा येन तम्। कीदृशम्? गुरुर्महान् य: प्रिया[४]प्राप्तौ हर्ष आनन्दस्तस्य वशंवदमधीनं वक्त्रं यस्य तम्। पुन: कीदृशम्? अनङ्गविकासम् काममन्दिरं मन्मथकोटिप्रकाशमित्यर्थ:।।१ ।।

१ .यतिताला्भ्याम्-नि.सा. २ .निवासम्-नि.सा. ३ .ससाध्वस: सानन्दे गोविन्देति-क.ससाध्वसं सानन्दे गोविन्दे इति-ल.म. ४ .महोत्सवानाह-इ.फ.ग.ह.ज. ५ .नानाविकारा:-इ.फ.ज. ६ .जृम्भान्त-

अ.ब.७.नास्ति-अ.ब.ग.८.नास्ति-अ.ब.९.जृम्भान्तासम्मर्दादीनां-अ.ब.जृम्भाङ्गमर्दनादीनां-ग.जृम्भाङ्ग-मर्दादीनां-इ.फ.ह.ज.१०,११.नास्ति–अ.ब.१२.श्रीवृषभानु-सुतायां-ग.१३.नास्ति-अ.ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१।। वराडीरागः। राधेति। सा राधा एवम्भूतं हरिं ददर्श। सप्तपद्यां सर्वाणि हरिविशेषणानि। कीदृशम्? राधावदनविलोकनेन विकसितः प्रकाशितो विविधो नानाप्रकारो विकार [५] विभङ्गःकटाक्षादिरचना येन। पुनः [६]कीदृशम्? जलनिधिमिव समुद्रमिव स्थितम्। कीदृशं जलनिधिम्? विधुमण्डलदर्शनेन [७] चन्द्रमण्डलालोकनेन तरलिताश्चञ्चलीकृतास्तुङ्गा महान्तस्तरङ्गाः कल्लोला यस्य। पुनः [८]कीदृशम्? एकरसं एकस्यां राधायामेव रसः प्रीतिर्यस्य। पुनः [९]कीदृशम्? चिरं बहुकालं अभिलषितः प्रार्थितः विलासः केलि [१०] र्येन। पुनः [११]कीदृशम्? गुरुहर्षस्य वशंवदमधीनं वदनं मुखं यस्य, सानन्दमुखमित्यर्थः। [१२] पुनः [१३] कीदृशम्? अनङ्गस्य कामस्य निवासं स्थानभूतं, कन्दर्पकोटिलावण्यमित्यर्थः [१४]।।१।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१।। राधेति। राधायाः वदनविलोकनेन मुखालोकनेन विकसिताः प्रकटिताः विविधाः नानाप्रकाराः विकाराः शरीरमनसः तेषां विभङ्गाः संवेशनिवेशतया निष्पत्तिः यस्य तम्। भङ्गशब्दो विलासपरत्वेन कविभिरादृतः। वृथा भवेत्कुङ्कुमपत्रभङ्ग इत्यादौ हर्षातिशयेन प्रहसिततया उत्फुल्लगण्डमिति भावः। विधुमण्डलस्य चन्द्रबिम्बस्य दर्शनेन तरलिताः उच्चलिताः तुङ्गाः उन्नताः तरङ्गाः ऊर्मयः यस्मिन् तम्। जलनिधिमिव समुद्रमिव ददृशे इत्यन्वयः। अत्र उपमेयस्य राधामुखावलोकनसञ्जातहर्षजन्य-विलासविशिष्टस्य साम्यत्वसिद्ध्यर्थं उपमाने विधुमण्डलादिविशेषणं दत्तमिति कल्पितोपमा।तल्लक्षणन्तु,

यावद्विशेषणैर्युक्तमुपमेयं भवेद्यदि ।
उपमाने तावदेव सोपमा कल्पितोपमा ।।

बिम्बप्रतिबिम्बभावेन राधावदनस्य चन्द्रस्य च विकसितविलासानां तरलिततरङ्गाणां च ऐक्यात्सादृश्य निष्पत्तिरिति पूर्णोपमा। इवेन नित्यसमासो विभक्त्यलोपश्चेति सूत्रे विधुमिवेत्येकसमासत्वे समासगता शाब्दी (ध्रुवाव्याख्यानम्) हरिमिति। सा राधा एक एव रसो भावो यस्य तम्। अभिलषिताः काङ्क्षिताः विलासानां विनोदानां विकासाः स्फुटीभावाः यस्य तम्। गुरुः महांश्चासौ हर्षः सन्तोषः तस्य वशंवदं स्वाधीनतां वदतीति वशंवदं वदनं यस्य तम्। अनङ्गस्य निकाशं सदृशं हरिं चिरं ददृशे ददर्श।।१।।

१.नास्ति-ग. २.नास्ति-अ.ब.यद्वा-ग. ३.सम्बन्धी-अ.ब.इ.फ.ह.सम्बन्धा-ग.४.प्राप्त्या-इ.फ.ग.ह.ज.५.भङ्ग:-क.६.नास्ति-ड.७.चन्द्रमण्डलावलोकनेन-क.८,९.नास्ति-ड.१०.येन तम्-क.ल.म.११.नास्ति-ड.१२.त:१४.पर्यंतं नास्ति-क.१३.नास्ति-ड.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१।।वराडी रागेण गीयते ।तल्लक्षणं यथा, ''विनोदयन्ती दयितं हि गौरी, सुकङ्कणा चामरचालनेन। कर्णे दधाना सुरपुष्पगुच्छं वराङ्गनेयं कथिता वराडी।'' राधेति ।सा राधा हरिं ददर्शेति योजना। किंविधम्? एकरसम्। एकस्यामेव रसो रागो यस्य अर्थाद्राधायां सर्वनाम्नो वृत्तिमात्र इति पुंवद् भाव: किंवा एक उत्कृष्टरसो रागो यस्य राधाविषये इति शेष:। पुन: किंविधम्? चिरमभिलषितविलासं, चिरकालमभिलषितो वाञ्छितो विलास: क्रीडा येनेति विग्रह:। पुन: किंविधम्? गुरुहर्षवशंवदवदनं, गुरुहर्षस्य महत: पूमोदस्य वशंवद मायत्तताप्रतिपादनं वदनं यस्येति विग्रह:। प्रियवशे वदे: खच्। पुन: किंविधम्? अनङ्गस्य विकाशो यस्मिन्निति विग्रह:। यद्वा अनङ्गं विकाशयति विकशितं करोतीति कर्मण्यणा पुन: किंविधम्? राधावदनविलोकनेन विकसित उन्मिषितो विविधस्य नानाप्रकारस्य विकारस्य रोमाञ्चादेर्भङ्ग भङ्गी यत्रेति विग्रह:। अत्रोपमानमाह। किमिव जलनिधिमिव। जलनिधिं किंविधम्? विधुमण्डलेत्यादि। चन्द्रमण्डल दर्शनेन तरलिता: चञ्चलीकृता स्तुङ्गास्तरङ्गा यस्य यस्मिन् वेति विग्रह:। अत्र कृष्ण समुद्रयोर्वदन चन्द्रयोर्विकारेण वस्तुना हेतुना साम्यं वाक्यार्थोपमालङ्कार।।१।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१।। एवं कुञ्जप्रवेशमुक्त्वा श्रीकृष्णस्य तदर्शनानन्दविकारम् वर्णयन् तस्यान्तद्दर्शनमाह, राधेत्यादिना। अस्यापि वराड़ीरागभूपकतालौ। सा श्रीराधा हरिं ददर्श। कीदृशं? एकस्मिनालम्बने श्रीराधारूपे यस्य तम्। तस्या: सर्वोत्तमत्व निश्चयेन तदेकपरत्वमित्यर्थ:। ननु अनङ्गादिभि: रममाणस्य कुतस्तत्परत्वं चिरं पूर्वोक्तप्रकारेणा-भिलषितस्तया सह विलासो येन तत्, अत एव तत्प्रसादावलोकनात् गुरुहर्षस्यायत्तं वदनं आननं यस्य तत् अतएवानङ्गस्य विकाशो यत्र तम्। तदेकनिष्ठत्वमेव दृष्टान्तेन स्पष्टयति। पुन: कीदृशं? राधावदनविलोकनेनैव रससमुद्रस्य तस्य विकासित। हर्षस्तम्भादय एव ऊर्मयो यत्र तम्। कमिव? जलनिधिमिव। कीदृशं जलनिधिं? विधुमण्डलदर्शनेन चंचलीकृता: तुङ्गास्तरङ्गा यत्र तम्। अत्र श्रीकृष्णसमुद्रयो: विकारोर्म्यो: साम्यम्।।१।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१।। एवं श्रीराधायाः कुञ्जप्रवेशमुपवर्ण्याथ चकासद् गोपीपरिषद्गतोऽच्युतः त्रैलोक्यलक्ष्म्यैकपदं वपुर्दधदित्यनुसारेण श्रीकृष्णस्य प्रियासन्निहितत्वेनाधिक-विजृम्भमाणरूपमाधुरीं वर्णयति। राधेत्यादिना गीतेन। इदमपि वराडीरागेण गीयत इत्युक्तम्। राधेति, सा राधा हरिं ददर्श। कीदृशम्-एकरसं, रस्यते, आस्वाद्यते इति रसः सुखम्। एकोऽद्वितीयः, स चासौ रसश्चेति, तम्। अद्वितीयसुखस्वरूपमित्यर्थः। किं वा एको मुख्यो यो रसः शृङ्गारस्तत् स्वरूपम्। 'एके मुख्यान्यकेवलाः' **इत्यमरः**। यथोक्तं, 'शृङ्गाररससर्वस्वं शिखिपिच्छविभूषणम्' इत्यादि। कविनाप्यत्रोक्तम्, 'शृङ्गारः सखि! मूर्त्तिमान्' इति यद्वा एकोऽद्वितीयो मुख्यो वा रसः, श्रीराधायामेवानुरागो यस्य तम्। तस्यां निरुपमनिरुपाधिप्रेमवन्तमित्यर्थः। अत एव चिरमभिव्याप्याभिलषितो वाञ्छितो विलासो, राधया सह विहारो येन तम्। एतल्लक्षणं व्यनक्ति। पुनः कीदृशम्। राधाप्रसादावकलनाद्, गुरुः समृद्धो यो हर्षः सन्तोषस्तस्य वशंवदं, तदाक्रान्तं प्रोत्फुल्लकमलमिव दर्शनीयमित्यर्थः। तादृशं वदनं यस्य तम्। हर्षस्य गुरुत्वं विप्रलम्भानन्तरसम्भोगस्यातिपुष्टेः। अत एवानङ्गस्य रतिपतेः विकास आविर्भावः यत्र तादृशं, तत्तद्भावाभिव्यञ्जकभ्रूनर्त्तनस्मितसञ्चारिकपोलोल्ल सनमदमन्थराव-लोकनादिविलासशालिनमित्यर्थः। यथोक्तं **श्रीहंसदूते**,

जिहीते साम्राज्यं जगति नवलावण्यलहरी,<br>
परिपाकस्यान्तर्मुदितमदनावेशमधुरम्।<br>
नटद्भ्रूवल्लीकं स्मितनवसुधाकेलिसदनं,<br>
स्फुरन्मुक्तापंक्तिप्रतिमरदनं यस्य वदनम्' इति।।

राधाप्रणयप्रवणत्वमेव सदृष्टान्तं स्पष्टयति, राधेति, राधावदनस्य विलोकनेन विकसिता उल्लसिता ये विविधविकाराः स्तम्भादिसात्त्विकरूपास्तेषां विभङ्गास्तरङ्गा यस्य तम्। किमिव विधुमण्डलस्य, पूर्णचन्द्रस्य दर्शनेन तरलिता उच्छलिता अत एव तुङ्गा उन्नतास्तरङ्गा लहर्य्यो यस्य, तादृशं जलनिधिं समुद्रमिव। अत्र श्रीकृष्णस्य समुद्रेण साम्यम्। विकाराणां तरङ्गैस्तुल्यधर्मवर्णनात्। राधामुखस्य पूर्णचन्द्रेणेति ज्ञेयम्।।१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१।। राधावदनेति; यदा राधा प्रसन्नचित्तेन कुञ्जं विवेश तस्याः मुखचन्द्रप्रकाशे श्रीकृष्णस्य हृदयसमुद्रे कामविकाराणामुत्तालतरङ्गावली चन्द्रदर्शने यथा समुद्रस्य दशा भवति तथैवाऽभूत्। हरिं श्रीकृष्णमेकरसं एकएव श्रीराधाविषये रागः तथाभूतं सा

श्रीराधां ददर्श दर्शनं चकार। गुरुहर्षं श्रीराधाया आगमननिमित्तं हर्षः तेन श्रीराधायाः वशंवदो वशीभूतः श्रीराधाप्रणयसागरे निमज्जितः यस्य वदने अनङ्गस्य निवासः कन्दर्पस्य वसतिः नेत्रवक्त्रविकारेण श्रीराधायाः निमित्तं न केवलं प्रत्युत सर्वेषां गोपीनां हृदये सा भावना वर्तत इति तथाभूतं श्रीकृष्णं श्रीराधां ददर्श इति ध्रुवपदम्।

इदानीं हरिः श्रीराधायाः मुखचन्द्रं दृष्ट्वा तस्य हृदि विविधविकाराणां मुखे तेषां प्रकाशश्च भवति। तस्य कारणं जलनिधिः समुद्रः इव विधुमण्डलं चन्द्रमण्डलं दर्शनात् उत्तालतरङ्गानां उत्तरषां यथा पौर्णमास्यां भवति तथैव कामपीडारूपतुङ्गतरङ्गाणां चलनं तरङ्गभङ्गश्च भवति समुद्रबृद्धिर्जायते। उत्पेक्षा परिणामालंकारः।।१ ।।

**२-हारममलतरतारमुरसि दधतं परिरभ्य विदूरम्।**
**स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम्।। हरि० ।।२ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२ ।। हारं मुक्तावलिमुरस्थले दधतं हारं किं विशिष्टम् अमलतरतारं निर्मलमुक्ता-ग्रथितम्। ''मुक्तशुद्धौ च तारः स्यादित्य**मरः**।'' पुनः कीदृशं, परिलम्बिविदूरं विदूरं लम्बनशीलमित्यर्थः। अत्रोपमानमाह। स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूर इति। अम्कृष्णो रसो यमुनाजलपूरेण, मुक्ताहारस्य फेनकदम्बेन च साम्यम्। ''करम्बितं तु खचितं रुषितं त्ववगुण्ठितमिति **विश्वः**'' ।।२ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।२ ।। अपि च, हारमिति । किंभूतं हारम्? उरसि हारं दधतम्। किंभूतं हारम्? अमलतरतां ऋच्छतीति अमलतरतारम्। अथवा अमलतरा निर्दोषास्तारा निर्मल-मौक्तिकानि यत्र। किं कृत्वा? विदूरं दीर्घं विलम्ब्य कृत्वा। कमिव? यमुनाजले पूरमिव। किंभूतं पूरम्? स्फुटतरा ये फेनास्तेन मिश्रितम्। अनेन स्वेदाख्यसात्विक-भावोत्पत्तिर्दर्शिता। अनु च हारदर्शनं च तस्य श्यामव्यूढोरसि गौरी त्वं स्फुरन्ती दीप्तिमेष्यसीति प्रोत्साहनम्। पौरुषायितरतविशेषश्च। फेनकदम्बेन सुरतश्रमजनिता उदबिन्दवश्च दर्शिताः। यमुनाजलपूरोपमानेन समद्रुतिश्च।।२ ।।

## (३) जगद्धरकृत- सारदीपिका

।।२ ।। हारमिति पुनः कीदृशं हारं मुक्ताहारं दधतं धारयन्तम् उरसि हृदये कीदृशं हारं अमलतरतारम् अत्यन्तविशुद्धं बृहत्तरं पुनः कीदृशं स्फुटतरो यो फेनकदम्बस्तेन करम्बितं मिश्रितं यमुना जलपूरमिव श्रीकृष्णः शामत्वाद्यमुना प्रवाहसाम्यं हार शुभ्रत्वात् फेनसाम्यं बोध्यम् ।।२ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२।। विविधविकारानेवाह, हारमिति। कीदृशं कृष्णम्? विदूरमतिशयेन परिरभ्यालिङ्ग्य उरसि वक्षसि हारं दधतं बिभ्राणम्। कीदृशम्? अमलतरोऽतिशयेन विमलतरस्तारः शुद्धमौक्तिकं यत्र तादृशम्। कमिव? स्फुटतरः प्रकटतरो यः फेनकदम्बः फेनसमूहस्तेन करम्बितं मिश्रितं यमुनाजलपूरमिव कालिन्दीप्रवाहमिव। अत्र कृष्णशरीरस्य श्यामस्निग्धतया यमुनाप्रवाहसाम्यम्। हारस्य चातिशुभ्रतया फेनसमूहसाम्यं बोध्यम्। अत्र हारालिङ्गनेन स्वाभिलाषप्रकटनान्मोहयिताख्यो भावो वर्णितः। तदुक्तं **रसार्णवसुधाकरे**,'स्वाभिलाषप्रकटनं मोहयिताख्यम्' इति। 'मिश्रितं तु करम्बितम्' इति **धरणिः**। 'तारो मुक्तादिसंशुद्धौ तरणे शुद्धमौक्तिके' इति **विश्वः**। 'पूरो जलप्रवाहः स्यात्' इति च।।२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२।। पुनः किंविधं हरिम् इत्याकांक्षायामाह। हारमिति। अमलतरमत्यन्तनिर्मलम् अत एव तारं मस्यादिदोषरहितं ''तारो मुक्तादिसंशुद्धावित्यभिधानम्''। अथवा जमलस्तारो नायकमणिः यत्तत्तादृशम्। अथवा अमलतरास्तारा नक्षत्रकल्पा मुक्ता यत्र तादृशं हारं मुक्ताहारं नक्षत्रकण्ठमालिकामित्यर्थः। परिलम्ब्य कण्ठे आसज्य उरसि वक्षस्थले दधतं दधानं ''नाभ्यस्ताच्छतु (७।१।७८)'' रिति नुम्भाव। विदूरं विगतदूरदेशं समीपवर्त्तिनमित्यर्थः। परिलक्ष्य विदूरमिति क्वचित्पाठः। तदा विदूरं हराभावः। ''अव्ययं विभक्तिसमीपममृद्धीत्यादिना (२।१।६)'' अव्ययीभावः समीपमित्यर्थः। प्राप्ताराधामिरिशेषः। परिलक्ष्य विलोक्य उरसि हारं दधतमित्यन्वयः। किञ्च स्फुटतरमत्यन्तविशदं यत् फेनकदम्ब हिण्डीरमण्ड्ल इत्यर्थः। तेन करम्बितं व्याप्तं यमुनाजलपूरं कालिन्दीपयःप्रवाहमिव स्थितं हरिं ददर्श इत्यन्वयः।।२।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२।। हारमिति। पुनः किंविधम्? हारं मुक्तावलीम् उरसि वक्षस्थले दधतं बिभ्राणम्। हारं किंविधम्? अमलतरतारं प्रकृष्टनिर्मलस्तारः शुद्धमौक्तिकं मुक्ताशुद्धिर्वा यस्यइति विग्रहः। ''तारो वानरोभिन्मुक्ता विशुद्ध्योः शुक्तमौक्तिके।'' इति **मेदिनी**। हारं पुनः किंविधम्? परिलम्बि विदूरं बहुदूर परिलम्बनशीलमित्यर्थः। विदूरात् परिलम्बितमिति राजदन्तादेराकृतिगणत्वाद् विदूरशब्दस्य परनिपातः। परिलम्ब्येति वा पाठः। तत्समीचीनम्। अत्रोपमानमाह। स्फुटतरफेनकदम्ब करम्बितं यमुनाजलपूरमिव। स्फुटतरेण अतिव्यक्तेन फेनकदम्बेन रेखया करम्बितं मिश्रितं

कालिन्दीजलपूरमिव। अत्र भगवतो जलजसदृशवक्षसो यमुनाजलतुल्यता। अत्रचोदारतरहारः फेनकदम्बसादृश्येन कविना वर्णितः। ''करम्बितं तु खचितरूपितं त्ववगुण्ठितम् । इति **विश्वः**'' ।।२ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२ ।। (हारेति) पुनः कीदृशम्? विदूरमतिशयेन परिरभ्यालिङ्गयोरसि वक्षसि हारं दधनं[२] बिभ्राणम्। कीदृशं हारम्? विमलतरस्तारोऽतिविमलं मौक्तिकं यत्र [३] तम्। [४] कमिव? स्फुटतरः[५] प्रकाशबहुलः यः फेनकदम्बः फेनसमूहस्तेन करम्बितं मिश्रितं यमुना [६]जलपूर प्रवाहमिव। अत्र[७]कृष्णद्युतेः कल्लोलत्वेन यमुनायाःसाम्यम्। हारस्यातिविमलत्वेन फेनसाम्यम्?।।२ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२ ।। हारमिति। [८]पुनः [९]कीदृशम्? विदूरं अतिशयेन परिरभ्य [१०] आलिङ्ग्य उरसि हारं[११] मुक्ताहारं[१२]दधतं धारयन्तम्। कीदृशं हारम्? अमलतरं[१३] अतिशयेन निर्मलं तारं स्वस्वरूपं यस्य। पुनः [१४] कीदृशम्?

१.हारममलतरताररतरलमुरसि दधन्तमविदूरम्-च. २.बिभ्रतम्-ग. ३.ततः-अ.ब. ४.किमिव-अ.ब.इ. ५.प्रकाशबाहुल्यो यः-ग. ६.जले-फ.ज. ७.श्रीनन्दकुमारद्युतेः-ग.नास्ति-ड. ९.नास्ति-ड.क. १०नास्ति-ड. ११.नास्ति-क. १२.नास्ति-क.ल.म. १३.अतिशयेन निर्मलं-ड. १४.नास्ति-ड.

[१] यमुनाजलपूरमिव [२]यमुनाजलप्रवाहमिव स्थितम्। कीदशं[३] यमुनाजलपूरम्? [४] स्फुटतरमतिशयेन व्यक्तं फेनकदम्बं फेनसमूहस्तेन करम्बितं[५]मिश्रितम्।।२ ।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।२ ।। हारमिति। अमलतरः स्वच्छः त्रासादिदोषरहितः तारः उच्चः तरलः मध्यमणिर्यस्मिन् तं हारं मुक्तामालां उरसि वक्षसि दधतं अविदूरं समीपे। स्फुटतरः फेनानां कदम्बः समूहः तेन करम्बितं युक्तं वलयितमिति यावत्। यमुनायाः जलपूरं अम्बुसमुदायं ओघमिति यावत्। तमिव। अत्रापि बिम्बप्रतिबिम्बभावेन मुक्ताहारफेन-कदम्बयोरैक्यात् सामान्यधर्मार्थ विशेषकल्पनाकल्पितोपमा। इव शब्दस्य पृथग्गतत्वाद्वाक्यगा।।२ ।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२ ।। हारमिति। पुनः किंविधिम्? हारं मुक्तावलीम् उरसि वक्षस्थले दधनं बिभ्राणम्। हारं किंविधिम्? अमतलरतारमिति। प्रकृष्टनिर्मलस्तारः शुद्धमौक्तिकं मुक्ता शुद्धिर्वा यस्य इति विग्रहः। "तारो वानरभिन्मुक्ताविशुद्धयोः शुद्धमौक्तिके" इति **मेदिनी**।

हारं पुन: किंविधिम् ? परिलम्बिविदूरमिति। बहुदूरं परिलम्बनशीलमित्यर्थ:। विदूरात् परिलम्बिनमिति राजदन्तादेराकृतिगणत्वाद् विदूरशब्दस्य परनिपात:। परिलम्ब्येति वा पाठ:। तत् समीचीनम्। अत्रोपमानमाह, स्फुटतरफेनकदम्बकरम्बितं यमुनाजल-पूरमिवेति। स्फुटतरेण अतिव्यक्तेन फेनकदम्बेन रेखया करम्बितं मिश्रितं कालिन्दीजलपूरमिव। अत्र भगवतो गोपालरुपस्य जलजसदृशवक्षसो यमुनाजल-तुल्यता। अत्र चोदारतहार: फेनकदम्बसादृश्येन कविना वर्णित:। "करम्बितं तु खचितं रूपितं त्ववगुण्ठितम्" इति **विश्व**।।२।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२।। पुन: कीदृशं ? ऊरसि विदूरं परिलम्व्य हारं दधानम्। कीदृशं हारं। निर्मलमुक्ताग्रथितम्। कमिव ? यमुनाजलपूरमिव। कीदृशं ? फेनसमूहेन च साम्यम्। 'मुक्ता शुद्धौ च तार: स्यात्' इति विश्व:।।२।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२।। तत्समयोचितवेशं वर्णयति। हारेति, पुन: कीदृशम्, उरसि वक्षसि, विदूरं परिलम्ब्य, कटिभागपर्यन्तं लम्बयित्वा हारं मुक्तास्रजं दधतं विभ्रतम्। कीदृशं हारम्, अमलतरमतिनिर्मलं तारम्, अतो जाज्वल्यमानं च, 'मुक्ताविशुद्धौ तार: स्यात्' इति **विश्व:**। किमिव, अतिस्फुटो य: फेनकदम्ब: हिण्डीरपंक्तिस्तेन करम्बितं युक्तं यमुनाया जलपूरं, पय: प्रवाहमिव। उर:स्थलस्य यमुनाजलपूरेण, मुक्ताहारस्य फेनकदम्बेन साम्यम्।।२।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। हारमिति; श्रीकृष्णस्य वक्षसि मुक्ताखचितस्य अमलं स्वच्छ: धवल-वर्णायित:हार: परिलम्ब्य प्रलम्बमानो विदूरं दीर्घं दृश्यते। तस्य शोभा उपमीयते। तेन श्रीकृष्णस्य शरीरं फेनप्रलम्बितायमुनैव प्रतिभाति। फेनस्य सन्तति: कदम्बं नाम समूह: तत् खलु कृष्णवर्णेशरीरे फेनधवलता उत्प्रेक्षते। कथमितिचेत् श्रीराधाया: शरीरं दृष्ट्वा स्तम्भ-स्वेद-रोमाञ्चादीनामुत्फुल्लितो भवति। अत्र फेनस्य कदम्बेन स्वेदविन्दव: सुरतश्रमजनिता इति ध्वन्यते। तेनोत्फुल्लिते जले हि फेनस्य सर्जनं सम्भवति। करम्भितं मिश्रितं। उत्फुल्लित-फेनतरतारल्यं मुक्ताहारेणोत्प्रेक्षते।अत्र हारालिङ्गनेन स्वाभिलाषप्रकटनात् मोहयिताख्य: भाव: वर्णित:। तद्यथा **रसार्णव-सुधाकरे** स्वाभिलाषप्रकटनं मोहयिताख्यमिति। मिश्रितं तु करम्बितमिति धराधी:। तारो मुक्तादि संशुद्धौ तरणे शुद्धमौक्तिकम्। इति **विश्व:**। पुरोजलप्रवाह: स्यात्

इति च। पुरुषायिते रतौ स्वेदविन्दव: यमुनाजलमित्यपि ध्वन्यत इति राणा **कुम्भकर्ण:**।।।२ ।।

**३-श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलम्।**
**नीलनलिनमिव पीतपरागपटलभरवलयितमूलम्।। हरि० ।।३ ।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३ ।। नीलनलिनमिव पीतपरागपटलभरेण वलयितं वेष्टितं मूलं यस्येति विग्रह:। अत्र नीलोत्पलेन कृष्णस्य परागेण पीतवस्त्रस्य साम्यम्।।३ ।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।३ ।। अपि च, श्यामलेति। किंभूतं हरिम्? श्यामलं मृदुलं कलेवरमण्डलं यस्य। पुन: किंभूतम्? अधिगते गौरे दुकूले येन। किमिव? नीलनलिनमिव? पीतं यत्परागपटलं तस्य भरस्तेन वलयितं मूलं यस्य। अनेन गौराङ्ग्यास्तव कृष्णेन लतावेष्टितालिङ्गनविशेषे काप्यभिख्या भविष्यतीति प्रोत्साहनम्। तल्लक्षणं यथा, 'प्रियमनुकृतवल्लीविभ्रमा वेष्टयन्ती द्रुममिव सरलाङ्गी मन्दसीत्कारदीर्घम्। वदनमुदित-खेलाक्रन्दमाचुम्बनार्थं नमयति विनताङ्गी यल्लतावेष्टितं तत्' इति।।३ ।।

## (३) जगद्धरकृत- सारदीपिका

।।३ ।। श्यामलेति श्यामलं कृष्णं मृदुलं कोमलं कलेवरमण्डनं शरीरालङ्कारो यस्य तं पुन: कीदृशं अधिगतं परिहितं गौरदुकुलं पीतवस्त्रं येन कमिव नीलोत्पलमिवेत्यर्थ:। कीदृशं नीलनलिनं पीतपरागानां कुङ्कुमरेणूनां पटलस्य समूहस्य भर: अतिशयस्तेन वलयितं वेष्टितं मूलं यस्य स्यात्तथा।।३ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।३ ।। पुन: कीदृशम्? श्यामलेति। श्यामलं नीलं मृदुलं कोमलं कलेवरमण्डलं शरीरमण्डलं यस्य तादृशम्। पुन: कीदृशम्? अधिगतमधिकं परिधेयत्वेन ज्ञातं गौरं पीतं दुकूलं पट्टवस्त्रं येन तम्। किमिव? नीलनलीनमिव श्यामकमलमिव। कीदृशं नीलनलिनम्? पीतो य: पराग: पुष्परेणुस्तस्य पटलं समूहस्तस्य यो भरोऽतिशयस्तेन वलितं वेष्टितं मूलं यस्य तादृशम्। अत: कृष्णस्य स्निग्धश्यामतया नीलोत्पलसाम्यम्। पीतपट्टाम्बरस्य च मूललग्नपीतरागसाम्यम्। 'अथ कलेवरम्। गात्रं वपु: संहननम्' **इत्यमर:**।।३ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३ ।। श्यामलेति। श्यामलं नीलवर्ण्णं ''कालश्यामलमेचका **इत्यमरः**''। मृदुलं यत् कलेवरं शरीरं तस्य मण्ड़लं सन्देशः। तमधिगतं प्राप्तं गौरं पीतवर्ण्णं ''गौरः पीते सितेऽरुण **इत्यमरः**''। एतादृशं दुकूलं कौशेयं यस्य तादृशम्। अत एव पीतपरागपटलभरेण वलयितं वेष्ठितं संघटित वलयमित्यर्थः। तारकादित्या वच। अथवा वलयितं बलयबत्कृतम्, अत्र वलशव्दात् तत्करोति णिचि कर्मणि क्तः। एतादृशं मूलं मूलप्रदेशो यस्य च तादृशम्। नीलनलिनमिव नीलोत्पलमिव स्थितं हरिं ददर्श इत्यन्वयः। कलेवरशब्दस्य ग्राम्यत्वदोषो देशभेदात् परिहर्त्तव्यः। कलेवर-मण्डनमिति क्वचित्पाठः। प्रकृतानुपयोगित्वादस्वरसः।।३ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३ ।। पुनः कीदृशं तत्राह, श्यामलं श्यामवर्णं मृदुलं कोमलं कलेवरमण्डनं यस्य तम्। तदाह, 'कालः श्यामलमेचकाविति। 'कोमलं मृदुलं मृद्विति चामरः। पुनः कीदृशम्? अधिगतं प्राप्तं परिधानोकृतमिति यावत्, गौरदुकूलं पीतवर्णं पट्टवर्णं पट्टवस्त्रं येन तम्। पितौ गौरो हरिद्राभ इत्यमरः। किमिव? नीलनलिनमिव स्यामलकमलमिव।किदृशं नीलकमलं? पीतपरागपटलस्यहरिद्राभकुसुममरेण समुहस्य भरोऽतिशयः तेन वलयित वेंष्ट्ति मुलं मुलदेशो यस्य तम्। अधिपूर्वो गमिः परिधानार्थः। 'परागः कौसुमे रेणौ स्नानीयादौ रजस्यपी'त्यमरः। उपमा चात्रालङ्कारः।।३ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।३ ।। (श्यामेति।) पुनः कीदृशं हरिम्? श्यामलं नीलं मृदुलं कोमलं शरीरमण्डलं शरीरस्य प्रत्यङ्गं यस्य तम्। कीदृशम्? अधिगतं परिवृतं प्रियाङ्गसादृश्याद्गौरदुकूलं पीताम्बरं [६]येन। कमिव? पीतपरागानां गौरपुष्परेणुनां पटलभरः समूहातिशयः तेन वलयितं वेष्टितं मूलं यस्य तादृशं नीलकमलमिव। अत्र श्रीकृष्णस्य [७] श्यामलत्वेन परागसमूहस्य पीतेनान्तर्बहिर्मूले परागावृतत्वादभूतोपमैव।।३ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।३ ।। श्यामलमिति। [८]पुनः [९]कीदृशम्? श्यामलं कृष्णं मृदुलं मनोहरकलेवर-मण्डलं शरीरावयवो हस्तादिर्यस्य। अधिगतं [१०]परिधृतं गौरदुकूलं पीताम्बरं येन। [११] पुनः कीदृशम्? नीलनलिनमिव [१२] नीलोत्पलमिव स्थितम्। कीदृशं [१३] नीलनलिनम्? पीतपरागाणां गौरकुसुमरेणूनां पटलभरः समूहातिशयः तेन वलयितं वेष्टितं मूलं यस्य।।३ ।।

१.नास्ति-क.२.प्रवाहमिव-ड.३.नास्ति-ड.४.स्फुटतरफेनसमूह:-ड.५.मिश्रम्-क.६.येन तम्-ग.७.श्यामत्वेन-इ.फ.ग.ह.ज.८,९.नास्ति-ड.१०.परिधानीकृतं-क.११.त: १२.पर्यन्तं नास्ति-क.१३.नास्ति-ड.नलिनम्-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।३।। श्यामलेति। श्यामलं मृदुलं सुकुमारं कलेवरमण्डलं शरीरम् कलेवरशब्दस्य अवयवपरत्वं वा, यस्य तम्। अधिगतं परिधानितं गौरं पीतं दुकूलं अम्बरं यस्य तं हरिम्। कलेवरमण्डलं वा विशेष्यम्, तमेव ददृशे इत्यन्वयात्। तदा श्यामलं मृदुलं च तत्कलेवरमिति कर्मधारय:। पीत: परागस्य कुसुमरजस: पटलस्य समुदायस्य भर: तेन वलयितं वेष्टितं मूलं वृन्तं यस्य तम्। नीलनलिनं नीलोत्पलमिव। अत्रापि सैवोपमा। अधिगतवलयितशब्दाभ्यामेक एवार्थ: भिन्नतया उक्त: इति वस्तुप्रतिवस्तु-भावत्वयुक्तबिम्बप्रतिबिम्बभावेन धर्म उक्त:।।३।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३।। पुन: किंविधम्? श्यामलेति। श्यामलं नीलं मृदुलं कोमलं कलेवरमण्डनं यस्येति विग्रह:। अनतिखर्वता अनतिदीर्घताप्रतिपादनार्थं कलेवरं मण्डलत्वेन रूपितं मण्डलशब्द: स्वरूपवचनो वा। ''मण्डलं निवहे प्रोक्तं स्वरूपेऽपि च मण्डलमिति शब्दार्णव:।'' पुन: किंविधम्? अधिगतगौरदुकूलम्, अधिगतं परिहितं गौरं दुकूलं वस्त्रविशेषो येनेति विग्रह:। पिनद्धपीतवसनमित्यर्थ:। अत्रोपमानमाह, नीलनलिनमिव नीलोत्पलमिव। तदपि विशिनष्टि। पीतपरागेत्यादि, पीतपरागाणां हरिद्राभकौसुमरजसां पटलस्य समूहस्य भरेण अतिशयेन वलयितं वेष्टितं मूलं यस्येति विग्रह:। अत्र नीलोत्पलेन कृष्णस्य परागेण पीतवस्त्रस्य साम्यम्।।३।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।३।। पुन: कीदृशं? श्यामलं मृदुलं च कलेवरमण्डलं यस्य तम् । यथोचितावयव-सन्निवेशप्रतिपादनार्थं मण्डलत्वेनोक्ति:। तथा प्राप्तं पीतदुकूलं येन तम्। कमिव? नीलनलीनमिव । कीदृशं? पीतपरागाणां समूहातिशयेन वेष्टितं मूलं यस्य तत्। अत्र नीलकमलेन श्रीकृष्णस्य परागेण पीतवस्त्रस्य साम्यम् । परागावृतमूलवर्णनेनाद्भुतो-पमेयम्।।३।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।३।। किं च श्यामलेति। पुन: कीदृशम्। श्यामलमिन्द्रनीलमणियत् सुन्दरं मृदुलं शिरीषपुष्पवत् कोमलं च कलेवरमण्डलं यस्य तम्। तथाधिगतं कटिप्रदेशे प्राप्तं

परिहितमित्यर्थः गौरदुकूलं पीतवस्त्रं येन तम्। किमिव, पीतवर्णपरागाणां पटलं पुञ्जस्तस्य भरोऽतिशयस्तेन वलयितं वेष्टितं मूलमधः प्रदेशो यस्य तादृशम्। नीलनलिनमिव, नीलोत्पलमिव। 'परागः सुमनो रजः' **इत्यमरः**। परागावृतमूलवर्णनेनाद्भूतो-पमेयम्।।३।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। श्यामलेति; श्यामल–हरित-मृदुल-कोमल-कलेवरं शरीरमण्डलं यस्य शरीरमण्डलं कोमलं कृष्णवर्णमस्ति। यदा स्फुटकमलोदर-स्फुटित-पद्मपुष्पस्येव परागः सुवर्णवर्णाभं पीतवस्त्रधारणेनैव शोभते। कथमिति नीलनलिनीमध्ये पीनपरागरेणुवदत्र शोभते अत्र लतावेष्टिकबन्धः तद् यथा, 'प्रियमनुकृतवल्लीविभ्रमा वेष्टयन्ती द्रुममिव सरलाङ्गी मन्दसीत्कारदीर्घम्। वदनमुदित-खेलाक्रन्दमाचुम्बनार्थं नमयति विनताङ्गी यल्लतावेष्टितं तत्' इति।।३।।

**४-तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागम्।**
**स्फुटकमलोदरखेलितखञ्जनयुगमिव शरदि तडागम्।। हरि०।।४।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। तरलस्य चञ्चलस्य दृगञ्चलस्य वलनेन भ्रमणेन मनोहरं यद्वदनं तेन जनितो रतिरागो येनेति विग्रहः। अत्रोपमानमाह। स्फुटकमलेत्यादि। स्फुटं विकसितं यत्कमलं पद्मं तस्योदरे खेलितं क्रीडापरं खञ्जयुगं पक्षीविशेषयुगं यत्रेति विग्रहः। ''पद्माकरस्तड़ा-गोऽस्त्री कासारः सरसी सरः'' **इत्यमरः**। अत्र कृष्णस्य तडागेन वदनस्य कमलेन नयनस्य खञ्जनेन च साम्यम् ।।४।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, तरलेति। किंभूतं हरम्? तरलदृगञ्चलवलनेन मनोहरं यद्वदनं तेन जनितो रतिरागो येन। अनेन कान्ता दृष्टिरुका। यथा, 'आपिबन्तीव दृश्यं या सा विकाशातिनिर्मला। सभ्रूक्षेपकटाक्षा च कान्ता मन्मथवर्धिनी'। कमिव? तडागमिव। किंभूतं तडागम्? शरदि स्फुटे विकसिते कमलोदरे खेलितं खञ्जनयुगं यत्र। शरत्काले खञ्जनवर्णनमुचितमेव। पद्मेऽपि खञ्जनं मिलत्येव। तदुक्तम्, 'अब्जेषु गोषु गजवाजि-महोरगेषु राज्यप्रदः कुशलदः शुचिशाद्वलेषु'। अत्र 'कमलोदर'ग्रहणेन पद्मासनं नाम रतिविशेषः सूचितः। यथा, 'जङ्घायुगलस्य विपर्ययतः पद्मासनमुक्तमिदं युवतेः'।।४।।

## (३) जगद्धरकृत- सारदीपिका

।।४।। तरलेति कीदृशं हरि तरलश्च चलो यो कटाक्षस्तस्य चलनेन मनोहरं सुन्दरं यद्वदनं तेन जनित उत्पादितो रसोरागोऽभिलाषोऽर्थात् नारीणां येन नारीणामतिकामकर-मितिभाव:। कमिव शरदि शरत्काले तडागमिव कीदृशं तडागं स्फुटकमलस्य विकाशित पद्मस्योदरमध्ये खेलितं क्रीडितं खञ्जनयोर्युग्मं युगलं यत्र तथा शरत्काले खञ्जनवर्णनमुचितमेव।।४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। पुन: कीदृशम्? तरलेति। तरलो दृगञ्चल: कटाक्षस्तस्य चलनेन मनोहरं सुन्दरं यद्वदनं तेन जनित उत्पादितो रतिरागो राधाया: सुरतेच्छा येन तादृशम्। कमिव? शरदि शरत्काले स्फुटकमलोदरे विकसितपद्मगर्भे खेलितं क्रीडितं खञ्जनयुगं खञ्जरीटयुगलं यत्र तादृशं तडागमिव। अत्र कृष्णस्य राधादर्शनासंक्षुभितत्वेन शरत्कालीनतडागसाम्यम्। स्मेरमुखं मन्दहास्यं च विकसितकमलसाम्यम्। तारका: श्यामिकोपेतत्वेन परित: शुभ्रत्वेनातिचञ्चलत्वेन तन्नेत्रयो: खञ्जनसाम्यम्। शरत्काले जलाशयस्य कमलगर्भे खेलत्खञ्जनो दृष्ट: सन्द्रष्टुर्वाञ्छितं प्रयच्छति। एवं चलदपाङ्गवत्कृष्णदर्शनं राधाया वाञ्छितं केलिसुखं दास्यतीति शरत्कालीन-कमलमध्यस्य खञ्जनोपमानेन ध्वनितम्। तदुक्तं **वराहे**, 'हेमसमीपसिताम्बर-कमलोत्कलपूजितोपलब्धेषु। दधिपात्रधान्यकूटे दृष्टोऽभीष्टानि चेष्टते विहग:' इति। 'खञ्जरीटस्तु खञ्जन:' **इत्यमर**:। 'तडागस्तु जलाधार:' इति **विश्व**:।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। तरलेति। तरलो चञ्चलो यो दृगञ्चलोऽपाङ्गप्रदेश: तयोश्च वलनं विलास विलोकनं तेन मनोहरेण द्रष्टृजनचित्ताकर्षकेण वदनजनित उत्पादित: रतौ सुरते राग: राधाया अनुरागो येन तादृशं स्वमुखलावण्यप्रदर्शनेन राधाया: सुरतानुरागं जनयन्तमित्यर्थ:। अत एव स्फुटकमलोदरे विकचकमलाभ्यन्तरे खेलितं विहरमाणं ''गत्यर्थाकर्मकेत्या (३।४।७) दिना कर्त्तरि क्त च। खञ्जनयुगं मकरन्दपायी खञ्जरीटाक्षपक्षि- विशेषयुगलं यत्र तादृशं ''खञ्जरीटस्तु खञ्जन'' **इत्यमर**:। खञ्जरीटस्य नयनोपमानत्वं तु ''नलिनी नयन खञ्जरीट'' इत्यादि महाकविप्रयोगे स्फुटम्। तादृशं शरदि तडागमिव शरत्कालपुष्करिणीमिव स्थितं ददर्शेत्यन्वय:। अत्र श्रीकृष्णस्य कटी वसन समेतकमलकल्पनवदनाधारत्वेन मनोहरत्वसाम्येन नैर्मल्येन वा शरत्तडागसाम्यमव-गन्तव्यम्।।४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।४।। पुनः कीदृशं तत्राह, तरलं चञ्चलं दृगञ्चलं दृक्प्रान्तः तस्य वलनेन सञ्चरणेन मनोहरं रमणीयं यद् वदनं तेन जनित उत्पादितो रतौ क्रीडायां रागोऽनुरागोऽर्थान्नारीणां येन तम्। कमिव ? स्फुटकमलोदरे प्रफुल्लारविन्दक्रीडे खेलितं क्रीडितं खञ्जनयुगं खञ्जरीटयुग्मं यत्र एवम्भूतं शरदि शरत्समये तडागमिव जलाशयविशेषमिव। अत्र निर्मलत्वेन रसाश्रयत्वेन च कृष्णः शरत्कालीनतडागेनोमपीमितः, सौरभविशेषाश्रयत्वात् खञ्जरीटेनोपमितमित्यवधेयम्। एवञ्च शरत्काले पद्मोपरि खञ्जरीटदर्शनेन राधायाः समीहितसिद्धिरचिरादेव स्यादिति सूचितम्। तदुक्तम्, 'अब्जेषु गोषु गजवाजिमहोरगेषु राज्यप्रदः कुशलदः खलु खञ्जरीट' इति।।४।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।४।। (तरलेति।) कीदृशं हरिम् ? तरलानां चञ्चलानां कटाक्षाणां चलनेन मनोहरं यद्वदनं तेन जनितो रतिरागः सुरतानुरागो येन तम् अर्थाद्राधायाः। एतेन दर्शनसौख्यस्य पराकाष्ठा दर्शिता। कीदृशम् ?स्फुटानां विकसितानां कमलानामुदरे मध्यं खेलितानि क्रीडायुक्तानि खञ्जनयुगानि [२] चञ्चरीटपक्षियुगलानि यत्र तादृशम्। शरदि शरत्काले तडागमिव सरोवरं[३]यथा स्यात्तथा श्रीकृष्णः श्रीराधादर्शनेन भातीत्यर्थः। अत्रेयं व्यवस्था, तडागस्थानीयः श्रीकृष्णः, विकसितकमलस्थानीये तस्य नेत्रे, कमलोदरस्थानीयं नेत्रयोर्मध्यभागम्, खेलितखञ्जनस्थानीये तन्नेत्रगोलके, शरत्स्थानीया श्रीराधेति यथावद्योग्यमुन्नेयम्। श्रीराधाशरत्प्राकट्येन श्रीकृष्णचन्द्रस्य[४]विकासो जात इति ध्वनिः।।४।।

१.चलन-नि.सा.ड.वलय-अ.ब.२.खञ्जरीट-ह.३.यथा भवति तथा-इ.फ.ग.ह.ज.
४.विकाशश्चोपात्तः-अ.ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।४।। तरलेति।[१] पुनः [२] कीदृशम् ? तरलस्य चञ्चलस्य कटाक्षस्य चलनेन मनोहरं यद्वदनं मुखं तेन जनित उत्पादितो [३]रतौ रागः प्रीतिर्येन,[४]राधायाः [५]इति शेषः तम्[६]। पुनः [७]कीदृशम् ? शरदि शरत्काले तडागमिव जलाशयमिव स्थितम्। कीदृशं [८] तडागम् ? स्फुटस्य विकसितस्य कमलस्योदरे मध्ये खेलितं क्रीडितं खञ्जनयुगं यस्मिन्, शरदि खञ्जरीटः पद्मे खेलति। तच्च[९]सकृद्दर्शने शकुनं राज्यादिप्रदञ्चेति।।४।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।४।। तरलेति। तरलयोर्दृगञ्चलयोः नेत्रप्रान्तयोः वलनेन भ्रमणेन मनोहरं च तत् वदनं तेन जनितः रतिरागः सुरतासक्तिः येन तम्। एतत्कटाक्षावलोकनवशीकृताः

स्वयमेव रत्यासक्ताः युवतयो भवन्तीति भावः। स्फुटं विकसितं कमलं तस्य उदरः तस्मिन् खेलितं क्रीडा ययोस्तौ च तौ खञ्जनौ क्रीडन्तावित्यर्थः। तयोः युगं द्वन्द्वं यस्मिन् तम्। शरदि शरत्काले तडागं कासारमिव हरिं ददृशे। अत्र कल्पितोपमा। बिम्बप्रतिबिम्ब भावमात्रेन साधारण धर्मो निर्दिष्टः इति कल्पितोपमा। स्वतस्सिद्धविशेषण-त्वायोगान्नोत्प्रेक्षालङ्कारः।।४।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। पुनः किंविधम्? तरलेत्यादि। तरलौ चञ्चलौ यौ दृगञ्चलौ कटाक्षौ तयोश्चलनेन मनोहरं यद्वदनं, तेन जनितो रतिरागो येनेति विग्रहः। स्त्रीणामिति शेषः। अत्रोपमानमाह । शरदि शरत्काले स्फुटकमलोदर खेलितखञ्जनयुगं तडागं पद्माकरमिव । स्फुटं विकशितं यत् कमलं, तस्योदरे खेलितं क्रीडितं खञ्जनयुगं पक्षिविशेषयुगं यत्रेति विग्रहः। यद्वा कर्मधारयदोषपरिहाराय स्फुटकमलोदरे खेलितं खेलनं यस्य एवंविधं खञ्जनयुगं यत्रेति विग्रहः। ''पद्माकर स्तडागोऽस्त्री कासारः सरसी सर **इत्यमरः**।'' अत्र कृष्णस्य तडागेन वदनस्य कमलेन नयनस्य खञ्जनेन साम्यम्।।४।।

## (११) पूजारी गोस्वामीकृत-बालबोधिनी

।।४।। पुनः कीदृशं? चञ्चलस्य दृगञ्चलस्य चलनेन मनोहरं यद् वदनं तेन जनितः तस्या रतिरागो येन तम्। पुनः कमिव? शरदि तड़ागमिव । कीदृशं विकसितं यत् पद्म तस्योदरे क्रीड़ापरं खञ्जनयुगं यत्र तत्। अत्र श्रीकृष्णस्य तड़ागेन वदनस्य कमलेन नयनयोः खञ्जनयुगलेन च साम्यम्।।४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।४।। विलासं वर्णयति तरलेति। पुनः कीदृशम्। तरलौ, स्वभावचपलौ यौदृगञ्चलौ, तयोश्चलनेन भावसूचनावलोकनेन मनोहरं यद् वदनं तेन जनित उत्पादितः रतिरागः, श्रीराधायाः सुरताभिलाषो येन, तम् । कमिव, शरदि, शरत्काले तडागं पद्माकरमिव, कीदृशं स्फुटं विकसितं यत् कमलं तस्योदरे मध्ये खेलितं विविधगतिभिर्विलसितं, खञ्जनयुगं खञ्जरीटपक्षियुगलं यत्र तादृशं तडागं पद्माकरमिव। 'पद्माकरस्तडागोऽस्त्री' **इत्यमरः**। शरदित्यनेन तडागस्यातिस्वच्छत्वम्। कमलानामतिशोभनत्वम्। खञ्जनानां विलासौत्सुक्यं च लब्धम्। उक्तं च **श्रीदशमे**, 'शरदुदासये साधु जातसत्सरसिजोदर-श्रीमुषा दृशा' इति।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। तरलदृगञ्चल - चलनेति; तस्य भगवतः श्रीकृष्णस्य चलनं इतस्ततः गमनं तरलदृगञ्चल चञ्चलनेत्रयुगलयोर्गतिः अपाङ्गनेत्रेण वक्रदृष्ट्या वा इतस्ततः प्रेक्षणं तेन

शोभनं मुखस्य शोभया श्रीराधाया: रतिराग: बर्द्धते। तस्य श्रीकृष्णस्य चञ्चलापाङ्ग-दृष्टिस्तावद् शरतकालस्य तडागे यथा स्फुटकमलोदरप्रस्फुटित कमलश्रेणीषु खेलितं क्रीडितं खञ्जनयुगं खञ्जरीटमिव दृश्यते। तडागे पद्मश्रियेषु खञ्जरीटस्य चक्षुचञ्चलपक्षी-विशेषस्य श्रीकृष्णस्य नेत्रवक्त्रविकार: शोभते। तेन श्रीराधाया: रातिराग: कामेच्छा वर्द्धते। तद्यथां, आपिबन्तीव दृश्यं या सा विकशति निर्मला।

स भ्रूक्षेपकटाक्षाय कान्ता मन्मथ वर्धितानि।।

पद्मखञ्जनमीलनमपि पण्डितै: दृष्टं तद्यथा, "अब्जेषु गोषु गजवाजिमहोरगेषु राज्यप्रद: कुशलद: सूचिशार्दूलेषु।।" अत्र कमलोदरग्रहणेन पद्मासनं नाम रतिविशेष: सूचित: इति **राणाकुम्भ:**। तद्यथा, जङ्घयुगलस्य विपर्यस्य: पद्मासन- मुक्तमिदं वुधै:।। विषयेस्मिन् पुन: योजयितुं शक्यते। **वराहे** यदुक्तम्, हेमसमी-पसिताम्बरकमलोत्पलपूजितोपलब्धेषु। दधिपात्रधान्यकूटे दृष्टोभीष्टानि चेष्टते विहग:। अत्र मुखपद्मे रुपिते नेत्रखंजनस्य स्यिति: शुभपाल दानेन परिणामालंकार:। तद् यथा,

विषयात्मतपारोप्ये प्रकृतार्थोपयोगिनि परिणामो भवेत्तुल्यातुल्याधिकरणो द्विधा।। ४।।

**५-वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभम्।**
**स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम्।। हरि०।।५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। वदनमेव कमलं तस्य परिशीलनाय संपर्काय मिलितयोर्मिहिरसमयो: सूर्य्य सदृशयो: कुण्डलयो: शोभा यस्येति विग्रह:। स्मितरुचीत्यादि। स्मितरुचिरेव कुसुमं तेन योऽसौ समुज्ज्वलितोऽधरपल्लवस्तेन कृत: रतिलोभो येनेति विग्रह:।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। अपि च, वदनेति। किंलक्षणं हरिम्? वदनकर्तृकपरिशीलनेन मिलितो यो मिहिरस्तेन समे ये कुण्डले ताभ्यां शोभत इति। अनेन शारीरकसूर्यसमाकर्षण-सद्भावरतान्त: सूचित:। तदेव चिह्नयति, स्मितकान्त्या रुचिर: समुज्ज्वलितो योऽधरपल्लवस्तेन कृतो रतेर्लोभ: संभोगतृष्णा येन। रतान्ते किल ताम्बूलादिरागहा-सादिना अधर उज्ज्वलो भवतीति कृतरतिलोभमिति रतिविरतावपि पुना रताय सस्पृहत्वम्। एतदेव शृङ्गारसर्वस्वं यद्रतिविरतावपि न जुगुप्सेति ।।५।।

## (३) जगद्धरकृत- सारदीपिका

।।५।। वदनेति वदनकमलस्य परिशीलनाय मीलिते मिहिर समे सूर्य तुल्ये ये कुण्डले ताभ्यां शोभा यस्य तं तथा पुन: कीदृशं स्मित रुचिरो हास्य दीप्ति सुभग: समुज्वलितो

दीप्यमानो योऽधरपल्लवस्तेन कृतोरतौ लोभो युवतीनां रताभिलाषो येन तं तथा तत्पक्षे त्वयि रतिलोभमित्यत्र गमकत्वात्समास:।।५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। पुन: कीदृशम्?। वदनेति। कृष्णवदनकमलस्य मुखपद्मस्य परिशीलनाय मिलितौ यौ मिहिरौ सूर्यौ ताभ्यां समे ये कुण्डले ताभ्यां शोभा कान्तिर्यस्य तम्। अत्र कुण्डलयोर्नानामणिखचितत्वेन सूर्योपमा बोध्या ।अद्भूतोपमा चेयम्। 'विकर्तनार्क-मार्तण्डमिहिरारुणपूषण:' **इत्यमर:**। पुन: कीदृशम्? स्मितस्य ईषद्धासस्य या रुचि: कान्तिस्तया रुचिरो मनोहर: समुल्लसितो राधाधरपानोत्कण्ठया ईषत्कम्पितो योऽधरपल्लवस्तेन कृतो राधाया रतिलोभ: सुरतेच्छा येन तम् ।।५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५।। वदनेति। वदनकमलस्य सुखसरोरुहस्य परिशीलनं परिचय: अलङ्करणमिति यावत् एतदर्थं मिलिते घटमाने ये मिहिरसमकुण्ड़ले सूर्य्यसमाकर्ण्णभूषणे ताभ्यां शोभा कान्तिर्यस्य तादृशम्। अथवा मुखकमलेन परिशीलन सख्यं मिलित: सर्वतो यो मिहिर: सूर्य्य: ''महिरारुण पूषण'' **इत्यमर:**। तत्समकुण्ड़लशोभि अत्यद्भुतोपमा। किञ्च स्मितेन मन्दहासेन या रुचि: कान्ति: तया रुचिरं मनोहरं यथा तथा समुज्ज्वलितं भासितं यदधरपल्लवं दन्तवासकिशलयं तेन कृत: निष्पादित: रतौ सुरते रतये वा लोभ:। राधाया: स्पृहा विशेषो यत्र तादृशं विलासहासभासुरा धरणे राधाया रतिलोभं जनयन्तमित्यर्थ:।।५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५।। पुन: कीदृशं तत्राह, वदनमेव कमलम्, तत् परिशीलनाय मीलिते मिहिरारुणसदृशे कुण्डले यौ कर्णालङ्कारविशेषौ ताभ्यां शोभा कान्तिर्यस्य तम्। तदाह, 'मिहिरारुणपूषणमित्यमर:। 'सुषमा परमा शाभा शोभा कान्तिद्युतिश्छविरि'**त्यमर:**। पुन: कीदृशम्? स्मितरुच्या ईषद्धासकान्त्या रुचिर: कान्तो य: समुज्ज्वलित: स्वभावत: सुन्दरोऽधरपल्लवो रदनछदपल्लव: किसलय: तेन कृतो जनित: रतौ सुरते लोभोऽभिलाषा यत्र अर्थात् सुन्दरीणाम्, तादृशमित्यर्थ:।।५।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५।।(वदनेति।) कीदृशं हरिम्? श्रीराधावदनकमलस्य परिशीलनेनात्यादरावलोकेन मीलिते स्थिरीभूते मिहिरसमे सूर्यसदृशे कुण्डले, तयो: शोभा यस्य तम्। तां विनाऽऽभरणशोभाऽपि भारवहेति ध्वनि:। यथा [१०] सूर्यदर्शनेन [११] कमलप्रकाश:

[१२]तथा श्रीराधावदनसूर्यप्रदर्शनेन श्रीकृष्णवदनकमलप्रकाशो जात इति [१]प्रेमपराकाष्ठा दर्शिता। कीदृशं हरिम्? स्मितरुच्या ईषद्धास्यकान्त्या रुचिरो मनोहरस्तथा समुल्लसितो [२] राधाधरपानोत्कम्पितो योऽधरपल्लवस्तेन कृतो राधाया रतिलोभः सुरततृष्णा येन तम्। [३] यथा कमलमण्डले सूर्यस्य प्रीतिस्तथा [४] श्रीराधामुखे कृष्णस्य सुरतेच्छेति ध्वनिः। अनेन श्रीराधायामेव तस्य रतिलोभः सूचितो नान्यत्र ।।५।।

१,२.नास्ति-ड.३.रति-क.४.राधायां-क.५.तः६.पर्यन्तं नास्ति-क.ल.म. ७,८.नास्ति-ड.९.शकुनदर्शने शकुन राज्यादिप्रपञ्चम्-ड.१०.सूर्यदर्शनकमल-प्रकाशोपरत्त–अ.ब.११.कमलस्य-ग.१२.तः

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५।। वदनेति। [५]पुनः [६] कथम्भूतम्? वदनकमलस्य परिशीलनाय प्रकाशनाय मिलिते ये मिहिरसमे [७] सूर्यसदृशे कुण्डले ताभ्यां शोभा यस्य। पुनः [८] कीदृशम्? स्मितरुच्या ईषद्धास्यदीप्त्या[९]रुचिरोऽपि समुल्लसितो [१०]राधाधरपानोत्कण्ठाया ईषत्कम्पितोऽधरपल्लवः तेन कृतो राधायाःरतिलोभः सुरतेच्छा येन।।५।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५।। वदनेति। वदनकमलं मुखमेव पद्मं तस्य परिशीतलं शैत्यं तदर्थं मिलितः प्राप्तः मिहिरः सूर्यः तस्य समे च ते कुण्डले च ताभ्यां शोभा यस्य तम्। अत्र मिहिरस्य कमलमिलितत्वस्य कदाऽप्यसम्भवात् तद्योगकथनाद्भूतोपमा। वदनकमल-रूपकसङ्कीर्णा। न च मिहिरस्य स्वतस्सिद्धत्वेऽपि शीतलमिलितत्वेन सम्भावनादुत्प्रेक्षेवेति वाच्यम्। समशब्दस्य सादृश्यवाचकस्य सत्वादुपमैव। स्मितरुचिरेव मन्दहास कान्तिरेव कुसुमं तेन समुल्लसितः प्रकाशितः अधर एव पल्लवः तेन कृतः जनितः रतौ लोभः अभिलाषः येन तम्। एतद्दर्शनेन कामोद्रेको भवतीति भावः। अत्राधरे पल्लवारोपत्वात् रूपकालङ्कारः। तदवयवस्मितरुचौ कुसुमत्वारोपात्सावयवः।।५।।

१.पर्यन्तं नास्ति-अ.ब.२.नास्ति-अ.ब.३.यथा सूर्यमण्डले कमलप्रीतिः-इ.फ.ग.ह.ज.४.नास्ति-अ.ब.५,६.नास्ति-क.ल.म.७,८.नास्ति-ड.९.रुचिरसमुल्लसितो-क.१०.राधाधरपानोत्कम्पितो योऽधरपल्लवस्तेन-क.ल.म.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। वदनेत्यादि। पुनः किंविधम्? वदनमेव कमलं तस्य परिशीलनाय सम्पर्काय मिलितस्य समागतस्य मिहिरस्य सूर्यस्य समाकुण्डलशोभा यस्येति विग्रहः ।पुनः किंविधम्? स्मितरुचिरेव कुसुमं तेन योऽसौ समुल्लसितोऽधरपल्लवस्तेन कृतो रतौ च.....नार्थात् युवतीनां लोभः कुसुमयुक्तः पल्लवो हरति लोभं जनयति उद्दीपकत्वादिति ध्वनिः।।५।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५।। पुन: कीदृशं ? वदनमेव कमलं तस्य प्रकाशनाय मिलिताभ्यां सूर्य्यसदृशाभ्यां कुण्डलाभ्यां शोभा यत्र तम्। तथा स्मित एव रुचिस्तया रुचिर: समुल्लसितश्च योऽधरपल्लवस्तेन जनितस्तस्य रतिलोभो येन तम्।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।। वदनेति। वदनमेव कमलं तस्य परिशीलनाय, सौगन्ध्यसौन्दर्यादि अवकलनाय एव एकैकेनापि पर्याप्ति: स्यादित्यात्मानं द्विधाकृत्य एव मिलितौ सङ्गतौ यौ मिहिरौ सूर्यौ तत्समाभ्यां, तत्प्रतिमाभ्यां कुण्डलाभ्यां शोभा यस्य तम्। बन्धुसमागमात् कमलस्याधिकोल्लासस्यौचित्यात् अभूतोपमा। किं च स्मितेन दरहसितेन या रुचि: कान्तिस्तया रुचिरं मनोहरं यथा स्यात्तथा, समुज्ज्वलितं प्रक्षालितं यदधरपल्लवं, तेन कृतो निष्पादितोस्तौ चुम्बनादिक्रीडाविषये राधाया लोभो लालसा येन तम्।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। वदनकमलेति; अत्र पुन: श्रीकृष्णस्य वदनकमलशोभा श्रीराधाया: रतिवर्द्धनाय प्रभवति। श्रीकृष्णस्य मुखकमलेन परिशीलनं मिलितं मिहिरसम सूर्यसम तस्य कुण्डलशोभा कर्णभूषणयो: कान्ति: समग्रं मुखकमलं परित: शोभा वर्द्धते। तव रुचिरं सुन्दरं स्मितहास्यं समुल्लसिताधरपल्लवं समुल्लसितं प्रमुदितं विशेषेण विकशिताधरपलवं पत्रं रतिलोभं शृङ्गाराय लोभं जनयति। संभोगतृष्णामुत्पादयति। शृङ्गारान्ते ताम्बुलजन्य रागरञ्जिजाधरोऽपि उज्ज्वलो भवति। उज्जलो मधुर: रस:। तेन शृङ्गारार्थं पुन: पुनरिछा उच्यते तद्यथा,

चुम्बिज्जइ असहुत्तं अवरुन्धिज्जइ वन्धि सहस्रहत्तं वि।
रमिअ पुणो वि रमिज्जइ पिए जणे णत्थि पुणरुत्त्वम्।
चुम्बनालिङ्गनरतिप्रभृतिषु पुनरुक्तिर्न दोषाय भवति।।५।।

**६-शशिकिरणच्छुरितोदरजलधरसुन्दरसकुसुमकेशम्।**
**तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशम्।। हरि०।।६।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। शशिकिरण:च्छुरितम् भक्षितम् उदरं यस्य जलधरोऽन्यपदार्थ:। शशिकिरणोच्छुरितादरश्चासौ जलधरश्चेति कर्मधारय:। तद्वत् सुन्दरा: कुसुमसुकुमारा: केशा यस्येति विग्रह:। अत्र पुष्पस्य शशिकिरणेन केशस्य जलधरेण च साम्यम्। तिमिरेत्यादि।

तिमिरे यदुदितं विधुमण्डलं तद्वन्निर्मलश्चन्दनतिलकनिवेशो यस्येति विग्रहः। अत्र कृष्णललाटस्य तिमिरेण चन्दनतिलकस्य विधुमण्डलेन साम्यम्।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। अपि च, शशिकिरणेति। किंभूतं हरिम्? शशिकिरणैः कर्बुरितोदरजलधरवत्सुन्दराः सकुसुमाः केशा यस्य। पुनः किंभूतम्? तिमिरेऽन्धकारे उदितं यद्विधुमण्डलं तद्वन्निर्मलो यो मलयजतिलकस्तस्य निवेशो यत्र आभ्यां विशेषणाभ्यां शशिकिरणमिलिताभ्रशोभया अनु च सतिमिरनवोदितचन्द्रशोभया च सुरतान्ते स्रस्तधम्मिल्लत्वं स्वेदाम्बुपूरैः किंचिन्मृष्टविशेषकत्वं मम भविष्यतीति मानसः प्रोत्साहः सूचितः।।६।।

## (३) जगद्धरकृत- सारदीपिका

।।६।। शशिकिरणेति कीदृशं हरि शशिकिरणेन चन्द्रदीप्त्याछुरितं मण्डितं सुन्दरमभ्यन्तरं यस्य जलधरस्य मेघस्य तद्वत्सुन्दराः पुष्पसहिताः केशाः यस्य तम् अत्र केशानां श्यामतया मेघसाम्यं तत्रस्थकुसुमानां च मेघान्तश्चारुचन्द्रकिरणसाम्यं बोध्यं पुनः कीदृशं तिमिरेऽन्धकारे उदित उत्थितयो विधुमण्डलश्चन्द्रबिम्बस्तद्वन्निर्म्मलं मलयजतिलकं चन्दनबिन्दुस्तस्य निवेशोऽवस्थानं यत्र तं श्रृङ्गारिणां नागराणां तिलकं वर्तुलमेवेति तस्य चन्द्रसाम्यं चन्द्रोदये तिमिरस्यासम्भवाद्भूतोपमेयं बोध्या।।६।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६।। पुनः कीदृशम्? शशिकिरणेति। शशिकिरणैश्चन्द्रकिरणैश्छुरितं संबद्धमुदरमभ्यन्तरं यस्य तादृशो यो जलधरो मेघस्तद्वत्सुन्दराः सुकुमाराः कुसुमं पुष्पं तत्सहिताः केशा यस्य तम्। अत्र केशानां श्यामतया जलधरसाम्यम्। तत्र स्थितकुसुमानां मेघान्तरितचन्द्रकिरणसाम्यं बोध्यम्। पुनः कीदृशम्? तिमिरेऽन्धकारे उदितं प्रकटीभूतं यच्चन्द्रबिम्बं तद्वन्निर्मलस्य मलयजतिलकस्य निवेशो विन्यासो यत्र तादृशम्। अत्र कृष्णस्य गाढान्धकारसाम्यं ललाटस्थमण्डलाकृतितिलकस्य चन्द्रमण्डलसाम्यम्। पूर्णचन्द्रबिम्बस्थितिकाले तिमिरसाम्यस्यासंभवादभूतोपमा ज्ञेया।।६।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६।। शशीति। शशिकिरणैश्चन्द्रमयूखैः च्छुरितं ब्याप्तम्। उदरमान्तर प्रदेशो यस्य स चासौ जलधरो नीलमेघश्च तद्वत् सुन्दराः रमणीयाः कुसुमसुकेशाः प्रसूनाधिवासित यस्य तादृशम्। हिमकरकरनिकरसहोदरकुसुमाधिवासितनीलनीरदनिभशिरोरुह निकुरम्बनिर्मितकामुकवेशोचितकेशपाशधारिणमित्यर्थः। किञ्च तिमिरे सति उदितो यो बिधुश्चन्द्रस्तस्य मण्डलं विम्बं तद्वन्निर्मलं यन्मलयदतिलकं चन्दनकृतवर्त्तुल पुण्ड्रं

तस्य सन्निवेशो रचनाविशेषो यस्मिन् तादृशं मिमिरोपलक्षित केशसमीप विराजमानचन्द्र-कल्पचन्दनतिलकशालीनमित्यर्थ: ।।६ ।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।६ ।। पुन: कीदृशं तत्राह, शशिकिरणच्छुरितोदरश्चन्द्रद्युति-सम्बद्धान्तरो यो जलधर: मेघस्तद्वत् सुन्दरो मनोहर: सकुसुम: कुसुमसहित: केश: कुन्तलकलापो यस्य तादृशम्। पुन: कीदृशम् ? तिमिरे तमसि उदित उद्भूतो यो विधुमण्डल: चन्द्रबिम्बं तद्वन्निमलं यच्चन्दनतिलकं तस्य निवेशोऽवस्थितियत्र तादृशमित्यर्थ:। यद्यपि चन्द्रोदये तिमिरावास्थत्यसम्भवादनुपन्नमेतत्, तथाप्यद्भूतोपमेयमिति तात्पर्यम्। श्रृङ्गारिणा गोपालानाञ्च तिलकं वर्त्तुलमेव भवतात्ि तस्य चन्द्रेणा तस्य निवेशोऽवस्थितियत्र तादृशमित्यर्थ:। यद्यपि चन्द्रोदये तिमिरावस्थित्यसम्भवादनुपन्नमेतत्, तथाप्यद्भूतोपमेय-मिति तात्पर्यम्। श्रृङ्गारिर्णं गोपालानाञ्च तिलकं वर्तुलमेव भवतीति तस्य चन्द्रेण साम्यमित्यवधेयम्। तदाह, त्रिपुण्ड्रं ब्राह्मणै: कार्य क्षत्रियैरर्द्धचन्द्रकम्। वैश्यैरेकाङ्गुलि-ग्राह्मं सामान्यैर्वर्तुलाकृतिरि'ति ।।६ ।।

### (७) वनमालि भट्टकृत-सञ्जीवनी

।।६ ।। (शशीति।) कीदृशम् ? शशिकिरणैश्छुरितं कर्बुरितमुदरे यस्य जलधरस्य तद्वत् सुन्दरा: [३] सुकुसुमा: केशा: यस्य तम्। पुष्पाणां चन्द्रकिरणै: साम्यम्। केशानां बलाहकसाम्यम्। एतेन नायकस्य नायिकादर्शनेनातिशृङ्गारित्वमुक्तम्। कीदृशम् ? तिमिरेऽन्धकारे उदितं यद्विधुमण्डलं चन्द्रबिम्बं तद्वन्निर्मलो यो मलयजतिलकस्तस्य निवेशो रचनाविशेषो यस्य तम्। तिलकस्य वर्तुलत्वात् पूर्णचन्द्रसाम्यम्। एतेन नायकस्य तिलकशोभोक्ता ।।६ ।।

### (८) नारायण पण्डितकृत-पदद्योतनिका

।।६ ।। शशीति। शशिकिरणेन चन्द्रदीप्त्या छुरितं व्याप्तं उदरं मध्यं यस्य जलधरस्य तद्वत्सुन्दरा: [४] सपुष्पा: केशा: यस्य [५] तम्। पुष्पाणां चन्द्रदीप्त्या साम्यम्। तिमिरेऽन्धकारे उदितं[६]विधुमण्डलं[७]चन्द्रबिम्बं तद्वन्मलयजतिलकनिवेश: चन्दनतिलकरचनाविशेषो यस्य। तिलकस्य च वर्तुलत्वाच्चन्द्रसाम्यम् ।।६ ।।

### (९) कृष्ण पण्डितकृत-जयन्ती

।।६ ।। शशीति। शशिकिरणाश्चन्द्राकरा: तै: छुरितं व्याप्तं उदरं मध्यभागो यस्य स चासौ जलधर: तद्वत्सुन्दर: रमणीय: कुसुमैर्युक्त: केश: यस्य तम्। तृतीयातत्पुरुषेण कुसुमसंवलिततत्वं सिद्ध्यति। उपमानकिरणच्छुरितेति ज्ञापनान्न द्वन्द्व:। अत्रापि

कल्पितोपमा। सुन्दरशब्दस्य अर्थतः सादृश्यवाचकत्वात्। शुभ्रसंवलिततया मालात्व-साधारणधर्मस्यानुपादानाद्धर्मलुप्ता। छुरितमिति छकारे परे पूर्वह्रस्वस्य तुगागमः ''छे च'' (पा. सू. ६.१.७३) इति सूत्रेण। तेन णकारगुरुत्वादष्टाविंशतिमात्राः सिद्ध्यन्ति दले। तिमिरे अन्धकारे उदितं विधुमण्डलं चन्द्रबिम्बं तद्वन्निर्मलः स्वच्छः अवदातः मलयजतिलकः धृतचन्दनकृतविशेषः तस्य निवेशः आकृतिविशेषो यस्य तम्।

१.कुसुमकेशे-अ.ब.२.निमेषे-अ.३.सकुसुमाः-इ.फ.ज.ह.ज.कुसुमकेशाः-ग.४.नास्ति-क.५.नास्ति-ड.६.नास्ति-ड.७.चन्द्रमण्डलं-ड.

अत्रापि लुप्तोपमा। धर्मस्य कृष्णवर्णमध्यगश्वेतत्वस्यानुपादानात् वाचकाभावाच्च लुप्तोपमा समासगा।।६।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। शशिकिरणेत्यादि। पुनः किंविधम्? शशिकिरणै श्च्ररितम् म्रक्षितम् उदरं यस्य ईदृशो जलधर इव सुन्दराः सकुसुमाः पुष्पसहिताः केशा यस्येति विग्रहः। अत्र केशस्य मेघेन पुष्पस्य शाशिकिरणेन साम्यम। अन्धकारे उदितं यद्विधोर्मण्डलं तद्वन्निर्मलो मलयजतिलकनिवेशश्चन्दनचित्रविन्यासो यस्येति विग्रहः। अत्र कृष्णललाटस्य तिमिरेण चन्दनतिलकस्य विधुमण्डलेन साम्यम्।।६।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६।। पुनः कीदृशं? शशिकिरणैर्व्याप्तं उदरं यस्य, जलधरस्य, स इव स इव सुन्दराः सकुसुमाः यस्य तम्। अत्र केशानां मेघेन पुष्पानां इन्दुकिरणेन च साम्यम्। तथा तिमिरे उदितं यद् विधुमण्डलं तद्वन्निर्मलश्चन्दनतिलकनिवेशो यस्य तम्। अत्र ललाटस्य तिमिरेण तिलकस्य इन्दुमण्डलेन च साम्यम्। इयमप्यद्भुतोपमा।।६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६।। शशिति। पुनः कीदृशम्। शशिकिरणैः छुरितं व्याप्तमुदरं मध्यदेशो यस्य तादृशो यो जलधरः सुस्निग्धमेघस्तद्वत् सुन्दरा मालत्यादिकुसुमयुक्ताः सृष्ठु केशा यस्य तम्। केशानां जलधरेण कुसुमानां शशिकिरणेन साम्यम्। किं च तिमिरे स्थिते सति उदितं यत् विधुमण्डलं, चन्द्रबिम्बस्तद्वन्निर्मल उज्ज्वलः मलयजतिलकस्य वर्त्तुलचन्दनतिलकस्य निवेशो रचनासौष्ठवं यस्य तम्। अभूतोपमा।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। शशीकिरणेति; पुनः कीदृशो हरिः? शशिकिरणैः कर्व्वुरितोदरजलधरसुन्दराः अर्तात् केशराशिः मेघमालैव तस्मिन् कुसुमानि जलधरोदरे शशिकिरणैव भासते।

पुन: किं भूतं तिमिरेऽन्धकारे उदितं यद् विधुमण्डलं चन्द्रमण्डलमिव तद्वत् निर्माणो वा यो मलयजतिलकस्तस्य निवेशो यत्र आभ्यां विशेषणाभ्यां शशिकिरणमिलिताभ्रशोभना अनु च सतिमिर नवोदितचन्द्रशोभया च सुरतान्ते स्रस्तधम्मिल्लत्वं स्वेदाम्बुपुरै: किञ्चिन् मृष्टविशेषकत्वं मम भविष्यतीति मनसि प्रोत्साह: सूच्यते।।६।।

**७-विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरम्।**
**मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम्।। हरि० ।।७।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। विपुलानां पुलकानां भरेणातिशयेन दन्तुरितं विषमीकृतं क्वचिदानतं क्वचिदुन्नतमिति यावत्, पुन: कीदृशं रतिकेलिकलाभिरधीरं, मणिगणेत्वादि। मणिगणानां किरणसमूहेन समुज्ज्वलं यद्भूषणं तेन सुभगं सुश्रीकं शरीरं यस्येति विग्रह: ।।७।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।७।।अपि च, विपुलेति। किंभूतं हरिम्? विपुलपुलकभरैर्दन्तुरितं रोमाञ्चितम्। अपि च, उक्तलक्षणाभी रतिकेलिकलाभिरुपलक्षितम्। अत एव तदर्थमधीरम्। अपि च किंभूतम्? मणिगणकिरणसमूहसमुज्ज्वलानि यानि भूषणानि तै: सुभगं शरीरं यस्य। एतेन भविष्यत्सुरतान्ते भूषणपरिग्रहो द्योत्यते। 'सुचिर' इत्यादै अभिसारिका प्रगल्भा नायिका। '**हारावली**' इत्यादि आसर्गान्तं मध्या नायिका। तल्लक्षणं- 'तुल्यलज्जास्मरा मध्या मोहान्तसुरतक्षमा'।।७।।

### (३) जगद्धरकृत- सारदीपिका

।।७।। विपुलेति कीदृशं हरि विपुलोऽधिको य: पुलकभरो रोमाञ्चातिशयस्तेन दन्तुरितं निम्नोन्नतं व्याप्तमित्यर्थ: पुन: कीदृशं रतिकेलिकलाभि: सुरतक्रीडाकथाभिरधीरं चञ्चलं पुन: कीदृशं मणिगणानां किरणसमूहेन समुज्वलं दीप्यमानं यद्भूषणं तेन सुभगं सुन्दरं शरीरं यस्य तं तथा।।७।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।।पुन: कीदृशम्? विपुलेति। विपुलो य: पुलकभरो रोमाञ्चातिशयस्तेन दन्तुरितं व्याप्तम्। पुन: कीदृशम्? रतिकेलिकलाभिश्चुम्बनादिविशेषचातुरीभिरधीरं चञ्चलम्। पुन: कीदृशम्? मणिगणानां मणिसमूहानां किरणसमूहेन समुज्ज्वलानि यानि भूषणानि मुकुटाङ्गदमञ्जीरादीनि तै: सुभगं शरीरं यस्य तम्। 'निम्नोन्नततया व्याप्तं दन्तुरं कथ्यते बुधै:।' इति **धरणि**:।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। विपुलेति। विपुलास्तदङ्गजाः पुलका रोमोद्गमाः तेषां भरो भारः तेन दन्तुरितं निम्मोन्नतं राधाविलोकनजनितसात्विकोदयमहिम्ना सर्वाङ्गीणरासोद्गममित्यर्थः। दन्तुरितेत्यत्र ''दन्त उन्नत उरच्'' (५।२।१०६) इति मत्वर्थे उरचित्कर्मणि क्तः। किञ्च, रतिकेलयः सुरतक्रीडाः तासु कलः कामशास्त्रप्रसिद्ध-षोडशकलाः ताभिः तदर्थं वा कलापरीक्षार्थं सर्वदा प्रवर्त्तितशीलमित्यर्थः। कलास्वरूपं तु **रतिरहस्ये,**

अङ्गुष्ठे पदमूल जानु जघने नाभौ च वक्षःस्थले
कुक्षौ कर्ण्णं कपोलदन्तवसने नेत्रालके मूर्द्धनि।
शुक्लाशुक्लविभागतोमृगदृशामङ्गेष्वनङ्गस्थिति-
रुर्ध्वाधोगमनेन वामपदतः पक्षद्वये लक्षयेत्।
ऊर्ध्वोरः स्थलबामदक्षिणकरे वक्षोरुहोरुद्वये
नाभौ गुह्यललाटजाठरकटीपृष्ठे तु तिष्ठत्यसौ।
कक्षश्रोणिभुजेषु च प्रतिपदा मारभ्य कृष्णाधमः
श्वेतायाप्रभृति क्रमेण मदनो मूर्धानमारोहति।।
आङ्गेष्वेषु मृगीदृशां मनसिजप्रस्तावनापण्डिता-
माज्ञा षोडश चिन्तयन्ति विपुल ज्योतिस्फुलिङ्गा कृतिरिति।।

किञ्च, मणिगणस्य रत्नपुञ्जस्य किरणसमूहेन मयूखसमूहेन समुज्ज्वलैर्भासमानैः भूषणरङ्गादिभिः सुभगं विराजमानं शरीरं यस्य तादृशम् अनेनालम्बनालङ्करण रूपोद्दीपकस्य सम्पत्तिरुक्ता। तदुक्तं नूपुराङ्गदहारादितदलङ्करणं मतमिति। एतादृशं हरिं ददर्श इत्यन्वयः।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। पुनः कीदृशं तत्राह, विपुलपुलकभरेण बृहद्रोमाञ्चातिशयेन दन्तुरितं व्याप्तम्। 'निम्नोन्नते तथा व्याप्ते दन्तुरं कथ्यते बुधैरि' ति धरणिः। पुनः कीदृशम्? रतिकेलिकलाभिः सुरतक्रीडाकौतुकैरधीरं चञ्चलम्। तथा च प्रकृत्या धोरोऽपि तदा रतिक्रीडाकौतुकेनाधीर इति कृष्णस्य सन्नायकत्व° सूचितम्। तदा, 'प्रियवाक् सुन्दरः शिल्पी दयावान् साहसान्वितः। कुलीनञ्च युवा धीर उत्तमो नायको मत' इति। क्रीडा काले चपलता युक्तैव। तदुक्तम, 'वैजात्यं सुरतेषु चे'ति। + पुनः कीदृशम्? मणिगणकिरणसमूहेन समुज्ज्वलं यद् भूषणं तेन सुभगं शरीरं यस्य तादृशम्।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७।। (विपुलेति।) पुनः कीदृशम्? विपुलैर्विस्तीर्णैः पुलकभरैः[१] रोमाञ्चसमूहैर्दंतुरितं व्याप्तम्।[२] अनेन नायकस्य नायिकादर्शनेन रोमाञ्च उक्त इति ध्वनिः। कीदृशम्? [३]रतिकेलिकलाभिः [(४)] सुरतक्रीडाभिः चुम्बनालिङ्गनादिकामकलाचातुरीभिरधीरं चञ्चलम्। अथ वा रतिकेलिकलाभिरुपलक्षिता श्रीराधा तस्या दर्शनेनाधीरम्। एतेन नायकस्य नायिकादर्शनेनाति[५]व्याकुलतोक्ता। पुनः कीदृशम्? मणिगणानां आभरणखचितरत्नसमूहानां [६]किरणसमूहैः समुज्ज्वलानि[७] देदीप्यमानानि[८] भूषणान्याभरणानि तैः सुभगं सुन्दरं शरीरं यस्य तम्। अथ वा राधाया मणिगणकिरण-समूहेन समुज्ज्वल[९] भूषणैः सुभगं शरीरं यस्य तम्। अथ वा श्रीराधाङ्गान्येव मणिगणकिरणसमूहसमुज्ज्वल[१०]भूषणानि तैः सुभगं शरीरं यस्य तम्।।७।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७।। विपुलेति। विपुलो बहुलो यः पुलकभरो रोमाञ्चातिशयः तेन दन्तुरितं[११]व्याप्तं निम्नोन्नतमित्यर्थः। रतिकेलिकलाभिः[(१२)]चुम्बनालिङ्गनादिभिर्विशेषचातुरीभिः अधीरं चञ्चलम्। मणिगणानाम् रत्नसमूहानां किरणसमूहे समुज्ज्वलानि दीप्यमानानि भूषणानि तैः सुभगं शरीरं यस्य।।७।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।७।। विपुलेति। विपुलाः उच्चैस्तनाः पुलकाः रोमाञ्चाः तेषां भरः समुदायः तेन दन्तुरितं कण्टकितम्। रतिकालीनाः केलिकलाः रतिकेलिकलाः बन्धकौशल्यादयः ताभिः अधीरम् चञ्चलम्। मणिगणानां निकराणां किरणानां स्वकान्तीनां समूहैः समुज्ज्वलानि देदीप्यमानानि भूषणानि कटककेयूराङ्गदादीनि तैः सुभगं सुन्दरं शरीरं यस्य तम्। अत्र रत्नखचितभूषणसमृद्धिवर्णनादुदात्तालङ्कारः। ''तदुदात्तं भवेद्यत्र समृद्धं वस्तु वर्ण्यते'' **(प्र.रु.पृ. ३३६)** इति लक्षणात्।।७।।

१.रोमाञ्चितसमूहैः-इ.फ.ग.ह.ज. २.अनेनापि-इ.फ.ग.ह.ज. ३.केलिकलाभिः-अ.ब. ४.सुरतक्रीडायां-इ.फ.ग.ह.ज. ५.व्याकुलतेति ध्वनिः-इ.फ.ग.ह.ज. ६.किरणैःसमूहैः-ग. ७.दीप्य-मानानि-इ.फ.ग.ह.ज. ८.भूषणानि अङ्गाभरणानितैः-फ.ज.ह. ९.भूषणं-फ.ज. १०.भूषणैः-अ.ब.इ. ११.व्याप्तमित्यर्थः-ड. १२.चुम्बनालिङ्गनादिविशेषचातुरीभिः-क.ल.म.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। पुनः किंविधम्? विपुलेति। विपुलानां पुलकानां रोमाङ्कुराणां भरेण अतिशयेन दन्तुरितं, विषमीकृतं क्वचिदानतं क्वचिदुन्नतमिति यावत्। पुनः किंविधम्? रतौ

केलि क्रीडा तस्याः सम्बन्धिन्यो याः कलाश्चतुः षष्टि रूपास्ताभिरधीरं चञ्चलम्। पुनः किंविधम्? मणिगणस्य किरणसमूहेन समुज्ज्वलं दीप्यमानं यद् भूषणं तेन सुभगं सश्रीकं शरीरं यस्येति विग्रहः।।७।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७।। पुनः कीदृशं? विपुलानां पुलकानामतिशयेन विषमीकृतं क्वचिदुन्नतं क्वचिदवनतं इति यावत्, अत एव तद्दर्शनात् हृद्युद्गतरतिकेलिकलाभिः अधीरं तथा मणिगणकिरणानां समूहेन समुज्ज्वलैः भूषणैः सुन्दरं शरीरं यस्य तम्।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। विपुलेति। पुनः कीदृशम्, विपुला बहुला ये पुलका रोमाञ्चास्तेषां भरोऽतिशयस्तेन दन्तुरितं प्रफुल्लनीपकुसुमवत् कृतमित्यर्थः। कर्मणि क्तः। अत एव रतिकेलिः कामक्रीडा तस्याः कला कौशलं ताभिरधीरं चञ्चलं, तद्विषये अत्युत्सुकमित्यर्थः। किं च मणिगणानां ये किरणसमूहास्तैः सम्यगुज्ज्वलानि, जाज्ज्वल्यमानानि यानि भूषणानि तैः सुभगं सुन्दरं शरीरं यस्य तम्।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। विपुलेति, पुनः किंभूतं हरिम्? तस्य अष्टसत्वविकारेषु पुलकस्योपस्थितिः विपुलेन प्राचुर्येण भवति। शरीरं रोमाञ्चितमतः दन्तुरितं उच्चावचयमनुभूयते। अनेन लक्षणेन रतिकेलिः शृङ्गारलीला उपलक्षणेन गम्यते। अतः तदर्थं रतिनिमित्तमधीरम्। पुनः किम्भूतम्? मणिगणकिरणसमूहसमुज्जलानि यानि अर्थात् मणिना भूषणेन तस्मादुत्थितरश्मयः तस्य शरीरस्य सुभगत्वं सुन्दरत्वं द्योतयति। एतस्मात् भविष्यति। रत्यन्ते भूषणपरिग्रहो द्योत्यते। सुचिरं नाम वहुकालं द्योतमाने शरीरालोके अभिसारिकाः सौख्येनागमिष्यन्तीति। सुचिरं इत्यादौ **राणाकुम्भ**स्यात्र अभिसारिकानायिका तथा हारावली इत्यनेन मध्यानायिकाप्रसङ्गः न युज्यते। भिन्नप्रसङ्गत्वात्। इति।।७।।

**८-श्रीजयदेवभणितविभवद्विगुणीकृतभूषणभारम्।**
**प्रणमत हृदि सुचिरं विनिधाय हरिं सुकृतोदयसारम्।। हरि० ।।८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। हे जना! हृदि बिनिधाय सुचिरं यथास्यादेवं हरिं प्रणमतेति योजना। कीदृशं, सुकृतोदयसारं, पुण्योत्पत्तिनिमित्त सारभूतमित्यर्थः। कीदृशं, श्रीजयदेवभणितविभव, द्विगुणीकृतभूषणभारं श्रीजयदेवभणितमेव विभवो वित्तं तेन द्विगुणीकृतो भूषणभारो यत्रेति विग्रहः। स्वयमलं कृतःजयदेवे वचनवित्तेनाप्यलङ्कृत इत्यर्थः।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।।अपि च, श्रीजयदेवेति। हे जनाः! हरिं सुचिरं हृदि विनिधाय प्रणमत। किंभूतं हरिम्? सुकृतोदये सारम्। पुनः किंभूतम्? श्रीजयदेवभणितो यो विभवः सामर्थ्यं तेन द्विगुणीकृतां भूषणभां शोभां ऋच्छतीति। अथवा, द्विगुणीकृतां भूषणभां रातीति। एतत्कृत्वा उक्तेष्टदो भवतीति। अथवा, श्रीजयदेवभणितेन विभवन्विभुर्भवन्द्विगुणीकृतो भूषणानां भारः समूहो येन। जयदेवभणितं श्रुत्वा भूषणानामनादरोऽभूदित्यर्थः।। 'क्रमेण नट्टकेदारश्रीरागस्थानगौडकाः। धोरणी मालवीयश्च वराटी मेघरागकः।। मालवश्रीर्देव-शाखो गौण्डकृच्चाथ भैरवी। धन्नासिका वसन्तश्च गुर्जरी च मह्लारकः।। ललितः सप्तदशमो रागास्तावन्ति च क्रमात्। पदानि तेषु तालाः स्युरितस्तन्नाम कीर्त्यते।। आद्यत्रिसप्तदशमद्वादशे द्रुतमण्टकाः। द्वितीये नवमे चैकादशे चैव त्रयोदशे।। पदे पञ्चदशे सप्तदशे रूपक ईरितः। चतुर्थे प्रतितालव्या द्रुतालः पञ्चमे स्मृतः।। त्रिपुटः षष्ठाष्टमयोः स्याद्रुतप्रतिमण्ठकः। चतुर्दशे षोडशे च भद्रः स्यात्प्रतितालकम्।। मध्यमादौ पुनर्मुक्तिः शृङ्गारः साभिलाषयोः। स्त्रीपुंसयोरुत्तमस्य नायकस्योपवर्णनम्।। कैशिकीं रीतिमाश्रित्य पदानां स्वस्वनामता। छन्दः स्वेच्छाविरचितं रूपके यत्र दृश्यते। स रागश्रेणिनामायं प्रीतिकृत्कमलापतेः।।' इति सानन्दगोविन्दरागश्रेणिकुसुमाभरणनामा द्वाविंशतितमः प्रबन्धः।।८।।

## (३) जगद्धरकृत- सारदीपिका

।।८।।श्रीजयदेवेति श्रीजयदेवस्य भणित विभवेन भाषित प्रपञ्चेन द्विगुणीकृतस्यालङ्कारं चिरकालं हृदि विनिधाय स्थाप्य कथंभूतं हरि सुकृतस्ययो उदयस्तस्य सारं यद्वा सुकृतोदय एव सारोधनं यस्मात्तम्।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।।श्रीजयदेवेति। हे जनाः! हरिं प्रणमत। किं कृत्वा? सुचिरं बहुकालं व्याप्य हृदि चित्ते विनिधाय। कीदृशम्? सुकृतोदयस्य पुण्योदयस्य सारं सारभूतम्। यद्वा, सुकृतोदय एव सारो धनं यस्मात्तम्। पुनः कीदृशम्? श्रीजयदेवस्य भणितविभवे वाग्विभवे द्विगुणीकृतभूषणभारोऽलंकारसमूहो येन तम्। जयदेवसरस्वती स्वयमेवो-त्प्रेक्षालंकारवती। भगवद्गुणैस्तु वर्णनीयैः सुतरामलंकृतेति भावः।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।।श्रीजयदेवेति। हे जनाः श्री जयदेवेन भणितं यद्गीतम्, अथवा श्रीजयदेवस्य भणितं गीतं तस्य विभवेन उत्कर्षेण द्विगुणीकृतः द्विधासम्पन्नः भूषणभारोऽलङ्कार भारो

यस्य तादृशं सहजाङ्गदादिभूषण: कीर्त्तिप्रकाशगीर्भूषणश्च ताभ्यां भारत्वमवगन्तव्यम्। किञ्च सुकृतोदयस्य पुण्यजन्मन: सारो वलं यस्मात् सकलसुकृतफलभूतमित्यर्थ:। अथवा सुकृताय धर्माय उदयसार: जन्मस्थैर्य्यं यस्य तादृशं सकल धर्म स्थापकमित्यर्थ:। तदुक्तं, ''धर्मसंस्थापनार्थाय सम्भवामि युगे युगे'' इति। तादृशं हरिं सुचिरं बहुकालं विनिधाय विन्यस्य प्रजपत अनेन गीतेन हरिं स्तुवतेत्यर्थ:। प्रणमतेति क्वचित्पाठ:। तदा हरिं हृदि निधाय नमस्कुरु इत्यर्थ:।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। कीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं प्रकृतगीतमुपसंहरति। हे जना:! सुचिरं बहुसमयं हरिं कृष्णं प्रणमत नम: कुरुत। कीदृशम्? जन्मान्तरकृतेन पुण्यकर्मणा उदय उद्भवो येषां ते सुकृतोदया: पुण्यात्मान: पुरुषा:, तेषां सारं धनमिव। तत्राह, 'सारो बले स्थिरांशे च न्याय्ये नीरे धनेऽपि चेति विश्व:। पुन: कीदृशम्? श्रीजयदेव-भणितविभवेन भाषितप्रपञ्चेन द्विगुणीकृतो भूषणस्य अलङ्कारस्य भारो येन तम्। अलङ्कारवत्या: जयदेवकविताया: साहित्येनालङ्कारस्य द्वैगुण्यं भवत्येवेति भाव इति **जगद्धर:**। वस्तुतस्तु श्रीजयदेवेन भणितं विभवमैश्वर्यं यस्य स श्रीजयदेवभणितविभव:। द्विगुणीकृत: स्वशरीरसम्बन्धेन द्विगुणकान्तिजनकतया भूषणभारो येन स द्विगुणीकृत-भूषणभार:। श्रीजयदेवभणितश्चासौ द्विगुणीकृतभूषणभारश्चेति स तथा तमित्यर्थ:।।८।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।८।। [२]श्रीकृष्णस्य भजनं शिक्षयन् सर्वानुपदिशति, श्रीजयदेवेति। हे रसिका: सुचिरं[३]निरन्तरं हरिं साधूनां भजनानुसारेण [४]पापतापहरं हृदि विनिधाय हृदये आरोप्य प्रणमत। स एव भजनीयो नान्य इति नमत। [५]तन्नमनमेव सर्वं करिष्यतीत्युपदेश:। कीदृशम्? सुकृतस्य पुण्यस्योदयेन सारं प्राप्तिर्यस्य [६] तम्। [७]ऋ गताविति धातु:। हरिस्तु भजनसुकृतेन प्राप्यत इति[८]प्रसिद्धि:। पुन: कीदृशम्? श्रीजयदेवभणितस्य गीतस्य विभवेन सामर्थ्येन [९] जयदेव[१०]सरस्वत्या स्वगुणवर्णनेन चेति द्विगुणीकृतो भूषणभारोऽलङ्कारसमूहो येन। जयदेवसरस्वती स्वयमेवोपमालङ्कारवती भगवद्गुणैश्च सुतरामलङ्कृतेति भाव:।।१०।।

[११]इतिश्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीविन्यां श्रीगीतगोविन्दटीकायां द्वाविंश: प्रबन्ध:।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।८।। श्रीजयदेवेति। श्रीजयदेवभणितविभवे [१२]वाग्विभवे द्विगुणीकृतो भूषण-भारोऽलङ्कारसमूहो येन तम्। जयदेवसरस्वती स्वयमेवोपमोत्प्रेक्षाद्यलङ्कारवती [१३]भगवद्गुणस्तुतिवर्णने सुतरामलङ्कृतेति भाव:। एवम्भूतं हरिं कृष्णं सुतिरं हृदि [१४]विनिधाय प्रणमतेति भक्तान् प्रत्युक्ति:। कीदृशं[१५]हरिम्? भवजले भवाब्धौ यत्सुकृतं पुण्यं,

तस्योदयस्तेन सार: प्राप्तिर्यस्य तम्। हरिस्तु सुकृतोदयेन प्राप्यते। सृ गताविति [३] धातु: ।।१०।।

इति श्रीगीतगोविन्दव्याख्यायां नारायणपण्डितविरचितायां द्वाविंश: प्रबन्ध:।

१.भवजलसुकृतोदयसारम्-ड.२.श्रीकृष्णभजनं-इ.फ.ह.ग.ज.३.नितरां-इ.फ.ग.ह.ज. ४.पापहरं-ग.५.तत्र मनसेव-अ.ब.६.नास्ति-अ.ब.७.अ गताविति धातु:-अ.ब. ८.प्रसिद्ध-ग. ९.जयदेवस्य सरस्वत्या-ग.१०.सरस्वत्यो: स्वगुणवर्णनयोर्वेति-इ.सरस्वत्या स्वगुणवर्णनेन वेति-ग.सरस्वत्या स्वगुणवर्णनैर्वेति-फ.ह.ज.११.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज.१२.नास्ति-क.ल.म.१३.भगवद्गुणैस्तु वर्णनीयै:-क.ल.म.१४.निधाय-क.ल.म.१५.नास्ति-ड.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।८।।श्रीजयदेवेति।श्रीजयदेवेन भणितं परिभवद्विगुणीकृतभूषणभारं हृदि विनिधाय सुकृतोदयसारं हरिं सुचिरं प्रणमत ।।८।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्यख्यायां द्वाविंश: प्रबन्ध:।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयेत्यादि। हे वैष्णवजना: सुचिरं यथा स्यादेवं हृदि निधाय हरिं प्रणमतेति योजना। किंविधम्? सुकृतोदयसारं सुकृतस्य पुण्यस्य उदये सारं सारभूतम्। पुन: किंविधम्? श्रीजयदेवभणित मेवविभवो वित्तं तेन द्विगुणीकृत: भूषणभारो यस्मिन्निति विग्रह: स्वयमलंकृतो जयदेववचनवित्तेनाप्यलंकृत इत्यर्थ:। श्रीजयदेवभणितश्च विभवद्विगुणीकृतभूषणभार श्चेति वा समास:। भूषणभारस्य द्वैगुण्यं नाकामीमण्डनप्राय इति न्यायात्।।८।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।८।। भो: साधव: हृदि हरिं विनिधाय सुचिरं यथा स्यात्तथा प्रणमत। कीदृशं? पुण्यविशेषस्य य उदय: फलं तस्य सारभूतम्। तथा श्रीजयदेवभणितमेव विभवस्तेन द्विगुणीकृत: भूषणभारो यत्र तम्। यै: स्वयमलंकृतं ते अलङ्कारा: जयदेवस्य उपमादिवाग्विलासै: द्विगुणीकृता इत्यर्थ:।।८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। एवं वर्णनद्वारान्तराविर्भूतश्रीमूर्त्तिमाधुर्यानुभवोच्छलितानन्दभरोद्यत्कारुण्येन जनानुपदिशन् गीतमुपसंहरति।श्रीति, हे सन्तः। हरिं, माधुर्येण सकलचित्तहरं श्रीकृष्णं सुचिरं भावोदयपर्यन्तं प्रणमत। नमस्कुरुत। भावोदयानन्तरं स्वत एव स्फुरणादिति भावः। एवं कायेन तत्परतामुक्त्वा मनसापि तत्परत्वमाह, हृदीति। हृदि प्रणयवासिते मनसि विनिधाय विशेषेण स्थापयित्वा, वचसा तत्परत्वमाहश्रीति, कीदृशम्? श्रीजयदेवभणितस्य यो विभवो गुणालङ्कारयुक्ततया रचनोत्कर्षस्तेन द्विगुणभारो यस्य तम्। स्थितस्यालङ्कारस्य उपमाद्यलङ्कारयुक्तत्वेन वर्णितत्वात्तद्द्विगुणत्वम्। अत एतेन हरिं गायतेत्यभिप्रायः। पुनः कीदृशम् यतः सुकृतोदयस्य, भक्तिलक्षणपुण्यपरिपाकस्य सारं फलरूपम्। उक्तं च **हरिभक्तिसुधोदये,**

वाचा स्तुवन्तो मनसा स्मरन्त स्तन्वानमन्तोऽप्यनिशं न तृप्ताः ।
भक्ताः स्त्रवन्नेत्रजलाः समग्रमायुर्हरेरेव समर्पयन्ति ।।

किं च **श्रीभागवते,**

शृण्वन्ति गायन्ति गृणन्त्यभीक्ष्णशः स्मरन्ति नन्दन्ति तवेहितं जनाः।
त एव पश्यन्त्यचिरेण तावकं भव प्रवाहोपरमं पदाम्बुजम्।।३१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।।श्रीजयदेवेति; अत्र भणति जयदेवः सहृदयानां हरिप्रणयालंकाराणां समुच्चयं श्रवणपूर्वकं कथं सुकृतोदयः नाम अपूर्वस्य पुण्यस्य धर्मस्योदयः भवतीति। तत्र विभवस्य भणने दिगुणीकृतां भूषणाभां शोभां ऋच्छति यच्छति। अपि च अत्र भवत्यलंकाराणां भारः। तेनालंकारशास्त्रस्यापि द्विगुणीकृताचर्च्चा अत्र विधीयते। रागस्य निर्णयो यथा ;

क्रमेण नट्टकेदारश्रीरागस्थानगौडकाः। धोरणीमालवीयश्च वराटीमेघरागकः।।
मालवश्रीर्देवशाखे गौण्डकृच्चाथ भैरवी। धन्नासिका वसन्तश्च गुर्जरी च मह्लारकः।।
ललितः सप्तदशमो रागस्तावन्ति च क्रमात्। पदानि तेषु तालाः स्युरितस्तन्नाम कीर्त्त्यते।।

आद्य त्रिसप्तदशमो द्वादशो द्रुतमण्ठकाः। द्वितीये नवमे चैकादशे चैव त्रयोदशे।।
पदे पञ्चदशे सप्तदशे रूपकइरितः। चतुर्थ प्रतितालव्या द्रुतालः पञ्चमे स्मृतः।।
त्रिपुटः षष्ठाष्टमयोः स्याद्रूतप्रतिमण्ठकः। चतुर्दशे षोडशे च भद्रः स्तात् प्रतितालकम्।।

मध्यमादौ पुनर्मुक्ति: शृङ्गार: साभिलाषयो:। स्त्रीपुंसयोरुत्तमस्य नायकस्योपवर्णनम्।।

कैशिकीं रतिमाश्रित्य पदानां स्व स्व नामता। छन्द: स्वेछा विरचितं रूपके यत्र दृश्यते।। स रागश्रेणीनामायं प्रीतिकृत्कमलापते: इति।

अत्र रागोऽस्ति कुसुमाभरणमिति **कुम्भनरपति**: सव्रवीति गोविन्दरागश्रेणी कुसुमाभरणम्। ।। ८।।

**६५-अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-**
**प्रयासेनेवाक्ष्णोस्तरलतरतारं पतितयो:।**
**इदानीं राधाया: प्रियतमसमालोकसमये**
**पपात स्वेदाम्बुप्रसर इव हर्षाश्रुनिकर:।।६५।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६५।। सा ददर्श इत्युक्तं तद्दर्शनान्तरं सङ्गमार्थं श्लोकाभ्यां दर्शयति। अतिक्रम्येति। इदानीं प्रियतमसमालोकसमये अक्ष्णोर्हर्षाश्रुनिकर: पपातेति योजना। कीदृशोरक्ष्णोस्तरलतरतारं यथा स्यादेवं पतितयो:। तरलतरा तरा कनीनिका यत्रेति विग्रह:। अन्योऽपि य: कश्चित् पतति सोऽपि केनापि किमहं दृष्टं इति लज्जया तरलतरतारे कृत्वा दृशोऽवलोकत इत्यभिप्राय:। उत्प्रेक्षते, अपाङ्गनेत्रान्तमतिक्रम्य श्रवणपथपर्य्यन्तगमनप्रयासेनेव स्वेदाम्बुप्रसर इवेति आयासात् घर्मजलं पतत्येव्येत्यभिप्राय:। विस्तारे करीवृन्दे च प्रसर: परिकीर्त्तित:।।६५।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६५।। इदानीं राधाया अपि सात्विकभावोत्पत्तिं दर्शयति, अतिक्रम्येति। इदानीं राधाया अक्ष्णोर्हर्षाश्रुनिकर: पपात। क्व ? प्रियतमसमायातसमये प्रियतमस्य समायातं समागमस्तस्य समये काले। क इव ? अपाङ्गं नेत्रप्रान्तमतिक्रम्य श्रवणपथपर्यन्तगमनप्रयासेन स्वेदाम्बुपूर इव। किंभूतयोर्नेत्रयो: ? प्रियदर्शनाकाङ्क्ष्या अतिशयेन चञ्चलत्वं प्रापितयो:। अत्र सात्विकभावान्तरित उपमालंकार:। शिखरिणी वृत्तम्।।६५।।

### (३) जगद्धरकृत- सारदीपिका

।।६५।। एवंभूतस्य कृष्णस्य दर्शनाद्राधायास्तदानीं किं जातमिति हरिराह अतिक्रम्योति इदानीं प्रियतम समये प्रवाहसदृश: राधाया: हर्षाश्रुनिकर: सात्विकभावेन नेत्राम्बुपुर: पपात तत्रोत्प्रेक्षते अपाङ्गनेत्रप्रान्तम् अतिक्रम्योल्लङ्घ्य श्रवणपथस्य कर्णमार्गस्य

पर्यन्तगमनं येन ते नयः प्रपात स्तेनेवाक्ष्णोः स्वेदाम्बुप्रसरोऽभूत् कीदृशयोरक्ष्णोः तरलतरतारं चञ्चलाक्षकनीनिकं यथा स्यात्तथा पतितयोः अन्यस्यापि गमने न श्रमो भवति तेन च पतति तद्वत्।।६५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६५।। इदानीं राधाया रसविक्रियामाह, अतिक्रम्येति। हे सखि! यदि राधा हरिं ददर्श तदानीं प्रियतमसमालोकसमये राधाया अक्ष्णोर्वर्तमान आनन्दसमूह अश्रुरूपेण पतितः, हर्षाश्रुनिकरः पपातेत्यर्थः। ननु समीचीनभाजने स्थापितः कथं पपातेत्यत्राह- किंभूतयोरक्ष्णोः? तरलतरतारं दर्शनासङ्गेनातिशयेन चञ्चलाक्षिकनीनिकं यथा स्यादेवं पतितयोः; सौन्दर्या धिक्येनातिसतृष्णनिरीक्षणात्। यस्मिन्नङ्गे पतति ता पुनरुत्थानासामर्थ्येन तत्रैव स्थिता इति ज्ञापनाय पतितयोरित्युक्तम्। तथा च भाजने पतिते तदाधारवस्तुपतनं नियतमेवेति भावः। पतनहेतुमुत्प्रेक्षते, अतिक्रम्येति। अपाङ्गं नेत्रप्रान्तदेशमतिक्रम्योल्लंघ्य श्रवणपथपर्यन्तगमनप्रयासेनैव स्वेदाम्बुप्रसर इव कर्णवर्त्मावधिचलनजनितप्रयासेन स्वेदाम्बुपूर इव। अन्योऽपि दूरगमनेन श्रान्तः स्विद्यति पतति च। तथा चानेन विशालनयनत्वं तस्याः सूचितम्। अथवऽन्तर्गतो हर्षोऽधिकतयान्तः स्थानमप्राप्य बहिरश्रुव्याजेन पतित इति भावः। उत्प्रेक्षालंकारः।।६५।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६५।। प्रियालोकन फलमाह। अतिक्रम्येति। अपाङ्गं नयनाञ्चलम् अतिक्रम्यातीत्य श्रवणपथस्य कर्ण्णसरणेः **'ऋक्पूरे'** (५।४।) त्यादिना समासान्तः। पर्य्यन्त गमनप्रयासेन समीपगमनक्रियायासेनैव तरलतलभावमतिचाञ्चल्यं पतितयोः पतितशब्दात् ''द्वितीयाश्रितातीतपतितेत्यादिना (२।१।३४) निपातनात्साधुः। अक्ष्णोः नयनयोः हर्षाश्रु निकरः हरिदर्शनजनितानन्दवारिपूरः। इदानीं श्रवण गमनप्रयाससमय-व्यतिरिक्तकाले इत्याकाङ्क्षायामाह। राधाया इति। राधायाः प्रियतम समालोकसमये बल्लभाबलोकनसमये स्वेदाम्बुप्रसरः घर्मजलपूर इव पपात पतितवान्। यथा लोके घर्मकालेऽध्वगमनश्रान्त्या वेपमानस्य तत्समयमुल्लंध्य समयान्तरे छायाद्रुमावस्थानकाले स्वेदोद्गमः तद्वदत्रापीत्यर्थः। उत्प्रेक्षो पमादीपकालङ्कारा:।।६५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६५।। कृष्णव्यापारवर्णनानन्तरं राधाया अपि विकारं वर्णयति। तदानीं प्रियतम-समालोकनसमये राधाया अक्षणोश्चक्षुषोः हर्षाश्रु निकरः आनन्दाश्रु समूहः पपात। अत्रोत्प्रेक्षते, क इव? स्वेदाम्बुप्रसर इव। अत्र हेतुगर्भविशेषणमाह, कथम्भूतयोः?

अक्ष्णोरपाङ्गनेत्रप्रान्तमतिक्रम्य श्रवणपथान्तर्गमनप्रयासेनेनेव तरलतरतारं चञ्चलतर-कनोनिकं यथा स्यादेवं पतितयो: कृष्ण इत्यर्थात्। अन्योऽपि श्रवणपयपर्यन्तं गमनेन तरलतरतारं क्वचित् पतति धर्मवारि च विमुञ्चतीति ध्वनितम्। 'तारकाक्ष्ण: कनीनिके**त्यमर:**।।६५।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६५।। सम्प्रति श्रीराधाया: श्रीकृष्णदर्शनेन हर्षं दर्शयति, अतिक्रम्येति। इदानीं तत्क्षणे प्रियतम समालोकनसमये [४] कृष्णावलोकनकाले राधाया: अक्ष्णोर्नेत्रयोहर्षा-श्रुनिकर: सात्त्विकभावे नानन्दजलसमूह: पपात:। क इव ? अपाङ्गनेत्रप्रान्तमतिक्रम्य श्रवणपथस्य कर्णमार्गस्य पर्यन्तगमनप्रयासेनेव स्वेदाम्बुपूर इव प्रस्वेदजलप्रसर इव। कीदृशयोरक्ष्णो: ?[५] श्रीकृष्णदर्शनाभिकाङ्क्षयाऽतिशयेन चञ्चलत्वं प्रापितयो:। प्रायश: [६] श्रीराधादर्शनात् श्रीकृष्णस्याप्येतानि चिह्नानि जातानीति ध्वनि:।।६५।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६५।। एवम्भूतस्य कृष्णस्य दर्शनाद्राधायास्तदानीं [७] किं जातम्? कविराह, अतिक्रम्येति। इदानीं प्रियतमसमालोकसमये कृष्णावलोकनकाले [४] अक्ष्णो: नेत्रयो: स्वेदाम्बुप्रसर इव[५] घर्मजलप्रवाह इव राधाया: हर्षाश्रुनिकर: [६]सात्त्विकभावेन नेत्राम्बुपूर: पपात। तत्रोत्प्रेक्ष्यते। अपाङ्गनेत्रप्रान्तं अतिक्रम्य श्रवणपथस्य कर्णमार्गस्य पर्यन्तगमनं परिसरगमनं तेन य: पयास: [७] श्रमस्तेन [८] हेतुना अक्ष्णो: स्वेदाम्बुप्रसरोऽभूत्। कीदृशयोरक्ष्णो: ? तरलतरतारं [९]चञ्चलाक्षिकनीनिकं यथा स्यात्तथा [१०]पतितयो: कृष्णं प्रति गतयो:। अन्यस्यापि गमनेन श्रमो भवति तेन च [११]पतति तद्वत्।।६५।।

१.तारं-नि.सा.तारं पतितयो:-ड.२.समायात-नि.सा.३.घातो:-क.४.कृष्णवलोकन-हानिकाले-अ.ब.५.श्रीनन्दकुमार:-ग.६.श्रीकृष्णदर्शनात्-अ.ब.श्रीवृषभानुकुमारीदर्शनात्-ग.७.किं जातमिति कविराह-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६५।।अतिक्रम्येति। अपाङ्गं नेत्रान्तं अतिक्रम्य उल्लङ्घ्य श्रवणपथ: कर्णकूप: तस्य पर्यन्तं प्रयाणं तदेव प्रयास: व्यायाम: तेनैव तावन्मात्रेणैव तरलतरभावं अतिचाञ्चल्यं गमितयो: प्रापितयो: राधाया: अक्ष्णोर्नेत्रयो: इदानीं अधुना प्रियतम: अत्यन्तप्रिय: कृष्ण: तस्य समासादितुं योग्य: समासाद्य: स चासौ समय: तस्मिन् काले हर्षात् आनन्दात् अश्रूणि बाष्पाणि तेषां निकर: प्रवाह: स्वेदाम्बुप्रसर इव स्वेदोदकनिर्झर

इवेति यावत् पपात। कटाक्षेण हरिमवलोकयन्त्या राधायाः आनन्दाश्रु पपातेति भावः। अत्र कर्णान्तगमनक्रियानिमित्तेन स्वेदाम्बुपूरत्वं इति वस्तूत्प्रेक्षा।।६५।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६५।। अतिक्रम्येति। इदानीं प्रियतमस्य कृष्णस्य दर्शनप्रस्तावे राधायाः अक्ष्णोः हर्षाश्रुनिकरः पपात। अत्रोत्प्रेक्ष्यते। अपाङ्गं नेत्रप्रान्तम् अतिक्रम्य विलङ्घ्य श्रवणपथपर्यन्तगमनप्रयासेन स्वेदाम्बु प्रसर इव आयासात् घर्मजलं प्रसरतीत्यभिप्रायः। श्रवणपथस्य पर्यन्तं प्रान्तभागस्तत्र गमनेन यः प्रयासस्तेनेव। अक्ष्णोः किं विधयोः? अत एव तरलतरा अतिशयेन चञ्चला तारका कनीनिका यस्याम्, एवंविधं यथास्यादेवं पतितयोः दर्शनमात्रेण लज्जयाधःकृतयोरित्यर्थः। यद्वा तस्मिन्नेव प्रियतमे पतितयोः अन्योऽपि यः कश्चित् पतति केनापि किमहं दृष्ट इति लज्जया नयने तरलतारे कृत्वा दिशोऽवलोकित इत्यभिप्रायः। तरलतारतरं पतितयोरित्यत्र उत्प्रेक्ष्यते। अतिक्रम्यापाङ्ग-श्रवणपथर्पन्तगमनप्रयासेनेवेति। अन्याऽपि यो बहुतरं गच्छति स आयासेन पदत्येव। ''विस्तारे कति वृन्दे च प्रसरः परिकीर्त्तितः।।६५।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६५।। अथ श्रीकृष्णस्य श्रीराधिकादर्शनानन्दविकारमुक्त्वा श्रीराधायास्तद्दर्शनानन्द-विकारमाह अतिक्रम्येति। तदानीं श्रीकृष्णावलोकनसमये श्रीराधाया अक्ष्मोहर्षाश्रुनिकरः पपात। तत्रोत्प्रेक्ष्यते स्वेदाम्भःप्रसर इव। यतोऽतिचञ्चला तारा नेत्रकनीनिका यत्र तत् यथा स्यात्तथा पतितयोः यः कश्चित् पतति सोऽपि झटित्युत्थाय केनापि किमहं दृष्ट इति तरलतरतारं कृत्वा लज्जया दिशाऽवलोकयति इत्यभिप्रायः। तत्राप्युत् प्रेक्ष्यते नेत्रान्तमतिक्रम्य श्रवणपथपर्य्यन्तगमन प्रयासेनैव। योद्धत्यन्तं गच्छति सोद्धपि पतत्येव इत्यर्थः।।६५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६५।। एवं श्रीकृष्णस्य राधादर्शनानन्दं निरूप्य श्रीराधायाश्च श्रीकृष्णदर्शनानन्दं निरूपयति, अतिक्रम्येति, 'इतानीं सम्प्रति प्रियतमस्य निजविषयभावशालितयाति-प्रीतिजनकस्य श्रीकृष्णस्य यः समालोकः सोत्कण्ठदर्शनं, तत्समये श्रीराधायास्तत्का-लीनविचित्रविलासवैभवश्रीयुक्तायाः अक्ष्णोर्नयनयोर्हर्षाश्रुनिकरः प्रियदर्शनानन्दाश्रुपूरः पपात, पतितवान्। अत्रोत्प्रेक्षते, स्वेदाम्बुप्रसर इव। यतस्तरलतरेऽतिचञ्चले तारे, नेत्रकनीनिके यत्र तद् यथा स्यात्तथा, पतितयोः श्रीकृष्णस्योपरीति शेषः। पतितस्य भयलज्जादिहेतुकस्वेदप्रसरसम्भवादत्रापि उत्प्रेक्षा। अपाङ्गं नेत्रान्तमतिक्रम्य उल्लंघ्य

श्रवणपथपर्यन्तगमनेन श्रुतिसीमावधिको यः पन्थाः, तत्पर्यन्तं यद्गमनं, तेन यः प्रयासः श्रमस्तेन दूरगमनश्रान्तस्य पतनौचित्यात् । अत्र व्रीडौत्सुक्ययोः संसृष्टिः। पथेति, 'ऋक्पुरब्धूः पथामानक्ष' इति समासान्तः 'अ' प्रत्ययः। पततिशब्दो द्वितीयाश्रितातीत पतितेत्यादिना निपातनात् साधु ।।६ ५ ।।

## ( १ ३ ) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६ ५ ।। अतिक्रम्यापाङ्गेति; श्रीकृष्णस्य श्रीराधिका दर्शनानन्दविकारमुक्त्वा श्रीराधायास्तदर्शनानन्दविकारमाह अतिक्रम्येति। श्रीराधा अपाङ्गेन नेत्रकोणे दृष्ट्वा स्वस्या नेत्रकोणं श्रवणपर्यन्तं व्यापनं करोति। नाम कर्णपर्यन्तं व्याप्नोति। तेन अक्ष्णोः तारं विस्फारितं तरलयतीव दृश्यते। पततीव दृश्यते। तदानीं श्रीराधाप्रियः तस्य समालोकनसमये दर्शनसमये। चक्षुषस्तारका विस्फारिता भवति । तज्जन्यपरिश्रमात् घर्माश्रुस्तथा नयनतः धारा प्रवहति। उपमालंकारः। शिखरिणीवृत्तम्। ।।६ ५ ।।

**६ ६-भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहित-**
**स्मितं याते गेहाद्बहिरवहितालीपरिजने।**
**प्रियास्यं पश्यन्त्याः स्मरशरसमाकूतसुभगं**
**सलज्जा लज्जापि व्यगमदिव दूरं मृगदृशः।।६ ६ ।।**

## ( १ ) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६ ६ ।। कृतकपटकण्डूतिपिहितस्मितं यथा स्यादेवमवहितालीपरिजने गेहाद् वहिर्गते सति मृगदृशो राधायास्तल्पान्तं भजन्त्या लज्जा सलज्जेव दूरं व्यगमदित्युत्प्रेक्षा। अवहितत्वमालीनां तत्कालयोग्यक्रमानुष्ठानात् मृगदृशः स्मरशर सुभगं यथा स्यादेवं प्रियास्यं पश्यन्त्याः स्मरशरेण समाकूतमुल्लासस्तेन सुभगमिति विग्रहः।।६ ६ ।।

इति श्रीकविराजश्रीनारायणदासकृतायां श्रीगीतगोविन्दटीकायां सर्वाङ्गसुन्दर्य्यां सानन्दगोविन्दो नामैकादशसर्ग विवरणम्।।

## ( २ ) राणाकुम्भकृत-रसिकप्रिया

।।६ ६ ।। इदानीं मिलितायां तस्यां सखीकृत्यमाह, भजन्त्या इति। मृगदृशो राधाया लज्जापि अतिदूरं व्यागमत्। किंभूता लज्जा ? सलज्जा लज्जासहिता। किंभूतावाः ? प्रियास्यं पश्यन्त्याः। किंभूतं प्रियास्यम् ? स्मरपरवशं यदाकूतमभिप्रायस्तेन सुभगं सुन्दरम्। पुनः किंभूतायाः ? तल्पान्तं तल्पसमीपं भजन्त्या आश्रयन्त्याः। क्व सति ? अवहितालीपरिजने अवहितः सावधानो यः सखीलक्षणः परिजनस्तस्मिन्गेहान्नि-

कुञ्जान्निर्याते सति। कथं यथा स्यात्तथा ? कृता या कपटकण्डूतिस्तया पिहितमाच्छादितं स्मितं यथा स्यात्तथा। शिखरिणी वृत्तम्। अव्यङ्ग्यो भावो रसवदलंकारता।।६६।।

## (३) जगद्धरकृत- सारदीपिका

।।६६।। भजन्त्या इति मृगदृशः मृगाक्ष्याः राधायाः लज्जापि दूरं व्यगमदावगतेव कीदृश्याः राधायाः अवहितः सावधानो य आलीपरिजनः सखी सेवकवर्गस्तस्मिन् गेहाद्बहिः याते गते सति तल्पान्त शय्यापर्यन्त भजन्त्याः प्राप्नुवत्याः कीदृशे परिजने कृता कपटेन कर्णादि कण्डुतिः कण्डुयनं तेन पिहितं छादितं हास्य येन पुनः कीदृश्याः प्रियायाः कृष्णमुखं पश्यन्त्याः कीदृशं प्रियायाः स्मरशरवशंकामबाणाधीनम् आकूतं सुरताभिप्रायस्तेन सुभगं मनोहरं कामविकार हावभावादि मनोहरमित्यर्थः पुनः कीदृश्याः सलज्जायाः लज्जासहितायाः तस्याश्चेष्टं दृष्ट्वा वचनान्तरेण अपृष्ट्वा बहिर्गमनात्सखीनां साम्यत्वं सर्वाः सख्यो गताः इति कथमत्र स्थातव्यमिति लज्जापि गतेति भावः।।६६।।

इति श्रीजगद्धरविरचितायां गीतगोविन्दटीकायां
सारदीपिकायां सानन्ददामोदरो नाम एकादशः सर्गः।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६६।। भजन्त्या इति। तस्मिन्काले तल्पान्तं शय्यैकदेशं भजन्त्या आश्रयन्त्या मृगदृशो हरिणनयनाया राधाया लज्जापि सलज्जेव सव्रीडेव भूत्वा दूरमतिशयेन व्यगंमद्विगता। क्व सति ? अवहितालीपरिजने अवहितः कृतावधानो य आलीपरिजनः सखीपरिजनस्तस्मिन्। कृतकपटकण्डूति यथा स्यात्तथा। कृता कपटेन व्याजेन कण्डूतिः कर्णादिकण्डूयनं यत्र एवं यथा स्यात्तथा बहिर्याते सति कुञ्जाद्बहिर्गते सति। पुनः कथं यथा स्यात्? विहितस्मितं विहितेषद्धासं यथा स्यात्। कीदृश्यास्तस्याः ? प्रियास्यं कृष्णस्य मुखं पश्यन्त्याः। कीदृशं मुखम्? स्मरसरसं स्मरेण कामेन सरसं शृङ्गाररससहितम्। पुनः कीदृशम्? आकूत, सुभगम्। आकूतेन तन्मयाख्येन सुभगं मनोहरम्।।६६।।

तर्कान्दोलनकर्कशापि सुमतिर्या हावभावान्विता
शृङ्गारादिरसोन्नयादिकुशला सा शंकरे केवला।
किं शम्भोरपरत्र विश्वविजयो दृप्तस्मरद्वेषिता
देहार्धीकृतकामिनीप्रणयिता च क्वापि देशान्तरे।।

इति श्रीमहामहोपाध्यायश्रीशंकरमिश्रविरचितायां शालिनाथकारितायां
गीतगोविन्दटीकायां रसमञ्जरीसमाख्यायामेकादशः सर्गः ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६ ६ ।। अथ कुट्टिन्याः सख्या निर्गमनं सूचयन् सुरतानुकूलसामग्रीमाह। भजन्त्या इति। अवहिता उभयो र्घटना सावधानमनस्का या आली सखी सैव परिजने परिचारके कृताया कपटकण्डूतिः निःसरणार्थनिर्मितमिथ्याकण्डूयनं तया पिहितमाच्छादितं प्रियसमागमलज्जितसखीदर्शनजनितमन्दहासो यस्मिन् कर्मणि तद्यथा भवति तथा। गेहात् क्रीड़ोचितलतामन्दिरात् बहिर्य्याते परिसरवर्त्तिसखीभिः सह अपगते सति तल्पान्तं सम्भोगशय्यासमीपं भजन्त्या सेवमानायाः किञ्च स्मरेण कामदेवेन रसः, ''तृतीया तत्कृत'' (२।१।३०) इत्यादिना समासः। तत्र समाकूतमभिप्रायविशेषः। तेन सुभगं रमणीयं सम्भोगाकाङ्क्षाया सूचकमित्यर्थः ''स्मरशरेति क्वचित्पाठः''। तदा स्मरस्य शरः अरविन्दं तेन समं सदृशं आकृष्टेन सम्भोगाभिप्रायेण सुभगं समं तत् आकूतसुभगं च।।अथवा, स्मरशराः कामबाणाः तैराकूतं दूरिताभिप्राये तेन सुभगम्। मदनशरपतन-समुदितसुरतोद्योगशालीत्यर्थः। एतादृशं प्रियास्यं श्रीकृष्णवदनं पश्यन्त्याः वीक्ष्यमाणायाः मृगदृशोः राधिकायाः अत्र मृगदृग् शब्देन राधायाः हरिवदनदर्शने दृष्टिवैपुल्यं सूचयतीत्यवगन्तव्यम्। लज्जापि ब्रीडापि सुलज्जेव सम्भोगोन्मुखमिथुन समीपे अवस्थानमनुचितमिति त्रपासहितेव व्यगमत् निरगात्। पुष्पादित्यादिना दितत्वा चोरङ्। उत्प्रेक्षालङ्कारः।।६ ६ ।।

इति श्रीगीतगोविन्दव्याख्यायामेकादशसर्गः।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६ ६ ।। अथ 'वैजात्यं सुरतेषु चे'ति भरतसूत्रानुसारात् सन्नायिकाया राधिकाया लज्जाव्यपगमम्वर्णयति। अवहितालीपरिजने सावधानसखीरूपपरिजने गेहात् भवनात् बहिःप्रदेशं याते सति मृगदृशो राधाया लज्जापि व्रीडापि अतिदूरं व्यगमत् विशेषात् गतवती। कीदृशी ? सलज्जा तयोरेकान्ते परस्परव्यापारमुद्वीक्ष्य व्रीडितेवेत्यु-त्प्रेक्षालंकारः। किम्भूतायाः ? तल्पान्तं शय्यां भजन्त्याः सेवमानायाः। अन्तः स्वरूपे पर्यन्ते विनासेऽपि निगद्यत इति जगद्धरादयः*। तत्पक्षे 'किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशमित्युत्तरग्रन्थविरोध इति तल्पान्तं शय्याप्रान्तं भजन्त्या इत्येवाथः। पुनः किम्भूतायाः ? प्रियास्वं पश्यन्त्याः वल्लभवदनं वीक्ष्यमाणायाः। कीदृशं वदनम्? स्मरस्य कामस्य ये शराः तैः समाकूतम् अभिप्रायः तेन सुभगमतिमनोहरम्। दर्शनक्रियायाः विशेषणमिदम्वा। अवहितालीपरिजने कथम्भृते ? कृता कपटकण्डूतिः, तया पिहितमाच्छादितं स्मितमीषद्धास्यं येन स तथा तस्मिन्।६ ६ ।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६ ६ ।। पुनस्तदेव प्रकारान्तरेणाह, भजन्त्या इति। मृगदृश: मृगाक्ष्या: श्रीराधाया: तल्पान्तं [१२]शय्याया: प्रान्तं भजन्त्या: प्राप्नुवत्या अवहिते सावधाने आलीपरिजने सखीसेवकवर्गे[१]गेहाद्बहिर्याते सति[२]लज्जासखी दूरमतिशयेन व्यपगमत् अतिदूरमगमत्। कीदृशे परिजने ? कृतं कपटेन कर्णादि[३] कण्डूयनं तेन[४]पिहितं स्मितं हास्यं येन तस्मिन्। [५]कीदृश्या: ? [६]प्रियास्यं कृष्णमुखं पश्यन्त्या:। कीदृशम् ? [७]स्मररसेन कामरसेनाकूतं क्रीडाविलासस्तेन सुभगं सुन्दरम्। आकूतं स्याद्भ्रमे कामे क्रीडिते ध्वनितार्थक: इति **हलायुध**:।।६ ६ ।।

१.स्मितं-नि.सा. २.स्मरशरवशाकूत-नि.सा.ड. ३.सलज्जाया लज्जाऽप्यगमदिव दूरं मृगदृश:-ड. ४.राधाया: अक्ष्णो:-क. ५.घर्मजलप्रवाह इव घर्मजलप्रवाहसदृश:-क.ल.म. ६.भावो-क. ७,८.नास्ति-ड.ल.म. ९.त: १०.पर्यन्तं नास्ति-क. ११.पपात-क. १२.शय्याप्रान्त्यं-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६ ६ ।। भजन्त्या इति। मृगदृशो मृगाक्ष्या राधाया[८]लज्जापि दूरं व्यगमदिव[९]गच्छतिस्मेवेत्युत्प्रेक्षा। [१०]कीदृश्या राधाया:[११]? अवहिते सावधाने [१२] आलीपरिजने सखीसेवकवर्गे गेहाद्बहिर्याते सति तल्पान्तं शय्यापर्यन्तं भजन्त्या:[१३] प्राप्नुवत्या:। कीदृशे परिजने ? कृतं कपटेन कर्णादिकण्डूयनं तेन[१४] विहितं [१५] कृतं स्मितं हास्यं येन। पुन: कीदृश्या: ? प्रियास्यं कृष्णमुखं पश्यन्त्या:। कीदृशं प्रियास्यम् ? स्मरशरवशं कामबाणाधीनं आकूतं [१६] सुरताभिप्राय: तेन सुभगं मनोहरं कामविकारहाव[१७]भावादिना मनोहरमित्यर्थ:। [१८]पुन: कीदृश्या ? सलज्जाया:[१९] लज्जासहिताया: तस्याश्चेष्टा दृष्ट्वा वचनमन्तरेणापृष्ट्वा बहिर्गमनात् सखीनां सावधानत्वं, सर्वा: सख्यो गता इति मया कथमत्र स्थातव्यमिति [२०] लज्जापि गतेति भाव:।।६ ६ ।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६ ६ ।। भजन्त्या इति। कृता कपटकण्डूति: छद्मकण्डूति: कर्णकण्डूयनमिषेणेत्यर्थ:। तया पिहितं छादितं स्मितं सन्निधानहर्षजनितहास्यं यस्मिन् कर्मणि तद्यथा भवति तथा, तल्पान्तं प्रियशय्यान्तं भजन्त्या:, स्मरात् कामात् शतं समाकूतभावा: तै: सुभगं रमणीयम्।।

इति श्रीगीतगोविन्दे अभिसारिकावर्णने (एकादश: सर्ग:)।

इति श्रीमद्विद्वत्प्रवरभिषगम्मणजनुषा
कृतायां न्यायार्थश्रुतिपदविदा कृष्णविदुषा।

प्रगीयद्गोविन्दान्वयविवृतभावार्थविवृतौ
जयन्त्यां सर्गोऽसौ स्फुटमभवदेकादशतम:।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां सानन्दगोविन्दो नाम एकादश: सर्ग:।।

सम्भोगाभिलाषजातहर्षेण सुन्दरं प्रियस्य कृष्णस्य आस्यं पश्यन्त्या: सलज्जाया: मृगदृश: राधाया: अवहिता: सन्निहिता:, आल्य: सख्य: परिजना: परिचारिकाश्च द्वन्द्वैकवद्भावस्तस्मिन्। गेहात् क्रीडागृहात् बहिर्याते सति लज्जाऽपि अतिदूरं अगमत् जगाम। सखीजने परिजने स्थिते हीणा त (तो) गमने निर्लज्जा सम्भोगे प्रवृत्तेति भाव:। अत्र लज्जानिर्गमवर्णनेन लज्जाशमनरूपभावशान्ति:। अत्र भावस्य शृङ्गाररसापेक्षया लज्जास्वयमगमदिति वाच्यार्थस्य चमत्कारकारित्वाद्गुणीभूत-व्यङ्ग्यम्। अत्र लज्जावर्णनेन प्रियमुखालोकनेन च नायिकाया मध्यात्वं नाशङ्कनीयम्। सा प्रौढेव। सखीसमक्षप्रयुक्ता लज्जा प्रौढानामस्तीति प्रौढात्वमेव। यद्याग्रह: समानलज्जामदनत्वेन तथापि प्रियसंयोगेन लज्जापगमवर्णनेन प्रौढात्वमेवेति विस्तरेणालम्।।६६।।

१.गेहात्-इ.फ.ग.ह.ज. २.लज्जा सखीव दूरं-फ.ग.ह.लज्जासखी विदूरं-ग. ३.कण्डूयनेन-फ.ज.ह. ४.विहितं-फ.ग.ज.५.कीदृश्या: मृगदृश:-ग.६.सलज्जं लज्जासहितं यथा तथा प्रियास्यं कृष्णमुखं पश्यन्त्या:-फ.ज.प्रियास्यं प्राणप्रियस्य फीनन्दकुमारस्य मुखं पश्यन्त्या:-ग.७.स्मररसेनाकूतं-ग.स्मररसेन कामोत्पन्नविषयरसेन-फ.ज.स्मरकअतरसेन कामरसेन:-ह.८.त: ११.पर्यन्तं नास्ति-ल.म.९.गतेव-ड.१०कस्मिन् सति-क.१२.नास्ति-क.१३.नास्ति-ड. प्रसर्पन्त्या-क.१४.पिहितं-क.१५.नास्ति-क.ल.म.१६.रताभिप्राय:-क.१७.भावादि-मनोहरमित्यर्थ:-क.ल.म.१८.त:१९.पर्यन्तं नास्ति-ड.२०.लज्जा-क.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६६।। भजन्त्या इति। कृतकपटकण्डूतिपिहितस्मितं यथास्यादेवं अवहितालीपरिजने गेहाद् वहिर्याते सति मृगदृशो राधाया: लज्जापि सलज्जेवदूरं व्यगमत् कृताकपट-कण्डूतिर्व्याजकण्डूयनं यत्र पिधाने एवं यथास्यादेवं पिहितं स्मितं यत्र गमनक्रियायामिति विग्रह:। आल्यश्च परिजनाश्चेति समाहारद्वन्द्व:। कृत्वा अवहितं कृतावधानं च तदालीपरिजनं चेति कर्मधारय:। लज्जापि सलज्जेव दूरं व्यगमदिति सुरते लज्जाहानि: स्वाभाविकी सखी गमनानन्तरं सुरत विषये निर्लज्जत्वं तत्र आलीजनो गत:। मया कथं स्थातव्यमिति विचिन्त्य लज्जाया: सलज्जत्वे उत्प्रेक्षा न केवलं सखीभिर्गतमित्यपि शब्दार्थ:। किन्तु लज्जापि । केचित्तु लज्जाया: सलज्जत्वं विरुद्धमिति विरोधार्थमपि शब्दमाहु:। अवहितत्वमालीनां तत्कालयोग्यक्रमानुष्ठानात्। आलीनां वहिर्गमने

हेतुविशेषणमाह। मृगदृशः कीदृश्याः ? स्मरशरेण समाकूतम् उल्लासस्तेन सुभगं यथास्यादेवं प्रियास्यं पश्यन्त्याः स्मरशरसमम् अनङ्गबाणसदृशम् आकूतमभिप्रायस्तेन सुभगं वा। स्मरशरसमाकूतसुभगमिति कृष्णमुखविशेषणं वा । एवं च इयं सलज्जा तल्पान्ते वसति । सखीजनानुरोधात् तव पार्श्वं नगच्छामीति भङ्ग्या सूचयितुं कृष्णमुखं प्रेक्षमाणा कृष्णं कामपीडितो भवति च। अतोऽस्माभिर्गन्तव्यमिति विचार्य्य कण्डूति-व्याजेन कृतं स्मितं सङ्गोप्य सखीनां गमनात् तत् कालसमुचित प्रक्रियया ज्ञानेन सावधानत्वमिति भावः। गेहाद् वहिरित्यत्र अपपरिवहिरञ्च वः पञ्चम्या इति अस्मिन् सूत्रे वहिः शब्दः पञ्चम्या समस्यत इति ज्ञापकात् वहिःशब्दयोगेऽपि पञ्चमी सिद्ध्यति । बृक्षाद्भूतमापततीति वदपादानं लक्षणीयम्।।६६।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६६।। ततः शय्यान्तिकं गतायास्तस्याः प्रियदर्शनावेशेन लज्जा विजिता इत्याह भजन्त्या इति। तत्सुखानुकूलो सावधानो य आलीपरिजनस्तस्मिन् कृतकपटकर्णादि-कण्डुत्याच्छादितस्मितं यथा स्यात्तथा गेहाद्वहिर्याते सति। मृगदृशः श्रीराधाया लज्जापि सलज्जा सती अतिदूरं विशेषेणागमत्। कीदृश्याः ? शय्याया निकटं गतायाः ततश्च स्मरशरेण समाहूतं यद्हास्यकटाक्षादिकं तेन सुन्दरं यथा स्यात्तथा प्रियास्यं प्रश्यन्त्याः प्रियास्यविशेषणं व।।६६।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६६।। अनन्तरकौतुकमाह, भजन्त्या, अवहिते, तदुभयसङ्गमसुखसमयानुकूल-व्यापारसावधाने आलिपरिजने, सखीरूपपरिचारजने या कपटकण्डूतिः, व्याजेन नासिकाधः प्रदेशस्य कण्डूयनं, तया पिहितमाच्छादितं स्मितं, प्रियसमागमलज्जित-सखीवदनदर्शनसञ्जातमन्दहसितं यत्र तद् यथा स्यात्तथा। गेहात्, क्रीडानिकुञ्जनिकेतनात् बहिर्याते, देहलीमतिक्रम्य निर्गते सति, मृगदृशः श्रीराधाया लज्जा सलज्जा सती निजसखीजननिर्गमनमवेक्ष्याहमपि अस्याः सख्यस्मि कथं सम्भोगोन्मुखमिथुनसमीपे स्थास्यामीति सव्रीडा सहसैव दूरं व्यगमत्। विशेषेण अगमत्। तत्समये पुनरागमनमनपेक्ष्य एव गतवतीत्यर्थः। उत्प्रेक्षालङ्कारः। मृगदृश इति विविधलीला-कटाक्षशालिता सूचिता। कीदृश्याः, तल्पान्तं, केलिशय्यासमीपं भजन्त्याः, प्राप्नुवत्याः, किं च स्मरपरवशं, समाकूतं, रतिस्पृहा द्योतकाभिप्रायस्तेन सुभगं, तद्व्यञ्जकसस्मित-कटाक्षादिना अतिसुन्दरमित्यर्थः। तद् यथा स्यात्तथा प्रियास्यं मुखं पश्यन्त्याः प्रियास्यास्य विशेषणं वा।।६६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६६।। भजन्त्यास्तल्पान्तेति; मृगनयनी श्रीराधा श्रीकृष्णस्य लावण्यमयं रूपं दृष्टवा केलिगृहतल्पं शय्यां प्रविवेश। तदानीं सख्यः कर्णकण्डुव्याजेन केलिगेहात् केलिसदनात् वहिः गताः। हासञ्च कल्पयित्वा यथा। मृगदृशः लज्जापि लज्जिता दूरमगमत्। सलज्जा लज्जासहिता श्रीराधायाः प्रियाभिसारं दृष्ट्वापि लज्जिता। शिखरिणी वृत्तम्। अव्यङ्ग्यो भावो। रसवद्दलंकारः।।६६।।

**६६-क-जयश्री विन्यस्तैर्महित इव मन्दारकुसुमैः**
**स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव।**
**भूजापीडक्रीडाहतकुवलयापीडकरिणः**
**प्रकीर्णासृग्बिन्दुर्जयति भुजदण्डो मुरजितः।।६६-क।। (राणाकुम्भः)**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६६-क।। जयश्रीति। मुरजितो भुजदण्डो जयति। मुरं दैत्यविशेषं जितवान्मुरजित्, तस्य मुरजितः कृष्णस्य दण्डाकारो बाहुः सर्वोत्कर्षेण वर्तत इत्यर्थः। सर्वोत्कृष्टत्वेन जगद्वन्द्यत्वमभिव्यञ्जितम्। कीदृशो भुजदण्डः ? प्रकीर्णासृग्बिन्दुः विस्तीर्णा असृजो रुधिरस्य बिन्दवो यत्र स तथा। अत्र हेतुमाह, कीदृशस्य मुरजितः ? भुजापीडेति। भुजापीडस्य भुजदण्डस्य क्रीडया विलासेन हतो व्यापादितः कुवलयापीडाख्यः करी गजो येन स तस्य तथेति। यद्वा, भुजापीडक्रीडया हतश्चासौ कुवलयापीडनामा करी च तस्येति कर्मधारयः। संबन्धे षष्ठी। तत्संबन्धिप्रकीर्णरुधिरस्य बिन्दवो यस्मिन्भुजदण्डे स तथेति 'क्रीडा' शब्देनानायासो व्यज्यते। 'रुधिरेऽसृग्लोहितास्त्ररक्तक्षतजशोणितम्' **इत्यमरः**। भुजहतहस्तिरुधिरबिन्दुभुजसंबन्ध उत्प्रेक्षावीजमित्युत्प्रेक्षते। कीदृश इव भुजदण्डः ? द्विपरणमुदा द्वाभ्यां नासामुखाभ्यां पिवतीति द्विपो हस्ती कुवलयापीडः तत्सङ्गरसमदेन स्वयमात्मना सिन्दूरेण मुद्रित इवाङ्कित इव। कुवलयापीडकरिसङ्ग्रामे 'साधुरयं मे बाहुः' इति हर्षवशाच्छोणेन सिन्दूराङ्कितो बाहुरिति भावः। रणमुदेति हेत्वर्थे तृतीया। मुद्रित इति तारकादित्वादितच्। पुनरुत्प्रेक्षत, कीदृश इव भुजदण्डः ? जयश्रीविन्यस्तैर्मन्दारकुसुमैर्महित इव। जयलक्ष्म्या प्रक्षिप्तमन्दारकुसुमैः पूजित इव। जयसंपदि विन्यस्तैरर्थाद्देवैरिति वा समरजयिन उपरि पुष्पवृष्टिरुचिता। यद्वा, जयश्रिया लक्ष्म्या क्षिप्तैर्मन्दारकुसुमैर्महित उत्सवं प्रापितः। पतिजये सति पत्नी उत्सवं

करोतीत्युचितम्। कुसुमरक्तिमार्पकं 'मन्दार'पदमौचितमिावहति। 'मह पूजायाम्' इत्यस्य क्तप्रत्यये महित इति रूपम्। महं प्रापित इत्यर्थे तारकादित्वादितच्प्रत्यय इति वा। शिखरिणी छन्दः। तल्लक्षणं **संगीतराजे**, 'रसै रुद्रैश्छिन्ना यमनसभला गः शिखरिणी'। उत्प्रेक्षालंकारः। तल्लक्षणं **काव्यप्रकाशे** (१०/९२), 'संभावन-मथोत्प्रेक्षा प्रकृतस्य समेन यत्' इति। अनुप्रासः शब्दालंकारः। तल्लक्षणम् (**का.प्र.९/ ७९**, 'वर्णसाम्यमनुप्रासः' इति। पाञ्चाली रीतिः। आरभटी वृत्तिः। वीरो रसः।।६६-क।।

## (३) जगद्धरकृत- सारदीपिका (टीका नोपालब्धा)

## (४) शंकरमिश्रकृत-रसमञ्जरी (टीका नास्ति)

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी (टीका नास्ति)

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६६-क।। सर्गान्ते सुरजिद्भूजदण्डस्तुतिरूपमङ्गलमाचरति। सुरभिदः सुरजितः कृष्णस्य भुजदण्डः जयति विघ्ननिवारणेन सर्वोत्कर्षेण वर्द्धतामित्यर्थः। सुरभिदः किम्भूतस्य? भुजापीडक्रीडया हतो घातितः कुवलयापीडनामा करी येन स तथा तस्य। भुजदण्डः? अतएवावकीर्णा विस्तीर्णा विस्तृता असृग्विन्दवोऽर्थातु कुवलया-पीडस्य रुधिरविन्दवो यत्र तादृक्। अत्रोत्प्रेक्षते,कीदृशो भुजदण्डः? जयश्रीविन्यस्तैः जयलक्ष्म्या दत्तैः मन्दारसुकुमैः पारिजातपुष्पैः महित इव पूजित इव। पुनः कीदृशः? द्वीपः? कुवलयापीडः, तस्य रणः संग्रामः, तत्र या मुत् हर्षः, तेन स्वयं सिन्दुरेण मुद्रित इव। मह पूजायां धातुः। तदाह, 'मुद्रा चिह्ने च कीर्त्यत' इति। तथा चातियुद्धविशारदोऽयं बाहुरिति। राधाप्राप्त्यां सानन्दोमुकुन्दो यत्रेति व्युत्पत्त्या सानन्दमुकुन्देति सर्गनाम।।६६-क।।

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्द टीकायामेकादशः[+] सर्गः।।

* 'जगद्धर' इति पाठ।

० अत्र 'कृतकण्डुया' इति पदं पाठान्तरे दृश्यते।

[+] ग्रन्थान्तरे 'भुरजितः' इति पाठः।

+ '.........टीकायां सानन्दमुकन्दनामैकादशः' इति पाठ।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६६-क।। [२]सर्गान्ते कविराशिषमाशास्ते(-जयेति) मुरजितः श्रीकृष्णस्य भुजदण्डो जयति सर्वोत्कर्षेण वर्तते। कीदृशः? [१]प्रकीर्णाः [२]सर्वत्र संलग्ना असृग्बिन्दवो रुधिरकणा

यत्र। कीदृशस्य [3]मुर (जितः) ? भुजापीडस्य बाहुदण्डस्य क्रीडया हतः कुवलया-पीडनामा करी[4]हस्ती येन तस्य[5]। क इव ? जयश्रिया[6]विजयशोभया विन्यस्तैर्नानारचनया क्षिप्तैः मन्दारकुसुमैः पारिजातपुष्पैर्महित इव [7] पूजित [8] इव। पुनः क इव ? स्वयं स्वयमेव सिन्दूरेण द्विपस्य हस्तिनः रणे मुदा आनन्देन मुद्रित इव चिह्नित इव। अथ वा स्वयमात्मता सिन्दूरेण दीररसोदयेन द्विपेन द्वाभ्यां श्रीराधाकृष्णाभ्यां शृङ्गाररसं पिबतीति द्विपः कामस्तेन यो रणः सुरतसङ्ग्राम[9]स्तस्य[10]मुदा मदेन मुद्रित इव [11] चिह्नित इव। प्रकीर्णं शकले प्रोक्तं विस्तरेऽपीति[12]कथ्यते इति यादवः।।६६-क।।

इतिश्रीकृष्णचन्द्रसेवकोदीच्यावतंस[13]शिवदासात्मजश्रीवनमालिभट्टविरचितायां [14] वनमालिसञ्जीविन्यां श्रीगीतगोविन्दटीकायां अभिसारिकावर्णने एकादशः सर्गः।।

१.इदमेव पद्यं सर्गान्तपद्यत्वेन दृश्यते-अ.ब.ड.ह.नि.सा.ग्रन्थे तु सानन्दं सौन्दर्यैक, इत्यारभ्यमाणपद्य-द्वयमधिकं दृश्यते २.सम्प्रति-इ.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६६-क।। जयेति। मुरजितः कृष्णस्य भुजदण्डो दण्डाकारो बाहुर्जयति सर्वोत्कर्षेण [15] वर्तते। दण्डशब्देनाजानुबाहुत्वं द्योतितम्। कीदृशो [16]भुजदण्डः ? प्रकीर्णाः सर्वत्र लग्ना असृग्बिन्दवो यस्मिन्। अत एव द्विपरणमुदा कुवलयापीडासङ्ग्रामसन्तोषेण स्वयं सिन्दूरेण मुद्रित चिह्नित इव। [17] द्विपश्चेत् सिन्दूरेण मुद्रितस्तर्हि मदीयो बाहुरपि सिन्दूरमुद्रितो भवतु। पुनः कीदृश इव ? जयश्रिया जयलक्ष्म्या [18]विन्यस्तैः विक्षिप्तैः मन्दारकुसुमैः पारिजातपुष्पैर्महित इव। जयिनः शूरस्योपरि पुष्पवृष्टि-रुचिता। कीदृशस्य [19]मुरजितः ? भुजापीडस्य [20]बाहुदण्डस्य क्रीडया हतः कुवलयापीडनामा करी हस्तिर्येन सानन्दो राधा[21]समागमेन ।।६६-क।।

[22]इति श्रीगीतगोविन्दटीकायां एकादशः सर्गः ।।

१.प्रकीर्णासृग्बिन्दुः लग्ना असृग्बिन्दवो-फ.ज.२.नास्ति-ग.३.नास्ति-इ.फ.ग.ह.ज. ४.तः ५.पर्यन्तं नास्ति-अ.ब.६.विजयश्रिया शोभया-फ.ज.७,८.नास्ति-अ.ब.ग.९.तत्र-इ.फ.ग. ह.ज. १०.मुदा आनन्देन-इ.फ.ग.ह.ज.११.विचित्रित-ग.ह.१२.नास्ति-इ.फ.ग.ह.ज. १३.श्रीशिव-दासपण्डितात्मज-ग.ह.१४.नास्ति-फ.ज.ग.१५.वर्तताम्-क.ल.म. १६.दण्डः-ड. १७.द्विपश्च-क.१८,१९.नास्ति-ड.२०.बाहुबन्धस्य-क.२१.समागमेनेति भावः-क.२२.इति श्रीगीतगोविन्द-विवृतौ एकादशः सर्ग-ड.

## (९) कृष्ण पण्डितकृत-जयन्ती (टिका नास्ति)

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन) (टिका नास्ति)

## (११) पूजारीगोस्वामीकृत-बालवोधिनी

।।६६-क।। अथ तथाभिलाषविशेषेणालोच्यमानं श्रीकृष्णस्य भूजदण्डं स्मरन् तत्सौन्दर्य्यं वर्णयति कविः जयेति। मुरजितो भूजदण्डो जयति। कीदृशः? भूजापीड़क्रीड़या हतस्य कुवलयापीड़करिणः प्रकीर्णा विक्षिप्ता लग्ना इति यावत् असृग्विन्दवो यत्र सः। तत्रोत्प्रेक्ष्यते जयश्रियार्पितैः मन्दारकुसुमैरर्च्चित इव जयश्री-पूजितत्वेन हेतुनोत्प्रेक्ष्यान्तरमाह द्विपेन सह संग्रामहर्षेण स्वयं सिन्दूरेण मुद्रिता इव रणाभिमुखश्चेत् मल्लोऽभियाति तदारुणरागेणाङ्गं मर्ध्दयतीति प्रसिद्धेः। अत एव विप्रलम्भानन्तरप्राप्त्या नन्देन सहितो गोविन्दो यत्र सः।।६६-क।।

इति वालवोधिन्या एकादशः सर्गः ।।११।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६६-क।। अथ वर्णयिष्यमाणशृङ्गारपरिपोषकतया श्रीकृष्णशौर्यमनुस्मरन् तद्वर्णनेन कविः सर्गान्तं सूचयति। जयेति, मुरजितः श्रीकृष्णस्य भुजदण्डो जयति। कीदृशस्य। भुजाभ्यां य आपीडः संपीडनं तस्य क्रीडाभिलाषस्तेन हतो मारितः कुवलयापीडनामा करी येन, तस्य। भुजदण्डः कीदृशः। प्रकीर्णाः सर्वत्र संक्रान्ता असृग् बिन्दवो हस्तिसम्बन्धिरुधिरकणा यत्र सः। अत्रोत्प्रेक्षते, जयश्रिया विजयलक्ष्म्या विन्यस्तैः अर्पितैर्मन्दारकुसुमैः शोणपारिजातपुष्पैर्महितः पूजित इव, उत्प्रेक्षान्तरमाह, द्विपरणमुदा, तेन हस्तिना सह संग्रामहर्षेण स्वयमात्मना सिन्दूरेण मुद्रित इव। सिन्दूरमुद्राभिरङ्कित इव। रणाभिमुखो मल्लः गैरिकादिशोणचूर्णैर्निजाङ्गं मुद्रयतीति प्रसिद्धेः।।६६-क।।

इति श्रीगीतगोविन्दे सानन्दगोविन्दो नाम एकादशसर्गः ।

विप्रलम्भानन्तरं प्रियाप्राप्त्यानन्देन सह वर्त्तमानो गोविन्दो यत्र तन्नामाऽयं सर्गः।

।। इति रसिकरङ्गदाख्यायां श्रीगीतगोविन्दव्याख्यायाम् एकादशसर्गः समाप्तः।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६६-क।। जयश्रीविन्यस्तैर्महितेति; अत्र कविः वर्णयिष्यमाणशृङ्गारपरिपोषकतया श्रीकृष्णस्य शौर्यं स्मृत्वा तद् वर्णने कविः सर्गान्तं सूचयति। मुरजितः मुरासुरस्य हन्ता श्रीकृष्णस्तस्य भुजदण्डो भुजदण्ड इव जयति। विजयलाभं करोति। अत्र जगतवन्दितत्वमभिव्यञ्जितम्। पुनः कीदृशो भुजदण्डः? प्रक्रीर्णासृगविन्दुः विस्तीर्णा असृजो रुधिरस्य विन्दवो यत्र स तथा। अत्र हेतुमाह ; कीदृशस्य मुरजितः? भुजा पीडेति। भूजा पीडस्य भूजदण्डस्य क्रीडया विलासेन हतो व्यापादितः कुवलयाख्यः हस्ती यस्तेन लीलया व्यापादितः। जयश्री विन्यस्तैर्मन्दारकुसुमैर्महित इव। जयलक्ष्म्या

प्रक्षिप्तमन्दारकुसुमैः पूजित इव। जय सम्पदि विन्यस्तैरर्थाद्देवैरिति वा पूजित इव। उपरि पुष्पवृष्टिरुचिता इति कुम्भकर्णः। यद्वा जयश्रिया लक्ष्म्या क्षिप्तैर्मन्दारकुसुमैर्महित उत्सवं प्रापितः। शिखरिणी छन्दः। आरभटीवृत्तिः। वीररसः।।६६-क।।

**६६-ख-सानन्दं नन्दसूनुर्दिशतु मितपरं संमदं मन्दमन्दं**
**राधामाधाय बाह्वोर्विवरमनु दृढं पीडयन्प्रीतियोगात्।**
**तुङ्गौ तस्या उरोजावतनु वरतनोर्निर्गतौ मा स्म भूतां**
**पृष्ठं निर्भिद्य तस्माब्दहिरिति वालितग्रीवमालोकयन्वः।।६७-ख।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी (टिका नास्ति)**

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।६६-ख।। सानन्दमिति। नन्दसूनुः श्रीगोपालो वो युष्मभ्यं मितपरममेयं संमदं दिशतु। कथं यथा स्यात्? सानन्दं यथा स्यात्तथा। किं कुर्वन्? बाह्वोर्विवरमनु राधां मन्दं मन्दमाधाय। मन्दं मन्दम् इति मैनां करस्पर्शोऽपि व्याकुलीकुर्यात् इति तस्याः शिरीषपुष्पाधिकसौकुमार्यं व्यज्यते। प्रीतियोगादृढं पीडयन्नालिङ्गयन्। दृढं पीडयन् इत्यनेनानुरागातिशयो व्यज्यते। तेन च तद्गतं विषयत्वं व्यज्यते। पुनः किं कुर्वन्? इति वलितग्रीवं यथा स्यात्तथा आलोकयन्। ते च इतीति किम्? तस्या वरतनोरतनु शीघ्रं यथा स्यात्तथा तुङ्गौ उरोजौ पृष्ठं निर्भिद्य तस्माद्बहिर्निर्गतौ मा स्म भूताम्। अनेनोरोजयोः काठिन्यं तीक्ष्णत्वं च व्यङ्ग्यम्। अथवा, अतनुवरतनोरिति एकपदत्वेन अतनोः कामस्य वरा उत्कृष्टा तनुरिति वेति। अनयैव कामो विश्वजयाय मूर्तिमानित्यर्थः; अत्राद्भुतो रसः। राधामाधायेत्यादिः शृङ्गारः। न चानयोरन्योन्यविरोधः। अन्यपरत्वात्। अद्भुतो वाच्योऽप्यङ्गम्। यदाह, 'विवक्षितरसे लब्धप्रतिष्ठे तु विधायिनाम्। वाच्यानामङ्गभावं वा प्राप्तानामुक्तिरच्छला।।' इति। विशेषतस्तु प्रस्तुतपरिपोषकार्यसौ प्रकृतिरमणीयायां तस्यामधिकतरं सौकुमार्यमाविष्करोतीत्युपरम्यते। **अलंकारसर्वस्व**मतेनातिशयोक्तिरलंकारः। संमददाने सानन्दमौचितीमावहति पुरुषः प्रमदायुक्तः। शृङ्गारः (रसः)। वैदर्भी रीतिः। प्रसादो गुणः।।६६-ख।।

**(३) जगद्धरकृत- सारदीपिका (टीका नोपलब्धा)**

**(४) शंकरमिश्रकृत-रसमञ्जरी (टीका नास्ति)**

**(५) लक्ष्मीधरकृत-श्रुतिरञ्जनी (टीका नास्ति)**

**(६) शुक्लध्वजनृपतिकृत-सारवती(टीका नास्ति)**

## (७) वनमालि भट्टकृत-सञ्जीवनी(टीका नास्ति)

## (८) नारायण पण्डितकृत-पदद्योतनिका(टीका नास्ति)

## (९) कृष्ण पण्डितकृत-जयन्ती(टीका नास्ति)

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)(टीका नास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६६-ख।। (रसिकप्रिया) सानन्दमिति। नन्दसूनुः श्रीगोपाले वो युष्मभ्यम्। मितपरममेयं संमदं दिशतु। कथं यथा स्यात्। सानन्दं यथा स्यात्तथा। किं कुर्वन। वाह्वोर्विसरमनु राधां मदं मन्दमाधाय। मन्दं मन्दमिति मैनां करस्पर्शोऽपि व्याकुलीकुर्य्यादिति तस्याः शिरीषपुष्पाधिकसौकुमार्य्यं व्यजते। प्रीतियोगाद्दृढ़ं पीड़यन्नालिङ्गयन्। दृढं पीड़यन्नित्यत्यानुरागातिशयो व्यज्यते। तेन च तद्गतं विषयं व्यज्यते। पुनः किं कुर्वन। इति वलितग्रीवं यथा स्यात्तथा आलोकयन्। इतीति किम्। तस्याः वरतनोरतनु शीघ्रं यथा स्यात्तथा तुङ्गौ उरोजौ पुष्ठं निर्भिद्य तस्माद्वहिर्निर्गतौ मा स्म भूताम्। अनेनोरोजयोः काठिन्यं तीक्ष्णत्वं च व्यङ्ग्यम्। अतवा वरतनोरिति एकपदत्वेन अतनोः कामस्य बरा उत्कृष्टा तनुरिति वेति। अनयैव कामो विश्वजयाय मूर्त्तिमानित्यर्थः। अत्राद्भुतो रसः। राधामाधायेत्यादिशृङ्गारः। न चानयोरन्योन्य विरोधः। अन्यपरत्वात्। अद्भुतो वाच्योऽप्यङ्गम्।

यदाह, ''विवक्षितरसे लब्ध प्रतिष्ठे तु विधायिनाम्। वाच्यानामङ्गभावं वा प्राप्तिनामुक्तरच्छला।'' ।।इति।। विशेषतस्त प्रस्तुतकार्य्यसौ प्रकृतिरमणीयायां तस्यामधिकतरं सौकुमार्य्यामा विष्करोतीमावहति पुरुषः प्रमादायुक्तः। शृङ्गारः (रसः)। वैदर्भी रीतिः प्रसादो गुणः।।६६-ख।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा (टीका नास्ति)

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६६-ख।। सानन्दं नन्दसुर्नुदिशत्विति; नन्दसूनुः श्रीकृष्णः वो युष्मभ्यं मितपरममेयं दिशतु। सानन्दमानन्देन साकमिति। किं कुर्वन्? मन्दं मन्दं धीरं धीरं मदेन सह समदं सहर्षं श्रीराधाम् आधाय गृहीतवान्, क्रोडे अधारयत्। कथम्? वाहुद्वयं उरुद्वयं श्रेष्ठं अर्थात् तस्याः बाहोः उरसः आलिङ्गनप्रसङ्गे अधारयत्। येन तस्याः कामपिपासा वर्द्धते। तदनु ततः परं प्रीतियोगात् प्रेम्णा दृढं पीडयन् दृढं बलेन वा पीडितवती। येन अस्याः शरीरस्य शीरीषकोमलाङ्गत्वं द्योत्यते। तेन पीडनं प्रीत्यधिकं द्योत्यते। पुनः किं कुर्वत इति वलितग्रीवं यथा स्यात्तथा आलोकयन्। तेन इतीति किम्? तस्याः

वरतनोरतनु शीघ्रं यथा स्यात्तथा। तुङ्गौ उरजौ पृष्ठं निर्भिद्य तस्मात् वर्हिनिर्गतौ मा स्म भूयात्। अनेन कुचयो: काठिन्यं तैक्ष्णं च व्यज्यते। अतनो: वरतनुरिव कन्दर्पस्य श्रेष्ठशरीरमिव दृढं पीडयति प्रीतियोगात्। अनयैव कामो विश्वजयाय मूर्त्तिमानिति। अत्र अद्भूतो रस:। राधामाधवायेति शृङ्गार:। न चानयोरन्योन्यविरोध:। **अलंकारसर्व-स्व**मतेन अतिशयोक्तिरलंकार:। शृङ्गाररस:। वैदर्भीरीति:। प्रसादगुण:।।६६-ख।।

**६६-ग-सौन्दर्यैकनिधेरनङ्गललनालावण्यलीलाजुषो**
**राधाया हृदि पल्वले मनसिजक्रीडैकरङ्गस्थले।**
**रम्योरोजसरोजखेलनरसित्वादात्मन: ख्यापयन्**
**ध्यातुर्मानसराजहंसनिभतां देयान्मुकुन्दो मुदम्।।६६-ग।।**

**(१) नारायणदाशकृत- सर्वाङ्गसुन्दरी (टीका नास्ति)**

**(२) राणाकुम्भकृत- रसिकप्रिया**

।।६६-ग।। सौन्दर्येति। मुकुन्दो मुदं देयात्। अर्थाद्भक्तेभ्य:। मोचयति क्लेशात्प्राणिन इति मुकुन्द:। किं कुर्वन्? धातुर्नरस्य मानस इव मानसे राजहंससदृशतां कथयन्। कस्मात्? राधाया हृदि पल्वले पल्वल इव पल्वले रम्योरोजसरोजखेलनरसित्वात्। रम्यौ मनोहरौ उरजावेव सरोजे तत्र खेलनं तत्र रसित्वमेकाग्रभावस्तस्मात्। पल्वले किल सरोजसंभव:? तत्र हंसेनैव भाव्यमिति रूपकमलंकार:। किंविशिष्टे हृदे? मनसिज: कामस्तस्य क्रीडार्थमद्वितीयरङ्गभूमौ। किंविशिष्टाया राधाया:? निधीयत इति सौन्दर्यस्याद्वितीयो निधि: सौन्दर्यैकनिधिस्तद्रूपाया:। पुन: किंभूताया:? अनङ्गस्य ललना रति: तस्या लावण्यं तल्लिलया जुषतीति तस्या रतिरुपया इत्यर्थ:। शार्दूलविक्रीडितं छन्द:। प्रतिपदं रूपकमलंकार:। तल्लक्षणम्, "किंचितसाधर्म्य-संपत्तेस्तुल्यावयवलक्षणम्। स्वैर्विकल्पैर्विरचितं रूपं रूपकमिष्यते" इति। आशीश्चालं-करोऽपि।।६६-ग।।

**(३) जगद्धरकृत- सारदीपिका (टीका नोपलब्धा)**

**(४) शंकरमिश्रकृत- रसमञ्जरी (टीका नास्ति)**

**(५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीका नास्ति)**

**(६) शुक्लध्वजनृपतिकृत- सारवती (टीका नास्ति)**

**(७) वनमालि भट्टकृत- सञ्जीवनी (टीका नास्ति)**

## (८) नारायण पण्डितकृत- पदद्योतनिका

श्रीगुरुभ्यो नमः

जयदेवकृतेभाविं नाख्यातुं कवयोऽप्यलम्।
मादृशो मन्दबुद्धिस्तु तद्व्याख्याने कुतः क्षमः।।
तथापि तद्रसास्वादमोहितः किञ्चिदावदे।
धत्तुरमोहितानां किं न गृह्णन्ति वचो जनाः।।
जयदेवकवीन्द्रस्य वचस्सुरतरोरहम्।
पञ्चसद्रत्नस्तबकः विचिन्वे कृपया गुरोः।।

।।६६-ग।। कविः कथाप्रसङ्गं तावत्प्रस्थाप्य सर्गान्ते भक्तानामशिष आशास्ते सौन्दर्यैकनिधिरिति। अत्र मुकुन्दः मुक् मोक्षं ददातिति दः। भक्तानां संसारमोक्ष-सुखप्रदाता भगवान्। सौन्दर्यैकनिधेः सुन्दरस्य भावः सौन्दर्यं तस्यैकनिधिः मुख्याश्रयः तस्य। एके मुख्यान्यकेवलाः (अमरः ३.३.१६) इत्युक्तत्वात्। संख्यावाचक-स्याप्येकशब्दस्य मुख्यार्थकत्वं ज्ञेयम्। सौन्दर्यसागरस्य श्रीकृष्णस्येति शेषः। मानसे मानससरोवरे विद्यमानो। राजहंसः मानसराजहंसः राजहंसनामा पक्षिविशेषः तस्य निभतां साम्यं मानससरः स्तितराजहंसपक्षिसाम्यम्। ध्यातुश्चिन्तयतो योगिनः तं प्रतीत्यर्थः। मुदं मुक्तिसुखं देयात् दद्यादित्यन्वयः। दा दान इत्यतो लिङ्। देयात् देयास्तां देयासुः इति रूपाणि। किं कुर्वन् सन् ध्यानकर्तेत्यत आह रम्येति। राधायाः तत्राम्भाः उरसि जायेते इति उरोजौः; रम्यौ च तौ उरोजौ च रन्यौरोजौ; सरसि जायेते इति सरोजे; तयो खेलनसरित् क्रीडासरः तत्तादात्म्यं तदात्मनो भावः तादात्म्यं पद्मसरः स्वरूपमित्यर्थः।

आख्यापयम् सम्यक्प्रकटयन्। यद्वा सत्पसु प्रथमा इति सूत्रात् प्रथमा षष्ट्यर्थे। प्रकटयन् प्रकटयतः। कस्मिन् तादात्म्यप्रकटनमित्याशङ्क्याहहृदीती। अत्रापि राधाया इत्यस्यानुकर्षः। हृदि पल्लव इति सामानाधिकरण्येनाभेदो बोध्यते। राधाहृदयमेव पल्लवं अल्पकर्दमोदकस्थानं तत्रेत्यर्थः। कथम्भूते पल्वले ? मनसि जायत इति मनसिजः अल्लुक्समासः। मनसिजो मन्मथः तस्य क्रीडाभिः लीलाभिः करालस्थले अरस्यस्थले पल्वलं महिष्यादिभिः करालम्। मन्मथोद्भित्रराधाहृदयं श्रीकृष्णाख्यराजहंसविहार-श्रयकुचसरोजाश्रयत्वेन मानससरोवरमिति ध्यातुराशिप्रायः। यद्वा कथम्भूताया राधायाः ? सौन्दर्यैकनिधेः। कलाख्यललनालावण्यवल्लीजुषः चतुष्षष्टिकला विद्याख्या या ललना स्त्री तस्याः लावण्यं कान्तिः तदेव वल्ली लता तां जुषते सवेत इति जुट् तस्येत्यर्थः। चतुष्षष्टिकलाविद्याविशारदत्वात्सौन्दर्यैकनिधिरिति भावः। आभ्या

राधाविशेषणाभ्यां तद्धृदयस्य पल्वलत्वमुपपादितम्। तत्राद्य नासेव्यत्वम्। निधिसमीपस्थस्य पल्वलस्य कथमप्यसेव्यत्वात्। द्वितीय वल्लीग्रहणेन कित्र पत्रतुणादिमत्त्वं द्योत्यत इति बोध्यम्।

### (९) कृष्ण पण्डितकृत- जयन्ती (टीका नास्ति)

### (१०) धनन्जय धरणीदेवकृत- सर्वाङ्गसुन्दरी (नूतन) (टीका नास्ति)

### (११) पूजारी गोस्वामीकृत- बालवोधिनी

।।६६-ग।। (रसिकप्रिया) सौन्दर्येति। मुकुन्दो मुदं देयात्। अर्थाद्भक्तेभ्यः। मोचयति क्लेशात् प्राणिन इति मुकुन्दः। किं कुर्वन्। धातुः नरस्य मानस इव मानसे राजहंससदृशतां कथयन्। कस्मात। राधाया हृदि पल्वले पल्वल इव पल्वले रम्योरोजसरोज खेलनरसित्वात्। रम्यौ मनोहरौ उरजावेव सरोज तत्र खेलनं तत्र रसित्वमेकाग्रभावस्तस्मात्। पल्वले किल सरोजसंभवः। तत्र हंसेनैव भाव्यमिति रूपकमलंकारः। किंविशिष्टे हृदि मनसिजः कामस्तस्य क्रीडार्थमद्वितीयरङ्गभूमौ किं विशिष्ठाया राधायाः। अनङ्गस्य ललना रतिः। तस्या लावण्यं तल्लिलया जुषतीति तस्या रतिरुपया इत्यर्थः। शार्दूलविक्रीडितं छन्दः। प्रतिपदं रूपकमलंकारः। तल्लक्षणम्, "किंचितसाधर्म्यसंपत्ते स्तुल्यावयवलक्षणम्। स्वैर्विकल्पैर्विरचितं रूपं रूपक मिष्यते"।।।इति।। आशीश्चालंकरोऽपि।।६६(ग)।।

### (१२) लक्ष्मणकृत- रसिकरङ्गदा (टीका नास्ति)

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६६-ग।। सौन्दर्येकनिधेति; मुकुन्दो मुदं देयात्। भक्तेभ्यो देयात्। मोचयति क्लेशात् प्राणिनः इति मुकुन्दः। किंकुर्वन् मोचयति? ध्यातुर्नरस्य मानस इव मानसे राजहंस सदृशतां कथयन्। कस्मान्? श्रीराधायाः हृदि पल्वले पल्वल इव पल्वले पंके रम्योरोजसरोज-खेलन-रसिकत्वात्। रम्यौ मनोहरौ उरजावेव सरोजे तत्र खलेनं तत्र रसिकत्वमेकाग्रभावस्तस्मात्। पल्वले खलु सरोज सम्भवः। तत्र हंसेनैव भाव्यमिति रूपकालंकारः। किंभूते हृदि? मनसिजः कामस्तस्य क्रीडार्थमद्वितीयरङ्गभूमौ। किंभूतायाः श्रीराधायाः? निधीयत इति सौन्दर्यस्याद्वितीयो निधिः तद्रूपायाः। पुनः किम्भूतायाः। अनङ्गस्य ललना रतिः। तस्याः लावण्यं तल्लीलया जुषतीति रतिरूपायाः इत्यर्थः। शार्दूलविक्रीडितं छन्दः। अत्र प्रतिपदं रूपकंमलंकारः। आशीश्चालंकारेऽपि कुम्भनरपतेः मतम्।। ६६(ग)।।

**इति श्रीगीतगोविन्दे राधिकामिलने सानन्ददामोदरो नामैकादशः सर्गः।।**

# ।। द्वादशः सर्गः ।।

## सुप्रीतपीताम्बरः



# ।। द्वादशः सर्गः ।।

।सुप्रीतपीताम्बरः।

**६७-गतवति सखीवृन्देऽमन्दत्रपाभरनिर्भर**
**स्मरपरवशाकूतस्फीतस्मितस्नपिताधराम्।**
**सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लव**
**प्रसवशयने निक्षिप्ताक्षीमुवाच हरिः प्रियाम् ।।६७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६७।। अस्मिन् द्वादशसर्गे स्वाधीनभर्त्तृका वर्ण्णनीया। उक्तं च **नायिकालक्षणे,**

क्षणं कराह तेनैव क्षणं चरणपातिना।
कन्दुकेनेव कास्तेनाक्रीडत्स्वाधीनभर्त्तृका।
कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम्।
विचित्रविभ्रमाशक्ता सा स्यात्स्वाधीन भर्त्तृका।
अपि च, रे च शत काटि विलाग्नं लसिता स पाता पत्तिस्स।
ह्रियामाण उपत्थं उन्मोन्माचन्ति विकताहेइ ।।

प्राकृतत्वात्पूर्वनिपातो मानशब्दस्य।

गीतावतार श्लोकमाह। गतवतीति। सखीवृन्दे गतवति सति हरिः प्रियामुवाचेति योजना। किं कृत्वोवाचेत्याह। सरसमनसं दृष्वेति कथं तस्या सरसं मनो ज्ञातव्यमित्याह। मन्दत्रपेति। मन्दे यस्त्रपाभरस्तेन निर्भरो योऽसौ स्मरस्तस्य यः शरस्तद्वशो यः आकूतोऽभिप्रायः तेन स्यूतं ग्रथितं यत् स्मितं तेन स्नपितः पवित्री कृतः अधरो यस्या इति विग्रहः। मुहुर्नवपल्लव प्रसरशयने निक्षिप्ताक्षीमिति मुहुर्वारम्बारं नवपल्लव रचिते प्रसरशयने विस्तीर्ण्णशय्यायामर्पिताक्षीमित्यर्थः। यद्वा नव पल्लवाश्च प्रसवाः पुष्पाणि च तेषां शयनं तस्मिन,

शङ्कासूयाभयं ग्लानिर्व्याधिश्चिन्ता स्मृतिर्द्धृतिः।
औत्सुक्यं विस्मयो हर्षो ब्रीडोन्मादौ मदस्तथा।
विवादो जडतानिद्रावहित्था चापलं धृतिः।
इति भावाः प्रयोक्तव्याः शृङ्गारे दयभिचारिणः।। इति ।।६७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६७।।इदानीं चिरकालकाङ्क्षितराधादर्शनोल्लासिमानसो हरिस्तामाह,गतवतीति। हरि: प्रियां राधामुवाच। किंभूतां प्रियाम् ? मुहुर्वारंम्बारं नवपल्लवानां प्रसवोऽथवा नवपल्लवाश्च प्रसवा: कुसुमानि च तेषां शयनं तस्मिन्दत्तदृष्टिम्। किं कृत्वा ? सरसं सरागं मनो यस्या एवंभूतां दृष्ट्वा। पुन: किंभूताम् ? अमन्दो यस्त्रपाभरस्तेन निर्भरो य: स्मर: तत्परवशं यदाकूतमाशयस्तदनुविद्धं यस्मिन् तेन स्नपितोऽधरो यस्या: सा। क्व सति ? सखीसमूहे गतवति सति। 'स्मरवश' इति वक्तव्ये 'पर'ग्रहणमतिशयेन तदधीनत्वद्योतनाय। हरिणीवृत्तम्। अस्मिन्सर्गे स्वाधीनभर्तृका नायिका वर्णनीया। तल्लक्षणम् (शृं.ति.१/७४) 'यस्या रतिगुणाकृष्ट: पति: पार्श्वं न मुञ्चति। विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्तृका' ।।६७।।

## (३) जगद्धरकृत-सारदीपिका

।।६७।। गतवतीति अथ हरि: कृष्ण: प्रियां वल्लभां राधां सरस मानसं रसोनुरागस्तत्सहितं मनोयस्यास्तां दृष्ट्वा उवाच वक्ष्यमाणमिति शेष: कस्मिन्सति सखीवृन्दे सखी समूहे गतवति सति कीदृशीं राधां मन्दोऽल्पो योऽत्रपाभरो लज्जाभरस्तेन निर्भरेऽतिशायितो य: स्मरस्तत्परभवस्तदाख्यो आकुतोऽभिप्रायस्तेन स्फीतं प्रवृद्धं यत स्मितमीषद्धसितं ते न स्नपितौ व्याप्तावधरौ यस्यास्ताम् अथ मदक्रूर इति स्मरविशेषणं पुन: कीदृशीं मुहु: पुन: पुन: नवपल्लवप्रसवशयने नवपल्लवपुष्पमये शयने विक्षिप्ताक्षीं निहितनयनां शय्यालोकने न सुरतेच्छा ध्वन्यते अस्मिन्सर्गे स्वाधीनभर्तृका नायिका वर्ण्यते ''यस्या: रतिगुणा कृष्ण: पतिपार्श्वं न मुञ्चति विचित्रविभ्रमा भक्ता सा स्यात्स्वाधीनभर्तृका'' ।।६७।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६७।। गतवतीति। हरि: प्रियां राधामुवाच। क्व सति ? सखीवृन्दे सखीसमूहे गतवति सति। कीदृशीम् ? अमन्दत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्न-पिताधराम्। अमन्द: क्रूरोऽथ त्रपाभरेण लज्जासमूहेन निर्भरोऽतिशयो य: स्मर: कामस्तत्परवशस्तदायत्तो य आकूतोऽभिप्रायस्तेन स्फीतं प्रवृद्धं यत्स्मितं तेन स्नपितौ व्याप्तौ अधरौ यस्यास्ताम्। पुन: कीदृशीम् ? सरसमनसं रसोऽनु रागस्तत्सहितं मनो यस्यास्ताम्। किं कृत्वा ? नवपल्लवप्रसवशयने नवकिसलयपुष्पमये शयने शयनीये निक्षिप्ताक्षीं निहितनयनां विलोक्य दृष्ट्वा। अत्र शय्याविलोकनेन संभोगेच्छा ध्वन्यते ।।६७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६७।। अत्र सर्गे स्वाधीनपतिका वर्ण्यते। अस्याः लक्षणं तु, ''प्रियोपलालिता नित्यं स्वाधीनपतिका मता'' इति। सखी निर्गमनानन्तरं रहः कृत्यं सूच्यति। गतवतीति। हरिः श्रीकृष्णः सखीवृन्दे आलीकदम्बे गतवति सति क्रीडा मन्दिरान्निर्य्याते सति मन्दा स्वल्पा या त्रपा व्रीडा तस्याः भरो भरणम् अथवा मन्दो यो त्रपात्तरः लज्जाभारः त्रपायाः मन्दत्वं चैकान्ता वस्थाना दवगन्तव्यम्। अथवा अमन्देति च्छेदः। अमन्दः बहुल लज्जातिशयः ''अप्यथाति शयोभर'' **इत्यमरः**। त्रपाभरस्यामन्दत्वं च हृदय सङ्गमा- भावकृतमित्यवगन्तव्यम्। तेन निर्भरः प्रवुद्धो यो स्मरः तस्य प्रवृद्धत्वं च लज्जा प्रायादवगन्तव्यम्। तत्परवशेन तस्य परवशत्वस्योपनायकत्वेन तत्परतन्त्रेण इत्यर्थः। आकूतेन संभोगाभिप्रायेण स्फीतं प्रभूतं स्मितं मन्दहासस्तेन स्नपितोऽभिषिक्तो तद्व्याप्त इति यावत्। तादृशोऽधरो यस्याः सा तथोक्ता ताम् आकूत सूतेति क्वचित्पाठः। आकूतेन सूतमनुबिद्धमित्यर्थः एकान्तावस्थित प्रियावलोकन जनितमन्मथो द्रेक स्तम्भेनमन्दहास व्याप्त धारामित्यर्थः।

द्वितीयव्याख्याने अमन्दत्रपाभरेण निर्भरः निर्गतातिशयत्वं च स्मरस्य लज्जया विजितवादत्वगन्तव्यम्। सखीवृन्दनिर्गमनानन्तरम् उदयन्मदनजनितसुरतोद्योगस्य च मन्दहासं परिष्कृताधरामित्यर्थः। किञ्च, तुष्टं सम्भोगशृङ्गारेण सन्तुष्टं, किं च, मुहुः पुनः पुनःनवपल्लव प्रसवशयने नूतन प्रवालकुसुमनिर्मितशय्यायां निक्षिप्ते निहिते अक्षिणी यया तादृशीं लज्जया प्रियमुखावलोकनं परित्यज्य रतिक्रियोचित शय्यायामेव न्यस्ताबलोकितामित्यर्थः। एतादृशीं प्रियां राधाम् अलसं मन्दं यथा भवति तथा दृष्ट्वा विलोक्य सरसं यथा भवति तथा उवाच उचे। दृष्ट्वा दृष्टवा इति क्वचित्पाठः। तदा दर्शं दर्शं प्रीत्यतिशयद्योतनार्थं द्विरुक्तिः। अक्षीत्यत्र ''वहुब्रीहौ सक्थ्यक्ष्णो (५।४।११३)'' रित्यादिना समान्तेषित्वाङीप्। ।।६७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६७।। अथ नारीणां विप्रलम्भेन सम्भोगः पुष्टिमश्नुते। 'कषायिते हि वस्त्रादौ भूयान् भोगो हि वर्त्तत' इति **भरतशास्त्र**दर्शनात् विप्रलम्भवर्णानानन्तरं सम्भोगवर्णन-मारभमाणः प्रसङ्गमवतारयति। सखीवृन्दे राधावयस्याकदम्बे गतवति सति हरिरग्रे वक्ष्यमाणः राधामुवाच वभाषे। कीदृशीम्? मन्दः शिथिलीकृतः त्रपाभरो लज्जातिशयः, तेन निर्भरोऽतिशयितो यः स्मरः कामस्तस्य शरस्य वशमधीनं यदाकूतस्मितमभि-प्रायपूर्वकमीषद्धसितं तेन स्नपित इवाधरो यस्याः सा तथा ताम्। तथा च यथाशक्त्या

धैर्ये कृतेऽपि कृष्णदर्शनेन परायत्ततया तया ईषद्धास्य कृतमिति वाक्यार्थः। पुनः कीदृशीम्? सरसं सानुरागम् अलसं कामाविर्भावमन्थरं यथा स्यादेवं दर्शन् कान्तमित्यर्थात्, मुहुः वारं वारं नवपल्लवप्रसरशयने नवपल्लवानां प्रसरः सम्भारो यत्र तादृशं यच्छयनं तत्र विक्षिप्ते प्रेषिते अक्षिणी यया सा तथा। क्वचित्तु सरसमलसं दशं दर्शं हरिः प्रियामुवाच इत्यन्वय इत्याह। अत्र पुनः पुनः शय्यानिरीक्षणेन श्रृङ्गारोत्सुकता दर्शिता। तदाह, 'मोट्टायितञ्च कुरुते तल्पान्तं मुहुरीक्षते। रतिकर्मवशा नारी सूचयेत्प्रियसङ्गमम्।।'।।६७।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६७।। गतवतीति। सरसं [२]शृङ्गाररससहितं [३]यथा स्यात्तथा हरिः प्रियां श्रीराधां दृष्ट्वा उवाच, वक्ष्यमाणमिति शेषः। कस्मिन् सति? [४]सखीवृन्दे लज्जयाऽसमं अनुपमं गतवति अपयाते सति। कीदृशीम्? अमन्दा अधिका या त्रपा लज्जा तस्या यो भरोऽतिशयः त्यागो वा तेन ये स्मरशराः कामबाणास्तद्वशाद्यदाकूतं साभिप्रायो विलासो वा तेन स्फीतं प्रवृद्धं यत स्मितमीषद्धास्यं तेन स्नपितौ व्याप्तावधरौ यस्यास्ताम्। [५]पुनः कीदृशीम्? मुहुर्वारं वारं नवपल्लवप्रसवशयने नूतनकिसलयपुष्पशय्यायां [६] निक्षिप्ताक्षीं निहितनयनाम्। एतेन सुरतेच्छा तस्याः सूचिता[७] ।।६७।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६७।। गतवतीति। अथ हरिः कृष्णः प्रियां वल्लभां राधां सरसमनसं[८] रसोऽनुरागस्तत्सहितं मनो यस्यास्तां दृष्ट्वोवाच वक्ष्यमाणमिति शेषः। कस्मिन् सति? सखीवृन्दे सखीसमूहे गतवति सति अपयाते सति। कीदृशीं राधाम्? मन्दोऽल्पो यस्त्रपाभरो लज्जाभरस्तेन निर्भरोऽतिशयितो यः स्मरशर[९]स्तस्य वशस्तदायत्तो य आकूतः अभिप्रायस्तेन स्फीतं प्रवृद्धं यत्स्मितं तेन स्नपितो व्याप्तः अधरः यस्यास्ताम्। अथवा मन्दः क्रूर इति स्मर विशेषणम्। [३]पुनः कीदृशीम्? राधाम्[४]मुहुः पुनः पुनः नवपल्लवपुष्पशयने विक्षिप्ताक्षीं निहितनयनम्। शय्यालोकनेन सुरतेच्छा ध्वन्यते। ।।६७।।

१.सुप्तां-इ.फ.ग.ह.ज. २.श्रृङ्गारयुक्तं-ग. ३.यथा तथा-ग. ४.नास्ति-अ.ब. ५.तः ७.पर्यन्तं नास्ति-अ.ब. ६.नास्ति-अ.ब.इ.ग.ह. ८.सरसानुरागः-ग. ९.तत्परवशस्तदीप आकूतः-क.ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६७।। कविवचनत्वेन वर्णितं पूर्वाष्टपद्या भगवान् तदर्थेऽतिदर्शनानन्तरं किमासीदित्यत आह, गतवतीति। हरिः सखीनां आलीनां वृन्दे समाजे गतवति याते

सति, मन्दः त्रपाभरः ईषल्लज्जोदयः तेन निर्भरः दृढः स्मरः तेन परवशं प्रविष्टं तद्देहस्मरणकस्वत्त्ववृत्तात् आकूतभावः तेन स्फीतं विस्तृतं स्मितं मन्दहसितं तेन स्नपितः आर्द्रित उज्ज्वलितः अधरो यस्यास्ताम्। अनुरागव्यञ्जक मन्दस्मितान्विता-मित्यर्थः। अत एव सरसं अनुरक्तं मनो यस्यास्ताम्। कीदृशीं राधां दृष्ट्वा? नवपल्लवानां प्रसवस्य कोमलतरदलस्य कुसुमस्य शयने मुहुः विक्षिप्ते अक्षिणी लोचने यया ताम्। तत्र शयनाभिलाषिणीमित्यर्थः। प्रियां कान्तां राधां उवाच। अत्र इयं नायिका समानलज्जामदनत्वात् मध्या नायिका। ।।६७।।

## (१०) धनन्जय धरणीदेवकृत सर्वाङ्गसुन्दरी (नूतन)

।।६७।। गतवतीति। सखीबृन्दे गतवति सति हरिः प्रियामुवाच वक्ष्यमाणवचन-मित्यर्थः। किं कृत्वोवाचेत्याह, सरसमनसमिति। सरागहृदयां दृष्ट्वा हृष्ट्वा चेति। कथं तस्याः सरसं मनो ज्ञातमित्याह, मन्दत्रपेत्याह। मन्दो मन्दीभूतः यस्त्रपाभरः लज्जातिशयः, तेन निर्भरो यः स्मरस्तस्य यः शरस्तद्वशं यदाकूतम् अभिप्रायस्तेन। मन्दो यस्त्रपाभरो निर्भरस्मरशरवशाभिप्रायश्च, ताभ्यां वा स्फीतं यत्स्मितम् ईषद्धसितम्, तेन स्नपितः प्रक्षालितः अधरो यस्या इति विग्रहः। किंविधाम्? नवपल्लवमिति। नवपल्लवानां प्रचयरचिते शय्यायां मुहुर्वारम्वारं निक्षिप्ताक्षीम्। निक्षिप्ते अर्पिते अक्षिणी ययेति विग्रहः।।६७।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६७।।अथ तां प्रेमोल्लासाविष्टामालक्ष्य आत्मानं कृतार्थं मन्यमानः श्रीकृष्ण इति दैन्यमाविष्कुर्वन् प्रियामुवाचेत्याह गतवतीति। सखीवृन्दे गतवति सति हरिः प्रियामुवाच। किं कृत्वा?, सरसमनसं तां दृष्ट्वा, यतो मन्दो इषत् त्रपाभिरस्तेन निर्भरो यः स्मरशरस्तद्वशो य आकूतोऽभिप्रायस्तेन स्पीतं यत् स्मितं तेन स्नपितोऽधरो यस्यास्ताम्, अतएव नवपल्लवरचित विस्तीर्णशय्यायां वारंवारं निक्षिप्ता दृष्टिर्यया ताम्।।६७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६७।। एवं सम्भोगस्य पूर्वपरिकरं निरूप्य सम्प्रति तमेव सम्भोगाख्यं शृङ्गारं निरूपयितुं भूमिकां रचयति। गतवतीति, सखीवृन्दे गतवति सति, समीपादपक्रान्ते सति, मन्दः शिथिलीभूतः यस्त्रपाभरो लज्जातिशयस्तस्मान्निर्भरोऽतिवेल उत्शृङ्खल इत्यर्थः। ईदृशो यःस्मरशरस्तद् वशेनाकूतं सम्भोगस्पृहाभिप्रायस्तेन स्यूतं यन्त्रितं

यत् स्मितं दरहसितं तेन स्नपितोऽभिषिक्तोऽधरो यस्यास्ताम्। अत एव नवपल्लवप्रसवशयनेऽतिकोमलपत्रप्रसूनशय्यायां मुहुर्वारंवारमलसं भावविशेषसूचकमन्थरदृष्टिर्यथा स्यात्तथा, निक्षिप्ते निहिते, अक्षिणी यया ताम्। यत् खलु नवपल्लवपुषशयनीयं पूर्वं स्मरणमात्रेणापि भयापादकं जातं, तदेवेदं मामध्यासितुं कथमुत्कण्ठयतीति पुनः पुनः प्रेक्षणमिति भावः। ईदृशीं प्रियां श्रीराधां हरिः दृष्ट्वा तादृशभावानुबन्धस्मेरमुखदर्शनेन हृष्ट्वा च सरसं तस्याः हृदयहारि यथा स्यात्तथा उवाच, वक्ष्यमाणमिति शेषः। 'स्यादुत्पादे फले पुष्पे प्रसवो गर्भमोचने' **इत्यमरः**। औत्सुकाख्यभावस्योदयः।

किमुवाचेत्यपेक्षायां तत्किसलयेत्यादिना गीतेनाह विभासरागेण गीयत इत्युक्तम्। तस्य रूपम्,

'स्वच्छन्दसम्मानीतपुष्पचापः प्रियाधरास्वादसुधाभितृप्तः।
पर्यङ्कमध्यास्य कृतोपवेशो, विभासरागः किल हेमगौरः।।' इति ।।६७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६७।। गतवति सखीवृन्दोति; इदानीं वहुकालाकाङ्क्षितां श्रीराधां कुञ्जे दर्शनोल्लासमानसे उत्फुल्लितः सन् हरिः प्राह। प्रियतमां श्रीराधां उवाच। किम्भूतां प्रियाम्? मुहुर्वारम्बारं नवपल्लवानां प्रसवोऽथवा नवपल्लवाश्च प्रसवाः कुसुमानि शयनं तस्मिन् दत्तदृष्टिम्। किं कृत्वा? सरसं सरागं मनो यस्याः। एवं भूतां दृष्ट्वा। पुनः किम्भूताम्? अमन्दो यस्त्रपाभरस्तेन निर्भरो यः स्मरः तत्परवशं यदाकूतमाशयस्तदनुविद्धं यस्मिन् तेन स्नपितोऽधरो यस्याः सा। क्व सति सखीसमूहे गतवती सति। स्मरपरवशशब्देन अतिशयेन तत्परवश इति द्योत्यते। हरिणीवृत्तम्। स्वाधीनभर्तृकानायिका तल्लक्षणं **नायिकालक्षणे** यथा,
क्षणं कराह तेनैव क्षणं चरणपातिना।

कन्दुकेनेव कास्तेनाक्रीडत्स्वाधीनभर्त्तृका।
कान्तो रतिगुणाकृष्टो न जहाति यदन्तिकम्।
विचित्रविभ्रमाशक्ता सा स्यात्स्वाधीन भर्त्तृका।
अपि च, रे च शत काटि विलाग्नं लसिता स पाता पत्तिस्स।
ह्रियामाण उपत्थं उन्मोन्माचन्ति विकताहेइ ।।

अत्र नवपल्लवशयने नवकिसलयपुष्पमये शयनीये निक्षिप्ताक्षीं निहितनयनां विलोक्य दृष्टवा। अत्र शय्या विलोकनेन सम्भोगेच्छा ध्वन्यते।।६७।।

**६७-क-प्रत्यूह: पुलकाङ्कुरेण निबिडाश्लेषे निमेषेण च**
**क्रीडाकूतविलोकितेऽधरसुधापाने कथाकेलिभि:।**
**आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभू**
**दुद्भूत: स तयोर्बभुव सुरतारम्भ: प्रियंभावुक:।।६७-क।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६७ - क।। यस्मिन् ललितारम्भे प्रत्यूहोऽपि प्रियं भावुको बभूव, ललितारम्भ: तयोरभूत् वभूव इत्यर्थ:। अन्यत्र ग्रन्थारम्भे मध्ये वा प्रत्यूहो दोषजनको दृष्ट इह त्वादौ मध्ये वा प्रत्यूह: क्रीडारम्भस्य ललितत्वं, कुत्र कुत्र केन केन प्रत्यूह इत्याह। पूलकाङ्कुरेणेत्यादि, अधर सुधापाने कथानर्मभि: कथाक्रीडाभिरित्यर्थ:। आनन्दातिशयेन मन्मथ कलायुद्ध इति शृङ्गार इत्यर्थ:। विघ्नोऽन्तराय: प्रत्यूह:। ''क्रीडा खेला च नर्म्म च'' **इत्यमर**:।।६७-क।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६७-क।। इदानीं सुरतारम्भं विवर्णयिषुराह, प्रत्यूह इति। तयो राधामाधवयो: स चिरं काङ्क्षित: सुरतारम्भ उद्भूत: प्रवृद्ध: सन् प्रियंभावुको बभूव। स क:? यस्मिन्सुरतारम्भे निबिडाश्लेषे दृढतरालिङ्गने पुलकाङ्कुरेण रोमाञ्चमात्रेणापि प्रत्यूहोऽभूत् । 'अङ्कुर' ग्रहणं तन्मात्रमपि आलिङ्गनान्तराय इति ज्ञापनार्थम्। आश्लेषारम्भेऽपि सात्त्विको रोमाञ्चोऽभूदिति युज्यते। अपि च, यस्मिन्क्रीडाकृतविलोकितेऽपि निमेषेण प्रत्यूहोऽभूत्। विलोकितं निमेषितमात्रस्याप्यसहमभूत्। अनु च, अङ्गादङ्गान्तरसौन्दर्यदिदृक्षालोलं नेत्रं नैकत्राप्यवयवे धृतिं बन्धेति व्यज्यते। अधरसुधापाने कामकथा क्रीडनमन्तरायो जात:, अधरपाने प्रियालापो न सोढ:, अतिशयेनाधरं पातुमिच्छोरतिप्रियालाप: कोऽपि तस्मादप्यधिकरुचिर इति व्यज्यते। अपि च, कामकलासु युद्ध इव युद्धे करणात्करणान्तरारम्भे आनन्दाधिगमेनापि अन्तरायो यथा कामजननाकाङ्क्षापि शिथिला भवेदिति वाच्यार्थ:। कामोत्पत्तौ संजायमानायामत्यमनस्कत्वाय तत्प्रतिबन्धक-करणान्तरमारब्धमिति व्यङ्ग्योऽर्थ:। अत एव प्रवृद्धत्वमुचितम्। शार्दूलविक्रीडितं वृत्तम्। यथासंख्यमलंकार:। संभोगाख्य: शृङ्गारो रस:। 'जयमङ्गलतालेन पद्यं शृङ्गारनिर्भरम्। गीता: पाटा: स्वरास्तेना उच्यन्ते यत्र रूपके।। देवशाखाभिधे रागे सुरतारम्भनामत:। चन्द्रहासप्रबन्धोऽयं प्रबन्ध: प्रीतिकृद्धरे:।।' इति सुरतारम्भ-चन्द्रहासनामा चतुर्विंश: प्रबन्ध:।।६७-क।।

## (३) जगद्धरकृत-सारदीपिका (टीकानास्ति)

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६७-क।। प्रत्यूह इति। तयो राधामाधवयोः स लोकोत्तरो ललितारम्भो ललितो मनोहर आरम्भो यस्यैतादृशः शृङ्गारक्रीडाविशेष उद्भूत उद्भटः प्रियंभावुको बभूव प्रियो बभूव।। क इत्यत आह, प्रत्यूह इत्यादि। यस्मिंल्ललितारम्भे निबिडाश्लेषे कर्तव्ये पुलकाङ्कुरेण रोमाञ्चोद्गमेन प्रत्यूहो विघ्नोऽभूत् ।अथ वा, क्रीडाकूतविलोकिते क्रिडासु यदाकूतपूर्वकमभिप्रायपूर्वकं विलोकितं तत्र निमेषेण नेत्रस्पन्दनेन प्रत्यूहोऽभूत्। अथ च, अधरसुधापानेऽधरामृतपाने कर्तव्ये कथानर्मभिः रहःकथाकौतुकैः प्रत्यूहोऽभूत्। अथ च, मन्मथकलायुद्धे सुरते मन्मथस्य कामस्य कलायां कर्तव्यायां मन्मथयुद्धे सुरते आनन्दाधिगमेन आनन्दप्राप्त्या प्रत्यूहोऽभूत्।।६७ - क।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६७-क।। अथ प्रियायाः सुरतोन्मुखी करण प्रार्थनायाः फलमाह। प्रत्यूहेति। प्रियंभावुकः प्रियोभवकन् ''कर्त्तरि भुवः खिष्णुः च'' **(३।२।५७)** ''अरुर्द्विषदवन्ते (६।३।३७)'' त्यादिना मुमागमः। ललितस्य सुरतक्रीड़ाविशेषस्य आरम्भः तयोः राधामाधवयोरुद्भूतः प्रादुर्भूतः बभूव जातः सुरतोपक्रमो जात इत्यर्थः। यस्मिन् सुरतप्रारम्भविषये निविडाश्लेषे दृढ़ालिङ्गने पुलकाङ्कुरेण रोमोद्गमेन प्रत्यूहोऽन्तरायः। ''विघ्नोऽन्तराय प्रत्यूह **इत्यमरः**'' अभूत् पुलकरूपो विघ्नो जात इत्यर्थ। क्रीड़ाकूत विलोकने विभ्रमसूचकालोकने निमेषेण पक्ष्मपातेन प्रत्यूहोऽभूत् निमिषरूपविघ्नो जात इत्यर्थः। अधर सुधापानेअधरामृतसेवने कथानर्मभिरिष्टमधुरालापैः प्रत्यूहोऽभूत् मन्मथकलायुद्धे आनन्दाधिगमेन प्रत्यूहोऽभूत् आनन्दरूपोऽन्तरायोऽभूत्। सुरतकौशल-द्योतनार्थ इषदर्थप्रयोजनम्।।६७-क।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६७-क।। अथ सुरतं वर्णयति। तयो राधामाधवयोः रमितारम्भो रमणोपक्रमः प्रियम्भावुकः प्रियभवनशीलो बभूव। रमितेत्यत्र भावे त्तः। प्रियम्भावुकेत्यत्र प्रियम्भवितुं शीलमस्येति वाक्ये भावे भुवः खिष्णुच्खुकङो कर्त्तरीति खित्वान्मुगागमः। यस्मिन् रमणारम्भे निविडाश्लेषे गाढालिङ्गनपुलकाङ्कुरेण क्रीडाकूतेन विलासाभिप्रायेन यद्विलोकितं विलोकनं तत्र निमेषेण विलोकत इत्यत्र भावे क्तः। अधरसुधापाने कथानर्मभिः कथारूपकेलिभिः मन्मथकलायुद्धे कामचतुःषष्ठिकलान्विन्तसुरतसंग्रामे आनन्दाभिगमेन मुखसम्वेदनेन प्रत्यूहोऽन्तराय उद्भूतः उद्भावितोऽभूदित्यर्थः। एतेन

क्रीडानङ्गीभूतानन्तरितत्वं दर्शयतीत्यासङ्गो दर्शित:। 'क्रीडानर्म च कूर्द्दनर्मि'**त्यमर**:।। 'विघ्नोऽन्तराय प्रत्यूह' इत्यपि।।६७-क।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६७-क।। तमनुवर्ण्य प्रियं[५]प्रति भाविसुरतारम्भमाह, प्रत्यूहेति। तयो: [६]राधाकृष्णयो: स सुरतारम्भ: प्रियम्भावुक: प्रियभवनशील: परमसुखकर्ता वा उद्भूत: प्रकटो बभूव। स क:? यस्मिन् निबिडाश्लेषे गाढालिङ्गने कर्तव्ये सुरतारम्भे पुलकाङ्कुरेण [७] रोमाञ्चोद्गमेन प्रत्यूह: आलिङ्गनविघ्नोऽभूत्। किञ्च [८] यस्मिन् सुरतारम्भे सुरतक्रीडायां यदाकूतमभिप्राय[९]पूर्वकमन्योन्यालोकितं तस्मिन्निमेषेण[१०] पक्ष्मचाञ्चल्यं तेन प्रत्यूहोऽभूत्। किञ्च [११] नैतावदपरमपि तु। [१२] सुरतारम्भे अधरसुधापाने विधेये कथानर्मभि: रह:कथाकौतुकै: प्रत्यूहोऽभूत्। किञ्च[१३] सुरतारम्भे आनन्दाभिगमेन आनन्दप्राप्त्या मन्मथकलायुद्धे कामचतुष्षष्टि-कलान्वितसङ्ग्रामे प्रत्युहोऽभूत्। [१४]एतै: सुरते विघ्नबाहुल्याद्विपरीतरतस्य [१५] दुर्गेयता दुर्लभता च कथिता। ।।६७ - क।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६७-क।। प्रत्यूह इति। तयो राधाकृष्णयो: सुरतारम्भ: [(१६)]प्रियं भावितुं शीलं यस्य स उद्भूत: प्रकटो बभूव। स क:? यस्मिन् सुरतारम्भे निबिडाश्लेषे गाढालिङ्गने कर्तव्ये पुलकाङ्कुरेण रोमोद्गमेन प्रत्यूहो विघ्नोऽभूत्। व्यवधानकर्तृकत्वा[१]द्रोमोद्गमस्य। यस्मिन् सुरतारम्भे क्रीडाकूतविलोकिते क्रीडासु अभिप्रायपूर्वकं यद्विलोकितं तस्मिन् कर्तव्ये निमेषेण पक्ष्म [२] चलनात्प्रत्यूह:। [३] यस्मिन् अधरसुधापाने [४] ओष्ठामृतपाने ५ कर्तव्ये [६]कथाकेलिभि: [(७)]कथाक्रीडाभि: प्रत्यूहोऽभूत्।[८]अपि समुच्चये। यस्मिन् मन्मथकलायुद्धे कामकलान्वित [९] संग्रामे कर्तव्ये आनन्दाधिगमेन आनन्दप्राप्त्या प्रत्यूहोऽभूत्। [१०] च्युत्याऽऽनन्दाप्ति:। ।।६७-क।।

१.पुलकाकरेण-च. २.विलोकने-च. ३.कथाकेलिभि:-नि.सा.ड.सुधानर्मभि:-च. ४.आनन्दाधिगमेन-नि.सा.ड.च.५.प्रतिभाति-अ.ब.६.श्रीवृषभानुसुताश्रीनन्दकुमारयो:-ग. ७.रोमाद्गमेन-इ.फ.ग.ह.ज.८.एवं सुरतारम्भे क्रीडायां सुरतक्रीडायां-अ.ब.९.पूर्वकमवलोकितं-अ.ब.१०.पक्ष्म-चलनेन-इ.ग.ह.पक्ष्मलेन-फ.ज.११.नैतावदपरमपि-अ.ब.१२.त:१३.पर्यन्तं नास्ति-अ.ब.१४.एत: सुरतैर्विघ्नबाहुल्यं विपरीतरसस्य दुर्लभता च कथिता-ग.एतै: सुरते विघ्नबाहुल्यं विपरीतरसस्य दुर्लभता च कथिता-इ.फ.ह.ज.१५.नास्ति-इ. १६.प्रियमासमान्ताद्भवितुं-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६७-क।। एवं भगवद्वचनत्वेनानु (नय) प्रकारं वर्णयित्वा कवि: सुरतं वर्णयति प्रत्यूह इति। यस्मिन् सुरतारम्भे निबिडो गाढश्चासौ आश्लेष: तस्मिन् सति पुलकानां

रोमाञ्चानां आकार: खनि: समुदाय इति यावत् ; तेन प्रत्यूह: विघ्न: अभूत्। क्रीडाया आकूतेन अभिप्रायेण भावेन विलोकने निरीक्षणे निमेषेण प्रत्यूह:। अधर एव सुधा तस्या: पाने चुम्बन इत्यर्थ: ; सुधावन्नर्माणि विनोदवचनानि तै: प्रत्युह:। नर्मगोष्ठ्यर्थमेव चुम्बनत्याग:। चुम्बनकाले वक्तुमशक्यत्वात् प्रत्यूह:। मन्मथस्य कलायुद्धे बन्धविशेष-करणरूपे सुरते आनन्द: विगलितवेद्योत्तरतासहितसुखातिशय: तस्याधिगम: प्राप्ति: तेन प्रत्यूह:। सततबन्धादिकरणे सुखातिशय एव उद्भूत: प्रतिबन्धक: महानमूंत्। स: तयो: राधामाधवयो: सुरतस्यारम्भ: प्रियं इष्टं भावुक: इष्टजनक: बभूव। अत्र पुलकनिमेषनिमित्तानां आनन्दानां प्रसूतानामेव प्रत्यूहत्वक्रियान्वयात् तुल्ययो-गिताऽलङ्कार:। पुलकान्निमेष: स इवान्य इति सादृश्यगम्यत्वात्।

प्रस्तुतानां तथाऽन्येषां केवलं तुल्यधर्मत:
औपम्यं गम्यते यत्र सा मता तुल्ययोगिता।
इति विद्यानाथोक्तलक्षणात्।।।६७-क।।

१.रोमोद्गमो यस्य-ड. २.चलनेन प्रत्यूहोऽभूत्-क. ३.यदधर-ड. ४.नास्ति-ड.ल.म. ५.नास्ति-ड. ६.नास्ति-क. ७.कथानर्मभि:-क.कथामनोभि:-ल.नास्ति-म. ८.च्युत्या आनन्दाप्ति: तया मन्मथकला युद्धेऽपि प्रत्यूहोऽभूत्-ड. ९.सम्भ्रमे-ल. १०.प्रीत्या आनन्दप्राप्ति:-क.च्युतानन्दाप्ति:-च.च्युत्यानन्दाप्ति:-

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६७-क।। प्रत्यूह इति। यस्मिन् ललितारम्भे प्रत्यूहोऽपि प्रियं भावुक: प्रियभवनशीलो बभूव। स ललितारम्भ: ईप्सितारम्भ: एतदुक्त: विघ्नसमानरतारम्भ: तयो: राधामाधवयोरभूत्। अन्यत्र ग्रन्थादावारम्भे प्रत्यूहो दोषजनको दृष्ट:। इह त्वादौ मध्ये वा प्रत्यूह: क्रीडारम्भश्च एक एवेत्यारम्भस्य ललितत्वम्। किंविधम्? उद्‌वृत्त इति। उत्सृष्टं वृत्तं चरितं यत्रेति विग्रह:। उच्छृङ्खल इत्यर्थ:। कुत्र कुत्र केन केन प्रत्यूह इत्याह, श्लेष इति। श्लेषेणालिङ्गने पुलकाङ्कुरेण क्रीडाकूतविलोकने निमेषेण च अधरसुधापाने कथानर्मभि: कथायां यन्नर्म क्रीडा परिहासादिस्तै: मन्मथकलायुद्धे शृङ्गारे इत्यर्थ:। आनन्दाधिगमेन सुखस्य प्राप्त्या कार्यकारणयोरभेदात्। अत्र निबिडाश्लेषविरोधित्वेन पुलकस्य क्रीडाकूतविलोकनविरोधित्वेन निमेषस्य अधर-सुधापानविरोधित्वेन कथानर्मणां मन्मथकलायुद्धविरोधित्वेन आनन्दप्राप्तेश्च विघ्नत्वम्। तस्य सुरतमध्यप्रविष्टत्वात् प्रीतिकरत्वम्। यद्यपि निमेषस्य सुरतमध्यप्रविष्टत्वं नास्ति तथापि विप्रलम्भजनकत्वेन तस्यापि तत्त्वमुपपन्नमिति भाव:। केचित् तयो: सललितारम्भ: प्रियं भावुको बभूव। यस्मिन्नारम्भे निबिडाश्लेषे इत्यादौ, पुलकाङ्कुरेणे-

त्यादिना विघ्नोऽभून्नत्वन्येनेत्यन्वय: इति वदन्ति। ''विघ्नोऽन्तराय: प्रत्यूह:।'' ''क्रीडा खेला च नर्म च'' **इत्यमर:**।।।६७-क।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६७-क।। एवं केल्युपकरणसामग्रीं निरूप्योपक्रमसूचितरह:केलि पर्य्यावसानमाह प्रत्युह इत्यादिना। यस्मिन् सुरतारम्भे प्रत्यूहो विघ्नोऽपि तयो: प्रियं भावुक: प्रीति जनकोद्धभूत्, स सुरतारम्भ उद्भूतो वभुव। अन्यत्रारम्भे मध्ये वा प्रत्युहो दोषजनको दृष्ट:, इह त्वादौ मध्येद्धपि प्रत्युह: उत्तरोत्तरक्रीड़ारम्भक एवेत्यारम्भस्याद्भूतत्वं सूचितं। कुत्र केन प्रत्युह। इत्याह। निविड़ाश्लेषे कर्त्तव्यो पुलकाङ्कुरेण क्रीड़ाकुतविलोकने निमेषेण अधरसुधापाने कथानर्म्मभि: मन्मथकलायुद्धे आनन्दावेशविशेषेण, एतेन केलीनां परमप्रेमविलासत्वं दर्शितम्।।६७-क।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६७-क।।एवमुत्कूलितप्रेमतरङ्गयोर्लब्धविस्त्रम्भयो: श्रीराधामाधवयो: परस्पर-भावाभिव्यञ्जितक्रीडानुकूल्यं निरूप्य सम्प्रति सम्भोगारम्भं वर्णयति। प्रत्यूहेति तयो: परस्परसम्भोगस्पृहामृतजलधिनिमग्नचेतसो: विदग्धयूनो: स: विविधसम्भ्रमसम्पादक: सुरतारम्भणाश्लेषचुम्बनादिसम्भोगोपक्रम: प्रियं भायुक: पुन: पुन: स्पृहणीयतासम्पादन-निदानतया प्रीतिजनको बभूव। एतदेव स्पष्टयति, स: इति क:, यस्मिन् सुरतारम्भे सम्पन्ने निविडाश्लेषे, विरहसमयावधारितनिजनिजतनु, भेदापादितसन्तापहाराय वपुरैक्यकारिणि, परिरम्भे कर्त्तुंमिष्टे, पुलकाङ्कुरेण परस्पराङ्गस्य स्पर्शमात्रोत्थितेन प्रतिलवोपचीयमानरोमाञ्चसञ्चयेन, प्रत्यूहोऽन्तराय उद्भूतो, यातोऽभूत्। कथं पूर्वापेक्ष-याऽऽलिङ्गनसुखोत्फुल्लिता अन्यशून्याङ्गानि तृप्तिं न ददातीति परस्परोत्कण्ठावेगातिरेकं जनयन्तीति भाव:। 'विघ्नोऽन्तराय: प्रत्यूह:' **इत्यमर:**। अनेन सम्भोगरते: परानन्दचमत्कारातिभूमिता दर्शिता। एवमुत्तरत्रापि बोध्यम्। तथा क्रीडाकूतविलोकने, तत्कालीननिजभावाभिव्यञ्जकनिरीक्षणे, चिकीर्षिते, निमेषेण च तादृशभावाभिनिवेश-सञ्जातालस्येन निजनिजप्रेमोत्कुलतासूचकेन पक्ष्मनिमीलनेन च प्रत्यूह उद्भूत:। तथा अधरसुधापाने विरहविषोल्वणसन्तापदोषापहरणकरणातिनिपुणाधरसम्बन्धिसुधाया: पाने मुहुर्मुहु: लोलुपतापादकनिरुपमनि: सीमसन्तोषाधायकसमास्वादने चिकीर्षते, कथा-नर्मभि:, कथाभि: नर्मभिश्च निजनिजसौभाग्यातिशयव्यञ्जकप्रेमसंलापैस्तत्तत्भावो-द्दीपकहृदयहारिविविध परिहासैश्चान्तरायो जात इत्यर्थ:। तथा मन्मथकलायुद्धेऽपि कन्दर्पशिक्षितविविध कौशलोपेतसुरतसम्मर्देऽपि, अपि शब्द: उक्तसमुच्चयार्थ:,

आनन्दाधिगमेन तत्समयोचितपरस्परविविधविचित्रव्यापारदर्शनोदित प्रतिल वोपचीयमानानन्दपारवश्येन प्रत्यूहः समस्तवैजात्यकृत्यविस्मृत्यापादकोऽन्तरायः जात इत्यर्थः। समृद्धिमन्नामकः सम्भोगशृङ्गारोऽयम्। विरहानन्तरसम्भवत्वात्। लक्षणं यथा **श्रीमदुज्ज्वलनीलमणौ**,

'दुर्लभालोकयोर्यूनोः पारतन्त्र्याद् वियुक्तयोः।

उपभोगातिरेको यः कीर्त्तते स समृद्धिमान्' इति।।

तत्रातिभूमितामागतस्य औत्सुकाख्यस्य व्यभिचारिणोभावस्य सम्भोगाङ्गत्वेन उपनिबन्धनात् प्रेयोऽलङ्कारः।।।६७-क।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६७-क।। प्रत्यूहः पुलकाङ्कुरेणेति; राधामाधवयोः स चिरं कांक्षितः सुरतारम्भः उद्बुद्धः प्रवृद्धः सन् प्रियं भावुको बभूव। सः कः प्रियो भावुको बभूव। प्रियो बभूव। सः प्रत्युहः किम्भूतो प्रत्यूहः विघ्नः ? आदौ तावत् आलिङ्गनसमये पुलकांकुरः सञ्जातः। अर्थात अङ्कुरे जाते कण्टकिते आलिङ्गने विघ्नं भवति। पुनः क्रीडायां मुखशोभां विलोकितेन तदानीं निमेषेण अर्थात् पलकपातजन्यान्तरायः भवति। अतः आलिङ्गने रोमाञ्चं तथा च अङ्गादङ्गान्तरसौन्दर्यदिदृक्षालोलं नेत्रं नैकत्रापि अवयवे धृतिबन्धेति व्यज्यते। तृतीयतः मिथरधरसुधापाने कामकथाक्रीडनमन्तरायो जातः। अतः अधरपाने प्रियालापः न सोढः। अतिशयेनाधर रसपिपासया अतिप्रियालापः कोऽपि तस्मादपि ह्यधिकरुचिर इति व्यज्यते। चतुर्थतः कामकलासु युद्ध इव युद्धे करणात् करणान्तरारम्भे आनन्दाधिगमेनापि अन्तरायो यथा कामजननाकाङ्क्षापि शिथिला भवेदिति वाच्यार्थः। कामोत्पत्तौ संजायमानायामन्यमनस्कत्वाय तत् प्रतिबन्धककरणान्तरमारब्धमिति व्यङ्गोऽर्थः। अत एव प्रवुद्धत्वमुचितम्। शार्दूलविक्रीडितम् च्छन्दः। यथासंख्यमलंकारः सम्भोगशृङ्गारः रसः। **राणाकुम्भस्योल्लेखः** यथा,

जयमङ्गलतालेन पद्यं शृङ्गारनिर्भरम्।

गीताः पाटाः स्वरास्तेना उच्च्यन्ते यत्र रूपके।।

देवशाख्याभिदे रागे सुरतारम्भनामतः।

चन्द्राहासप्रबन्धोऽयं प्रबन्धः प्रीतिकृद्धरेः।।

इति सुरतारम्भचन्द्रहासनामा चर्तुविंश प्रबन्धः।।६७-क।।

**६७-ख -दोर्भ्यां संयमितः पयोधरभरेणापीड़ितः पाणिजै-**
**राविद्धौ दशनैः क्षताधरपुटः श्रोणीतटेनाहतः।**
**हस्तेनानमितः कचेऽधरमधुस्यन्देन संमोहितः**
**कान्तः कामपि तृप्तिमाप तदहो कामस्य वामा गतिः।।६७-ख।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६७-ख।। न केवलं प्रत्यूहो रतौ ब्रीडाविघातको बन्धनादिकमपि क्रीड़ाविघातकं न भवतीति प्रतिपादयितुमाह। दोर्भ्यामिति। कामस्य वामा गतिरहो आश्चर्य्यम्। कथं वामागति कामस्येत्याह। दोर्भ्यां संयमित इत्यादि ''भुजवाहु प्रवेष्टो दोवद्यकीलित संयतावित्य**मरः**'', श्रोणीतटेनाहत इति विपरीतरतौ कट्याघात इत्यर्थः। हस्तेनानमितः कच इति विधृतेत्यर्था दधिगन्तव्यम्। एवं दयितया तिरस्कृतोऽपि कान्तः कामपि अनिर्वचनीयतृप्तिं प्राप्त इति कामस्य वामत्वं कुट्टमितनामायं भावः। तल्लक्षणं,

केशस्तनादि ग्रहणं रति हर्ष सम्भ्रमोत्पन्नः।
कुट्टमितं विज्ञेयं सुखसमयो दृष्ट्योपचारः।। इति।।६७-ख।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६७-ख।। तदेव विवृणोति, दोर्भ्यामिति। यद्यस्मात्कारणादेतावत्यपि व्यतिकरे कान्तः कृष्णः कामपि वाचामगोचरे वर्तमानां तृप्तिमाप, तत्तस्माद्हहा कामस्य वामा लोकपथातीता गतिश्चेष्टितम्। अत्र कमितुमिष्ट इति 'कान्त' शब्द औचितीमावहति। यतो दुःखवद्भवने प्रीतिमापेति। किंभूतः कान्तः ? दोर्भ्यां संयमितो बन्धनं प्रापितः। अनु च, पयोधरभरेणापीडितः आ सामस्त्येन पीडामापितः। अनु च, पाणिजैर्नखैराविद्धः। अनु च, दशनैश्च क्षतमधरपुटं यस्य। तथा श्रोणीतटेनाहतस्ताडितः। अपि च, कचे हस्तेन गृहीत्वानमितः। अपि च, अधरमधुस्यन्देनाधरमधुपानेन निमित्तेन संमोहनं प्रापितः। 'अहो' इत्याश्चर्ये। कामस्य वामा गतिः; वामत्वं रसान्तराविर्भावात्। वररसमाश्रित्य कृतापराधः संक्रमेण संयमनापीडनावेधक्षताहत्यवनमनसंमोहनानि प्रापितः कामपि तृप्तिमाप। अपि तु, स्थिरोत्साहः सन् कामयुद्धान्न विररामेति न कामपीत्यर्थः। अतो वामा गतिः। अत्र विरोधः, यस्तु कमितुमिष्टः तस्मिन्कथं संयमनादयो योज्यन्ते ? संयमनादिभिश्च श्रृङ्गारानुभावेष्वालिङ्गनादिषु द्योतितेषु कामपि निरतिशयां प्रीतिमापेति विरोधपरिहारः। अथवा, 'कामस्य वामा' इति वामेव गतिः वामाऽनिष्टेव गतिः। यदेवं व्यतिक्रमेऽप्युद्रिक्तो भवति। शार्दूलविक्रीडितम्। अत्र वाक्यार्थस्य प्राधान्याद्रसस्य च संकीर्णत्वेनाङ्गत्वाद्रसवदलंकारता।। 'विजयानन्दतालेन गौडीरागे विरच्यते। पद्यं पाटाः

स्वरास्तेना लीला नायकसंभवा:।। शृङ्गारकैशिकी रीति: कामतृप्तिपुर:सर:। कामिनीहासनामायं प्रबन्ध: परिकीर्तित:।।' इति कामतृप्तिकामिनीहासनामा पञ्चविंशतितम: प्रबन्ध:।।६७-ख।।

## (३) जगद्धरकृत-सारदीपिका

।।६७-ख।। तदेव विपरीताख्यम् उक्तिवैचित्र्येण कथयति दोर्भ्यामिति कान्त: कृष्ण: कामपि अनीर्वचनीयां तृप्तिं सन्तोषमापन्नाप्राप्त कीदृश: कृष्ण: दोर्भ्यां हस्ताभ्यां संयमित: बद्ध: अर्थात् नायिकाया: पुन: कीदृश: पयोधरभारेण स्तनभारेण पीडित: पाणिजैर्नखैराविद्ध: खण्डित: दशनैर्दन्तै: क्षतमधरपुटं यस्य स: पुन: कीदृश: श्रोणीतटेन कटिप्रदेशेनाह तत स्ताडित: कचे केशबन्धे हस्तेन आनमित: नम्रीकृत: पुन: कीदृश: अधर मधुस्पदेन अधरामृत रसेन मोहित: यत्क्रोधजनकं तदेवातिसंतोषकारकमत एव कामस्य मदनस्य वामविपरीतैव गतिरित्यर्थ:।।६७-ख।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६७-ख।। दोर्भ्यामिति। दोर्भ्या बाहुभ्यामर्थाद्राधया संयमितो बद्ध:। अथ च तथैव पयोधरभरेणं पीडित:। अथ च तया पाणिजैर्नखैराविद्धस्ताडित:। अथ च तया दशनै: क्षताधरपुट: क्षतो दष्टो योऽधरपुटो यस्य तादृश: कृत:। अथ च तया श्रोणितटेन नितम्बेनाहत आस्फालित:। अथ च तया हस्तेनानमित: कचे केशे धृत्वेत्यर्थात्। ततोऽधरमधुस्यन्दनेन संमोहित:। एवं विशिष्टोऽपि कान्त: कामप्य-निर्वचनीयां तृीप्तमाप प्राप। तदहो इत्याश्चर्ये। कामस्य वामा विरुद्धा गति:। यस्य बन्धनादि क्रियते स प्रीतिं न प्राप्नोति; अयं तु तादृशोऽपि प्रीतिमाप। कामस्य विरुद्धैव रीतिरिति भाव:।।६७-ख।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६७-ख।। दोर्भ्यामिति। ग: श्रोणीत्यत्र इत: प्राञ्चादित्वात् ङीप्। अत्र श्रोणिपदस्य जघन परत्वेन बन्धविशेषणत्वात् श्रोण्याहतेरुपपत्तिरवगन्तव्या। तथा करे ललाटाग्रे चिकुरहस्तेन करकमलेनानमित: आनत: अधरपानार्थं कचेष्वाकृष्ट इत्यर्थ:। अथवा अधरसुधापानेन सम्मोहित: परवश: कृत: इत्थं कामपि तृप्तिम् अपूर्वां प्रीतिम् आप प्राप्तवान्। अथवा आप इति वा च्छेद:। तदा आप्राप्तवान् तत्तस्मात्कारणात् कामस्य मन्मथस्य गति: प्रकार: वामा वक्रभूता अहो आश्चर्य्यं यस्मादाप्तसक... नित्यतृप्तं भगवन्तमपि श्रीकृष्णं काम: कामोपभोगरतपरतन्त्रमकार्षीत्। अत्र तुरीयगतेराश्चर्य्यावहत्वं वामत्वं चेतिभाव:।।६७-ख।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६७-ख।। अथ रतान्तं वर्णयति, कान्तः कृष्णः यदैवंभूतः सन् कामप्यनिवर्चनीयां तृप्तिमाप प्राप्तवान् तत्तस्मादहो आश्चर्यकामस्य वामा विरुद्धा गतिश्चेष्टा। तदेव विशिनष्टि- किम्भूतः सन्? दोर्भ्यामर्थाद्राधायाः संयमितो बर्द्धः*, पयोधरयोर्भरेण गौरवेणापीडितः, पाणिजैनखैराविद्धः क्षतगात्रः, दर्शनैर्द्दन्तैः क्षताधरपुटः, श्रोणितटेनाहतः बन्धविशेषेण ताडितः, कचे हस्तेनानमितः कुन्तलाकर्षणेनानमित इत्यर्थः। अधरमधुस्यदेन स्यन्दमानाधरसम्बन्धिमधुना सम्मोहितः सम्मोहं प्रापितः। अत्र स्यन्दत इति स्यन्दः कर्मण्यण्। कृदभिहितो भावो द्रव्यवत् प्रकाशत इति द्रव्याभिधायकत्वम्। अत्रएव 'अमृतरसप्रस्यन्दमाध्वीकभूरिति कुसुमाञ्जलौ। प्रकाशोऽप्येवमेवेति अधरमधुनः स्यन्देन क्षरणेन सम्मोहित इति जगद्धरादयः। तन्मते क्षरणस्यामोहकत्वात् प्रकृतासङ्गतिरित्यवधेयम्। आश्चर्यञ्च यद्यदन्येषां दुःखाय तत्तदेवास्य सुखायेति। यद्वा कामस्य कन्दर्पस्य वामा गतिः वामैव जगद्विजये शरणमित्यर्थः, यत्सम्बन्धिदुःख- दव्यापारैरपि जनान् सुखयति।।६७-ख।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६७-ख।। सुरतमेव विचित्ररसारम्भेण [३] दर्शयति, दोर्भ्यामिति। दोर्भ्यां बाहुभ्यां सापराध इवालिङ्गने संयमितो यन्त्रितः। किञ्च पयोधरभरेण[(४५)]स्तनभारेणपीडितः। किञ्च पाणिजैर्नखैराविद्धः [६]खण्डितः। (दशनैः) दन्तैः क्षताधरपुटः व्रणिताधरः। श्रोणितटेन नितम्बेनाहतः [७]सम्मर्दितः। किञ्च [८] कचे केशे धृत्वा हस्तेनानमितो नम्रीकृतः पादयोर्दास इव। किञ्च अधरमधुस्यन्देन अधरामृतद्रवेण सम्मोहितो विस्मृतान्त[९]करणः कृतः। एवं विडम्बितोऽपि कान्तः [१०] श्रीकृष्णः कामप्यनिर्वचनीयां तृप्तिमवाप। तत्ततो हेतोः अहो आश्चर्ये ; कामस्य वामा विरुद्धा गतिः [११] स्थितिः। [१२]अथ वा वामयति [१३] नामयति वामा पराभवकारिणी वामा मनोज्ञा वा। एतेन विपरीतसुरतं स्पष्टमेवोक्तम्। ''वामो विरुद्धशीले स्यात् क्रूरे रम्येऽपि कथ्यते'' इति [१४] **हलायुधः**। नायकप्रार्थितो दण्डः प्रसादत्वेन विनियुक्त इति ध्वनिः।।६७-ख।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६७-ख।। दोर्भ्यामिति। कान्तः कृष्णः कामप्यनिर्वचनीयां तृप्तिं [१५] सन्तोषमाप। कीदृशः कृष्णः? दोर्भ्यां बाहुभ्यां संयमितो बद्धः। पुनः कीदृशः? पयोधरभरेण[(१६)] स्तनभारेणापीडितः। पाणिजै [१७] र्नखरैराविद्धः खण्डितः। दर्शनैर्दन्तैः क्षतमधरपुटं यस्य सः। श्रोणीतटेन कटिप्रदेशेनाहतस्ताडितः। कचे केशबन्धे हस्तेनानमितो नम्रीकृतः।

अधरमधुस्यन्देन ओष्ठामृतद्रवेण सम्मोहितः। एवम्भूतो [१८]तृप्तिमवाप। [३]अहो आश्चर्ये। कामस्य गतिः स्थितिर्वामा विपरीता। अस्मिन् श्लोके विपरीतसुरतं द्योतितम्।।६७-ख।।

१.दलः-च. २.करे-च. ३.तः४.पर्यन्तं नास्ति-ज. ५.नास्ति-अ.ब.ग. ६.नास्ति-अ.ब. ७.नास्ति-ग. ८.केशे धृत्वा-अ.ब.कचकेशेधृत्वा-इ. ९.रसः-इ.फ.ग.ह.ज. १०.श्रीनन्दसूनुः-ग. ११.स्थितः-अ.कृतः-ब. १२.यद्वा-ग. १३.नामयतीति-इ.फ.ग.ह.ज. १४.नास्ति **हलायुधे** १५.सन्तोषं प्राप-क. १६.पीडितः-क. १७.नखैः-क.ल. १८.तृप्तिमाप-क.ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६७-ख।। घटय भुजबन्धनमित्यादिप्रार्थनया प्रार्थितप्राप्तिरभूदित्याह दोर्भ्यामिति। दोर्भ्यां बाहुभ्यां संयमितः यन्त्रितः, राधयेति शेषः। पयोधरयोः भरेण आपीडितः। आविद्धः आच्छिन्नः। नखानां छेदकत्वेऽपि मृदुत्वे द्योतनार्थं आविद्ध इत्युक्तम्। मार्जार्याः शिशुधारणवत्। दशनैः दन्तैः क्षतं दंशितं अधरपुटं येन सः। पुटशब्दस्य छाद्यच्छादक-द्वयार्थत्वेनोत्तरोष्ठस्य चुम्बनं रसिकासम्मतमिति दल इति सम्यक्पाठः क्षतोऽधरतलपाठेन क्रमभङ्गः। श्रोणीतटेनाहतः परस्परवेगेन नुन्नः। करेण कृष्णस्य कान्तायाः हस्तेन आनमितः करं धृत्वा बन्धादौ नमितः। अधर एव मधु मद्यं तस्य स्यन्देन सम्मोहितः चित्तभ्रंशीकृतः कान्तः कामपि अवाग्गोचरां तृप्तिं तोषरूपां आप प्राप। तत् अहो आश्चर्यम्। कामस्य गतिः वामा वक्रा आघातादिना तोषजनकत्वात्। अत्र सामान्यतः कामगतेः वक्रत्वेन राधामाधवक्रीडायाः समर्थनादर्थान्तरन्यासः। हि शब्दा-भावाद्गम्यः।।।६७-ख।।

## (१०) धनन्जय धरणीदेवकृत सर्वाङ्गसुन्दरी (नूतन)

।।६७-ख।। न केवलं प्रत्यूहो रतौ क्रीडाविघातको बन्धनादिकमपि क्रीडाविघातकं न भवतीति प्रतिपादयन्नाह, दोर्भ्यामिति। कामस्य वामा गतिरहो आश्चर्यम्। कथं वामा गतिः कामस्येत्याह, दोर्भ्यां संयमित इति। बाहुभ्यां बद्धः। ''भूजबाहू प्रवेष्टो दोः।'' ''बद्धे किलितसंयतौ'' **इत्यमरः**। तथा पयोधरभरेणापीडितः तथा पाणिजैर्नखैराविद्धः निखितः। तथा दशनैः क्षताधरपुट इति। क्षतम् अधरपुटं यत्रेति विग्रहः। तथा श्रोणितटेनाहत इति। विपरीतरतौ कृताघात इत्यर्थः। तथा हस्तेनानमितः कच इति विधृतेत्यर्थादधिगन्तव्यम्। तथा सुधास्यन्देन ओष्ठपुटमधुक्षरणेन सम्मोहितः मोहं प्रापितः एवं दयितया तिरस्कृतोऽपि कान्तः कामपि अनिर्वचनीयां तृप्तिम् आप प्राप्तवान् इति कामस्य गतेर्वामित्वम्। दुःखहेतोः सुखजनकत्वं कामगतिजन्यमित्यर्थः। कुट्टमित-

नामालङ्कार:। तल्लक्षणम्, ''केशस्तनाधरादिग्रहणं रतिहर्षसंभ्रमोत्पन्नम्। ...कुट्टमितं विज्ञेयं सुखसमयदु:खोपचारेण।।'' इति।।६७-ख।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६७-ख।। न केवलं प्रत्यूह एव बन्धनादिकमपि प्रीतिजनकं बभुवेत्याह दोर्भ्यामिति। कामस्य प्रेम्नो वामाद्भुता गतिरहो आश्चर्य्यम्! तद्गतोर्वामित्वं कुत: तत् आह, दोर्त्त्यां संयमित इत्यादिना। कान्ताया: संयमादिभि: परिभूतोऽपि यत् कांन्त कामपि अनिर्वचनीयां तृप्तिं प्राप्तस्तदद्भुतमेवेत्यर्थ:।।६७-ख।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६७-ख।। एवं रतारम्भं निरूप्याथ नायिकावैजात्यातिशयप्रतिपादनेन चिरायितरते-र्मध्यावस्थामाह, दोर्भ्यामिति, कान्त: प्रियाभिलाषपूरणरतिकालीनतत्तद्व्यापार-शालितयाऽतिकमनीय: कृष्ण: दोर्भ्यां संयमिति। बाहुपाशाभ्यां वद्ध इत्यर्थ:। कान्तयेति शेष:। न केवलं बन्धंनमात्रम्, किं च पयोधरभरेण, कुचभारेण पीडित:, उरसि भारवान् कृत:। तदनन्तरं पुन: पाणिजै: नखाग्रैराविद्ध:, खण्डित:। पुन: दशनैर्दन्तै: क्षतं दष्टमधरपुटं यस्य स:। दन्तदशनेन व्रणिताधर: सम्पादित इत्यर्थ:। ततश्च पुन: श्रोणीतटेन जघनेनाहतस्ताडित:। पुनश्च हस्तेन करेण, कचे, केशे, गृहीत्वा नमित:। अधरचुम्बनाया-कृष्ट इत्यर्थ:। ततश्चाधरसुधास्वादेन सम्मोहित: निजाधरामृतरसं पाययित्वा विस्मारितपूर्वप्रस्तुतकृत्य इत्यर्थ:। एवं सन्नपि कामपि वक्तुमशक्यां तृप्तिं सन्तोष-माप प्राप्तवान्। तत्, तस्मात्, अहो, आश्चर्यं कामस्य मदनस्य प्रेम्ण: गतिर्वामा। विलक्षणम्। कारणेभ्यो विलक्षणकार्योत्पादकतया विपरीता रीतिरित्यर्थ:। यत्र बन्धनपीडनादीनामपि प्रीतिजनकत्वमित्यद्भुतमिति भाव:।।६७-ख।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६७-ख।। दोर्भ्यां संयमितेति; अत्र कविना कामक्रीडाया: वैपरीत्येऽपि आनन्दाधिक्यमस्ति। अत: कामस्य वामागति: विपरीतगति:। लोके बन्धने कष्टं भवति। परन्तु अत्र दोर्भ्यां हस्ताभ्यां श्रीराधा श्रीकृष्णस्य बन्धनं करोति। संयमितो बद्ध:। पयोधरभरणे कुचभरेण पीडित: भवति। तस्योपरि आरुह्य स्तनभारेण पीडां चायं प्रयच्छति। पाणिजै: नखैराविद्धस्ताडित:। अर्थात् करजलङ्गलै: कृष्णस्य शरीरे चिह्नानि क्ष्यतानि अपि च दशनै: दन्तपङ्क्तिभि: अधरपुट: क्षत: क्षताक्त: कृत:। श्रोणीतटे नाम विपरीत रतिक्रीडायां कटीतटे प्रहार: तेन आहत: नाम क्रीडायां प्राप्त: श्रीराधया। पुन: शृङ्गारसमये श्रीकृष्णस्य कचं नाम केशपाशमपिराकृष्य श्रीकृष्णस्य

गतिः संयमिता नियमिता। अपि च अधरसुधा अधरामृतपानेन तृप्तिमवाप। तृप्तः सन्तुष्टः सन् संम्मोहितः संमोहनमूर्च्छागतं भावं प्राप्तवान् कान्तः श्रीकृष्णः। अत्र सर्वः यद्यपि लोके पीडाप्रदं परन्तु कामे शृङ्गारे सुखाय भवति। परन्तु अनेन क्रीडया नायकस्य तप्त्यधिकं तथा नायिकापि संतृप्ता भवति। रसवदलंकारता। शार्दूलविक्रीडितम्। विजयानन्दतालेन गौडीरागे विरच्यते। "पद्यं पाटाः स्वरास्तेना लीलानायक संभवाः। शृङ्गारकैशिकी रीतिः कामतृप्तिपुरः सरः। कामिनी हासनामायं प्रबन्धः परिकीर्त्तितः।"

इति कामतृप्तिः कामिनीहासनामा द्वाविंशतितमः प्रबन्धः।।६७-ख।।

।। त्रयोविंश प्रबन्धः / गीतम् २३ ।।

।। विभासराग एकतालीतालाभ्यां गीयते ।।

**१-किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम्।**
**तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम्।।**
**क्षणमधुना नारायणमनुगतमनुसर राधिके।। ध्रुवम् ।।१ ।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।१ ।। अधुना नारायणमनुगतं क्षणमनुभजेति योजना। नारायणः परमपुरुषस्तु भाग्यवशात् त्वय्यनुरक्तस्तस्मादेनं भजस्वेत्यर्थः। किशलयेत्यादि। हे कामिनि। किशलयशयनतले चरण कमल विनिवेशं कुर्विति योजना। किमेतावता सिध्यतीत्याह। पराभवमिवनुभवत्विति। इदमिति किशलयशयनं कथमस्य पराभवः साध्य इत्याह। तव पदपल्लवैरिति शात्रवतुल्यसंज्ञत्वात् विज्ञेयम्। ''पल्ललोऽस्त्री किशलय-मित्**यमरः**।'' कथं चरणकमलं किशलयशयनं पराभवितुं शक्तमित्याह। सुवेशमिति हंसकाद्यलङ्कृतमित्यर्थः।।१ ।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।१ ।। तदेव वक्ष्यमाणमाह, किसलयेति। तत्र पूर्वं ध्रुवः। क्षणमिति। हे राधिके! अधुना मामनुसर। किंभूतं माम्? क्षणमनुगतं त्वद्दर्शनोत्सवं प्राप्तम्। अथवा, मामनुसर। किंभूतं माम्? क्षणमधुना त्वत्संभोगोत्सवमदेनानुगतं व्याप्तम्। अत्र केचन क्षणमधुना नारायणमनुगतमनुसरेति पठन्ति। तत्र 'माम्' इति प्रकरणागतमनूद्य नारायणविशेषण-त्वेनोपादेयम्। नारासु अप्सु अगनं यस्य इति कामतापोपशान्त्यै शीतलं मामनुसर। मया सह जलक्रीडां कुर्विति वाक्यार्थः। इति ध्रुवः।। अथ पदानि किसलयेत्यादि। हे

कामिनि कामाभिकाङ्क्षिणि ! किसलयशयनतले चरणनलिननिवेशं कुरु विन्यासं कुरु। किसलयानि हि नलिनविशेषान्न म्लानिभाञ्जि भवन्तीत्यत्रावयोरनुरूपं रतं भविष्यतीति व्यज्यते। किसलयानि हि पदपल्लवस्पर्धीनीत्युक्तिलेशेन विवृणोति, इदं किसलयशयनं तव पदपल्लववैरिपराभवमनुभवतु। पदपल्लवावेव वैरिणौ ताभ्यां सकाशात्पराभवम्। अथवा, इदं किसलयशयनं तव पदपल्लववैरि स्पर्धाकृत् । अतः पराभवमनुभवतु। किंभूतं शयनम् ? सुवेशं सुनेपथ्यम्। अत्र तल्पे पदपल्लवन्यासेन करणविशेषः सूचितः।।१ ।।

## (३) जगद्धरकृत-सारदीपिका

।।१ ।। किशलयेति विभासरागः तल्लक्षणं ''स्वच्छन्द सम्मानित पुष्पचापः प्रियाधर स्वादु सुखाति तृप्तः पर्यङ्कमध्यास्य कृतोऽपवेशो भासोविपूर्वः किल हेमपौरः'' इति हे राधे ! अधुना क्षणम् अनुगतम् अधिन मां नारायणम् अनुसर अनुगच्छ अनुसरण-प्रकारमाह हे कामिनि ! कामुके त्वं किशलयैः रचितशयने शय्यातले उपरिभागे चरणनलिनस्य विनिवेशय पादपद्मस्यार्पणं कुरु। इदङ्किशयलशयनं तव पदपल्लवेण वैरी तस्मात्पराभवं तिरस्कारम् अनुभवतु प्राप्नोतु तव पदपल्लवस्य कान्तिहरणात् शत्रुमस्तके हि चरणो दीयते कीदृशम् इदं सुवेशमपि पत्ररचनादिनाऽलंकृतमपि ।।१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१ ।। किसलयेति। गीतस्यास्य विभासरागः आदितालः। गीतार्थस्तु, हे राधे ! क्षणमधुनानुगतं नारायणमनुसर। हे कामिनि ! किसलयशयनतले चरणकमलविनिवेशं पादपद्मार्पणं कुरु। इदं सुवेशमपि सम्यक्पत्ररचनादिना सुष्ठु अलंकृतमपि किसलयशयनं तव पदपल्लववैरिपराभवं तव पदपल्लव एव यो वैरी शत्रुस्तस्मात्पराभवं पराजयमनुभवतु। यद्वा, इदं किसलयशयनं पराभवमनुभवतु। कीदृशम् ? तव पदपल्लववैरिविरोधीत्यर्थः।।१ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१ ।। उवाचेत्युक्तं तत्प्रकारमेव विशदयति। किशलयेत्यादि। नादरामक्रियारागेण गीयत इत्युक्तम्। तस्यायमभिप्रायः। पूर्वत्र वरालिकाया उपस्थापितत्वात्तदनन्तरं तत्सपत्न्या उपस्थानं युक्तमिति तदुक्तम्। ''रामक्रियावराली च कौशी वासन्तयोषित'' इति। एकतालेन गेयम्। क्षणमित्यादि राधेत्यन्तं ध्रुवपदम्। हे राधिके ! अनुगतं त्वां पूर्व मनुसृतं, तव प्रियं पतिं यावत्। नारायणं मां अधुना इदानीम् अधुनेति निपातनात् साधुः। क्षणं स्वल्पकालम् अथवा क्षणशब्दादर्श आदिभ्योऽच्क्षणम् उत्सवं भोगोत्सवं

च नारायणमित्यन्वयः। ''निर्व्यापारस्थितौ कालविशे सोत्सवयोः क्षण'' **इत्यमरः** क्षणमुद्यम्य वा अनुभज सेवस्व। कृष्णसम्मत्यनन्तरभावित्वाद्राधासङ्गतेरनुभजे-त्युक्तमित्यवगन्तव्यम्। अत्र नारायणशब्देन कृष्णाभिधानं तस्य जलशायित्वेन परमपुरुषता सूचनाद्वारावश्यकतासूचनार्थं तदुक्तम्,

आपो नारा इति प्रोक्ता आपा वै नरसूनवः।
अयनं तस्य ताः पूर्वं तेन नारायण स्मृतः।।

इति। केन प्रकारेण इत्याकाङ्क्षायां कृष्णः स्वयमेवसेवा प्रकारमुपदिशति। किशलयेति। हे कामिनि! सुरतेच्छाशालिनि राधिके! प्रकृतोपयोगार्थमनेन सम्बोधन मित्यवगन्तव्यम्। किशलयशयनं पल्लवतल्पशयितं तले तलप्रदेशे चरणनलिनयोः पादपद्मयुगलयोः चकोरवृत्तिसूचनार्थं नलिनग्रहणं विनिवेशनिक्षेपं विन्यासमिति यावत् कुरु देहि।

तेन किं स्यात्तदाह तवेति। सुवेशसङ्केतस्थानमाह। दृश्यमानं किशलयशयनं कर्त्तृ, तव पदपल्लवे चरणकिशलये एव वैरिणी ताभ्यां पराभवम् अधीरभावं तिरस्कारमित्यर्थः। अनुभवतु प्राप्नोतु। निषिध्योपस्थापनार्थं पदपल्लवयोरौपम्यमित्यव-गन्तव्यम्। अतएव वैरित्वं सुघटम् आवयोः सङ्गमात्पूर्वम् उद्दीपकत्वेन वाधकं यत् पल्लवतल्पं तदिदानीं भवच्चरणपल्लवाहतिमनुभवतु। ''अत्युत्कटैः पापपुण्यै रिहैव फलमश्नुते'' इति न्यायेनापराधात् इदानीमेव पराभवस्य युक्तत्वादितिभावः। भवच्चरण सदृश पल्लव विरचितमिति शयनस्य यो गर्वस्तु निर्वाधमिदानीमेवानु भवतु इत्यर्थः। शयने सम्भोगार्थमिदानीमेवावगच्छेति तात्पर्य्यम्।।१।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१।। गीतस्यास्य विभासरागः। एकतालीतालः। रागलक्षणम्, स्वच्छन्दसम्मानीत-पुष्पचापः प्रियाधरस्वादुसुधाभितृप्तः। पर्यङ्कमध्यास्यकृतोपवेशो भाषोविनिद्रान्वित-हेमगौडः।। अस्मिन् सर्गे स्वाधीनभर्त्तृका नायिका। तस्याः लक्षण यथा, 'यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति। विचित्रविभ्रमासक्ता सा स्यात्स्वाधीनभर्त्तृका।' हरिः प्रियामुवाचेति यदुक्तं तद्दर्शयति, हे राधिके अधुना अनुगतमायत्तं नारायणं मां क्षणमनुसर। अत्र नार्य्या अयं नार इति व्युत्पत्त्या नारः त्वत्सम्बन्धिश्रृङ्गारः, तदर्थमायनम् आगमनं यस्येति व्युत्पत्त्या नारायणपदेनानुगतपदेन चानुसरणवीजमुपदर्शितम्। अनुसरणप्रकारमेव दर्शयति, हे कामिनि! किशलयशयनतले नवदलशय्यायां चरणनलिनस्य पादपद्मस्य निवेशं निवेशनं कुरु। निवेशमित्यत्र भावे घञ्। अत्र कामिनिपदेन सम्बोधनेन तवाप्युत्कण्ठा वर्तत एवेति विलम्बेनास्माकं विडम्बनमात्रमिति

दर्शितम्। एवमन्वाचयसिद्धं फलान्तरमपि दर्शयति। इदं किशलयशयनं कर्त्तृ पंराभवं त्वच्चरणाघातरूपतिरस्कारमनुभवतु। एतावता किमस्माकमित्याशंकायामाह, कीदृशम्? तव पादावेव पल्लवौ, तस्य वैरि। पुन: कीदृशम्? सुशोभं सूत्कृष्टा शोभा यस्या: तादृशम्। अनेन द्वेषशबीजाधिक्यं* दर्शितम्। तथा च प्रकृतरिपोरपि पराभवमुद्देश्यं भवति, किं पुनरस्येति वाक्यार्थ:।।१ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।१ ।। हरि: प्रियामाहेति यदुक्तं तद्गीतेनाह, किसलयेति। गीतस्यास्य विभासराग:। तत्स्वरूपम्,

स्वच्छन्दसम्मानितपुष्पचाप: [५]प्रियाधरस्वादुरसाभितृप्त:।
पर्यङ्क [६]मध्यास्य कृतोपवेशो[७]बिभासराग: किल हेममूर्ति।।

तालध्रुवयो स्वरूपमुक्तमेव। हे राधिके [८] अधुना मामनुसर भज।

१ .श्रीरागेण एकतालीतालेन-च. २ .एकतालीताल-ड. ३ .त:४ .पर्यन्तं नास्ति-क. ५ .प्रियारसस्वादु-इ.फ.ग.ह.ज. ६ .पर्यङ्कमध्यस्य-अ.ब.पर्यङ्गमध्येऽस्य-इ.फ.ग.ह.ज. ७ .भासो विपूर्व: किल हेमगौर-इ.फ.ग.ह.ज. ८ .तव क्षणमधुना क्षणमधुरेण मदेन वसन्तेन वाऽनगतं नवाधीनम्। पुन: कीदृश: माम्? हे राधिके अधुना मामनुसर भज। कीदृशम्? क्षणमनुगतं तवाधीनम्। पुन: कीदृशं माम्? ना पुरुषस्तस्यायं नार:शृङ्गार अयनमाश्रयो यस्य तम्।

कीदृशम्? क्षणमनुगतं[१]त्वदनुग्रहक्षणमनुगामिनं [२] अधीनञ्च। [३]अथ वा [४] तत् क्षणमधुना क्षणमधुरेण मदेन वसन्तेन वाऽनुगतं तवाधीनम्। पुन: कीदृशं माम्? ना पुरुषस्तस्यायं नार: [५]शृङ्गार: स अयनमाश्रयो यस्य [६] तम्। तस्येदम् (पा.४.३.१२०) इत्यण्। ''नडादिभ्य: फक्'' (पा.४.१.९९)। तस्य यणादेश:। एतेन शृङ्गाराश्रयो नारायण इति [७]सिद्धम्। [८]यद्वा नारा [९]आपो नारा अश्रुजलानि वा अयनमाश्रयो यस्य तम्। [१०] त्वद्वियोगानलसन्तप्तत्वाज्जले वसामि रोदनं करोमि वेति भाव:। हे कामिनि [११] चरणनलिनस्य (निवेशं) प्रवेशं पल्लवतल्पे कुरु प्रवेशय। इदं तव पदपल्लववैरि [१२]किसलयशयनं यतस्तस्मा[१३]त्पराभवं तत्कान्त्या तिरस्कारमनुभवतुं प्राप्नोतु। कीदृशम्? सुवेशं सुन्दरं पल्लव[१४]रचनादिनाऽलङ्कृतमपि तव पदविपेक्षम्। पल्लवतल्पं त्वच्चरणविन्यासपराजयं प्राप्नोत्वित्यर्थ:। अनेनान्यनायिकाशिरस्सु पादारोप: कृतो भविष्यतीति भाव:।।१ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१ ।।[१५]किसलयेति। अस्मिन् सर्गे स्वाधीनभर्तृका नायिका वर्ण्यते।

यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति।

विचित्रविभ्रमासक्ता स्यात्सा स्वाधीनभर्तृका।। इति [१६]।

[१७]विभासरागलक्षणम्,

स्वच्छन्दं [१८]सम्मानितपुष्पचापः प्रियाधरस्वादु[१९]सुधाभितृप्तः।

पर्यङ्कमध्यास्य कृतोपवेशो भासो विपूर्वः किल हेमगौरः।।

हे राधिके अधुना क्षमं अनुगतं अधीनं नारायणं मामनुसर [२०] अनुगच्छ। अनुसरणप्रकारमाह, हे कामिनि कामुकि त्वं [२]किसलयैः रचितशयने शय्यातले उपरिभागे चरणनलिननिवेशं पादपद्मार्पणं कुरु। इदं किसलयशयनं तव पादपल्लवस्य वैरि तत्तस्मात्पराभवं तिरस्कारमनुभवतु प्राप्नोतु। [३] तव पादपल्लवस्य कान्तिहरणात्। शत्रुमस्तके हि चरणो दीयते। कीदृशमिदम्? सुवेषमपि पत्ररचनादिनाऽलङ्कृतमपि।।१ ।।

१.तदनग्रहः क्षणमनुगामिनम्-अ.तदनुग्रहक्षणमनुगामिनम्-ब.२.अधीनं वा-इ.ग.ह.ज. ३.नास्ति-अ.ब.फ.ग.४.तव क्षणमधुना-इ.ग.ह.ज.५.नास्ति-अ.ब.७.प्रसिद्धम्-अ.ब.८.अथ वा-इ.फ.ह.ज. ९.नास्ति-अ.ब.१०.तद्वियोग-अ.ब.११.चरणनलिनं तव पल्लवतल्पे-अ.ब. १२.यतः शयनं तस्मात्-इ.फ.ग.ह.ज.१३.पराभवकान्त्या-अ.ब.१४.लतादिना-इ.१४.नास्ति-ड.१५.नास्ति-ड.१६.जित-भर्तृकेति क्वचित्पाठः-क.१७.विभासरागः तल्लक्षणम्-क.रागलक्षणम्-ल.म.१८.संनामित-क.समानीत-ल.म.१९.सुधातितृप्तः-क.ल.म.२०.नास्ति-ड.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।१ ।। किसलयेति। हे मानिनि मानवति किसलयशयनस्य तले प्रदेशे, तदुपरीत्यर्थः। चरणावेव नलिने पद्मे तयोर्विनिवेशं कुरु। सुष्ठु वेशो रचना विशेषो यस्मिन् तत्। इदं शयनं तव पदपल्लवस्य वैरं साम्यरूपं तस्य पराभवं तिरस्कारं अनुभवतु। पराभूतस्य पादतलघातः कर्तव्य इति भावः।।१ ।।

ध्रुवाया व्याख्यानम्। राधिके हे राधे अनुगतं अनुकरणपरत्वादनुकूलम्, विधेयमिति यावत्। नारायणं विष्णोरवताररूपम्। अधुना एकान्ते क्षणं अनुसर। परस्परमनुरागत्वं शृङ्गारस्थानाभासत्वम्।।१ ।।

## (१०) धनञ्जय धरणीदेवकृत सर्वाङ्गसुन्दरी (नूतन)

।।१ ।।किसलयेति। हे राधिके! अधुना इदानीं नारायणं मां क्षणमनुभजेति योजना। क्षणेनैव कृतार्थतामापादयिष्यामीति भावः। नारायणः परमपुरुषः सकलकर्मनिरपेक्षः, स तु तव भाग्यवशात्तव रूपेण वशीकृतस्त्वामेव भजते। तस्मादेनं भजस्वेति कृष्ण

एव स्वयमात्मानं व्यपदिशति। अनुभजनस्वरूपमाह, कामिनीति। हे कामिनि! किसलयशयनतले नवपल्लवशय्यायां चरणनलिनविनिवेशं कुर्विति योजना। तलशब्द: स्वरूपवाची। ''तलं स्वरूपेऽनूर्ध्वेऽस्त्री'' इति **मेदिनी**। किमेतावता सिद्ध्यतीत्याह, पराभवमिदमनुभवत्विति। तथा सति इदं किसलयशयनं पराभवमनुभवत्वित्यर्थ:। कथमस्य पराभव: साध्य इत्याह, तव पदपल्लवैरिति। शत्रुत्वं तुल्यं संज्ञत्वाद् विज्ञेयम्। पद्भ्यामाक्रणमेव पराभव:। यद्वा शय्यापल्लवेभ्योऽप्यधिकशोभित्वात् तव पदपल्लवे सन्निहिते सति। किसलयशयनस्य विषयत्वमेव पराभव:। किंविधं किसलय-शयनम्? सुवेशमिति। शोभनो वेशो रूपं यस्येति विग्रह:। शोभनरूपमपि तव पदपल्लवे सन्निहिते पराभूतं भविष्यतीत्यर्थ:। अनेन पदपल्लवस्यातिशोभनत्व-सूचनम्। अत्रार्थवशोभनत्वसूचनम्। ''वेशो रूपे च भूषायां प्रवेशे गृहमात्रके।'' यद्वा शोभनो वेशस्त्वत्सन्निवेशरूपो वेशो यस्येति विग्रह:। नारायणस्य विशेषणं वा।।१ ।।

## (११) पूजारी गोस्वामीकृत बालवोधिनी

।।१ ।। हे राधिके! नारायणं नारीणां समूहो नारं नराणामयनमाश्रयो यस्तं स्त्रीसमूहाश्रयं त्वामनुगतं त्वदेकपरं मामधुना क्षणमनुभज वहुवल्लभोऽप्यहं त्वदेकनिष्ठ इत्यर्थ:। अनुभजनमेवाह किशलय शयनस्योपरि चरणकमलयोर्विन्यासं कुरु, पूजाया: प्रथमाङ्गमासनम् अङ्गीकुर्वित्यर्थ:। मत्पूजाकाम: त्वस्यस्तीति कामिनीशब्द: प्रयुक्त:। तेन किं स्यात्तत्राह, इदं किशलयशयनं पराजयमनुभवतु। कुतोऽस्य पराभव: साध्यस्तत्राह। तव पदपल्लववैरि अरुणतादिभिर्गुणै: साम्याकाङ्क्षाया वैरित्वमिति। कीदृशमिदं सुवेशं तत्तद्गुणै: शोभमानमपि हंसकाद्यलंकृतमित्यर्थ:।।१ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

किमुवाचेत्यपेक्षायां तत्किसलयेत्यादिना गीतेनाह विभासरागेण गीयत इत्युक्तम्। तस्य रूपम्,

'स्वच्छन्दसम्मानीतपुष्पचाप: प्रियाधरास्वादसुधाभितृप्त:।
पर्यङ्कमध्यास्य कृतोपवेशो, विभासराग: किल हेमगौर:।।' इति।

चिरविप्रयुक्तां प्रियामुपलभ्यात्मानं कृतार्थं मन्यमान: दैन्यमाविष्कुर्वन् प्रार्थयते। किशलयेति, हे राधिके! एवं त्वन्निजनामग्रहणामन्त्रणेनापि मम वाक्साफल्यमिति भाव:। नारायणं, नारीणां समूहो नारं, तस्यायनम्, आश्रयभूतमपि अनुगतं त्वदेकप्रवणं मामधुना सम्प्रति न तु बिलम्बेन क्षणं मुहूर्त्तमात्रमनुभज, अङ्गीकुरु। क्षणमात्रं त्वदङ्गीकारेण

कृतकृत्यो भविष्यामीति भावः। कीदृशमनुभजनं तदाह, हे कामिनि! मत्कृतसेवाभिलाषशालिनि! प्रार्थयामि, प्रथमं किशलयशयनतले सङ्केतीकृतपल्लवतल्पमध्ये चरणनलिनयोर्विनिवेशं विन्यासं कुरु। तेन किं स्यादत आह, इदं सुवेशं विचित्रप्रसूनादिरचनाभिभूषितम्। सुदेशमिति पाठे, त्वत्पदविन्यासयोग्यं किशलयशयनं, मद्विरहखिन्नायास्तवपदपल्लवयोर्वैरी, निजाभिरूप्यकोमलादिगुणगर्वेण तत्समत्वाकांक्षी, ततो निजाविनयफलपराभवं तिरस्कारमनुभवतु, प्राप्नोतु। उत्कटापराधिनः खलु शीघ्रानुशासनयोग्यत्वात्। काव्यलिङ्गानुप्राणितसमासोक्तिः।।१।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१।। किसलयशयनतलेति; पूर्वश्लोकानुसारं कुञ्जमागते तथा सख्यः निशून्यतां कृत्वा गते श्रीकृष्णः ईषल्लज्जावतीं मनोरमां श्रीराधां प्रति व्रूते। हे कामिनि! हे कामजर्जरिते प्रिये! किशलयतले कोमलपत्रशय्यायां शयनं कुरु। तव पादकमलयुगं निवेशनं कुरु। तव कोमलकमलपत्रमिव पादयुगलं शय्यायां स्थापय। तव पादयुगलस्य शोभां स्पर्द्धां कर्त्तुं य कश्चित् यतते स खलु पराभवं पीडामनुभवतु। हे राधिके मां क्षणमनुसर। यतो हि त्वत्संभोगोत्सवमदेनानुगतं व्याप्तम्। इति ध्रुवम्।।१।।

**२-करकमलेन करोमि चरणमहमागमितासि विदूरम्।**
**क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम्।। क्षण०।।२।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२।। अहमात्मनः करकमलेन तव चरणपूजां करोमि। यतो विदूर मागमितासि त्वमिति वाक्यार्थः। यो हि दूरादागच्छति तत्पादं पाद्यादिना पूज्यत इत्यर्थः। क्षणमित्यादि। क्षणं शयनोपरि क्षणं मामिव नूपुरमुपकुरु, पादे गृहाणेत्यर्थः। उभयं विशिनष्टि। अनुगत शूरमिति, अनुगमनसमर्थं पादे लग्नमिव यावत्। पादलग्नस्य उपकारः कर्त्तुं युज्यत एवेत्यभिप्रायः।।२।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। अपि च, करकमलेनेति। हे राधे! विदूरं बहुदूरं पन्थानमागमितासि। अतः करकमलेन चरणमहं पूजां करोमि। शयनोपरि मां क्षणं नूपुरमिव उपकुरु। यथा नूपुरमुपकरोषि धारयसि तथा मामप्युपकुरु ममाप्युपकारं कुरु। चरणधारणद्वारेण चारमनुलक्ष्य शूरं यथा तव चरणं गच्छति तथैव विक्रान्तिं करोति। मामपि अनुसरणे शूरं त्वदनुसरणमेव पराक्रमो यस्य। अथवा, शयनोपरि वर्तमाना त्वं मामुपकुर्विति योजनीयम्।।२।।

## (३) जगद्धरकृत-सारदीपिका

।।२।। यतः त्वं विदूरं आगमितासि मया आनीतासि दूरागतस्य चरणसम्वाहनमुचितं त्वं शयनोपरिक्षणं नूपुरं उपकुरु कमिव अनुगति शुरं तवानुसरणे शुरं मामिव यथा आलिङ्गनादिनामामुपकरोषि तथा नूपुरमपि शय्यातलमलंकुरु इति भावः।।२।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।२।। करकमलेनेति। अहं करकमलेन निजकराम्बुजेन तव चरणं करोमि संवाहयितुमर्थात्। यद्वा, तवचरणमहमित्येकं पदम् । तथा च करकमलेन तव चरणयोर्महं पूजां संवाहनादिरूपां करोमि। कथमित्याह, त्वं विदूरमतिदूरमागमिता आनीतासि। अर्थान्मया। तथा च दूरागमनजन्यं ते श्रममपनयामीति भावः शयनोपरि शय्याया उपरि नूपुरमुपकुरु। नूपुरस्य परिधानेन महार्थतापादनमेवोपकारः। कीदृशं नूपुरम्? अनुगतिशूरम्। अनुगतौ तवानुसरणे शूरम्। अपरोऽपि योऽनुगतिशूरो भवति स उपक्रियत इत्युचितमेवेति भावः। कमिव ? मामिव। यथा तवानुसरणशूरं मामालिङ्गनादिनोपकरोषि तथा नूपुरमप्यपकुर्वित्यर्थः।।२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२।। करकमलेनेति। हे राधिके! यस्मात्त्वं विदूरमत्यन्तं दूरमागमितासि ''गर्मेण्यन्तात्कर्मणि क्तः।'' अहं तव चरणम्। अत्र एकत्वमविवक्षितम्। उभयोः परिश्रान्तेरविशेषो ईषद्धसनस्य क्रमिकद्वारा एकत्वोपपत्तिः। अथवा करकमलेन पाणिपङ्कजेन, अत्र पङ्कजग्रहणं कृष्णकरस्य राधाचरणसंवहने मार्द्दवगुणसम्पत्त्या करणत्वाहित सूचनार्थं करोमि सम्वाहनविशिष्टं कुर्वे। मन्दाध्वश्रम निवृत्त्यर्थं तव पादसम्बाहनं करोमीत्यर्थः। अत्र कृष्णस्य करवैशिष्ट्यमङ्गीकर्त्तव्यम्। लोकानुसारात्कामुकमनुसृत्य भगवत्यैवमुक्तमिति न विरोधः। अतिशूरस्य भगवन्नूपुरस्यापि श्रमेण भवितव्यमित्याह। क्षणमिति। अनुगतिरनुयान तत्र शूरं समर्थम् अत्रानुगतिकार्य्यं च भूतकालीनमगन्तव्यम्। न त्वधुना। अनन्तरवक्ष्यमाणविरोधापत्तेः नूपुरं मञ्जीरं शयनोपरि पल्लवतल्पोपरिभागे मामिव क्षणमुपकुरु। यदा भवदनुगति शूरं तव मुख कमलविलोकनप्रदानादिना सम्भावयसि। तव शयनोपरि निक्षिप्य चरणकटकमपि सम्भावयेत्यर्थः। सुरतकाले नूपुरावस्थाने जारसुरतं सर्वे ज्ञास्यन्ति। द्धारयेति तात्पर्य्यम्। न च त्यज मञ्जीरमित्यत्र नूपुरत्यागस्योपविष्टत्वात्तद्धोरप्रसक्तेरभावात्तत्र तदुद्धारक न प्रहारादिना न सम्भावयसि। तव शयनोपरि निक्षिप्य चरणकटकमपि सम्भावयेत्यर्थः उद्दीपकत्वेन समीपागमनवेलायां तत्तद्धारणस्यापि सम्भवात्। तथोक्तमिति विरोधः।।२।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२।। आत्मनोऽनुगतत्वप्रतिपादनेन तदनुरूपकर्मणाभ्यर्थयति। हे राधिके! त्वं दूरमागमितासि दूतीप्रेष्यदूरभूमिभागमितासि। तस्मात् करकमलेन निजकरारविन्देन चरणमहं तव चरणपूजां करोमि। अत्र पूजा दूरागमनव्यथितयोः पदयोः सम्वाहनमेवेत्यवधेयम्। अन्यस्यापि कमलेन पूजनं युज्यत एवेति ध्वनिः। मह पूजायां धातुः। स्वसुखस्यानुद्देश्यत्वेऽपि महतामनुगतोपकृतिरवश्यमुद्देश्या भवतीत्यत आह, क्षणं व्याप्य शयनोपरि नूपरमुपकुरु। तत्तद्बन्धकालीनकान्तिविशेषणोपकृतं कुर्व्वित्यर्थः। कीदृशम्? अनुगतिरनुगमनम् अर्थात् तव, तत्र शूरं क्षममित्यर्थः। कमिव? मामिव, तथा च तस्यानुगतस्योपकारेणाहमपि उपकृतो भवामीति वाक्यार्थः।।२।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२।। करकमलेनेति। किञ्च अहं [४] तव चरणं करकमलेन [५]हस्तकमलेन करोमि संवाहयामि। कथमिति चेत् यतस्त्वं [६]विदूरमागमिताऽसि[७] अतिदूरमागताऽसि सख्यां नीताऽसीति वा। अतः क्षणं नूपुरं शयनोपरि [८]शय्यायामुपकुरु। नूपुरं चरणोर्निवेशयेर्त्थः। कमिव? अनुगतौ तवानुसरणे शूरं मामिव। नूपुरानुगमनशूरत्वकथनव्याजेन तत्पादस्पर्शं प्रार्थयत इति भावः।।२।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२।। करेति। हे राधे अहं करकमलेन ते [९]चरणं करोमि संवाहयामि। धातूनामनेकार्थत्वात्। यतस्त्वं विदूरमागमिताऽसि [१०] मया आनीताऽसि[११]। दूरागतस्य चरणसंवाहन [१] मुचितम्। त्वं शयनोपरि क्षणं नूपुरमुपकुरु। कमिव अनुगतिशूरं तवानुसरणे शूरं मानिव। यथा आलिङ्गनादिना मामुपकरोषि तथा नूपुरमपि। [२]शय्यां तल्पमलङ्कुर्विति भावः।।२।।

१.चरणवहम्-ड.२.किसलयरचित-क.ल.म.३.इदं किसलयशयनं तव पादपद्मस्य पल्लवस्य-क.४.त्वच्चरणं-इ.५.नास्ति-फ.६.दूरमागमिताऽसि-अ.ब.७.दूरमागतासि-अ.ब.८.शय्यायां कुरु-अ.ब.९.चरणवहं पादसंवाहनं-ड.१०.तः११.पर्यन्तं नास्ति-क.ल.म.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।२।। करकमलेति। अहं नारायणः करकमलेन पाणिपद्मेन चरणं करोमि। पूर्वोक्तकिसलयशयने स्थापयामीत्यर्थः। मा याहीति शेषः। मया दूरं त्वं आगमिताऽसि। आनयनेन आया(सि)ताऽसि। दूरानयनार्थं पादसंवाहनं करोमीति भावः। चरणशब्दस्य तत्सेवायां लक्षणा। मामिव अनुगतौ अनुसरणे शूरं समर्थं नूपुरं क्षणमपि शयनोपरि

कुरु। अनुसर। श्रान्ताऽऽश्वसितु। अत्रानुसरणधर्मस्य स्वस्मिन् स्वतः सिद्धमित्युत्कर्षः स्वोपमया व्यज्यते ।।२ ।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२ ।। करकमलेति। अहमात्मानः करकमलेन तव चरणमहं चरणयोः पूजां करोमि। ''मह पूजायाम्'' इति धातुः। यतो विदूरमागमितासि त्वमिति वाक्यार्थः। आगमितेति णिजन्ताद्रूपम्। सखीं प्रेषयित्वा(ष्य) प्रापितेत्यर्थः। यद्वा आगमनमागमः स सञ्जातोऽस्या इति तारकादित्वादितच्प्रत्ययः। यो हि दूरादानीयते आगच्छति वा तत्पादः पूज्य इत्यर्थः। पूजा च पुष्पेण क्रियत इति करस्य कमलत्वेन रूपणम्। विदूरगमनात् चरणौ व्यथते। अतस्ते पादौ सम्वाहयामीति वस्त्वर्थः। क्षणमित्यादि। शयनोपरि क्षणं मामिव नूपुरमुपकुरु। यथा सुरतसमये तल्पोपरि मां क्षणमुपकरोषि तथा नूपुरम् उपकुरुष्व पदे गृहाण। सुरतप्रतिबन्धकतया न निःसारयेत्यर्थः। उभयं विशिनष्टि। अनुगतिशूरमिति। अनुगमनसमर्थं पादलग्नमित्यर्थः। पादलग्नस्य उपकारः कर्तुं युज्यते एवेत्यभिप्रायः। तव पादस्पर्शनमेव कृतार्थताप्रतिपादकम्। क्षणमपि कुर्विति पाठे, क्षणं नूपुरमपि मामिव शयनोपरि कुरु। यथा सुरतसमये शयनोपरि मां क्षणमुपकरोषि तथा नूपुरमपि कुर्विति वाक्यार्थः। यद्वा क्षणमपि नूपुरं शयनोपरि कुरु। नूपुरं किंविधम्? मामिवानुगति- शूरमिति। अनुगतिरानुकूल्यं सहगमनं च। तत्र यथाहं तवानुकूल्यसमर्थः तव नूपुरोऽपि तथा तवानुगतिशूरः सहगमनसमर्थ इति।।२ ।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।२ ।। तदारोहणेन कथं त्वदनुभजनं स्यादित्यत आह आहमात्मनः करकमलेन तव चरणयोः पूजां करोमि, यतस्त्वं विदूरमागमितासि आनीतासि अर्थात् मयेति ज्ञेयम्। दूरागतास्य पूजा युक्तैवेत्यर्थः। तदर्थं क्षणं शयनोपरि नूपुरमिव मामङ्गीकुरु उभयं विशिनष्टि ।अनुगतौ निपुणं अनुगतस्य पदलग्नस्य उपकाराचरणं युक्तमेवेर्त्यः।।२ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२ ।। एवं सप्रणयादरेण मणिबन्धग्रहणपूर्वकं शयनोपरि निवेशनानन्तरस्यैव कृत्यमाह, करकमलेति, हा हा। किमकारिदुर्विदग्धेन मया। यत्सुकुमारतराङ्गी त्वं विदूरमागतासि, अभिसारितासि। अतोऽतिश्रान्तयोश्चरणयोरहं संवाहनरूपोत्सवं शयनोपरि शय्या उपरि करकमलेनाहं करोमि। एतदाकर्ण्य झटिति चरणकमलं सङ्कोचयन्तीं लज्जावनतमुखीं पुनराह, नूपुरमिवानुगतिशूरम्, अनुसरणसमर्थं मामुपकुरु। यथा त्वच्चरणानुविधायितया

त्वदनुव्रजने अविक्लान्तमिमं नूपुरं स्वसेवाङ्गीकारेण उपकरोसि। तथैव मत्कृत-चरणसंवाहनादिसेवाङ्गीकारेण मम क्षणमुपकारिणी भवेत्यर्थः।।२।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। करकमलेनेति; हे प्रियतमे! त्वं विदूरमागतासि बहुदूरतः आगतासि। अतः क्लान्तासि। तव पादसेवां मम करकमलेनाहं विधास्यामि पूजां करिष्यामि। ममोपकारं कुरु। केन प्रकारेण?। अनुगतशूरं अनुगमने वीरः तं। शयनकाले यथा नूपुरं तव अनुगतमस्ति त्वं च धारयसि। तथैव शयनोपरि मामपि अङ्गीकुरु। यथा नूपुरमनुगतः तथैवाहम्। अतः मादृशस्यानुगतस्योपरि अनुग्रहं कुरु। तव चरणसेवायै मां स्वीकुरु।।२।।

**३-वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम्।**
**विरहमिवापनयामि पयोधररोधकमुरसि दुकूलम्।। क्षण० ।।३।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३।। हे राधे! अमृतमिव वचनं रचय सरसं वदेत्यभिप्रायः। कीदृशं वदनसुधानिधि-गलितं, किमेतावता प्रेप्सितं सिध्यतौत्याह, विरहमित्यादि। दूकूलमपनयामि तव वस्त्रं स्फोटयामीत्यर्थः। विरहमिव पयोधररोधकमिति विरहेण पयोधरो द्रष्टुं न प्राप्यते, तथानेनापीत्यर्थः।।३।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।३।। अपि च, वदनेति। हे राधे! अनुकूलं रतिजनकं वचनं रचय। किमिव? वदनं सुधानिधिरिव तस्माद्गलितममृतमिव। तव विरहेण तापिताऽहं कथं वदिष्यामीत्या-शङ्क्याह, तत्र परस्परमुपमानोपमेयभावः। दुकूलमिव विरहमपनयामि विरहमिव दुकूलमपनयामि। किंभूतं दुकूलम्? उरसि वर्तमानम्। पुनः किंभूतं दुकूलम्? पयोधररोधकम्। विरहे हि पयोधरौ न वर्धेते। दुकूलमपि पयोधरावावृत्य तिष्टति। अथवा, पयोधरो मेघ एव रोधको यस्य विरहस्येति। मेघालोके प्रियः समेत्य विरहं रुणद्धीत्युक्तिलेशः।।३।।

### (३) जगद्धरकृत-सारदीपिका

।।३।। वदनेति त्वं अनुकुलं वचनं वाक्यम् अमृतमिव रचय वद कीदृशं वदनमेव सुधानिधि श्चन्द्रस्तस्माद्गलितमुत्पन्नम् अनन्तरम् उरसि वक्षसि वर्त्तमानं दुकूलं पटवस्त्रं विरहमिव अपनयामि स्फोटयामीत्यर्थः। कीदृशं पयोधर रोधकस्तनाच्छादकं विरहपक्षे स्तनाश्लेष प्रतिबन्धकम्।।३।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।३ ।। वदनेति। हे प्रिये! अनुकूलमुचितं वचनं रचय। कीदृशम्? वदनमेव सुधानिधिश्चन्द्रस्तस्माद्गलितं च्युतम्। अतस्त्वत्प्रणयवाक्यम्। अथ चाप्युरसि हृदये वर्तमानं दुकूलं पट्टवस्त्रमपनयामि। कीदृशम्? पयोधरयो रोधकं तिरोधायकम्। कमिव विरहमिव। यथा मद्विरहो मयापनीतस्तथा दुकूलमपनयामीत्यर्थः। विरहपक्षे, पयोधररोधकं स्तनाश्लेषप्रतिरोधकम्।।३ ।।

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३ ।। वदनेति। हे राधिके! वदनसुधानिधेर्मुखामृतमयूखाज्ज्वलितं निसृतममृतमिवानुकूलं सुरतोपयोगिवचनं मन्मथोद्दीपक सुधाकल्पवचनान्युच्चारय इत्यर्थः। सम्भाषणे त्वया किं कार्य्यमित्याशङ्कायामाह। विरहमिति। अनन्तरमहमुरसि वक्षसि पयोधररोधकं कुचकुम्भावरकं दूकूलं क्षौमं वस्त्रं विरहमिवावयोर्वियोगमिवापनयामि। सम्भाषणाभावे हृदयसङ्गमपूर्व ककुचकलशास्फालनस्याघटनादिति भावः। एतावन्तमनेहसम्भवात्कुचकुम्भदर्शनाभावजनितवियोगं भवत्कुचकुम्भयुगल दर्शनेन दूरी करोमीत्यर्थः। सम्भाषणपूर्वं कुचमण्डलदर्शनजनितविरहापनयनेन मां सम्भाषेयेति तात्पर्य्यम्। अतश्च नारायणं मामनुभजेत्यन्वयः।।३ ।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।३ ।। पुनरर्थितार्थे सम्मतिमर्थयति, अनुकूलमर्थात् प्रकृतप्रार्थनाया वचनं रचय प्रपञ्चय। किमिव ? वदनमेव सुधानिधिस्तस्माद् गलितम् अमृतमिव। तथा सति तवानुमतिमासाद्य उरसि हृदये अर्थात् तव, दुकूलं पट्टवस्त्रमपनयामि। कीदृशम्? पयोधरयोः स्तनयो रोधकम् आच्छादकम्, अतएव विरहमिव मूर्तविश्लेषमिव। इदानीं विरहो व्यपगत एव, परन्त्वावयोः परिरम्भादिप्रतिबन्धकतया दुकूलमेव विरह इति वाक्यार्थः।।३ ।।

### (७) वनमालि भट्टकृत-सञ्जीवनी

।।३ ।। वदनेति। किञ्च अमृतमिव जीवनप्रदं वचनमनुकूलं सानुरागं रचय कथय। कीदृशम्? वदनमेव सुधानिधिश्चन्द्र [३]स्तस्माद्गलितं च्युतम्। आज्ञा[४]पयसि चेत् तर्हि उरसि स्थितं दुकूलं पट्टवस्त्रं विरहमिव वियोगमिवापनयामि दूरीकरोमि। किमिति ? पयोधररोधकं [(५)]स्तनाच्छादनम्। एतेनान्यत्र [६] विरहे दुःखम् शान्तं तत्तवैवास्तीति ध्वनिः।।३ ।।

### (८) नारायण पण्डितकृत-पदद्योतनिका

।।३ ।। वदनेति। त्वं अनुकूलं वचनं वाक्यममृतमिव रचय वद। कीदृशं [७]वचनम्? वदनमेव सुधानिधिश्चन्द्रस्तस्माद्गलितमुत्पन्नम्। उरसि वक्षसि वर्तमानम् दुकूलं पट्टवस्त्रं

विरहमिव वियोग ८ मिवापनयामि स्फोटयामि यतः पयोधररोधकं स्तनाच्छादकम्। विरहपक्षे स्तनाश्लेषप्रतिबन्धकम्।।३।।

१.उचितमिति-क.२.शय्यातलमलङ्कुर्विति भावः-क.ल.म.३.तस्माद्विगलितं-अ.ब.४.आज्ञापयामि चेत्-क.५.स्तनाच्छदकमा-इ.फ.ग.ह.ज.विरहदुःखं शान्तं तु-इ.विरहदुःखशान्तिः-ग.ह.विरहदुःखं शान्तं न तु-फ.ज.७.नास्ति-ड.८.मिवापनयाम्याच्छेदयामि-क.मिव चोपचयामि स्फोटयामि-ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।३।। वदनेति। वदनमेव सुधानिधिः चन्द्रः तस्मिन् गलितं अमृतमिव अनुकूलं मनः परितोषकं वचनं रचय वद। अत्र वदनस्य चन्द्रत्वारोपणरूपकोत्थापिता वचनस्यामृतत्व-संभावनाद्वस्तूत्प्रेक्षा। अमृतस्य स्वतःसिद्धत्वेऽपि वदनसुधानिधि गलितत्वाभावान्नो-पमालङ्कारः। अहं पयोधररोधकं स्तनाच्छादकं उरसि विद्यमानं दुकूलं चेलं विरहमिव वियोगमिव अपनयामि निवारयामि। आलिङ्गनार्थे कुचावलोकनेनैव विरहो गच्छतीति भावः। मानकृतविरहस्य आलिङ्गनप्रतिबन्धकत्वात्तत्प्रतिबन्धकत्वं दुकूलस्येति तदुपमा।।३।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३।। वदनेति। हे राधिके! अमृतमिव अनुकूलं वचनं रचय सरसं वदेत्यभिप्रायः। किंविधम्? वदनसुधानिधिगलितं किमेतावतापीप्सितं सिद्ध्यतीत्याह, विरहमित्यादि। तव उरसि दुकूलं वक्षःस्थलस्थितं क्षौमम् अपनयामि अपसारयामीत्यर्थः। किमिव? विरहमिव। किंविधम्? पयोधररोधकमिति। स्तनयोराच्छादकं यथा प्रियविरहेण पयोधरौ द्रष्टुं न शक्नोति तथा अनेनापीति दुकूलस्य विरहतुल्यता। ''क्षौमं दुकूलं स्याद्'' **इत्यमरः**। ''पयोधरः स्तने मेघे'' इति च।।३।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।३।। पूजानुज्ञां विना पूजा अशुभावहेत्यनुज्ञां प्रार्थयते वदनेति। अमृतमिव वचनं रचय सरसं वदेत्यर्थः। कुतोऽमृतत्वं वचनस्य? यतो वदनेन्दोर्गलितम्। कीदृशं? तदनुकूलमेव अमृतवद्भवतीत्यर्थः। ननु किमेतावता तवेप्सितं सेत्स्यतीति आह, उरसि दुकूलं अपसारयामि। उरसीति पञ्चम्यर्थे सप्तमी। कुतः? पयोधररोधकम्। कमिव विरहमिव। यथा विरहेण पयोधरदर्शनं विच्छिद्यते तथाहमनेनापीति भावः।।३।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।३।। एवं सेवां सम्प्रार्थ्य विधिस्थितिमाह, वदनेति, हे प्रिये! वदनमेव सहजप्रसाद-शालितया मन्नेत्रचकोरानन्दकारितया च सुधानिधिश्चन्द्रस्तस्माद्गलितं मदनुग्रहहर्षनिर्भर-

वशात् उच्छलितममृतमिव, मज्जीवननिदानतयाऽमृतोपममनुकूलं मत्साध्वसापहारिभाव-गर्भितं वचनं रचय, विस्तारय। यत् श्रवणादपगतसाध्वसोऽहं पयोधररोधकं, कुच-मण्डलावरकमुरसि दुकूलमुर:स्थितमुत्तरीयाञ्चलं विरहमिवावयोर्विप्रलम्भमिवापन-यामि। व्यवधानकारितया दुकूलस्य विरहेण साम्यम्। काव्यलिङ्गम् ।।३ ।।

### (१ ३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३ ।। वदन सुधानिधीति; हे प्रिये राधे; मां तव सेवकाय तव वदनसुधया विरचय्य गलितामृतवाक्येन प्रवहमानतरलकोमलपद्यावलिना अनुकूलं मत्समर्थनं वाक्यं विवृणुत। मम पूजां गृहाण। त्वदुरसि यद्दुकूलमस्ति तस्याछादनेन मम विरहव्याधि: वर्द्धते। अत: मम विरहपीडां प्रशमनाय पयोधररोधकं स्तनयोरपवारकं दुकुलमपसार-यामि।।३ ।।

**४-प्रियपरिरम्भणरभसवलितमिव पुलकितमतिदुरवापम्।**
**मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापम्।। क्षण० ।।४ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४ ।। मदुरसि कुचकलशं विनिवेशयेति योजना। कीदृशमतिदुरवापं, पुन: कीदृशं पुलकितम्। अत्र उत्प्रेक्ष्यते, प्रियपरिरम्भणरभसवलितमिवेति। प्रियस्य ममैवालिङ्गनो-त्साहेन संभक्तमिवेत्यर्थ:। कथं मदुरसि कुचकलशो विनिबेशयनीय इत्याह। शोषय मनसिजतापमिति कामजनितसन्तापं खण्डयेत्यर्थ: ।।४ ।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४ ।। अपि च, प्रियेति। हे राधे! मदुरसि कुचकलशं विनिवेशय। अत एव मनसिजतापं शोषय। कलशे संनिहिते तापो यात्येव। किंभूतं कुचकलशम्? पुलकितं रोमाञ्चितम्। पुन: किंभूतम्? अतीव दु:खेनावाप्यते त्वदुनुग्रहं विना। पुन: किंभूतम्? प्रियपरिरम्भणाय रभसेन औत्सुक्येन वलितं संभक्तमिव।।४ ।।

### (३) जगद्धरकृत-सारदीपिका

।।४ ।। कुटिलमवलोकयन्तीमतिविह्वल: सन्नाह प्रियेति हे राधे! त्वं मदुरसि मम वक्षसि कुचकलशं विनिवेशय स्थापय। स्तनकलशार्पणेन मनसिजतापं कामपीडां शोषय खण्डय। कीदृशं प्रियपरिरम्भणाय ममालिङ्गनाय रभसोत्साहेन वलितमिव समुखमिव पुन: कीदृशं सञ्जातरोमाञ्चं पुन: कीदृशम् अतिदु:खेन प्राप्यते इति दुरापं सजलकुम्भक्षेपेण तापशान्तिर्युज्यत एव।।४ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। प्रियेति। हे राधे! मदुरसि कुचकलशं विनिवेशय अर्पय। कीदृशम्? अतिदुरापमतिदुर्लभम्। पुनः कीदृशम्? पुलकितं रोमाञ्चितम्। अत्र हेतुमुत्प्रेक्षयति प्रियपरिरम्भणरभसवलितमिव प्रियस्य परिरम्भणे आलिङ्गने यो रभस उत्साहस्तेन वलितमिव युक्तमिव। अपरोऽपि यो हर्षयुक्तो भवति तस्य रोमाञ्चो भवत्येवेति ध्वनितम्। तेनालिङ्गनेन मनसिजतापं कामजन्यं संतापं शोषय नाशय।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। कुचदर्शनानन्तरं कृत्यं दर्शयति। प्रियेति। प्रियपरिरम्भणाय बल्लभाश्लेषाय यो रभसो वेगस्तेन मिलितं मिश्रितमिव स्थितम्। अतएव पुलकितम् अतिदूरवापं कुचकलशं मदुरसि मम वक्षःस्थले "प्रत्ययोभरपदयोश्च (७।२।९८)" इत्यस्मदो मदादेशः विनिवेशय विधेहि। कुचोपममालिङ्गनेन मां सम्भावयेत्यर्थः। कुचनिवेशन-करणात् मनसिजतापं मम शरीरे कामदेवकृतवाधां नाशय निवारयेत्यर्थः। परिता-पवर्त्तिनप्रयोजनसम्भवादालिङ्गनमवश्यं कार्य्यमिति तात्पर्य्यम्। अत्र कुचयोस्ता-पनिवर्त्तकत्वसूचनाय कलशत्वारोपः। लोके हि शीतलजलकणस्यैव ताप निवर्त्तकत्वादितिभावः। अतश्च नारायणमनुभजेत्यन्वयः।।४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।४।। लब्धावसरस्तत्कर्त्तृपरिरम्भमर्थयति, हे राधिके! मुदुरसि कुचकलसं विनिवेशय अर्पय। कीदृशम्? अधिकदुरापम् अतिदुर्लभम्। पुनः कीदृशम्? प्रियस्य परिरम्भणे यो रभसः प्रमोदः तेन वलितं सम्भक्तम् अतएव पुलकितं रोमाञ्चितम्। तथा चाचेतनयोः पयोधरयोरपि परिरम्भे रभसो भवति, कथं न भवत्या इति दर्शितम्। अन्येषामपि मनसिजतापस्य हृदयोत्पन्नतापस्य शान्तये रसपूर्णकलसविन्यासः क्रियत इति ध्वनिः।।४।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।४।।[१]किञ्च (प्रियेति।) हे [२] प्रियवल्लभे! मदुरसि मम वक्षति कुचकलशं विनिवेशय [३] अर्पय, [४] तदर्पणेन मनसिजस्य कामस्य तापं सन्तापमात्मनो मम च शोषय नाशय। तत्स्पर्शमात्रेण कामपीडानिवृत्तिर्भविष्यतीति भावः। कमिव? प्रियस्य परिरम्भे ([५]आलिङ्गने यो [६]रभसस्त्वरौत्कण्ठ्यं) तेन वलितमिव [७] व्याप्तमिव। कीदृशम्? पुलकितं सञ्जातपुलकम्। एतेन[८]रसः पूर्यमाणः पुलकव्याजेन बहिरुद्भूत इति ध्वन्यते। पुनः कीदृशम्? [९]अतिदुरवापमतिदुर्लभम्। त्वदनुग्रहेणैव सुलभमिति

ध्वनि:। कुचकलशपदं केलिसिन्धुतरणायोक्तमिति भाव:। कामज्वरे [१०] शीतलजल-पूर्णकलशालिङ्गनं विधातव्यमेव। यथा,

कलशकांस्यजलप्लुतभाजनं विरहिणी [११] मदनज्वरशान्तये।
विरचयेन्निपुणस्तु सखीजनो नलिनचन्दनपङ्कजयोजनम् ।। इति ।।४।।

१.नास्ति-अ.ब. २.प्रिये वल्लभे-इ.फ.ग.ह.ज. ३.नास्ति-अ.ब. ४.अर्पणेन-अ.ब. ५.नास्त्ययं कुण्डलीकृतो भाग-अ. ६.रभसं त्वरोत्कं स्वं तेन-ब.रभसो राभस्य त्वरोत्कर्षं-ज.रभसो राभस्यं त्वरौत्कण्ठ्यं-इ.फ.ग.ह. ७.नास्ति-फ.ज. ८.रसपूर्यमाण:-अ.ब. ९.दुरापमति-दुर्लभ-अ.ब. दुरवापमतिदुर्लभम्-इ.फ.ह.ज. १०.शीतजलकलशालिङ्गनं-ग. ११.वदनज्वरसांत्वने-अ.ब. वदनज्वरशान्तये-फ.ग.ह.ज.।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।४।। [२] प्रियेति। त्वं मदुरसि मम वक्षसि कुचकलशं[(३)] विनिवेशय स्थापय। तेन मनसिजतापं कामपीडां शोषय खण्डय। कीदृशम्? [४] प्रियपरिरम्भणाय ममालिङ्गनाय रभसेनोत्साहेन वलितमिव सुमुखमिव। [५]पुन: [६]कीदृशम्? [७]पुलकितं सञ्जातरोमाञ्चम्। पुन: कीदृशम्? अन्यदुरापम्। अन्येनापि अतिदु:खेन प्राप्यत इति। अतिप्रयासेनापि न प्राप्यते। अतो दुरापमिति[८]। [९]सजलकुम्भक्षेपेण तापशान्तिर्युज्यत एव [१०] ।।४।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।४।। दुकूलापनयनप्रयोजनमाह, प्रियेति। प्रियस्य मम परिरम्भणे आलिङ्गने रभस: वेग: तेन वलितमिव निर्गतमिव अतिपुलकितं अतिकण्टकितं, अतो दुरापम्। रोमाञ्चानां प्रतिबन्धकत्वेन मध्यस्थत्वात्। कुच एव कलशं ममोरसि वक्षसि विनिवेशय। अत: मनसिजतापं कामज्वरं शोषय नाशय। अत्र पुलकस्य सात्त्विकभावेनोत्पन्नस्य गाढालिङ्गनस्य निर्गमहेतुत्वेन सम्भावनात् हेतूत्प्रेक्षा सिद्धास्पदा।।४।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। प्रियेति। हे प्रिये! मम उरसि कुचकलशं विनिवेशयेति योजना। किंविधम्? दुरवापमिति। अतिशयेन दुष्प्रापम्। तव पराङ्मुखत्वेन मामप्यतिकृच्छ्रलभ्यमित्यर्थ:। यद्वा अन्येन अतितरां दुष्प्राप्यम्। पुन: किंविधम्? पुलकितं सञ्जातपुलकम्। अत्रोत्प्रेक्षते। प्रियपरिरम्भणरभसवलितमिवेति। प्रियस्य ममैवालिङ्गोत्साहेन वर्द्धितमिवेत्यर्थ:। अन्योऽपि प्रीतजनालिङ्गनोत्साहेन वर्द्धितो भवतीति प्रियशब्दोपादानम्। एतेन तव सुरतेच्छा वर्तत इति लभ्यते इति राधिकाप्रोत्साहनव्यङ्ग्य:। कथं त्वदुरसि कुचकलशो विनिवेशनीय इत्याह, शेषय मनसिजतापमिति। कामजनितसन्तापं शेषं नय अवसानं

नय। यद्यपि शून्यकलशस्य तापशोषकत्वं नास्ति तथापि घटेन जलमाहरेत्यादौ छिद्रेतरत्ववद् योग्यतावशात् सरसत्वलाभ इति भावः।।४।।

## (११) पूजारी गोस्वामीकृत-बालबोधिनी

।।४।। ततः वक्रमवलोकयन्ती प्रति व्याकुलः सन्नाह प्रियेति। हे प्रिये ! मदुरसि कुचकलसं स्थापय। उरस्येवार्पणे हेतुमाह, अतिदुर्ल्लभं दुरवापस्य हृद्येव धारणयोग्यत्वादित्यर्थः। तर्हि कथं तत्प्राप्तिरिति आहप्रियस्य मम परिरम्भणाय यो रभसस्तेन चोच्छलितमिवोत्प्रेक्षे। तदपि कुतोऽवगतं पुलकितं यथार्त्यावलोकात् करुणस्तदार्त्ति शमनाय पुलकितो भवति तद्वदयमपीत्यर्थः। किमर्थं तन्निवेशनं प्रार्थ्यते तत्राह, कामतापं खण्डय, रसायनार्पणात्तापोपशान्तिर्भवत्येवेत्यर्थः।।४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।४।। पुरःफलायामाशायां जनः कामं विदूयते। 'आसन्ने हि घनारम्भे द्विगुणं रौति चातकः' इति न्यायेनात्युत्सुकः प्रयोजनं निवेदयति। प्रियेति, हे सुन्दरि ! मदुरसि, ममोरसि सन्ततत्वदाधारतया विशेषेण मदीयताबुद्धिविषयभूते वक्षसि कुचकलसं शृङ्गाररसपूर्णस्तनकुम्भं विशेषेण निवेशय, संघटय। यतो दूरवापं दुर्लभमुत्तरीयाञ्चलसमीकरणसमये कदाचिन्मनाक् परिदृश्यमानं स्फुरणमित्यर्थः। एवमतिदुर्लभस्य वस्तुनः हृदयसंधारणौचित्यादिति भावः। दुर्लभवस्तुप्रार्थनेन अलमिति चेत्तत्राह, प्रियेति, कीदृशं प्रियम्। चिरविरहोत्कण्ठाविषयतयातिप्रीतिजनकं यत्परिरम्भणमालिङ्गनं तद्विषये यो रभसः सम्भ्रमस्तेन वलितमूत्कूलितमिवोत्प्रेक्षणीयम्। एतत् कुतः अवगतम्। यतः पुलकितं सञ्जातपुलकम्। निवेशनफलमाह, मनसिजतापं त्वद्विरहसन्तापं शोषय, नाशय, यथोक्तं **श्रीविदग्धमाधवे**,

> कर्णद्वन्द्वमिदं रुतैरिहकुहूकण्ठस्य कुण्ठीकृतं,
> सद्यः कोमलभारतीपरिमलैरुल्लाघय श्लाघया।
> निःशङ्कं किल शीतलीकुरु परीरम्भेण रम्भोरु, मे
> गम्भीरस्मरचापतापलहरीपात्राणि गात्राण्यपि।। इति।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। प्रियपरिरम्भणेति; तथापि श्रीराधां इतस्तत अवलोकयन्तीं सती श्रीकृष्णः व्रवीति। हे राधे ! तव प्रियस्य परिरम्भणमालिङ्गनं कुरु अर्थात् मदुरसि मम वक्षसि कुचकलशं विनिवेशय। रभः वेगः वेगेन शीघ्रं तव स्तनकलशं ममोपरि स्यापयित्वा आलिङ्गनं कुरु। मत्छशरीरं अतीव पुलकितं भवति। यतो हि त्वद्स्तनकलशं मतीव

दुर्लभमस्ति। अनेन कुचकलशं विनिवेश्य मम मनसिजकामजतापं शोषय अर्थात् विनाशय मनसि जतापं निवारणाय उच्च्यने **श्रीविदग्धमाधवे ;**

कर्णद्वन्द्वमिदं रुतैरिहकुहूकण्ठस्य कुण्ठीकृतं,
सद्यः कोमलभारतीपरिमलैरुल्लाघय श्लाघया।
निःशङ्कं किल शीतलीकुरु परीरम्भेण रम्भोरु, मे
गम्भीरस्मरचापतापलहरीपात्राणि गात्राण्यपि।। इति ।।४ ।।

**५-अधरसुधारसमुपनय भाविनि जीवय मृतमिव दासम्।**
**त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम्।। क्षण० ।।५ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५ ।। जीवय मृतमिव दासमिति मामित्यर्थादवगन्तव्यम्। अमृतं दत्वा मृतमिव मां जीवयेत्यर्थः। त्वयि विनिहितमनसमिति सुधारसप्रदाने प्रोत्साहनम्। ननु न ते पीडाप्युपलभ्यते तत्कथमात्मानं मृतमिव कथयसीत्याह। विरहानलदग्धवपुषम-विलासमिति अस्योपमा।

शम्भुः स्वयम्भुरमरा हरिणेक्षणानां
येन क्रियते सततं कुचकुम्भ दासः।
वाचामगोचर चरित्रविचित्रिताय
तस्मै नमो भगवते कुसुमायुधाय।। इति ।।५ ।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।५ ।। अपि च, अधरेति। हे भामिनि प्रिये! चरणपरिचरणपरेऽपि कोपं मुञ्च। मानापनोदाय संबोध्यते। हे कोपने! अधरसुधारसमुपनय अर्पय। अधरवक्त्रसंयोगं कुरुष्वेत्यर्थः। मां दासं त्वदधरामृतपिपासुतया मृतमिव जीवयेत्यर्थः। अमृतपानं हि मृतं जीवयति। दासो हि अनुपेक्षणीयो भवति। किंभूतं माम्? त्वयि विनिहितमनसं आरोपितमानसम्। अत एव विरहानलेन दग्धं वपुर्यस्य। अत एव च न विद्यन्ते विलासा यस्य।।५ ।।

### (३) जगद्धरकृत-सारदीपिका

।।५ ।। त्वदेकजीवनं मां त्वमेव जीवयेत्याह, अधरेति हे भामिनि कामकुशले त्वम् अधररसम् ओष्ठामृतरसम् उपनयदेहि अनेन दासं सेवकं मां मृतमिव जीवय कीदृश त्वयि विनिहितमन सन्दत्तमानसं पुनः कीदृशं विरहानलेनावियोगाग्नि नादग्धं वपुः शरीरं यस्य अतएव विलासं निश्चलं मृतस्तुनिश्चलो भवति।।५ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५ ।। अधरेति। हे भामिनि! अधरसुधारसमधरसंबन्ध्यमृतरसमुपनय वितर। दासं मादृशमनुगतं जीवय। कीदृशं मृतमिव ? अन्योऽपि मृतोऽमृतपानेन जीवतीति ध्वनिः। मृतत्वे हेतुमाह, त्वयीति। त्वयि विनिहितमनसं त्वय्यर्पितचित्तम्। पुनः कीदृशम् ? विरहानलेन त्वद्विरहरूपेणाग्निना दग्धं वपुर्यस्य तम्। अत एवाविलासं विलासरहितम्। अन्योऽपि यो मृतो भवति स निश्चेष्टो दग्धदेहश्च भवतीति ध्वनिः।।५ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।५ ।। आलिङ्गनानन्तरकृत्यं सूचयति। अधरेति। हे भाविनि! राधिके! अधरसुधारसम् अधरामृतरसम् उपनय प्रापयेति शेषः। अथवा नामसमीपं नय मह्यं देहीत्यर्थ। दानफलं सूचयति त्वयेत्यादि। हे भाविनि! विनिहितमनसं लग्नचित्तं विरहानलेन भवद्वियोगदहनेन दग्धवपुषं प्लुष्टदेहम् अतएवाविलासं गतविभ्रमम् अतएव दासं भवत्पराधीनजीवनम्। विशेषणचतुष्टयेन कृष्णस्य दानपात्रता सूचिता। एतादृशं मां मृतमिव गतप्राणमिव जीवय प्राणबन्तं कुरु। अथवा मृतमिव स्थितं मां जीवयेति वा योजना। यथा आराधिता देवता भक्तविशेषणविशिष्टजनम् अमृतदानेन जीवयति तथा मामपीत्यर्थः उपमानोक्तिः।।५ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५ ।। परिरम्भमभ्यर्थ्याधरपानमभ्यर्थयति, हे भाविनि! अधर एव सुधा अमृतं तदेव रसो द्रवद्रव्यं तदुपनय पानकर्मत्वेनोपस्थितं[+] कुरु। मां दास जीवय। कीदृशं ? मृतमिव गतप्राणमिव। पुनः कीदृशम् ? विरहानलेन दग्धं वपुर्यस्य तम्, अत एवाविलासं न विद्यते विलासो यस्य स तथा, तम्। पुनः किम्भूतम् ? त्वयि विनिहितं मनो येन स तथा, तम्। तथा चान्योऽपि दत्तचित्तो दासोऽमृतेन जीवयितुमुचितमेवेति ध्वनिः। छलेन दानपात्रत्वमप्युपदर्शितम्। तथा च 'दासः शूद्रे दानपात्रे भृत्यधीवरायोरपी'इति **विश्वः**।।५ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५ ।। (अधरेति।) [११]एवमप्यप्रसन्नां [१२] प्रतिभात इवाह, [१३]भाविनि प्रशस्ताभिप्राये अधरसुधारसं अधरामृतं उपनय समर्पय। अधरवक्त्रसंयोगं कुर्वित्यर्थः। किञ्चाधरामृतं दत्त्वा दासं त्वच्चरणानु[१४] वर्तिनं मां मृतमिव जीवय। त्वदधरामृतपानेनैव मम जीवनं नान्यथेति भावः। [१५]कीदृशम् ? त्वयि [१६]विनिहितं मनः चित्तं यस्य त्वद्ध्याने [१७] दत्ताचित्तम्। [१८] पुनः कीदृशम् ? विरहानलेन दग्धवपुषं [१९] दग्धशरीरम्।
अत एवाविलासं [३] विलासशून्यम्। एतेन [४] त्वदधीनं जीवनमात्रं कथितम्।।५ ।।

१.भाविनि-ड.ग. २.नास्ति-ड. ३.नास्ति-क. ४.परिरम्भणाय-ड.ल.म. ५.नास्ति-ड. ६.कीदृशम्? अतिदु:खेनावाप्यत इति दुरापम्-ड.ल.म. ७.त: ८.पर्यन्तं नास्ति-ड.ल.म. ९.त: १०.पर्यन्तं नास्ति-क.ल.म. ११.एवमप्यप्रसन्नां प्रतिभाति इवाह-अ.ब. १२.प्रतिभीत इवाह-फ. १३.हे भामिनि-ग.हे भाविनि-फ.ह.ज. १४.वर्णिनं-अ. १५.किञ्च-इ.फ.ग.ह.ज. १६.विनिहितमनसं-इ.फ.ग.ह.ज. १७.दत्तम्-अ.ब. १८.किञ्च-इ.फ.ह.नास्ति-ग.ज. १९.नास्ति-अ.ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५।। अधरेति। [५] हे भामिनि [६] कामकलाकुशले त्वमधरसुधारसं [७] ओष्ठामृतरसमुपनय [८]देहि।[९] अनेन [१०]दासं सेवकं मां मृतमिव[११]जीवय। कीदृशं[१२] माम्? त्वयि विनिहितमनसं [१३] दत्तमानसम्। पुन: कीदृशम्? विरहानलेन वियोगाग्निना दग्धं वपु: शरीरं यस्य। [१४] अत एव अविलासं निश्चलम्। मृतस्तु निश्चलम्। मृतस्तु निश्चलो भवति।।५।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५।। अधरेति। हे भामिनि भाम: क्रोधोऽस्या अस्तीति भामिनि तत्सम्बुद्धि:। अधर एव सुधारस: तं उपनय निवेदय, देहीति यावत्। अत: त्वयि विहितं मन: यस्य तम्। विरह एवानलो वह्नि: तेन दग्धं प्लुष्टं वपु: देहो यस्य तमिव अविलासं शृङ्गारचेष्टाविहीनं दासं मां जीवय। अत्र रूपकोत्थापिता विलासरूपचेष्टाभावनिमित्तमृतसम्भावना-द्वस्तूत्प्रेक्षा स्वत: सिद्धा। मृतोपमाऽपि। सुधाया: जीवकत्वेन साधारणधर्मेणोपमाऽपि भाति। अनयोरिवशब्दस्य तुल्यत्वात्सन्देहसङ्कर:।।५।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। अधरेत्यादि। हे भाविनि! अधरसुधारसम् उपनय जीवय। मृतमिवदासमिति। मामित्यर्थादवगन्तव्यम्। अमृतं दत्वा मृतमिव मृतकल्पं दासं मां जीवयेत्यर्थ:। किंविधम्? त्वयि विनिहितमनसमिति। त्वदेकतानमानसमिति सुधारसप्रदाने प्रोत्साहनं....लभ्यते। तत्कथमात्मानं मृतमिव कथयसीत्याह, विरहानलेति । विरह एव अनल:, तेन दग्धं वपु: शरीरं यस्येति विग्रह:। पुन: किंविधम्? अविलासमिति । विलासशून्यं मृतोऽपि चेष्टारहित: अनलदग्धवपुर्भवति अमृतसेचनेन जीवति। अहं तु मृतप्राय: कथं न जीविष्यामीति भाव:। भाविनीति योग्यपदोपादानम्। भावयुक्ताया: प्रियाया: इति।।५।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५।। अन्यथा मम दशमी दशैव स्यादित्याह, हे भामिनि! वक्र दृष्ट्यवलोकनात् भामिनीत्युक्तम्। अधरसुधारसं देहि। किमर्थं? मृतमिव दासं जीवय मामित्यर्थात्

ज्ञेयम्। अमृतं दत्त्वा मृतमिव मां जीवयेत्यर्थः। अत्रात्मनोऽनन्यगतिकत्वमाह, त्वयौवार्पितं मनो येन तम्। ननु ते काऽपि पीड़ा नोपलभ्यते तत् कथं तथाभूतम् आत्मानं कथयसि इत्याह, विरहानलेन दग्धं वपुर्यस्य तम्। तज्ज्ञानं कुतस्तत्राह अविलासं विलासा-भावादित्यर्थः।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।। एवं बहिःसञ्चारिणः कामसन्तापस्य उपशान्तिं सम्प्रार्थ्य पुनः अन्तःसञ्चारिणः तस्योपशमायातिदैन्येनाधरामृतरसायनमभियाचते। अधरेति, हे भाविनि! मद्विषयप्रशस्त-भावयुक्ते राधे! त्वदधरसम्बन्धिनं सुधारसम् उपनय। समर्पय, पाययेत्यर्थः। तत्प्रयोजनमाह, मृतमिव। त्वद्विना मृतकल्पं मूर्च्छितमित्यर्थः। ईदृशं दासं त्वदधीनं मां जीवय। प्राणवन्तं कुरु। मृतकल्पत्वे हेतुमाह, कीदृशं विरहानलेन त्वद्विच्छेदाग्निना दग्धवपुषं सन्तप्तशरीरम्। किञ्च तदवस्थायामपि त्वयि जीवातुभूतायां विशेषेण निहितं, निरन्तरमर्पितं मनो येन तम्, अत एवाविलासं, नास्ति त्वदन्यासु कासुचिद् विलासः कटाक्षनिक्षेपणमपि यस्य तम्।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। अधरसुधारसेति; हे भामिनि! प्रिये त्वं अधरस्य सुधारसं चुम्बनरसम् उपं समीपं नय। अर्थात् चुम्बनास्वादनं कुरु। मां दासं त्वदधरामृतपिपासया मृतमिव मां जीवय जीवनदानं कुरु। अमृतपानेन मृतं जीवति। दासो हि अनुपेक्षणीयः। अतः विरहानलेन दग्धं मां त्वदालिङ्गनचुम्बनाधरपानेन जीवय इत्यर्थः।।५।।

**६-शशिमुखि मुखरय मणिरशनागुणमनुगुणकण्ठनिनादम्।**
**श्रुतियुगले पिकरुतविकले मम शमय चिरादवसादम्।। क्षण०।।६।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। हे शशिमुखि! मणिरसनागुणं मणियुक्तकाञ्चीगुणं मुखरस मुखरी कुरु विपरीतरतमारभस्व इति यावत्। कीदृशम् अनुगुणकण्ठनिनादम् अनुगुणः सदृशः कण्ठनिनादो यस्येति विग्रहः। कथमित्यं वदसीत्याह। श्रुतियुगले पिकरुतविकले मम शमय चिरादवसादमिति संप्रत्यावलितो रसनाध्वनिः। विरहावस्थायां कोकिल शब्देन विधूरितं कर्ण्णयुगलं सुखयेति वाक्यार्थः।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। अपि च, शशिमुखीति। हे शशिमुखि! मणिरशनागुणं मुखरय वाचालं कुरु। किंभूतं मणिरशनागुणम्? अनुगुणकण्ठनिनादम्। अनुगुणोऽनुरूपः अर्थादेव त्वदीय-

कण्ठस्य निनादो यस्य। अत एव मम श्रुतियुगले चिरात्त्वदसङ्गमाद्वर्तमानमवसादं खेदं शमय। किंभूते श्रुतियुगले ? तव विरहे पिकरुतेन विकले विकलीकृते। विरहिणो हि पिकरुतं दुःश्रवं भवतीति ।।६ ।।

## (३) जगद्धरकृत-सारदीपिका

।।६ ।। चाटुकेन प्रसन्नां प्रत्याह शशीति हे शशिमुखि ! चन्द्रवदने त्वं मणिरसनागुणं मणियुक्तं काञ्चीदाममुखरयशद्वितं कारय कीदृशम् अनुगुणः सदृशः कण्ठनिनादो यस्य कण्ठगीतनादसह मित्यर्थः तेन शब्देन त्वं मम श्रुतियुगले कर्णयुग्मे चिरात्तव विरहेण योवसादः खेदस्तं शमय नाशय खेदकारणमाह कीदृशे श्रुतियुगलेऽपि कण्ठरुतैः कौकिलशब्दैर्विकले दुःखितो विरहिणो हि पिकरुतं दुःसहं भवति।।६ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

शशिमुखीति। हे शशिमुखि चन्द्रवदने ! मणिरशनागुणं मणियुक्तकाञ्चीदाम मुखरय सशब्दं कुरु। अनेन हंसलीलाख्यं विपरीतरतं भजस्वेति ध्वनितम्। तल्लक्षणं चोक्तं प्राक्। कीदृशं रशनागुणम्? अनुगुणं कण्ठनिनादः कण्ठशब्दो यस्य तादृशम्। रशनागुणानुकारिकण्ठशब्दं च कुर्वित्यर्थः। अनेन शब्देन मम श्रुतियुगले श्रोत्रयुग्मे चिरादवसादं चिरकालीनमुपतापं शमय नाशय। कीदृशे ? पिकरुतेन कोकिलशब्देन विकले दुःखिते।।६ ।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।६ ।। अधरदानानन्तरकृत्यमाह। शशीति। हे शशिमुखि ! चन्द्रवदने ! तमनुगुणो अनुकण्ठनिनादो भवत्कण्ठसम्भवरतिकूजितजनितध्वनिर्यस्मिन् कर्म्मणि तत् मुखरय उपरि सुरतेन ध्वनयेत्यर्थः किमर्थमित्यतमाह। श्रुतीति। पिकरुतेन कोकिलालापेन विकले विरहे त्वद्वियोगकाले संजातव्यथ इत्यर्थः। एतादृशे मम श्रुतियुगले चिरात् बहुकालमारभ्य स्थितमिति शेषः। अथवा चिरम् अति सततं गच्छतीति चिराद् बहुकालव्यापकमित्यर्थः। ''अत सातत्यगमने इत्यस्माद्धातोः क्विप्'' स चासावसादश्चेति चिरादवसादं कोकिलालापश्रवणजनित विषादं शमय निवारय। उपरि सुरतं कुर्वित इति तात्पर्य्यम्। रतिकालीनरुतानि तु **रतिरहस्ये**, ''हूंकृतस्तनित-मूकृवत्कृतमित्यादि'' पूर्वमुक्तम्। मुखरयेत्यत्र मुखरशब्दात् तत्करोति णिचि लोट्। शमयेत्यत्र शमु अदर्शने इति अदर्शने शमेर्मित्वात् नोपधा वृद्धिः।।६ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६ ।। लब्धप्रसरछलेन विपरीतमभ्यर्थयति, हे शशिमुखि ! अनुगुणोऽनुकुलो स्वशब्द-जातीयत्वेन कण्ठनिनादो यत्र एतादृशं मणिरसनागुणं काञ्चीदाममुखस्य सशब्दं कारय।

तथा च विपरीतरत्या सुरतकालीनकण्ठध्वनिविशेषसहितं काञ्छीशब्दं जनयेति वाक्यार्थ:। तथा सति तव किमित्यत आह, मम श्रुतियुगले कर्णयुगले चिरात्तव विरहेण योऽवसाद: तं शमय। अवसादकारणमाह, कथम्भूते ? पिकरुतिभि: कोकिलरवैर्विकले दु:खिते। तथाच मन्दशब्दोपतप्तं श्रोत्रयुगलं त्वदीयकण्ठनिनादेन रसनाशब्देन च दु:खितं स्यादित्याशय:।।६।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६।। शशिमुखीति। किञ्च हे शशिमुखि चन्द्रवदने श्रुतियुगले कर्णयुगे मणिरशनागुणं [१५] काञ्चीदाम मुखरय वाचालङ्कारय [१६]सुरतविपरीतं विधाय वाचालङ्कारयेत्यर्थ:। कीदृशम् ? अनुगुण: सदृश: कण्ठस्य निनाद: कूजितं यत्र तम्। [१७]कीदृशे श्रुतियुगले ? पिकरुतै: कोकिलशब्दैर्विकले व्याकुले। विरहिणां तद्ध्वनि: दु:खद एव तदर्पणेनावसादं [३] सन्तापं मम शमय नाशय। "रसना काञ्चिजिह्वयो:" इति[४]**विश्व:** (७१.३०)।।६।।

१.गुणकिङ्किणिमधुरनिनादम्-च.गुणमनुगुणकण्ठनिनादम्-ड.२.श्रुतियुगले-च.ड. ३.विलासरहितम्-इ.फ.ग.ह.ज.४.देहैकजीवनमात्रं-इ.फ.ग.ह.ज.५.त:१०.पर्यन्तं नास्ति-ल.म. ६.राधे-क.७.नास्ति-क.ल.म.८.प्रयच्छ-क.९.तव-क.११.नास्ति-ड.१२.नास्ति-ड.ल.म. १३.नास्ति-क.१४.अत: विलासं-क.१५.नास्ति-अ.ब.१६.सुरतं विपरीतं-फ.ज. १७.किञ्च-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६।। शशीति। हे शशिमुखि चन्द्रवदने त्वं मणिरसनागुणं काञ्चीदाम मुखरय [५] शब्दं [६]कारय। कीदृशम् ? अनुगुण: सदृश: कण्ठनिनादो यस्य। कण्ठगीतनादसदृशमित्यर्थ:। त्वं मम श्रुतियुगले [७]कर्णयुग्मे चिरात्तव विरहेण योऽवसाद: खेदस्तं[८] शमय। खेदे कारणमाह। कीदृशे ? पिकरुत: कोकिलशब्दैर्विकले दु:खिते।।६।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६।। शशिमुखीति। शशीव चन्द्र इव मुखं यस्या: तत्सम्बोधनम्। मणिरशनाया: रत्नखचितकाञ्च्या: गुणे किङ्किणीरूपे इत्यनुकरणम्। किङ्किणीति मधुर: श्राव्य: निनाद: शिञ्जितरूप: ध्वनि: तम्। भूषणादेस्तु शिञ्जितम् **इत्यमर:** (१.७.२४)। मुखरय प्रकटय। अत: कुत्सितं रुतं कोकिलानां ध्वनि: तेन विकले विह्वले उद्दीपनत्वात्। तिरश्चां वासितं रुतम् **इत्यमर:** (१.७.२५)। मम श्रुति (पुट) युगले कर्णद्वयेऽपि चिरात् अवसादं बहुकालस्थितं दु:खं शमय। अत्र निकटागमनसमये विपरीतादिसमये काञ्चीध्वनिर्भवतीति भाव:।।६।।

### (१०) धनन्जय धरणीदेवकृत सर्वाङ्गसुन्दरी (नूतन)

।।६ ।। शशिमुखीति। हे शशिमुखि ! चन्द्रवदने ! मणिरसनागुणं मुखरय मुखरीकुरु विपरीतरतमारभस्वेति यावत्। कण्ठनिनादम् अनुगुणं....त्यर्थ:। किं वा मणिरसना-गुणं....। किंविधम्? अनुगुणकण्ठनिनादमिति। अनुगुण: अनुकूल: सदृशो वा कण्ठनिनादो यस्येति विग्रह:। कथमित्थं वदसीति आह, पिकरुतविकलेति। मम श्रुतियुगले कर्णयुग्मे चिरात् चिरकालीनमवसादं शमय शान्तिं नय। सम्प्रत्यावलितो रसना ध्वनि: कण्ठशब्द:..कोकिलशब्देन विधुरितं मम कर्णयुगं सुखयत्वित्यर्थ:।।६ ।।

### (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६ ।। मौनेन तत्सम्मतिमालक्ष्य लोभादन्यदपि प्रार्थयते हे शशुमुखि ! मणिरशनागुणं यस्य तत्। प्रार्थनाविशेषोऽयं तेन किं स्यादत्राह, मम श्रुतिपुटयुगले चिरकालीनमवसादं शमय। श्रुते: पुटत्वोक्त्या कस्यापनयेनामृतत्वं वोधितं तदवसाद एव कुतस्तत्राहपिकरुतै: व्याकुले।।६ ।।

### (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६ ।। एतत् श्रुत्वा स्मितविकसद्वदनामालक्ष्य प्रवृद्धलोभ: क्रीडाविशेषं प्रार्थयते। शशीति, हे शशिमुखि ! पूर्णेन्दुवदने ! मणिरसनागुणं रतिविमर्दोचितदृढतरसन्दानितं विविधवैजात्यप्रकाशकं रत्नबद्धकाञ्चीकलापम्। अनुगुण:, अनुरूप: कण्ठनिनादो रतिकूजितं यत्र तद्यथा स्यात्तथा मुखरय। वाचालीकुरु। तेन किं स्यादत आह, श्रुतीति, मम दुर्लभत्वत्सङ्गमस्य पिकरुतेन कोकिलकोलाहलेन विकले वधिरीकृते श्रुतियुगले कर्णद्वन्द्वे चिरात् चिरकालमारभ्य स्थितमिति शेष:। अवसादं त्वन्मेखलानिनादश्रवणे जनितखेदं शमय, नाशय।।६ ।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां त्रयोविंश: प्रबन्ध:।

१.नास्तीयं पुष्पिका-अ.ब.इ.फ.ग.ह.ज. २.मम मन:प्रीतिकरं-ड.मन: प्रीतिकरं रतिकरं-क.

चतुर्विंश: प्रबन्ध:

प्रत्यूह: [१] पुलकाङ्कुरेण निबिडाश्लेषे निमेषेण च
क्रीडाकूत[२] विलोकितेऽधरसुधापाने [३] कथानर्मभि:।
[४] आनन्दाभिगमेऽपि मन्मथकलायुद्धेऽपि यस्मिन्नभू-
दुद्भूत: स तयोर्बभूव सुरतारम्भ: प्रियम्भावुक:।।६ ।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। शशीमुखि; मुखरयेति; हे शशिमुखि चन्द्रवदनि विरहव्याधिना पिकस्य नाम कोकिलस्य कुहुतानेनाहं विकलः अति व्याकुलः। अतः त्वं मम विरहव्याकुलतां शमय अर्थात् प्रशमनं कुरु। केन तव मणिमय धातवरसना कटिमेखलयानुगुणं निनादं कारयित्वा अर्थात् विपरीतरत्या शब्दं कारयित्वा ममावसादं क्लेशं वा प्रशमयतु।।६।।

**७-मामतिविफलरुषा विकलीकृतमवलोकितुमधुनेदम्।**
**मीलितलज्जितमिव नयनं तव विरम विसृज रतिखेदम्।। क्षण० ।।७।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। इदं नयनयुगमधुना मामवलोकयितुं लज्जितमिव मिलति मुद्रितं भवतीत्यर्थः। मां कीदृशं, मामतिविफलरुपा विकलीकृतं, अकारणेण कोपेन बिधुरीकृतमित्यर्थः। अन्योऽपि यः कुपितः कश्चित्तिरस्करोति स तिरस्कृतस्य मुखादबलोकनेन लज्जितो भवतीत्यभिप्रायः। विरमेति अति विफलरोषादित्यर्थादधिगन्तव्य विसृजखेदमिति, स्वस्था भव इत्यर्थः।।७।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, मामिति। हे राधे ! इदं तव नयनमधुना अवलोकितुम्। अर्थान्मां लज्जितमिव विरमति। किंभूतं नयनम् ? मामभिलक्ष्य विफलरूषा निरर्थकरोषेण विकलीकृतम्। अविकलं विकलं कृतमिति विकलीकृतम्। अत एव वृथा रतिखेदं सृजसि। अथवा 'विसृज' इति पाठान्तरम्। अत वृथा निरर्थकम्। विसृज मुञ्च।।७।।

### (३) जगद्धरकृत-सारदीपिका

।।७।। किञ्चिदवलोकयन्तीमाह मामिति हे राधे ! तवेदं नेत्रं नयनम् अधुना मामवलोकितुं द्रष्टुं लज्जितमिव मीलितमिव धत्ते कीदृशं माम् अतिविफलरुषा अति विफलकोपेन विफलीकृतं दुःखितं नयनविशेषणं वा विकलीकृतं कर्णान्तरं प्रापितम् अतएव रोषाद्विरमविरक्ता भव रतिखेदं क्रीडादन्यं विसृजयत् कोपन्त्यत्क्वा मया सहरमणं कुर्वित्यर्थः।।७।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।। मामिति। हे राधे ! मामवलोकयितुं तव नयनं मीलति मुद्रां प्राप्नोति। किमिव ? लज्जितमिव। मां कीदृशम् ? अतिविफलरुषा अतिनिष्फलेन रोषेण विफलीकृतं विफलतां नीतम्। अधुनेदानीं नयनमीलने विरम विरक्ता भव। निष्फलरोषा-दित्यर्थात्।।७।।

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। एवमुक्तेऽपि लज्जावशादनवेक्ष्यमाणां तामाह मामिति। हे राधे! बिकलीकृतं त्वत्कृत पराभवेन विकलचित्तं माम् अथवा किं निमित्तं भवत्त्यागेन कलुषचित्तं वा अवलोकितं वीक्ष्यमाणं कर्त्तरि निष्ठा। अतएवापि विफलरुषात्यन्तनिष्फलकोपेन कोपनिमित्तस्य स्फुटस्याभावात्। कोपस्यातिनैष्पल्यमिति वक्तुरभिप्राय:।

अधुनेदानीं मिलितेन पक्ष्मपिधानेन लज्जितमिव संजातलज्जमिव स्थितमिदं परिदृश्यमानं कर्म विरम विशेषेण रमय माम् ''अन्तघटित णिच् व्याङ् परिभ्यो रम (१।३।८३)''इति परस्मैपदम्। मद्विषयनिमित्तकोपजनितमीलनाक्षलब्धाया: सकाशात् व्यावर्त्तयेत्यर्थ:। सविलासदृष्ट्या मां सखेति तात्पर्य्यम् अति विफलरोषेत्यस्य विकली कृतमित्यनेनान्वय:। न केवलमवलोकनमात्रमपितु रतये खेदं सुरत्यर्थं विषादमित्यर्थ:। ''चतुर्थीत्यादिना समास:''। विसृज त्यज समनन्तरमेवसम्भविष्यत् सुरतमाकलय्य तदर्थं खेदं मुञ्च इत्यर्थ:। अथवा, विसृजेत्यन्त:गर्भित णिच् तदा रतिखेदं मदीयसुरतार्थ विषादं विसर्जय त्यजय सुरत प्रवृत्त्या मदीयखेदमपाकृत्य निष्कारणं विकलीकृतं मां सम्भावयेति तात्पर्य्यम्। अवलोकितमित्यस्य मिलित-लज्जेत्यनेनान्वय:। अतश्च नारायणं माम् अनुभजेत्यन्वय:।।७।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। मत्प्रार्थितसकलार्थे तवाप्युमतिर्जाता एवेत्यलम्विलम्बनेति दर्शयति, हे राधे! अधुना सम्प्रति तव नयनं मामवलोकितुं लज्जितमिव जातत्रपमिव मीलति संकुचितं भवति। मां कथम्भूतम्? अतिविफलरुषा मदीयसन्तापातिरिक्तफलरहितभवत्कोपेन विफलीकृतम्। तथा च प्रकृतप्रार्थितार्थे स्वीकारादवलोकनं मयायं विफलीकृतं इति लज्जेति वाक्यार्थ:। अतएव विरम विरता भव वैमुख्यादित्यर्थात्, रतिखेदं रतिविषयं खेदं दु:खं वैमुख्यमिति यावत्, तद्विसर्ज त्यज।।७।।

### (७) वनमालि भट्टकृत-सञ्जीवनी

।।७।। एवं श्रुत्वा किञ्चिद्विलोकयन्ती ईषत्प्रसन्नां प्रत्याह,मामिति। हे प्रिये! [९]इदानीं तवेदं नयनं मां[१०]अवलोकितुं द्रष्टुं मीलति मुद्रां प्राप्नोति। किमिव? लज्जितमिव। [११]रतौ विहिताचरणादिति। कीदृशं माम्? अतिविफलरुषा अतिशयनिरर्थकक्रोधेन विफलीकृतं प्रियावलोकनादिसुखवञ्चितम्। नयनविशेषणं वा। विरम निष्फलक्रोधात्। रतौ खेदं श्रमं क्रीडादैन्यं वा विसृज त्यज सुरतमोहं [१२]मा सृजे: विसृजेति ध्वनि:।।७।।

१.मामपि विकिर रुषा विकलीकृतमवलोकितमधुनेदम्-च.२.मीलित-च.३.तापं-इ.ग. ४.मेदिनीकार-अ.ब.इ.फ.ग.ह.ज.५-७.नास्ति-क.८.नास्ति-क.ल.म.९.नास्ति-अ.ब. १०.अविलोकयितुं-ग.११.कृता-अ.ब.फ.ग.ह.कृतौ-इ.१२.मादृशे-इ.फ.ग.ह.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७।। मामिति। हे राधे! तवेदं नयनं नेत्रमधुना मां अवलोकितुं द्रष्टुं लज्जितमिव मीलति[३]पिधत्ते। कीदृशं[४]माम्? अतिविफलरुषाऽतिनिष्फल[५]कोपेन विफलीकृतं दुःखितम्। नयनविशेषणं वा। [६]विफलीकृतं कर्णान्तरं प्रापितं अत एव निष्फला[७]द्रोषाद्विरम विरक्ता भव। रतिखेदं क्रीडादैन्यं विसृज त्यज।।७।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।७।। मामिति। रुषा कोपेन विफलीकृतः अवमानितः तम्। याहीत्यादिना अधिकृतः। श्रान्तं वा मामपि माधवमपि अवलोकितमेव प्रेक्षणमेव मधु क्षौद्रं तेन विकिर सिञ्च। अवलोकनसत्कारेण अवमानापनोदो भविष्यतीति भावः। इदं तव नयनं मीलितं लज्जया मीलितमिव तिष्ठतीति शेषः। नेत्रे प्रसारयतीति भावः। त्वं विरम विश्रममेहि। रतौ रतिनिमित्तं खेदं विसृज। कोपानलेनाधुना मीलितं लज्जितहेतुकत्वेनोत्प्रेक्षणाद् धर्मोत्प्रेक्षा।।७।।

## (१०) धनन्जय धरणीदेवकृत सर्वाङ्गसुन्दरी (नूतन)

।।७।। मामिति। तव इदं नयनम् अधुना मामवलोकितुं लज्जितमिव मीलति मुद्रितं भवतीत्यर्थः। अत्र कामविकारजनितं जागरणकृतं वा निमीलनं लज्जाजन्यत्वेनोत्प्रेक्षितम्। लज्जाहेतुमाह। मां किंविधम्? अतिविफलरुषा विकलीकृतमिति। अकारणं कोपेन विह्वलीकृतमित्यर्थः। व्याकुलतां नीतमिति यावत्। अन्योऽपि यः अकारणं कुपितः कञ्चित् तिरस्करोति, सः तिरस्कृतस्य मुखावलोकनेन लज्जितो भवतीत्यभिप्रायः। अतो विरम विरता भव। अतिविफलरोषादधिगन्तव्यम्। रतिखेदं विसृज इति। रतौ विषये यः खेदस्तं विसृज मुञ्च स्वस्था भवेत्यर्थः।।७।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७।। मय्यकारणकोपे तव नयनं प्रमाणमिति निगद्य प्रार्थयते। इदं तव नयनं अधुना मामवलोकितुं लज्जितमिव मीलति मुद्रितं भवति किमिति लज्जितमत आह, मय्यकारणकोपेन विकलीकृतं अन्योऽपि यः कश्चिन्निरपराधं कुपित्वा व्याकुलीकरोति सोऽपि तन्मुखावलोकनेन लज्जितो भवतीत्यभिप्रायः। तर्ह्यधुना किं करणीयं तदुपदिशेत्याह विरम रोषादिति ज्ञेयं ततो रतौ खेदं वाम्यं त्यज ।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। एवं क्रमेण सम्भोगप्रार्थनेन लज्जानिमीलितनेत्रामालक्ष्याह, मामिति। हे प्रिये! तव सम्भोगोत्सुकाया इदं मदवलोकनलोलं नयनमतिविफलरुषा निरर्थकोल्वणकोपेन विकलीकृतं व्याकुलीकृतं मां निरपराधं विलोकयितुं द्रष्टुं लज्जितमिव सञ्जातलज्जमिव मिलति, पक्ष्मणात्मानमाच्छादयति। यथान्यः कोऽपि हि स्वीयं निरपराधं जनं कुपित्वा व्याकुलीकरोति, ततस्तन्मुखावलोकनं लज्जया कर्त्तुं न शक्नोति, तथेदमपीति भावः। भवतु, नाम, यद्भूतम्। सम्प्रति रतौ प्रीतिविषये यः खेदः, कथमेवमाचरितमिति अवसादस्तं विसृज। मुञ्च । विरमेदृशाध्यवसायात्। निवर्त्तस्वेत्यर्थः। सविस्रम्भं मां पश्येति भावः। 'वि-आङ्-परिभ्यो रम' इति परस्मैपदम्। रमयेति केचित् पठन्ति। तदा स्पष्टोऽर्थः। वितर रतिखेदमिति क्वाचित्कः पाठः। तदा सुरतान्तखेदं देहि । सम्पूर्णसुरतदानेन मां सन्तोषयेति तात्पर्यार्थः।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। मामातिविफलरुषेति; हे राधे वृथा निष्कारणं त्वं मम रतिखेदं कामवाधां जनयसि। मां व्याकुलयसि। मामवलोक्य लज्जसे। तव नेत्रं मुदितं भवति। इदानीं त्वं कोपं परिहाय मामवलोकय। मा विमुखी भव।।७।।

**८-श्रीजयदेवभणितमिदमनुपद निगदितमधुरिपुमोदम्।**
**जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम्।। क्षण० ।।८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।। श्रीजयदेवभणितं रसिकजनेषु मनोरमरतिरसभावविनोदं जनयत्विति योजना। मनोरमश्चासौ रतिरसभावश्चेति विग्रहः। कीदृशमनुपदनिगदितो मधुरिपुमोदम् अनुपदं निगदितो मधुरिपुमोदो यत्रेति विग्रहः। इदानीं सुरतैः श्लोकैः प्रविभज्य वर्ण्णयन्नाह।।८।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।८।।श्रीजयदेवेति। रसिकजनेषु मनोरमो यो रतिरसो रतिरागस्तस्य भावस्तथा स्थैर्यं तस्य विनोदं कौतुकं जनयतु। किंभूतमिदं श्रीजयदेवभणितम्? अनुपमो निगदितो मधुरिपोर्मोदो यत्र येन वा तत्। 'पदानां दशकं यत्र ताले वर्गयतौ भवेत्। ध्रुवः प्रतिपदं गेयः कविनामाङ्कितात्पदात्।। गीतालापान्यथाशब्दं प्रतिताले ततः परम्। पाटास्तेनाः स्वराश्चैव शृङ्गारो रस उत्तमः।। देवशाखाभिधो रागः प्रबन्धे संप्रदृश्यते। श्रीविद्याधर-लीलाख्यः श्रीपतिप्रीतिकारकः।।' इति मधुरिपुमोदविद्याधरलीला नाम त्रयोविंशः प्रबन्धः।।८।।

## (३) जगद्धरकृत-सारदीपिका

।।८।। श्रीति श्रीजयदेवेन भणितमिदं गीतं रसिकजनेषु श्रृङ्गाररसलोकेषु मनोरमं मनः प्रीतिकरं रतिः सम्भोगः रसः श्रृङ्गाररसः भावाः सञ्चारिसात्विकादयस्ते तेषां विनोदं कौतुकं जनयतु उत्पादयतु कीदृशमिदम् अनुपदं पदे निगदितम् उक्तं मधुरिपोः कृष्णस्य मोदो हर्षो यत्र गीतम् ।।८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।।श्रीजयदेवेति। इदं श्रीजयदेवभणितं जयदेवेन कथितं रसिकजनेषु मनोरमरतिरसभावविनोदं रतिः संभोगः रसः शृङ्गाररसो भावाः संचारिसात्त्विकादयस्तेषां मनोरमं विनोदं कौतुकं जनयतु। कीदृशं भणितम्? अनुपदं निगदितो मधुरिपोः कृष्णस्य मोद आनन्दो यत्र तादृशम्।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।।श्रीजयदेवेति। अनुपदमनुतरं निगदितो भणितः मधुरिपोः श्रीकृष्णस्य मोदः सुरतघटनाजनितसन्तोषः येन तत्। श्रीजयदेवेन भणितमिदं गीतं रसिकजनेषु शृङ्गारास्वादिविदग्धजनेषु मनोरमा चित्ताकर्षका या रतिः स्थायीभावः तस्यारसस्तदा धृतिकशृङ्गाररससञ्चयस्तत्र विनोदं जनयतु सम्पादयतु। रसिकजना ह्लादकारीत्यर्थः।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। कीर्त्त्यनुवृत्त्यर्थं स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति। श्रीजयदेवभणितं गीतमिदं कर्त्तृ रसिकजनेषु मनोरमो मनःप्रीतिकरः यो रतिरसभावः रत्यनुरागजनितस्मरणादिव्यभिचारिभावः तस्माद्यो विनोदः आनन्दः तं जनयतु। तथा च प्रकृतगीतं विविधश्रृङ्गारकलास्मारणेन रसिकजनमानन्दयत्वित्यर्थः। कीदृशम्? अनुपदं प्रतिपदं निगदितः कथितो मधुरिपुमोदो यस्मिन् स तथा तत्।।८।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।८।। (श्रीजयदेवेति) श्रीजयदेवभणितं कथितं इदं गीतं रसिकजनेषु एतत्सम्भावितान्तःकरणेषु मनोरमं[८] रतिजनकं[९] रतिः सम्भोगः शृङ्गाररसभावाः सञ्चारिसात्त्विकादयः तैस्तेषां वा विनोदं कौतुकं जनयतु[१०] उत्पादयतु। कीदृशमिदम्? अनुपदं[११] प्रतिपदं निगदिता मधुरिपुमीह कृष्णहर्षी यत्र[१२] तत्। अथवैवं सम्बन्धः। श्रीजयदेवभणितं श्रियः राधाया दर्शनेन जयः आनन्दो यस्य दीव्यति क्रीडति इति देवः सचासौ श्रीकृष्णस्तेन भणितं श्रीराधां प्रति मामनुसरेत्यनुनय [१३]वाक्यकथितम्। कीदृशम्? अनुपदं निगदितं

मधुरिपोः [१४] स्वस्य मोदो [१५] हर्षो यत्र तादृशम्। अन्यत्समानम्। ''मुत्प्रीतिः प्रमदो हर्षः'' **इत्यमरः** (१.४.२४) इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां श्रीगीतगोविन्दटीकायां त्रयोविंशः प्रबन्धः।।८।।

१.मनुपम-च.२.मनोरमरचितसभावविनोदम्-च.उपधत्ते-ड.४.नास्ति-क.५.रोषेण-क. ६.नास्ति-क.७.दोषाद्विरम-ड.८.रतिरञ्जकं-ग.९.रतिरसभावाः शृङ्गाररसभावाः फ.ज. १०, ११.नास्ति-अ.ब.१२.तम्-अ.ब.इ.फ.ग.ह.ज.१३.वाक्यं कथितम्-फ.ग.ह.ज.१४.तस्य-ग. १५.नास्ति-अ.ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।८।।श्रीजयदेवेति। श्रीजयदेवभणितमिदं गीतं रसिकजनेषु शृङ्गारलोकेषु मनोरमं मनः प्रीतिकरं रतिःसम्भोगः रसः शृङ्गारः भावाः सञ्चारिणः सात्त्विकादयः तेषां विनोदं कौतुकं जनयतु। कीदृशमिदम्? अनुपदं पदे पदे निगदित उक्तो मधुरिपोर्मोदो हर्षो यत्र।।८।।

इति श्री गीतगोविन्दटीकायां नारायणपण्डितविरचितायां त्रयोविंशः प्रबन्धः।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।८।।श्रीजयदेवेति। असदृशः निगदितो मधुरिपोः कृष्णस्य मोदः क्रीडा येन तत्। इदं श्रीजयदेवस्य भणितं वचनं कर्तृ; रसिकाः साहित्यरसज्ञाः जनाः तेषु मनोरमचितः सुन्दरतया जनितः, भावैः, सात्त्विकादिभावैः सहितं यथा स्यात्तथा विनोदं हर्षं कर्म जनयतु।।८।।

इति श्री गीतगोविन्दटीकायां नारायणपण्डितविरचितायां त्रयोविंशः प्रबन्धः।।८।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयेवेत्यादि। इदं श्रीजयदेवभणितं कर्तृ रसिकजनेषु मनोरमरतिरसभावविनोदं जनयत्विति योजना। मनोरमः हृद्यश्चासौ रतिरससम्बन्धिभावश्चेति विग्रहः। तस्य विनोदं क्रीडाम्। श्रीजयदेवभणितं किंविधम्? अनुपदेत्यादि। अनुपदं पदे पदे निगदितो मधुरिपोर्मधुरिपुसकाशाद्वा मोदो हर्षो यत्रेति विग्रहः।।८।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।८।।इदं श्रीजयदेवभणितं कर्तृ रसिकजनेषु श्रीकृष्णभक्तजनविशेषेषु श्रीकृष्णस्य रतिरसे यो भावस्तदास्वादरूपस्तेन यो विनोदः सुखं तत् जनयतु। यतः प्रतिपदं निगदितो मधुरिपोर्मोदो यत्र तत्।।८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।८।। श्रीजयदेवेन भणितं वर्णितमिदं गीतं रसिकजनेषु रसविशेषभावितान्तः-करणभक्तजनेषु, मनोरमो हृदयङ्गमो यो रतिरसः श्रीकृष्णस्य श्रीराधया सह रतिसौख्यं, तस्य यो भावः आस्वादस्तेन यो विनोदः कौतुकं, तं जनयतु । यतोऽनुपदं, प्रतिपदं निगदितः प्रतिपादितो मधुरिपोर्मोदः शृङ्गारसुखं यत्र तत् ।।८।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।८।।श्रीजयदेवेत्याह श्रीजयदेवः अनुपदं मधुरितः श्रीकृष्णस्य आनन्दाय प्रभवति। एतद् खलु रसिकानां श्रीकृष्णभक्तानां हृदये कृष्णरतिं भाक्तिं वा जनयतु। अनिर्वचनीयानन्दं प्रददातु इति।।८।।

**६८- माराङ्के रतिकेलिसंकुलरणारम्भे तया साहस-**
**प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात्।**
**निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं**
**वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति।।६८।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६८।। रतिकेलि संकुलरणारम्भे तया राधया कान्तजयाय साहसप्रायं कान्तस्योपरि किञ्चित्प्रारम्भि किञ्चित्सामर्थ्यम् उपपादितं विपरीतमारव्धमिति यावत्, अनिर्णयो युद्धे इति रतिकेलिसङ्कुलारम्भे साहसं रतिकेलिरेव सङ्कु रणः परस्पराहतसंग्रामस्त-स्यारम्भ इति विग्रहः यत्सम्भ्रमादिति यदायासीत्यर्थः। एतच्च निस्पन्दा जघन-स्थलीत्यादौकारणमुपन्यस्तम्। पौरुषरसः स्त्रीणां कुतः कथञ्चित् सिध्यतीति यस्मा-त्किञ्चित्पौरुषकर्मारम्भेऽपि राधाया निस्पन्दा जघनस्थलीजात तत्तस्नादनुमितं स्त्रीणां पौरुषरसः सिध्यतीत्येव इत्यभिप्रायः। रतिकेलिसङ्कुलरणारम्भे कीदृशो माराङ्के रतिकेलिपक्षे मारः संकुली रणपक्षे मारो मारणम् ।।६८।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।६८।। यदुक्तं तदेव वीरसंवलितं शृङ्गारं विवृण्वन्नाह, वामाङ्क इति। अयं श्लोकः पूर्ववाक्यशेषत्वेन योजनीयः। तदेत्यन्वयः। रतिकेलिसंकुलरणारम्भे वामाङ्के वर्तमानया राधया संभ्रमात्स्मरसमराभिनिवेशात्संयमनादिभ्य उपरि कान्तजयाय यत्किंचित्समर-संपल्लम्पटभटयोग्यसाहसप्रायं बालाजनायोग्यं प्रारम्भि येन जघनस्थली निष्पन्दा इति चलितुमशक्तिः। अपि च दोर्वल्लिः शिथिलिता इति प्रहाराक्षमता। अपि च, वक्ष

उत्कम्पितं हृदि कम्पो जातः। अपि च, अक्षि मीलितं दर्शनेऽशक्तं जातम्। अत्रार्थे वृद्धसंमतिमाह,स्त्रीणामबलानां पौरुषरसो वीररसः कृतः सिध्यति। अपि तु न कुतोऽपि। कैलौ वामाङ्के ललनाया दक्षिणाङ्गस्थपुंसः भानुनाडीसंबन्धात्सुरतान्तकारी कामोद्भवो भवतीति **वात्स्यायन**मतवेदिनां मतम्। तस्मिंश्च ललनानामेवं चेष्टाः प्रसिद्धाः। अथवा, रतारम्भादुपरि इति योजना। इदमेव वाक्यं निरपेक्षं व्याख्येयम्। अत्र दोष्णोर्वल्लित्वेन विशेषणं शैथिल्ये औचितीमावहति। अत्र 'विशेषोक्तिरखण्डेषु कारणेषु फलावचः।' **(का.प्र.१०/१०७)** इति विशेषोक्तिरलंकारः। संभोगाख्यः श्रृङ्गारो रसः। कुतः सिध्यतीत्यनेन समरसकरणं व्यज्यते। गीत्यादि प्रसिद्धम्। 'जयश्रीसंज्ञतालेन पद्यं पाटाः स्वरास्तथा। स्तेनाश्च यत्र बध्यन्ते संभोगे रस उत्तमे।। रागे कर्पटबङ्गाले स पौरुषरसात्परः। प्रेम्णा विलासनामायं प्रबन्धो माधवप्रियः।।' इति पौरुषरसप्रेम-विलासनामा षड्विंशः प्रबन्धः।।६८।।

## (३) जगद्धरकृत-सारदीपिका

।।६८।। इदानीं सुरतारम्भनिरुपयति प्रत्यूह इति तयोः राधाकृष्णयो सः सुरतारम्भः प्रियं भावुकः प्रियं भवितुं शीलं यस्य सः उद्भूतः प्रकटोबभूव स कः यस्मिन्सुरतारम्भे निबिडाश्लेषे गाढालिङ्गने कर्तव्ये पुलङ्काकुरेण रोमोद्गमने प्रत्यूहः विघ्नोऽभूत् व्यवधानकर्तृत्वाद्रोमोद्गमस्य यस्मिन्सुरतारम्भे क्रीडाकूतविलोकिते क्रीडासु अभिप्रायपूर्वकं यद्विलोकितं तस्मिन्कर्तव्ये कथाकेलिभिः प्रत्यूहोऽभूत् अपि समुच्चये यस्मिन् मन्मथकलायुद्धे कामकलान्वित सुरत संग्रामे कर्त्तव्ये आनन्दाधिगमेन आनन्दप्राप्त्या प्रत्यूहोऽभूत् प्रीत्या आनन्दप्राप्तिः।

तदेव पुनः कथयति मारांके इति माराङ्के माराङ्कसंज्ञके रतिकेलि सङ्कुलरणारम्भे सुरतक्रीडा तुमूलयुद्धारम्भे तया राधया यत्संभ्रमात्कान्तजयाय कृष्णजयार्थं साहसप्रायं किञ्चिदुपरि विपरीतरतं प्रारम्भि आरब्धं तदेव जघनस्थलीनिस्पन्दास्तब्धा जाता दोर्वल्ली भुजलता शिथिला जाता वक्षस्थलमपि कम्पयुक्तमभूत् तथा अक्षि नेत्रयुग्मं मीलितमभूत् अतएव स्त्रीभिरतिसाहसात्प्रारब्धमपि पौरुषं कुतः सिध्यति न्नैव सिध्यतीत्यर्थः।।६८।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६८।। माराङ्क इत्यादि। माराङ्के मारस्य चिह्ने। युद्धपक्षे मारस्याङ्के चिह्ने। रतिकेलिसंकुलरणारम्भे रतिकेलिभिश्चुम्बनालिङ्गननानाबन्धादिरूपाभिः संकुले व्याप्ते रणारम्भे कामयुद्धारम्भे तया राधया साहसप्रायं साहसबहुलं कान्तजयाय तदुपरि तस्य कान्तस्योपरि किंचिल्लोकोत्तरं प्रारम्भि पुरुषायितप्रारब्धम्। यत्संभ्रमात्संवेगात्तस्या

राधिकाया जघनस्थली निष्पन्दा निश्चला जाता। दोर्वल्लिर्बाहुलता शिथिलिता शिथिलीभूता। वक्षो हृदयमुत्कम्पितम्। अक्षि मुद्रितम्। ततः स्त्रीणां पौरुषरसः पराक्रमाभिलाषः कथं सिध्यति ? अपि तु न सिध्यत्येवेत्यर्थः। 'मारो मृतौ विषेऽनङ्गे' इति **विश्वः**। 'समौ संवेगसंभ्रमौ' **इत्यमरः**।।६८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६८।। एवमुपरि सुरतेन कान्तमुपवर्ण्यानन्तरं तृप्तिमाह। माराङ्क इति। मारस्य ''मदनो मन्मथो मार **इत्यमरः**'' अङ्के चिह्ने तत्प्राप्तिगमक इत्यर्थः। मारो मरणं तस्याङ्क इति च ध्वन्यते। ''उत्सङ्ग चिह्नयोरङ्क **इत्यमरः**।'' अथवा प्रारव्धे रतिकेलीति क्वचित्पाठः। तदा रणारम्भे प्रारव्धे सतीति अन्वयः। रतिकेलि सङ्कुलरणारम्भे सुरतक्रीडा तुमुलसुरतोपक्रमे तया राधया साहसप्रायं साहसवहुलं साहसेन मरणमिति यावत्। तद् यस्मिन्निति च ध्वन्यते। ''प्रायो भूम्यन्तर्गमने **इत्यमरः**।'' रणारम्भस्य मरण फलकत्वात्साहसमूलत्वमवगन्तव्यम्। एतादृशं यत्किञ्चित्कार्य्यं कान्तजयाय बल्लभजयाय सम्भ्रमादाटोपात् उपरि कान्तोपरि प्रारम्भि उपक्रान्तमित्यर्थः। कर्मणि शुभं ''दर्शखारसेणल्युशेरिति ल्युट् च''। अत्र कान्तशब्देन वल्लभग्रहणं तस्यानन्यपत्यर्थत्व सूचनार्थमित्यवगन्तव्यम्। अतएव भट्टविजयार्थं प्रतियोद्धः प्रवृत्तिरपि युक्तेतिभावः। कान्तजयाय यत्किञ्चिकार्य्यं प्रारभ्यते वा योजना, तत्र त्कार्य्ये जघनस्थली राधायाः नितम्बप्रदेशः निस्पन्दा कान्तजयाय प्रवृत्तानि चेष्टा जातेति वाक्यार्थः। तात्पर्य्यं तु स्तम्भरूपसात्तिववती। तथा दोर्वल्लिर्वाहुलतिका शिथिलिता शिथिलीकृता जयार्थं प्रवृत्ता शिथिलप्रयत्ना जाता इति तात्पर्य्यम्। तु सात्त्विकोदयेन गलित यन्त्रेणेति। अत्र बन्धनानुगुणाया दोर्वल्लित्वारोपणं युक्तमित्यबगन्तव्यम्। वक्ष उरस्थलम् उत्कम्पितं जयाय प्रवृत्तं वहिर्गतकम्प जातमित्यर्थः। तात्पर्य्यं तु निधूवनजातनिःश्वासेन कम्पितमिति। अक्षि नयनम् एकत्वविवक्षितम्। तादृशं रणं द्रष्टुम् शक्नुवत् बद्धकष्टं जातमित्यर्थः।

तात्पर्य्यं तु दुःखपारवश्येन मीलितं जातमिति अतश्च पौरुषेण पुरुष कर्मणा पुरुषभावेन वा रसः पुणोत्कर्षः स्त्रीणां कुतः सिध्यति। न कुतोऽपीत्यर्थः। श्लेषोत्थापित-काव्यलिङ्गमलङ्कारः। रतिकेलिरणारम्भ इत्यत्र रूपकम्। सिद्धस्य जयस्य पराजय-रूपत्वेनोहनाद्गम्योत्प्रेक्षा। विशेषेण सामान्य समर्थनरूपो अर्थान्तरन्यासश्च। त्रयाणां समुच्चयप्रतिपादनात् समुच्चयालङ्कारश्च। एतेषां संसृष्टिः सङ्करो यथायोगं द्रष्टव्यौ। रतिकेलीत्यत्र रतिशब्देन एवं विधं सुरतं कथितं मुनिना क्रमशः कथयामि।

विशेषसविशेषमथेति किञ्चिदुपरि प्रीतिरित्यनेन च धनकादिविशेषवल्लभायिताख्याः सुरतविशेषः सूचितः। तल्लक्षणं तु स्वेच्छया रमणी कापि वल्लभे योषिदाचरेद्धि वल्लभमिति प्रसङ्गे बन्धविशेष लक्षणान्यपि कथ्यन्ते,

न्यस्त हस्तयुगला निजे पदे योषितेति कटिरुरु वल्लभा।
अग्र तो........रधोमुखी धेनुकं वृक्षवदुन्नतं प्रिये।।
व्यानतं रतमिदं यदि प्रियः स्यादधोमुख चतुष्पदा कृतः।
तत्कटि समधि रुह्य वल्लभं स्याद् बृषादि पशु सम्मित स्वरः।।
चक्रवद् भ्रमता कृतांघ्रिणा भ्रामरम्भजघने समुद्धते।
भूगत स्तन भुजास्यमस्तकामुन्नतस्यजमधोमुखीं पियाम्।।
क्रमति स्वकरस्पृष्ट मेषनो वल्लवे करभैरव मुच्यते।।

ग्रन्थान्तरे, प्रसारिते पाणिपादे शय्या स्पृशि मुखोरसि।
उन्नतायां स्त्रियः कट्यां मरर्जारकरणं विदुः।। इति बोद्धब्यम्।।६८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६८।। अथ क्रमप्राप्तविपरीतान्तं वर्णयति। तया राधिकया सम्भ्रमादादरात् कान्तजयाय वल्लभजयार्थं साहसप्रायं यत्किञ्चिदुपरि प्रारम्भि प्रारब्धम्। कुत्र ? रतिकेलि सङ्कुलरणारम्भे रतौ या केलिः क्रीडा सैव सङ्कुलरणः तुमुलसंग्रामः, तस्यारम्भे। किम्भूते ? मारः कन्दर्पः स एवाङ्कं चिह्नं यस्य एतादृशि। अन्योऽपि संग्रामो मारणम् अङ्कं चिह्नं यस्य एतादृशो भवति। 'तुमुलं रणसङ्कुल' **इत्यमरः**। तस्मात् जघनस्थली निष्पन्दा बभूव, दोर्वल्लिः बाहुलता शिथिलता शैथिल्यं प्राप्ता, वक्षः हृदयमुत्कम्पितम्, अक्षि लोचनं मीलितं मुद्रितं बभुव। कथमेवमभूदित्याशंकायामाह, स्त्रीणां पौरुषरसः पौरुषे कर्मणि रसः अनुरागः कुतः सिध्यति कुतः फलपर्यवसन्नो भवत्यपितु न भवतीत्यर्थः।।६८।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६८।। तामेव तृप्तिं विशिनष्टि, माराङ्क इति। अनया श्रीराधया[४]साहसप्रायं [५] साहसबहुलं कान्तजयाय श्रीकृष्णजयं कर्तुं तदुपरि किञ्चिल्लोकोत्तरं सुरतमिति शेषः ; रतिकेलिसङ्कुलरणारम्भे रतिकेलिभिः संश्लेषचुम्बनादिभिः सङ्कुले व्याप्ते रणारम्भे सङ्ग्रामोपक्रमे [६] यत् यदा प्रारम्भि तदा साहसात्सम्भ्रमा[७] ज्जघनस्थली निष्पन्दा निश्चलाऽभूदिति शेषः। [८]कीदृशम् ? [९] कामस्याङ्कः छिद्रं नखक्षतादि [१०] यत्र[११]। किञ्च दोर्वल्लिर्बाहुलता[१२] शिथिलिता श्लथीभूता। वक्षो हृदयं उत्कम्पितम्। अक्षि चक्षुर्मीलितं

[१]मुद्रितम् आलिङ्गनाय, केनापि रसविशेषेण सर्वं जातमिति भावः। एवं कृतोऽपि स्त्रीणां पौरुषरसः [२]पुरुषाभिलाषः कुतः कथं सिद्ध्यति; अपि तु न सिद्ध्येदेवेत्यर्थः। ''सङ्कीर्णे [३] सङ्कुलेऽपि'' इति यादवः।।६८।।

१.वामाङ्के-नि.सा.वामाङ्गे-च.२.यत्सम्भ्रमात्-नि.सा.ड.च.३.अहो इत्याश्चर्ये-क.४.नास्ति-ह.५.न बहुलं-ग.साहसबहुकालं-फ.ज.६.यद्यदारम्भे-ग.७.जघनस्थलीभिः स्पन्दा-अ.ब.८.तः-११.पर्यन्तं नास्ति-अ.ब.८.नास्ति-ग.९.मारस्याङ्कः-फ.ज.१०.यत्-इ.१२.नास्ति-ग.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६८।। माराङ्क इति। तया राधया कान्तजयाय कृष्णजयं कर्तुं माराङ्के [४] मारस्य कामस्याङ्कः चिह्नितं यस्मिन् कामचिह्ने रतिकेलिः सुरतक्रीडा चुम्बनादिस्तया सङ्कुलो व्याप्तो यो रणः सङ्ग्रामस्तस्यारम्भे उपक्रमे कामयुद्धारम्भ इत्यर्थः। साहसप्रायं साहसबहुलं यत्किञ्चिदुपरि कृष्णोपरि सम्भ्रमाद्वेगादारम्भि आरब्धं तदा जघनस्थली निष्पन्दा निष्चलाऽभूत्। दोर्वल्लिर्बाहुलता शिथिलिताऽभूत्। वक्षः उत्कम्पितमभूत्। [५] अक्षि चक्षुः मीलितं मुद्रितमभूत्। अतः स्त्रीणां पौरुषरसः पराक्रमाभिलाषः कुतः कथं सिद्ध्यति न सिद्ध्यत्येवेत्यर्थः। सङ्ग्रामपक्षे मारो मरणमङ्कं चिह्नं यस्मिन्। [६] विपरीतसुरतं विवक्षितमत्र।।६८।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६८।। रतान्तं वर्णयति, वामाङ्ग इति। वामानि सुन्दराणि वक्राणि वा अङ्गानि उत्तानस्थितव्यानतोपविष्टादिनानाकरणानि यस्मिन्। रतिकेलयः सुरतक्रीडाः ताभिः सङ्कुलः ततो रणः सुरतरूपः तस्य आरम्भे उपक्रमे तया कान्तया कान्तजयाय प्रियापेक्षया उत्कर्षरूपजयाय साहसमेव प्रायः आधिक्यं तत् स्वस्याः [७]आयासमात्रस्यैव जनकं न सुखकलाविशेष इति भावः। किञ्चित्करणबन्धादि-विशेषात्मकं सम्भ्रमात्। अविचारात् उपरि प्रियोपरिभागे प्रारम्भि; भावे प्रयोगः; उपक्रान्तं उद्युक्तं पुरुषायित-मारब्धमित्यर्थः तदा किं किमासीत्तदाह। जघनस्थलीनिर्गतः स्पन्दो यस्या सा अभूत्। दोर्वल्लिः भुजलता शिथिलिता श्लथा। गाढालिङ्गनेन विश्लथं जातमित्यर्थः। वक्षः हृदयं उत्कम्पितं अतिशयेन चलितम्। अक्षि नेत्रयुगं अवलोकनासमर्थमभूदिति प्रत्येकान्वयार्थं अध्याहारः। स्त्रीणां पौरुषरसः पुम्भावः कुतः सिद्ध्यति; स्त्रीत्वादेव पुरुषक्रियमाणव्यापारः दृढवेगगाढालिङ्गननिर्भीकत्वावलोकनादिकः न निष्पद्यत इति आयासमात्रकरणम्। एवं सुरतारम्भवर्णितैः आनन्दातिशयोऽभूदिति भावः। अत्र सामान्यतः स्त्रीणां पुरुषत्वासिद्ध्या प्रकृतराधायाः स्त्रीविशेषस्य पौरुषाभावसमर्थनात्

अर्थान्तरन्यासालङ्कारः। हि शब्दाभावाद्गम्यः। जघनस्थल्यादीनां अध्याहृतक्रियया दीप्यमानत्वात् क्रियादीपकालङ्कार। तेन च खलेकपोतन्यायेन पृथगन्वयात्स-मुच्चयालङ्कारः। उद्देश्यविधेयांशः नोद्भावनीयः। अर्थतोऽन्वये तद्नुदयात्। आरब्ध-क्रमपरित्यागात् ध्वनिर्वा स एव गुणः ।।६८।।

१.मुद्रिताङ्कमः-अ.ब.२.पुरुषरसः पुरुषाभिलाषः-फ.ज.३.सङ्कुले व्याप्ते-इ.फ.ग.ह.ज. ४.नास्ति-ड.५.अक्षि मीलितमभूत्-क.६.विपरीतं-क.७.आयासमात्रमेव-च.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६८।। माराङ्ग इति। रतिकेलिसङ्कुलरणारम्भे तया राधया कान्तजयाय कान्तस्य कृष्णस्य जयाय कृष्णं जेतुं साहसप्रायं कान्तस्योपरि किञ्चित् सामर्थ्यमुत्पादितं विपरीतमारब्धमिति यावत्। अनिर्णीतो जयो युद्धे इति रतिकेलिसङ्कुलरणारम्भे किञ्चित् प्रारम्भे साहसम्। रतिकेलौ सङ्कुलरणः परस्पराहतसङ्ग्रामः तस्यारम्भ इति विग्रहः। यत्संभ्रमादिति। यदायासादित्यर्थः। एतच्च निष्पन्दाजघनस्थलीत्यादौ कारणमुपन्यस्तं पौरुषरसः स्त्रीणां कुतः सिद्ध्यतीति। यस्मात् किञ्चित् पौरुषकर्मारब्धाया निष्पन्दाजघन-स्थलीत्यादिकं जातं तस्मादनुमितं स्त्रीणां पौरुषरसो न सिद्ध्यतीत्येवेत्यभिप्रायः। पुरुषस्य युद्धारम्भे एतज्जघनस्थली निष्पन्दत्वादिकं न सम्भवतीत्यर्थः। रतिकेलि-सङ्कुलरणारम्भे किंविधे ? माराङ्ग इति। रतिकेलिपक्षे मारः कामः स एव अङ्गं यत्रेति विग्रहः। सङ्कुलरणपक्षे मारो मारण (मन्मथः) स एवाङ्गम् उपायो यस्य। ''अङ्गं गात्रे प्रतीकोपाययोः पुंभूम्नि'' इति। निर्वृति....किञ्चित्प्रारम्भादित्यर्थाद्वा। माराङ्के इति वा पाठः। तदा अङ्कश्चिह्नमिति।।६८।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६८।। अथ तत्क्रीड़ाविशेषमाह, माराङ्के इति। रतिकेलिरेव संकुलरणः परस्पराहतसंग्रामः तस्य आरम्भे तया श्रीराधया कान्तजयाय तस्य कान्तस्य उपरि साहसप्रायं यत्किंचित् अनिर्वचनीयं प्रारम्भि तत्संभ्रमात् संभ्रमजनितात् आयासात् इति यावत् श्रीराधाया जघनस्थली निष्पन्दा जाता। दोर्वल्ली शिथिलता, वक्षः उच्चैः कम्पितम्, अक्षि मीलितं जातौ एकत्वम्। अर्थान्तरन्यासम् आह, पौरुषरसः स्त्रीणां कुतः सिध्यति ? कीदृशे ? रणारम्भे माराङ्के, केलिपक्षे, मारः कामः, रणपक्षे मारणं उभयत्र अङ्कः चिह्नम् ।।६८।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६८।। एवं रतेर्मध्यावस्थामभिधायाधुनान्तिमावस्थामाह, माराङ्के इति, मारस्य कामस्याङ्के चिह्ने तत्प्रधानता गमक इत्यर्थः। एवम्भूते रतिकेलिसङ्कुलरणारम्भे

चुम्बनालिङ्गनादिविविधसम्भोगसम्मर्दसंग्रामोपक्रमे संवृत्ते सति, तया राधया कान्तं जेतुमुपरि तस्योपरि, साहसप्रायं, साहसबहुलं, किञ्चिदनिर्वचनीयं, सम्भ्रमात् गलितश्रान्तिभरोत्साहातिरेकात् यत् प्रारम्भि, यत् प्रारब्धं तस्मादनवरतकृतयातायाततया, जघनस्थली निस्पन्दा, तत्क्षणसमुदितजडतातिशयवशेन निश्चला जाता। चेष्टितुमसमर्थेति भावः। तथा दोर्वल्ली, दृढवेष्टनपटिष्ठा बाहुवल्लरी, तत्समयोद्भूतघर्मबिन्दु-सन्दोहनिःसहतया शिथिलिता, व्यापाररहिता, तथा बक्षः पृथुकुचवहनक्षमं खरतर-करजाघातेऽपि, अकम्पमानमुरः, उत्कम्पितं, तत्कालप्ररुढखरश्वाससन्ततिवशेन ऊच्चैः कम्पितम्। तथा अक्षि, तत्कालीनविविधविभ्रममनोहरं प्रियकृतचुम्बनलाभसञ्जात-हर्षोत्फुल्लनयनं, निःसहतातिशयसमुत्थितमूर्च्छावशात्, उन्मीलितं मुद्रितम्। एतदेव सर्वमर्थान्तरोपन्यासेन द्रढयति। स्त्रीणां सर्वावस्थासु अतिकोमलानामवलानां पौरुषरसः, पुरुषकृत्याभिलाषः, पुरुषभावेन गुणोत्कर्षो वा कुतः सिध्यति, कथमपि न सिद्ध्येदिति अर्थः।।६८।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६८।। वामाङ्के (माराङ्के) इति; अयं श्लोकः पूर्वश्लोकस्य शेषत्वेन प्रवर्त्तते। तस्मिन् शृङ्गारकेलिसमये रतिरणकाले वामाङ्केवर्तमानया श्रीराधया शृङ्गारकौतुकक्रीडा-संकुलसमूहारम्भे तथा श्रीराधा क्रीडायां रणे वा कान्तस्योपरि विजयलाभं कर्त्तुं साहसप्रायं दुःसाहसं कृतवती आसीत्। यद्यपि पुरुषस्य समक्षं स्त्रियः रणमधिककालं न स्थास्यति। संभ्रमेण ससंभ्रमं सलज्जं तस्य श्रीकृष्णस्य उपरि आरम्भमकरोत् सा। परन्तु कियत्कालं तस्योपरि स्वस्याः जघनं घातयित्वा चालयित्वा जघनस्थली निष्पन्दा संजाता क्लान्तत्वात्। शिथिलता दौर्वली अर्थात् हस्ताभ्यामायासेन शिथिलता प्रप्ता कम्पनं च भवति श्रमक्लेशेन। वक्षसि कम्पो नाम श्वासाधिक्यं सूचयति शृङ्गारश्रमेण। फलतश्चक्षुः मीलितं निमीलितं भवति। अतः अनेन स्त्रीणां पौरुषरसः नाम पुरुषायितेन शृङ्गारयुद्धः कुतः जयो भवति। अवलाशरीरेण शीघ्रं क्लान्तता भवति इति अर्थान्तरन्यासोऽलंकारः विशेषोक्तिरिति **कुम्भः**। अत्र सम्भोगशृङ्गाररसः।।६८।।

**६८- (क) तस्याः पाटलपाणिजाङ्कितमुरो निद्राकषाये दृशौ**
**निर्धौताधरशोणिमा विलुलितस्त्रस्तस्त्रजो मुर्धजाः।**
**काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशो-**
**रेभिः कामशरैस्तदद्भुतमभुत्पत्युर्मनः कीलितम्।।६८-क।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६८-क।। पाटलपाणिजाङ्कितमुर इति नखक्षतलोहितं वक्ष इत्यर्थः सुरतविमर्द्दे पत्रावलीविनष्टेऽधिगन्तव्यं, पाटलपाणितलाङ्कितं पश्चात्पाटलमिति विग्रहः। राजदन्तादित्वात्परनिपातः। निद्राकषाये दृशाविति निद्रालोहिते चक्षुप्रीत्यर्थः। कज्जलं लुप्तमित्यधिगन्तव्यम्। निर्द्धौतोऽधरशोणितमिति अलक्तरागचुन्वनेनप्रक्षालित इत्यर्थः। विलुलिताःश्रस्तस्रजो मूर्द्धजात सुरत विमर्द्दे विगलितमाल्यत्बात् बन्धनैबिड्योपगमादितस्ततो गताः केशा इत्यर्थः काञ्चीदामदरश्लथाञ्चलमिति रसनाकलापः शिथिलैकदेश इत्यर्थः। दरमीपत् श्लथमञ्चलमग्रभागो यस्येति विग्रहः। प्रातर्निखातैर्द्दशोरेभिः कामशरैस्तदद्भुतमभूत् पत्युर्मनः कीलितमिति प्रभाते कामशरोर्भूत्वा चक्षुद्वारा पत्युर्मनः प्रतिष्ठाव्यमित्यर्थ। तदद्भुतमिति तव तदाश्चर्य्यमित्यर्थः। सुरत विमर्द्दे राधायाः वेशभङ्गतापि कामशरायत्तमित्यद्भुतत्वम्।।६८-क।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६८-क।। इदानीं संभोगसंतष्ट्याऽऽसर्गसमाप्ते संभोगान्ते लीलामाह, तस्या इति। एभिः पञ्चभिः कामशरैः पत्युः श्रीकृष्णस्य मनः कीलितम्। तदेतद्भुतमाश्चर्यकारि अभूत्। किंभूतैः कामशरैः? इत्यनेन प्रकारेण प्रातर्दृशोर्निखातैः। बाणस्तु दृशोर्लग्नास्तैर्विद्धं मन इत्येतदद्भुतम्। कोऽर्थः? प्रातः प्रियायामेतानि दृष्ट्वा पुनर्नव इव कामः संजात इत्यर्थः। तान्येव च कामबाणपञ्चकव्याजेन वस्तून्युपदिशति। तस्या राधाया उरो हृदयं पाटला ये पाणिआस्तैरङ्कितं दृष्ट्वा। अनेन पाटलापुष्पं स्मरबाण उक्तः। अपि च, निद्रया कषाये कलुषिते दृशौ दृष्ट्वा। अनेन कमलाख्यः पुष्पबाणोऽभाणि। अपि च, निर्धौतोऽधरशोणिमा। तं दृष्ट्वा। अनेन बन्धुजीवपुष्पं स्मरशरोऽगादि। अपि च विलुलितस्रस्तस्रजो मूर्धजाः। तानपि दृष्ट्वा। स्रस्ता स्रक् येभ्यस्ते तथा। विलुलिताश्च ते स्रस्तस्रजश्च। अनेन मालतीदाममीनकेतनेषुरुद्दिष्टः। अपि च दरश्लथाञ्चलमीषच्छ्लथप्रान्तं काञ्चीदाम मेखलादाम दृष्ट्वा। अनेन सुवर्णजात्यादिपीतकुसुमैः कुसुमास्त्रशरो वर्णितः। एतानि दृष्ट्वा पुनः

स्मरपरवशो जात इत्यर्थः। शार्दूलविक्रीडितं वृत्तम्। अत्रापि वाक्यस्यान्य-परत्वाद्रसवदलंकारता। रसश्चाद्भुतोपबृंहितः शृङ्गार एव। 'यतितालेन तालेन पद्यं पाटस्वरास्तथा। स्तेनास्तदन्त आलापः शृङ्गारः प्रेमनिर्भरः। रागो मरुकृतिर्यत्र स प्रबन्धो निगद्यते। कामाद्भुताभिनवता मृगाङ्कलेखाभिधानतः।।' इति कामाद्भुताभिनव-मृगाङ्कलेखाभिधः सप्तविंशः प्रबन्धः।।६८-क।।

## (३) जगद्धरकृत-सारदीपिका

।।६८-क।। तस्या इति एभिः पूर्वोक्तैः कामशरैर्यत्पत्युः स्वामिनो मनः कीलितं विद्धम् एतस्या इति एभिः पूर्वोक्तैः कामशरैर्यत्पत्युः स्वामिनो मनः कीलितं विद्धम् एतदद्भूतमाश्चर्यमभूत् कथंभूतैः कामशरैः प्रातः काले दृशोर्नेत्रयोर्निखातैरारोपितैः इतीति किं तस्याः राधाया उरः पाटलपाणिजैः श्वेतरक्तनखै श्चिह्नितं तस्या निद्राकषाये निद्रालोहिते दृशौ नेत्रे तस्याः निर्द्धूतः पतिः अधरशोणिमा अधरलौहित्यं तस्या विलुलिता मालाः स्रस्ताः शिथिलिता स्रजो माला येभ्यस्ते मूर्द्धजाः केशाः दरः ईषत् श्लथं शिथिलम् अञ्चलं वस्त्रं यस्य तादृशं काञ्चिदाम मेखलागुणः कामशरैः नखक्षत जागरचुम्बन केशाकर्षणनीवीमोचनानि पञ्चशराः निरुपिताः अन्यत्र निखातै बाणै रन्यत्कीलितमित्याश्चर्यमित्यर्थः।।।६८-क।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६८-क।। तस्या इति। एतैः कामशरैः पत्युर्दृशोर्लोचनयोः प्रातर्निखातैर्मनः कीलितं विद्धम्। इत्यद्भुतमाश्चर्यम् ।अन्यत्र निखातैर्बाणैरन्यत्कीलितमित्याश्चर्यमित्यर्थः। कैः कामशरैः? तस्या राधायाः पाटलेन श्वेतरक्तेन पाणिजेन नखेनाङ्कितमुरः। निद्राकषाये निद्रया कषाये ते दृशौ लेचने वा। निर्धौताधरशोणिमा निर्धौतश्चुम्बनादिना क्षालितो योऽधरस्य शोणिमा लौहित्यम्। मूर्धजाः केशाश्च कीदृशाः। विलुलितस्रजो विलुलिताः केशग्रहणपूर्वकचुम्बनादिदानेन म्लानाः। अत एव स्रस्ताः शिथिलाः स्रजः पुष्पमाला येषु तादृशाः। काञ्चीदाम च मेखलासूत्रं च दरश्लथाञ्चलं दरमीष-च्छ्लथं शिथिलमञ्चलं वस्त्रप्रान्तं च।।६८-क।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६८-क।। एवं सुरतमुपवर्ण्य तस्यान्तं वर्णयति। तस्या इति। तस्याः राधायाः पाटलाः श्वेतारुणाः ये पाणिजाः करजाः "श्वेतरक्तस्तु पाटलः" **इत्यमरः**। तैरङ्कितं कृष्णनख ब्रणालङ्कृतमित्यर्थः। अत्र नखानां पाटलवर्ण्णनं कृष्णस्य महाभाग्यसूचनार्थ-मित्यवगन्तव्यम्।

पाणिपादतले रक्ते नेत्रान्तौ च नखानि च।
नाभिजिह्वाधरौष्ठं च सप्तरक्तं प्रशस्यते।।

तस्या इत्यस्य दृशादिषु सर्वत्रान्वयः। तस्या दृशौ निद्राकषाये रक्तवर्णे जाते सुरतव्यापारे निद्राया अभावात्। पुनर्निद्रार्थं रक्तवर्ण्णे जात इत्यर्थः। अथवा। निद्रेत्यत्र दर्शव्यतिरेकलक्षणयात्र तदा वो गृहीतेति। तदा च निद्रया निद्राभावेन कषाये समन्तात् कषायेत्यर्थः। अथवा निद्रया करणेन कषाये सुरतानन्तरं शय्यायां निद्रायामनुभूतायामनन्तरमरुणे जाते इत्यर्थः। तादृशे अथवा अनिद्रेति वहुब्रीहिः। अधरस्य शोणिमा रागः निर्द्धूता निराधूता अधरपानेनापगतेत्यर्थः। अधर पानस्यात्यन्तासक्ति सूचनार्थं न ग्रहणम्। क्रिया सामर्थ्यं वेत्यरुणिमशब्देन ताम्बूल न तु सहज इत्यर्थ। तस्य स्त्रीलिङ्गप्रयोगः मृग्यः बिलुलिताः सुरतव्यापारेण निद्रया वा। इतस्ततः स्रस्ता विक्षिप्ता इत्यर्थः। अतएव स्रस्ताः गलिताः स्नजः कुसुम मालिका येभ्यस्ते तादृशा जाता इति शेषः। काञ्चीदाम रसनाकलापं दरमीषत्श्लथं श्रान्तम् अञ्चलम् अन्तिमभावो यस्य तत्तादृशं सुरतव्यापारशिथिलकीलकमित्यर्थः। इत्येवं प्रकारैरेभिः पूर्वोक्तै निशातैस्तीक्ष्णः प्रातरुषसि दृशो गोचरैरितिशेषः। कामशरैः कामवाणैः निखाते इति क्वचित्पाठः तदादृशोः कृष्णदृशोः निखातै र्निखनितैः तद्दृष्टि विषयीकृतैः, पुनः सुरतोत्कण्ठितं जातमित्यर्थः। इदं त्वाश्चर्य्यमिति भावः। तदुक्तम्,

उत्तिष्ठन्त्या रतान्ते भरसुरपतौ पाणिनैकेन कृत्वा-
धृत्वा चान्येन वासः शिथिलतकवरी भारसं से वहन्त्याः।
भूयस्तत्कालकान्तद्विगुणितसुरतप्रार्थनाशारिणाद्धः
शय्यामालिङ्ग्य नीतं तववपुरलसब्धाहुलक्ष्म्या पुनातु।।

अन्यत्राप्युक्तम्,

सा रामविद्या निरवद्य गोष्ठी नृप्तस्य या षिस्मयमातनोतु।
सा रूपरेखा रतिदृष्टिभाजां भूयोर्दशं संजनय व्यजस्रम्।।

अत्र पत्युर्मनः कीलितमिति मनः कीलनरूपवस्तुना राधायाः सुरतान्तकालस्य लोकोत्तरत्वरूपं वस्तु व्यज्यत इति वस्तु व्यज्यत इति वस्तुध्वनिः।।५।।

अथेति। स्वाधीनभर्त्तृका राधा कान्तं निजगादेति सम्बन्धः। स्वाधीन भर्त्तृका लक्षण यथा,

आश्लेषचुम्बनशतैर्कुसुमादिदानैः
प्रेमोत्तरप्रणयकोमलमुग्धवाग्भिः।

यां सर्वदैव सुखयन्नियत: प्रियोऽस्ति
स्वाधीनभर्त्तृकपदे प्रकटीकृता सा।।

इदानीं स्वामिनं प्रति परित्तुष्टां प्रति परित्तुष्टा सती श्रीराधा याचितं कुर्वतीति।।६८-क।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।६८-क।। अथ भुक्तोत्सृष्टां वर्णयति। दृशोर्निखातैरेभि: कामशरै: पत्यु: कृष्णस्य मन: कीलितं तदद्भुतमभूत्। अत्रान्यत्र निखातशरैरन्यकीलनमद्भुतत्वमित्यवधेयम्। के ते शरस्तत्राह, तस्या राधाया: पाटलपाणिजाङ्कितमुर: पाटलनखाङ्कयुक्तं वक्ष: अनिद्राकषाये उन्निद्रालोहिते दृशौ लोचने तस्या इत्यर्थात्, निधौतोऽधदपानादिना प्रक्षालित इवाधरशोणिमा अधरलौहित्यं तस्या इत्यर्थात्, विलुलिता तत्तद्बन्धेनेतस्ततो विस्तृता अतएव स्रस्तस्रज: स्रस्ता गलिता: स्रजो माला येभ्य एतादृशा मूर्द्धजा: केशास्तस्या इत्यर्थात्, दरश्लथाञ्चलं वस्त्रकर्षणादिना शिथिलतां प्राप्तं काञ्चीदाम तस्या इत्यर्थात् इति प्रत्येकशरनामकथनसमाप्तौ तथा च तथाविधराधाहृदयलोचनाधरलौहित्य-कुन्तलकाञ्चीदामानि तदीयतत्तदवस्थास्मारणेन चित्तविक्षोभकतया कामबाणत्वेन वर्णितानीत्यवधेयम्। 'कषायो रसभेदे* स्यान्निर्यासे लोहितेऽन्यवदिति **विश्व**:। 'शोण: कोकनदच्छविरि'त्यमर:। शोणशब्दादिमनिच्प्रत्ययेन शोणिमा। 'अग्रदेशेऽप्य-ञ्चनमि'**त्यमर**:। कीलितमिति कोलप्रतिस्तम्भे क्त:। अत्र बहुषु ग्रन्थेषु अन्तरा त्रय: श्लोका: सन्ति। ते भगीरथाद्यलिखितत्वात् ग्रन्थसन्दर्भविरुद्धत्वात् प्रतिक्षेपत्वाच्च उपेक्षिता:।।६८-क।।

### (७) वनमालि भट्टकृत-सञ्जीवनी

।।६८-क।। एवं पुरुषायितेन स्वजयमलभमाना स्वस्वभावमवलम्ब्य [३]आत्मजयं कृतवतीति; तामेव [४] जयसम्पत्तिमाह, तस्या इति। एभि: पूर्वोक्तै कामशरै: पत्युर्मन: कीलितं वशीकृतं तदद्भुतमाश्चर्यमभूत्। ५ मनसाऽप्य६यमन्यवधूंमा गच्छेदिति [७] भाव:। कीदृशै: ? [८]प्रातर्निखातै: [९]प्रात: [१०] प्रात:काले दृशोर्नेत्रयोर्निखातैरारोपितै:। केतेशरा: ? तानाह, तस्या [१] राधाया: उर: पाटलपाणिजै [२] रक्तनखैरङ्कितं चिह्नितम्। तस्या दृशौ नयने [३] निद्राकषायेऽतिलोहिते। तस्या अधरशोणिमा अधरराग: [४]निर्धूत: चुम्बनादिना। किञ्च तस्या मूर्धजा: केशा: विलुलिता: स्रस्ता: शिथिलिता: स्रजो माला येभ्यस्ते। तस्या: दर ईषत् श्लथं शिथिलं अञ्चलं वस्त्रान्तं काञ्चीदाम मेखलागुण:। नीवीमोचनान्तानि कामपञ्चशरत्वेन निरूपितानि। अन्यत्र निखातैर्बाणैरन्य [५] त्कीलित-मिदमत्याश्चर्यमित्यर्थ:।।६८-क।।

१.निर्धौता.नि.सा.निर्धूतो-ड.निर्द्धौतोऽधरशोणिमा-इ.फ.ग.ह.ज. २.महो-च. ३.प्रजयं-अ.ब. ४.रस-सम्पत्ति:-अ.ब. ५.मनसाऽप्यन्यवधूं-ग. ६.अन्यवसुंमा गच्छेदिति-अ.ब. ७.नास्ति-अ.ब. ८.त:१०.पर्यन्तं नास्ति-अ.ब. ९.नास्ति-ग.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६८-क।। तस्या इति। एभि: पूर्वोक्तै: कामशरै: पत्यु: स्वामिनो मन: कीलितं विद्धम्। तदद्भुतमाश्चर्यमभूत्। किम्भूतै:[६] कामशरै: ?[७] प्रात:काले दृशोर्नयनयो-र्निखातैरारोपितै:[८]। इतीति किम्? तस्या राधाया उर: पाटलपाणिजै: श्वेतक्त-नखैरङ्कितं चिह्नितम् तस्या निद्राकषाये निद्रालोहिते दृशौ नेत्रे। तस्या निर्धूत: अधारशोणिमा अधर[९]लौहित्यम्। तस्या विलुलिताम्लाना: स्रस्ता: शिथिला:[१०] स्रजो माला येभ्यस्ते मूर्धजा: केशा:। दर ईषत् श्लथं शिथिलं अञ्चलं वस्त्रं[११] एतादृशं काञ्चीदाम मेखलागुण:। नखक्षतजागरणचुम्बनकेशाकर्षणनीवीमोचनानि पञ्चशरत्वेन निरूपितानि। अन्यत्र निखातैर्बाणैरन्यत्कीलित-मित्याश्चर्यमित्यर्थ:।।६८-क।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६८-क।। तस्या इति। तस्या राधाया: पाटलानि ईषद्रक्तपाण्डुराणि पाणे: जाता: तेषां नखानां अङ्कानि चिह्नानि यस्मिन् तत्। भावार्थे इतच्प्रत्यय:। उर: वक्ष:। निद्रया रुद्धादितया कषाये ईषद्रक्ते दृशौ। निर्धूत: चुम्बनगलित: अधरस्य शोणिमा राग:। रागाभावविशिष्टोऽधर इत्यर्थ:। विलुलिता: विगलिताश्च ता: स्रस्ताश्च स्थानच्युताश्चता: स्रज: कुसुममाला येषु ते मूर्धजा: केशा:। काञ्चीदाम मेखलैव रज्जु: दरश्लथं ईषत् शिथिलं अञ्चलं यस्य तत्। इति अनन्तरं प्रात: उषसि दृशो: निखातै: अवलोकितैरित्यर्थ:। एभि: कामशरै: सक्षतोर: कषायनयनादिभि: राधापत्यु: कान्तस्य मन: कीलितं दृढलग्नमिति यत् तत् अद्भुतं आश्चर्यम्। अहो इत्याश्चर्ये। अत्र एभि: कामशरैरिति निरवयवं रूपकम्। पाणिजाङ्कितत्वादीनि कुण्ठिताभिप्रायकाणीति परिकरालङ्कार:। तदुत्थापिता कार्यज्ञानरूपा विशेषोक्ति:। विकुण्ठशरकार्यमन्तरकीलनं तदनुत्पत्तेरिति कार्याजनिर्विशेषोक्ति:। सति पुष्कलकारणे इति लक्षणात्। इत्यद्भुतरस: शृङ्गार (रस) स्याङ्गमिति रसवदलङ्कार:।।६८-क।।

१.श्रीकिशोर्या:-ग. २.रक्तरेखैरङ्कितं-अ.ब. ३.निद्रया कषाये-इ.फ.ग.ह.ज. ४.निर्धौत:-इ.फ.ग.ह.ज. ५.कीलितमित्याश्चर्यमित्यर्थ:-अ.ब.इ.ज.कीलितमिदमित्याश्चर्यमित्यर्थ:-फ. कीलित-मिदमित्याश्यचर्यमिति भाव:-ग. ६.त:८.पर्यन्तं नास्ति-ल.म. ७.काले काले-क. ९.लोहितम्-क. १०,११.नास्ति-ड.

## (१०) धनन्जय धरणीदेवकृत सर्वाङ्गसुन्दरी (नूतन)

।।६८-क।। तस्या इति। तस्या: राधाया: पाटलपाणिजाङ्कितमुरो: इति नखक्षत-लोहितं वक्ष इत्यर्थ:। सुरतविमर्दे पत्रावली नष्टेत्यधिगन्तव्यम्। पाटलपाणिजाङ्कितं पश्चात्पाटलमिति विग्रह:, राजदन्तादित्वात् परनिपात:। निद्राकषाये दृशाविति निद्रालोहिते चक्षुषि इत्यर्थ:। यद्वा निद्राया: अभावोऽनिद्रम्। तेन आ समन्ततो भावेन रक्ते कज्जलं चुम्बनलुप्तमित्यधिगन्तव्यम्। निर्धौतोऽधरशोणिमेति। अलक्तकरागश्चुम्बनेन पानेन वा प्रक्षालित इत्यर्थ:। विलुलिता: स्रस्तस्रजो मूर्धजा इति। विगलितपुष्पत्वात् बन्धनैबिड्यापगमात् इतस्ततो गता: केशा इत्यर्थ:। काञ्चीदामदरश्लथाञ्चलमिति। रसनाकलाप: शिथिलैकदेश इत्यर्थ:। दरमीषच्छ्लथमञ्चलमग्रभागो यस्येति विग्रह:। एतदुक्तं भवति, राधाया: सुरतविमर्देन वेशभङ्गो जात:, तज्जनितानि यानि चिह्नानि जातानि। एभि: प्रात: प्रभाते कामशरैर्भूवा प्रकाशत्वेन कामोद्दीपकत्वात्। इत्यनेन प्रकारेण दृशोर्निखातै: प्रोतै: सद्भि: अर्थाच्चक्षुर्द्वारा पत्यु: कृष्णस्य मन: कीलितं प्रतिष्टब्धमित्यर्थ:। तस्या: वेशभङ्गदर्शनेन कृष्णस्य मनसि कामोद्दीपनमिति भाव:।। तदेतदद्भुतमाश्चर्यमभूदित्यर्थ:। सुरतविमर्दे राधाया: वेशभङ्गो कामशरायत्त इत्यद्भुतं वेशस्यैव कामोद्दीपकत्वात्। यद्वा शरा यत्र निखातास्तमेव पीडयन्तीति वस्तुस्थिते चक्षुर्विखनेन मन: कीलनमाश्चर्यम्।।६८-क।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६८-क।। अथ सुरतान्ते चिह्नशोभितवपुदर्शनेन प्रियस्य प्रेमोत्सवमाह, तस्या इति। तस्या: उर: पाटलपुष्पवत् पाणिजेन नखेन अङ्कितं दृशौ निद्रया लोहिते अधरशोणिमा निर्धौतश्चुम्वनादिना क्षालिता: केशा विलुलिता: स्रस्तस्रज: वन्धन-शैथिल्यादित: ततो गता इत्यर्थ:। काञ्चीदाम ईषत् श्लथप्रान्तभागम्। प्रात:समये एभि: कामशरै: पत्यु: दृशो: लग्नै: मनो बिद्धं इत्येतत् अद्भुतमभूत्। अन्यत्रार्पितशरै: अन्यद्विद्धमिति आश्चर्य्यम्।।६८-क।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६८-क।। एवं सम्भोगान्त: निरुप्य तस्यास्तत्कालीनरतिचिह्नमण्डितरूपमाधुरी-दर्शनेन श्रीकृष्णस्य प्रमोदमाह, तस्या इति। तस्या राधाया उरो वक्ष:स्थलं, पाटला:, श्वेतरक्ता ये पाणिजा नखास्तैरङ्कितं चिह्नितं, कृष्णनखक्षतालंकृतमित्यर्थ:। 'श्वेतरक्तस्तु पाटल:' **इत्यमर**:। नखानां पाटलत्वं तस्य महापुरुषलक्षणात्। तदुक्तम्,

पाणिपादतले रक्ते नेत्रान्तौ च नखानि च।
तालुजिह्वाधरोष्ठं च सप्तरक्त: प्रशंस्यते।।

अथवा अङ्कितमिति भावे क्त:। पाटलवर्णानि पाणिजाङ्कितानि यत्र तत्तथा दृशौ नेत्रे निद्रया कषाये। उन्निद्रतावशात् पुनर्निद्रार्थं रक्तवर्णे इत्यर्थ:। अनिद्राया निद्राया अभावेन वा कषाये तथा अधरस्य शोणिमा ताम्बूलराग: नि:शेषेण धौत: क्षालित:। अनेनाधरपानस्य बाहुल्यं सूचितम्। क्रियासामर्थ्यादेव शोणिमा ताम्बूलराग एव विवक्षित:। न तु सहजशोणिमा। तस्य धौतत्वासम्भवात्। तथा मूर्धजा: केशा: विलुलिता:। बन्धशैथिल्यात् स्कन्धदेशे पतिता:। अत एव स्रस्ता: विगलिता: स्रजो मल्लिकादिपुष्पमाला यत:, तादृशाश्च। तथा काञ्चीदाम रसनाकलाप: दरश्लथमञ्चलं प्रान्तभागो यस्य तादृशम्। रतिव्यापारेण शिथिलितबन्धमित्यर्थ:। प्रातर्निशान्तकाले इत्येवं रूपैरेभिर्नखाङ्कादिविशिष्टवक्ष:, स्थलादिभि: कामस्य शरै: क्रीडाभिलाषजनकत्वात् मन्मथशररूपै: पत्यु: कृष्णस्य दृशोर्नेत्रयोर्निखातैरतिशयेन लग्नैस्तयोर्व्यापारान्तररोधकैरित्यर्थ:। मन: यत् कीलितं विद्धम्। अहो आश्चर्यम्, तदद्भुतम्। न ह्यन्यत्रनिखातैरन्यत् कील्यते इत्यर्थ:। कीलितमिति तादृशप्रतिप्रतीकदर्शनेन पुन: सम्भोगाय प्रवृत्तमिति भाव:। अनेन श्रीराधाया: माधुर्यं दर्शितम्। 'तन्माधुर्यं भवेत् या तु सर्वावस्थासु चारुता' इति लक्षणम्।।६८-क।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६८-क।। तस्या: पाटलेति; सा श्रीराधा स्वस्या: शृङ्गारलीलावलेन पत्यु: मन: तया श्रीराधया कीदृशं कीलितम्।। स्वस्य प्रियतमस्य मन: तया श्रीराधया कीलितम्। अवरुद्धम् विद्धंवा। केन ? तस्या: श्रीराधाया: वक्षदेशं पाणिजाङ्कितं नखक्षतेन पाटलवर्णं धारयति। निद्राकषाये दृशौ शृङ्गारजनितक्लान्तेन चक्षुषि निद्रया रक्तवर्णं धारयति। निर्धौताधरशोणिमा अधरस्य रक्तिमा वारम्बारचुम्बनेन नि:शेषेण धौतं रङ्गाधरस्य रङ्गिमाज्योति: त्यक्ता शोणिताभा। विलुलिता अस्तव्यस्ता मूर्धजा: केशपाशा: स्रस्तस्रजो मालोपि मुकुलित: काञ्चिदामदरश्लथाञ्चला काञ्चिदाम कटिमेखला अर्धमुकुलितेन इषत् शिथिल: प्रान्तभागो दृश्यते। परन्तु अहो आश्चर्य प्रात: प्रभातकाले एभि: कामशरै: कन्दर्पबाणै: श्रीराधाया: पञ्चदशा: श्रीकृष्णस्य नयने तीव्रतया विद्धमकरोत्। शार्दूलविक्रीडितम् छन्द: रसवदलंकारता। शृङ्गाररस:। यतितालेन तालेन पद्यं पाटस्वरास्तथा। स्तेनास्तदन्त आलाप: शृङ्गार: प्रेमनिर्भर:।। रागो मरुकृतिर्यत्र स प्रबन्धो निगद्यते। कामाद्भूताभिनवमृगाङ्कलेखाभिद: सप्तविंश प्रबन्ध:।।६८(क)।।

**६८-ख-व्याकोशः केशपाशस्तरलितमलकैः स्वेदमोक्षौ कपोलै**
**क्लिष्टा बिम्बाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः।**
**काञ्चीकान्तिर्हताशा स्तनजघनपदं पाणिनाच्छाद्य सद्यः**
**पश्यन्ती सत्रपा सा तदपि विलुलिता मुग्धकान्तिर्धिनोती।।६८-ख।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी(टीकानास्ति)

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६८-ख।। व्याकोश इति। सा मुग्धकान्तिर्यत एव विलुलिता रतिपरिमर्दिता तथापि कृष्णं धिनोति प्रीणयति। किं कुर्वती ? सत्रपा सती। सद्यस्तत्कालं स्तनजघनपदं पाणिना आच्छाद्य पश्यन्ती। कथं विलुलितेत्याहकेशपाशः(कबरी) व्याकोशः शिथिलो जातः। अपि च, अलकैश्चूर्णकुन्तलैस्तरलितमितस्ततो गतम्। कपोलौ स्वेदमोक्षौ जातौ। अनु च, बिम्बाधरकान्तिः क्लिष्टा जाता। अनु च हारयष्टिः कुचकलशरुचा हारिता कुतोऽपि नाशिता। अनेन कञ्चुकाभावाद्धारयष्टिः शरीरशोभयैव निगीर्णा। अपि च, काञ्चीकान्तिर्हताशां जाता। इयमपि वस्त्राभावात्तद्देशशोभयैव लुप्ता। निरलंकरणापि सर्वातिशायिन्या शरीरशोभयैव पत्युर्मनोहारिण्यभूदित्यर्थः। स्रग्धरावृत्तम्। 'म्रभ्नैर्यानां त्रयेण त्रिमुनियतियुता स्रग्धरा कीर्तितेयम्' ।।६८(ख)।।

### (३) जगद्धरकृत-सारदीपिका

।।६८-ख।। व्यालोल इति इयं राधा तदपि तथा धिनोति प्रणयति अर्थात्कृष्टं कीदृशी राधा पाणिना हस्तेन जघनयोः पदम् आभोगं सद्यः आच्छाद्यः आत्मरूपं पश्यन्तीम् आत्मरूपमेवाह केशपाशोव्यालोलः इतस्ततो विक्षिप्तोऽभूत् अलकैः चूर्णकुन्तल-स्तरलितं स्थानाच्चलितं कपोलं स्वेदेन घर्मजलेन लोलौ व्याप्तौ दष्टाधरःश्रीःखण्डिताधर लक्ष्मीः स्पष्टा व्यक्ता कुचकलशरुचा स्तन घटदीप्त्या हारयष्टिः मुक्ता कलाप दूरीकृत्य काञ्चीरसना काञ्चीदामादिसङ्गतां चलितायद्यपीति सर्वत्र योजनीयं स्रग्धरानामकं छन्दश्चेदम्।।६८-ख।।

### (४) शंकरमिश्रकृत-रसमञ्जरी(टीकानास्ति)

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी(टीकानास्ति)

### (६) शुक्लध्वजनृपतिकृत-सारवती(टीकानास्ति)

### (७) वनमालि भट्टकृत-सञ्जीवनी

।।६८-ख।। तदेवाह, व्याकोश इति। इयं [७] श्रीराधा तदपि मां धिनोति प्रीणयति। यद्यपि केशपाशः केशकलापो व्याकोशो विलुलितो जातः अलकैश्चूर्णकुन्तलैस्तरलितं

इतस्तत: प्रसृतम्। कपोलौ [८] स्वेदलोलौ स्वेदेन [९]सात्त्विकभावजलेन चञ्चलौ। बिम्बाधरश्रीर्दष्टा खण्डिता। [१०] कुचकलशरुचा कान्त्या हारयष्टि: हारकलाप: हारिता निर्जिता। काञ्ची मेखला काञ्चित् [११] आशां गता चलिता। तथाविधा जाताऽपि [१२] किं कुर्वती ? हस्तेन स्तनजघनपदं स्तननितम्बभागमाच्छाद्य सद्य: शीघ्रं सत्रपं मां पश्यन्ती। कीदृशी ? विलुलितां म्लानां स्रजं धारयन्ती। मज्जयाय कृतप्रयत्ना स्वयमेव [१३] प्राप्तपराभवेति भाव:।।६८-ख।।

१.व्यालोल:-ड.च.२.स्वेदमोक्षौ-नि.सा.३.स्पष्टा दष्टाधरश्री:-ड.क्लिष्टा बिम्बाधरश्री:-च.४.कान्तिर्हताशा-नि.सा.काञ्चि किञ्चिद्गताशां-ड.काञ्ची किञ्चिद्गताशां-च.५.पश्यन्ती सत्रपा सा नि.सा. पश्यन्ती ह्यात्मरूपं-ड.६.विलुलिता मुग्धकान्तिर्धिनोति-नि.सा.विलुलल्लज्जिता रक्तभावात्-च. ७.श्रीवृषभानुकुमारी-ग.८.नास्ति-फ.ग.ज.९.सात्त्विकभावजेन-ह.१०.कुचकलशे रुचा-इ.११.आशां दिशान्तरं-ग.१२.नास्ति-ग.१३.पराभवेति भाव:-ग.परामूता इति भाव:-फ.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६८-ख।। व्यालोल इति। इयं राधा तदपि तथापि धिनोति [२] प्रीणयति [३] अर्थात् कृष्णम्। कीदृशी राधा ? पाणिना हस्तेन स्तनजघनयो: पदमाभोगं सद्य आच्छाद्य आत्मरूपं पश्यन्ती। पुन: विलुलितां म्लानां स्रजं धारयन्ती[४]। आत्मरूपमेवाह केशपाशो व्यालोल इतस्ततो[५]विक्षिप्तोऽभवत्। अलकैश्चूर्णकुन्तलैस्तरलितं स्थानाच्चलितम्। कपोलौ स्वेदेन घर्मजलेन लोलौ व्याप्तौ। दष्टाधरश्री: खण्डिताधरलक्ष्मी: स्पष्टा व्यक्ता। कुचकलशरुचा स्तनघटदीप्त्या हारयष्टि: [६] मुक्तामाला हारिता दूरीकृता। काञ्ची रसना काञ्चिदाशां दिशं गता [७] चलिता। यद्यपीति सर्वत्र योजनीयम्।।६८-ख।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६८-ख।। व्यालोलेति। केशा एव पाशा: मोहकत्वात्पाशत्वारोप:। व्यालोल: गलित बन्धकत्वात्परिलम्बमान:; अलकै: तरलितं, भावे प्रयोगात् अलका: चलिता इत्यर्थ:। कपोलौ स्वेदलोलौ स्वेदार्द्रतया गलितचित्रलेखावित्यर्थ:। बिम्बाधरश्री: क्लिष्टा। सक्षतत्वात्सवेदनोऽधर इति भाव:। कुचकलशयो: रुचा कान्त्या हारयष्टि: मुक्ताहारलता हारिता प्रमोषिता। हाराभावाद्विगतश्रियौ कुचावित्यर्थ:। पाणिना सद्य: तत्काले आच्छाद्य सान्द्ररूपं कान्तिमित्यर्थ:। पश्यन्ती। तदपि च तथापि रक्तस्य सम्भोगासक्तस्य भावात्। विलुलद्विशेषेणोदयद्यथा स्यात्तथा लज्जिता अभूदित्यर्थ:। स्रग्धरावृत्तम्।।६८-ख।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)(टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६८-ख।। तन्मन: कीलितं तस्यैव भावनया द्योतयति व्यालोक इति। इयं श्रीराधा विमर्द्दितमालाधारिण्यपि मां प्रीणयति पुनरपि रत्युत्सुकं करोति। न केवलमादृशी अपि च स्तनजघनपदं सद्य:पाणिना आच्छाद्य सत्रपं यथा स्यात् तथा मां पश्यन्ती वसनादिव्यतिरेकेण केवलाङ्गशोभादर्शनात् प्रीणनमिति ज्ञेयम्। कुत: सलज्जं पश्यन्ती इत्याह केशपाशो व्यालोके विकीर्ण इत्यर्थ:। अलकैस्तरलितम्। कपोलौ स्वेदेन लोलौ व्याप्तौ इत्यर्थ:। अलकैस्तरलितम्। कपोलौ स्वेदेन लोलौ व्याप्तौ इत्यर्थ:। क्लिष्टा/दष्टाधरश्री: कुचकलसयोरुचा स्पर्द्धयेव हारयष्टि: हारिता, काञ्चीकाञ्चित् आशां दिशां गता, रसावेशे शैथिल्ये निजाङ्गावलोकनात् आत्मन: क्रीड़ाविशेषावेशकलनात् सत्रपं इत्यभिप्राय:।।६८-ख।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।६८-ख।। पुनस्तस्यास्तत्कालीनमाधुर्यविशेषं कृष्णमुखेन एव वर्णयन् तस्य मन: कीलनं स्पष्टयति। व्यालोलेति। इयं राधा तदपि तथा सत्यपि मां धिनोति। प्रीणयति। पुनरपि मम क्रीडनाय स्पृहामुत्पादयतीत्यर्थ:। कथम्भूता, विलुलितस्रग्धरा, विमृदित-कुसुममालाधारिणी। पुन: किम्भूता, स्तनजघनस्य पदं प्रदेशं पाणिना, पाणिभ्यां सद्य: शीघ्रमेव आच्छाद्य सत्रपं त्रपासहितं यथा स्यात्तथा मां पश्यन्ती, अनेन अङ्गानामनावरणत्वं सूचितम्। सत्रपावलोकने हेतुनाह केशपाशो व्यालोल: विमुक्तबन्ध:। अलकैस्तरलितम्। कपोलौ स्वेदेन लोलौ। बिम्बसदृशाधरशोभा दष्टा। दशनक्षतयुक्ता। कुचकलसस्य रुचा कान्त्या हारयष्टि: मुक्तामाला, हारिता, त्याजिता। काञ्ची, रसना काञ्चिदाशां दिशं गता, रतिप्रौढव्यञ्जकवेशधारणात् सत्रपत्व मित्यभिप्राय:।।६८-ख।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

**६८(ख) व्याकोशेति**; सा मुग्धकान्ति: यस्या: कान्ति: तेज: शरीरस्य मुग्धा यत: सा विलुलिता रतिपरिमर्दिता। तथापि कृष्णं धिनोति प्रीणयति। किं कुर्वती ? सत्रपा त्रपया सह लज्जया सह। लज्जाशीला सती सद्य: तत्कालं स्तनजघनपदं कुचौ तथा जघनस्थलं हस्ताभ्यां पाणिना आच्छाद्य पश्यन्ती। कथं विलुलित: केशपाश: मूर्द्धजा: कवरी व्याकोश: शिथिलो जात:। अपि च अलकैश्चूर्णकुन्तलैस्तरलितमितस्ततो गतम्। विलुलितञ्च। कपोलौ स्वेदमोक्षौ जातौ। तदतु विम्बाधरकान्ति: क्लिष्टा जाता। अनु च हारयष्टि: कुचकलशरुचा हारिता कुतोऽपि नाशिता। अनेन काञ्चुलियकाभावात्

हारयष्टि: शरीरस्य शोभा एव निगीर्णा। अत: काञ्चिकान्तिर्हताशा जाता। इयमपि तत्र वक्षसि वस्त्राभावात् तद्देशशोभया एव लुप्ता। निरलंकरणापि सर्वातिशायिन्या शरीरशोभयैव पत्युर्मनोहारिण्यभूदित्यर्थ:। स्रग्धरावृत्तम्। स्वभावोक्तिरलंकार:। तस्या: नग्नशरीरं दृष्ट्वा पुन: रन्तुमीहते श्रीकृष्ण इति भाव:।।६८(ख)।।

**६९- अथ कान्तं रतिक्लान्तमपि मण्डनवाञ्छया।**
**निजगाद निराबाधा राधा स्वाधीनभर्तृका ।।६९।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६९।। अथानन्तरं तयो: परस्परानन्दसंदोहरूपसुरतावसाने राधा गोविन्द-मानन्दयतीत्युत्तरकृत्यानि प्रति प्रोत्साहयन्ती जगाद, अथ सहसेति। अथ राधा आनन्देनोपलक्षितं गोविन्दमिदं वक्ष्यमाणं सादरं जगाद। किंभूतं गोविन्दम्? सहसा वेगेन सुप्रीतम्। प्रीतिपरे हि नाथे विज्ञप्ति: सिद्धिमेतीति नीतिविद:। अथ सह हासेन वर्तत इति राधाविशेषणमानन्देति वचने हेतु:। किंलक्षणा राधा? संभोगावसाने नितान्तमतिशयेन खेदं प्राप्तमङ्गं यस्या: सा तथा। इदं पथ्या आर्या छन्द:।।६९।।

### (३) जगद्धरकृत-सारदीपिका

।।६९।। अथेति अथानन्तरं राधासुरतान्तरे आनन्देन गोविन्दं कृष्णमिदं वक्ष्यमाणं सादरं निजगाद कीदृशी सहसा श्रद्धया युक्ता निर्गता आसमन्ताद्भावेन बाधा कामपीडा यस्या: सा सुखेनाधीन: भर्ता प्रियो यस्या: सा किमर्थं निजगादेत्यत आह मण्डन वाञ्छया प्रियकर्तृकालङ्करणवाञ्छयेत्यर्थ: तस्या: स्वाधीनभर्तृकाया: लक्षणं ''भरतशास्त्रे'' उक्तं क्षणं कराहते नैव क्षणं चरणपातिते कन्दुके नेव कान्तेन क्रीडेत्स्वाधीन भर्तृका कथंभूतं कृष्णं कान्तं प्रियं कमनीयं सुन्दरं पुन: कीदृशं रतौ सुरते क्लान्तं परिश्रान्तम्।।६९।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।६९।। अथेति। अथानन्तरं राधा कान्तं कृष्णं मण्डनवाञ्छया निजगाद। कीदृशं कान्तम्? रतिश्रान्तमपि रतिखिन्नचित्तमपि। कीदृशी राधा? निर्गता बाधा पीडा यस्या: सा। पुन: कीदृशी? स्वाधीनभर्तृका। तल्लक्षणं **शृङ्गारतिलके** (१/७४), 'यस्या रतिगुणाकृष्ट: पति: पार्श्वं न मुञ्चति। विचित्रविभ्रमासक्ता स्वाधीनपतिका यथा।।' इति।।६९।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६९।। अथेति। स्वाधीनभर्त्तृका राधा कान्तं निजगादेति सम्बन्धः। स्वाधीन भर्त्तृका लक्षण यथा,

आश्लेषचुम्बनशतैर्कुसुमादिदानैः
प्रेमोत्तरप्रणयकोमलमुग्धवाग्भिः।
यां सर्वदैव सुखयन्नियतः प्रियोऽस्ति
स्वाधीनभर्त्तृकपदे प्रकटीकृता सा।।

इदानीं स्वामिनं प्रति परित्तुष्टां प्रति परितुष्टा सती श्रीराधा याचितं कुर्वतीति।।६९।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६९।। स्वाधीनभर्त्तृकाया राधायाः धाष्टर्यवर्णानाय प्रसङ्गमवतारयति। अथ तत्तद्विलासानन्तरं राधा कान्तं श्रीकृष्णं निजगाद उक्तवती। कथम्भूत कान्तम्? रतिकान्तं सुरतक्लिष्टमपि। क्लान्ते नियोगस्यानौचित्येऽपि धाष्टर्येन तया कृत इत्यपेरर्थः। किमर्थं निजगाद इत्यत आह मण्डनवाञ्छया प्रियकर्तृकालंकरणस्पृहयेत्यर्थः। राधा कीदृशी? निर्गत आबाधोऽलंकरणं यस्यास्तादृशी। 'आराधनं कृतिर्बाधा पीडा राधनमुच्यत' इति **विश्वः**। यद्वा निर्गता यथेच्छया सुरतकर्मणा आसमन्ताद्भावेन बाधा कामपीडा यस्याः सा तथा। पुनः कीदृशी? स्वाधीनभर्त्तृका स्वाधीन आयत्तो भर्त्ता यस्याः सा तथा। तथा च **भरतः**, 'क्षणं कराहतेनैव क्षणं चरणपातिना। कौतुकेनैव कान्तेन क्रीडेत् स्वाधीनभर्त्तृका।।' इति।।६९।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६९।। (अथेति।)[४] अथेति मङ्गलम्। अथानन्तरं वा। राधा [५]सुरत [३]श्रमापहृतमण्डना पुनरपि मण्डनवाञ्छया माधवं श्रीकृष्णं जगाद उक्तवती। कीदृशी? स्वाधीनभर्तृका। पुनः कीदृशी? मुग्धा सुरतसङ्ग्रामचतुरा सुन्दरी वा। कीदृशं[४] माधवम्? कान्तं मनोहरं रतिश्रान्तं कृतसुरत[५]श्रममित्यर्थः।।६९।।

१.पद्यमिदं अथ सहसा सुप्रीतं इत्यस्या आर्यायाः पूर्वं दृश्यते-अ.ब.नास्ति-ड.च.नि.सा. २.मुग्धा राधा-इ. ३.उपवेशानादित्यक्ताभावान्निपतिता-च. ४.अथानन्तरं-इ. ५.सुरतश्रमा-पहृतमण्डनवाञ्छया-ग.

## (८)पदद्योतनिका (टीकानास्ति)

## (९)जयन्ती (टीकानास्ति)

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

### (११) पूजारी गोस्वामीकृत-बालबोधिनी (टीका नास्ति)

### (१२) लक्ष्मणकृत-रसिकरङ्गदा (टीका नास्ति)

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६९।। अथ कान्तमिति; अथ रत्यनन्तरं श्रीराधा स्वकान्तं श्रीकृष्णं रतिक्रान्तं रतिक्रीडया आक्रान्तं क्लान्तं वा स्वस्याः शरीरे विशृङ्खलितानलंकारान् सज्जीकर्तुम् मण्डयितुं स्वाधीनभर्तृका तथाभूता नायिका जगाद।।६९।।

**६९-क-अथ सहसा सुप्रीतं सुरतान्ते सा नितान्तखिन्नाङ्गी**
**राधा जगाद सादरमिदमानन्देन गोविन्दम्।।७ (राणाकुम्भः)।।६९-क-।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी(टीका नास्ति)

### (२) राणाकुम्भकृत-रसिकप्रिया

।।६९।। अथानन्तरं तयोः परस्परानन्दसंदोहरूपसुरतावसाने राधा गोविन्दमानन्दयतीत्युत्तरकृत्यानि प्रति प्रोत्साहयन्ती जगाद, अथ सहसेति। अथ राधा आनन्देनोपलक्षितं गोविन्दमिदं वक्ष्यमाणं सादरं जगाद। किंभूतं गोविन्दम्? सहसा वेगेन सुप्रीतम्। प्रीतिपरे हि नाथे विज्ञप्तिः सिद्धिमेतीति नीतिविदः। अथ सह हासेन वर्तत इति राधाविशेषणमानन्देति वचने हेतुः। किंलक्षणा राधा? संभोगावसाने नितान्तमतिशयेन खेदं प्राप्तमङ्गं यस्याः सा तथा। इदं पथ्या आर्या छन्दः।।६९।।

### (३) जगद्धरकृत-सारदीपिका (टीका नोपलब्धा)

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।६९।। अथेति। अथानन्तरं राधा कान्तं कृष्णं मण्डनवाञ्छया निजगाद। कीदृशं कान्तम्? रतिश्रान्तमपि रतिखिन्नचित्तमपि। कीदृशी राधा? निर्गता बाधा पीडा यस्याः सा। पुनः कीदृशी? स्वाधीनभर्तृका। तल्लक्षणं **शृङ्गारतिलके** (१/७४), 'यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति। विचित्रविभ्रमासक्ता स्वाधीनपतिका यथा।।' इति।।६९।।

### (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी(टीका नास्ति)

### (६) शुक्लध्वजनृपतिकृत-सारवती(टीकानास्ति)

### (७) वनमालि भट्टकृत-सञ्जीवनी

।।६९।। (अथेति।) [६]अथ सा राधा इदं वक्ष्यमाणं सुरतान्ते आनन्देन सादरं गोविन्दं जगाद उक्तवती। कीदृशम्? सहसा [७]ईषत्प्राप्ता ये असवः प्राणास्तैः [८]सुप्रीतं[९]सुतरां

प्रीतियुक्तम्। कीदृशी ? नितान्तखिन्नाङ्गी[१०] स्मरजर्जरिताङ्गी। एतेनाङ्गमेव भिन्नं न तु मनः इति पुनः सुरताभिलाषः सूचितः।।६९।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।६९।। अथेति। अथानन्तरं राधा सुरतान्ते आनन्देन गोविन्दं कृष्णं इदं वक्ष्यमाणं सादरं जगाद।[११]कीदृशी ? [१२]सहसा ईषद्धास्ययुक्ता। कीदृशं गोविन्दम् ? सन्तुष्टम्। पुनः कीदृशी ? नितान्तमतिशयेन खिन्नं खेदयुक्तं [१३] अङ्गं यस्याः सा।।६९।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६९।। उत्तराष्टपदीमवतारयति, अथेति। अथ क्रीडानन्तरं सहसा सुरतान्ते नितान्तं अत्यन्तं खिन्नं श्रमयुक्तं अङ्गं यस्याः सा राधा सुप्रीतं सम्भोगानन्दवशीकृतं गोविन्दं माधवं प्रति आदरेण सहितं यथा स्यात्तथा आनन्देन हर्षेण इवं वक्ष्यमाणाष्टपदीरूपं वाक्यं जगाद। अत्र जगादेत्यनेन धात्वर्थेन वाक्ये कर्म लभ्यते ; पुनरिदमिति पुनरुक्तम् ; तथापि सामान्यतः उक्तिरेव लभ्यते विशेषाधानार्थमिति बोध्यम्। उद्गीतिर्नाम गणच्छन्दः। आर्याव्यत्ययात् पूर्वार्धे षष्ठो गणो लमात्र इति।।६९।।

१.अथ सहसा सा प्रीतं सुरतान्तनितान्तखिन्नाङ्गी-ड. २.नास्ति-इ. ३.श्रमापहत-इ.श्रमहत-फ.ज.४.नास्ति-अ.ब.इ.ग.ह.५.श्रमम्-इ.फ.ग.ह.ज.६.नास्ति-इ.फ.ग.ह.ज.७.ईषत् ये प्राप्ता असवः-इ.फ.ग.ह.ज. ८.सुतरां-अ.ब.नास्ति-इ.फ.ग.ह.ज.९.नास्ति-ह.१०.स्मरशरजर्जरिताङ्गी-ग.११.कीदृशी राधा-क. १२.सहसा साहसेन हास्येन सहसा ईषत्हास्ययुक्ता-क.१३.अङ्गं हस्तपादादि यस्याः-क.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)(टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी(टीका नास्ति)

## (१२) लक्ष्मणकृत-रसिकरङ्गदा(टीकानास्ति)

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६९।। अथ सहसेति; एतदनन्तरम् झटीत्येव सुप्रीतं श्रीकृष्णं सुरतान्ते सुष्ठुरतिक्रीडान्ते सा श्रीराधा नितान्तं अत्यन्तं खिन्नाङ्गी क्लान्ताङ्गी सादरं आदरेण सह सानन्दं गोविन्दं जगाद उवाच। पथ्याआर्याच्छन्दः।।६९।।

।। चर्तुविंश प्रबन्धः/गीतम् २४।।

।।रामकरीराग यतितालाभ्यां गीयते।।

**१-कुरु यदुनन्दन चन्दनशिशिरतरेण करेण पयोधरे।**
**मृगमदपत्रकमत्र मनोभवमङ्गलकलशसहोदरे।।**
**निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने।। ध्रुवम् ।।१ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।१ ।। यदुनन्दने श्रीकृष्णे क्रीडति सति राधिका निजगादेत्यर्थः धातु सम्वन्धे प्रत्यया इति वचनात् क्रीडतीत्यस्य भूतकालता प्रयेतब्या। शृङ्गारकाले वक्ष्यमाण वचसो विरसता प्रतिपादकत्वात्। कुर्वित्यादि। हे यदुनन्दन! मम पयोधरे मृगमदपत्रकं कस्तूरीपत्रावलीं करेण कुर्विति वाक्यार्थः। कीदृशे, मनोभवमङ्गलकलशसहोदरे, मनोभवमभिषेकाय यो मङ्गलकलशस्तस्य सहोदरे तत्सदृश इत्यर्थः। करेण कीदृशा चन्दनशिशिरतरेण विरहसन्तापाभावादित्यभिप्राय।।१ ।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।१ ।।अत्रान्वयसौकर्यार्थं पूर्वं ध्रुवपदं व्याक्रियते, निजगादेति। सा राधा वक्ष्यमाणं प्रोवाच। क्व सति ? यदुनन्दने क्रीडां कुर्वति सति। किंभूते ? हृदयानन्दकारिणि इति ध्रुवः।।अथ पदानि। कुरु यद्विति। हे यदुनन्दन! अत्र स्तनकलशे चन्दनवच्छीतलतरेण करेण कस्तूरिकया पत्रावल्यादि रचय। किंभूते कुचकलशे ? कामस्य जगज्जयार्थ-मङ्गलकलशसदृशे। मङ्गलार्थकलशो हि पयःपूर्णो भवति सुनीलाम्रपल्लवै-रुपचितश्च। एवमत्र पयोधरस्यौचिती। अनेन मयूरपदकं नाम नखरक्षतं व्यज्यते। तथा चाह **वात्स्यायन**:, 'नान्यत्पदुतरं किंचिद्रागस्यास्ति विवर्धनम्। नखदन्त समुत्थानां कर्मणां गतयो यथा।।' इति ।।१ ।।

### (३) जगद्धरकृत-सारदीपिका

।।१ ।। यद्राधा निजगाद तदेव गीतेनाह कुर्वीति रामकरीरागः हृदयानन्दनोचित्तहर्षके यदुनन्दने कृष्णे क्रीडति सति सा राधा निजगाद उक्तवती किं निजगादेत्यत आह हे यदुनन्दन! कृष्ण त्वं मम अत्रास्मिन्पयोधरे करेण स्वहस्तेन मृगमदपत्रकं कस्तुरिका पत्रावली कुरु कीदृशेन करेण चन्दन वच्छिशिरेण अतिशीतलेन कीदृशे पयोधरे मनोभवस्य कामस्य मङ्गलाय कलशः पूर्णकुम्भस्तस्य सहोदरे तुल्ये मङ्गलं हिरण्यमिति वा।।१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।१।। तदेव गीतेन कथयति, कुर्वित्यादि। गीतस्यस्य रामकरीरागो यतिताल:। गीतार्थस्तु, सा राधा यदुनन्दने निजगाद उक्तवती। कीदृशे यदुनन्दने ? क्रीडति। पुन: कीदृशे ? हृदयानन्दजनके। किं निजगाद इत्याह, कुर्विति। हे यदुनन्दन कृष्ण ! अत्र मृष्टाङ्गरागे मम पयोधरे स्तने करेण मृगमदपत्रकं कस्तूरिकावलिं कुरु। कीदृशेन करेण ? चन्दनशिशिरतरेण चन्दनादपि शीतलेन। कीदृशे पयोधरे ? मनोभवस्य कामस्य यो मङ्गलकलशो माङ्गल्याय स्थापित: पूर्णकुम्भस्तस्य सहोदरे सदृशे।।१।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।१।। राधा पुन: सुरतार्थं भणति। मङ्गलकौशिकरागेण गेयमित्युक्तम्। तस्यायमभिप्राय:। रामक्रियानन्तरं तस्य पत्नी एव उपस्थापनं युक्तमिति। यद्वा देहालङ्करणरूपमङ्गलसमयत्वाच्च। तदनुगुणाय तस्या एव उपस्थानं युक्तमिति रूपकतालेन गेयम्। अमरतालेनेति केचित्। लक्षणं तु,

"लघुर्चारुध्रुवाताले जगतोमरसंज्ञक:" इति। अत्र निजगादेत्यादि हृदयानन्दमित्यन्तं ध्रुवपदम्। हृदयस्य मनस: आनन्दने सन्तोषकारिणि यदुनन्दने यादव कुमरे श्रीकृष्णे क्रीडति विहरमाणे यदुनन्दने विषये निजगादेन वा योजना। उक्त प्रकारकमेव विषदयति। कुर्वित्यादि हे यदुनन्दन ! श्रीकृष्ण ! अत्र यदुनन्दनेति सम्बोधनं सम्बन्धे जात्यनुगुणद्योतनार्थमित्यवगन्तव्यम्। लोकेऽपि हि समानजात्यो: सम्भोगस्याति-मनोहरत्वादिभाव:।

चन्दनमिव शिशिरतरेण तव करेण पाणितलेन मनोभवस्य कामस्य मङ्गलार्थं कलश: पूर्ण्णकुम्भ: तस्य सहोदरे समाने, अत्र अस्मिन् पयोधरे कुचे मृगमदपत्रकं कस्तूरीमकरिकापत्रं कुरु रचय यथा, विवाहादिषु कस्मिश्चिद्देशविशेषे हरिद्रादिचित्र-कद्रव्येति यौवनमेव पूर्ण्णकुम्भमलङ्कुर्वन्ति। तथा प्रकृतेऽपीति सूचयितुं पयोधर मित्येव वचनमितिभाव:। अत्रावयवेषु कुचकुम्भयोरेव प्रथमत: पुरुषस्पृहाकातित्वादादौ तदलङ्करणोपदेश इत्यवगन्तव्यम्।।१।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।१।। किं किं निजगादेत्याकांक्षायामाह। गीतस्यास्य रामकरीराग:। रूपकताल:। रागलक्षणं यथा स्वर्णप्रभा भास्वरभूषणा च नीलं निचोलं वपुषा वहन्ती। कान्ते पदोपान्तमधिश्रितेऽपि मानोन्नता रामकरी प्रदिष्टा।।' नायिका चात्र स्वाधीनभर्त्तृकैव। तल्लक्षणं प्रागुक्तमेव। गीतार्थस्तु यदुनन्दने श्रीकृष्णी क्रीडति सति तादृशावस्थाबाधा-

परिहासादिक्रीडां कुर्वति सति। न तु कामक्रीडा प्रकृतेऽभिमता, तदवसानस्यैव वर्णनीयत्वात्, सा राधिका निजगाद उक्तवती। किम्भूते यदुनन्दने ? हृदयानन्दने राधाया: सर्वेषाम्वा हृदयानन्दकारके। किं जगादेत्याकांक्षायामाह हे, यदुनन्दन कृष्ण ! अत्र मम पयोधरे स्तने करेण निजहस्तेन मृगमदस्य कस्तुरिकाया: पत्रकं पत्रावलि कुरु। करेण कीदृशेन ? चन्दनशिशिरतरेण चन्दनादपि शीतलेन। कीदृशे पयोधरे ? मनोभवस्य कामस्य मङ्गलार्थं य: कलस: तस्य सहोदरे तुल्ये। अत्र मनोभवमङ्गल-कलसत्वेन रसपूर्णत्वं कन्दर्पविजयानुकूलत्वञ्च सूचितम्। मनोभवस्य यो मङ्गलकलस: पूर्णघट: तस्य सहोदरे सदृश इत्यर्थ:। तथा च, 'मङ्गलं हेम्नि कल्याण' इति **धरणि-रित्य**पि कश्चित्।।१ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।१ ।। रागतालध्रुवाणां लक्षणं [३] पूर्ववत्। अत्र स्वाधीनभर्तृका इयं नायिका। पूर्वं जगादेति यदुक्तं तद् गीतेनाह, (कुर्विति।) [४] सा राधा यदुनन्दनेति [५] निजगाद उक्तवती। कीदृशे ? क्रीडति रममाणे हृदयानन्दने चित्ताह्लादजनके। [६] किमुक्तवती ?[७] हे यदुनन्दन नन्दनन्दन। यादवानां हितार्थाय धृतो [८] गोवर्धनाचल इति। अत्रास्मिन् पयोधरे कुचे करेण मृगमदपत्रकं कस्तूरिकापत्ररचनां कुरु रचय। करेणेति पुन: करस्पर्शाभिलाष: सूचित:। कीदृशेन करेण ? चन्दनादपि [९] अतिशीतलेन। कीदृशे पयोधरे ? मनोभवस्य कामस्य मङ्गलाय [१०]कलश: पूर्णकुम्भस्तस्य सहोदरे [११] समाने।।१ ।।

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।१ ।। तदेवाह, [१२]कुर्विति। अत्र स्वाधीनभर्तृका वर्णनीया। लक्षणान्तरम्,

[१३]क्षणं कराहतेनैव क्षणं चरणपाणिना।
कन्दुकेनेव कान्तेन [१४] क्रीडेत्स्वाधीनभर्तृका।।

[१५]रामकरीरागलक्षणं[१६] तु पूर्वोक्तमस्ति प्रथमसर्गे। हृदयानन्दने चित्तहर्षके यदुनन्दने कृष्णे क्रीडति सति सा राधा निजगाद उक्तवती। किं जगादेत्यत आह, हे यदुनन्दन कृष्ण त्वं मम अत्रास्मिन् पयोधरे स्तने करेण [२] स्वहस्तेन मृगमदपत्रकं कस्तूरिकापत्रावलिं कुरु। कीदृशेन करेण ? चन्दनवच्छिशिरतरेणातिशीतलेन। कीदृशे पयोधरे ? मनोभवस्य [३] कामस्य [४] मङ्गलो य: [५] कलश: पूर्णकुम्भ: तस्य सहोदरे तुल्ये [६]। मङ्गलं हिरण्यमिति।।१ ।।

१ .रामकरीरागयतितालाभ्यां-अ.ब.रामकरीराग: वा मल्हारेण रूपकताल:-ड. रामक्रीरागेण रूपकतालेन गीयते-च.रामकरीरागे रूपकताले-इ.फ.ग.ह.ज. २ .चन्दनचर्चित-शिशिरकिरणपयोधरे-

च.३.पूर्वोक्तमेव-इ.पूर्वमुक्तमेव-फ.ग.ह.ज.४.सा राधा हृदयानन्दने यदुनन्दने साभिलाषं जगाद उक्तवती-इ.सा राधा यदुनन्दने जगाह उक्तवती-ग.ह.सा राधा यदुनन्दन इति साभिलाषं जगाद उक्तवती-ग.ह.सा राधा यदुनन्द इति साभिलाषं जगाह उक्तवती-फ.ज.५.निजगादेति यदुक्तवती-अ.ब.६.नास्ति-अ.ब.७.हे यदुनन्दन नन्दयतीति नन्दः-ग. ८.गोवर्धनो मयेति-इ.फ.ह.ज.गोवर्धनोऽचलेति पद्मपुराणे-ग.९.शीतलेन-ग.१०.पूर्णकलशस्तस्य-अ.ब.११.तुल्ये-इ.फ.ग.ह.ज.१२.नास्ति-ड.१३.नास्ति-क.ल.म.१४.क्रीडा स्वाधीन-ड.१५.रागलक्षणं पूर्वोत्कमपि रामकरीरागः-क.१६.नास्ति-ड.

## (९) कृष्ण पण्डितकृत- जयन्ती

।।१।। कुर्विति। हे यदुनन्दन यदूनां सन्तोषकर यदुकुलोत्पन्न माधव। मनोभवस्य मङ्गलकलशः स्वस्तिवाचनार्थं स्थापितकलशः तस्य सहोदरः तत्सदृशत्वात्सोदरः तस्मिन्। चन्दनचर्चितशिशिरकिरणपयोधरे कुचे अत्र अस्मिन् हस्तनिर्दिश्यमाणभागे मृगमदेन कस्तूर्याः(र्या) पत्रमेव पत्रतुल्यत्वात् पत्रकं चित्रं कुरु। ध्रुवाया व्याख्यानम्। सा राधा हृदयस्य अन्तःकरणस्य आनन्दयति सुखयतीति आनन्दने यदुनन्दने कृष्णे क्रीडति सति निजगाद। किमित्यतः कुर्वित्यादिपदानि।।१।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।१।। अस्यां हि गाथायां स्वाधीनभर्तृका वर्णनीया। तस्याः लक्षणम्, ''करीहतेन तेनेवं क्षणं चरणपातिना, कन्दुकेनेव कान्तेन क्रीडेत्स्वाधीनभर्तृका''। इति। (राधा अमुं) कृष्णमालोक्य वेशं कारयितुमाह, कुर्विति। सा राधिका यदुनन्दने क्रीडति सति निजगाद वक्ष्यमाणं वच उक्तवतोत्यर्थः। कृष्णमित्यर्थादवगन्तव्यम्। धातुसम्बन्धे प्रत्यया इति वचनात्। क्रीडतीत्यस्य भूतकालता प्रत्येतव्या। शृङ्गारकाले वक्ष्यमाण-वचसो विरसताप्रतिपादकत्वात्। किंविधे ? हृदयानन्दन इति। हृदयं नन्दयतीति (नन्दनः) नन्द्यादिः (ल्यु)। किं जगादेत्याह, कुर्वीति। हे यदुनन्दन ! अत्र पयोधरे मृगमदपत्रकं कस्तूरीपत्रावलीं करेण स्वहस्तेन कुर्विति वाक्यार्थः। ''तमालपत्रतिलकचित्रकाणि विशेषकम्'' **इत्यमरः**। अत्रेति संज्ञया पयोधरं दर्शयति। करस्य सुभगत्वं विशेषण-द्वारेणाह। किंविधेन ? चन्दनशिशिरतरेणेति। कामसन्तापाभावादित्यभिप्रायः। पयोधरे किंविधे ? मनोभवेति। मनोभवस्य मङ्गलकलशो मङ्गलप्रयोजनो पूर्णकुम्भस्तस्य सहोदरे सदृशे, मङ्गलकलशे पत्रस्थापनमुचितमेवेति।।१।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।१।। यत् जगाद तदेवाह यदुनन्दनेत्यादिना। अस्यापि रामकिरीरागयतितालौ। यदुनन्दने क्रीड़ति सति सा श्रीराधा निजगाद, तं प्रति इति प्रकरणात् ज्ञेयम्। क्रीड़ति

इति सुरतान्तेऽपि चिक्रीड़िषोदयात् अखण्डलीलत्वमुक्तम्। इच्छामात्रेण कथं क्रीड़नं स्येत्स्यतीति तत्राह। तस्या हृदयमानन्दयति स्वचापल्येन क्रीड़नाय उन्मुखं करोति यत् तस्मिन् क्रीड़ति जगादेति क्रीड़नसमयेऽपि प्रियप्रेरणात् तस्या नित्यस्वाधीन-भर्त्तृकात्वे प्राधन्यं द्योतितम्। हे यदुनन्दन! इत्युक्तरीत्या महाकुलोद्भवत्वेन सर्वातिशायिनायकगुणख्यापनाय सम्वोधनम्। यदि पुनर्मनोभवमथारम्भ: सम्भवति, तदा मम पयोधरे कस्तूरीपत्रभङ्गं करेण कुरु । कथं तत्र तत् करणीयं अत आह कामस्य यो मङ्गलकलस: तत्सदृशे मङ्गलकलसोपि तथा विधानेन स्थाप्यते अतस्त्वमपि कुरु इत्यर्थ:। किदृशेन ? चन्दनादपि अतिशीतलेन, शीतलत्वेनाव्यग्रतया करण योग्यता सूचिता।।१ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।१ ।। एवं निजैकप्रवणचित्तप्रियदर्शनसञ्जातसौभाग्यमदमत्तायास्तस्या: स्वाधीन-भर्त्तृकावस्थां वर्णयन्नाह, कुर्वित्यादिगीतेन। रामकेरीरागेण गीयत इत्युक्तम्। मङ्गल-कौशिकरागेण इति क्वचित्। कुर्विति, सा नि:सीमप्रेममयलीलाऽऽविष्कारेण वशीकृत-प्रियहृदया राधा, यदुनन्दने व्रजेन्द्रकुमारे क्रीडति सति, निजगाद, तं प्रति कथयामास। इत्यर्थ:। क्रीडतीति रतिपर्याप्तावपि पुनश्च रसोदयात् अखण्डलीलावेशत्वं सूचितम्। कीदृशे, हृदयस्य निरवधिप्रियविषयप्रणयप्रवणस्य मनस: आनन्देन हृदयानुसारिविविध-भावप्रकाशनेन सन्तोषकारिणीत्यर्थ:। यद् जगाद, तद्विशदयति, कुर्वितेत्यादिना हे यदुनन्दन! पयोधरे, त्वद्गात्रगाढालिङ्गनविलुप्तरागे मत्कुचमण्डले, चन्दनादपि शिशिरतरेण, अतिशीतलेन करेण, मृगमदपत्रकं कुरु। मलयजरसाधिकस्वभावशीतलेन पाणिना घर्माम्बुजालनिरसनपूर्वं कस्तूरीद्रवेण पत्रावलीं रचय इत्यर्थ:। कीदृशे, मनोभवस्य, कामदेवस्य मङ्गलार्थं य: कलस:, तस्य सहोदरे सदृशे। मङ्गलार्थं स्थापितस्य कलसोयपरि चूतादिपल्लवधारणौचित्यादिति भाव:। 'यदुनन्दन' इति सम्बोधनं जात्यनुगुणद्योतनार्थम्। समानजात्योर्हि सम्भोगसुखाधिक्याधायकत्वात्। गोपानां यदुत्वं पूर्वमुक्तमेव।।१ ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।१ ।। कुरुयदुनन्दनेति; संभोगावसाने नितान्तमतिशयेन खेदं प्राप्तमङ्गं यस्या: सा तथा। सा श्रीराधा यदुनन्दने हृदयानन्दने अर्थात् वक्षमाणं प्रोवाच। क्व सति यदुनन्दने क्रीडां कुर्वति सति। किं भूते ? हृदयानन्दकारिणि इति ध्रुव:। हे यदुनन्दन! अत्र स्तनकलशे चन्दनवत् शिशिरतरेण शीतलतरेण करेण मृगमदेन कस्तूरिकया पत्रा-

वल्यादि रचय। किंभूते कुचकलशे ? कामस्य जगज्जयार्थं मङ्गलकलशसदृशेति मङ्गलार्थं कलशो हि पयःपूर्णो भवति सुनीलाम्रपल्लवैरुपचितश्च। अनेन मयूरपदकं नाम नखरक्षतं व्यज्यते। **वात्स्यायनीये** यथा;

नान्यत्पटुतरं किंचिद्रागस्यास्ति विवर्द्धनम्।
नखदन्तसमुत्थानां कर्मणां गतयो यथा।।इति।।१ ।।

**२-अलिकुलगञ्जनमञ्जनकं रतिनायकसायकमोचने।**
**त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय लोचने।। निज०।।२।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।२।। हे प्रिय! मम लोचने त्वदधरचुम्बनलम्वितकज्जलमुज्ज्वलयेति योजना। कीदृशम्, अलिकुलगञ्जनमञ्जनकम्, अलिकुलगञ्जनं मञ्जनयतीति थन प्रत्ययः। लोचने कीदृशे, रतिनायकसायकविमोचने, कामबाणमोचने जनमोहककटाक्षकायिनीत्यर्थ।।२।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।२।। अपि च, अलिकुलेति। हे प्रिय! लोचने पूनर्नूतनकज्जललेखां कुरु। किंभूतमञ्जनकम्? भ्रमरसमूहस्य तिरस्कारकम्। किंभूते लोचने? कामबाणानां मोचने इति कटाक्षविक्षेपैरुपलक्षिते। पुनः किंभूते ? त्वदधरचुम्बनेन लम्बितं प्रसृतं कज्जलं यत्र। अनेन रागसंधुक्षणार्थं नयनयोश्चुम्बनमुक्तम्।।२।।

### (३) जगद्धरकृत-सारदीपिका

।।२।।अलीति हे कृष्ण! त्वं लोचने मदीये नेत्रेवदधराभ्यां चुम्बनेन लम्बितं कज्जलम् उज्वलय पुनरुद्दीपय कीदृशं कज्जलम् अलिकुलस्य भ्रमरसङ्घस्य गञ्जनमभिभवं सञ्जनयतीति सञ्जनकं बिधायकं कीदृशे लोचने रतिनायकस्य कामस्य सायकान्मोचयति तस्मिन्नयनकटाक्षप्रत्यञ्चिका प्रासाद्यकामोबाणं मुञ्चतीत्यर्थः।।२।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।२।।अलिकुलेति। हे प्रिय! लोचने नेत्रे त्वदधराभ्यां यच्चुम्बनं तेन लम्बितं गलितं यत्कज्जलं तदुज्ज्वलय पुनर्दीपय। नयनयोः कज्जलं पुनरर्पयेत्यर्थः। कीदृशे लोचने? रतिनायकस्य कामस्य सायकान्बाणान्कटाक्षरूपान्मुञ्चतीति रतिनायकसायकमोचनं तस्मिन्। कीदृशं कज्जलम्? अलिकुलस्य भ्रमरसमूहस्य यद्गञ्जनं तिरस्कारस्तस्य जनकम्। 'उज्ज्वलो दीप्तिश्रृङ्गारविशदेषु विकाशिनि ।' इति **विश्वः**।२।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।२ ।। अलीति। हे प्रिय! मनोहर अलिकुलस्य भ्रमरनिकरस्य गञ्जनं तिरस्कारकं ततोऽपि अति नीलमित्यर्थ:। त्वदधरचुम्बनेन लम्बितं नीतं प्रापितं कज्जलं कालिमा अशनैक देशो वा यस्मात्तादृशं मदीयचुम्बनेन...अधरे लग्नैकदेशे मित्यर्थ:। एतादृशमञ्जनकं रतिनायकस्य रतिपते: सायकानांदृष्टिरूप विशिखानां मोचनं प्रयोगो यस्मात्तादृशे लोचने नयनयोरुज्ज्वलय प्रकाशय निधेहीत्यर्थ:। नेत्रे पुनरञ्जनं कुर्विति तात्पर्य्यम्।।२ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।२ ।।अपरं किं निजगादेत्याकांक्षायामाह, हे प्रिय कृष्ण! मम लोचने तवाधरचुम्बनेन लम्बितमध:प्रसूतञ्च तत् कज्जलञ्चेति तत्तथा उज्ज्वल्य। यथास्थानस्थापनेन कज्जलान्तरदाने सश्रीकं कुर्वितेयर्थ:। कीदृशं कज्जलम्? अलिकुलस्य भ्रमरसमूहस्य गञ्जनं तिरस्कारं संजनयतीति अलिकुलगञ्जनसंजनकत्वं तदधिककान्तिमत्तयेत्य-वधेयम्। कीदृशे लोचने? रतिनायकस्य कामस्य ये शायका: कटाक्षरूपबाणा: तेषां मोचनं क्षेपनं यस्मात्तत्र।।२ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।२ ।। (अलीति।) किञ्च हे प्रिय वल्लभ लोचने नेत्रे त्वदधरचुम्बिनेन [७]लम्बितं गलितं यत्कज्जलमुज्ज्वलय पुनरर्पय। कीदृशम्? भ्रमरसमूह[८]मर्दकं पराभवजनकम्।[९] कीदृशे? रतिनायकस्य [१०]कामस्य सायकान् मोचयतीति मोचने [११]कामबाणापहारिणि। [१२]यद्वीक्ष्य [१३]जगद्विजयाय[१४]कामो बाणं न मुञ्चति [१५] तादृशे। [१६]''लम्बितं गलिते प्रोक्तं लम्बमानदुरापयो: इति रत्नकोश:'' [१७]।।२ ।।

१.मण्डनकेलि-च.२.हस्तेन-क.३.नास्ति-ड.४.त:६.पर्यन्तं नास्ति-ल.म.५.नास्ति-ड.७.लम्बितं विगलितं कज्जलमुज्ज्वलय-इ.फ.ह.लम्बितं कज्जलमुज्ज्वलय-ग.लम्बितं विगलितं गलितं-ज.८.मर्दनं-इ.ग.मर्दनपराभवजनकम्-फ.ह.ज.९,१०.नास्ति-अ.ब.११.कामबाणापहारी-ग.१२.यमुद्वीक्ष्य-ग.ह.१३.जगद्विजये-अ.ब.१४.कामोऽपि बाणं मुञ्चति-ग.कामोऽपि बाणं न मुञ्चति-ह.१५.नास्ति-अ.ब.१६.त:१७.पर्यन्तं नास्ति-अ.ब.एतत्समनन्तरपदव्याख्यान्ते दृश्यते इ.फ.ज. १६.लम्बिते-ग.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।२ ।।अलीति। हे प्रिय कृष्ण [३] त्वं लोचने मदीयनेत्रे त्वदधरचुम्बनेन त्वदधरकृत-चुम्बनेन यत् लम्बितं [४] गलितमध:स्रस्तं कज्जलं [५] तत् उज्ज्वलय पुनरुद्दीपय। कीदृशं कज्जलम्? अलिकुलस्य भ्रमर[६]समूहस्य गञ्जनं अभिभवं सञ्जनकं विधायकम्।

कीदृशे लोचने ? रतिनायकस्य कामस्य सायकान् मोचयति इति। एतत्प्रेरणया कामो बाणान् मुञ्चतीत्यर्थः।।२।।

### (९) कृष्ण पण्डितकृत-जयन्ती

।।२।।अलीति। हे प्रिय! अलीनां भ्रमराणां कुलं गणं गञ्जयतीति। गञ्जने मण्डनकेलि भ्रमरातिशयनीलवर्णम्। भ्रमरालय **इत्यमरः** (२.५.२९)। रतिनायकस्य मदनस्य सायकं नीलोत्पलादिकं मोचयति त्याजयतीति मोचने। तत्कार्यकारित्वात् तेन किमर्थं शरा धर्तव्या इति भावः। लोचनं नेत्रं तस्मिन् जातावेकवचनम्, द्वयोरित्यन्वयः। त्वत् तव अधरस्य चुम्बनेन लम्बितं वञ्चितं अपहृतं कज्जलं उज्ज्वलय पुनः अञ्जनेन स्पष्टीकुरु।।२।।

### (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।२।। अतिकुलेत्यादि। हे प्रिये! मम लोचने त्वदधरचुम्बितलम्बितकज्जलम् उज्जलयेति योजना। लोचने इति सप्तम्यन्तं पदम्। चुम्बितमिति ''नपुंसके भावे क्तः।'' त्वदधरचुम्बनेन लम्बितं प्रसृतं च तत् कज्जलं चेति विग्रहः। किंविधम्? अलिकुलस्य गञ्जनं पराभवस्तस्य सञ्जनकं सम्पादकम्। लोचने किंविधे ? रतिनायकस्येति। रतिनायकस्य सायकं बाणं मोचयतीति नन्द्यादिस्तस्मिन् कामबाणेन यत् साध्यं तदस्यालोकनेन साध्यमिति भावः। जगन्मोहनकटाक्षदायिनीत्यर्थः।।२।।

### (११) पूजारी गोस्वामीकृत बालवोधिनी

।।२।। ततश्च तदुपकरणानि आपादय इत्याह, अलीति। हे प्रिय! लोचने त्वदधरचुम्वनेन लम्वितं गलितं कज्जलं उज्ज्वलय अर्पय इत्यर्थः। कीदृशम्। अलिकुलगञ्जनं सञ्जनयति इति तादृशम्। कीदृशे ? कामबाणान् कटाक्षरूपान् मोचयतीति मोचनं तस्मिन्। कज्जलादिकमपि तत्रापेक्षितमस्तीति भावः।।२।।

### (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।२।। अलीति। हे प्रिय! लोचने, मम नेत्रे, त्वदधरचुम्बनेन लम्बितं गलितं कज्जलमुज्ज्वलय। रतिसामयिकत्वत्कर्त्तृकमन्नेत्रचुम्बनेन छिद्रिताञ्जनरेखां पुनरञ्जनदानेन समीकुर्वित्यर्थः। कीदृशम्, अलिकुलस्य भ्रमरसंघस्य गञ्जनं तिरस्कार-स्तस्याञ्जनकं, ततोऽपि नीलमित्यर्थः। कीदृशे, रतिनायकस्य कामस्य सायकान् कटाक्षादिरूपबाणान् मोचयतीति मोचनम्, तस्मिन् मदनशरवन्मर्मस्पर्शीत्यर्थः।।१३।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।२।। अलिकुलगञ्जनेति; हे प्रियतम यदुनन्दन! मम चक्षुषि अलिकुलगञ्जन भ्रमरनिन्दीकज्ज्वलं रतिनायकसायकस्य कन्दर्पस्य तीक्ष्णशर इव नेत्रे त्वदधर

तवाधरचुम्बनेन कज्ज्वलस्य रेखा लम्बितं गलिता भवति। अतः त्वं तां रेखां मम चक्षुषि उज्ज्वलय पुर्नदीपय। नूतनतया संयोजय अर्पय वा। अत्र चक्षुषि चुम्बनभूतस्य कज्ज्वलधारे चुम्बनं तज्जन्यं लम्बितं संशोधय।।२ ।।

**३-नयनकुरङ्गतरङ्गविकासनिरासकरे श्रुतिमण्डले।**
**मनसिजपाशविलासधरे शुभवेश निवेशय कुण्डले।। निज० ।।३ ।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।३ ।। हे शुभवेश! मम श्रुतिमण्डले कुण्डले निवेशयेति योजना। कीदृशे, नयनकुरङ्ग विकाशनिरासकृती, नयनमेव कुरङ्गो मृगनाभिस्तरङ्गस्तड़ङ्ग इति ख्यातः, तस्य विकाश निरासं करोतीति क्विप् प्रत्ययः। पुनः कीदृशे, मनसिजपाशविलासधरे ''पाशो बन्धनरज्जुः स्यात्''।।३ ।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।३ ।। अपि च, नयनेति। शुभो वेशो नेपथ्यविशेषो यस्येति हे शुभवेश! श्रुतिमण्डले कुण्डले निवेशय। किंभूते श्रुतिमण्डले ? नयनयोस्तरङ्गा निरीक्षणविशेषा वृद्ध्युपचयास्त एव कुरङ्गविलासास्तेषां निरासं करोतीति। पुनः किंभूते ? मनसिजस्य युवमनोबन्धनार्थं पाशशोभाधृति। अनेन नेत्रयोः श्रुतिगामिता उक्ता।।३ ।।

### (३) जगद्धरकृत-सारदीपिका

।।३ ।। नयनेति हे शुभवेशरुचिरालङ्कारवेशकृष्ण! त्वं मम श्रुतिमण्डले कर्णप्रदेशे कुण्डले निवेशय कुण्डलयुग्मं स्थानं स्थापय कीदृशे श्रुति मण्डले नयने एव कुरङ्गो मृगस्तस्य तरङ्गविलासस्य उत्फालगमनस्य निरासं निषेधं करोतीति पुनः कीदृशे मनसिजस्य कामस्य यः पाशस्तस्य विलासं सादृश्यं लीलां धारयतीति पाशः पशु गमननिरोधको भवतीति।।३ ।।

### (४) शंकरमिश्रकृत- रसमञ्जरी

।।३ ।। नयनकुरङ्गेति। हे शुभवेश! शुभः शोभनो वेशोऽलंकरणं यस्य तादृश। मम श्रुतिमण्डले कर्णप्रदेशे कुण्डले विनिवेशय अर्पय। कीदृशे श्रुतिमण्डले ? नयने एव यौ कुंरङ्गौ मृगौ, अतिवेगवत्त्वात्। तयोस्तरङ्गस्य यो विकासः प्रसरणं तस्य निरासकरे निरासकारिणि नयनयोर्दैर्ध्यवियोगकारिणि, अन्यथा कियद्दूरं तयोर्वृद्धिः स्यादित्यर्थः। पुनः कीदृशे श्रुतिमण्डले ? मनसिजस्य कामस्य यः पाशोऽस्त्रविशेषस्तस्य विलासधरे तल्लीलाभृति।।३ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।३ ।। नयनेति। हे कृष्ण! मनसिजस्य यः पाशः युवतिनिकरः मनोबन्धनरज्जु-यन्त्रविशेषः तस्य विलासः विभ्रमः तस्य धरे पाशकल्प इत्यर्थः। सुभगे मनोहरे नयने कुरङ्गाविव नयनकुरङ्गौ तद्वदति चञ्चलगति इत्यर्थः अथवा शब्देन नयनलक्षणापि तयोस्तरङ्गवत्तरङ्गः परं परं तस्य विकाशस्य विभवस्य निरासकं निरोधकं यत् श्रुतिमण्ड़लं कर्ण्णप्रदेशः, तस्मिन् नेत्रयोरवटपर्य्यन्त गमननिरोधककर्ण्णयुगल इत्यर्थः। अनेन नयनयोराकर्ण्णान्तविशालतापि सूचिता। कुण्डले कर्ण्णाभरणे विनिवेशय निधेहि एवं निजगाद इत्यन्वयः।।३ ।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।३ ।। अपि किं निजगादेत्याकांक्षायामाह, हे शुभवेश शोभनवेश कृष्ण! नयनमेव चाञ्चल्यविशेषवत्वात् मुखचन्द्रावस्थितत्वाद्वा कुरङ्गो हरिणः, तस्य तरङ्गः आस्फालः तस्य विकाशनिरासं प्रकाशनिवाणङ्करोतीति नयनकुरङ्गतरङ्गविकाशनिरासकरम्, तच्च श्रुतिमण्डलञ्चेति तत्तथा, तत्र कुण्डले निवेशय आरोपय। कीदृशे ? मनसिजस्य कामस्य पाशविलासं पशुबन्धनरज्जुविशेषविलासं धरत इति तथा तस्मिन्। तथा चाकर्णनयन-तरङ्गविकाशो भवतीति वस्तुस्थितिः। तत्र श्रवणरूपमदनपाशभीत्या न तमतिक्रम्य नयनकुरङ्गतरङ्गविकाश इति ध्वनिः। घरत इति धरः, पचाद्यच्। अत्र शुभवेशपदेन सम्बोधनेन त्वं कर्णपूरादिना शुभवेशो मामपि तथा विधेहीति ध्वनितम्।।३ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।३ ।। किञ्चापरमप्याह, (नयनेति।) हे शुभवेश रुचिरमूर्ते मम श्रुतिमण्डले कर्णप्रदेशे कुण्डले निवेशय अर्पय। कीदृशे ? नयनकुरङ्गस्य [७]नेत्रकुरङ्गस्य तरङ्गाणां विकासस्य प्रकाशस्य निरासकरे निरोधके। एतेन कर्णान्तविशाललोचनत्वमुक्तम्। [८]पुनः कीदृशी ? कामजालस्य क्रीडानुकारके[९]। ''वेशोऽलङ्करणेकेलिभवनेऽद्भुतभावके'' इति **वैजयन्ती**।।३ ।।

## (८) वनमालि भट्टकृत-सञ्जीवनी

।।३ ।। नयनेति। हे शुभवेष रुचिरालङ्कारवेष कृष्ण त्वं मम श्रुतिमण्डले कर्णप्रदेशे कुण्डले निवेशय कुण्डलयुगं यथास्थानं स्थापय। कीदृशे श्रुतिमण्डले ? नयनकुरङ्गस्य [१०] नेत्रमृगस्य तरङ्गविकासस्य उत्फालगमनस्य निरासं निषेधं [१] करोति। पुनः कीदृशे ? [२] मनसिजपाशः कामपाशस्तस्य विलासं सादृश्यं लीलां [३] धारयति। पाशः पशुगमननिरोधको भवतीति।।३ ।।

१ .निवासकरश्रुतिमण्डले-च. २ .विनिवेशय शुभकुण्डले-च. ३ .मदीयलोचने-नेत्रे-क. ४.अध:स्रस्तं-क.५ .नास्ति-ड.ल.म. ६ .सङ्गस्य-क.ल.म.७ .नास्ति-इ.फ.ग.ह.ज.८ .त:९ .पर्यन्तं नास्ति-अ.ब. १ ० .नास्ति-ड.नेत्रकुरङ्गस्य-क.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।३ ।। नयनेति। मनसिजस्य मन्मथस्य पाश: वशीकरणरज्जु: तस्य विलासं युवजनवशीकरणं तस्य धरे धारयतीति धर: तस्मिन्। नयने कुरङ्गाविव तयो: तरङ्गं उद्वेलनं तस्य विकास: प्रान्तप्रसर: तस्य निवासकरं स्थितिकरं उल्लङ्घनरोधकं श्रुतिमण्डलं कर्णशष्कुलीरूपं तस्मिन्। शुभे च ते कुण्डले विनिवेशय। मनसिज-पाशेत्यादि कुण्डलविशेषणत्वेन वा योज्यम्। अत्रोपमाननिदर्शनयो: सन्देहसङ्कर: ।।३ ।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।३ ।। नयनेति। हे शुभवेश! मम श्रुतिमण्डले कुण्डले कर्णाभरणद्वयं निवेशयेति योजना। श्रुतिमण्डले किंविधे ? नयनमेव कुरङ्गो तस्य विकाशं प्रकाशनम् अतिशयितत्वं तस्य निरासं करोत्विति क्विप् तस्मिन्। पुन: किंविधे ? मनसिजेति। मनसिजस्य पाशविलासं बन्धनरज्जुलीलां धरतीति पचादि:, तस्मिन्। ''पाशबन्धनं रज्जु: स्यात्।'' एतेन मृगस्य पाशं दृष्ट्वा अगन्तृत्वं चक्षुषो: कर्णान्तर्गामित्वं च दर्शितम्। श्रुतिमण्डलमिति कर्णलतिकाया अलङ्कृत्यभावे मण्डलाकारत्वादिति ।।३ ।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।३ ।। हे शुभवेश! मम नयनमेव कुरङ्गस्तस्य तरङ्गकुर्द्दनं तस्य य: विकाशस्तस्य निरासकरं यत् श्रुतिमण्डलं तस्मिन् कुण्डेले अर्पय। कुतस्तन्निराकरणं श्रुतेरत आह, मनसिजस्य पाशस्य विलासधरे पाशो मृगवन्धनरज्जुस्तद्भयात् अग्रे न याति इत्यर्थ:। धरतीत्यर्थ:। शुभकर्मणि कृतवेशस्य तव प्रियत्वात् ममापि तथा वेशकरणं युक्तमित्यभिप्राय: ।।३ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।३ ।। नयनेति। हे शुभवेश! रतिसम्मर्दितोऽपि नयनोत्सवदायिवेशो यस्य, हे तादृश! नयने, मन्नेत्रे कुरङ्गौ इव। तद्वदतिचञ्चलगतिनी इत्यर्थ:। तयोस्तरङ्गो विविधगतिपरम्परा, तस्य विकास: स्फुरणं तस्य निराशकरे रोधके, कथमेतयो: रोधकता, यतो मनसिजसम्बन्धी य: पाश:, हृदयबन्धनरज्जुविशेषस्तस्य विलासो विभ्रमस्तस्य धरे। निजबन्धनभयात् तौ उल्लंघ्याग्रे न यात इति भाव:। अनेन नयनयो: आकर्णायतत्वं सूचितम्। ईदृशे श्रुतिमण्डले, कर्णयुगले कुण्डले, ताटङ्कयुगलं विनिवेशय। रतिकालीन-ताण्डववशेन यथा तथावस्थिते सज्जीकुरु इत्यर्थ: ।।३ ।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।३।। नयनकुरङ्गविकाशेति; हे शुभवेश! मङ्गलवेश मम श्रुतिमण्डले कर्णयुगले कुण्डले निवेशय। संयोजय। अर्पय इति किम्भूते श्रुतिमण्डले ? नयनकुरङ्गतरङ्गनिरीक्षणविशेषे अर्थात् कुरङ्गसदृशचञ्चलनयने तरङ्गायितभङ्ग्या कुर्दनं कुरुत। यथा मृगः पाशभयात् धावन्नपि अग्रे न गच्छति तथैव नयनकटाक्षपाशः कर्णपर्यन्तं धावित्वा पुनरग्रे न गच्छति। तथैव नयनयोस्तरङ्गा निरीक्षणविशेषा वृद्ध्युपचया सा एव कुरङ्गविलासास्तेषां निरासं करोत्वीति। यूनां मनोबन्धनार्थं पाशशोभाधृति। हे शुभवेशे त्वमपि शुभवेशप्रिय ममापि वेशरचनां कुरु कुण्डलभूषणेनेति।।३।।

**४-भ्रमरचयं रचयन्तमुपरि रुचिरं सुचिरं मम संमुखे।**
**जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे।। निज० ।।४।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।४।। नर्मजनकमलकं चूर्णकुन्तलं मम मुखे परिकर्मय प्रसाधयेति वाक्यार्थः। ''परिकर्माङ्गसंस्कार **इत्यमरः**''। कीदृशे जितकमले पद्मनिभे इत्यर्थः। कीदृशकमलस्य उपरि सम्मुखे भ्रमरचयं मुखस्य कमलत्वेन अलकस्य भ्रमरत्वेन वर्ण्णनमुक्तम्। कं नाम रूपकमेतत् नर्मजनकमिति परिकर्मक्रियाविशेषणं वा। कश्चित्तु नर्मजनेति हरिविशेषणम्। किमित्यलकविशेषणं व्याचख्युः।।४।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।४।। अपि च, भ्रमरचयमिति। 'हे यनुनन्दन' इत्यनुषञ्जनीयम्। मम मुखेऽलकं परिकर्मय अलकानां प्रसाधनं कुरु। किंविशिष्टे मुखे ? जितकमले पद्मसदृशे। पुनः किंभूते ? विमले। पुनः किंभूते ? प्रसादवति। किंभूतमलकम् ? नर्मपरिहासवचनजनकम्। अलकभ्रमरपङ्क्त्या मुखं पद्ममित्युत्प्रेक्षितम्। इति उत्प्रेक्षालंकारः।।४।।

### (३) जगद्धरकृत-सारदीपिका

।।४।। भ्रमरेति हे कृष्ण मम सन्मुखे सुन्दरमुखे अलकं केशपाशं कर्मय प्रसाधय मण्डयेत्यर्थः कीदृशमलकम् उपरिमुखोपरि सुचिरं बहुकालं व्याप्य रुचिरं भ्रमरसमूहं रचयन्तं कारयन्तं स्वजातीय बुध्या भ्रमरस्तत्र पततीति भावः । यद्वा मुखकमलस्थानीयं कमले भ्रमरास्तिष्ठन्ति तद्वत् कीदृशे मुखे जितं कमलं येन तादृशे विमले निर्मले कीदृशमलकं नर्म्मजनकं क्रीडाकारकम्।।४।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।४।। भ्रमचयमिति। मम संमुखे मुखे रुचिरं मनोहरमलकं चूर्णकुन्तलं परिकर्मय भूषय। कीदृशमलकम्? नर्म जनकम्। कीदृशे मुखे? विमले निर्मले। पुनः कीदृशे? जितकमले जितं तिरस्कृतं निजशोभया कमलं येन तादृशे। कीदृशमलकम्? सुचिरं चिरादुपरि सुखस्योपरि भ्रमरचयं भ्रमरसमूहं रचयन्तम्। स्वकान्त्या भ्रमरभ्रमं जनयन्तमित्यर्थः।।४।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।४।। भ्रमरेति। हे प्रिय! मम सम्भुशे समीपे उपरि मुखोपरिभागे ललाटोपरिभागे सुचिरमत्यन्तचिरकालं भ्रमरचयं रोलम्बकदम्बं रचयन्तं कुर्वाणमिव स्थितम्। अतएव नर्मजनकं क्रीड़ासम्पादकंमचूर्णकुन्तलं विमले निर्मले अतएव जितकमले पराकृतपङ्कजे, ततोऽपीति मनोहर इत्यर्थः। एतादृशे मम मुखे परिकर्मय अलङ्कुरु परिकर्माङ्गसंस्कार इत्यर्थः। तस्मात्करोते णिच्। करोरुहाग्रै रतिसमयविकीर्णालकं परिष्कारं कुर्वित्यर्थः। यथा कमलोपरिभागं भ्रमरा अलंङ्कुर्वन्ति, तथा मुखोपरिभागे ललाटोपरिदेशं चिकुरा अलङ्कुर्वन्त्विति समुदायार्थः। ललाटोपर्य्यलङ्करणमुत्कल-देशेप्रसिद्धम्।।४।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।४।। अपि किं निजगादेत्याकांक्षायामाह, हे प्रिय! मम सम्मुखे ममाग्रे स्थित्वा मुखेऽर्थात् मम, रुचिरं मनोहरम् अलकं सुचिरं बहुकालं व्याप्य परिकर्मय प्रसाधक। प्रसाधने चिरकालताप्रदर्शनम् अत्यर्थायेत्यवेधेयम्। मुखे कीदृशे? विमले निर्मले अतएव जितं कमलं येन तत्तथा तस्मिन्। अलकं कीदृशम्? नर्मजनकं सुखजनकम्। अतएवास्य प्रसाधनं भवतां युज्यत एवेति ध्वनितम्। पुनः कीदृशमलकम्? उपरि अर्थाद् वदनकमलस्य, अमरचयं भ्रमरसमूहम् आत्मना स्वकान्या वा रचयन्तं कुर्वन्तमित्यर्थः। तथा च मुखमेव कमलम्, तत्रालकाः तत्कान्तयो वा भ्रमरा इति वाक्यार्थः। मम सम्मुखे उपरि भ्रमरचयं सुचिरं बहुकालं व्याप्य रचयन्तम्। स्वजातिबुद्धया भ्रमरास्तत्र पतन्तीति भाव इत्यपि कश्चित्। भ्रमरचयं रचयन्तमिति क्वचित् पाठः। तत्पक्षे उपरि ललाटप्रदेशे भ्रमरचयरचनं विस्तारालकालीप्रसाधन-कर्मणेकत्रकरणेनेति मन्तव्यम्।। 'अलकाश्चूर्णकुन्तला' **इत्यमरः**।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।४।। (भ्रमरेति।)[४] किञ्च हे प्रिय! मम मुखे अलकं चूर्णकुन्तलं परिकर्मय मण्डय, चुम्बनादिना।[५] कीदृशमलकम्? उपरि मुखोपरि सुचिरं निरन्तरं भ्रमरसमूहं भ्रमरश्रेणि-

शोभां जनयन्तम्। सजातीयबुद्ध्या भ्रमरास्तत्र पतन्तीति भावः। पुनः कीदृशम्? रुचिरं मनोहरं नर्मजनकं परिहासक्रीडाकारकम्। नर्मजनः परिहाससखीजनः तस्य कं सुखरूपं वा। कीदृशे? विमले निर्मले। [६]अनेनाकलङ्कभावः सूचितः। कीदृशे? सन्मुखे सुन्दरे अनुग्रहाभिमुखे वा। पुनः कीदृशे? जितं कमलं येन तस्मिन्[७] तत्सम्बोधने वा हे जितकमल। [८]जितमात्मनयनकान्त्या कमलं येन तत्सम्बोधनं वा। तदा इविमले इः कामः तेन विमले[९] निर्मले[१०] प्रसन्ने। परिकर्म प्रतिकृतौ भूषणे दासकर्मणि इति **कोश-सर्वस्व**।।४।।

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।४।। भ्रमरेति। [११] हे [१२] सखे [१३] कृष्ण मम [१४] सम्मुखे अलकं केशपाशं परिकर्मय प्रसाधय, [१५]मण्डनं विधेहीत्यर्थः। कीदृशमलकम्? उपरि मुखोपरि सुचिरं बहुकालं व्याप्य रुचिरं भ्रमरसमूहं रचयन्तम्। [३] स्वजातीयबुद्ध्या भ्रमरास्तत्र पतन्तीति भावः। यद्वा मुखं कमलस्थानीयं कमले भ्रमरास्तिष्ठन्ति तद्वत्[४] ललितम्। कीदृशे मुखे? जितं कमलं येन तत्। विमले निर्मले। कीदृशमलकम्? नर्मजनकं [५] क्रीडाकारकम्।।४।।

१.कुरुते-ड.२.मनसिजस्य कामस्य पाशः-क.३.धारयतीति-क.४.नास्ति-ग.५.अलकं कीदृशम्-इ.ह.६.अनेन कलङ्काभावः-इ.फ.ग.ह.ज.७.हे जितकमलनयन-इ.हे जितकमल-फ.ग.ह.ज.८.जितं कान्त्या कमलं येन-इ.९.नास्ति-इ.फ.ग.ह.ज.१०.नास्ति-अ.ब. ११,१२,१३.नास्ति-ड.ल.म. १४.सम्मुखे सुमुखे सुन्दरे मुखे-क.१५.मण्डयेत्यर्थः-क.ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती

।।४।। भ्रमरेति। जितं कमलं येन तस्मिन्। विमले स्वच्छे मम मुखे वदने नर्मजनकं विनोदकरं अलकं चूर्णकुन्तलं सम्मुखे समक्षमित्यर्थः। उपरि ललाटोपरि सुचिरं रुचिरं रुचिरत्वं कान्तिमित्यर्थः। भावप्रधानो निर्देशः। रचयन्तं कुर्वन्तं भ्रमरचयं भ्रमरगणमिव परिकर्मय अलङ्कुरु। अलकमेव भ्रमरं कुर्विति भावः। अत्र जितकमलत्वेन व्यतिरेकालङ्कारः। तेन करकमलात्साम्यं सिद्धम्। तत्रालकस्य भ्रमरचयत्वारोपात् मुखेऽपि कमलत्वमर्थतः सिद्धमिति एकदेशवृत्तिरूपकम्। रुचिरत्वविशिष्टारोपः।।४।।

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।४।। भ्रमरेति। नर्मजनकमलकं चूर्णकुन्तलं मम विमले मुखे सुचिरं यथा स्यादेवं परिकर्मयेति वाक्यार्थः। ''अलकाश्चूर्णकुन्तलाः'' **इत्यमरः**। ''परिकर्माङ्गसंस्कारः'' **इत्यमरः**। मुखे किंविधे? जितकमल इति। जितं गुणैरेव कमलं येनेति विग्रहः। किंविधमलकम्? सम्मुख इति। उपरि कमलोपरि सम्मुखे पुरोभागे भ्रमरचयं रचयन्तम्।

यद्वा सम्मुखे स्थित्वेत्यध्याहार्य मुखे अलकं परिकर्मयेत्यन्वय:। किंविधम्? सुचिरमिति। वदनकमलोपरि सुचिरं चिरकालं भ्रमरचयं रचयन्तम्। अवस्थापयन्तं भ्रमरचयमिवेति प्रतीयमानोपमा आत्मानमित्यर्थ:। कमले भ्रमरसम्भावनाया अर्थघटनात्, अन्यत्र भ्रमराणां चिरकालानवस्थानात्। अत्र चिरावस्थानेन सौरभ्यातिशयप्रतिपत्ति-र्मुखपद्मस्य उत्कर्षाय भवति। पुन: किंविधम्? नर्मजनकमिति। रुचिरं मनोहरं नर्मजनकमिति परिकर्मक्रियाविशेषणं वा। अत्र नर्मजनकमिति विशेषणं किञ्चित्प्रकर्षं नोत्पादयति। अलङ्करणं हि तदर्थमेवेति। नायकसम्बोधने नात्र नर्मजनकेति समीचीनम्। तत् कवेरशक्यत्वात् नोपपन्नम्। क्रमभङ्गश्च दूषणं प्रतिपदं प्रतिपादितस्य सम्बोधनस्य अनिर्वाहात्। अत्र ब्रूम:। कं मुखं यथा स्यादेवम् अलकं परिकर्मयेति क्रियाविशेषणम्। सुखं तिष्ठत्युदासीनमितिवत्। एतेन विशेषणवैयर्थ्यं समर्थितं भवति। ''कं शिरो जलमाख्यातं कं सुखं च प्रकीर्तितम्'' **इत्येकाक्षरकोष**:। हे नर्मजनेति सम्बोधनम्। नर्मप्रियजनो नर्मजन इति मध्यपदलोपी समास:। अनेन क्रमभङ्गदोषोऽपि परिहृतो भवति। यद्वा नर्मजनेति नर्म जनयतीति कर्मण्यण्। ''क्रीडा लीला च नर्म च'' **इत्यमर**:।।४।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।४।। तथा मम मुखे अलकं संस्कुरु। तत्र हेतु: सखी परिहासजनकं यत: सम्मुखे सुचिरं कालं व्याप्य मुखकमलस्योपरि भ्रमरचयं रचयन्तं अतएव रुचिरम्। कीदृशे? जितकमले अतो विमले। मुखस्य कमलत्वेन अलकस्य भ्रमरत्वेन निरूपितम्।।४।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।४।। भ्रमरेति। अनन्तरं जितकमले, त्वत्पानयोग्यमाध्वीकाधारतया सरोज-तिरस्कारिणीत्यर्थ:। विमले हृदयस्थितभावबोधकप्रसादशालितयातिनिर्मले, एवम्भूते मुखे, उपरि, ललाटोर्ध्वदेशे, मम सम्मुखे, पुरत: सुचिरं चिरकालपर्यन्तं भ्रमरचयं रचयन्तं, श्रेणीभूतभ्रमरसंघं घटयन्तमिव स्थितम्। अत एव रुचिरं, पद्मोपरि भ्राजमान-मधुपपङ्क्तिवन्मनोहरमत एव नर्मजनकं, क्रीडोत्पादकमलकं रतिसमयत्वत्कचग्रहादिना व्यस्तीकृतं चूर्णकुन्तलं परिकर्मय, संस्कुरु। 'परिकर्माङ्गसंस्कार:' **इत्यमर**:। द्रवकेलिपरिहासा: क्रीडा लीला च नर्म च इत्यपि ।।४।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।४।। भ्रमरचयेति; मम मुखस्योपरिप्रलम्बमानस्य अस्तव्यस्तालकानां चूर्णकुन्तलानां संस्कारं कुरु। यतो हि ममालुलायिते केशराशौ अलकानां व्यस्ततां सखीनां परिहासाय

भविष्यति। अत: संस्कुरु। तदलकं कथं प्रतिभाति? जितकमले कमलं जयति शोभायाम्। अपि च विमलं निर्मलं भवति। मुखमण्डलम्। तत्र मुखे अलकानां स्थिति: भ्रमरा इव दृश्यन्ते। एतद् खलु असमीकृतमलकं नर्मपरिहासवचनजनकम् शृङ्गारनिष्ठसखीजनपरिहासाय भविष्यति। अत: तस्मात् मां रक्ष। उत्प्रेक्षा इति **कुम्भ:**।।४।।

**५-मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे।**
**विहितकलङ्ककलं कमलानन विश्रमितश्रमशीकरे।। निज०।।५।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।५।। हे कमलानन! मम अलिक रजनीकरे ललाटचन्द्रे मृगमदरसदलितं तिलकं कुर्विति वाक्यार्थ:। अलिकमेव रजनीकर इति विग्रह:। ''ललाटमलिकं गोधिरि**त्यमर:**।'' कीदृशं विहितकलङ्क कलं, अत्र ललाटचन्द्रत्वेन मृगमदतिलकं कलङ्कत्वेन निरूपितम्। अलिकरनिकरे, कीदृशे, विश्रमित श्रमशीकरे, इति विग्रह:, विश्रमिता: शान्ता: श्रमशीकरा: घर्मजलकणा यत्रेति विग्रह:।।५।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।५।। अपि च मृगमदेति। हे कमलवदन! मम अलिकरजनीकरे ललाटचन्द्रमसि ललितं मनोहरं तिलकं कुरु। किंभूतं तिलकम्? कस्तूरिकारसेन संभक्तम्। किंभूतम्? विहिता आरोपिता कलङ्कस्य कला येन। एतेन अलिकमष्टमीचन्द्रेणोपमीयते, कस्तूरीविशेषकं कलङ्केनेत्युपमालंकार:। किंभूते मुखे? विश्रमिता: शान्तिमिता: श्रमजलकणा यत्र। एतेन 'पुनरुद्दीपनविभाव: सूचिता भवन्तीति।।५।।

## (३) जगद्धरकृत-सारदीपिका

।।५।। मृगमदेति हे कमलानन! कृष्ण! त्वम् अलिकरजनीकरे ललाटचन्द्रे तिलकं कुरु मृगमदरसेन वलितं निर्मितम् अतएव ललितं मनोहरं पुन: कीदृशं विहिता कृता कलङ्कस्यां कस्य षोडशभागो यत्र अथवा कला शोभा यत्र द्वितीयाचन्द्रप्रायं तिलकं कुर्वित्यर्थ: कथंभूतेऽलिकरजनीकरे विश्रमिता: उपशान्ता: श्रमसीकरा: प्रयासजलकणा यत्र एतेन चन्द्रोऽपि प्रकटलाञ्छन छवि दृश्यत इति।।५।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।५।। मृगमदेति। हे कमलानन पद्ममुख! अलिकरजनीकरे अलिकं ललाटमेव रजनीकरश्चन्द्रस्तस्मिन्। तिलकं कुरु। कीदृशं तिलकम्? मृगमदरसवलितं मृगमदरसेन

कस्तूरीरसेन वलितं निर्मितम्। पुनः कीदृशं तिलकम्? विहितकलङ्ककलम् । विहिता कलङ्कस्य लाञ्छनस्य कला शोभा येन तादृशम् । अत्र 'कमलानन' इति विशेषणेन आननरूपकमलविरोधिन्यलिकरूपजनीकरे मृगमदतिलकच्छलेन कलङ्कदानमुचित-मेवेति ध्वनितम्। कीदृशे अलिके? विश्रमितश्रमशीकरे विश्रमितो विश्रामं प्रापितो यः श्रमस्तज्जनितः शीकरोऽम्बुकणो यत्र तादृशेऽलिके।। अत्र 'विश्रमित' इत्यनेन व्यजनवातादिभिस्तनुभूतानां प्रस्वेदबिन्दूनामतिशयिततया हिमकणत्वमाक्षिप्यते। तेन चालिकस्य चन्द्रत्वरूपणं साङ्गं निर्वहतीति ध्वनितम्। 'ललाटमलिकं गोधिः' **इत्यमरः**।।५।।

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी

।।५।। मृगमदेति। हे कमलानन! हे श्रीकृष्ण। विश्रमिताः स्थिताः श्रमशीकराः स्वेदाम्वुकणाः यत्र तादृशे, समनन्तरनिवृत्तसुरतसम्भवा अवगन्तव्या। एतादृशे रजनीकरे चन्द्रमति ''अलिकं तु भ्रुवोर्मध्यमित्यमरः।'' ललाटस्यार्द्धचन्द्र साम्यादेवमुक्तमिति। मृगमदः कस्तूरिका तेन वलितं घटितम् अतएव ललितं मनोहरं विजिता कलङ्ककला कलङ्क शोभा येन तादृशम्। कस्तूरी कलङ्ककलयोःसावर्ण्यादेव मुक्तमिति विहित-कलङ्केति क्वचित्पाठः। तथा विहिता विधानकर्मी कृता अनुश्रुतेत्यर्थः। तिलकं कुरु रचय, यथा चन्द्रमसि कलङ्क शोभा भासते तथा मम ललाटे भवद्विरचितकस्तूरीतिलकं भासतामिति समुहायार्थः।।५।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।५।। अपि किं निजगादेत्याकांक्षायामाह, हे कमलानन कृष्ण! ममालिकरजनीकरे ललाटचन्द्रे मृगमदस्य कस्तूरिकायाः वलितं समृद्धं ललितं मनोहरं यथा स्यादेवं तिलकं कुरु। कीदृशम्? विहिता कलङ्कस्य कला येन तत्तथा तादृषम्। अन्यत्रापि रजनीकरे कलङ्ककला वर्तत इति युक्तं रूपकम्। तथा च स्वभावसुन्दरे मम ललाटे भुषणार्थं तिलकं कलङ्क एवेति ध्वनितम्। अत्र रजनीकरपदेन ललाटस्य रूप्यत्वेनार्द्धचन्द्र एवाभिप्रेत इति तत्र न सम्पूर्णकलङ्ककला। अतो तिलककलङ्ककलोपादानमित्यवधेयम्।[x] कीदृशे? अलिके विश्रमिता उपशान्ताः श्रमशीकराः सुरतायासजनितघर्मकणा यस्मिन् तस्मिन्। अनेन तिलकविन्यासे सामग्रीवैकल्यपरिहारो दर्शितः। 'ललाटमलिकं गोधिरि'**त्यमरः**।।५।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।५।। (मृगमदेति।) हे कमलानन कृष्ण अलिकरजनीकरे ललाटचन्द्रे तिलकं कुरु रचय। कीदृशम्? कस्तूरीरसेन निर्मितम् अत एव [६] ललितं [७]मनोहरम्। कीदृशम्?

विहिता[८]कृता कलङ्ककला चन्द्रकलङ्कशोभा- सादृश्यं येन तत्। कीदृशे ? विश्रमितो विश्रामं प्रापित: श्रमशीकरोऽम्बुकणो यत्र तादृशे। ''ललाटमलिकं गोधि:'' **इत्यमर:** (२.६.१२)। ''मृगनाभिर्मृगमद: कस्तूरी गन्धशेखर:'' इति हारावली (१०३)। ''वलितं निर्मितं युक्ते'' इति यादव:। ''शीकरोऽम्बुकण: स्मृत:'' **इत्यमर:** (१.३.११)।[९] ''रोहिणीशो निशानाथो रजनीकर'' इति **हलायुध:** [१०]।।५।।

१.कलितं-च.२.कलितकलङ्कमलं कमलानन विश्रमितश्रमजशीकरे-च.३.सजातीय-क.४.नास्ति-क.ल.म.५.प्रीत्युत्पादकम्-क.क्रीडाजनकम्-ल.म.६.सल्ललितं-ग.७.नास्ति-अ.ब.८.नास्ति-अ.ब.ग.९.त:१०.पर्यन्तं नास्ति-अ.ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।५।। मृगेति। [२]हे कमलानन कृष्ण अलिकरजनीकरे ललाटचन्द्रे तिलकं कुरु। कीदृशं तिलकम्? मृगमदरसेन वलितं निर्मितम्। अत एव ललितं मनोहरम्। पुन: कीदृशम्? विहिता [३] कृता कलङ्कस्य कला षोडशभागो यत्र।[४] अथ वा कला शोभा [५] यत्र। द्वितीयाचन्द्रप्रायं तिलकं कुर्वित्यर्थ:। किम्भूते अलिकरजनीकरे ? विश्रमिता उपशान्ता: श्रमशीकरा: प्रयासजलकणा यत्र। एतेन चन्द्रोऽपि प्रकट लाञ्छनच्छ-विर्दृश्यते।।५।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।५।। मृगमदेति। विश्रमिता: विरमिता: श्रमजलानां स्वेदानां शीकरा: अम्बुकणा: यस्मिन् तस्मिन्। अलिकं भालमेव रजनीकर: तस्मिन्। मृगमदरस: कस्तूरिकापङ्क: तेन कलितं संवलितं ललितं सुन्दरं तिलकं कुरु। स्वेदक्षालितफाले तिलकं कुर्विति भाव:। अर्धचन्द्राकारेऽपि कलङ्कतुल्यत्वमाश्चर्यकरम्।।५।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।५।। मृगमदेति। हे कमलानन! मम अलिकरजनीकरे ललाटचन्द्रे मृगमदरसवलितं कस्तूरीपङ्करचितं तिलकं कुर्विति वाक्यार्थ:। अलिकमेव रजनीकर इति विग्रह:। ''ललाटमलिकं गोधि:'' **इत्यमर:**। किंविधम्? विजितेति। विजिता कलङ्ककला येनेति विग्रह:। अत्र ललाटं चन्द्रत्वेन मृगमदतिलकं कलङ्कत्वेन निरूपितम्। अलिकरजनीकरे किंविधे ? विश्रमितेति। विश्रमिता: श्रान्ता: शोषं गता: श्रमशी(सी)करा: घर्मजलकणा: यत्रेति विग्रह:। ततश्च तिलकरचनासौकर्यं प्रतिपादितं भवति।।५।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।५।। हे कमलानन! मम ललाट चन्द्रे मृगमदरसेन वलितं तिलकं ललितं यथा स्यात् तथा कुरु। कीदृशं ? कृता कलङ्कस्यकला अंशे येन् तत्। ललाटस्य बालचन्द्रत्वेन

मृगमदतिलकस्य कलङ्ककलात्वेन निरूपितम्। कीदृशे ? विश्रमिता अपगता अम्वुकणा यतः तस्मिन्इति। तान् अपनीय तिलकं कुरु इत्यर्थः।।५।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।५।। मृगमदेन। हे कमलानन! भावानुबन्धिमन्दस्मितविकसद्वदन। अलिकरजनिकरे। ललाटबालचन्द्रे मृगमदरसवलितं कस्तूरीद्रवघटितं ललितमतिसुन्दरं तिलकं कुरु। विहिता, कृता कलङ्कस्य कला शोभा येन तादृशम्। ललाटस्य बालचन्द्रत्वेन रुपणात् कस्तूरीतिलकस्य कस्तूरीत्वेन रूपणम्। कीदृशे। विश्रमिता निवृत्तोद्गमाः श्रमशीकराः स्वेदाम्बुकणा यत्र तादृशे। हिमजलाद्रीकृतसूक्ष्मवसनेनापसारितघर्माम्बुलेशमलिकं विधाय मनोहरकस्तूरीतिलकाढ्यं कुर्वित्यर्थः।।५।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।५।। मृगमदेति; हे कमलानन पद्मनेत्र! मम अलिकरजनीकरे अलिकं ललाटम्। रजनीकरे चन्द्रकिरणे मम अष्टमीचन्द्र इव ललाटे मृगमदतिलकेन कस्तूरीतिलकेन कलंकदानं कुरु। तदुचितमिति ध्वनिः। किम्भूते अलिके ? विश्रमिते श्रमशीकरे विश्रमिते विश्रामं प्रापितो यः श्रमः रतिद्वन्द्वजनितं घर्मजलं शीकरोऽम्बुकणो यत्र तादृशेऽलिके। अत्र विश्रमित इत्यनेन व्यजनवातादिभिस्तनुभूतानां प्रस्वेदविन्दुनामतिशयिततया हिमकणत्वमाक्षिप्यते। तेन चालिकस्य चन्द्रत्वरूपणं साङ्गं निर्वहतीति ध्वनितम्। ललाटमलिकं गोधिः इत्यमरः।।५।।

**६—मम रुचिरे चिकुरे कुरु मानद मानसजध्वजचामरे।**
**रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे।। निज०।।६।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।६।। मानं ददातीत्यतोऽनुपसर्गकः। हे मानद! मम रतिगलिते रुचिरे चिरे चिकुरे केशेकुसुमानि कुर्विति वाक्यार्थः। कीदृशे, मनसिजध्वजचामरे, पुनः कीदृशे, शिखण्ड विखण्डकडामरे शिखण्ड विखण्डको डामरो विप्लवो यस्येति विग्रहः। ''पिच्छं बर्हं शिखण्डोऽपि डिम्बे ड़ामर विप्लवौ **इत्यमरः**।'' डमर एव डामर इति स्वाभाविके ण प्रत्ययः।।६।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।६।। अपि च, मम रुचिर इति। हे मानद मानिनीमानखण्डन! अथ च हे पूजाप्रद! मम चिकुरे कुसुमानि कुरु। किंभूते चिकुरे ? रुचिरे रुचिप्रदे। पुनः किंभूते ? मनसिजः

कामस्तस्य ध्वजः तत्र चामरवच्चामरस्तास्मन्। पुनः किंभूते ? रत्या संभोगेन लुलिते विशकले। पुनः किंभुते ? मनोहरे। पुनः किंभुते ? शिखण्डिनो मयूरस्य शिखण्डकं बर्हभारः तस्य डामरे भयदे, जेतरीत्यर्थः। रासकच्छन्दः।।६।।

## (३) जगद्धरकृत-सारदीपिका

।।६।। ममेति हे मानद! मानखण्डन मानदायक वा मम रुचिरे सुन्दरे चिकुरे जात्येकवचनं कुसुमानि पुष्पाणि कुरु रचत्येर्थः कीदृशे चिकुरे मनसिजस्य कामस्य ध्वजचामरतुल्ये पुनः कीदृशे रतिगलिते सुरतसमये मुक्तबन्धने पुनः कीदृशे ललिते शृङ्गारचेष्टया युक्ते पुनः कीदृशे शिखण्डिनो मयूरस्य शिखण्डस्येव पिच्छस्य वाटडामर आटपोयस्य आटपो आडम्बरमीत्यर्थः।।६।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।६।। ममेति। हे मानद! मादृशप्रपन्ननायिकाभिमानप्रद! मम रुचिरे मनोहरे चिकुरे केशे कुसुमानि कुरु रचय। कीदृशे चिकुरे ? ललिते मनोहरे मनसिजस्य कामस्य ध्वजचामरे पताकाचिह्नभूते चामरे। पुनः कीदृशे ? रतिगलिते रतौ सुरतसमये गलिते मुक्तबन्धने। पुनः कीदृशे ? शिखण्डिनां मयूराणां शिखण्डस्य पिच्छस्येव डामरे तादृशे।।६।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।६।। घनेति। मानं द्यति खण्डयतीति मानदः खण्डितानायिकामानभञ्जकेत्यर्थः। अथवा मानं पूजां ददातीति मानदः वासकसज्जानायिका सम्मानकारिन्नित्यर्थः। हे श्रीकृष्ण! घनरुचिरे नीलमेघसंकाशे मनसिजस्य मन्मथस्य ध्वजः अङ्गस्थानीया या अङ्गयष्टिः तत् चामर इव चामरे यथा मन्मथध्वजे युवतिनिकर विजयालंभूते चामरं भासते तथा मन्मथविजयसाधनभूतगात्रध्वजे तद् विजयगमकत्वेन नीलचामरमिव शोभमानमित्यर्थः। किञ्च रतिगलिते सुरताटोपे ललिते ललितः मनोहरो धास तेजः शोभेत्यर्थः रा दाने इत्यस्माद्धातोरनुपसर्गे क इति क प्रत्ययः एतादृशे चिकुरे केशपाशे कुसुमानि नानाविधकुसुमानि कुरु निधेहि। अतः कुसुमानि निक्षिप्य केशपाशं रचयेत्यर्थः।।६।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।६।।अपि किं निजगादेत्याकांक्षायामाह, हे मानद मानखण्डक! यद्वा चित्तोन्नतिदायक! मम चिकुरे केशे कुसुमानि कुरु। चिकुर इत्यत्रैकवचनं समुदायाभिप्रायेण। कीदृशे चिकुरे ? रुचिरे मनोहरे। पुनः कीदृशे ? रतौ सुरते गलिते रताद्विस्तृते, अतएव

ललिते मनोहरे। अत्र रुचिर इत्यनेन पूर्वं स्वाभाविकसौन्दर्यमुक्तम्। ललित इत्यनेनावस्थाविशेषसौन्दर्यमुक्तमिति न पौनरुक्त्यम्। पुनः कीदृशे ? शिखण्डी मयूरः, तस्य शिखण्डकं पुच्छम्, तस्य डामरम् औद्धत्यं स्थौल्यम्वा यत्र स तथा तस्मिन्। अत्र शिखण्डिपदोपादानं तच्छरीरसम्बन्धकृतस्नानादिदोषव्युदाससूचनार्थमित्यवधेयम्। 'डामरो बालके स्थौल्य' इति **विश्वः**।।६।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।६।। (ममेति)। किञ्च हे मानद मानखण्डन मानप्रदायक इति वा। मम रुचिरे [६] सुन्दरे चिकुरे केशपाशे कुसुमानि कुरु रचय। [७] मनसिजस्य कामस्य ध्वजचामरतुल्ये। कीदृशे ? रतिगलिते सुरतसमये [८] बन्धनान्मुक्ते। (ललिते मनोहरे) शृङ्गारचेष्टया सुन्दरे वा। कीदृशे ? शिखण्डिनो मयूरस्य शिखण्डकाश्चन्द्र-कास्त एव डामराः [९] आटोप आडम्बरो वा [१०] चाकचिक्यानि वा यस्य तादृशे। "डामरो [११]वाद्यभेदे स्यादाटोपे शिखिनामपि" इति **भोजे**।।६।।

१.मनोध्वजचामरे-च.मानसध्वजचामरे-इ.फ.ह.ज.२,३.नास्ति-ड.४.वा-ड.५.यस्य-ड.६.नास्ति-अ.ब.इ.फ.ज. ७.मानसजस्य-इ.फ.ह.ज.८.बन्धनमुक्त-इ.फ.ग.ह.ज.९.आटोपा आडम्बरा वा-फ.ग.ह.ज.आटोपा आडम्बरा-इ.१०.काकविक्यानि-अ.ब.११.बन्धभेदे-फ.ज.

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।६।। ममेति। हे मानद [१] मानदायक मम रुचिरे सुन्दरे चिकुरे केशे कुसुमानि पुष्पाणि कुरु ; रचयेत्यर्थः। कीदृशे चिकुरे ? [२] मानसजस्य कामस्य ध्वजचामरतुल्ये। पुनः कीदृशे[३]चिकुरे ? [४]रतिगलिते सुरतसमये मुक्तबन्धने। ललिते शृङ्गारचेष्टायुक्ते। पुनः कीदृशे[५] ? शिखण्डिशिखण्डकस्येव [६] मयूरपिच्छस्येव [७] डामर आटोपो यस्य। आटोप आडम्बरमिति यावत्।।६।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।६।। ममेति। मामं द्यति खण्डयतीति मानदः सान्मानदो वा। मनोध्वजस्य त्रिलोकविजयार्थस्थापितस्य चामरे वीरुदप्रदर्शके रुचिरे मम चिकुरे केशपाशे ललिते शिखण्डिनां मयूराणां शिखण्डकः चन्द्रको ज्वलितबर्हः तस्य डामरः उत्तंसः तस्मिन्। रतौ सुरते गलिते सति च्युते सति कुसुमानि गुम्फयेति शेषः। उत्तरवाक्यस्थवासयेति क्रि (य) यान्वयः। मनसिजध्वजेति पाठे मात्राधिक्यं भवति यतिगणभङ्गोऽपि भवति।।६।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।६।। ममेति। मानं ददातीति आ(अ)तोऽनुपसर्गे कः (इति) कप्रत्ययः। हे मानद! मम रतिगलिते रुचिरे चिकुरे[२३५] कुसुमानि कुर्विति वाक्यार्थः। किंविधे ? मिलित इति। मिलिते संयते त्वयेति शेषः। पुनः किंविधे ? मानसजध्वजचामर इति। शिखण्डविखण्डकोपप्लवस्वरूपे। "पिच्छं बर्हं शिखण्डोऽपि", "डिमे डमरविप्लवौ" **इत्यमरः**। डमर एव डामरः इति स्वार्थे अण्प्रत्ययः। किं वा शिखण्डविखण्डको डामरः शोभाविशेषो यस्येति विग्रहः।।६।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।६।। हे मानद! मम केशे कुसुमानि कुरु। कीदृशे ? रतिगलिते सम्भोगावेगेन विकीर्णे तथा ललिते यतः स्वरूपतः सुन्दरे तथा मनसिजस्य यो ध्वजस्तस्य चामरे किं च मयूरपुच्छस्येव डामर आटोपो यस्य तस्मिन् मनसिज ध्वजादाटोपनादिकमपि तदुपयोग्यमेवेत्यर्थः।।६।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।६।। हे मानद! विचित्रवेषाद्यङ्गपरिष्कारेण मत्सौभाग्योन्नतिम्पादक। रतिगलिते, सम्भोगकालीनावेगवशविलुलिते, तथा सत्यपि रुचिरे, मनोहरे, अत एव मानस-जध्वजचामरे क्रीडोत्साहसूचकतया मदनकेतन- चामररूपे। केशस्य चामरत्वारोपणेन गात्रयष्टेर्ध्वजस्थानीयत्वमायातम्। अतो मन्मथजयसूचककनककेतुसंघटित-नीलचामरवत् भासमाने इत्यर्थः। किं च शिखण्डस्य, मयूरपिच्छभारस्य विखण्डको विशेषेण तिरस्कारी, डामर आडम्बरो यस्य तादृशे। अनेन केशभारस्य सुदीर्घत्वं बहलत्वं श्यामलत्वं चाकचैक्यं च सूचितम्। मिलिते, त्वया संश्लिष्टे, कवरीतया बद्धे इत्यर्थः। ईदृशे मम चिकुरे कुसुमानि, मल्लिकादिप्रसूनानि कुरु। प्रसाधये-त्यर्थः।।६।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।६।। ममरुचिरेति;हे मानद! मानिनीमानखण्डन! मम चिकुरे केशपाशे कुसुमानि कुरु। किंभूते चिकुरे रुचिरे सुन्दरवेणीभूते रुचिप्रदे। पुनः किंभूते ? मनसिजः कामस्तस्य ध्वजः पताकाविशेषः। तत् चामरो यस्मिन्। चामरवच्चामरस्तस्मिं। पुनः किंभूते। तस्याः सम्भोगेन ललिते विशकलिते। पुनः मनोहरे। पुनः शिखण्डिनो मयूरस्य शिखण्डक वर्हभारः तस्य डामरे भयदे जेतरित्यर्थः। रासकच्छन्दः। अत्र त्वं च सर्वेषां मानरक्षाकारीन्। अतः मम केशपाशस्य समीकरणं कुरु।।६।।

**७-सरसघने जघने मम शम्बरदारणवारणकन्दरे।**
**मणिरशनावसनाभरणानि शुभाशय वासय सुन्दरे।। निज०।।७।।**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७।। हे शुभाशय! मम जघने मणिरसनाभरणानि वासयेति योजना, कीदृशे रसघने, मम शम्बरदारणवारणकन्दरे सरसं च तत् जघनं चेति विग्रह: पुन: कीदृशे, शम्बरेत्यादि शम्बरदारण: काम: स एव वारणो हस्ती तस्य कन्दरे दरीरूपे।।७।।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७।। अपि च, सरसघन इति। हे शुभाशय शोभनहृदय! अथ शुभ आ सामस्त्येन शय: करो यस्य। मणिरशनादीनां करसाध्यत्वादयमर्थो युक्त:। मम जघने श्रोण्यां मणिमया रशना च वसनानि च आभरणानि च वासय निवेशय। किंविशिष्टे जघने? सरसं च तद्घनं च स्निग्धसान्द्रे। पुन: किंविशिष्टे? शम्बरदारण: काम: स वारण इव तस्य निवासार्थकन्दर इव कन्दरे। पुन: कीदृशे? सुन्दरे मनोहरे। गजगतीत्यादि। अनुकूलो नायक:। प्रगल्भा नायिका। संभोग: शृङ्गार:।।७।।

## (३) जगद्धरकृत-सारदीपिका

।।७।। सरसेति हे शुभाशय महोदारचित्तं त्वं मम सुन्दरे जघने मणिरसनामणियुक्त-घण्टिकावसनानि वस्त्राणि आभरणानि अलङ्करणानि वासय परिधानं कारय कीदृशे जघने सरस: कामजनक: घनो निबिडश्च पश्चात् कर्मधारय: पुन: कीदृशे शंबरदारण: काम: स एव वारण: कुञ्जरस्तस्य कन्दरे वासस्थाने।।७।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७।। सरसेति। हे शुभाशय शोभनहृदय! मम सुन्दरे जघने मणिमयी या रशना क्षुद्रघण्टिका वसनं वस्त्रमाभरणान्यलंकरणानि च वासय परिधेहि। कीदृशे जघने? सरसघने सरसे शृङ्गाररससहिते घने निबिडे। पुन: कीदृशे? शम्बरं शम्बरनामानं दैत्यं दारयतीति शम्बरदारण: काम: स एव वारणो हस्ती; महाबलत्वात्। तस्य कन्दरे। अपरोऽपि हस्ती पर्वतकन्दरायां तिष्ठतीति भाव:। 'कुञ्जरो वारण: करी' **इत्यमर**:। 'दरी तु कन्दरो वा स्त्री' इति च। वासयेति च 'वस आच्छादने' ण्यन्त:।।७।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७।। सरसेति। हे शुभाशय! मङ्गलहृदय! हे सरसरसिकाग्रेसर! अथवा रसेन सम्भोगाभिलाषेण सह वर्त्तत इति सरस:। घने पृथुले शम्बरो नाम कश्चिद्दानवस्तस्य

दारण: मर्दक: ''शम्बरारिर्मनसिज **इत्यमर**:।'' स एव वारण: तस्य कन्दरे आवासभूत-गुहारूपे अथवा शम्बरदारणवारणस्य कन्दरा मन्दिरं यत्रेति तादृशमदनमन्दिराह्वङ्कत इत्यर्थ:। अतएव सुन्दरे कामुकचित्ताकर्षके मम जघने नितम्बभागेकदेशे मणिरसना-वसनाभरणानि रत्नखचित काञ्ची दुकूलालङ्करणानि। तत्राभरणशब्देन किङ्किण्यादयो ग्राह्या:, वासय निधेहि अनेन प्रकारेण निजगाद इत्यन्वय:।।७।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७।। अपि किं जगादेत्याकांक्षायामाह, हे शुभाशय! सुन्दरे मम जघने मणियुक्तवसनशोभनाभरणानि वासय नियोजय। अत्र शोभन: स्वच्छ आशयोऽन्त:करणं यस्य शुभाशय इति व्युत्पत्त्या शुभाशयपदेन भवानिदानीं कैतवं न करिष्यतीति जघनस्पर्शे स्वाच्छन्द्यबीजं दर्शितम्। किम्भूते जघने? सरसजघने शरेण श्रृङ्गारेण सह वर्तत इति सरस:, स चासौ घनो निविडश्चेति स तथा तस्मिन्। पुन: किम्भूते? सम्बरो दैत्य:, तं दारयतीति सम्बरदारण: काम:, स एव वारणो हस्ती, तस्य कन्दरे निवासगह्वरे। अन्योऽपि करी कन्दर एव तिष्ठतीत्युचितत्वात्*। प्रकृते तु यथारूपणमित्यवधेयम्।।७।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७।। (सरसेति।) [८] किञ्च हे शुभाशय शुभान्त:करण मम सुन्दरे जघने नितम्बे मणिरशना मणिखचितक्षुद्रघण्टिकावसनाभरणानि वासय परिधानं कारय। कीदृशे? सरसे शृङ्गारादिरससहिते घने निबिडे च। कर्मधारय: [९] समास:। पुन: कीदृशे? [१०] शम्बरं [११] दारयति (इति) शम्बरदारण: काम: [१२] स [१३] एव [१४] वारण: कुञ्जरस्यस्य कन्दरे निवासे। ''कुन्जरो वारण: करी'' **इत्यमर**: (२.८.३४) ।।७।।

१.मानखण्डन मानदायकेति वा-क.ल.म. २.मनसिजस्य-क.ल.म. ३.नास्ति-क.ल.म. ४.त:५.पर्यन्तं नास्ति-ड. ६.नास्ति-ड. ७.डम्बर:-ड.नास्ति-ल. ८,९,१०,११.नास्ति-इ.फ.ग.ह.ज. १२,१३,१४.नास्ति-अ.ब.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७।। सरसेति। हे शुभाशय महोदारचित्त त्वं मम सुन्दरे जघने [२] मणिरशना मणियुक्तरशना [३] क्षुद्रघण्टिका [४] वसनानि वस्त्राणि [५]आभरणानि वासय परिधानं कारय। कीदृशे जघने? सरस: कामजनको घनो निबिडश्च पश्चात्कर्मधारय:। पुन: कीदृशे? [६] शम्बरदारण: काम: स एव वारण: कुञ्जरस्तस्य कन्दरे वासस्थाने।।७।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।७।। सरसेति। हे शुभाशय शुभ: स्वच्छ: आशय: अन्त:करणं यस्य तत्सम्बुद्धि। सुन्दरे। शम्बरं दारयतीति नाशयतीति दारण: नाशक: मदन: स एव वारण: शीत: तस्य कन्दर: बिलस्थलमित्यर्थ:। तस्मिन्। कारण कन्दरेति पाठे शम्बरदारण एव दारणक: स्वार्थे क:। तस्य आसमन्तात् रणकन्दर: युद्धभूमि: तस्मिन्। सरस: अनुरागेण लावण्यरूपेण वा रसेन सहितं च तत् घनं च तस्मिन् मम जघने मणिरशनाश्चनाश्च वसनं च आभरणं च तानि काञ्चीदुकूलभूषणानि वासय। अत्र जघने कन्दरत्वारो-पाद्रूपकम्।।७।।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७।। सरसेति। हे शुभाशय! मम जघने मणिरसनावासनाभरणानि वासय नियोजयेति योजना। किंविधे ? सरसघनेति। सरसञ्च तत् घनं कठिनं चेति विग्रह:। पुन: किंविधे ? सुन्दर इति। पुन: किंविधे ? शम्बरदारणवारणकन्दर इति। शम्बरदारण: काम:, स एव वारणो हस्ती अनिवार्यत्वात्। तस्य कन्दरे दरीरूपे सदा तदाश्रयत्वादिति।।७।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७।। तथा हे शुभाशय! शुद्धान्त:करणस्यैव क्रियासिद्धे तथा शब्द: प्रयुक्त:। मम जघने मणिरसनाभरणानि परिधापय। यत: सुन्दरे अधुना एतत् करणं युक्तमित्यर्थ:। तथा सरसघने सरसं च तत् घनं चेति तस्मिन्। अपिच काम एव हस्ती तस्य कन्दररूपे।।७।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७।। हे शुभाशय! मद्विषयप्रणयशुद्धान्त:करण। सरसे, शृङ्गाररसाधारे, किं वा त्वत्करस्पर्शाभिलाषहिते घने निविडे च। किं च शम्बरदारण:, काम: स एव वारणो, मत्तहस्ती, तस्य कन्दरे, निवासभूतदरीरूपे, उन्मदमदननित्यसन्निधानव्यञ्जके इत्यर्थ:। अत एव सुन्दरे, त्वत्स्पृहाविशेषसम्पादके इत्यर्थ:। ईदृशे मम जघने, मणिरसना, रत्नमेखलावसनं, परिधानवस्त्रमाभरणं किङ्किणीमाला, एतानि वासय। अनवस्थित-सन्निवेशानि यथावस्थानेन सज्जीकुरु इत्यर्थ:।।७।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७।। सरसघने जघनेति; मम जघने मणिमय रसनाभरणानि वासय। हे प्रियतम! मम सरसघने रसपूर्णे सान्द्रे जघने कन्दर्प: क्रीडास्थले श्रोण्यां मणिमये रसनाद्वारा वसति। अत: हे प्रिय! मम आभरणानि सज्जीकुरु। सम्भरदारणसम्वरासुरस्य हन्ता। सम्वरारिमनसिज पुष्पधन्वा रतिपतिरित्यमर:। अत: कन्दर्प हस्ती इव वलवान् स

खलु हस्ती पर्वतगुहायां वर्तने तत्रैव जघनगुहायां कन्दर्पहस्ती वर्तते। सा गुहा जघनकन्दरं मणिमयरसना कटिमेखलया त्वया आछादनीया। त्वं मम शोभनां कन्दर्पवासभूमिं जघन गह्वरं मणिमयालंकरणं कुरु आछादय इति। अनुकूलनायकः। प्रगल्भानायिका। संभोगशृङ्गारः।।७।।

**८-श्रीजयदेववचसि रुचिरे हृदयं सदयं कुरु मण्डने।**
**हरिचरणस्मरणामृतकृतकलिकलुषभवज्वरखण्डने।। निज०।।८।।**

### (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।८।।श्रीजयदेववचसि हृदयं कुर्वीति योजना। कीदृशे जयदेवकवेर्जयं ददातीति कृत्वा, पुनः कीदृशे, मण्ड़नेन अलङ्कारररूपे, पुनः कीदृशे, हरिचरण स्मरणामृतकृत-कलिकलुषज्वरखण्ड़ने, हरिचरणस्मरणमेवामृतं तेन कृतं कलिकलुषज्वरखण्डनं येनेति विग्रहः।।८।।

### (२) राणाकुम्भकृत-रसिकप्रिया

।।८।।अपि च, श्रीजयदेवेति। हे यदुनन्दन! मण्डने इति मण्डननिमित्तं हृदयं सदयं कुरु, दयापरो भूत्वा मण्डनानि विधेहीत्यर्थः। किंलक्षणे मण्डने? रुचिरे जयदेवपत्नीसकाशादुत्कर्षप्रदे। पुनः किंलक्षणे? श्रीजयदेववचसि विषयभूते। अथवा, 'च' शब्दमध्याहृत्य मण्डने जयदेववचसि च हृदयं सदयं कुर्विति व्याख्येयम्। अन्यानि पदानि उभयविशेषणत्वेन योजनीयानि। किंलक्षणे वचसि? सहृदयालंकरणे। जयदेववचसि किंविशिष्टे? हरिचरणस्मरणमेवामृतं तत्र कृतो यः कलिकलुषज्वरो रोषरूपसंतापः स एव ज्वरः तस्य खण्डने। हरिचरणस्मरणामृतेन पापखण्डने वचसीत्यर्थः। अथवा, हरिचरणस्मरणामृतेन कृतं पापस्य खण्डनं येन वचसा तस्मिंस्तदृशे।।८।।

### (३) जगद्धरकृत-सारदीपिका

।।८।।श्रीजयदेवेति हे भक्तजन! त्वं मण्डने अलङ्कारभूते शुभदे कल्याणप्रदे श्रीजयदेव वचसि गीतरुपे हृदयं मनः सदय दयायुक्तं तत्परं कुर्वित्यर्थः। कीदृशे वचसि हरिचरणस्मरणामृतेन कृतं कलिकलुषज्वरस्य कलिकृतपापरूपज्वरस्य खण्डनं नाशो येन।।८।।

### (४) शंकरमिश्रकृत-रसमञ्जरी

।।८।। श्रीजयदेवेति। हे देव कृष्ण! जय सर्वोत्कर्षेण वर्तस्व। अथ जयदेवस्य कवेर्वचसि वाक्ये सदयं दयासहितं यथा स्यादेवं हृदयं कुरु। कीदृशे मण्डने?

जयदेवस्यालंकारजनके। पुनः कीदृशे ? हरिचरणस्मरणमेव यदमृतं तेन निर्मितं कलिकलुषज्वरस्य कलियुगसंचितपापरूपज्वरस्य खण्डनं नाशमं येन तादृशे।।८।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।८।। श्री जयदेवेति। हे देव! मण्ड़ने श्रवणाननकुहरे हरिचरणस्मरणानन्दकर-हरिचरणस्मरणामृतेन करणेन कलिकलुषज्वरसंज्वरस्य पापाख्यज्वरसन्तापस्य खण्डने भेदके हरिचरणस्मरणप्रदातृत्वेन सर्वपातकनिवर्त्तक इत्यर्थ:। अतएव रुचिरे कमनीये एतादृशे श्रीजयदेववचने, जयदेवस्य गीतरूपवाक्ये हृदयं तवान्तः करणं सदयं दयासहितं कुरु त्वत्समर्पितं तत्सादरमाकर्णयेत्यर्थ:।।८।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।८।। कीर्त्त्यनुवृत्त्यर्थ स्वनामनिबन्धनपूर्वकं गीतमुपसंहरति, हे श्रोत: ! श्रीजयदेववचसि हृदयं कुरु। वचसि कथम्भूते ? जयदे जयं ददातीति आतोऽनुपसर्गात् ड:, तस्मिन्। पुन: कीदृशे ? मण्डलेऽर्थात् श्रोतृणाम्। पुन: कीदृशे ? हरेश्चरणयो: स्मरणमनुचिन्तनम्, तदेवामृतम्, तेन कृतं कलुषज्वरसंज्वरस्य प्रत्ययात्मकज्वरजनितसन्तापस्य खण्डनं येन तस्मिन्। 'सन्ताप: संज्वर: समावि'त्यमर:।।८।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।८।। (श्रीजयदेवेति।) हे रसिकजन [७]श्रीजयदेववचसि वचने दयासहितं[८]सदयं हृदयं कुरु। कीदृशे ? [९] जयदे विश्वजयप्रदे। कीदृशे ? मण्डने [१०] विश्वालङ्काररभूते। पुन: कीदृशे ? हरिचरणस्मरणामृतेन कृतं कलिकलुष [११]ज्वरस्य खण्डनं नाशो येन तादृशे। [१२] यद्वा जयदेवेति पाठे जयतीति जय: दीव्यदी(ती) ति देव:। हे जयदेव [१३] श्रीकृष्णचन्द्र श्रीजयदेववचसि स्वहृदयं सदयं कुरु। तद्वचांसि मण्डयेत्यर्थ:। [१] पुन: कीदृशे जयदेववचसि ? मण्डने [२] श्रीराधालङ्कारसम्पादके। अन्यत् [३] समानम्।।८।।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायां वनमालिसञ्जीवन्यां गीतगोविन्दटीकायां चतुर्विंश: प्रबन्ध:।

१.रुचिरे-नि.सा.शुभदे-ड.नास्ति-च.२.मणिरशनानि मणियुक्तरशनानि-ड. ३,४,५.नास्ति-ड.६.शम्बरदारणवारणकन्दरे शम्बरदारणवारण: कामकुञ्जर:-क. ७.श्रीजयदेववचने-ग.८.नास्ति-इ.फ.ग.ह.ज.९.जयदेवे विश्वदे-फ.जयदेवे विश्वजयप्रदे-ज. १०.अलङ्कारभूते-फ.अलङ्कारभूषिते-ज.११.ज्वरखण्डनं-ग.१२.नास्ति-अ.ब.ग.१३.कृष्ण-इ.फ.ह.ज.श्रीनन्दसूनो-ग.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।८।। श्रीजयदेवेति। हे भक्तजन त्वं मण्डने अलङ्कारभूते शुभदे कल्याणप्रदे श्रीजयदेववचसि गीतरूपे हृदयं मन: सदयं दयायुक्तं[४] तत्परं कुर्वित्यर्थ:। [५]कथम्भूते

वचसि ? हरिचरणस्मरणामृतेन[६] कृष्णपादचिन्तनामृतेन[७]कृतं कलिकलुषज्वरस्य कलिकृतपापरूपज्वरस्य खण्डनं नाशो येन।।१३।।

[८]इति श्रीगीतगोविन्दव्याख्यायां नारायणपण्डितविरचितायां चतुर्विंशः प्रबन्धः।।८।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।८।।श्रीजयदेवेति। हरेः विष्णोः चरणयोः स्मरणमेव अमृतं औषधरूपं तेन कृतं कलिकलुषमेव ज्वरः तस्य खण्डने नाशके। अत एव सज्जनानां मण्डने भूषणे प्रतिष्ठाका(क)रे श्रीजयदेवस्य वचसि हृदयं करुणायुक्तं कुरु। श्रोतारं प्रति वा भगवन्तं प्रति कविवचनमिदम्।।१६।।

[९]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां चतुर्विंशः प्रबन्धः।।८।।

१.कीदृशे ? मण्डने-इ.फ.ग.ह.ज. २.श्रीवृषभानुसुतालङ्कारसम्पादके-ग. ३.समानमित्यर्थः-अ.ब. ४.यत्परं-ड. ५.कीदृशे वचसि-क.ल.म. ६.नास्ति-क.ल.म. ७.सुकृतं-ल.म. ८.इति श्री गीतगोविन्दस्य टीकायां नारायणपण्डितकृतायां चतुर्विंशः प्रबन्ध-ड.नास्ति-क.ल.म. ९.नास्तीयं कुष्पिका-च.

## (१०) धनन्जय धरणीदेवकृत सर्वाङ्गसुन्दरी (नूतन)

।।८।।श्रीजयेति। हे वैष्णवजन! श्रीजयदेववचसि हृदयं सदयं कुर्विति योजना। किंविधे ? जयद इति। जयं ददातीति कृत्वा। पुनः किंविधे ? मण्डने अलङ्काररूपे। पुनः किंविधे ? हरिचरणेत्यादि। हरिचरणस्मरणमेव अमृतं पावनत्वात्, तेन कृतं कलुषज्वरस्य कलुषमेव ज्वरस्तापकरत्वात्, तस्य संज्वरखण्डनं सन्तापनाशनं येनेति विग्रहः।।८।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।८।।श्रीजयदेव वचसि सदयं यथा स्यात् तथा हृदयं कुरु। स्निग्धान्तःकरणस्यैव एतत्श्रवणयोग्यत्वादित्यर्थः। यतो जयं श्रीकृष्णं ददातीति जयदस्तस्मिन्। तत्र हेतुः, हरिचरणस्मरणमेव अमृतं तेन कृतं कलिकलुषज्वरेण यः सन्तापस्तस्य खण्डनं येन तस्मिन् अतएव मण्डने भूषणरूपे।।८।।

## (१२) लक्ष्मणकृत- रसिकरङ्गदा

।।८।। एवमतिरहस्यवर्णनसन्तुष्टः कविः तादृशभावप्रवणचित्तभक्तजनान् प्रत्युपदिशति, श्रीति, अत्र कुर्वीति क्रियासामर्थ्यात् हे भक्तजनसंघ! इत्याक्षेप्तव्यम्। श्रीजयदेवस्य वचसि परमरहस्यलीलावर्णनरूपेऽस्मिन् गीते प्रबन्धे वा हृदयं सदयं यथा स्यात् तथा कुरु। स्निग्धान्तःकरणस्यैव तच्छ्रवणमननादियोग्यत्वादिति भावः। अत्र हेतुः। यतो जयदे, जयः श्रीकृष्णस्तं ददाति प्रापयतीति जयदं, तस्मिन्। अथवा

'चेत: प्राङ्गणसीमनी विजयते, सर्वेन्द्रियाणां कृति' इति वदनायासेन सकलेन्द्रिय-जयदातरीत्यर्थ:। अत्रापि हेतु:। हरिचरणस्मरणमेवामृतं तेन कृतं, कलुषज्वरस्य भक्तिप्रदिबन्धकीभूतपापव्याधे: य: संज्वर: सन्तापस्तस्य खण्डनं येन तस्मिन्। अत एव मण्डने, कलुषहारितया शोभाधायके।।८।।

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।८।। श्रीजयदेवेति; श्रीजयदेवस्य स्वसुन्दरवाक्येन हृदयस्य मण्डनं कुरु। येन हरिस्मरणामृतम् अर्थात् हरे स्मरणमेव अमृतं पानायते। अत: सर्वं त्यक्त्वा हरिं भजेत् इति न्यायेन कलिकालस्य कालुष्यं कलंकं तज्जन्यज्वरं खण्डयितुं शामयितुं तदेव हरिनामस्मरणामृतं सेव्यमिति। सहृदयानां स एव काव्यपाठलाभ:।।८।।

**७०-रचय कुचयो: पत्रं चित्रं कुरुष्व कपोलयोर्**
**घटय जघने काञ्चीमञ्च स्रजा कबरीभरम्।**
**कलय वलयश्रेणीं पाणौ पदे कुरु नूपुराव्**
**इति निगदित: प्रित: पीताम्बरोऽपि तथाकरोत्।।७०।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी**

।।७०।। गीतार्थश्लोकसंग्रहमाह। इति एवं प्रकारेण राधाया: निगदित: प्रीतो हरि: तथाऽकरोदिति योजना। इतीति किं हे कृष्ण! कुचयो: पत्रं पत्रावलीं रचय, कपोलयोश्चित्रं तिलकं कुरुष्व। जघने काञ्चीं मेखलां घटय योजयेत्यर्थ:। हे कृष्ण! स्रजा मालया कवरीभरं केशपाशं अञ्च शोभितं कुरु। पाशौ हस्ते वलयश्रेणीं ''श्रेणीरूपयोर्वलयं कङ्कणं कलय कलितं कुरु। पदे चरणे नूपुरौ कुरु खचितं कुरु, एतेन राधा स्वाधीनभर्त्तृका जाता इत्यभिप्रेरितम्। हरिणीनाम वृत्तम्।।७०।।

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।७०।। इदानीमष्टपद्युक्तमेव श्लोकेनावतारयति, रचयेति। पीताम्बर: श्रीकृष्ण इति राधया निगदित: प्रीत: सन्यथा निगदितं तथा सर्वमकरोत्। 'अपि' शब्दसमुच्चितं यद्यत्तदभीष्टं तत्तदकरोदित्यपिशब्दार्थ:। इतीति किम्? 'हे यदुनन्दन' इत्यनुषङ्ग:। कुचयो: पत्र पत्रावल्लीं रचय। अनु च कपोलयोर्मकरिकादि चित्रं रचय। जघने श्रोण्यां काञ्चों मेखलामारोपय। अनु च मुग्धस्रजा मनोहरमालया कबरीभरं कलय बन्धय। अनु च वलयश्रेणीं पाणौ कलय। अनु च पदे मणिमयनूपुरौ कलय । अत्र यथासंख्यमलंकार:। हरिणीवृत्तम्। प्रगल्भा नायिका। तल्लक्षणम् (शृं. ति. १/

४२) 'लब्ध्वा पतिं प्रगल्भा स्यात्समस्तरतकोविदा। आक्रान्तनायका बाढं विराज द्विभ्रमाय था।। स्वामिन्भङ्गुरयालकं सतिलकं भालं विलासिन्कुरु प्राणेश! त्रुटितं पयोधरयुगे हारं पुनर्योजय। इत्युक्त्वा सुरतावसानसुखिता संपूर्णचन्द्राननास्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम्।।' दक्षिणो नायक:। 'यो गौरवं भयं प्रेम दाक्षिण्यं पूर्वयोषिति। न मुञ्चत्यन्यरक्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा' **(शृं.ति.१/२६)**।।७०।।

## (३) जगद्धरकृत-सारदीपिका

।।७०।। रचयेति इति राधया निगदित: उक्त: प्रीत: सन्तुष्ट: पीताम्बरोऽपि तथाऽकरोत् इति किं हे कृष्ण! मम कुचयो: स्तनयोश्चित्रं चित्रविशेषं रचय कपोलयो: पत्रं पत्रावलीं करेण रचय कुरुष्व जघने काञ्चिं क्षुद्रघण्टिकाम् अर्पय स्रजा पुष्पमालया कबरीभारं केशपाशम् अञ्चय पूजय बन्धनं कूर्वित्यर्थ: हस्ते वलयश्रेणीं कङ्कणपङ्क्ति स्थापय पदे चरणयो: नुपूरौ कुरु स्थापय गीतोक्तस्य संक्षेपार्थकथेन न दोष उक्त:।।७०।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७०।। रचयेति। हे कृष्ण! कुचयो: पत्रं मकरिकापत्रं रचय। कपोलयोश्चित्रं चित्रकाख्यं विशेषकं कुरु। अथ जघने काञ्चीं त्रुटितां क्षुदघण्टिकां घटय अर्पय। कबरीभरे केशसमूहे स्रजं माल्यमञ्चय प्रापय। बलयश्रेणीं कङ्कणपङ्क्तिं पाणौ हस्ता मलय अर्पय। पदे चरणे नूपुरौ मञ्जीरौ कुरु। इत्यनेन प्रकारेण राधया निगदित उक्त: सन् पीताम्बर: कृष्णोऽपि तथैवाकरोत्। यथा यथा राधोक्तवती तथैवाकरोदित्यर्थ:।।७०।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७०।। गीतोपदिष्टमुपदेष्टव्यं चार्थमवगमकरणाय श्लोकेन संगृह्योपदिशति रचयति। हे कृष्ण! कुचयो: पत्रं मकरिकापत्रं रचय, कपोलयोश्चित्रं कस्तूरिकयालेख्यकर्म कुरुष्व, जघने नितम्बे काञ्ची रशनां घटय धेहि। कवरीभरे कचभारे रुजं पुष्पमालिकां अञ्च पूजय स्नजा कबरीभारमलङ्कुर्वित्यर्थ:। पाणौ पाण्यो: एकत्वमविवक्षितं वलयश्रेणीं ककंणजालं कलय आमुञ्च आरोपयेति यावत्। पदे चरणयुगले नूपुरौ पादकटके कुरु निक्षिपेत्यर्थ:। इति पूर्वोक्तप्रकारेण निगदित उक्त: अतएव प्रीत: अनुरूप कार्य्यं मां नियुक्तवतीति सन्तुष्टचित्त: पीताम्बर: श्रीकृष्णोऽपि तथा उपदिष्टप्रकारेणाकरोत्। कुचादिषु पत्ररचनादिकार्य्यजातमकार्षीदित्यर्थ:। साक्षात् भगवान् कृष्ण एव कार्य्याकार्य्यमविचार्य्ये व प्रियोपदिष्टमकार्षीत्।

अन्ये कामान्धा: प्रियोपदिष्टकार्य्यमकार्य्यं वा कुर्वन्तीति किमु वक्तव्यमिति सूचयितुं पीताम्बरोऽपीत्यपि शब्दप्रयोग इति भाव:। अथवा यथा कृष्णोपदिष्टं राधा

अकरोत् तथा राधोपदिष्टं कृष्णोऽपीत्यपि शब्दार्थ:। अत्र रतिगोपनार्थमुद्धृतानां चरणकटकादीनां पुनरलकंरणोपदेशोयुक्त एवेति तात्पर्य्यम्। अत्र क्रियाणां यौगपद्य-प्रतिपादनात्समुच्चयालकांर:। ''गुणक्रियायौगपद्यसमुच्चय उवाह्यते'' इति लक्षणात्।।७०।।

### (६) शुक्लध्वजनृपतिकृत-सारवती

।।७०।। पुनरपि राधानिदेशपुर:सरं कृष्णव्यापारं वर्णयति, हे माधव मम कुचयो: पत्रं पत्रावलीं रचय कुरु, कपोलयोश्चित्रं कुरुष्व, जधने काञ्चीं घटय, स्रजा पुष्पमालया कबरीभरं केशपाशनिचयञ्च पूजय, अन्यत्रापि मालया पूजनं समुचितमेवेति। दलयश्रेणीं पाणौ कलय आरोपय, पदे चरणो नूपुरौ कुरु, इत्यनेन प्रकारेण निगदितोऽर्थात् प्रियया, अतएव प्रीत: पीताम्बर: कृष्ण: तथाऽकरोत् कृतवानित्यर्थ:। अत्र पीताम्बरपदेन कृष्णस्यापि विपरीतसुरतादिना भूषणान्तरराहित्यं सूचितम्।।७०।।

### (७) वनमालि भट्टकृत- सञ्जीवनी

।।७०।। गीतोक्तमेव श्लोकेनाह, रचयेति। हे कृष्ण! मम कुचयो: पत्रं [५] पत्र रचनां[६]मकरिकां रचय। किञ्च कपोलयोश्चित्रं चित्राख्यं रचनाविशेषं कुरु। किञ्च जघने नितम्बे काञ्चीं क्षुद्रघण्टिकां घटय [७] परिधापय किञ्च कबरीभरं केशसमूहं स्रजा पुष्पमालया अञ्च संयोजय। किञ्च वलयश्रेणीं कङ्कणसमूहं पाणौ कलय कुरु। किञ्च पदे चरणयोर्नूपुरौ कुरु। [८]इति एवमुक्तो [९] राधया [१०] प्रीत: सन्तुष्ट सन् पीताम्बर: [११]कृष्णोऽपि [१२]तथाऽकरोत्। एतेन स्वाधीनभर्तृकत्वमुक्तम्।।७०।।

### (८) नारायण पण्डितकृत-पदद्योतनिका

।।७०।। रचयेति। इति [१३] राधया निगदित: उक्त: प्रीत: सन्तुष्ट: पीताम्बरोऽपि श्रीकृष्णोऽपि तथाऽकरोत्। [१४] यथोक्तं तथाऽकरोत्। इतीति किम्? हे कृष्ण! मम कुचयो: [(१५)] पत्रं [१६]चित्रविशेषकं रचय। कपोलयोश्चित्रं पत्रावलिं कुरुष्व। जघने काञ्चीं क्षुद्रघण्टिकां घटय अर्पय। स्रजा पुष्पमालया कबरीभरं केशपाशं अञ्च [१७] पुञ्जय बन्धनं कुर्वित्येर्थ:। हस्ते वलयश्रेणिं कङ्कणपङ्क्तिं स्थापय। पदे चरणयोर्नूपुरौ कुरु स्थापयेत्यर्थ:। गीतोक्तस्य सङ्क्षेपार्थकथनेन न पुनरुक्तिदोष:।।७०।।

### (९) कृष्ण पण्डितकृत-जयन्ती

।।७०।। उक्तमर्थं पद्येनाह, रचयेति। हे माधव! त्वं कुचयो: हारं स्वयमञ्चय आमुञ्च। कपोलयो: पत्रं मकरिकाकारं चित्ररूपं कुरुष्व रचय लिख। जघने काञ्चीं मेखलां घटय योजय। स्रज: पुष्पमाला: कबरीभरे केशपाशे मुञ्च निधेहीत्यर्थ:। वलयानां

कङ्कणानां श्रेणीं पङ्क्तिं पाणौ कलय योजय। अपि च पदे नूपुरौ कलय। इति निगदितः पीताम्बरोऽपि; अपिशब्दात् जगदाराध्योऽपि; प्रीतस्सन् तथा उक्तानुसारेण सर्वमकरोत्। मुञ्चेत्यत्र ग्राम्यत्वं नाशङ्कनीयम्। प्रीत्यादिविशिष्टस्य आमोचनादेरग्राम्यत्वात्। घटय जघनं काञ्चेति तृतीयान्ते पाठे आमुञ्चेति सिद्ध्यति। क्रमपरित्यागदोष इति व्याख्यातपाठः साधुः। हरिणीवृत्तम्। स्वाधीनपतिका नायिका। प्रियोपलालिता नित्यं स्वाधीनपतिका मता इति लक्षणात्।।७०।।

१.चित्रं पत्रं-नि.सा.हारं-च. २.मुग्धस्त्रजा-नि.सा.मुञ्चस्त्रजः-च. ३.कबरीभरे-च. ४.पदेऽपि च नूपुरौ-च. ५.पत्रिकारचनां-इ.फ.ग.ह.ज. ६.मकरिकाञ्च-अ.ब.नास्ति-ग. ७.परिधारय-अ.ब. ८.नास्ति-इ. ९.श्रीवृषभानुनन्दिन्या-ग. १०.प्रीतिसन्तुष्टः-इ. ११.श्रीनन्दकुमारोऽपि-ग. १२.तथैवाकरोत्-इ.फ.ग.ह.ज. १३.राधानिगदितः-क. १४.यथातथोक्तं तथाऽकरोत्-क.ल.म. १५.नास्ति-ड. १५.नास्ति-ड. १६.चित्रं विशेषकं-ड. १७.नास्ति-ड.पूजय-ल.म.

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७०।। रचयेत्यादि। इदानीं गीतार्थं श्लोकेन सूचयति। तया राधया इति निगदितः पीताम्बरोऽपि हरिरपि प्रीतः सन् तथाकरोत्। यथोक्तं राधिकयेत्यर्थः। इतीति किम्? कुचयोः पत्रं पत्रविशेषकं रचय। कपोलयोश्चित्रं कुरुष्व। जघने काञ्चीं घटय। कबरीभरं स्त्रजं अञ्च पूजय। वलयश्रेणिकङ्कणावलीं पाणौ करे कलय पिधापय। पदे नूपुरौ कुरु। ''माल्यं मालास्त्रजो मूर्ध्नि केशमध्ये तु गर्भकः'' **इत्यमरः**। तमालपत्रतिलकचित्रकाणि विशेषकम् इति च।।७०।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७०।। अत्यावेशेन तया पुनरुक्तः सन् तथा अकरोत् इत्याह रचयेति। रचय कुचयोः, पत्रमित्यादिकं, इत्यनेन प्रकारेण तया अज्ञप्तः पीताम्बरोपि प्रीतिस्तथैव अकरोत्। अपि शब्देन रत्यान्तर्वसनव्यत्यायाभावेऽपि तदाज्ञाकरणात् तस्यखण्डित-तदधीनत्वं दृढ़ीकृतम्।।७०।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७०।। एवं प्रियामुखनिःसृतप्रेमप्रार्थनामयवाङ्माधुरीश्रवणसतृष्णः कृष्णः कथं कथमिति मुहुर्मुहुर्वाचयित्वाऽऽत्मानं सफलयन् तत्प्रार्थितं सफलीकृतवानिति आह रचयेति। इत्यनेन प्रकारेण निगदितस्तयाऽऽदिष्टः पीताम्बरः श्रीकृष्णः अपि प्रीतः सन् मदीयताभावमयवचनकदम्बश्रवणातिसन्तुष्टः सन् तथाऽकरोत्। तया यथादिष्टं तथैव कृतवानित्यर्थः। यथा राधा प्रीता तथा पीताम्बरोऽपि प्रीत इत्यपि शब्दार्थः। केन

प्रकारेण निगदितस्तत्राह, रचय कुचयोः पत्रमित्यादि स्पष्टार्थः। अनेन द्वयोः प्रणयविलासवैदग्ध्यादीनां तुल्यत्वं दर्शितम्। उक्तं च;

तुल्यस्नेहौ मधुरवयसौ, तुल्यशोभाविलासौ।
तुल्यालापौ निरुपमगुणौ तुल्यवैदग्ध्यभाजौ।
तुल्यक्रीडारसपरिचयौ तुल्यलावण्ययुक्तौ,
तुल्याकल्पौ रहसि जयतो राधिकाकृष्णचन्द्रौ।। इति ।

'स्वायत्तासन्नदयिता भवेत् स्वाधीनभर्त्तुका' इति लक्षणम्।।७०।।

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७०।। रचय कुचयोश्चित्रेति; पूर्ववर्णिताष्टपदीसारमुपसंहरत्यस्मिन् श्लोके। प्रिय! रचय रचनां कुरु किम्? कुचयोः स्तनयोः चित्रं किम्भूतं चित्ररचनां कुर्यात् श्रीकृष्णः? श्रीराधायाः स्तनचित्रपटयोः पत्रावलीं कुरु इति श्रीकृष्णं प्रति व्रवीति श्रीराधा। कपोले गण्डदेशेऽपि तदनुगुणं मकरादिनां चित्रं लिख। जघने श्रोण्यां कांचीमेखलां सज्जीकुरु आरोपय। तदनु मुग्धस्रजा मनोहरस्रजा मालया कवरीं केशसमूहे भरं कलय बन्धय। ततः परं वलयश्रेणीं पाणौ कलय। हस्ते कङ्कणानि निवेशय। पदे च मणिनूपुरौ बन्धय। एवं भणिते सति श्रीराधा श्रीकृष्णोऽपि तथा करोति। यथासंख्यमलंकारः। हरिणीवृत्तम् प्रगल्भा नायिका। तल्लक्षणं **शृङ्गारतिलके** यथा; १/४२

लब्ध्वा पतिं प्रगल्भा स्यात् समस्तरतकोविदा।
आक्रान्तनायका वाढं विराजद्विभ्रमा यथा।।
स्वामिन्भङ्गुरवालकं सतिलक भालं विलासिन् कुरु।
प्राणेश! त्रुटितं पयोधरयुगे हारं पुनर्योजय।।

इत्युक्त्वा सुरतावसान सुखिता संपूर्ण चन्द्रानना स्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम्। दक्षिणो नायकः यथा **शृङ्गारतिलके** १/२६ - यो गौरवं भयं प्रेम दाक्षिण्यं पूर्व योषिति। न मुञ्चत्यन्यरक्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा।१/३। इति।।७०।।

**७१-यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं**
**यच्छृङ्गारविवेकतत्वमपि यत्काव्येषु लीलायितम्।**
**तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः**
**सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः।।७१।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी

।।७१।। पण्डितश्चासौ कविश्चेति कर्मधारयः। जयदेव नामा पण्डितः कविरिति शाकपार्थिवादिः। जयदेवपण्डितकवेः श्रीगीतगोविन्दतः सानन्दाः सुधियः तत्सर्वं परिशोधयन्त्विति योजना। तत् किमित्याह। यद् गान्धर्वकलासु कौतुकमित्यादिः। लीलायितमिति लीलाचरणमित्यर्थः। कृष्णैकतानात्मानमिति कृष्ण एव एकतान आत्मा यस्येति विग्रहः। एकतानोऽनन्यवृत्तिरित्यमरः।।७१।।

## (२) राणाकुम्भकृत- रसिकप्रिया

।।७१।। इदानीं विद्वत्प्रार्थनाव्याजेन आत्मप्रशंसां तनुते, यद्गान्धर्वेति । हे सुधियः! जयदेवपण्डितकवेस्तत्सर्वं गीतगोविन्दतः। अत्र तसिल् सार्वविभक्तिकत्वात्सप्तम्यर्थे उपपत्तिः। गीतगोविन्दे परिशोधयन्तु शुद्धं कुर्वन्तु। अथवा, गीतगोविन्दादेव शुद्धं जानन्तु। अत्र 'यद्यपि संख्यावान्पण्डितः कविः' इति एकार्थपर्यवसायित्वं, तथापि 'विकर्तनस्तमसाम्' इत्यादिवत्पण्डितेष्वपि कविः क्रान्तदर्शीति विशेषणपरं बोद्धव्यम्। तदिति किम्? यद्गान्धर्वकलासु कौशलम्। गान्धर्वो मार्गदेशीवत् तस्य कला अङ्गविन्यासवैचक्षण्यादिकाः तत्र कौशलम्। तत्र गान्धर्वस्य स्वपदात्मकत्वेन मार्गकत्वात्(?)। अत्र संभवित्वेऽपि केवलदेश्यां गान्धर्वशब्दवृत्तिरुपचारवृत्त्या बोद्धव्येति सुस्थितम् ।अनु च यच्च वैष्णवमनुध्यानम्। अनु च चिन्तनम्। अनु च यच्च शृङ्गारस्य विवेकः संभोगविप्रलम्भत्वेन पृथग्भावस्तस्य तत्त्वं सम्यक्त्वेन निरूपणम् ।तस्य रचनाविशेषवन्ति यानि काव्यानि तेषु यल्लीलायितं विलसितमिति यावत्। एतावता गाने विष्णुभक्तौ शृङ्गाररसनिरूपणे च यदेतस्य काव्यकौशलं तत्सानन्दाः सुधियोऽस्मादेव प्रबन्धात्परिशोधयन्तु। किंभूतस्य कवेः? कृष्णे एकतान एकाग्रचित्त आत्मा स्वरूपं यस्य। तथाविधस्येत्यर्थः। शार्दूलविक्रीडितं वृत्तम् ।वैदर्भी रीतिः। आरभटी वृत्तिः।।७१।।

## (३) जगद्धरकृत-सारदीपिका

।।७१।। यद्गान्धर्वेति यत्जयदेवकवेः गान्धर्वकलासु गानविद्यासुकौशलं पटुत्वं प्रावीण्यमित्यर्थः ।अस्तीत्यध्याहारः यद्वैष्णवं विष्णोरनुप्त्यानमस्ति तथा श्रृङ्गाररसस्य

यो विवेक: सम्भोग विप्रलम्भादिरुपेण यद्विवेकं तस्य तत्वं अर्थज्ञानन्तरस्य रचना सुलीलायितं क्रीडाविलाससर्वस्वं यद्वा लीलायुतं शृङ्गारादिरस विभावनमस्ति तत्सर्वं जयदेवपण्डितकवे:।।७१ ।।

## (४) शंकरमिश्रकृत-रसमञ्जरी

।।७१ ।। यद्गान्धर्वेति। हे सुधिय: पण्डिता: ! सन्तो जयदेवकवे: श्रीगीतगोविन्दतस्तत्सर्वं परिशोधयन्तु जानन्तु। तत्किमित्याह, यद्गान्धर्वकलासु कौशल्यं नैपुण्यम्। अथ च, वैष्णवं विष्णुसंबन्धि यदनुध्यानमनुक्षणचिन्तनम्, यच्च शृङ्गारविवेकतत्त्वं शृङ्गारस्य शृङ्गाररसस्य यो विवेक: संभोगविप्रलम्भादिरूपेण यद्विवेचनं तस्य तत्त्वं यथार्थज्ञानम्। यदपि च काव्येषु कविकर्मसु कवित्वनिर्माणरूपेषु लीलायितम्। तत्सर्वमित्यर्थ:। कीदृशस्य जयदेवकवे: ? कृष्णैकतानात्मन: कृष्णैकतानस्तत्पर आत्मा मनो यस्य तादृशस्य। 'एकतानोऽनन्यवृत्ति:।।७१ ।।

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।।७१ ।। एवं काव्यं परिसमाप्य तत्र वर्ण्णनावस्तु सूचनद्वारा काव्यस्य लोकोपादेयतां सूचयन् गर्व परिहाराय पण्डितान् प्रार्थयते। हे सुधिय:! पण्डिता:! गन्धर्वकलादि सम्प्रदायायातो गान्धर्व: प्रयुज्यमानगीतविर्शष: तदुक्तं **सङ्गीतरत्नाकरे**,

रोचकस्वरसन्दर्भे गीतमित्यभिधीयते।
गन्धर्व गानमित्यस्य भेदद्वयमुदाहृतम्।।
अनादि सम्प्रदायं यत्गन्धर्वै संप्रयुज्यते।
गान्धर्वमिति तत्प्रोक्तमिति तस्मिन् कलासु च।।

अथवा गन्धर्वाणां सम्बन्धिन्यो गान्धर्वा: ताश्च ता: कला: विद्याश्च तासु यत्कौशलं गाननैपुण्यमित्यर्थ:। गान्धर्वेणात्र स्त्रियां पुंवदित्यादिना पुंवद्भाव:। किञ्च यद्वैष्णवं विष्णुसम्वुद्धि: यदनुध्यातं तदनन्तरभावि ध्यानं, किञ्च शृङ्गारस्य सम्भोगविप्रलम्भभेदेन संक्षिप्त सम्पन्नरूपभेदेन वैषयिकानुकूलादिनायकभेदेन बहु प्रकारस्य रतिस्थायिभावक-रसस्य विवेक:, साकल्येन निर्ण्णयस्तस्य तत्त्वं याथार्थ्यमिति यत्सम्भोगादिस्वरूपंतु,

अनुकूलो निगद्येत यत्रान्योन्यं विलासिनो:।
दर्शनस्पर्शनादीनि सम्भोगोऽयमुकाहृत:।।
द्विविध: स तु संक्षिप्त: सम्पन्नश्चेति कथ्यते।
संयोगविरहमानान्तरजा: संयोगाक्षिप्ता:।।

एतदन्य: सम्पन्न: वैषिकाख्यशृङ्गारस्य रूपं तु भरतेन कथितम्,

विशेषात् यत् कलासर्वा यस्मात्तस्मात्स वैशिक:।
विशेषचारुता वापि वैषिक: परिकीर्त्तित:।।

इति तल्लक्षणं तु,

यस्तु सर्वकलोपेत सर्वशिल्प विचक्षण:।
स्त्रीर्दत्तग्राहकश्चैव रूपवान् प्रियदर्शन: ।।
विवेकी मधुरस्त्यागी वयोवेशविभूतिमान्।
कामोपचार कुशलो वाग्मी दक्ष प्रियंवद:।
एवमादि गुणोपेत: स वैषिक इतिस्मृत।।

अनुकूलादिस्वरूपं तु प्रागेव कथितं काव्येषु उत्तमाधमभेदेन त्रिविधेषु लीलायितं लीलावदाचरणं रसिकत्वमिति यावत्। सर्वत्रास्तीति शेष:। तस्मात्गान्धर्वकला कौशलादिकं सर्वत्र त्वयैककमित्यर्थ:। अनेन काव्यस्यावश्यदृश्यता सूच्यते। श्रीकृष्णस्य रूपमात्मा स एको मुख्य: ''एकोमुख्यानेकेवला **इत्यमर:**।'' तादृशो वास: गर्भदासरूप आत्मा यस्य तादृशस्य चरणाविन्दध्यानैक निरतस्येत्यर्थ:।अनेन काव्यकर्त्तुम......मुच्यते एतादृशस्य जयदेवपण्डितस्य कवे: गीतगोविन्द: गीतोगोविन्दो यत्र स तादृश: ततस्तस्माद्गीतगोविन्दादित्यर्थ:। सानन्दा: एकेकस्मिन् काव्ये ज्ञेयमर्थजातम् सर्वमत्रैव लब्धं कान्तमिति जय: सन्तीषस्तत्......शतां परिशोधयन् गायतां गन्धर्वकला कौशला द्यर्थिनस्तत् प्रतिपादकवहुग्रन्थान्तरावलोकनं परित्यज्य तत् सर्वमत्रेव विचिन्त्य अभ्यस्यन्ति इत्यर्थ:। ये सङ्गीतविष्णुभक्ति रहस्य रसविवेकव्यापारिणस्तैरेवायं प्रबन्धो द्रष्टव्य नापि केवल पण्डितै: नापे केवलं कविभिरिति तात्पर्य्यम्। अथवा ये सङ्गीत-विष्णु-साधन-शृङ्गाररसकाव्यरसवुभुत्सवस्तै तत्-सिध्यथमयं प्रबन्धो द्रष्टव्य इति तात्पर्य्यम् अनेन काव्यस्य लोकापादेयता सूचिता।।७१।।

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७१।। अत्र प्रेक्षावत् प्रवृत्त्यर्थं निजग्रन्थप्रयोजनमाह। जयदेवपण्डितकवे: श्रीगीतगोविन्दत: श्रीयुक्तगीतगोविन्दग्रन्थात् तत् सर्वं सुधिय: पण्डिन्ता: सानन्दा देवा आनन्दयुक्ता: नात्मन: कृष्णमात्रपरायणस्येत्यर्थ:। तत् किम्? यत् गन्धर्वकलासु कौशलं प्रावीण्यं यद्वैष्णवं विष्णुसम्बन्धि अनुध्यानमनुचिन्तनं यत् श्रृङ्गारविवेकत्वं

सम्भोगविप्रलंम्भादीनां विविच्य ज्ञानमखिलं यत् काव्येषु लीलायितं क्रीडायितं तथा च निजैतत्सकलगुणपरिशोधनार्थं गीतगोविन्दानुसरणं सन्तः कुर्वन्त्वित्यर्थः। 'कविः काव्यकरे शूरावि' **त्यमरः** ।।७१ ।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७१ ।। (यद्गन्धर्वेति।) [४]किञ्च यद्गन्धर्वकलासु[५]गानविधानेषु कौशलं नैपुण्यं प्रावीण्यम्। गन्धर्वो [६]मार्गदेशवित् कला नृत्याङ्गभेदविलासाः। यद्वैष्णवं विष्णोरनुध्यानं अनुक्षणं चिन्तनञ्च। [७]यच्छृङ्गारस्य[८] श्रुङ्गारस्य विवेकः सम्भोगादिविधानकौशलं [९]तस्य त्तत्वं [१०] यथार्थज्ञानम्। किञ्च यत्काव्येषु कविरचनासुलीलायितं क्रीडाविलाससर्वस्वं तत्सर्वमन्यदपि च सुधियः जयदेवपण्डितकवेः पण्डा सदस[११]द्विवेकबुद्धिः, कविर्देवता-प्रसादलब्ध[१२]कवितासम्पत्तिमान् तस्य [१३]श्री गीतगोविन्दतः श्रीगीतगोविन्दग्रन्थात् परिशोधयन्तु [१४] विवेकेन [१५] विचारयन्तु जानन्त्वित्यर्थः। कीदृशाः सुधियः? सानन्दा आनन्दसहिताः। कीदृशस्य **कवेः**? कृष्णैकतानात्मनः कृष्णे [१६] हरौ एकतानं तदाकारमात्मा मनो यस्य तस्य। [१] अथ वा कृष्णस्यैकतानो मुख्य आत्मा मनो यस्यां श्री राधायाम्; इत्यनेन श्रीराधाकृष्णोपासकत्वमुक्तम्। [२]"एकतानोऽनन्यवृत्तिरे [३] काग्रैकायनावपि" **इत्यमरः** (३.१.७९) ।।७१ ।।

१.पद्यमिदं पर्यङ्कीकृतेति पद्यञ्च व्यत्यस्ते-ड. २.तत्त्वरचना काव्येषु-नि.सा.च. ३.सानन्दं-च. ४.नास्ति-इ. ५.गानविधासु-इ.गानविद्यासु-ग.ह.गानविधिषु-फ.ज. ६.मार्गदेश-अ.ब.फ.ज. ७.यश्च श्रुङ्गाररसस्य-फ.ज. ८.नास्ति-अ.ब.फ.ग.ज. ९.नास्ति-ग. १०.यथाज्ञानं-ग. ११.विवेका बुद्धिः-अ.ब.विवेचिका बुद्धिः-इ. १२.कवित्वं-अ.ब.इ.फ.ग.ह.ज. १३.नास्ति-फ.ज. १४.नास्ति-अ.ब. १६.श्रीगोपालसुते-ग.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७१ ।। यद्गन्धर्वेति। यत् जयदेवपण्डितकवेर्गन्धर्वकलासु [४] गानविद्यासु [५]कौशलं पटुत्वं प्रावीण्यमित्यर्थः। अस्तीत्यध्याहारः। यद्वैष्णवं विष्णोरिदमनुध्यानं अनुक्षणं चिन्तनमस्ति। यत् श्रुङ्गारस्य[६] श्रुङ्गाररसस्य यो विवेकः [७] सम्भोगविप्रलम्भादिरूपेण यद्विवेचनं तस्य तत्त्वमर्थज्ञानं तस्य रचना कृतिरस्तीति। यत्काव्येषु कविकर्मसु लीलायितं विलसितमस्ति जयदेवपण्डितकवेस्तत्सर्वं श्रीगीतगोविन्दतो [८]गीतगोविन्दग्रन्थात् सुधियः [९]पण्डिताः सानन्दाः आनन्दयुक्ताः सन्तः परिशोधयन्तु विवेकेन विचारयन्तु शुद्धं कुर्वन्त्वित्यर्थः। कीदृशस्य[१०] जयदेवपण्डित कवेः कृष्णे हरौः एकतानस्तत्पर आत्मा मनो यस्य।।७१ ।।

## (९) कृष्ण पण्डितकृत-जयन्ती

।।७१।। यद्गन्धर्वेति। गन्धर्वाः देवगायकाः तत्सम्बन्धित्वाद् गन्धर्वं सङ्गीतं तस्य कलासु विद्यासु कौशलं कुशलानां भावः कौशलं चातुर्यं नानातालालङ्कारषाडवौडव-मूर्छनादिकेन रञ्जनं यत्। अनु ततोऽनन्तरं यच्च वैष्णवं विष्णुसम्बन्धिध्यानम्। पीताम्बरादिकं नानावल्लीपरिवृतत्वेन गोपालोपासनादिषु प्रतिपादितं ध्यानं प्रत्ययै-कतानतारूपम्। यत् श्रुङ्गारः नायिकानायकपरस्पराविष्कारस्थायिभावचर्व्यमाणरसः तस्य विवेकः हास्यादिभिस्साङ्कर्येण कथनं तस्य तत्वं रहस्यं आभासत्वानपादकं तस्य रचना। अर्थतः कथनात्मकानि काव्यानि निर्दुष्टगुणालङ्कारशब्दार्थरूपाणि तेषु लीलायितं सूक्तिरूपं यत्; तत्सर्वं त्रयं कृष्णैकतानः भगवदेको यः आत्मा चित्तं यस्य तस्य; जयदेव इति पण्डितश्चासौ न्यायादिशास्त्रवेत्ता कविः कवितामात्रकर्ता च तस्य तत्सर्वं श्रीमद्गीतः गोविन्दो येन यत्र वा सः गीतगोविन्दप्रबन्धः तस्मादिति पञ्चम्यास्तसिल्। सुधियः धीमन्तः आनन्देन सहितं यथा भवति तथा परिशोधयन्तु। अत्र पण्डित-कविशब्दाभ्यां एक एवार्थः प्रतीयत इति पुनरुक्तवदाभासः, पुनरुक्तपदा-भासालङ्कारः।।७१।।

१.यद्वा-ग. २.एकतानोऽनन्यवृत्तिः-अ.ब. ३.एकाग्रैकमना अनन्यधीः-फ.ज. ४.नास्ति-क. ५.पटुत्वं कौशलं-ड. ६.नास्ति-ड. ७.संयोग-क. ८.श्रीगीतगोविन्दनामकग्रन्थात्-क. ९,१०नास्ति-ड.

## (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७१।। **यद्गान्धर्वेति** ।जयदेवपण्डितकवेः श्रीगीतगोविन्दतः सुधियः पण्डिताः सानन्दाः आनन्दसहिताः सन्तः तत्सर्वं परिशोधयन्त्विति योजना। श्रीगीतगोविन्दत इति। श्रीगीतगोविन्दाख्यं काव्यं प्राप्य वा, ''ल्यब् लोपे पञ्चमी।'' **श्रीजयदेवपण्डित-कवेरिति** । पण्डितश्चासौ कविश्चेति कर्मधारयः। पण्डा वेदोज्ज्वला बुद्धिः, सा सञ्जाता अस्येति पण्डितः, तारकादित्वादितच्प्रत्ययः। ''कवृ वर्णे'' इत्यस्माद्धातोरिप्रत्यये कविः पण्डितो नाम परिनिष्ठितशास्त्रतत्त्वज्ञः। ''कविर्नाम लोकोत्तररूपवर्णनानिपुणः'' इति। स्वेच्छाविधेयवाङ्मयः जयदेवनामा पण्डितकविरिति मध्यपदलोपी समासः। जयदेवपण्डितकवेः किंविधस्य ? **कृष्णैकतानात्मन** इति। कृष्णे एकतानः अनन्य-वृत्तिरात्मा मनो यस्येति विग्रहः। ''एकतानोऽनन्यवृत्तिः'' **इत्यमरः** । **तत्सर्वमिति** । किं तत् ? **यद्गान्धर्वकलासु कौशलमिति** । गन्धर्वस्येमाः गान्धर्वाः, ताश्च कलाश्चेति। तासु कौशलं कुशलं प्रावीण्यमिति यावत्। यच्च वैष्णवमनुध्यानम्, विष्णोरिदं वैष्णवम्। अनुध्यानम्, ध्यानमेव सततध्यानं वा। **यच्छृङ्गारविवेकतत्त्वमपीति** । शृङ्गारस्य

विवेकतत्त्वं विचारणा रहस्यम्। **काव्येषु यत् लीलायितमिति**। लीलाचरणं दोषहीनाद् गुणालङ्कारादानाच्च काव्यविषये यल्लीलायितमिति।।७१ ।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७१ ।। अथोपसंहारेऽपिस्वाभीष्टोपासनाया: सर्वोत्तमतानिश्चया वेशेन कारुण्योदयात् तत्र सन्दिहानान् भक्तिरसिकजनान् प्रत्याहयद्गार्न्धवेति। भो: सुधिय: श्रीकृष्णभक्ति-रसोल्लासितचित्ता: पण्डा सदसदविवेचिका बुद्धिस्तया अन्वित: कवि: सत्काव्यकर्त्ता तथाभूतस्य श्रीजयदेवपण्डितकवे:।

श्रीगीतगोविन्दत: तत्सर्वमानन्देन सहिता: परि सर्वतोभावेन शोधयन्तु, आशङ्कापङ्कमुद्धारयन्तु निश्चिन्वन्तु इत्यर्थ:। तत् किमित्याह, यत् गान्धर्वकलासु सङ्गीतशास्त्रोक्तगीतरागतालादिषु यन्नैपुण्यं तदेव निर्वन्धानुसारेण जानन्तु इत्यर्थ:। न केवलमेतत् अपितु यद्वैष्णवं सर्वव्यापनशीलस्य विष्णो: सर्वावतारिणोऽचिन्त्यानन्त-शक्ते: स्वयं भगवत: श्रीकृष्णस्य भजनविषयं यदनुध्यानं स्वाभीष्टचित्तलीलाविचार-समाधानादनुक्षणचिन्तनं तद्प्येतत् दृष्टैव निश्चिन्वन्तु नित्यत्वसर्वोत्तमत्व निश्चयात् दृढ़ीकुर्वन्तु इत्यर्थ:। तत्रापि दुरूहगते: शृङ्गारस्य महाप्रेमरसस्य विचारे यत् तत्त्वं दुरूहातिदुरूहव्रजालीलागतं तदप्येतदनुसारेण निश्चिन्वन्तु। काव्येषु यत् लीलायितं रासलीलादिव्यञ्जनाविशेषग्रथनं तदप्येतदनुसारेण निश्चिन्वन्तु। सर्वत्र हेतु: श्रीकृष्ण एकतान: एकाग्रोद्धनन्यवृत्तिरात्मा मनो यस्य तस्य श्रीकृष्णैकान्तभक्तस्यैव सर्वगुणाश्रयत्वात् इत्यर्थ:। यस्यास्ति उक्तिर्भगवत्यकिञ्चने इत्युक्ते:।।७१ ।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७१ ।। अथ सङ्गीतसाहित्यसंवलितभक्तिरससमन्वयेन ग्रन्थस्य सर्वोपयोगितां प्रतिपादयन् सहृदयरसिकभक्तजनानुद्दिश्य उपदिशति, यद् गान्धर्वेति, सुधिय: श्रीकृष्णभक्तिरसैकप्रवणचित्ता ये केचन जना: ते गान्धर्वकलासु सङ्गीतशास्त्रोदितनाना-विधस्वररागतालसमन्वितगीतादिषु यत्कौशलं, नैपुण्यं, यच्च वैष्णवमनुध्यानं, श्रीकृष्ण सम्बन्धिस्वाभीप्सितपरमरसमयलीलानुचिन्तनम्, यत्तु शृङ्गारस्य महाप्रेममयसकल-रसाग्रिमस्य मधुराख्यस्यापि विवेकतत्त्वं, दुरूहातिदुरूहव्रजलीलागतविचारपरिपाक:। यच्चापि काव्येषु सत्कविप्रणीतेषु लीलायितं, रसलीलादिव्यञ्जनाविशेषप्रथनम्, तत्सर्वं, जयदेव एव पण्डित:, सदसद्विवेचनबुद्धियुक्त: कवि:, लोकोत्तरचमत्कारवर्णन-निपुणस्तस्य जयदेवपण्डितकवे: श्रीगीतगोविन्दत:, श्रिया, राधया सह गीतो गोविन्दो यत्र तत: जयदेवप्रकाशिततन्नामप्रबन्धात् सानन्दा: सन्त: परिशोधयन्तु ।साकल्येन

जानन्तु। ईदृशप्रथनयोग्यतायां च हेतुमाहकीदृशस्य, कृष्णे स्वयं भगवति श्रीनन्दकुमारे, एकतान एकनिष्ठोऽनन्यवृत्तिरिति यावत्, आत्मा मनः स्वभावो यस्य तादृशस्य। श्रीकृष्णैकान्तभक्तस्य सर्वसद्गुणाश्रयत्वादिति भावः। 'यस्यास्ति भक्तिर्भगवत्यकिञ्चना सर्वैर्गुणैस्तत्र समासते सुरा' इत्याद्युक्तेः।।७१।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७१।। यद्गान्धर्वेति; इदानीं विदुषां महत्त्वं प्रतिपादनेन स्वस्य काव्यमहत्वं प्रतिपादयति। हे सुधियः! जयदेवपण्डितकवेः तत्सर्वं गीतगोविन्देन प्राप्यते। गीतगोविन्दाध्ययनेन सर्वं मतं परिशीलयन्तु अथवा शुद्धं कुर्वन्तु। अथवा गीतगोविन्दादेव काव्यस्य शुद्धस्वरुपं जानन्तु। गान्धर्वमार्गदेशीत्वात् तस्य संङ्गीतस्य कला। अयं पण्डितः कविः अङ्गविन्यासवैचक्षण्यादिकल्याः तत्र कौशलम् जानाति। अत्रोच्यते तत्र गान्धर्व स्वपदात्मकत्वेन मार्गकत्वात्। अत्र सम्भावित्वेऽपि केवलदेश्यां गान्धर्वशब्दवृत्ति- रुपचारवृत्त्या वोधव्येति सुस्थितम् इति क्रान्तदर्शी। पण्डितः संख्यावान् पण्डितः कविरिति **राणाकुम्भः**। तदनु वैष्णवमतं यदपि अनुध्यातं संगीतादनु पश्यात् यदनुसृतं विचारितमपि। अपि च यत् शृङ्गारादिकानां रसानामाम्रेडनमपि संसाधितं पुनः सम्भोगविप्रलम्भाख्यानां वाक्यानां पृथग्भावं प्रकटितं सम्यग् च निरूपितम्। तत्रैव सर्वं लीलायितं विलासकलायाः प्रबन्धनं सज्जीकृतम्। अनु च तस्य रचनाविशेषवन्ति यानि काव्यानि तेषु यल्लीलायितं विलासितमिति यावत्। एतावता गाने विष्णुभक्तौ शृङ्गाररसनिरूपणे च यदेतस्य काव्यकौशलं तत्सानन्दाः सुधियोऽस्मादेव प्रबन्धात्परिशोधयन्तु। किंभूते कवेः? कृष्णे एकतान एकाग्रचित्तम् आत्मा स्वरूपं यस्य। शार्दूलविक्रीडितं वृत्तम्। वैदर्भी रीतिः आरभटीवृत्तिः इति।।७१।।

**७१-क- पर्यङ्कीकृतनागनायकफणाश्रेणीमणीनां गणे
संक्रान्त-प्रतिविम्बसंकलनया विभ्रद्वपुप्रक्रियाम्।
पादाम्भोरुहधारिवारिधिसुतामक्ष्णा दिदृक्षुशतैः
कायव्यूहमिवाचरन् उपचिताकूतोहरिः पातुवः।।७१-क।।**

## (१) नारायणदाशकृत- सर्वाङ्गसुन्दरी (टीकानास्ति)

## (२) राणाकुम्भकृत-रसिकप्रिया (टीकानास्ति)

## (३) जगद्धरकृत-सारदीपिका

।।७१-क।। पर्यङ्कीकृतेति उपचितं समृद्ध आकूतं कामभावो यस्य स हरिः कृष्णः वः युष्मान्पातु कीदृशो हरिः वपुर्विक्रियां देहविक्रियां शरीरपरामित्यर्थः बिभ्रद्धारयन् किं कुर्वन् पर्यङ्कीकृतः शय्यास्थाने कृतो नाग नायकः शेषस्तस्य फणा श्रेणीफणा-समूहस्तस्य मणयस्तेषां गणे समूहे सङ्क्रान्तं सम्बद्धं तत्प्रतिकृतिस्तस्य सङ्कलनया अन्वयेना स्तितेत्यर्थः। कायव्यूहमिव बहुशरीरतामिवाचरन् कुर्वन् किमिति कायव्यूह इत्यत आह पुनः कीदृशः पादाम्भोरुहं श्रीकृष्णचरणकमलं धारयतीति धारिणी या वारिधि सुतालक्ष्मीस्ताम् अक्ष्णां शतैर्नेत्रसहस्त्रैर्दिदक्षुः द्रष्टुमिच्छुः लक्ष्मीदर्शनं नेत्रद्वयेन तथा न सम्भवतीति कायव्यूहेन नेत्र- बाहुल्यात्।।७१-क।।

## (४) शंकरमिश्रकृत-रसमञ्जरी (टीकानास्ति)

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत-सारवती

।।७१-क।। ग्रन्थप्रक्रमम्विहाय सर्गान्ते जनानामाशिषमाह। हरिः कृष्णो वो युष्मान् पातु रक्षतु। कीदृशः ? वपुषां प्रक्रिया वपुःप्रक्रिया, तां पर्यङ्कीकृत्य नागनायकस्य वासुकेः फणाश्रेणीमणीनां गणैः संक्रान्तः सम्बद्धो यः प्रतिविम्बः तस्य सम्बलनया सम्बन्धेन विभ्रत्। अत्रोप्रेक्षते, कथम्भूतः ? पादाम्भोरुहधारिवारिधिसुतां पदपद्मधारिणीं लक्ष्यीम् अक्ष्णां शतैर्दिदृक्षुः द्रष्टुमिच्छुः कायव्यूहमिवाचरन् शरीरमूहमिव कुर्वन्नित्यर्थः। पुनः कथम्भूतः ? उपचितीभूतः समूहकामभावः। कामनावीक्षणमक्षिभ्यां न सम्भवतीति तदर्थं कायव्यूहे नाक्षिसहस्त्रं कृतवानिति वाक्यार्थः। पर्यङ्केऽपि च पण्यङ्क इति भेदः पर्यङ्कः पालक इति ख्यातः।।७१-क।।

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७१-क।। सर्गान्ते कविराशिषमाशास्ते, पर्यङ्कीति। हरिर्वो युष्मान् पातु रक्षतु। कीदृशः ? कायव्यूहं बहुशरीरमिवाचरन्। [३] उपचितं पवित्र आकूतं कामभारो यस्य[४]सः।

कीदृश: ? अक्ष्णां शतै: सहस्रै: पादाम्भोरुहं कृष्णचरणकमलं धारय(ती)ति धारिणी या वारिधिसुता लक्ष्मीस्तां दिदृक्षु: द्रष्टुमिच्छु:। लक्ष्मीदर्शनं तु नेत्रयुग्मेन न सम्भवतीति कायव्यूहं नेत्रसहस्रं कृत्वा द्रष्टव्येति भाव:। किं कुर्वन्? पर्यङ्कीकृत: शय्यास्थाने कृतो यो नागनायक: शेषस्तस्य फणाश्रेणीनां पङ्क्तीनां ये मणयस्तेषां गणे समूहे [५]सङ्क्रान्तप्रतिबिम्बसंवलनया सम्बद्धप्रतिबिम्बप्रसारणेन वपुर्विक्रियां विस्तरप्रकारं बिभ्रत् [६] दधत्। मणीनामनन्तत्वादनन्तदेहलाभेन तादृङ्नेत्रलाभोऽभूदित्यर्थ:। पक्षे [७] वारिधितुल्यगुणो वृषभानुस्तत्सुता [८]श्रीराधा [९] तद्दर्शनमेकेन वपुषा कुर्वाणोऽपि तोषमलभमान: कायव्यूहमिवाचरन्निति तुल्यम्। अस्मिन् पक्षे नागशब्देन [१०] नागासनं [११] तत्प्रतिशोभार्थं निहिता ये मणिगणा इत्यादि व्याख्येयम्। [१२] ''श्रेणी तु कथिता पङ्क्तौ [१३]श्रेणी तुल्यार्थम[१४]संहतावपि'' इति **यादव**:। ''सङ्क्रान्त: प्रतिबिम्बे स्यात्प्रवेशे सङ्क्रमेऽपि च'' इत्यपि (**यादव**:) ।।७१-क।।

१.पद्यमिदं नास्ति-नि.सा.च. २.उपचिताकूतो-ड. ३.उपचितं समृद्धं आकूतं कामभरो यस्य-ग.ह.उपचित: वृद्धिं गत: आकूत: क्रीडाविशेषो यस्य स:-फ.ज.उपचितं कामभरो यस्य स:-अ.ब.४.नास्ति-ग.५.सङ्क्रान्तबिम्ब-अ.ब.इ.ग.६.नास्ति-अ.ब.७.वारिधिसुता वारिधितुल्यगुणो-फ.ज.८.श्रीनन्दसूनुवधू:-ग.९.तद्दर्शनमेकेनैव वपुषा-फ.ज.१०.नागासने शोभार्थं-ग.११.तं प्रति-इ.फ.ह.ज.१२.त:१३.पर्यन्तं नास्ति-अ.ब.१४.संहतावपीति-ग.फ.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७१-क।। पर्यङ्कीकृतेति। उपचितं समृद्धं आकूतं [५] कामभावो यस्य स हरि: श्रीकृष्णो वो युष्मान् पातु [६] अवतु [७] इत्यन्वय:। [८] कीदृशो[९]हरि: ? वपुर्विक्रियां [१०] देहविक्रियां शरीरपरम्परामित्यर्थ:। बिभ्रत् धारयत्। किं कुर्वन्? पर्यङ्कीकृत: शय्यास्थाने कृतो यो [११] नागनायक: [१२] शेष: तस्य फणाश्रेणी फणासमूहस्तस्यां ये मणयस्तषां गणे समूहे सङ्क्रान्तं सम्बद्धं यत्प्रतिबिम्बं [१३] प्रतिकृतिस्तस्य संवलनया अन्वयेन स्थितेत्यर्थ:; कायव्यूहमिव [१४] बहुशरीरतामिवाचरन् कुर्वन्। किमिति कायव्यूह इत्यत आह। पुन: कीदृश: ? पादाम्भोरुहं कृष्णचरणकमलं धारयतीति धारिणी या वारिधिसुता लक्ष्मीस्तां अक्ष्णां [१५] शतै: नेत्रसहस्रैर्दिदृक्षु: [१६] दृष्टमिच्छु:। लक्ष्मीदर्शनं नेत्रद्वयेन तथा न सम्भवतीति कायव्यूहेन नेत्रसहस्रं कृत्वा द्रष्टव्येति भाव:।।७१-क।।

## (९) कृष्ण पण्डितकृत-जयन्ती (टीकानास्ति)

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७१-क।। अथ श्रीराधिकायाः पूर्वोक्त दर्शनात् तृप्त्यत्कण्ठावगुण्ठितः श्रीकृष्णो नेत्रवाहुल्यमन्विच्छन् श्रीनारायणस्य लक्ष्मीदर्शनं श्लाघितवान् इति स्मरन् कविः आशिषं प्रयुङ्क्ते पर्य्यङ्कीकृतेति। हरिर्नारायणो वो युष्मान् पातु। कीदृशः ? कायव्युहमाचरन्निव उपचितीभूतो वृद्धिं प्राप्त इति उत्प्रेक्षे। तत्र हेतुः पादाम्भोरुहधारिवारिधिसुतां लक्ष्मीं अक्ष्णां शतैर्द्रष्टुमिच्छुः। तत्प्रकारमाह, तल्पीकृतस्य शेषस्य फणाश्रेण्यां ये मणयस्तेषां गणे मिलितानां प्रतिविम्बानां प्रसारणेन विभुप्रक्रियां सर्वव्यापिभावं विभ्रत्।।७१-क।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७१-क।। अथ तादृशप्रसाधिताया श्रीराधायाः प्रत्यङ्गमाधुरीदर्शनातृप्तात्मनो नेत्रबाहुल्यमन्विच्छन्तं श्रीकृष्णमुत्प्रेक्षमाणः कविस्तदभिन्नस्य श्रीमन्नारायणस्य श्रीलक्ष्मीदर्शनवृत्तान्तमनुस्मरन् तेन च तादृशभक्तान् प्रति आशिषं प्रयुञ्जानः सर्गान्तं सूचयति। पर्यङ्कीकृतेति। चरणसंवाहनकालीनकमलाकरकमलसञ्जायमानसुखसमुदितप्रणयोत्तुङ्गतरलितचित्तो हरिः श्रीनारायणो वो युष्मान् पातु । दुरितानि विदूरयन् स्वभक्तिरसदानेन परिपालयत्वित्यर्थः। कीदृशः, पादाम्बुजसंवाहनपरां श्रीलक्ष्मीम् अक्ष्णां शतैर्दिदृक्षुः द्रष्टुमिच्छुः। अत एव तल्पीकृतस्य शेषस्य फणा श्रेण्यां ये मणयस्तेषां गणैः संक्रान्तानां मिलितानां प्रतिबिम्बानां संवलनया प्रसरणेन वपुःप्रक्रियां तनुप्रकारं बिभ्रत्, दधत्। अत्रोत्प्रेक्षते, कायव्यूहमाचरन् उपचित्तीभूतो वृद्धिं प्राप्त इव।।७१-क।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।। ७१-क।। **पर्यङ्कीकृतेति**; अथ श्रीराधायाः पूर्वोक्तदर्शनात् तृप्त्युत्कण्ठावगुण्ठितः श्रीकृष्णो नेत्रबाहुल्यमन्विछन् श्रीनारायणस्य लक्ष्मीदर्शनं प्रशंस्य कविः आशीर्वचनं प्रयुङ्क्ते। स्वस्य सहस्रपादसेवनया अनन्तसर्पमयेषु प्रतिफलितं स्वरूपेण स्वस्य लक्ष्म्याःरूपं द्रष्टुकामः श्रीहरिः काव्यव्यूह्यं विरच्य तथाभूत क्षीरोदधौ शायितः भवतां सर्वेषां दुःखं हरतु इति मङ्गलात्मकं कविवचनम्।। स्वभावोक्तिरलंकारः। शार्दुलविक्रीडितं छन्दः।। ७१-क।।

**७१ ख-त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे**
**शङ्के सुन्दरी कालकूटमपिबन्मूढो मृडानीपतिः।**
**इत्थं पूर्ब कथाभीरन्यमनसो विक्षिप्य वक्षाऽञ्चलं**
**राधायाः स्तनकोरकोपरि मिलन्नेत्रे हरिः पातु वः ।।७१-ख।।(२० संजीवनी)**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)

## (२) राणाकुम्भकृत-रसिकप्रिया (टीकानास्ति)

## (३) जगद्धरकृत-सारदीपिका

।।७१-ख।। त्वामप्राप्येति हरिः कृष्णः वः युष्मान् पातु कीदृशो हरिः राधायाः स्तनकोमलत्वापतिता त्वादिना गुणेन कोरका विवर्तयोरुपरि चलन्ती सम्बद्धे नेत्रे यस्य किं कृत्वा वामाञ्चलं हृदयवामदेव लग्नाञ्चलं विक्षिप्य दूरीकृत्य कीदृश्याः राधायाः इत्थम् इति पूर्वकथाभिः अन्यमनसः कथादत्तचित्ताया इत्यर्थः कथामेवाह हे सुन्दरि क्षीरोदतीरोदरे क्षीरसमुद्रतीर मध्ये मृडानीपतिर्महादेवस्त्वामप्राप्य कालकूटविषम-पिबदित्यहं शङ्केततर्कयामि यतः मूढः ज्ञानरहितः कीदृशीं त्वां मयि मन्निमित्त निमित्ते सप्तमीस्वयम्वरपरां मदेकपतिकामामित्यर्थः इत्थं पूर्वकथा अनेन गौरीपतित्वे पितवालाभाद्विषमपिबत् इति गौर्य्या अपि अधिकगुणेति भावः।।७१-ख।।

## (४) शंकरमिश्रकृत-रसमञ्जरी (टीकानास्ति)

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत-सारवती (टीकानास्ति)

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७१-ख।। पुनः कविर्ग्रन्थसमाप्तावशिषमाशास्ते-त्वामिति। हरिः वः पातु। हे सुन्दरि! [१७] मृडानीपतिः [१८] शङ्करः क्षीरोदतीरोदरे क्षीरसमुद्रतटे त्वामप्राप्य कालकूटं विषमपिबत् इति शङ्के। इत्थमनेन (प्रकारेण) पूर्वकथाभिर[१९]न्यमनसोऽन्यमनस्काया वक्षोञ्चलं [२०] स्तनावरकवस्त्रं विक्षिप्यापसार्य राधायाः स्तनौ कोरकौ जाताङ्कुरौ तदुपरि मिलन्नेत्रः। कीदृशीं त्वाम्? मयि स्वयंवरपराम्। अनेन किशोरलीला-विलासत्वं ध्वनितम्।।७१-ख।।

१.पद्यमिदं नास्ति-नि.सा.च.अस्या अष्टपद्याः पूर्वः तस्याः पाटल इत्यस्मात्यद्यात्पश्चात्-दृश्यते-ड.क.ल.म. २.कथास्वनन्यमनसो-ड. ३.वामाञ्चलं-ड. ४.चलन्नेत्रो-ड. ५.कामभरो-क.कामभारो-ल.म. ६.नास्ति-ड.रक्षतु-ल.म. ७.नास्ति-क.ल.म. ८,९.नास्ति-ड. १०.नास्ति-ड.ल.म. ११.नागनाथः-

क.१२.नास्ति-ड.१३.प्रतिनिधि-क.नास्ति-ल.म. १४.शरीरता-मिवाचरन्-ड.१५.शतैरेव सहस्रै:-ड. १६.नास्ति-ड.१७.नास्ति-अ.ब. १८.रुद्र–इ.फ.ग.ह.ज. १९.अन्यमनसाऽन्यमनस्कया-ह. २०.स्तनवस्त्रं-ग.स्तनावरकं-फ.ज.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७१-ख।। त्वामप्राप्येति। हरि: कृष्णो वो युष्मान् पातु। कीदृशो [६] हरि: ? राधाया [७] स्तनौ कोमलत्वापतितत्वादिना गुणेन कोरकाविव तयोरुपरि चलन्ती सम्बद्धे नेत्रे यस्य। किं कृत्वा ? वामाञ्चलं हृदयवामदेशे लग्नाञ्चलं विक्षिप्य दूरीकृत्य। कीदृश्या राधाया: ? इत्थं इति [८] पूर्वकथाभिरन्यमनस: कथादत्तचित्ताया इत्यर्थ:। कथामेवाह, हे सुन्दरि! क्षीरोदतीरोदरे क्षीरसमुद्रतीरमध्ये मृडानीपतिर्महादेव: त्वामप्राप्य कालकूटविषम[९] पिबत् इत्यहं शङ्के तर्कयामि यतो मूढो ज्ञानरहित:। कीदृशीं त्वाम् ? मयि मन्निमित्तं; निमित्ते सप्तमी; स्वयंवरपरां मदेक[१०]परामित्यर्थ:। इत्थं पूर्वकथा। अनेन [११] गौरीपतित्वेऽपि सुखालाभात् विषमपिबेदिति गौर्या अपि त्वमधिकगुणेति भाव:।।७१-ख।।

[९]इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां चतुर्विंश: प्रबन्ध:।

१.कीदृशे ? मण्डने-इ.फ.ग.ह.ज. २.श्रीवृषभानुसुतालङ्कारसम्पादके-ग. ३.समानमित्यर्थ:-अ.ब. ४.यत्परं-ड.५.कीदृशे वचसि-क.ल.म.६.नास्ति-क.ल.म.७.सुकृतं-ल.म.८.इति श्री गीतगोविन्दस्य टीकायां नारायणपण्डितकृतायां चतुर्विंश: प्रबन्ध-ड.नास्ति-क.ल.म. ९.नास्तीयं कुष्पिका-च.

## (९) कृष्ण पण्डितकृत-जयन्ती (टीकानास्ति)

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७१-ख।। एवं चिन्तयन् अत्युत्च्छलितोत्कण्ठया देवलोकनाय तस्या वैचित्त्यापत्ते: पुन: श्रीनारायणचरितवर्णनकौतुकमातनोदिति स्मरन् पुनराशिषयति त्वामिति। हरि: श्रीकृष्णो वो युष्मान् पातु। कीदृश: ? श्रीराधाया वक्षोऽञ्चलं अपसार्य्य स्तनकोरकोपरि मिलन्नेत्र:। कीदृश्यो: ? हे सुन्दरि ! क्षीरसमुद्रस्य नीरमध्ये त्वां अप्राप्य शिवो मूढ़: सन् कालकूटं विषं अपिवत् इति अहं शङ्के, इत्यनेन प्रकारेण पूर्वकथाभि: पुराणप्रसिद्धा-भिस्तदश्रुतपूर्वाभिविस्मितचित्ताया:। कीदृशीं त्वा ? मयि स्वयम्वरपराम्।।७१-ख।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७१-ख।। एवं श्रीशकृष्णस्वरूपयोरभेदं सूचयित्वा अथ श्रीलक्ष्म्या: श्रीराधायाश्चाभेदं दर्शयन् परमरसरूपस्य रसिकशेखरश्रीनन्दनन्दनस्य प्रणयरसरूपश्रीराधाप्रेमैकवशता-विष्कारेण पूर्वचरितमुपक्षिपन् एतं करोति जयदेवकवि: प्रबन्धम् इति प्रतिज्ञातस्य

ग्रन्थस्य समाप्तिसूचकं मङ्गलमाचरति। त्वामिति, हरिः रूपगुणमाधुर्यादिभिः सर्वमनोहरः श्रीकृष्णो वः पातु। कीदृशः। हे सुन्दरि। राधे! क्षीरसमुद्रस्य तीरमध्ये नारायणस्वरूपे मयि, स्वयम्बरपरां, मां वरत्वेन निश्चिन्वन्तीं लक्ष्मीरूपां त्वामप्राप्य मृडानीपतिः पार्वतीप्रियोऽपि मूढः सन् कालकूटं समुद्रोद्भवं विषमपिवत्। पीतवानिति शङ्के। इत्यनेन प्रकारेण, पूर्वकथाभिः पुराणश्रुतपूर्वभवकथाभिः विलक्षमनसो विस्मितचित्ताया राधाया वक्षोऽञ्चलं वक्षः स्थितवस्त्राञ्चलं प्रोत्सार्य अपसार्य स्तनकोरकोपरि कुचकुड्मलयोरुपरि मीलन्नेत्रः सङ्गतदृष्टिः।।७१-ख।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७१-ख।। त्वामप्राप्येति; श्रीराधायाःस्तनकोरकं स्तनकमल पुष्पकलिकमिव तयोरुपरि स्थितस्य वस्त्रस्यापसारणेन निर्निमेषनयनेन वीक्षन् मिलन् नेत्रं यस्य तथाभूतः हरि भवतां रक्षांविदधातु इति मङ्गलपरकञ्च आशीर्वादात्मकः श्लोकः। स हरिः किम्भूतः इति जाते प्रश्ने श्रीराधां विवृणोति स्मारयति वा समुद्रमन्थनकथाम्। यदा क्षीरोदनीरोदरे अर्थात् क्षीरसमुद्राभ्यन्तरे समुद्रमन्थनसमये तवाविर्भावः समजनि। तत्र स्वयम्वरपरां त्वां स्वयम्वरेण मां यदा वररूपेण स्वीकृतवती आसीत् तदानीं दुःखेन खेदेन वा मन्ये हे सुन्दरि त्वामप्राप्य न प्राप्य स्वयम्वरे सः मृडानी शिवानी तस्याः पतिः मूढ़ मुग्धःसन् कालकूटविषं अपिवत्। नाम इमं पौराणिकीं कथां श्रवणात् अन्यमनस्क तथा यदासीत् तदानीं श्रीहरिः तस्याः श्रीराधायाः वस्त्राञ्चलं स्तनेभ्यरपसार्य नेत्रकौतुकं प्रीणयामास। तथाभूतो हरिः मङ्गलविधानं पाठकानां लेखकानां कवीनाञ्च करोतु इति। अत्र शार्दूलविक्रीडितं छन्दः। उत्प्रेक्षालंकारः स्वभावोक्तिश्च।।७१-ख।।

**७१ -ग -साध्वी माध्वीक! चिन्ता न भवति भवतः शर्करे! कर्कशासि**
**द्राक्षे! द्रक्षन्ति के त्वाममृत! मृतमसि क्षीर! नीरं रसस्ते।**
**माकन्द! क्रन्द कान्ताधर! धर न तुलां गच्छ यच्छन्ति भावं**
**यावच्छृङ्गारसारं शुभमिव जयदेवस्य वैदग्ध्यवाचः।।७१-ग।।१२**

**(राणाकुम्भः)**

## (१) नारायणदाशकृत-सर्वाङ्गसुन्दरी

।।७१-ग।। सारस्वतं मन्त्रविशेषः, शृङ्गारस्य सारस्वतमिति षष्ठी समासः। शृङ्गारसारस्वतं प्रस्तुतं यस्य इत्यर्थे तत्कृतवचने मयट्। शृङ्गारसास्वतश्चासौ जयदेवश्चेति

कर्मधारयः। हे माध्वीक ! यावत् तादृक् जयदेवस्य वचांसि भावं यच्छति, तावच्चिन्ता साध्वी न भवत्येवमादियोजना। शर्करे कर्करासीति कठिनासीत्यर्थः। शर्करा खण्डविकृता-दुपलाशर्कराशयोरिति मेदिनीकरः। माकन्द क्रन्देति चूतफल ! रुदिहीत्यर्थः।।७१-ग।।

इति श्रीकविराज श्रीनारायणदासकृतायां श्रीगीतगोविन्दटीकायां सर्वाङ्गसुन्दर्य्यां स्वाधीनभर्त्तृकावर्ण्णने सुप्रीतपीताम्बरो नाम द्वादशसर्गविवरणम्।

## (२) राणाकुम्भकृत-रसिकप्रिया

।।७१-ग।। इदानीं कविरात्मनः प्रबन्धस्य माधुर्यादिगुणवत्त्वं ख्यापयति, साध्वीति। जयदेवस्य वैदग्ध्यवाचः शुभमिव शुभवत्। यावत्सारं यावत्सारस्य संभव इति यावत्सारम्। यत्र कुत्रापि सारं विद्यते तत्र शृङ्गाररसस्य सारं तत्त्वं ज्ञातुमिच्छति। वथा यत्र कुत्रचिच्छुभं मङ्गलं विद्यते तत्र जगन्मङ्गलचरितानुवर्णनाद्यथा गन्तुमिंच्छन्ति तथाह, तर्हि हे माध्वीक ! तवेयं चिन्ता साध्वी न भवति। एतत्सदृशं भवामीति चिन्ता न कार्या। कथम् ? त्वयि तथासाराभावात्। तदा 'भवतु' इति पाठान्तरम्। अथ भवतीति पाठपक्षे, हे शर्करे ! भवती कर्कशासीति योज्यम्। तद्गवेषणं योग्यं (?) त्वयि सारं नास्त्येव। हे द्राक्षे ! त्वं मा भैः। त्वां के वा द्रक्ष्यन्ति ? न केऽपीत्यर्थः ? हे अमृत ! त्वया नाम्नाऽनेन गर्वो न धार्यः। तदपेक्षया त्वं मृतमसि। हे क्षीररस ! रसोऽहमिति त्वं मा गर्वीः। तव रसो नीरमेव। नितरामीर्यते प्रेर्यत नीरम्। हे माकन्द पक्वसरसफल ! त्वं क्रन्द वैकल्यं प्राप्नुहीति किम् ? विकलस्य चिन्तामपि ते न करिष्यन्ति। हे कान्ताधर ! त्वं ताभिस्तुलां न धर। अहं त्वत्तुल्यो भवामीति मा संप्रतिपद्येथाः। अथ, हे कान्ताधर ! वैकल्यं न गच्छेत्यर्थः। यतो जयदेवस्य वैदग्ध्यवाचो यावत्सारं यावद्भिः सारैः सह तुलां गन्तुमिच्छन्ति। तर्हि यावता न तुलयन्ति तावद्भवद्भिरेवमुक्तप्रकारेण स्थातव्यम्। किंभूता वाचः ? शुभं मङ्गलं शृङ्गारसारमिव। अत्र 'मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि च शास्त्राणि प्रथन्ते' इति न्यायमाश्रित्य प्रबन्धान्ते 'शुभ'शब्दोपादानम्। अत्र तिरस्कृतोपमालंकारः। स्रग्धरा वृत्तम्। आरभटी वृत्तिः। वैदर्भी रीतिः। गुणकीर्तनं नाम नाट्यालंकारः। तल्लक्षणं सङ्गीतराजे, 'बहूनां गुणिनां यत्र नामार्थजनितैर्गुणैः। एकोऽपदिश्यते तत्तु कीर्तितं गुणकीर्तनम्' ।।७१-ग।।

## (३) जगद्धरकृत-सारदीपिका

।।७१-ग।। साध्वीति विष्वक्सर्वतः यावच्छृङ्गारसारस्वतं भावं जयदेवस्य वचांसि यच्छन्ति तव हे माध्वीक मधो भवतस्तव मधुरमहमिति चिन्ता साध्वी न भवति हे द्राक्षे त्वां क्रन्दरसास्वादयन्ति अमृतमृतमसि हे क्षीरनीरं रसस्ते माकन्द क्रन्द आक्रोशं कुरु

किञ्च हे कान्ताधर ! त्वं पातालं गच्छ श्रीजयदेव काव्यमधूराख्यभ- गवद्रसास्वादनिर्वृता जनास्तदेकनिष्ठाः सन्तः एतेषां तिरस्कारं करिष्यन्ति इति भावः।।७१-ग।।

## (४) शंकरमिश्रकृत-रसमञ्जरी (टीकानास्ति)

## (५) लक्ष्मीधरकृत-श्रुतिरञ्जनी

।। ७१ -ग।। एवं जयदेवः काव्यं समाज्य स्ववाक्सन्दर्भस्य सर्बोत्कृष्टमाधुर्य्य सूनेद्धारालोकोपादेय सिध्यर्थं लोके मधुरत्वेन प्रसिद्धं वस्तुजात निन्दति। साध्वीति। भावशब्देन शृङ्गारस्य प्रकृतेभूतोरतिभावः। व्यभिचारिभाव निर्वेदाद्या ये स्तम्भादय सात्विकाभावाः। कटाक्षविक्षेपादयोऽनुभावाश्च रसाभिव्यञ्जकाः सर्वेऽपि विवक्षिताः। उक्तं च **सूत्रकृता** विभावानुभावव्यभिचारिसंप्रयोगाद्रसनिष्पत्तिरिति ते च शृङ्गाराश्च भावः शृङ्गारस्तत्र सारतः। सरस्वस्वत्या सम्बन्धात्तस्येदमित्यपि यस्येति चेतिकारलोपः तादृशो यो विलासस्तल्पयस्तत्प्रचुरः तत् स्वरूपो वा। यो जयदेवस्तस्य शृङ्गार-रसोपयोगीभाववर्ण्णना शृङ्गाररसप्रधानकविता निर्माणनिपुणस्य जयदेवस्येत्यर्थः।वचांसि शृङ्गारवर्ण्णना रूपवाग्विलासाः यावत् देवस्य सर्वत्रान्वयेवगन्तव्यम्। विश्वग् विश्वं गच्छन्ति प्राप्नुवन्ति तावद्देव यावत् सामर्थ्या.....शस्यां नयः सर्वत्र समादः। हे कान्ताधर वनिताधर धरणीतलं रसातलं गच्छ प्रयच्छ। इतः पूर्वं माधुर्य्येण विश्वातिशायिनस्तवेदानीं भवति गायिनो जयदेवकवेरति मधुरा वाग्वैभवस्य पुरतोऽनुष्ठानस्या नुचितत्वादिति-भावः। तथा हेमाकन्द रसालजंल कन्दरस त्वमपि तावदेव क्रन्द इति माधुर्य्येण मत्समं वस्तु नास्ति। इदानीं जयदेवकविवचोरूपं मधुर.... मिति श्रूयते। आवयोरन्तं विचारयन्त्विति लोके आक्रोशं कुर्वित्यर्थः। तथाविधस्य लोके आक्रोशस्य युक्तत्वा-दिति भावः। हे क्षार तावदेव ते रसः नीरं तद्वदेव अतिविरलः जयदेवकवितामाधुर्य्य-रसनात् पूर्वं मधुरत्वेन परिगणितमिदानीं तत्कलना त्वं निरतोऽप्यति विरलं यासीत्यर्थः। उत्कृष्टवस्तुसन्निधाने नीरसभावस्योचितत्वादिति भावः। तथाहि हे अमृतसुधे तावदेव त्वं मृतं गतप्राणं निःसारमिति यावत् असि। इतिपूर्वं देवा ये केवलं त्वाद्रियन्ते तदानीं तु सर्वेश्वरसेवार्थं तेषां भवतोऽप्यतिमधुरजयदेववाचामृतलाभात् त्वां कटाक्षेणापि न पश्यन्ति भवतोऽपि जन्म धिगितिभावः। हे द्राक्षे मृद्वीके त्वां भवतीं के द्रक्ष्यन्ति विलापयिष्यन्ते न कोऽपीत्यर्थः। इतः पूर्वं भवद्व्यतिरेकेण....हरन्तः स्फुरदे (?) सवस्तुनोऽभावाद्रसिकात् समाद्रियन्ते इदानीं भवत्य अपि अतिमधुरवहिरन्तःस्फुरद्रसवतो जयदेवकवितारूपवस्तुनो मनागपि न पश्यन्ति तवापि जन्म वृथेति भावः। हे शर्करे सिते त्वमपि कर्करा कर्कशा कठिनेऽपि पाठेऽपि तद्वत् असि भवसि। माधुर्य्येण

लोके त्वत्सति वस्तुनोऽभावात् मृद्वीमपि तामादधे। अधुना तु माधुर्य्यमार्दवाभ्यां भवदतिशादिन्याः जयदेवकवितायाः सम्भवात् कर्कशायास्तव जननमजननमनर्थकमित्यभिसन्धिः।

हे माध्वीक मदः भवतस्तव चिन्ता विचारः साध्वी समाशना भवति अचिन्तय धर्मशास्त्रविरुद्धत्वादिति भावः। पूर्वनियमत्वं न पेयमिति शास्त्रनिषिद्धापादानम धर्मसाधनमपि त्वां माधुर्य्य परवशा ग्राम्यजनाः केचनाद्रियन्ते। अधुना तु परमपुरुषार्थसाधनीभूतमतिमधुररसकलपदार्थकं सकलहृदयानन्दकं जयदेववाचामृतमाकलय्य कोऽपि कटाक्षेण त्वां न वीक्ष्यत इति तवापि जन्म वृथैवेति भावः। तथा च मधुरप्रियैः सात्त्विकैश्च वैहिकामुष्मिकसुखकरैर्जयदेवसरस्वत्येवास्वादनीया न वस्त्वन्तरमिति भावः।।७१-ग।।

इति गीतगोविन्दव्याख्यायां श्रुतिरञ्जिनीसमाख्यायां द्वादशः सर्गः।

## (६) शुक्लध्वजनृपतिकृत-सारवती (टीकानास्ति)

## (७) वनमालि भट्टकृत-सञ्जीवनी

।।७१-ग।। इदानीं कविरात्मनः काव्यस्य माधुर्यादिगुणत्वं कथयति, साध्वीति। हे माध्वीक मधो भवतस्तवेयं मधुरोऽहमिति चिन्ता साध्वी न भवति। एतत्सदृशं[१] भवामीति चिन्ता नैव कार्या। किञ्च हे शर्करे [२]त्वञ्च कर्कशाऽसि कार्कश्येन [३] रजोरूपाऽसीत्यर्थः। किञ्च हे द्राक्षे त्वां[४]के द्रक्ष्यन्ति के आस्वादयिष्यन्ति ; [५]अवलोकयिष्यन्ति वा। किञ्च हे अमृत त्वयाऽपि माधुर्य [६] मादकत्वादिगुणातिशयेन गर्वो न धार्यः। तदपेक्षया त्वं मृतमसि।[७] किञ्च हे क्षीर [८] ते [९] तव रसः नीरं जलवदमधुरम्। हे माकन्द पक्वाम्रफल क्रन्द विलप। किञ्च हे कान्ताधर त्वं[१०] धरणीतलं गच्छ।[११] जयदेवस्य विष्वक्सामस्त्येन वचांसियावच्छृङ्गारभावं श्रीराधाकृष्णविषयं यच्छन्ति[१२] प्रयच्छन्ति तावद्युष्माभिर्न स्थेयम्। कीदृशानि ? सारस्वतानि सरस्वती[१३] सार भूतानि। श्रीजयदेवभणितामृतेन सर्वे पदार्था निराकृता [१४] इत्यर्थः।।७१-ग।।

१.पद्यमिदं ग्रन्थसमाप्तेरनन्तरं पञ्चसद्रत्नस्तबके पञ्चपद्येष्वन्य तमत्वेन दृश्यते-ड. २.समन्ते-च. ३.धरणितले गन्तुमिच्छन्ति यावत्-च. ४.भावं-नि.सा. ५.यावच्छृङ्गारसारं शुभमिव जयदेवस्य वैदग्ध्यवाचः-नि.सा.भारं शृङ्गारसारं शुभमिह जयदेवस्य वैदग्ध्यमस्ति-च. ६.नास्ति-ड. ७.स्तनौ कोमलत्वपीतत्वादिना-क. ८.पूर्वकथास्वमनसः-ड. ९.अपिबत्; पीतवानित्यर्थः-क. १०.पतिकामित्यर्थः-क.ल.म. ११.गौरीपतिस्तवालाभात्-क.गौरीपतित्वेऽपि तवालाभात्-ल.म.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७१ -ग ।। स्ववचसि मधुरकोमलकान्तेत्यादिनोक्तं माधुर्यमनन्यसाधारणं प्रकटयति साध्वीति। हे माध्वीक हे मद्य चिन्ता त्वयि माधुर्यचिन्ता साध्वी उत्कर्षहेतुत्वेन समीचीना

न सम्भवति। मदहेतुत्वात् भू सत्तायामित्यतो लट् परस्मैपदम्। भवति भवतः भवन्ति इति रूपाणि। हे शर्करे हे सिते भवती त्वं कर्कशा पाषाणरूपत्वेन कठिना असि भवसि। अस भुवीत्यतो लट्। असि स्थः स्थ। अतिकाठिन्यमेवात्र दोषः। हे द्राक्षे यद्यपि त्वं न कठिना तथापि के पुरुषाः त्वां भवन्तीं द्रक्ष्यन्ति पश्यन्ति द्वीपान्तरान्तर्हितत्वात्। दृशिर् प्रेक्षणे। द्रक्ष्यति द्रक्ष्यतः द्रक्ष्यन्ति। हे अमृत हे सुधे मृतं मृतप्रायमेव त्वमसि। यद्यपि द्राक्षा द्वीपान्तरस्थैस्तद्ज्ञैः कैश्चित् पुरुषैः दृश्यते तथा त्वं न दृश्यसे परलोक एव स्थास्यसि; इह सर्वथा सर्वैः सर्वदाऽदृष्टत्वान्मृतासीति भावः। हे क्षीर हे पयः ते तव रसो गुणः नीरः नीरसः नित्यनपुंसकम्। यद्यपि त्वमप्यमृतं इह सर्वैः सर्वदा दृश्यसे तथापि त्वं नीरस इति भावः। हे माकन्द हे रसालफल अतिमधुरचूत एतेष्वेवं सत्सु मम कादाचित्कत्वात्के मां पृच्छन्तीति क्रन्द रोदनं कुर्वित्यर्थः। क्रन्द चिक्रोशने। क्रन्द क्रन्दतम्, क्रन्दत। हे कान्ताधर कान्तायाः योषितः अधर अधरोष्ठ त्वं तु यावत् यावत्कालं जयदेवस्य तन्नामककवेः वैदग्ध्यवाचः विषयप्रतिपादकवचांसि इह लोके शुभं कल्याणरूपं यावत्सारं सर्वसारं शृङ्गारसारं शृङ्गाररसं यावत् गच्छन्ति प्राप्नुवन्तिः गम्लृ गतौ गच्छति गच्छतः गच्छन्ति; लट्; तायत् धरणितलं भूमण्डलं प्रति गच्छ तत्रावस्थानं कुरु न तदूर्ध्वम्। न हि निशीथ इव मध्याह्ने खद्योतप्रकाशः।। ७१-ग ।।

१.क्षन्तुमर्हन्तु-ग.फ.ह.ज. २.सर्वयोः-अ.ब.इ. ३.पद्यमिदं नास्ति-अ.ब. ४.वंशीरवामोहित-ग.

## (९) कृष्ण पण्डितकृत-जयन्ती

।। ७१-ग।। स्ववचसां सर्वोत्कृष्टत्वमाह, साध्वीति। हे माध्वीक मधुकृतमद्यवतः भवतः तव साध्वी हिता चिन्ता न भवति ; मधुरान्तरस्य सत्त्वात् कथं निश्चिन्ततया तिष्ठसीति भावः। हे शर्करे इक्षुरसपरिपाकजे त्वं शर्करा सूक्ष्मशिलाऽसि। शर्करापदस्याश्मवाचकत्वं तदभिधाय (क) त्वमाह। नानानीरसत्वात्पाषाणत्वव्यपदेशः। हे द्राक्षे गोस्तनिके त्वां (के) द्रक्ष्यन्ति; न केऽपीत्यर्थः। हे अमृत पीयूष त्वं मृतमसि विषमसि। वैद्यके मृतस्य विषवाचकत्वात्। हे क्षीर दुग्ध नीरं जलं ते समम् नीरमपि क्षीरमुच्यते। ''नीरक्षीराम्बुशम्बरम्'' (**इत्यमरः** १.१०.४)। नीरतुल्यत्वात्क्षीरमिति कथ्यते। हे माकन्द रसाल रसकन्द क्रन्द आक्रन्द यत्वत्तोऽधिकसत्त्वादाक्रोशयति परिदेवयेति भावः। हे कान्तायाः अधर धरणितले भूतले त्वां रसिकाः इति शेषः। यावद्भारं नीरसत्वात् यथेष्टभारं गन्तुं प्राप्तुं इच्छन्ति। तव हेतुमाह। जयदेवस्य वैदग्ध्यचातुर्येण वाक्यं शृङ्गार एव उज्ज्वलरस एव सारं सत् इह धरणितले इदं शुभं अस्तीति। अत्र

माध्वीकादीनां उपमानानां कण्ठतोऽर्थतश्च वैयर्थ्यकथनात् जगद्रञ्ज (न) क्रियारूप-दुर्वहत्वेन प्रतीपालङ्कारः। मालारूपः स्रग्धरावृत्तम्।।७१-ग।।

इति श्रीगीतगोविन्दव्याख्यायां जयन्त्याख्यायां स्वाधीनभर्तृकावर्णने सुप्रीतपीताम्बरो नाम द्वादशः सर्गः।।

इति श्रीमद्विद्वत्प्रवरभिषगम्मण्णजनुषा कृतायां सन्न्यायश्रुतिपदविदा कृष्णविदुषा। प्रगीयद्गोविन्दान्वयविवृतगूढार्थविवृतौ जयन्त्यां सर्गोऽसौ समभवदिह द्वादशतः ।। राधाकृष्णौ जयतः।

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन)

।।७१-ग।। साध्वीति। शृङ्गाररसारस्वतमयजयदेवस्येति। शृङ्गाररस्य सारस्वतं तत्त्वं तन्मयो योऽसौ जयदेवः तस्य विष्वग्वचांसि सर्वतो व्याप्नुवन्ति। वचांसि यावत्कालं भावं यच्छन्ति। यद्वा विष्वग्भावं सर्वतो व्यापिनीं प्रीतिं यच्छन्ति तावत्कालपर्यन्तम्। माध्वीक इति। हे माध्वीक! भवतश्चिन्ता साध्वी न उत्तमा न भवति इत्येवमादि योजना। शर्कर इति। हे शर्कर! त्वं कर्कशासि कठिनासि कुत्सितासि वा। द्राक्ष इति। हे द्राक्षे! त्वां के द्रक्ष्यन्ति? अपि तु न केऽपि। अमृतेति। हे अमृत! त्वं मृतमसि मृतमिव भवसि। क्षीरेति। हे क्षीर! ते तव रसो नीरमेव। माकन्देति। हे माकन्द! चूतफल! त्वं क्रन्द रुदिहि। कान्ताधरेति। हे कान्ताधर! त्वं धरणितलं गच्छ पातालं याहि। जयदेवस्य वचांसि यावदनुचिन्त्यन्ते श्रूयन्ते वेत्यर्थः। ''शर्करा खण्डविकृतौ'' इति। ''कर्करं कुत्सिते वाच्यं लिङ्गं तक्रे नपुंसकम्'' इति। ''कर्करा भाण्डभेदे ना दर्पणे कठिने त्रिषु'' इति **मेदिनी**। ''माकन्दः सहकारेऽस्त्री धात्रीनगरभेदयोः'' इति **मेदिनी**। ''मध्वासवो माधुवको मधु माध्वीकमद्ययोः।'' मध्वासवादि चतुष्कमिदम्। विष्वगिति मूर्द्धन्यमध्यः। विषु इति अव्ययमखिलवाचकम्। तत्र विषु अञ्चन्तीति विष्वञ्चि। विषु व्यापितानि च तानि वचांसि चेति विष्वग्वचांसि। विष्वगिति भिन्नं वा पदमव्ययम्। तदा विश्वस्मिन् देशे काले वा विष्वगित्यर्थः।।७१ -ग।।

इति श्रीगीतगोविन्दटीकायां द्वादशसर्गविवरणम् ।।१२।।

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७१-ग।। अथ 'हृद्रोगमाश्वपहिनोत्यचिरेण धीरः' इति **शुकोक्तिवत्** एतत् श्रवणकीर्त्तनस्मरणानुमोदन प्रभावमाह, साध्वीति। हे माध्वीक! इहलोके यावत् जयदेवस्य वचांसि विष्वक् सर्वतः शृङ्गाररसारस्वतं भावं ददति, तावद्भवतः चिन्ता साध्वी न भवति मधुरत्वेऽपि मादकत्वादित्यर्थः। हे शर्करे! त्वं कर्करासि मादकत्वाभावेऽपि

कठिनत्वादित्यर्थः। हे द्राक्षे! के त्वां द्रक्ष्यन्ति? कोमलत्वेऽपि निन्द्यदेशोद्भवत्वादित्यर्थः। हे अमृत! त्वं मृतमसि मरणान्तरप्राप्यत्वादित्यर्थः। हे क्षीर! ते रसो नीरं नीरवत् आवर्त्तनाद्यपेक्षत्वात। हे माकन्द! आम्र! त्वं क्रन्द त्वगष्ट्यादिहेयांशसाहित्यात्। हे कान्तधर! त्वं पातालम् असुरालयं याहि, अधोदातृनामत्वात् तवात्र स्थितिरपि न युक्तेत्यर्थः। श्रीजयदेव वर्णित मधुराख्यभक्तिरसास्वादनिवृत्तजनास्ते घृणामेव करिष्यन्तीति भावः।।७१-ग।।

## (१२) लक्ष्मणकृत-रसिकरङ्गदा

।।७१-ग।। एवं ग्रन्थस्य सर्वातिशायितामुपपाद्य पुनस्तस्य माधुर्यप्रौढश्च क्रमणेन माध्वीकादिमधुरवस्तूनि धिक्करोति। साध्वीति रे माध्वीक। यावतकालपर्यन्तं शृङ्गारसारस्वतमयजयदेवस्य श्रीराधामाधवविरहकेलिप्रधानवाग्वैभवस्वरूपस्य जयदेवाख्यस्य कवेः वचांसि एतत्प्रबन्धरूपवचःकदम्बकं विष्वक् सर्वतः भावं सर्वमाधुर्यचूडामणिमधुराख्यभक्तिरसविशेषं यच्छन्ति, ददति, तावत्कालपर्यन्तं तव चिन्ता साध्वी न भवति। आस्तां तावदास्वादश्चिन्तनमपि सम्यग् न भवति। मनोभ्रामकमादकत्वदोषादिति भावः। अरे शर्करे। सितोपले। त्वं कर्करासि। मादकत्वाभावेऽपि काठिन्यदोषत्वान्निन्द्या भवसीत्यर्थः। रे द्राक्षे! मृद्वीके! त्वां के जना द्रक्ष्यन्ति। न केचन। कोमलत्वेऽपि नीचदेशसम्भवात्। हे अमृत ! त्वं मृतमसि। मरणानन्तरप्राप्तत्वात्। हे क्षीर! ते रसो नीरं जलरूपं भवति। आवर्त्तनाद्यपेक्षित्वात्। रे माकन्द! रसालफल! त्वं क्रन्द, रोदनं कुरु। त्वगस्थ्यादिहेयांशसाहित्यात्। अरे कान्ताधर! धरणितलमसुरालयं गच्छ। भक्तिरसास्वादिनां घृणास्पदत्वात्। तवात्र स्थितिर्न युक्तेति भावः।।७१-ग।। (अधिकः ८)

इति श्रीगीतगोविन्दमहाकाव्ये सुप्रीतोऽतिसन्तुष्टः पीताम्बरः श्रीकृष्णो यत्र तन्नामायं सर्गः।

।। इति श्रीरसिकरङ्गदाख्यायां श्रीगीतगोविन्दव्याख्यायां द्वादशसर्गः ।।

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।। ७१-क।। साध्वीमाध्वीकेति; इदानीं कविरात्मनः प्रबन्धस्य माधुर्यादिगुणवत्त्वं प्रतिपादयति। लौकिकेषु पदार्थेषु यत् माधुर्यमस्ति। तत्र दोषाः सन्ति। केवलं राधाकृष्णात्मकशृङ्गाररसः यदत्र सारवत् वाक्यं रसाप्लुतं भवति तेन एते द्राक्षादयः नैव समाना स्युरिति प्रौढोक्त्या प्रतिपाद्यते। तद् यथा। हे माध्वीक तवेयं चिन्ता साध्वी न भवति। एतत्सदृशं भवामीति चिन्ता न करणीया। किमर्थम्? त्वयि तथा

साराभावात्। हे शर्करे त्वं कर्कशासि। तवशरीरे चिक्कणता क्वः ? हे द्राक्षे त्वां न कोऽपि द्रक्षति। हे अमृत ! त्वयापि गर्वः न कार्यः। रसापेक्षया त्वं मृतमसि। हे क्षीर रस ! रसोहंमिति त्वं मा गर्वी नावलेपः कर्तव्यः त्वया। तव रसः। नीरमेव जलमेव। हे माकन्द। पक्वसरसफल ! त्वं क्रन्दनं कुरु। हे कान्ताधर ! त्वं विकलो मा गा। यतो हि जयदेवस्य वैदग्ध्यवाचो यावत् सारं रसयुक्तं तेन त्वं न तुलायुक्तां भवसि। तस्य वाग्खलु शुभं मङ्गलं शृङ्गारसारमिव अनवद्यं भवति। अत्र आदौ मध्ये च अन्ते च हरि सर्वत्र गीयते इति धिया मङ्गलपूर्व सम्पादयति काव्यं कविः। तिरष्कृतोपमा। स्रग्धरावृत्तम्। आरभटीवृत्तिः। वैदर्भी रीतिः। गुणकीर्त्तनं नाम नाट्यालंकारः। **संगीतराजे** तल्लक्षणम,

बहूनां गुणिनां यत्र नामार्थजनितैर्गुणैः।
एकोऽपदिश्यते तत्तु कीर्तितं गुणकीर्त्तनम्।।इति।।७१ (ग)।।

**७२-श्रीभोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य।**
**पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ।। ७२।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)**

**(२) राणाकुम्भकृत-रसिकप्रिया (टीकानास्ति)**

**(३) जगद्धरकृत-सारदीपिका (टीकानास्ति)**

**(४) शंकरमिश्रकृत-रसमञ्जरी**

।।७२।। अधुना पितृमातृनाम निवध्नत्प्रर्थयते सजनानिति खगुणात्प्रकाशयितुम् श्रीभोजदेवेत्यादि।।७२।।

**(५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानास्ति)**

**(६) शुक्लध्वजनृपतिकृत-सारवती**

।।७२।। अथ ग्रन्थमुपसंहरन्नेव। कीर्त्त्यनुवृत्त्यर्थी पित्रोरपि नामनिबन्धनपूर्वकं स्वनाम निबन्धाति। रामादेव्या आत्मजः^s, स चासौ जयदेवकश्चेति स तथा तस्य, श्रीगीतगोविन्दकवित्वं पराशरादयो ये प्रियाः प्रेमविषयाः तेषां वर्गः समूहः, तस्य कण्ठेऽस्तु। तथा च ते सततं ममैतत् ग्रन्थपाठं कुर्वन्त्विति वाक्यार्थः। कीदृशस्य ? श्रीभोजदेवप्रभवस्य श्रीयुक्तभोजदेवात् प्रभव उत्पत्तिर्यस्य स तथा। एतेन कविनापि पित्रोर्नामप्रतिपादनेन मङ्गलमाचरितम्। यथेच्छासम्भोगेन प्रीतः पीताम्बरो यत्रेति प्रीतपीताम्बरः सर्गनाम।।

इति समस्तप्रक्रियाविराजमानमहाराजशुक्लध्वजविरचितायां सारवत्यां गीतगोविन्दटीकायां द्वादशः सर्गः समाप्तः।।

वश्या श्रीजयदेवपण्डितकवेर्वाणी नवीनाङ्गना।
न प्रायेण निवेशितुं प्रभवति श्रीयं स्वयं (स्वीयं ह्रिया) किञ्चन।।
श्रीशुक्लध्वजभारतीव वसती तस्या वयस्या ततः।
तात्पर्याणि गुणानलसतिपदं जानीत विद्वज्जनाः।।१।।
सद्वर्णा जयदेवपण्डितकवेर्वाणी निगूढाशया।
नानालङ्कृतिभूषिता गुणवती हृद्या च मानपरा
क्षितिपालमौलिमुकुटप्रश्लिष्टपादद्युतेः
श्रीशुक्लध्वजभूभुजो विजयतामाकल्पमेषा कृतिः ।।२।।
द्विस्थानेन्दुसिताङ्किते क्षोणिपते .......
मार्गे मासि सुधांशुजाहनिशिते पक्षे द्वितीयान्तिते ।।३।।
श्रीशुक्लध्वजभूभुजो निजजनस्यांशे रसं पूर्णतां
नीता सारवती जगत्सु भवतादाकल्पकीतिप्रदा ।।४।।

ॐ ॐ श्रीशिवाय नमः।। ॐ तत्सत्।।७२।।

'वामादेव्यात्मज....' इति पाठ।

कुचित् तु श्लोकोऽयमेवं पञ्चते,

'सद्वर्णां' जयदेवपण्डितकवेर्वाणीं निगूढाशयां
नानालङ्कृतिभूषितां गुणवतीं हृद्याञ्च मानपराम्।
क्षितिपालमौलिमुकुटाप्रश्लिष्टपादद्यु तेः
श्रीशुक्लध्वजभूभुजो विजयतामाकल्पमेषाकृतिः।।'

अस्माभिस्तु संशोधितरूपेण दीयते।

### (७) वनमालि भट्टकृत-सञ्जीवनी

।।७२।। साधूनां स्वत एव सम्मतिरिह स्यादेव भक्तार्थिना-
मालोक्य ग्रथनश्रमञ्च विदुषामस्मिन् भवेदादरः।
ये केचित्परकृत्युपश्रुतिपरास्तानर्थये मत्कृतिं
भूयो वीक्ष्य वदन्त्ववद्यमिह चेत्सा वासना स्थास्यति।।

[१५] स्वटीकायां सर्वसम्मतियोग्यतामाह, साधूनामिति। इह **वनमालिसञ्जीवन्यां** [१६] श्रीगीतगोविन्दटीकायां भक्तार्थिनां [१७] साधूनां भक्तानां सम्मतिः स्वीकारः [१८] स्यादेव।

विदुषामपि नानाशृङ्गाररसग्रथनश्रमं विचार्य अस्यामादरो भवेदेव। ये च भक्ति-पाण्डित्यहीनाः विरलाः परग्रन्थनिन्दापरास्तानर्थये याचे। [१९] किं तत् ? मत्कृतिं [२०] भूयो वारं वारं वीक्ष्य इह टीकायामवद्यं वदन्तु। टीकाश्रमेषु ज्ञातेषु परनिन्देच्छा वासना स्थास्यति चेत् भक्तिमार्गपरिशीलनेन कुतः ? सा दुर्वासनेति भावः।

टीकासप्तकमालोक्य सारं सारं समुद्धृतम्।
तत्रापि स्खलितं किञ्चित् [१] क्षन्तुमर्हथ सूरयः।।
शिवदासतनूजेन भट्टेन वनमालिना।
गीतगोविन्दटीकेयं रचिता शुभदाऽस्तु वः।।
वैशाखे कृष्णपक्षस्यैकादश्यां शुभमङ्गले।
वाराणस्यां कृता टीका भट्टेन वनमालिना।
काश्यां नरोत्तमगृहे मध्ये माधव[२]शर्वयोः।
रचिता गीतगोविन्दटीका श्रीवनमालिना।।
[३] कलिन्दजातीरविहारशीलं गोपाङ्गनानां नयनाभिरामम्।
[४] वंशीरवैर्मोहितमारकोटिं वन्दे सदा तं वृषभानुजारतम्।।

इति श्रीकृष्णचन्द्रसेवकोदीच्यावतंसशिवदासात्मजश्रीवनमालिभट्टविरचितायांवनमालि-सञ्जीवन्यां श्रीगीतगोविन्दटीकायां सुप्रीतपीताम्बरो नाम द्वादशः सग।।७२।।

१.भवामीति चिन्तैव न कार्या-फ.ग.ह.ज. २.त्वं-फ.ह.ज.त्वमपि-ग. ३.रजोरूपा भासीत्यर्थः-ह. ४.नास्ति-इ.फ.ग.ह.ज. ५.अवलोकयिष्यन्तीति वा-इ.फ.ग.ह.ज. ६.मोदकादि-ग. ७.नास्ति-इ.फ.ग.ह.ज. ८,९.नास्ति-अ.ब. १०.पातालं-इ.फ.ग.ह.ज. ११.जयदेवस्य विष्वक् वचांसि सामस्त्येन वचांसि-ग. १२.नास्ति-इ. १३.रसभूतानि-इ.फ.ग.ह.ज. १४.इति भावः-इ.फ.ग.ह.ज. १५.कविता-स्तुतौ विदुषां योग्यत्वेऽपि अविदुषामपि तद्योग्यतामाहसाधूनामिदि-फ.ज. १६.टीकायां-अ.ब. १७.नास्ति-अ.ब. १८.स्वत एव स्यात्-फ.ज. १९.किन्त्वन्यकृतिं-इ. २०.गूयो वीक्ष्य वारं वारं वीक्ष्य-ग.

## (८) नारायण पण्डितकृत-पदद्योतनिका

।।७२।। (श्री भोजदेवेति।) [१]श्रीशब्दस्तु ग्रन्थान्ते मङ्गलायेत्यर्थः। श्रीभोजदेवःपिता रामादेवी माता, पराशरादिप्रिया व्यासादिशिष्याः। प्रीतो राधासमागमात्। [२] आनन्दयुक्तः पीताम्बरः कृष्णो यत्रेति ।।

लक्ष्मीदासतनूजेन [३]भीषदासेन धीमता।
कारिता गीतगोविन्दटीकेयं सुखदाऽस्तु वः।।
[४] भीषदासनियुक्तेन [५] कृष्णवत्पद्मसेविना।
नारायणेन सुकृतं गीतगोविन्दटिप्पणम्।।

टिप्पणे [६]चेन्मदीये वै स्खालित्यं स्यात्प्रमादत:।
न कर्तव्यो ममाक्षेपो गन्तुर्हि [७]स्खलितं भवेत् ।।

इति श्रीगीतगोविन्दटीकायां नारायणपण्डितविरचितायां पदद्योतनिकायां सुप्रीतपीताम्बरो नाम द्वादश: सर्ग:।।७२।।

१.श्रीशब्दस्तत्र ग्रन्थान्ते मङ्गलार्थ:-क.श्रीशब्दस्य ग्रथान्ते मङ्गलमर्थ:-ल.म.श्रीशब्दस्तु ग्रन्थानन्तर-मङ्गलात्यर्थ:-ड.२.परमानन्दयुक्त:-क.३.भीषिदासेन-क.ल.म.४.भीषिदास-क.ल.म.५.श्रीकृष्ण-पदसेविना-क.६.चेन्मदीयेऽस्मिन्-क.७.स्खलनं-ल.म.

## (९) कृष्ण पण्डितकृत-जयन्ती (टीकानास्ति)

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी

।।७२।। अथ स्वपितृमातृस्मरणपूर्वकं पराशरादिमतज्ञातार एव अस्य अधिकारिण इति तान् प्रति आशिषयति श्रीभोजेति। भोजदेवनामा अस्य पिता वामादेवीजननी तस्या: सुतस्य श्रीजयदेवकस्य पराशरादीनां ये प्रियास्तन्मतज्ञातारस्तेष्वपि ये बान्धवस्तन्मतानुसारेण श्रीराधामाधवरह:केलिज्ञानेन वन्धुत्वं प्राप्तास्तेषामेव कण्ठे भूषणवत् सदा श्रीगीतगोविन्दाख्यं कवित्वमस्तु। अनेनास्य प्रबन्धस्य सर्ववेदेतिहासपुराणादिवक्तृणां सम्मात्या सर्वसारत्वं दूरूहत्वं च वोधितम्। तत्रायं क्रम:। आदौ श्रीकृष्णस्य श्रेष्ठताप्रतिपादनं प्रलयपयोधिजले इत्यादि वसन्ते वासन्तीत्यन्तेन। तत: श्रीराधाया: समधिकलालसावर्णनं कंसारिरपीत्यन्तेन तत्रैव साधारणलीला तस्या उत्कण्ठावर्णनं च तत: श्रीकृष्णस्यापि उत्कण्ठा यमुनातीरेत्यन्तेन। तत: श्रीकृष्णे राधिकोत्कण्ठा अहमिहेत्यन्तेन। तत: तस्यां श्रीकृष्णोत्कण्ठावर्णनं पूर्वं यत्र इत्यन्तेन। ततोऽभिसारिकावस्थावर्णनं अत तामित्यन्तेन। ततो वासकसज्जा अत्रान्तरेत्यन्तेन। तत: चन्द्रोदयात पुनरुत्कण्ठिता अथागतामित्यन्तेन। ततो खण्डिता तामथेत्यन्तेन। तत: कलहान्तरिता अत्रान्तरे मसृणरोषेत्यन्तेन। ततो मानिनीवर्णनं सुचिरमित्यन्तेन। ततो मेघावृते चन्द्रे सखीप्रार्थना सा ससाध्वसेत्यन्तेन ततो अन्योऽन्यावलोकनं गतवतीत्यन्तेन। तत: श्रीकृष्णप्रार्थना प्रत्यूहेत्यन्तेन। तत: रह: केलय: इति मनसेत्यन्तेन । तत: स्वाधिनभर्त्तृका पर्य्यङ्कीकृतेत्यन्तेन। अत: सर्गोऽयं समृद्धिमदाख्यसंभोगरसानन्दित: पीताम्बर: प्रियाधीनत्वेन तद्वर्णवसनप्रिय: श्रीकृष्णे स इति सर्ग:।।७२।।

यद् स्वबालमुग्धोक्तौ पित्रा प्रीतिरवाप्यते।
तद्वत् श्रीकृष्ण चैतन्य: प्रीयतामत्र जल्पिते।। इति श्रीगीतगोविन्दटीकायां बालवोधिन्यां द्वादश: सर्ग:।।

**(१२) लक्ष्मणकृत-रसिकरङ्गदा (टीकानास्ति)**

**(१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी**

।।७२।।श्री भोजदेव प्रभवेति। अत्र काव्यान्ते सम्मानपूवकं स्व पितरौ मित्राणि च यथाक्रमम् भोजदेवरामादेवी पराशरादयश्च कविना स्मर्यते। सरस्वत्यास्तत्वं कविसहृदयाख्यं विजयते। तदवत् कविः स्वस्य प्रिय मित्रं पराशरप्रभृतिनां कण्ठेषु तत् काव्यं श्रोतुं इच्छति। स्वस्य परिचयं प्रयच्छति। पिता तस्य भोजदेवः। माता रामादेवी/भामादेवी तनुजस्य परिचयोत्र सिद्धोऽस्ति। प्रियवयस्य पराशरः तस्यापि गीतगोविन्दं गायतु। कवेः व्यपेक्षास्ति खलु श्रोतुं तद्गीतम्। सहृदयानां कण्ठे लभतां प्रतिष्ठा इति।।७२।।

**७३-इत्थं केलिततीर्विहृत्य यमुनाकुले समं राधया**
**तद्रोमावलिमौक्तिकावलियुगे वेणिभ्रमं बिभ्रति।**
**तत्राह्लादिकुचप्रयागफलयोर्लिप्सावतोर्हस्तयो-**
**व्यापाराःपुरुषोत्तमस्य ददतु स्फीतां मुदां संपदम्।।७३।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी (टीकानास्ति)**

**(२) राणाकुम्भकृत-रसिकप्रिया**

।।७३।। इथ्यमिति। पुरुषोत्तमस्य हस्तयोर्व्यापाराः स्फीतां मुदां संपदं ददतु। किंविशिष्टयोर्हस्तयोः? तत्र वेण्यामाह्लादो विधत्ते ययोस्ते आह्लादिनी। कुचावेव प्रयागफले वटफले, आह्लादिनी च ते कुचपरयागफले च आह्लादिकुचप्रयागफले, तयोर्लिप्सां वाञ्छां बिभ्रत इति लिप्साभृतौ, तयोर्लिप्साभृतोः। किं कृत्वा? इत्थं पूर्वोक्तप्रकारेण स्वाधीनभर्तृकया राधया सह यमुनाकूले क्रीडापरंपरा विहृत्येति स्वेच्छया विधानपरम्। क्व सति? तद्रोमावलिमौक्तिकावलियुगे। तस्या रोमावलिर्मौक्तिकानामा-वलिर्हारस्तयोर्युग्मे। 'वेण्या' इति गङ्गायमुनयोः सङ्गमस्य भ्रमं विलासं बिभ्रति सति। रोमावलिर्यमुनयोपमीयते, कृष्णत्वात्। मौक्तिकावलिश्चोज्ज्वलत्वाद्गङ्गयोपमीयते। तत्संगमे प्रयागो भवत्येव। कुचौ तत्फलाभ्यामुपमीयेते। कुचप्राप्तेः प्रयागफलप्राप्तिरिति रूपकमलंकारः। शार्दूलविक्रीडितं वृत्तम्। स्वाधीनभर्तृका नायिका। तल्लक्षणम्- (शृं.ति.१/७४) 'यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति। विचित्रविभ्रमासक्ता सा स्वाधीनपतिका यथा।। लिखति कुचयोः पत्रं कण्ठे नियोजयति स्रजं तिलकमलिके कुर्वन्गण्डादुदस्यति कुन्तलान्। इति चाटुशतैर्वारंवारं वपुः परितः स्पृशन् विरहविधुरो नास्याः पार्श्वं विमुञ्चति वल्लभः।।' पाञ्चाली रीतिः। भारती वृत्तिः। पाञ्चाली गीतिः।

आदितालस्तथा पञ्च हरवक्त्रसमुद्भवाः। प्रतिमण्ठश्चतुर्मात्रो मण्ठश्चैवाड्डतालकः।। तालो वर्णयतिश्चैव जयमङ्गलसंज्ञितः। विजयानन्दनामा च जयश्रीसंज्ञकः परः।। प्रतितालं पदानि स्युः पाटास्तदुभयं तथा। मध्ये मध्ये यथाशोभालप्तियुक्तिर्विशेषवत्। विशेषतो वर्णयतौ यदा श्रीसंज्ञिकोऽपि च।। तेनकाः स्युः पदस्थाने प्रतितालेन वेश्यते। मुक्तिपादाक्षरैर्युक्तैरालापेन पुरस्कृतैः।। पदान्येवं षोडश वै ताला एकोनविंशतिः। गौडः स्याद्देशतालादिरागः सर्वपदाश्रयः।। धीरोदात्तगुणैर्युक्तो वर्ण्य उत्तमनायकः। छन्दः स्यात्स्वेच्छया बद्धं समानादिगुणा दृशः' ।।७३ ।।

इति श्रीसुप्रीतपीताम्बरतालश्रेणि-नामाऽष्टाविंशः प्रबन्धः।।

यस्य द्वादशराजकं वितनुते सेवां स्थितं किङ्करं
यस्मिन्द्वादशभानुभानुनिकरो भात्येककालोद्गतः।
यश्च द्वादशभाःप्रभः प्रकृतिवद्याप्यैव लोभं स्थितः
सोऽयं द्वादशसर्गगं विवरणं श्रीकुम्भकर्णो व्यधात्।।
पदवाक्यप्रमाणाख्यत्रिसरित्सङ्गमश्रिया।
कुम्भकर्णगिरां योगो न स्यादिष्टार्थदः कथम्।।
स्वभावगम्भीरतया निसर्गदुर्बोधभावा जयदेववाचः।
व्याकर्तुमीष्टे यदि ता नरेशः श्रीकुम्भकर्णो न परः कदाचित्।।
श्रीगीतगोविन्दविचारसूक्तिसुरापगासंभवतोऽनुमेयम्।
श्रीकुम्भकर्णेऽखिलराजिभूभृद्राजत्वभार्या अविचार्यमस्ति।।
रे मूढाः! किमुपास्यते गुणिगणप्रावीण्यपाटच्चरं
भूभृद्वृन्दमनेककाकुरचनाचातुर्यचाटूक्तिभिः।
श्रीकुम्भः सकलाभिलासफलदश्चेत्सेवितुं प्राप्यते
सौरभ्यं यदि मौक्तिके किमपरं श्लाघ्यं भवेद्भूतले।।
सुवर्णमुक्ताफलनिर्मितेयं सत्सूक्तिमाला सुमनःप्रयुक्ता।
श्रीकुम्भभूभीपतिनोपयुक्ता श्रीवासुदेवार्पणमस्तु साक्षात्।।
नाभूवन्कति नाम केऽपि सुधियस्तत्तद्गुरूपासना-
भ्यासासादिततत्स्वतोषजननप्रोल्लासिवाग्विभ्रमाः।
स्वच्छन्दप्रसरद्वचःसुरसरित्कल्लोललोलोक्तिभिः
स्वाधीनीकृतसर्वतःसहृदयः श्रीकुम्भ एव प्रभुः।।७३ ।।

इति श्रीसरस्वतीरससमुद्भूतकैरवोद्याननायकेनाभिनवभरताचार्येण मालवाम्भोधिनाथ-महीधरेण यवनवरतिमिरकुलसङ्कुलसरङ्गपुरजलनिधिजलैकचुलुकेनमुनिवरेण प्रागुदक्प्रतीचीदिगाधिपराजगजहठादानदर्शितानन्यसाधारणपौरुषेणमेदपाटसमुद्र सम्भवरोहिणीरमणेन रायगुरुचापगुरुसेलगुरुरामां च परमगुरुवङ्गालगारायां (?) चामुह-वनेत्यादिविरुदराजिविराजमानेन अरिराजमत्तमातङ्गपञ्चाननेन सङ्गीतमीमांसामां सलमतिना प्रत्यर्थिपृथ्वीपतितिमिरततिनिराकरणप्रौढप्रतापमार्तण्डेन वैरिवनितावैधव्य दीक्षादायगुरुणा बलोद्धतराजकदम्बकदम्बोत्पाटनदक्षिणेन बलहीनराजकस्थापनाचार्येण भूमण्डलाखण्डलेन चित्रकूटविभ्रमाध्युष्टनरेश्वरेण गजनरतुरगाधीशराजत्रितयतो डरमल्लेन वेदमार्गस्थापनचतुराननेन याचकल्पनाकल्पद्रुमेण वसुंधरोद्धरणादिवराहेण भवानीपतिप्रसादपरिप्राप्तहृष्टशरीरशालिना ऋणत्रय्यपाकरणकारणसकलतीर्थाधिदैवत-गयागतयवननिगडनिर्वासनेन त्रिजगतीतापत्रयोन्मूलनमूलहेतुना महेन्द्रमुखाभिनेय-गताभिनयप्रपञ्चरचनाकरतलकलितामन्त्यकफलवदविकलपथी कृतविश्ववास्तुवस्तुना वसुमतीमण्डलमध्यवर्तिचापोपकारतोडरमल्लेन नादेनेव मूर्तिमता सूर्यत्रितयवेदितराज-चक्रचूडामणिना महाराज्ञीहृदयसौभाग्यदेवीहृदयनन्दनेन महाराजरणश्रीमोकयोर्विदटी-लेन्द्रतनुजन्मना महाराज्ञीश्रीअपूर्वदेवीहृदयाधिनाथेन महाराजाधिराजमहाराज-श्रीकुम्भकर्णमहामहेन्द्रेण विरचितायां रसिकप्रियानाम्न्यां श्रीगीतगोविन्दटीकायां द्वादश: सर्ग: समाप्त:।।७३।।

## (३) जगद्धरकृत-सारदीपिका (टीकानास्ति)

## (४) शंकरमिश्रकृत- रसमञ्जरी (टीकानास्ति)

## (५) लक्ष्मीधरकृत- श्रुतिरञ्जनी (टीकानास्ति)

## (६) शुक्लध्वजनृपतिकृत- सारवती (टीकानास्ति)

## (७) वनमालि भट्टकृत- सञ्जीवनी (टीकानास्ति)

## (८) नारायण पण्डितकृत- पदद्योतनिका

।।७३।। एवं समापितगीतगोविन्दो भगवान् जयदेवकवि: राधार्थितालङ्कार-कर्ताऽयं सर्वैश्वर्यपूरकोऽपि भूयादित्यन्तेऽपि तं सम्प्रार्थयते इत्थमिति। इत्थं मेघैरित्याद्युक्तप्रकारेण केलिपरे क्रीडासक्ते श्रीकृष्णे, सत्सप्तमीयम्। यमुनाया: यमुनानद्यास्तीरे रोधसि राधया समं सह विहृत्यं विक्रीड्य तद्रोमावलिमौक्तिकावलियुगे तस्या राधाया रोमावलि: नाभिमारभ्य हृदयपर्यन्तं विद्यामाना केशपङ्क्ति: तस्या युगं युग्मम्; ''युग्मं तु युगलं युगम् **इत्यभिधान" (रत्नमाला)**; तस्मिन्; केशपाश:

तदुभय पार्श्वस्थमौक्तिकावलियुगञ्चेति त्रयं दृष्ट्वा वेणीभ्रमं त्रिवृद्धवेणीयमिति भ्रमं भ्रान्तिं बिभ्रति धृतवति सति; तत्र वेण्यां आह्लादिकुचप्रयोगफलयो: आह्लादिनि अशुष्कितत्वेन प्रफुल्ले कुचावेव प्रयोगफले गुच्छौ तयो:, सप्तमीद्विवचनम्। वीप्साभृतो:, वीप्सा क्रियासमभिहार: तां बिभ्रतो:। कृष्णस्य धृतवत: पुन: पुन: स्पृशत इत्यर्थ:। पुरुषोत्तमस्य, पुरुषेषु उत्तमस्य प्रधानस्य हस्तयो: व्यापारा: स्पर्शनरूपा: स्फीतां स्पष्टं मुदं सन्तोषं सम्पदमनल्पैश्वर्यञ्च ददतु दिशतु इत्यन्वय:। दा दाने इत्यतो लोट् ददातु दत्तात्, दत्तां ददतु इति रूपाणि। नाभेरूर्ध्वं भोगिभोगाकारं केशोद्गमं दृष्ट्वा तदुभयपार्श्वस्थमुक्ताहारं च दृष्ट्वा किमिति वेणीबन्धकस्वर्णगुच्छाविति पुन: पुन: कराभ्यां स्पृष्टवानिति भाव:।।७३।।

## (९) कृष्ण पण्डितकृत-जयन्ती (टीकानास्ति)

## (१०) धनन्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

## (११) पूजारी गोस्वामीकृत-बालवोधिनी (टीकानास्ति)

## (१२) लक्ष्मणकृत-रसिकरङ्गदा (टीकानास्ति)

## (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।। ७३।। इत्थं केलितततीति; पुरुषोत्तमस्य हस्तयोर्व्यापारा: स्फीतां मुदां सम्पदं ददतु। किं विशिष्टर्योहस्तयो: ? तत्र वेण्यामाह्लादो विधत्ते ययोस्ते आह्लादिनी। कुचावेव प्रयागफले वटफले। तयोर्लिप्सां वाच्छां बिभ्रत इति लिप्साभृतौ, तयोलिप्साभृते:। किं कृत्वा ? पूर्वप्रकारेण श्रीराधया सह यमुनाकूले क्रीडापरम्परां विहृत्येति स्वेच्छया विधानपरम्। क्व सति ? तद्रोमावलि मौक्तिकावलियुगे। तस्या: रोमावलिर्मौक्तिका नामावलिहारस्तयोर्युग्मे। वेण्या इति गङ्गायमुनयो: संगमस्य भ्रमं विलासं विभर्ति। रोमावली यमुनया उपमीयने। मौक्तिकावलि गङ्गया च। तत् संगमे प्रयागो भवत्येव। कुचौ तत्फलाभ्यामुपमीयते। कुचप्राप्तौ प्रयागफल प्राप्तिरेव रूपकमलंकार:। शार्दूलविक्रीडितम्वृत्तम्। स्वाधीनभर्तृका नायिका।। पाञ्चाली रीति:। भारतीवृत्ति:। पाञ्चाली गीति:। आदितालस्य पंच हरवक्त्रसमुद्भवा:।।७३।।

**७४- स्वामिन्! भङ्गुरवा(या)लकं सतिलकं फा(भा)लं विलासं(सिन्) कुरु**
**प्राणेश त्रुटितं पयोधरयुगे हारं पुनर्योजय।**
**इत्युक्त्वा सुरतावसानसुखिता या (सं)पूर्णचन्द्रानना**
**स्पृष्टा तेन तथैव जातपुलका प्राप्ता पुनर्मोहनम्।।७४।।**

**(१) नारायणदाशकृत-सर्वाङ्गसुन्दरी** (टीकानास्ति)

**(२) राणाकुम्भकृत-रसिकप्रिया** (टीकानास्ति)

**(३) जगद्धरकृत-सारदीपिका** (टीकानास्ति)

**(४) शंकरमिश्रकृत-रसमञ्जरी** (टीकानास्ति)

**(५) लक्ष्मीधरकृत-श्रुतिरञ्जनी** (टीकानास्ति)

**(६) शुक्लध्वजनृपतिकृत-सारवती** (टीकानास्ति)

**(७) वनमालि भट्टकृत-सञ्जीवनी** (टीकानास्ति)

**(८) नारायण पण्डितकृत-पदद्योतनिका**

।।७४।। स्वामित्यादिनोक्तमेव व्यासससमासाभ्यां वर्णयन्ति कवय इति पुनर्विशदयति स्वामिन्निति। हे स्वामिन् हे मन्नियामक। त्वमित्यध्याहार:। त्वं भङ्गुरबालकं (भङ्गुराणि बालकानि) चूर्णकुन्तलानि यस्मिन् तत् सतिलकं कस्तूरीतिलकसहितं फालं ललाटं विलासं सुप्रकाशितं कुरु। माराङ्केत्यादिनोक्तमन्मथयुद्धेन ललाटे विस्रस्तकेशान् परिकर्मय [१] वक्रतिलकं रुजु कुर्वित्याशय:। प्राणेश हे प्राणापानादिपञ्चप्राणानां ईश प्रेरक। यद्वा हे प्राणेश मदिन्द्रियनियामक। अथ वा मुख्यप्राणेश। पयोधरयुगे स्तनयुग्मे त्रुटितं रतिके लिसङ्कुलरणे छिन्नं हारं, जात्येकवचनम्; मुक्ताविद्रुमादिनवरत्नहारम् पुनर्मुहुर्योजय सम्मेलय। अत्र लिखति सतिलकं मणिसरममलं तारकपटलम् इत्यादिना कृष्णेन हारदीनां योजनात्पुनरित्युक्तम्। इति स्वामिन्नित्याद्युक्तप्रकारेण उक्त्वा प्रोच्य सुरतावसानसुखिता सुरतस्य रमणक्रियाया अवसानेन समाप्त्या सुखिता सुखवती। पूर्णचन्द्रवत् आननं यस्या: सा तथा। तेन कृष्णेन तथैव स्वोक्तप्रकारेणैव स्पृष्टा अलङ्कर्तुमिति शेष:; या राधा सा जातपुलका उत्पन्नरोमाञ्चा सती मोहनं मोहवशं पुन: प्राप्ता बभूवेत्येकान्वय:। निकुञ्जशय्यायां कृष्णस्पर्शेन रमणात्पूर्वं मोहितत्वात्पुनरित्युक्तम् ।।७४।।

इति श्रीमद्विद्वत्प्रवरभिषगम्मणजनुषा
कृतायां सन्न्यायश्रुतिपदविदा कृष्णविदुषा।

प्रगीयद्गोविन्दान्वयविवृतगूढार्थविवृतौ
जयन्त्यां सर्गोऽसौ समभवदिह द्वादशत:।।

### (९) कृष्ण पण्डितकृत-जयन्ती (टीकानास्ति)

### (१०) धनञ्जय धरणीदेवकृत-सर्वाङ्गसुन्दरी (नूतन) (टीकानास्ति)

### (११) पूजारी गोस्वामीकृत-बालवोधिनी (टीकानास्ति)

### (१२) लक्ष्मणकृत-रसिकरङ्गदा (टीकानास्ति)

### (१३) प्रफुल्लमिश्रकृत- स्वर्णलता टिप्पणी

।।७४।। स्वामित्यादिनोक्तमेव व्याससमासाभ्यां वर्णयन्ति कवय इति पुनर्विशदयति स्वामिन्निति। हे स्वामिन् सम्भोधने श्रीकृष्णस्य। रत्यन्ते अस्तव्यस्तस्य केशपाशस्य समीकरणार्थं तावदीयमुक्ति:। सर्वं खलु मन्मथयुद्धार्थं वस्तमाभरणानि चावतार्य प्राचलत् किल। अत: तेषां पुन: सज्जीकरणर्थामित्थ श्रीराधायारुक्तिरियम्। हे स्वामिन् प्रियतम! तव भङ्गुरवालकं भङ्गुराणि वा या अलकानि चूर्णकुन्तलानि व्यस्तानि सन्ति तानि सज्जीकुरु समीकुरु वा। तेन त्वमित्यध्याहार:। पुन: ललाटे फाले भाले वा कस्तुरीद्वारा तिलकव्यञ्जने शोभां विधायस्व। यतोहि मारविक्रमे तत्सर्वं वक्रतां गतम्। अत: ऋजुकरणं युज्यते। मदीयवक्षस्थले हार: च्छिन्नतां गतमस्ति। अत: नवरत्नहारं संयोज्य स्तनौ अलं कुरु। एवमुक्त्वा यदा रतिसौख्येन पूर्णचन्द्र इव प्रफुल्लतां गता प्रियतमा तस्य प्रियतमस्य अङ्ग स्पर्शेण पुन: रोमाञ्चिता। अष्टसत्व-विकारेण मुग्धा अभूत् श्रीराधा। अत्र कविनां वाक्येषु रतिकर्मणि पुनरुक्तता नास्ति। तत् स्मर्यते,

चुम्बिज्जइ सअहुत्तं अवरुन्धिज्जइ सहस्सहुत्तं वि।
रमिअ पुणो वि रमिज्जइ पिए जणे णात्थि पुणरुत्तमद।।
चुम्ब्यते शतकृत्वोऽवरुध्यते सहस्रकृत्व:।
रन्त्वा पुनरपि रम्यते प्रिये जने नास्ति पुनरुक्तम्।। इति च्छाया

गीतगोविन्द व्याखानं कविना यद् विधीयते मातृकृपावलेनेदं सर्वं तत् समाप्यते।
श्रीगणेश पुत्रेण रघुनाथेन धीमता विद्या-विनय-संपन्नकाशीनाथेन सुनुना।
तत् पुत्रेण प्रफुल्लेन कविना विवुधेन च व्यरचि टिप्पणी ह्यत्र स्वर्ण्णलताभीदा मुदा।।

इति उत्कल भूमण्डलाखण्डल कविकुल तिलक कविराज: श्रीजयदेवकृतं श्रीगीतगोविन्दं संमन्नम्।।७४।।

❁ ❁ ❁

# ।। परिशिष्ट ।।

## पदभावार्थ-चन्द्रिका-टीका



# परिशिष्ट

## (श्रीकान्तमिश्रकृत-पदभावार्थ-चन्द्रिका-टीका)

## ।। प्रथम सर्गः ।।

। सामोददामोदर ।

[1]**श्रीगणेशाय नमः**

**१ - मेघै र्मेदुरमम्बरं वनभुवः श्यामास्तमालद्रुमैर्**
**नक्तं भीरुरयंत्वमेव तदिमं राधे गृहं प्रापय।**
**इत्थं नन्दनिदेशतश्चलितयोः प्रत्यध्वकुञ्जद्रुमं**
**राधामाधवयोर्जयन्ति यमुनाकूले रहःकेलयः ।।१ ।।**

[2]श्रीकृष्णाय नमः

समस्तगोपसुन्दरी-विलासरासमण्डितः
कलानुरूपकेलिषु प्रवीणबुद्धिपण्डितः।
भवेन्द्रब्रह्मकाद्यभेदगोपवृन्दनायक-
स्तनोतु नः शिवं सदा मनोजमानहा हरिः।।१ ।।
श्रीगीतगोविन्दटीकेयं पदभावार्थचन्द्रिका।
महदाज्ञाकृतारम्भसाहसेति वितन्यते।।२ ।।

---

१. घ. श्रीगणेशाय नमः - इतिनास्ति; च. ओं - इत्यधिकः पाठः।
२. ख. ..............नन्द माधवाय नमः - इति पाठः;
घ. श्रीगणेशाय नमः - इति पाठः; च. गणेशः - इति पाठ।
३. ख., घ., च., कलानु इत्यारभ्य नायक इत्यन्तो नास्ति।
४. ख., घ., च., छ., करोतु भावुकं मधौ मनो - इति पाठः।
५. घ., च., श्री - इति नास्ति।

नोदहरन्ति[१] विशदाः सुरतानीकसंगरम्

इति श्रीपरमानन्दरतिवर्णनमीर्यते ।।३ ।।

अथैतत्काव्यस्य द्वादशसर्गमयस्य[२] निर्विघ्नपरिसमाप्त्यर्थं[३] परमाभीष्टदेवता-राधामाधवस्मरणलक्षणं मङ्गलमाचरति[४] ,मेघैरित्यादिना[५]। राधामाधवयो रहःकेलयः एकान्तक्रीडा जयन्ति सर्वोत्कर्षेण वर्त्तन्ते[६]। कथंभूतयोः ? इत्थम् अमुना प्रकारेण[७] नन्दनिदेशतो नन्दस्य आज्ञया चलितयोः प्रस्थितयोः[८]। नन्दनिदेशमेवाह-त्वमेवेति। हे राधे ! तत्तस्मात्त्वमेवेमं कृष्णं गृहं प्रापय[९]। अत्र एव[१०] शब्दः कोपोक्तौ। बालोऽयं यत्त्वया एतावद्दूरानीतस्तस्मात्त्वमेव[११] प्रापयेति हेतोः[१२]। यतोऽयं कृष्णो नक्तं रात्रौ भीरुः बालत्वाद्भयशीलः। भयहेत्वन्तरमपि-मेघैरिति। अम्बरम् आकाशं मेघैर्मेदुरं स्निग्धं तथा वनभुवः[१३] वनभूमयस्तमालद्रूमैस्तमालवृक्षैः श्यामाः। किं जयन्तीत्यत आाह-प्रत्यध्वेति[१४]। यमुनायाः कुले प्रत्यध्वकुञ्जद्रुमे अध्वनि[१५] कुञ्जे कुञ्जे द्रुमे द्रुमे इत्यर्थः। अध्वनः कुञ्जद्रुमांल्लक्ष्मीकृत्येति वा। अत्रायं नक्तं भीरुरिमं गृहस्थं[१६] गृहं प्रापयेंत्यत्र[१७] एतस्यान्वादेशे द्वितीयाटौस्स्वेनः[(अ)] इति सुत्रेण एनादेशः कथं न स्यादिति

१. क., ख., न वर्णयन्ति - इत्यधिकः पाठः।
२. घ., च., छ., सर्गो यस्य - इति पाठः।
३. ख., घ., च., परि - इति नास्ति।
४. ख., घ., च., मङ्गलमादावाचरति - इति पाठः।
५. ख., च., मेघैरित्यादि - इति पाठः।
६. घ. प्रवर्त्तत - इति पाठः।
७. च. अमुना प्रकारेण - इति नास्ति।
८. घ. प्रस्थितयोः - इति नास्ति।
९. ख. नय - इत्यधिकः पाठः।
१०. च. अत एव - इति पाठः।
११. घ. प्रापय इत्यारभ्य त्वमेव इत्यन्तो नास्ति; च. इमाम् - इत्याधिकः पाठः।
१२. घ. हेतौ - इति पाठः।
१३. क., ख., घ., छ., वनभुवः - इति नास्ति।
१४. च. प्रत्यध्वेति - इति नास्ति।
१५. घ., च., अध्वनि - इत्याधिकः पाठः।
१६. घ. च. गृहस्थम् - इति नास्ति।
१७. ख. प्रापयेत्यर्थः - इति पाठः।
(अ) पा. अष्टाध्यायी - २-४-३४.

न[१] वाच्यम्; अन्वादेशः विषयत्वाभावात् विशिष्टकथनस्य पुनरतिविशिष्टवाक्यस्यान्वादेशः प्रोच्यते। हह रात्रौ भीरुरित्यनेन भीरुत्वविशिष्टतया न विशिष्टं पुनः कथनमिति किञ्चित् प्रतिपाद्य पुनरनुद्यते (इति न) सोऽन्वादेश इति श्रीपतिदत्तः। अम्बरं व्योम्नि वाससी **इत्यमरः**[(अ)]। अथ प्रदोषा[२] च नक्तं च रजनाविति[(आ)]। त्रस्ते भीरुक भीलुकाः इत्यपि च[(इ)]। निदेशः शासनेति च[(ई)]। निकुञ्जकुञ्जौ वा क्लीवे लतादिपिहितोदरे[(उ)]। एकान्तार्थे रहस्ययमित्यपि[(ऊ)] ।।१ ।।

**२-वाग्देवताचरितचित्रितचित्तसद्मा**
**पद्मावतीचरणचारणचक्रवर्ती।**
**श्रीवासुदेवरतिकेलिकथासमेत**
**मेतं करोति जयदेवकविः प्रबन्धम्।।२ ।।**

अथ सकलजनमनोरमं शृङ्गाररसगर्भं भगवत्केलिवर्णनप्रधानकाव्यं प्रतिजानीते-वाग्देवतेति। जयदेवकविरेतं गीतगोविन्दाख्यं प्रबन्धं करोति। कीदृशी ? (कीदृशम्) श्रीः लक्ष्मीः राधारूपेणवतीर्णा, वासुदेवः [३]श्रीकृष्णस्तयोः रतिकेलिकथा। (कथया) सुरतक्रीडानुवर्णनेन संमतं युक्तम्[४]। सामर्थ्यमाह, वाग्देवतेति। वाक्स्वरूपा या देवता सरस्वती तस्याश्चरितेन प्रसादमाधुर्य्यादिगुणसम्पन्नलोकोत्तरकाव्यरचनारूपेण चित्रितं चित्रमालेख्यं[५] तद्युक्तं[६] कृतं चित्तरूपं सद्म गृहं यस्य सः। अत्र सुदर्शनत्वेन नानावर्णमयत्वेन

१. क., न इति नास्ति।
२.ख., छ. - दोषा इति पाठः।
३. ख., घ., च., श्री - इति नास्ति।
४. ख. संयुक्तम् - इति पाठः.
५. क., ख., च., छ. - आलेख्यम् - इति पाठः।
६. क., छ. युक्तं - इति पाठः।
(अ) अ. को. - ३.३१८२.
(आ) अ. को. - ३.४.६
(इ) अ. को. - ३.१.२६
(ई) अ. को. - २.८.२५.
(उ) अ. को. - २.३.८.
(ऊ) अ. को. - २.८.२२

वाग्देवताचरितस्य चित्रत्वेन वर्णनम्। कवित्वधनानिधानत्वेन कृष्णकेलिवर्णनादिना भवतापहानित्वे[१] विश्रामस्थानत्वं सद्मतया वर्णनम् (वर्णितम्)। गृहमपि विविधालेख्यैर्मण्डितं भवतीति ध्वनिः। पुनः सामर्थ्यमाह - कीदृशः कविः ? पद्मावती नाम[२] जयदेवपत्नी तस्याश्चरणयोर्यच्चारणं सञ्चारणं नर्तनमिति यावत्। तेन चक्रवर्ती सार्वभौम[३] इव सदानन्दमत्वादित्यर्थः। पद्मावतीचरणाभ्यां चारणचक्रवर्ती नटसार्वभौम इव[४]। एतेन तस्य कृष्णभक्ताधिक्यं शृङ्गारित्वं च व्याख्याते[५]। सरसकाव्यकरणेऽधिकारोऽपि[६] निरूपितः। उक्तं च, (आग्नेपुराण-ध्वन्यालोक उद्यत ३/२५०

शृङ्गारी चेत् कविः काव्यं जातं रसमयं जगत्।
स एव वीतरागश्चेन्नीरसं सर्वमेव तत्[अ]।।

केचिन्तु पद्मा इत्याख्या[७] विद्यते यस्या इति पद्मावती लक्ष्मीः तस्याः चरणयोश्चोरणेन सेवनेन चक्रवर्ती राजेव निरपेक्षः। सदा लक्ष्म्याराधनपरत्वेन दरिद्र्यराहित्यं व्याख्यातम्। दारिद्र्येण [८]शृङ्गाररसो न ज्ञायत इति भावः। गृहं गेहो दवसितं वेश्म सद्म निकेतनम् इत्यमरः[आ] चारणास्तु कुशीलवा इत्यापि[इ] च[९]।।२।।

१. घ., च. हरित्वेन - इति पाठः।
२.घ. नाम्नी - इति पाठः।
३. च. इति वा - इत्याधिकः पाठः।
४. च. "इव सदानन्द" इत्यारभ्य "सार्वभौम इव" इत्यान्तो नास्ति।
५. ख., घ., च. व्याख्यातम् - इति पाठः।
६. ख., घ. अपि - इति नास्ति।
७. ख. इति - इति नास्ति।
८. घ. च - इति नास्ति;
क., ख. वारणास्तु ( ?) - इत्यधिकः पाठः।
(अ) सं. कं. - ५.३.
(आ) अ. को. - २.२.४.
(इ) अ. को. - २.१०.१२.

**३-यदि हरिस्मरणे सरसं मनो यदि विलासकलासु कुतूहलम्।**
**मधुरकोमलकान्तपदावलीं श्रृणु तदा जयदेवसरस्वतीम् ।।३ ।।**

सम्प्रति काव्यस्योत्कर्षतां[१] दर्शयति द्वाभ्यां श्लोकाभ्याम्, यदीत्यादि। हे सज्जन[२] ! हरिस्मरणे कृष्णानुचिन्तने मनः सरसं सानुरागम्, यदि च विलासः स्त्रीणां-[३]हावविशेषस्तत्सम्बन्धिनीषु[४] कलासु क्रीडासु[५] कुतूहलं कुतुकम्। तदा जयदेवस्य कवेः सरस्वतीं शृणु। कीदृशीम्[६], मधुरकोमलकान्तपदावलीम्। मधुरत्वं द्विविधम्, शब्दाश्रितम् अर्थाश्रितं च। शब्दाश्रितं पृथक्पदत्वम्। अर्थाश्रितं [७]चोक्तिवैपरीत्यम्। तदुक्तं मधुरं[८] (इति)। कोमलत्वं द्विविधम्। तत्र शब्दकोमलत्वं बन्धस्यापुरुषत्वम्, अर्थकोमलत्वं च[९]। एवं कोमलकान्तत्वं[१०] द्विविधम्, शब्दाश्रितं मनःश्रोत्रप्रीतिपदत्वम् उज्ज्वलत्वम्[अ] अर्थगतं च। तदुभययुक्ता कान्ता पदावली पदपरम्परा यत्र ताम्। शृङ्गारादौ विषे वीर्ये गुणे रागे द्रवे रसः इत्यमरः[आ]। तात्कालिको विशेषस्तु विलासोऽङ्गक्रियादिषु। कला स्याच्चन्द्रकलायां कला स्यात्क्रीडनादिषु[इ] ।।३ ।।

---

१. ख. स्वकाव्यस्योत्कर्षम् - इति पाठः।
२. ख., घ., छ. सज्जनगण - इति पाठः।
३. छ. भाव - इति पाठः।
४. छ. स्तत्संबन्धिषु - इति पाठः।
५. घ. क्रीडासु - इति नास्ति।
६. ख.० घ., च. जयदेवसरस्वतीं - इत्यधिकः पाठः।
७. क., ख., घ. चेति - इति पाठः; च. च - इति नास्ति।
८. ख., घ., च. तदयुक्तं मधुरः - इति पाठः।
९. क., छ. - अर्थकोमलत्वं च - इति नास्ति।
१०. क., ख., छ. - कोमलकान्तमपि - इति पाठः।
(अ) औज्ज्वल्यं कान्तिः (का. सू. वृ. ३.१.२५)।
(आ) अ. को.३.३.२२७
(इ) वि. प्र. १०४-४३. विश्वप्रकाशाख्यस्य कोशस्य वर्तमानप्रकाशितसंस्करेण श्लोकोऽयं न मिलति, परन्तु कोशस्यैका मातृका गं. ना. झा. के. सं. विद्यापीठस्य मातृकासंग्रहालये वर्तते, यत्रायं श्लोकः पठितोऽस्तिः।

**४- वाचः पल्लवयत्युमापतिधरः सन्दर्भशुद्धिं गिरां**
**जानीते जयदेव एव शरणः श्लाघ्यो दुरूहद्रुते।**
**श्रृङ्गारोत्तरसत्प्रमेयरचनैराचार्यगोवर्धन-**
**स्पर्धी कोऽपि न विश्रुतः श्रुतिधरो धोयी कविक्ष्मापतिः।।४।।**

वाच इत्यादि। उमापतिधरनामा लक्ष्मणसेनामात्यो वाचः पल्लवयति विस्तारयति। तथा चोमापतिधरस्योक्तिशून्यशब्दगुणचित्रं न हृदयाह्लाजनकमिति भावः। शरणःशरणनामा कविः[१] दुरूहस्य गूढ़ार्थककाव्यस्य शीघ्ररचने[२] श्लाध्यः स्तुत्यः। शरणकवेरपि काव्यं गृढ़ार्थत्वादिदोषयुक्तं प्रसादहीनमिति[३] भावः। तथा च शृङ्गाररस एवोत्तरः श्रेष्ठो यत्रः शृङ्गारेण उत्तरं प्रधानं वा सत्प्रमेयमुत्तमं वस्तु तस्य रचनैः कवित्वग्रन्थनैः आचार्यगोवर्धनाचार्येण[४] सह स्पर्द्धावान् कोऽपि न ख्यातः। शृङ्गाररसप्रधानकाव्यरचनायामेव तस्य सामर्थ्यम्, रसान्तरवर्णनेऽप्रौढ़ एवेति भावः। इतरविद्या अध्यापनादिना[५] धोयीकविक्ष्मापतिः धोयीनाम कविराजः श्रुतिधरः श्रुतिः श्रवणं तन्मात्रादेव ग्रन्थादिग्राही[६] तथा च तस्योच्चरितमात्रग्राहित्वं न तु[७] कवितायां [८]कविराजपदवीमानीतवान्। गिरां वचसां सन्दर्भशुद्धिं गुणालङ्कारसम्पन्नरचनाविशेषं जयदेव एव[९] जानीते, नान्यः। अतो जयदेवकविताश्रवणे महान् सन्तोष इति भावः। "पल्लवः स्यात् किसलये विटपे विस्तरे बले" इति **विश्वः**[(अ)] "लघुक्षिप्रमरं द्रुतं" **इत्यमरः**[(आ)]।

"उत्तरं प्रतिवाक्ये स्याद्बर्ध्वोदीच्योत्तमेऽन्यवद् इति "

१. क., घ., च., छ. कविः - इति नास्ति।
२. छ. काव्यशीघ्ररचने - इति पाठः।
३. ख. घ., छ., च. प्रसादादिगुणहीनमिति भाव - इति पाठः।
४. ख., ग., च., छ. गोवर्द्धनस्य अस्पर्द्धो - इत्यधिक पाठः।
५. क., घ., छ., अध्यापनाचार्य्यत्वं - इति पाठः।
६. ख., च. ग्रन्थग्राही - इति पाठः।
७. ख., घ., च., तस्य - इत्यधिकः पाठः।
८. ख., घ., च. तस्य - इत्यधिकः पाठः।
९. छ. एव - इति नास्ति।
(अ) वि. प्र. वान्तवर्गः - ३।
(आ) अ. को १.१.६४.
(इ) वि. प्र. रान्तवर्गः ९९

।। प्रथमः प्रबन्धः / गीतम् १ ।।

।। मालवराग-रूपकतालाभ्यां गीयते ।।

**१-प्रलयपयोधिजले धृतवानसि वेदम्।**

**विहितवहित्रचरित्रमखेदम्।।**

**केशव! धृतमीनशरीर जय जगदीश! हरे! ।।१।।**

भक्तजनमनोरथपूरणाय भगवतोऽवतारपरिग्रह इति ममाप्यभिलषितं करिष्यतीति अवतारणामसंख्यत्वेऽपि प्रधानतया दशावतापुरस्कारेणैव श्रीकृष्णं स्तुवन्नादौ मीनरूपं स्तौति, प्रलयेत्यादि। गीतस्यास्य[१] मालवरागो, रूपकतालः। [२]रागलक्षणं यथा,

नितम्बिनीचुम्बितवक्त्रपद्मः

शुकद्युतिः कुण्डलवान् प्रसत्तः।

सङ्गीतशालां प्रविशन् प्रदोषे

मालाधरो मालवरागराजः[(अ)]।।

रूपके स्याद्रुतं लघु इति **सङ्गीतरत्नाकरः**। गीतार्थस्तु[३], हे केशव! जय अतिशयेन सर्वोकर्षेण वर्तस्व[४]। (जगदीशेति) जगतां चतुर्दश-भुवनानाम् ईशः नियन्ता। अत्र हेतुः-हे हरे! हरति भक्तानां क्लेशमिति हरिः तादृशः। कथम्भूत धृतमीनशरीरः? धृतं स्वेच्छया परिगृहीतं मीनस्य मत्स्यस्य[५] शरीरं येन तादृशः। एतच्च ध्रुवपदम्, [६]प्रतिपदमनुवर्तमानत्वात्। तदुक्तं, ध्रुवत्वाच्च ध्रुवो ज्ञेय इति। अत्र यद्यपि धृतमीनशरीर इति क्वचिद् धृतकच्छपरूपइत्यादि भिन्नं[७] भिन्नं पदमस्ति[८], तथापि जय जगदीश हरे इत्यस्य प्रतिपदमनुवर्त्तमानत्वाद्[९] ध्रुवत्वम्।

मीनावतार-[१०]प्रयोजनमाह- [११]प्रलयेति। त्वं[१२] प्रलयपयोधिजले प्रलयकालीनाः परस्परं सम्मिलिता ये पयोधयः समुद्रास्तेषां जले वेदं निमज्जितं

१. घ. गीतस्य - इति पाठः।
२. क., ख., च., छ. रागलक्षणं मालवरागराजः इत्यन्तो नास्ति।
३. क., छ. गीतार्थस्तु - इति नास्ति।
४. घ. प्रवर्त्तस्व - इति पाठः।
५. घ., च. मत्स्यस्य - इति नास्ति।
६.घ. प्रतिपदं - इति नास्ति।
७. ख., घ., भिन्नं - इति नास्ति।
८. ख. अपि - इति अधिकः पाठः।
९. क., ख., च - इत्यधिकः पाठः।
१०. घ., च. परिग्रह - इत्यधिकः पाठः।
११. क., च., महा - इत्यधिकः पाठः।
१२. क., ख., च. त्वं - इति नास्ति।
(अ) श्रीशुभङ्करविरचितः सङ्गीतदामोदरः, संस्कृत-कलेज, कलकता - १९६०, तृतीयस्तबकः पृ० सं०-३६।

मीनशरीरमुपादाय धृतवानासि। कथं यथा स्यात्? विहितं कृतं वहित्रस्य पोतस्य चरित्रं यत्र तत्तथा। अत्र पयोधिपदेनैव जलवत्त्वे प्राप्ते पुनर्जलपदोपादानमत्र द्वीपादिरहितत्वेन विश्रामस्थलाभावं श्रावयितुमिति। तथा च निरालम्बेऽपि पयोधौ वेदं धृतवानासि इति वेदधारणार्थमेव ते शरीरग्रहणमिति भावः। पृथुरोमा झषो मत्स्यो मीनो वैसारिणोऽण्डजः इत्यमरः।।१।।

**२- क्षितिरतिविपुलतरे तव तिष्ठति पृष्ठे**
**धरणिधरणकिणचक्रगरिष्ठे ।**
**केशव! धृतकच्छपरूप! जय जगदीश! हरे!।।२।।**

कच्छपरूपं स्तौति, क्षितिरिति। हे केशवः! धृतकच्छपरूप! धृतं कच्छपस्य रूपं येन सः तत् सम्बोधने तादृशः। कच्छपावतारप्रयोजनमाह, क्षितिरिति। तव पृष्ठे क्षितिः पृथ्वी तिष्ठति। वर्त्तमानकालनिदेशन सम्प्रत्यति तव पृष्ठे क्षितिस्तिष्ठतीति। कथंभूते पृष्ठे? अतिविपुलतरे अतिशयेन पञ्चाशत्कोटियोजनविस्तीर्णपृथिव्यपेक्षयाऽपि विस्तृते। पुनः कथम्भूते धरणीति। धरण्याः पृथिव्या धारणेन यत्किणचक्रं चक्राकृतिभूत-रूधिरमण्डलं तेन गरिष्ठे गौरवयुक्ते। कुर्मे कमठकच्छपौ **इत्यमरः**। "व्रणचिह्ने घुणे किणः इति" **हारावली**।।२।।

१. क., घ., च., छ. कविः - इति नास्ति।
२. छ. काव्यशीघ्ररचने - इति पाठः।
३. ख. घ., छ., च. प्रसादादिगुणहीनमिति भाव - इति पाठः।
४. क.,ख., छ. - द्वीपादिरहितेन - इति पाठः।
५. घ. भावयितुमिति - इति पाठः।
६. ख., घ., च. परिग्रह - इति पाठः।
७. घ. कच्छपरूपावतारं - इति पाठः।
८. घ., च. कच्छपरूपं - इति पाठः।
९. क., ख., च., छ., तत् - इति नास्ति।
१०. घ. योजन - इति नास्ति।
(अ) अ. को. १.१०.२७.
(आ) अ. को. १.१०.२१
(इ) हारावली:, श्लो - २५४, पृ० २७

**३-वसति दशनशिखरे धरणी तव लग्ना।**
**शशिनि कलङ्ककलेव निमग्ना।।**
**केशव! धृतशूकररूप! जय जगदीश! हरे!।।३ ।।**

वराहावतारं स्तौति, वसतीत्यादि। हे केशव! धृत शूकररूप! धृतं शूकरस्य रूपं येन तादृश, जय, जय। तत्प्रयोजनमाह, वसतीति। तव दशनशिखरे दन्ताग्रे लग्ना संश्लिष्टा धरणी पृथ्वी वसति। कस्मिन् केव, शशिनि चन्द्रे निमग्ना कलङ्ककलेव लाञ्छनलेश इव। अत्र बालचन्द्रस्य सादृश्यं दशने प्राप्यते। बालचन्द्रस्य दीर्घतया सादृश्यमिति। निमग्नेति[१] पदेन-दृश्यत्वम् तस्या: पूर्णचन्द्रे प्रत्यक्षदर्शनात्। रदना दशना दन्ता: **इत्यमर:**[(अ)]। "अग्रं शिखरमित्याहुरद्रिशृङ्गे च तन्मतम्" इति **धरणि:**[(आ)]। कला स्यान्मूलविवृद्धौ शिल्पादावंशमात्रके। षोडशांशेऽपि चन्द्रस्य कलना कालयो: कला इति **विश्व:**[(इ)]।।३ ।।

**४-तव करकमलवरे नखमद्भुतशृङ्गम्।**
**दलितहिरण्यकशिपुतनुभृङ्गम्।।**
**केशव धृतनरहरिरूप जय जगदीश हरे ।।४।।**

नृसिंहरूपं स्तौति, तवेत्यादि। हे केशव! धृतनरहरिरूप! धृतं नरहरेर्नृसिंहस्य रूपं येन तादृश, जय जय। नृसिंहावतारप्रयोजनमाह-तवेति। तव करकमलवरे, करो हस्त: स एव कमलवर:[२] कमलश्रेष्ठस्तत्र नखं तिष्ठति। कथम्भूतं नखम्? [३]अद्भुतमाश्चर्यं[४] शृङ्गमग्रभागो यस्य तत्[५]। अद्भुतत्वमाह, दलितेति। दलितो विदारितो हिरण्यकशिपो- र्दैत्यस्य तनुर्देह: स एव भृङ्गो भ्रमरो येन तत्। अन्यत्र मकरन्दपानादिना

---

१. घ., च. निमग्ना - इत्यधिक: पाठ:।
२. छ. कमलवर: - इति नास्ति।
३. क., घ., छ. नखम् - इति नास्ति।
४. घ., च., छ. अद्भुतमाश्चर्यभूतम् - इति पाठ:।
५. क., ख., छ, तम् - इति पाठ:।
(अ) अ. को. २.६.९०
(आ) सम्प्रति कोशोऽयं नोपलभ्यते।
(इ) वि. प्र. लान्तवर्ग: - ४३

भृङ्गानां कमलेन तृप्तिः इदं तु [१]नृसिंहकरकमलाग्रभागेन भृङ्गमेव विदारितवानित्यद्भुतम्। अत्र[२] नृसिंहकरस्य कमलत्वनिरूपणेन[३] हिरण्यकशिपोर्दैत्यस्य[४] देहस्य भृङ्गत्वनिरूपणेन नृहतोऽपि हरिण्यकाशिपोः कायस्य[५] नृसिंहकराम्बुजापेक्षया अतिसूक्ष्मत्वं सूचितम्। "पुनर्भवः कररूहो नखोऽस्तो नखरोऽस्त्रियाम्" **इत्यमरः**[(अ)]। शृङ्गं प्रभुत्वे शिखरे चिह्ने क्रीडाम्बुयन्त्रके विषाणोत्कर्षयोश्चाथ शृङ्गः स्यात्कुर्चशीर्षके इति **विश्वः**[(आ)]। "तनु काये कृशे चाऽल्पे विरलेऽपि" च वाच्यवत् इति च[(इ)]।

"द्विरेफपुष्पलिड्भृङ्गाषट्पद भ्रमरालयः" **इत्यमरः**[(ई)] ।।४।।

**५-छलयसि विक्रमणे बलिमद्भुतवामन।**
**पदनखनीरजनितजनपावन।।**
**केशव! धृतवामनरूप! जय जगदीश! हरे।।५।।**

वामनरूपं स्तौति - छलयसीत्यादिना। हे केशव! धृतवामनरूप! धृतं वामनस्य खर्वस्य[६] रूपं येन तादृश, जय जय[७]। वामनावतारप्रयोजनमाह, छलयसीति। हे अद्भुतवामन! आश्चर्यरूपवामन! विक्रमेण पराक्रमे[८] बलिं दैत्यं छलयसि वञ्चयसि[९]। एवं हि **भारते** कथा[(उ)], भगवानुपेन्द्रो वामनरूपं धृत्वा बलेः पदत्रयपरिमितां भूमिं प्रार्थ्य पश्चाद्वृहद्रूपं प्रकटीकृत्य चतुर्दशभुवनैरपि पदत्रयपुरणे

१. छ. श्री - इत्यधिकः पाठः।
२. ख. यत्र - इति पाठः।
३. घ., च. नृहतोऽपि-इत्यधिकः पाठः।
४. घ. नाथस्य - इति पाठः; छ. हिरण्यकशिपोर्दैत्यस्य - इति नास्ति।
५. घ., च., देहस्य इत्यारभ्य कायस्य इत्यन्तो नास्ति; श्री - इत्यधिकः पाठः।
६. घ. खर्वस्य - इति नास्ति।
७. घ. जय - इति नास्ति।
८. घ. पराक्रमे - इति नास्ति; च. पराक्रमेण - इति पाठः।
९. वञ्चयसि - इति नास्ति।
(अ) अ. को. २.६.८३.
(आ) वि. प्र. - गान्तवर्गः - २१
(इ) वि. प्र. - नान्तवर्गः - १८
(ई) अ. को. २.५.२९
(उ) महाभारत, सभापर्व ३५. ८८-११९

तदापराधेन तं बद्ध्वा अधः क्षिप्तवानिति। अद्भुतत्वमेवाह[१], पदनखेति। पदनखसम्बन्धि यन्नीरं गङ्गाजलं तेन जनितमुत्पादिनं जनानां पावनं पावित्र्यं येन तादृशः। अत्रापि **वामनपुराणे** प्रवर्द्धमानस्य भगवतस्त्रिविक्रमस्य चरणाङ्गुष्ठनखाग्रेण विदीर्णे प्रथमे ब्रह्माण्डस्य पार्थिवावरणे तेन वर्त्मना तच्चरणरविन्दप्रक्षालनाय यदागतं[२] जलं[३] भूयो ब्रह्मदत्तार्घजलेनैकीभूतं प्रस्वेदजलं च क्रमेण मर्त्यलोकं प्राप्तं गङ्गेति प्रसिद्धं लोकान्पावयतीति भूलोकस्थितेनापि वामनेन ब्रह्माण्डजलस्यानयनादाश्चर्यमिति ध्वनिः। अम्भोऽर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् **इत्यमरः**[(अ)] ।।५।।

**६-क्षत्रियरुधिरमये जगदपगतपापम्।**
**स्नपयसि पयसि शमितभवतापम्।।**
**केशव! धृतभृगुपतिरूप! जय जगदीश! हरे!।।६।।**

परशुरामावतारं स्तौति, क्षत्रियेत्यादिना[४]। हे केशव! धृतभृगुपतिरूप! धृतं भृगुपतेः परशुरामस्य रूपं येन तादृश, जय जय[५]। एतदवतार[६]प्रयोजनमाह, क्षत्रियेति। क्षत्रियाणां रुधिराणि प्रचुराणि यत्र तादृशे, पयसि कुरुक्षेत्राख्ये तीर्थजले जगत्प्राणिजातम् अपगतपापं नष्टपातकं[७] यथा त्यादेवं स्नपयसि। एवं हि पुराणप्रसिद्धिः[(आ)]। यदवधि-परशुरामेणैकविंशतिवारान् क्षत्रियान्हत्वा तद्रुधिरैः[८] कुरुक्षेत्रे पयःकुण्डान्विधाय[९] पितृतर्पणं कृतम्, तदवधि तन्महातीर्थं जातमिति। कथम्भुतम्?

---

१. क., छ. अद्भुतमेवाह - इति पाठः; ख., घ. अद्भुतत्वमाह - इति पाठः।
२. ख., घ., च. प्रक्षालयदागतम् - इति पाठः;
क - प्रक्षालनायादागतम् - इति पाठः।
३. ख. जलं-इति नास्ति; घ. जलरूपो - इति पाठः।
४. छ. क्षत्रियेत्यादि - इति पाठः।
५. घ. जय - इति पाठः।
६. घ. एतदेवावतार - इति पाठः।
७. घ. पापम् - इत्यधिकः पाठः।
८. घ. एवं हि इत्यारभ्य तद्रुधिरैः - इति नास्ति।
९. घ. कुरुक्षेत्रे पयः कुण्डान्विधाय - इति नास्ति।
(अ) अ. को. १.१०.४.
(आ) अवतारे षोडशमे पश्यम् ब्रह्मद्रुहो नृपान्।
त्रिःसप्तकृत्वः कुपितो निःक्षत्रमकरोन्महीम्।। श्री. भा. १.३.२०

जगत् शमितभवतापं समित: नाशितो भवस्य संसारस्य ताप: सन्तापो यस्मिन् तत्। प्राणिनां पापसम्बन्धदेव सन्तापोऽस्ति। तीर्थस्नानेन तु[१] सर्वपापनाशोऽस्तीति[२] भाव:। सन्तप्तस्य जले मज्जत:[३] सन्तापनाश उचित[४] एवेति ध्वनि:। "रुधिरोऽङ्गारके प्रोक्तो रुधिरं कुङ्कुमासृजो:" इति **विश्वप्रकाश:**[(अ)]। "भव: संसारसम्प्राप्ति श्रेय:शङ्करजन्मसु इत्यापि च[(आ)]।।६।।

**७-वितरसि दिक्षु रणे दिक्पतिकमनीयम्।**
**दशमुखमौलिबलिं रमणीयम्।।**
**केशव! धृतरामशरीर! जय जगदीश! हरे!।।७।।**

श्रीरामचन्द्रवतारं स्तौति, वितरसीत्यादिना। हे केशव, धृतरघुपतिरूप! धृतं रघुपते: श्रीरामचन्द्रस्य रूपं येन स:[५] तादृश स्त्वं जय जय। श्रीरामस्य[६] पुरुषार्थमाहवितरसीति। रणे संग्रामे दिक्षु दिशासु[७] दशमुखमौलिबलिं दसमुखस्य रावणस्य ये मौलयो मस्तकानि मुकुटानि वा तान्येव बलिमुपहारं[८] वितरसि ददासि[९]। कथम्भुतम्? दिक्पतिकमनीयं दिशां ये पतय: शक्रादयस्तेषां कमनीयमभिमतम्[१०]। अत्र हेतु रमणीयम्। "किरीटमूर्द्धचूडासु मौलि: केशे च संयते"[(इ)]। करोपहारयो: पुंसि बलि: प्राण्यङ्गजे स्त्रियाम् **इत्यमर:**[(ई)]।।७।।

---

१. क. तु - इति नास्ति।
२. घ., च. सन्ताप: - इत्यधिक: पाठ:।
३. घ. सन्तापजलमज्जत: - इति पाठ:।
४. क., घ. उचित - इति नास्ति।
५. क., च., छ., स: - इति नास्ति।
६. ख. श्रीरामावतारस्य - इति पाठ:।
७. क., घ., च., छ., स: - इति नास्ति।
८. घ. बलिमुपहरति - इति पाठ:।
९. क., छ. ददासि - इति नास्ति।
१०. घ. कमनीयमभितम् - इति पाठ:।
(अ) वि. प्र. रान्तवर्ग: - १२
(आ) वि. प्र. वान्तवर्ग: - २
(इ) अ. को. ३.३.१९३
(ई) अ. को. ३.३.१९५

**८-वहसि वपुषि विशदे वसनं जलदाभम्।**
**हलहतिभीतिमिलितयमुनाभम्।।**
**केशव! धृतहलधररूप! जय जगदीश! हरे! ।।८।।**

[१]श्रीबलभद्रावतारं स्तौति, बहसीत्यादिना। हे केशव!, धृतहलधररूप! [२]धृतं हलधरस्य बलभद्रस्य[३] रूपं येन तादृशः त्वं जय जय[४]। बलरामावतारस्य लीलामाह, बहसीति। त्वं विशदे शुभ्रे वपुषि देहे जलदाभं सजलमेघनीलवस्त्रं[५] वहसि[६] धारयसि। कथम्भूतम्, हलेन हतिर्हननं तद्भयेन मिलिता या[७] यमुना तस्या इव आभा दीप्तिर्यस्य तादृशम्। मलयानिलवशात् कम्पमानस्य वस्त्रस्य भययुक्तयमुनाया[८] इव (उत्प्रेक्षणात्) उत्प्रेक्षागर्भोपमा। भीरूणां हि[९] कम्प उचित एवेति भावः। एवं हि **भारते कथा-** कदाचिद् वृन्दावने वारुणीं पीत्वा गोपीभिः सह विहरन् बलभद्रो जलक्रीडार्थमाहुतां मत्तप्रलापोऽयमिति मत्वा गर्वेणान्तिकमनाच्छर्तीं कालिन्दीं रोषतो[१०] हलाग्रेण कृष्टवानिति। (अत्र) हलधरपदेन निग्रहार्थं दुष्टानामुक्तं हलं धृतवान् इति अवतारप्रयोजनं ध्वनितम्। गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः **इत्यमरः**[(अ)]। शुक्लशुभ्रशुचिश्वेतविशदश्येन-पाण्डराः इत्यपि च[(आ)]। वस्त्रमाच्छादनं वासश्चैलं वसनमंशुकम् इति[(इ)]। भीति साध्वसकम्पयोरिति **विश्वप्रकाशः**[(ई)]।।८।।

---

१. ख., घ., च. श्री - इति नास्ति।
२. क. धृत - इति नास्ति।
३. घ. जय - इति नास्ति।
४. घ. जय - इति नास्ति।
५. ख., घ., छ., सजलमेघनीलवसनं वस्त्रं - इति पाठः।
६. क., ख., च. बहसि - इति नास्ति।
७. घ. या - इति नास्ति।
८. घ. यमुना इयमुत्प्रेक्षा - इति पाठः।
९. घ., च., छ., हि - इति नास्ति।
१०. घ. क्रोधतो हलेन हलाग्रेण - इति पाठः।
(अ) अ. को. २.६.७०
(आ) अ. को. १.५.१२
(इ) अ. को. २.६.११५
(ई) वि. प्र. - तान्तवर्गः - ५६

**९-निन्दसि यज्ञविधेरहह श्रुतिजातम्।**
**सदयहृदयदर्शितपशुघातम्।।**
**केशव! धृतबुद्धशरीर! जय जगदीश! हरे!।।९।।**

बुद्धावतारं स्तौति, निन्दसीत्यादिना। हे केशव! धृतबुद्धशरीर! धृतं बुद्धस्य शरीरं येन तादृश त्वं[१] जय जय[२]। बुद्धावतारे वेदनिन्दकस्य स्तुतिर्न युक्तेत्याशंक्याह- निन्दसीति[३]। यज्ञविधेः श्रुतिजातं यज्ञविधानबोधकं वेदसमूहं निन्दसि, न तु सर्वमित्यर्थः। तदपि न गर्हितुं युक्तम् इत्याशंक्याह, दर्शितेति। दर्शितो बोधितः पशूनां घातो येन तादृशम्[४], अहह कष्टे[५]। वेदोऽपि पशूनां घातं बोधयतीति निन्दसीति भावः। सर्वथा महतां निन्दा न युक्तेत्यत्रहेतुः[६], सदयेति। दया कृपा तत्सहितं हृदयं यस्य सः; तत्[७] सम्बोधने हे सदयहृदय[८]! यद्वा सदयहृदयेन[९] दर्शितः पशुघातो येन तत्[१०]। अहो न हिंस्यात्सर्वभूतानि, समो मशके समो नागे इत्युक्त्वा अग्निषोमीयं पशुमालभेत। योऽश्वमेघेन यजते स तरति ब्रह्महत्याम्, पशुयागेन चातुर्मास्ययाजिनोऽक्षयं हि[११] फलं भवतीति निन्दति। अयं भावः, विधिवाक्यैः[१२] स्वर्गादिफलपुरस्कारैर्यजतो जनान्बहून् दृष्ट्वा निरपराधिपशून् हतांश्च दृष्ट्वा तुच्छं फलं स्वर्गं दृष्ट्वा परमपुरुषार्थमोक्षफले जनान् प्रवर्त्तयितुं यज्ञादिबोधकवेदस्य निन्दां करोषि। न तु सर्वथा वेदनिन्दायामेव तव तात्पर्यम्। पशुघातिनां मोहनायैव तवैतदवतारप्रयोजनमित्यपि[१३] व्याख्यातम्।

---

१. ख., त्वं - इति नास्ति।
२. घ. जय - इति नास्ति।
३. क. दर्शितेति - इति पाठः।
४. घ. पशूनां घातं बोधयतीति भावः - इति पाठः।
५. घ., च. कष्ट - इति पाठः।
६. क., ख., युक्तेत्येव हेतुः - इति पाठः।
७. क., ख., च., छ. तत् - इति नास्ति।
८. क., च., छ. - सदयहृदयेन - इति नास्ति।
९. क., ख. यद्वा सदयहृदयेन - इति नास्ति।
१०. क., ख., च., छ., तत् - इति नास्ति।
११. क., घ., छ., हि - इति नास्ति।
१२.छ. विविधवाक्यैः - इति पाठः।
१३. घ. अपि - इति नास्ति।

अहह हेत्यद्भुते खेदे **इत्यमरः**(अ)। वेदे श्रवसि च श्रुतिः **इत्यमरः**(आ)। जातं जात्योघजन्मसु(इ) इति **विश्वः**।।९।।

**१०-म्लेच्छनिवहनिधने कलयसि करवालम्।**
**धूमकेतुमिव किमपि करालम्।।**
**केशव! धृतकल्किशरीर! जय जगदीश! हरे!।।१०।।**

कल्किनोऽवतारं स्तौति, हे केशव! धृतकल्किशरीर! धृतं कल्किनः शरीरं येन[१] तादृश त्वं जय जय[२]। पूर्वपदे[३]सदयत्वमुक्तम्, अत्र तु कल्क्यवतारेण प्रणिवधानिरतत्वमुक्तम्, कथमिति चेत्,

यदा यदा हि धर्मस्य ग्लनिर्भवति भारत!
अभ्युत्थानमधर्मस्य तदात्मानं सृजाम्यहमिति(ई)।।

**भगवदुक्तिरी**त्याह-म्लेच्छनिवहेत्यादिना। त्वं [४]म्लेच्छनिवहमारणार्थं करवालं खड्गं कलयसि धारयसि। कथम्भूतम्? किमपि अनिर्वचनीयं करालं भयङ्करम्। कमिव धूमकेतुमिव उत्पातग्रहविशेषमिव। रणे उदितं तत्करवालं पश्यतां म्लेच्छनां नाशो भवतीति करवालस्य धूमकेतुसाम्यम्। अस्मिन्नप्युदिते[५] धूमकेतौ तं पश्यतां प्राणिनां विपदो भवन्तीति ध्वनिः। यद्वा[६] धूमः केतुश्चिह्नं यस्य सः धूमकेतुर्वह्निस्तमिव। अत्र खड्गस्य नीलत्वाद्धूमसाम्यम्। मुष्टेश्च सुवर्णमयत्वादग्निसाम्यम्। म्लेच्छनिवहनिधने इत्यत्र चर्मणि द्रवीपिनं हन्ति दन्तयोर्हन्ति कुञ्जरम्। केशेषु चमरीं हन्ति सीम्नि पुष्कलको हतः।। (इतिवत्)।

---

१. घ. स - इत्यधिकः पाठः।
२. घ. जय - इति नास्ति।
३. घ., च. पूर्वपदेन - इति पाठः।
४. ख., घ., च. म्लेच्छसमूह - इति पाठः।
५. च. अन्यस्मिन् - इति पाठः।
६. क. यद्वा - इति नास्ति; घ. यथा - इति पाठः।
(अ) अ. को. - ३.३.२५७
(आ) अ. को. ३.३.७३
(इ) वि. प्र. - तान्तवर्गः - १४
(ई) श्रीमद्भगवद्गीता - ४.७.

निमित्तात् कर्म संयोगे[१] सप्तमीत्यनेन[२] सप्तमी[(अ)]।
समूहो निवहव्युहसन्दोहविसरव्रजाः **इत्यमरः**[(आ)]। निधनं स्यात्कुले नाशे इति **विश्वः**[(इ)]। खड्गे तु निस्त्रिंशचन्द्रहासासिरिष्टयः। कौक्षेयको मण्डलाग्रः करवालः कृपाणवत् **इत्यमरः**[(ई)]। धूमकेतुः स्मृतो वह्नावुत्पातग्रहभेदयोः इति **विश्वः**[(उ)]। करालो भीषणेऽन्यवदिति च[(ऊ)]।।१०।।

**११-श्रीजयदेवकवेरिदमुदितमुदारम्।**
**श्रृणु सुखदं शुभदं भवसारम्।।**
**केशव! धृतदशविधरूप! जय जगदीश! हरे!।।११।।**

प्रत्येकावतारपुरस्कारेण भगवतः स्तुतिं कृत्वा सम्प्रति दशावतारेण[३] श्रीकृष्णं[४] स्तौति- श्रीजयदेवकवेरित्यादिना। हे[५] केशव! धृतदशविधरूप! धृतानि दशविधानि[६] दशप्रकाराणि रूपाणि[७] येन सः[८], एवंभूतः त्वं जय जय[९]। जयदेवकविसम्प्रदायागतत्वेन गीतान्ते स्वनाम निबध्नन् जनानाह, श्रीजयदेवेति। इदं जयदेवकवेः उदितं भाषितं शृणु। कथम्भूतम्? सुखदं श्रोत्रमनः सन्तोषप्रदम्। पुनः कथम्भूतं? शुभदं मङ्गलप्रदं [१०]श्रीकृष्णकीर्त्तत्वात्। अत एव भवसारं भवे संसारे सारं[११] श्रेष्ठं महाधनं रूपं वा। अत एव उदारं महत्।

१. घ. कर्मयोगे सप्तमी - इति पाठः।
२. क., ख., घ., च. सूत्रेण-इत्यधिकः पाठः।
३. ख., घ., च. दशावतारपुरस्कारेण - इति पाठः।
४. ख. श्री - इति नास्ति।
५. ख. हे - इति नास्ति।
६. क., छ. दशविधानि - इति नास्ति।
७. घ. रूपाणि - इति नास्ति।
८. क., च., छ. सः - इति नास्ति।
९. घ. जय - इति नास्ति।
१०. छ. सारं - इति नास्ति।
११. छ. सारं - इति नास्ति।
(अ) अ. महाभाष्यम्, २.३.३७ सूत्रोपरि।
(आ) अ. को. २.५.३९
(इ) वि. प्र. नान्तवर्गः - ३४
(ई) अ. को. - २.८.८९
(उ) वि. प्र. तान्तवर्गः - २०३
(ऊ) वि. प्र लान्तवर्गः - १०७

विधा विधौ प्रकारे चेत्यमरः(अ)। उक्तं भाषितमुदितम् इति च(आ)। उदारो दातृमहतोः इत्यपि(इ)। कल्याणं मङ्गलं शुभमिति(ई) च। सारो बले मज्जनि च स्थिरांशे, न्याय्ये च नीरे च धने च सारम्। वरेऽन्यवत् सारमुदाहरन्ति, द्वारं पुनर्निगमनेऽप्युपाये।। इति **विश्वप्रकाशः**(उ)।।११।।

**५- वेदानुद्धरते जगन्निवहते भूगोलमुद्बिभ्रते**
**दैत्यं दारयते बलिं छलयते क्षत्रक्षयं कुर्वते।**
**पौलस्त्यं जयते हलं कलयते कारुण्यमातन्वते**
**म्लेच्छान्मूर्च्छयते दशाकृतिकृते कृष्णाय तुभ्यं नमः।।५।।**

अंशावतारान् स्तुत्वा सम्प्रति परिपूर्णस्य रूपमवतारिणां[१] श्रीकृष्णं स्तौति,वेदानित्यादिना। [२]कृष्णाय परिपूर्णस्वरूपिणे[३] श्रीकृष्णरूपधारिणे तुभ्यं नमः। मीनावतारवानीश्वर-स्तमेवेत्याह, दशाकृतिकृते मीनादिदशरूपधारिणे[४] तुभ्यम् एव नमः। तत्र दशावताराणां प्रयोजनमाह-वेदानुद्धरते मीनस्य[५] रूपेण वेदोद्धारणं[६] कुर्वते। जगद्भुवनं निवहते कच्छपरूपं[७] धारयते। भुगोलं भूमिमण्डलमुद्बिभ्रते[८]। [९]बाराहरूपेणाद्ध्र्वं प्रापयते। दैत्यं हिरण्यकशिपुं दारयते, [१०]श्रीनृसिंहरूपेण

१. घ. सम्पूर्णस्वरूपावतारिणम् - इति पाठः।
२. घ. श्री-इत्यधिकः पाठः।
३. ख., घ., च., छ. स्वरूपेण - इति पाठः।
४. घ. दशविधरूपधारिणे - इति पाठः।
५. ख., घ., च. मीनरूपेण - इति पाठः।
६. घ. च., छ. वेदोद्धारं कुर्वते - इति पाठः।
७. ख., च. रूपेण - इति पाठः।
८. ख. भूमण्डलमुदिबभ्रते इति पाठः।
९. ख. घ. बराह - इति पाठः।
१०. घ. श्री - इति नास्ति।
(अ) अ. को. - ३.३.१०१
(आ) अ. को. - ३.१.१०७
(इ) अ. को. - ३.३.१९२
(ई) अ. को. - १.४.२५
(उ) वि. प्र. रान्तवर्गः - २३

विदारयते। पुनः कथम्भुताय ? बलिं दैत्यं[१] छलयते वामनरूपेण वञ्चयते। क्षत्रक्षयं परशुरामरूपेण दुष्टक्षत्रियाणां नाशं कुर्वते। पौलस्त्यं रावणं श्रीरामचन्द्ररूपेण जयते। हलं दुष्टनिग्रहायायुधत्वेन कलयते। बलभद्ररूपेण धारयते[२]। पुनः कथम्भुताय कारुण्यं कृपामातन्वते बुद्धरूपेण निस्तारयते[३]। पुनः कथम्भुताय म्लेच्छान् कल्किरूपेण मूर्च्छयते नाशयते। आकृतिः कथिता रूपसामान्यवपुषोरपि इति विश्वप्रकाशः[अ]।।५।।

।। द्वितीयः प्रबन्धः / गीतम् २।।

।। गुर्जरीरागे मठताले गीयते।।प्र०।।२।।

**१-श्रितकमलाकुचमण्डल धृतकुण्डल ए,**

**कलितललितवनमाल, जय जयदेव हरे।। ध्रुवम्।।१।।**

पूर्वं केलयो जयन्तीत्युक्तं, केलिश्च नायकोत्कर्षं विना न सम्भवतीति समस्तनायक-चूडामणेर्भगवतः[४] श्रीकृष्णस्य लोकान्तर[५]गुणाननुवर्णयन्नेव मङ्गलान्तरमप्याचरति श्रितेत्यादिना। गीतस्यास्य गुर्जरीरागस्तालश्च मठः[६]। प्लुतमात्रे[७] प्रवृत्तिः स्याद्यत्र ताले निरन्तरम्। प्रतिमठः स शृङ्गारः[८] सानन्दो गीयते रसे इति लक्षणम्[९]। गीतार्थस्तु, हे हरे! हे[१०] देव! जय जय। आदरे द्विर्वचनम्। इदं[११] ध्रुपदम्। नायकगुणानाह-श्रितेति। श्रितमाश्रितं कमलायाः लक्ष्म्याः कुचमण्डलं स्तनमण्डलं[१२] येन स तथा सम्बोधने। तथा च सकलनायिका मुकुटमणेर्लक्ष्म्या अपि केलिकथनेन रतिकौशलरूपो नायकगुण उक्तः। लक्ष्मीप्रियत्वेन

१. घ. दैत्यं - इति नास्ति।
२. घ. बलभद्ररूपेण धारयते - इति नास्ति।
३. क. पुनः इत्यारभ्य निस्तारयते इत्यन्तो नास्ति।
४. घ. भगवतः - इति नास्ति।
५. क., ख., च. लोकत्रय - इति पाठः।
६. घ. प्रतिमठः - इति पाठः।
७. घ., च. श्रुतमात्र - इति पाठः।
८. क., ख., च., छ., स शृङ्गारे - इति पाठः।
९. क., ख., छ. ललित - इति अधिकः पाठः।
१०. क., ख., च., छ. हे - इति नास्ति।
११. छ. "च" इति अधिकः पाठः।
१२. क., ख., च., छ. स्तनमण्डलम् - इति नास्ति।
(अ) वि. प्र. तान्तवर्गः - १६६

धनादयत्वमपि[१] सूचितम्। कथम्भुत ? हे धृतकुण्डल ! धृते कुण्डले कर्णाभरणे येन स: तथा। पुन: कथम्भुत ? कलिता धृता ललिता मनोहरा वनमाला चरणपर्यन्तावलम्बिनी पुष्पमाला येन स: तथा सम्बोधने। एतद्विशेषणद्वयेन भव्यत्वमुक्तम्। कमला श्रीहरिप्रिया **इत्यमर:**[(अ)]। कुचौ स्तनविति च[(आ)]। आपादप्रतिमां मालां वनमालां विदुर्बुधा: इति शाश्वत:।।१।।

**२-दिनमणिमण्डलमण्डन भवखण्डन ए।**
**मुनिजनमानसहंस जय जयदेव हरे ।।२।।**

पुन: कथम्भूत, दिनमणीत्यादि। दिनमणे: सूर्यस्य यन्मण्डलं तस्य मण्डन हारभूत[२]। तथा च[३], ध्येय: सदा सवितृमण्डलमध्ववर्ती, नारायण: सरसिजासनसन्निविष्ट:। केयूरवान् मकरकुण्डलवान् किरीटी, हारी हिरण्ययवपुर्धृतशङ्खचक्र: इति पुराणप्रसिद्धि:[(इ)]। एतेन स्थिररुचिरत्व[४] मुक्तम्। पुन: कथम्भूत ? हे भवखण्डन भवं संसारं खण्डयतीति भवखण्डन: प्रलयकर्ता स:[५], तथा सम्बुद्धौ अनेन सामर्थ्यरुपो नायकगुण उक्त:, मुनिजनेति। मुनिजनानां सनकादीनां[६] मानसं चित्तं तदेव मानससरोवरविशेषस्तत्र हंसो मराल:। अत्र मुनिजनमानसं स्वच्छत्वेन हंसाश्रयत्वेन च साधारणधर्मेण[७] हंसत्वेन[८] निरूपणम्। इदं च परम्परितं रूपकमलङ्कार:। तदाहु:[९] नियतारोपणोपाय: स्यादारोप: परस्य य:। तत्परम्परितं श्लिष्टे वाचके भेदभाजि वा[(ई)]। मानसं सरसि स्वान्ते इति **विश्व:**[(उ)]।।२।।

---

१. घ. धनाध्यक्षत्वमपि - इति पाठ:।
२. घ., च. अलङ्कारभूत: - इति पाठ:; छ. हारभूत - इति नास्ति।
३. घ., च., छ. तथा च - इति नास्ति।
४. घ., रूचित्व - इति पाठ:।
५. क., छ. स: - इति नास्ति।
६. घ. सनकादीनाम् - इति नास्ति।
७. क., ख., घ., च.च - इति अधिक:।
८. क., ख., घ., च. मानससरोवरत्वेन - इति पाठ:।
९. घ. तदाह: - इति पाठ:।
(अ) अ. को. - १.१.२७
(आ) अ. को. - २.६.७७
(इ) गरुडपुराणम् १. १२२-३४
(ई) का. प्र. सटीक:, दशम उल्लास:, सू १४५/९५
(उ) वि. प्र. सान्तवर्ग: - २१

**३-कालियविषधरगञ्जन जनरञ्जन ए।**
**यदुकुलनलिनदिनेश जय जयदेव हरे ।।३।।**

पुनः कथम्भूत ? कालियेत्यादि। कालियनाम्नो विषधरस्य गञ्जन तिरस्कारक। अनेनापि सामर्थ्यमुक्तम्। हे जनरञ्जन ! जनान्मधुरवचनादिना[१] रञ्जयतीति जनरञ्जनस्तादृश। अनेन शुभवचनत्वं[२] नायकगुण उक्तः, यदुकुलेति। यदुंनां कुलमेव नलिनं कमलं तस्य दिनेशः सूर्यः, प्रकाशकत्वात्। एतेन कुलीनत्वं[३] नायकगुण उक्तः। आशीविषो विषधरश्चक्री व्यालः सरीसृपः **इत्यमरः**[(अ)]। "वा पुंसि पद्मं नलिनमरविन्दं" **महोत्पलमिति** च[(आ)]।।३।।

**४-मधुमुरनरकविनाशन गरुडासन ए।**
**सुरकुलकेलिनिदान जय जयदेव हरे ।।४।।**

पुनः कथम्भूत, मधुनाम्नो[४] नरकनाम्नो दैत्यस्य विनाशन[५] विनाशकारिन्[६]। अनेनापि सामर्थ्यमुक्तम्। हे गरुडासन, अनेन महदैश्वर्य्यमुक्तम्[७]। गरुत्मान् गरुडस्तार्क्ष्यो इत्यमरः[(इ)]। हे सुरकुलकेलिनिदान! सुरकुलकेलीनां देवसमूहक्रीडानां[८] निदान आदिकारण। अनेनापि सामर्थ्यमुक्तम्। त्रिदशा विबुधाः सुराः **इत्यमरः**[(ई)]। निदानं त्वादिकारणमिति च[(उ)]। सजातीयगणे गोत्रे देहेऽपि कथितं कुलम्। इति **विश्वः**[(ऊ)]।।४।।

---

१. घ. मधुरवचनात् - इति पाठः।
२. घ. शुभवचन - इति पाठः।
३. घ. कुलीनत्व - इति पाठः।
४. क., ख. मुरनाम्नो - इति नास्ति।
५. घ. हेतुः - इत्यधिकः पाठः।
६. घ. विनाशकारी - इति पाठः।
७. क., ख. गरुडासन - इत्यधिकः पाठः।
८. घ. देवसमूहक्रीडानां - इति नास्ति।
(अ) अ. को. - १.८.७.
(आ) अ. को. - १.१०.३९.
(इ) अ. को. - १.१.२९.
(ई) अ. को. - १.१.७.
(उ) अ. को. - १.४.२८
(ऊ) वि.प्र. लान्तवर्गः - ११

**५-अमलकमलदललोचन भवमोचन ए।**
**त्रिभुवनभवननिधान जय जयदेव हरे ।।५।।**

पुन: कथम्भुत ? अमेलत्यादि[१]। अमलं निर्मलं यत्कमलं[२] तस्य यद् दलं पत्रं तत्सदृशे लोचने यस्य तादृश। अनेननापि भव्यत्वमुक्तम्[३]। हे भवमोचन! भवं जन्म तस्मात्प्रपन्नान्मोचयतीति स: हे मोक्षप्रद। अत एव[४] भवखण्डनेत्यनेन पौनरुक्त्यम्। यतस्तत्र[५] भवपदस्य जगत्परतया प्रलयकारित्वमुक्तम्। अनेन परमानन्दरूपमोक्षप्रदत्वेन त्यागिरूपो नायकगुण[६] उक्त:, हे त्रिभुवनभवननिधानेनेति त्रिभुवनमेव भवनं[७] गृहं[८] तदेव निधानं वासस्थानं यस्य स तथा। यद्वा त्रिभुवनभवने निधानमिव महानिधिरिव। अनेनापि महदैश्वर्य्यमुक्तम्। दलं पर्ण छद: पुमान् **इत्यमर:**[(अ)]। भवनं भाववेश्मनो: इति **विश्व:**[(आ)]। निधानं त्वालये निधौ इति **विश्व**[(इ)]।।५।।

**६-जनकसुताकृतभूषण जितदूषण ए।**
**समरशमितदशकण्ठ जय जयदेव हरे ।।६।।**

हे जनकसुताकृतभूषण! जनकसुताया: सीताया: कृतानि भूषणानि अलङ्कारादीनि मकरिकापत्रादीनि येन स: तथा। अनेन सकलकलाकौशलरूपस्तारूण्यरूपश्च[९] नायकगुण उक्त:। हे जितदुषण, जितो दूषणनामा राक्षसो येन स: तथा[१०]। जितानि

---

१. छ. अमलेत्यादि - इति नास्ति।
२. छ. यत्कमलं - इति नास्ति।
३. ख. सौन्दर्यत्वमुक्तम् - इति पाठ:।
४. क., ख., छ. भव - इति नास्ति।
५. क., ख., यत्तत्र - इति पाठ:।
६. क., ख., च. त्यागिनायकगुण - इति पाठ:।
७. क., ख., च., छ. त्रिभुवनभवनमेव - इति पाठ:।
८. घ. यस्य - इत्याधिक : पाठ:।
९. छ. स्तारूण्यगुणरूप - इति पाठ:।
१०. क., ख., च., छ. तथा - इति नास्ति।
(अ) अ. को. - २.४.१४
(आ) वि. प्र. - नान्तवर्ग: २५
(इ) विश्वकोशस्य वर्तमानसंस्करणे उद्धरणं नोपलभ्यते।

तिरस्कृतानि दूषणानि दोषा[१] येन सः तथेति वा। समरे संग्रामे शमितो नाशितो दशकण्ठो दशवदनो[२] रावणो येन सः[३] तथा सम्बोधने[४]। एतेन परमाभिमानिनो रावणस्यापि वधेन अभिमानित्वरूपो नायकगुण उक्तः। रामावतारपौरुषवर्णनेन वक्ष्यमाणस्वरूपोऽपि[५] नायकगुणः सूचितः। "बाणः शिरसि शायके" इति **विश्वः**[(अ)]।।६।।

**७-अभिनवजलधरसुन्दर धृतमन्दर ए।**
**श्रीमुखचन्द्रचकोर जय जयदेव हरे ।।७।।**

पुनः कथम्भूत, अभिनवो नूतनो यो जलधरः सजलो[६] मेघस्तद्वत्सुन्दर। अनेनापि भव्यत्वमुक्तम्[७]। हे धृतमन्दर! धृतं क्षीराब्धिमथनावसरे मन्दरपर्वतविशेषो मन्थानदण्डभूतो येन सः, तथा। अनेनापि सामर्थ्यमेवोक्तम्। हे श्रीमुखचन्द्रचकोर! श्रिया लक्ष्म्या मुखमेव चन्द्रः अह्लादकारित्वात् तस्य चकोर। अत्र रमाननचन्द्राधर-सुधापानसोत्कण्ठत्वेन[८] भगवतश्चकोरत्वेन व्याख्यातमिति। अनेनापि रतिकौशलत्वमे-वोक्तम्[९]। प्रत्यग्रोऽभिनवो नव्यो नवीनो नूतनो नवः **इत्यमरः**[(आ)]। अनया सप्तपद्या सर्वे[१०] गुणा उक्ताः। नायकगुणाः[११] **शृङ्गारतिलके** उक्ताः[१२]। त्यागी कुलीनः कुशलो रतेषु कल्पः कलावित्तरुणो धनाढ्यः। भव्यः क्षमावान्सुभगोऽभिमानी स्त्रीणां मतज्ञः किल नायकः स्यात्[(इ)]।।७।।

---

१. क., घ., च., छ. दोषा - इति नास्ति।
२. क., ख., घ. दशवदनो - इति नास्ति; छ. दशवाणो इति पाठः।
३. क., घ., सः - इति नास्ति।
४. ख., घ., च. सम्बुद्धो - इति पाठः।
५. ख. अपि - इति नास्ति।
६. घ. सजलो - इति नास्ति।
७. ख., च. एव - इत्यधिकः पाठः।
८. क., ख., च., छ. सोत्कण्ठेन - इति पाठः।
८. ख., च. रतिकौशलमेवोक्तम् - इति पाठः।
१०. घ. नायकः - इत्यधिकः पाठः।
११. घ. नायकगुणाः -इति नास्ति।
१२. ख., घ. कथिताः - इति पाठः।
(अ) वर्तमानप्रकाशिते संस्करणे उद्धरणामिदं नोपलभ्यते।
(आ) अ. को. - ३.१.७७.
(इ) शृ. ति. - १.२७.

**७ (क)-तव चरणे प्रणता वयमिति भावय ए।**
**कुरू कुशलं प्रणतेषु, जय जय देव हरे।।७-क।।**

श्रीकृष्णं स्तुत्वा सम्प्रति[1] भक्तानां स्वस्य चाभीष्टं प्रार्थ्यते, तवेत्यादिना। वयं तव चरणे पतिता इति भावय जानीहि[2]। [3]भवद्भिरपि सर्वेष्टं कर्त्तव्यमित्याह, कुरु कुशलमिति।।७-क।।

**८-श्रीजयदेवकवेरिदं कुरुते मुदम्, ए।**
**मङ्गलमुज्ज्वलगीतं, जय जयदेव हरे।।८।।**

इदं श्रीजयदेवकवे: मङ्गलगीतं विशेषप्रणतेषु त्वद्भक्तेषु[4] मुदमानन्दं कुरुते। तत्र त्वं कुशलं विघ्नराहित्यं कुरु। कथम्भूतम् उज्ज्वलगीतं उज्ज्वलं दोषहीनं गीतं गानं[5] यस्य तादृशम्। गीतदोषास्तु **भरते**[6],

शङ्कितं भीतमुद्धष्टम[7] व्यक्तमनुनासिकम्।
काकस्वरं शिर:कम्प तथा स्थानविवर्जितम्।।
विस्वरं विरसं चैव विश्लिष्टं विषमाहतम्[(अ)]।
व्याकुलं तालहीनं च गीतदोषान्विदुर्बुधा:।।८।।

**९-पद्मापयोधरतटीपरिरम्भलग्नकाश्मीरमुद्रितमुरो मधुसूदनस्य।**
**व्यक्तानुरागमिव खेलदनङ्गखेदस्वेदाम्बुपूरमनुपूरयतु प्रियं व:।।९।।**

श्रीकृष्णे नायकविशेषगुणान् कथयन्नेवाशीरूपं मङ्गलमाचरति पद्मेत्यादिना। मधुसूदनस्य हृदयं वो युष्माकं प्रियं[8] वाञ्छितं अनुपूरयतु सम्पूर्णीकरोतु। कथम्भूतमुर:, पद्माया: लक्ष्म्या: पयोधरतटी स्तनप्रान्तस्तस्या: परिरम्भे आलिङ्गने लग्नं[9]

---

१. ख., घ., च. सर्व - इत्यधिक: पाठ:।
२. घ. जानीहि - इति नास्ति।
३. घ. तदिह - इत्यधिक: पाठ:।
४. क., ख., घ., छ. मद्भक्तेषु - इति पाठ:।
५. घ. गायनं - इति पाठ:।
६. च. तत्र त्वं इत्यारभ्य भरते इत्यन्तो नास्ति।
७. घ., छ.० मुत्सिक्तं - इति पाठ:।
८. क., घ., च., छ. शिवं - इति पाठ:।
९. छ. लग्नं - इति नास्ति।
(अ) भरतकृतनाट्यशास्त्रे उद्धरणामिदं नोपलभ्यते।

यत्काश्मीरं कुङ्कुमं तेन मुद्रितमिव मुद्राचिह्नविशेषस्तदयुक्तमिव। पुनः कथम्भूतम्? खेलति क्रीडां कुर्वत्यनङ्गे कन्दर्पे सति यः खेद आयासस्तेन यः स्वेदाम्बुः प्रस्वेदजलं तस्य पूरः प्रावाहो यत्र तादृशम्। एतेन चिरलिप्तकाश्मीरस्य शुष्कत्वेऽपि स्वेदसम्बन्धेन[१] मुद्रायोग्यत्वं व्याख्यातम्। किं विशिष्टमिव व्यक्तानुरागमिव। व्यक्तः प्रकटीभूतोऽनुरागः स्नेहो यत्र तादृशमिव। अत्र लक्ष्मीविषयानुरागाधिक्यात्[२] अभ्यन्तरे समावेशाभावात् कुङ्कुम[३], व्याजेकन बहिर्निःसृता इवेति भावः। मुद्रा[४] सञ्जाता अस्येति[५] तारकादित्वादितम्[(अ)]। लक्ष्मीः पद्मालया पद्मा कमला श्रीहरिप्रिया, इत्यमरः[(आ)]। स्त्रोस्तनादौ पयोधरौ इत्यपि[(इ)]। परिरम्भः परिष्वङ्गः संश्लेश उपगूहनमिति च[(ई)]। काश्मीरं कुङ्कुमे प्रोक्तं टङ्कपुष्करमूलयोरिति **विश्वः**[(उ)]। उरो वत्सं च वक्षश्चे**त्यमरः**[(ऊ)]। कन्दर्पो दर्पकोऽनङ्गः इत्यपि च[(ए)]। पुरो जलप्रवाहे स्यादिति **विश्वः**[(ऐ)]। अनेन[६] लक्ष्म्याः सदानुरागकथनेन दाक्षिण्यरूपो[७] नायकगुण उक्तः।

यो गौरवं भयं प्रेम दाक्षिण्यं पूर्वयोषिति।
न मुञ्चत्यचित्तोऽपि ज्ञेयोऽसौ दक्षिणो यथा[(ओ)]।।६।।

---

१. घ. स्वेदजलसम्बन्धेन - इति पाठः।
२. क., ख., च., छ. लक्ष्मीविद्यामानोऽनुरागाधिक्याद् - इति पाठः।
३. ख., घ., च. राग - इत्यधिकः पाठः।
४. क., ख., च. समुद्रा - इति पाठः।
५.घ. सुमुद्रितमिति - इत्यधिकः पाठः।
६. ख., ग., घ., च. सर्वदा - इत्यधिकः पाठः।
७. ख. पूर्वयोरितिः - इत्यधिकः पाठः।
(अ) तदस्य सञ्जातं तारकादिभ्य इतच् पा० ५/२/३६ सूत्रोपरि वैयाकरणसिद्धान्तकौमुदी-तद्धितान्तर्गतपाञ्चिमिकप्रकरणम्।
(आ) अ. को. - १.१.२७.
(इ) अ. को. - ३.३.१६४
(ई) अ. को. - ३.२.३०
(उ) वि. प्र. रान्तवर्गः - १९९
(ऊ) अ. को. - २.६.७८.
(ए) अ. को. - १.१.२५.
(ऐ) वि. प्र. रान्तवर्गः - २४
(ओ) शृ. ति. - १.३१.

**७-वसन्ते वासन्तीकुसुमसुकुमारैरवयवै
भ्रमन्तीं कान्तारे बहुविहितकृष्णानुसरणाम्।
अमन्दं कन्दर्पज्वरजनितचिन्ताकुलतया
वलद्बाधां राधां सरसमिदमूचे सहचरी ।।७।।**

कवि: शृङ्गाररसप्रधानभगवत्केलिवर्णनं[१] चिकीर्षुस्त[२]त्सम्भोगापेक्षया विप्रलभ्यस्योत्कृष्टत्वादादौ[३] विप्रलम्भशृङ्गारवर्णनाय प्रोषितभर्त्तृकायाश्चरितानि वर्णयितुं प्रस्तावयति- वसन्त इत्यादिना[४]। सम्भोगोपेक्षयात्र[५] विप्रलम्भस्योत्कर्षं प्रति त्वालङ्कारिका:, सम्भोगो विप्रलम्भेन न विना पुष्टिमश्नुते। कषायिते हि वस्त्रादौ भूयान् रागोऽभिजायते। इति श्लोकार्थस्तु[६], कचित्सहचरी सखी[७] वसन्ते सरसं यथा स्यादेवं तां राधामिदं[८] वक्ष्यमाणमूचे उवाच। कथम्भूतां[९] राधां ?[१०] अवयवैरङ्गैरूपलक्षिताम्। [११]कथम्भूतैरवयवै:[१२] ? वासन्ती (कुसुमसुकुमारै:) माधवीलतापुष्पवत्कोमलै:। पुन: कथम्भूतां[१३] राधां[१४] ? कान्तारे महारण्ये भ्रमन्तीम्। अत्र हेतुगर्भविशेषमाह, बहुविहितेति। बहु भूयो भूयो[१६] विहितं[१७]

१. ग. एताव्दग्रन्थेनाभिधेयप्रयोजनकेलिवर्णनम् - इति पाठ:।
२. छ. ० स्तत्र - इति पाठ:।
३. छ. विप्रलम्भस्योत्कृष्टत्वादादौ - इति नास्ति।
४. ग. इत्यादि - इति पाठ:।
५. क., ख., घ., च., छ. सम्भोगापेक्षयात्र - इति नास्ति।
६. च. श्लोकार्थस्तु - इति नास्ति।
७. ग., छ. सखी - इति नास्ति।
८. ग. राधा - इत्यधिक: पाठ:।
९. ग. कीदृशीम् - इति पाठ:।
१०. ग. राधां - इति नास्ति।
११. ग. कीदृशै: - इति पाठ:।
१२. च. रङ्गै: - इति पाठ:।
१३. ग. कीदृशीम् - इति पाठ:।
१४. ग., घ., च. राधां - इति नास्ति।
१५. ग. तत्र - इति पाठ:।
१६. ग. बारम्बारं - इति पाठ:।
१७. ख., घ. कृतं - इत्यधिकं पाठ:।

कृष्णस्यानुसरणं अन्वेषणं यथा ताम्[१]। अत्रापि[२] हेतु:[३] कन्दर्पज्वरेति। कन्दर्पज्वरेण जनिता या चिन्ता तत्कृता[४] या आकुलता व्याकुलता[५] तया अमन्दमधिकं यथा स्यादेवं बलद्बाधां प्रवर्धमानपीडाम्। अवयवैरित्यत्र जटाभिस्तापस[(अ)] इति (वत्) तद्विशेषणे तृतीया। प्रोषितप्रेयसी[६] नायिकेयम्। तल्लक्षणं,

कृतश्चित्कारणाद्यास्या: पतिर्देशान्तरं गत:।
दत्वावधिं[७] भृशार्ता सा प्रोषितप्रेयसी यथा[(आ)]।।

वासन्ती माधवी लता **इत्यमर:**[(इ)]। महोण्ये दुर्गपथे कान्तार: पुनंपुंसके इति च[(ई)]। पीडा बाधाा व्यथा दु:खमित्यपि च[(उ)]।।७।।

।। तृतीय: प्रबन्ध: / गीतम् ३ ।।
।। वसन्तरागयतितालाभ्यां गीयते ।।

**१-ललितलवङ्गलतापरिशीलनकोमलमलयसमीरे।**
**मधुकरनिकरकरम्बितकोकिलकूजितकुञ्जकुटीरे।।**
**विहरति हरिरिह सरसवसन्ते(१२)।**
**नृत्यति युवतिजनेन समं सखि! विरहिजनस्य दुरन्ते।। ध्रुवम्।।१।।**

किमूचे इत्यत आह, ललितेत्यादि[८]। गीतस्यास्य वसन्तरागो यतिताल:। काललक्षणं प्रति कोलाहल:। लघुयुग्माभिघातेन यतिताल: प्रकीर्तित:[(ऊ)]। हे सखि!

१. ग. तादृशीम् - इति पाठ:।
२. ग. अपि - इति नास्ति।
३. ग. गर्भविशेषणमाह - इत्यधिक: पाठ:।
४. ग. तया कृता - इति पाठ:।
५. क., ग., घ., छ. व्याकुलता - इति नास्ति।
६. म.प्रोषितप्रेयसी - इति पाठ:।
७. कृत्वावधिम् - इति पाठ:।
८. क. ललितेत्यादि - इति नास्ति।
(अ) इत्थंभूतलक्षणे - पा० २.३.२१. सूत्रोपरि वै. सिद्धान्तकौमुदी कारकप्रकरणम्, तृतीयाविभक्ति।
(आ) शृ. ति. १-१४७
(इ) अ. को. - २.४.७२.
(ई) अ. को. - ३.३.१७२
(उ) अ. को. - १.९.३
(ऊ) कोलाहलनाम्न: लेखकस्य कृतिरेवाधुना नोपलभ्यते।

इह सरसवसन्ते शृङ्गाररसप्रधाने वसन्ते हरिः कृष्णो विहरति क्रीडतीत्यन्वयः। क्रीडाप्रकारमाह, नृत्यतीति। युवतिजनेन समं सह नृत्यति। कथम्भुते[१] वसन्ते ? विरहिजनस्य दूरन्ते दुःखेन अन्तः समाप्तिर्यस्य सः[२] तस्मिन्[३] निरवधावित्यर्थः। अयं च[४] विरहिणां दारुणो न तु युवतीभिः सह क्रीडतः सतः[५] कृष्णस्य। त्वं विरहिणी यदि कृष्णं नानुसरिष्यसि तदाऽयं तवापि दूरन्तो भविष्यतीति भावः। इदं च ध्रुवपदम्। साकं सार्द्धं समं सहेत्यमरः[(अ)]।

वसन्तस्य सरसतामाह, ललितेति[६]। ललिता मनोहरा या लवङ्गलता तस्याः परिशीलनेन सम्पर्केण कोमलो मृदुलो मलयसमीरो मलयाचलसम्बन्धी वायुर्यत्र तस्मिन्[७]। पुनः कथम्भूते[८] वसन्ते ? मधुकरनिकरेण भ्रमरसमूहेन करम्बिताः मिश्रिताः[९] ये कोकिलास्तैः कुजितः[१०] शब्दयुक्तः कृतः। कुञ्ज एव कुटीरो अल्पा कुटी यत्र तस्मिन्[११]। समीर-मारुत-मरुज्जगत्प्राणसमीरणाः **इत्यमरः**[(आ)]। मधुव्रतो मधुकरो मधुलिण्मधुपालिनः इत्यपि च[(इ)]। स्तोमौघनिकरव्रातवारसंघातसञ्चयाः इति च[(ई)]। मिश्रितेऽपि करम्बितमिति **शाश्वतः**। अल्पाकुटी कुटीरः स्यात् इत्यपि।।१ ।।

---

१. ग. कीदृशे - इति पाठः।
२. क., छ. सः - इति नास्ति।
३. ग., घ., च. वसन्ते इत्यधिकः पाठः।
४. ख. तु - इति; ग. वसन्तो - इति पाठः।
५. ग., च. सतः - इति नास्ति।
६. घ. ललितेत्यादिना - इति पाठः।
७. ग. तादृशे - इति पाठः।
८. ग. कीदृशे - इति पाठः।
९. ग., च. मिश्रिताः - इति नास्ति।
१०. घ. शब्दितः - इत्यधिकः पाठः।
११. ग. तादृशे - इति।
१२. ख., घ., च. येषां तेषां - इति पाठः।
(अ) अ. को. - ३.४.४.
(आ) अ. को. - १.१.६२.
(इ) अ. को. - २.५.२९
(ई) अ. को. - २.५.३९.

**२-उन्मदमदनमनोरथपथिकवधूजनजनितविलापे।**

**अलिकुलसंकुलकुसुमसमूहनिराकुलबकुलकलापे।। विह०।।२।।**

वसन्तस्य दूरन्ततामाह, उन्मदेत्यादिना। उन्मदो उद्भटो मदनो यत्र तादृशे मनोरथे येषामेवम्भुतानाम्[१], ये पथिकास्तेषां[२] वधूजनानां तैर्जनितो विलापो यस्मिन् तस्मिन्[३]। पुनः कथम्भूते[४]। अलिकुलैर्भ्रमरसमूहैः[५] संकुलो व्याप्तो यः कुसुमसूहस्तेन? निराकुलो निःशेषेणाकुलो व्याकुलो बकुलकलापः केसरसमूहो यस्मिंस्तस्मिन्[६]। यद्वा तादृशे बकुल एव कलापो भूषणं यत्र तादृशे। सङ्कुलं वाच्यवद्व्याप्तेऽविस्पष्टार्थवचस्यपि इति विश्वः[(अ)]। केसरे बकुल इत्यमरः[(आ)]। कलापो भूषणे बर्हे तूणीरे संहतावापि इत्यमरः[(इ)]।।२।।

**३-मृगमदसौरभरभसवशंवदनवदलमालतमाले।**

**युवजनहृदयविदारणमनसिजनखरुचिकिंशुकजाले।। विहं।।३।।**

पुनः कथम्भूते[७] वसन्ते[८] (इत्याह) - मृगमदेति[९]। मृगमदस्य कस्तूरिकायाः यः[१०] सौरभरभसः सौरभवेगस्तस्य वशंवदा आत्मनि आयत्ततावादिनी। नवदलमाला नूतनपत्र[११] पङ्क्तिर्यस्य[१२] सः[१३] तमालो यस्मिंस्तस्मिन्[१४]। पुनः कथम्भुते[१५]?

१. ख., घ., च. येषां तेषां - इति पाठः।
२. क., ख., घ., च., छ. पथिकास्तेषां - इति नास्ति।
३. क., च. तस्मिन् - इति नास्ति; ग. यत्र तादृशे - इति पाठः।
४. ग. कीदृशे - इति पाठः।
५. ख. भ्रमरैः - इति पाठः।
६. ग. यत्र तादृशे - इति पाठः।
७. ग. कीदृशे - इति पाठः।
८. ग. वसन्ते - इति नास्ति।
९. क., ख., ग., च., छ. मृगमदेति - इति नास्ति।
१०. छ. यः - इति नास्ति।
११. क., छ. दल - इति पाठः।
१२. ग. यत्र तादृश - इति पाठः।
१३. ग. सः - इति नास्ति।
१४. ग. यत्र तादृशे - इति पाठः।
१५. ग. कीदृशे - इति पाठः।
(अ) वि. प्र. लान्तवर्गः - ८४
(आ) अ. को. - २.४.६४.
(इ) अ. को. - ३.३.१२९

युवजनानां तरुणजनानां[१] हृदयं विदारयन्तीति युवजनहृदयविदारणास्ते ये मनसिजस्य कामस्य नखास्तेषामिव रुचिर्दीप्तिर्येषां तादृशा ये किंशुकाः पलाशकुसुमानि तेषां जालं समूहो यस्मिन्[२]। तादृशानि किंशुकजालानि पलाशकलिका यस्मिन्निति[३] वा। अत्र पलाशकोरकस्य वक्रत्वेन[४] हृदयविदारणाद्रुधिरारक्त[५]मनसिजस्य सादृश्यं व्याख्यातम्[६]। मृगनाभिर्मृगमदः कस्तूरीचेत्यमरः[(अ)]। रभसो हर्षवेगयोरिति **विश्वः**[(आ)]। कन्दर्पो दर्पकोऽनङ्गः कामः पञ्चशरः स्मरः[(इ)]। सम्बरारिर्मनसिजः **इत्यमरः**[(ई)]। रुचिर्मयूखे शोभायामभिष्वङ्गाभिलासयोरिति **विश्वः**[(उ)]। पलाशे किंशुक पर्णो इत्यमरः[(ऊ)]। जालं गवाक्ष आनाये क्षारके दन्तवृन्दयोः इति **विश्वः**[(ऋ)]।।३।।

**४-मदनमहीपतिकनकदण्डरूचिकेसरकुसुमविकासे।**
**मिलितशिलीमुखपाटलिपटलकृतस्मरतूणविलासे।। विह०।।४।।**

पुनः कथम्भूते[७] वसन्ते? मदन एव महीपतिस्तस्य यः कनकदण्डः सुवर्णघटितदण्डयुक्तं छत्रं तस्यैव रुचिर्यस्य तस्य[८] केसरस्य नागकेसरपुष्पस्य

१. ख. तरुणानाम् - इति पाठः।
२. ग. यत्र - इति पाठः।
३. ग. यत्र तादृशे - इति पाठः।
४. ख., च. च - इत्यधिकः पाठः।
५. ग. विदारणाद्रुधिराप्लुत इति पाठः; छ. रुधिराक्त - इति पाठः।
६. ग. बोद्धव्यम् - इति पाठः।
७. ग, पुनः कीदृशे - इति पाठः।
८. ग. तादृश - इति पाठः।
(अ) अ. को. - २.६.१२९
(आ) वि. प्र. सान्तवर्गः - १४
(इ) अ. को. - १.१.२५.
(ई) अ. को. - १.१.२६.
(उ) वि. प्र. चान्तवर्गः - ७
(ऊ) अ. को. - २.४.२९.
(ऋ) वि. प्र. लान्तवर्गः - १८

विकास:[१] प्रकाशो यस्मिन्[२]। पुन: कथम्भूते[३] ? मिलिता: शिलीमुखा भ्रमरा एव शिलीमुखा बाणा यस्मिन् तादृशं[४] यत्पाटलिपटलं पाटलपुष्पसमूहस्तेन कृत: स्मरतूणस्य कन्दर्पतूणीरस्य विलासश्चेष्टितं यस्मिन्[५]। अत्र परमर्मव्यथाजनकत्वेन भ्रमराणां बाणसाम्यम्। चाम्पेय: केसरो नागकेसर: काञ्चनाह्वय: **इत्यमर:**[(अ)]। अलोबाणौ शिलीमुखौ इति च[(आ)]। समूहे पटलं इत्यपि च[(इ)]। तुणोपासङ्गतूणीर-निषङ्गा इषुधिर्द्वयो: इत्यपि च[(ई)]।।४।।

**५-विगलितलज्जित जगदवलोकनतरुणकरुणकृतहासे।**

**विरहिनिकृन्तनकुन्तमुखाकृतिकेतक[६] दन्तुरिताशे।। विह०।।५।।**

पुन: कथम्भूते[७] ? विगलितं गतं लज्जितं लज्जा यस्य तस्य जगत: प्राणिगणस्य अवलोकितेन दर्शनेन तरुणकरुणै नवीनकरुणवृक्षै: पुष्पविकासव्याजेन कृतो हासो यस्मिन्[८]। अत्र हास्यरसस्य श्वेतत्वात्पुष्पविकाससाम्यम्। सितो हास्य: प्रकीर्तित: इति **भरत:**[(उ)]। यद्वा विगलितलज्जितानां जगतां[९] वियोगिजनानां अवलोकितेन तरुणै: अर्थादिवियोगिभि: करुणं करुणरससहितं यथा स्यादेवं कृतो हास यस्मिन्निति[१०]।

---

१. ग. विकास: - इति नास्ति।
२. ग. यत्र तादृशे - इति पाठ:।
३. ग. कीदृशे - इति पाठ:।
४. ग. तादृशे - इति पाठ:।
५. ग. यत्र तादृशे - इति पाठ:।
६. केतकि - इत्यपि प्रकाशितग्रन्थे पाठ:।
७. ग. कीदृशे - इति पाठ:।
८. ग. यत्र। तादृशे वसन्ते - इत्यधिक: पाठ:।
९. च. जगतां - इति नास्ति।
१०. ग. यत्र तादृशे - इति पाठ:।
(अ) अ. को. -२.४.६५
(आ) अ. को. - ३.३.१५.
(इ) अ. को. - ३.३.२१
(ई) अ. को. - २.८.८८.
(उ) ना. शा. - ६-४२

आः[१] किं विरहिणो जनाः[२] कष्टं[३] प्राप्नुवन्तीति करुणां[४] लज्जां हित्वा विलपन्तीति च हासस्तेषामिति[५] भावः। बाला रसानभिज्ञा एव वृद्धाः परप्रच्यवेऽपि कृतसंवरणाः अतस्तरुणेत्युक्तम्। पुनः कीदृशे[६] वसन्ते ? विरहिणां वियोगिनां निकृन्तनाय विदारणाय कुन्तमुखाकृतिः कुन्त आयुधविशेषस्तस्य मुखमग्रभागस्तस्येवाकृतिर्यस्य तादृशं यत्केतकं तेन दन्तुरिता व्याप्ता आशा दिशो यस्मिंस्तस्मिन्[७]। क्वचित्केतकीदन्तुरिताशे इति पाठः। याकारौ स्वीकृतौ ह्रस्वौ क्वचिदित्यत्र क्वचिद्ग्रहणस्य लज्जानुरोधार्थत्वात्कृतह्रस्वेन केतकिशब्देन समर्थनीयम्। अभावानिकृन्ततीति निकृन्तनः, विरहिनिकृन्तनश्चासौ कुन्तमुखाकृति कर्मधारयस्तादृशः, तेन दन्तुरिता आशा दिशो यत्र। केतकशब्दोऽकारान्तोऽपि स्वभावादिति केचित्[८]। लज्जितावलोकिते इत्यत्र च नपुंसके भावे क्तः[(अ)]। करुणस्तु रसे वृक्षे कृपायां करुणा मता इति **विश्वः**[(आ)]। प्रासस्तु कुन्तः **इत्यमरः**[(इ)]। निम्नोन्नततया व्याप्ते दन्तुरं कथ्यते बुधैः इति **धरणिः**[(ई)]। दिशश्च ककुभः काष्ठा आशाश्च हरितश्च ताः **इत्यमरः**[(उ)]। कृती छेदने इति ह्रस्वोऽनुबन्धोऽप्यस्तीति केचित्। तस्य ल्युट्प्रत्ययान्तस्य निकृन्तनमिति प्रयोगः साधुः।।५।।

---

१. ग. ह - इति पाठः।
२. ग. वराकाः - इति पाठः।
३. क., ख.,ग., छ. कृष्णं - इति पाठः।
४. घ., च., छ. करुणां - इति नास्ति।
५. क., ख., घ., च., छ. विलापोऽस्तीति पाठः।
६. च. किम्भूते - इति पाठः।
७. क., ग., च. स्तस्मिन् - इति नास्ति।
८. क., ख., घ., च., छ. अभावानि इत्यारभ्य स्वभावादिति केचित् इत्यन्तो नास्ति।
(अ) क्लीबत्वविशिष्टे भावे कालसामान्ये क्तः स्यात्-जल्पितम्, शयितम्, हसितम्, अष्टाध्यायी ३-३-११४ सूत्रे सिं० कौ० उत्तरकृदन्तप्रकरणम्।
(आ) वि.प्र. णान्तवर्गः - ३०
(इ) अ. को. - २.८.९३.
(ई) कोशोऽयं नोपलणभ्यते सम्प्रति
(उ) अ. को. - १.३.१.

**६-माधविकापरिमलललिते नवमालतिजातिसुगन्धौ।**
**मुनिमनसामपि मोहनकारिणि तरुणाकारणबन्धौ।। विह०।।६।।**

पुनः कथम्भूते[१] वसन्ते[२] ? माधविकायाः वासन्त्याः[३] परिमलेन सौरभेण[४] ललिते मनोहरे। पुनः कथम्भूते[५] वसन्ते[६] ? नवमालिकाया सुगन्धौ नवमालिकापुष्पेण अतिशयेन सौरभयुक्ते[७]। पुनः कीदृशे ? मुनिमनसामपि मोहनकारिणि मोहजनके[८], अन्येषां किं वक्तव्यमित्यर्थः[९]। पुनः[१०] कथम्भूते वसन्ते[११] ? तरुणानां विलासियुव[१२] जनानाम् अकारणबन्धौ स्वाभाविकमित्रे। विमर्दोत्थे परिमलो गन्धे जनमनोहरे **इत्यमरः**[(अ)]।।६।।

**७-स्फुरदतिमुक्तलतापरिरम्भणमुकुलितपुलकितचूते।**
**वृन्दावनविपिने परिसरपरिगतयमुना जलपूते।। विह०।।७।।**

पुनः कथम्भूते वसन्ते[१३]। स्फुरन्ती कम्पमाना शोभमाना[१४] या अतिमुक्तलता वासन्तीलता[१५] तस्याः परिरम्भणेन[१६] आलिङ्गनेन मुकुलितः पुलकितः, मुकुलितं

---

१. ग. कीदृशे - इति पाठः।
२. ग. वसन्ते - इति नास्ति।
३. छ. माधविकायाः वासन्त्याः - इति नास्ति।
४. ग. सौरभेण - इति नास्ति।
५. ग. कीदृशे - इति पाठः।
६. ग., च. वसन्ते - इति नास्ति।
७. ग. नवमालिकया सुगन्धौ इत्यारभ्य सौरभयुक्ते इत्यन्तो नास्ति।
८. ग., च. मोहनके - इति पाठः।
९. घ., च. शब्दार्थः - इति पाठः।
१०. क., ख., ग., घ., च. पुनः - इति नास्ति।
११. ग., च. पुनः कीदृशे - इति पाठः।
१२. च., छ. युवं - इति नास्ति।
१३. क., ख., ग., छ. पुनः कथम्भूते वसन्ते - इति नास्ति।
१४. ग. शोभमाना - इति नास्ति।
१५. क., ख., ग., घ., छ. वासन्तीलता - इति नास्ति।
१६.च. परिशीलनेन - इति पाठः।
(अ) अ. को. - १.५.१०.

मुकुलं तदेव पुलको[१] रोमाञ्चस्तद्युक्तश्चूत आम्रो यस्मिंस्तस्मिन्[२]। अत्र लता नायिकापरिरम्भणेन[३] चूतनायकस्यतिरोमाञ्चकथनेनाचेतनयोरपि कामोन्मेषः कथित इत्यर्थः[४]। तेन च[५] वसन्तस्यातिदुरन्तत्वं कथितम्। अतिशयेन मुक्तानामपि परिरम्भणोत्सुकतेति अतिमुक्तपदेन ध्वनितम्। एभिः[६] [७]पदैर्वसन्तस्य दुरन्तता सरसता[८] चोक्ता।

सम्प्रति क्रीडयाः स्थानविशेषमाह, वृन्दावनेत्यादि। वृन्दावननाम्नि विपिने वने[९] हरिर्विहरति इत्यन्वयः। कथम्भूते[१०] विपिने ? परिसरे समीपप्रदेशे परितः सर्वतोगतेन यमुनायाः जलेन पूते पवित्रे। अतिमुक्तकः पुण्ड्रकः स्याद्वासन्ती माधवीलता **इत्यमरः**[(अ)]। मुकुलं करोतीति "तत्करोति तदाचष्टे" इति[(आ)]। णिजन्ताद्भावे क्ते सति मुकुलितमिति बोध्यम्। पश्चान्मुकुलितमेव पुलकः सञ्जातोऽस्योति तारकादित्वादितच्[(इ)]। आम्रश्चूतः **इत्यमरः**[(ई)]। पर्यन्तभूः परिसरः इत्यापि[(उ)]।।७।।

---

१. छ. पुलको - इति नास्ति।
२. ग. यत्र तादृशे - इति पाठः।
३. ग. आलिङ्गनेन मुकुलि - इत्याधिकः पाठः।
४. ग. इत्यर्थः - इति नास्ति।
५. च. च - इति नास्ति।
६. ग. एतावता - इति पाठः।
७. ग. पदैः - इति नास्ति।
८. घ. दुरन्तत्वं कथितम् सरसत्वं चोक्तम् - इति पाठः।
९. छ. वने - इति नास्ति।
१०. ग. कीदृशे - इति पाठः।
(अ) अ. को. - २.४.७२.
(आ) वै. सि. कौ. उत्तरार्द्धे चुरादिप्रकरणस्यान्तिमे भागे पृ० सं० ३६१, ग. सू० २०४
(इ) तारकाः सञ्जाता अस्य तारकितं नभः। आकृतिगणोऽयम्। अष्टाध्यायी - ५.२.३६. सूत्रोपरि सिद्धान्तकौमुदी।
(ई) अ. को. २.४.३३
(उ) अ को - २.१.१४

**८-श्रीजयदेवभणितमिदमुदयति हरिचरणस्मृतिसारम्।**
**सरसवसन्तसमयवनवर्णनमनुगतमदनविकारम्।। विह० ।।८।।**

सम्प्रति गीतार्थमुपसंहरन् प्रेक्षावत्प्रवृत्यर्थं[1] स्वभणिते उत्कर्षमाह, श्रीजयदेवेत्यादि[2]। श्रीजयदेवकवेरिदं भणितं[3] गीतमुदयति[4]। अत्र[5] हेतु: हरिचरणयो: स्मृति: स्मरणं तेन[6] सारं श्रेष्ठम्[7], हरिचरणस्मृतिरेव सारो यत्र तस्मिन्निति[8] वा[9]। पुन: कथम्भुतंतम्[10] ? सरसं शृङ्गाररसप्रधानं वसन्तसमयसम्बन्धिनो वनस्य वर्णिनं यत्र तत्[11]। अत एवानुगतमदनविकारम्[12] अनुगत: सम्बद्ध: मदनस्य विकारो यास्मिंस्तम्[13]।।८।।

**८- दरविदलितमल्लीवल्लिचञ्चत्पराग-**
**प्रकटितपटवासैर्वासयन् काननानि।**
**इह हि दहति चेत: केतकीगन्धबन्धु:**
**प्रसरदसमबाणप्राणवद्गन्धवाह:।।८।।**

सम्प्रति वसन्तकालीनवायोरपि विरहिजतसन्तापकारित्वमाह[14]दरविदलितेत्यादिना[15]। इह हि अस्मिन्नेव वसन्ते गान्धवाहो वायुश्चेतो दहति

१. च., छ. प्रेक्षावत्प्रवृत्यर्थं - इति नास्ति।
२. च. श्रीजयदेवेत्याहि - इति नास्ति; ख. श्रीजयदेवेत्यादिना - इति पाठ:।
३.घ. गीतार्थमुपसंहरन् इत्यारभ्य भणितं इत्यन्तो नास्ति।
४. ख., ग. गीतमुदयतु - इति पाठ:।
५. ग., घ. तत्र - इति पाठ:।
६. ग. तेन - इति नास्ति।
७. च., छ., श्रेष्ठं - इति नास्ति।
८. ग. तादृशम् - इति पाठ:।
९. क., ग., घ., छ. वा - इति नास्ति।
१०. ग. कीदृशम् - इति पाठ:।
११. ग. तादृशम् - इति पाठ:।
१२. घ., च., छ. अतएवनुगतमदनविकारम् - इति नास्ति।
१३. ग. यस्मिस्तादृशम् - इति पाठ:; च. यास्मिंस्तत्र - इति पाठ:।
१४. ख., ग., घ., च., छ. सन्तापकत्व - इति पाठ:।
१५. ग. दरविगलितेत्यादि - इति पाठ:।

अर्थाद्विरहिणाम् किं कुर्वन् ? काननानि वासयन्सुरभीकुर्वन्। कैः दरं[१] ईषद्विदलिता[२] विकासिता या मल्लीवल्लिर्मल्लिकालता तस्याः सकाशात् चञ्चन्तः प्रसरन्तो ये परागाः पुष्परेणवः त एव प्रकटिता पटवाससः[३] पिष्टातकास्तैः। कथम्भूतो[४] गन्धवाहः ? केतकी[५]गन्धबन्धुः केतकीपुष्प[६]सौरभैर्गन्धबन्धुः[७]। पुनः कथम्भूतः[८] ? प्रसरतः प्रतिदिशं सञ्चरतोऽसमबाणस्य[९] कामस्य प्राणवत् प्राणतुल्यः। प्रसरता[१०] असमबाणेन प्राणवान् शक्तिसम्पन्नो[११] यो गन्धवाहः[१२] इत्येकमेव पदम्। ईषदर्थे दरोऽव्ययम् इति **विश्वः**[(अ)]। परागः पुष्परजसीति वा[(आ)]। पिष्टातः पटवासकः **इत्यमरः**[(इ)]। गहनं काननं वनमिति च[(ई)]। प्राणाश्चाऽसुषु कीर्तिताः इति **विश्वः**[(उ)]। शक्तिः पराक्रमः प्राणः[(ऊ)] **इत्यमरः**। गन्धवाहानिलाशुगाः इत्यपि[(ऋ)]।।८।।

---

१. ख. ग. च. छ. केः दरं - इति नास्ति।
२. क., ग., घ., च., छ. ईषर्दावगलिता - इति पाठः।
३. क., ख., ग., घ., च. पटवासाः - इति।
४. ग. कीदृशो - इति पाठः।
५. ग. केतकी - इति नास्ति।
६. ग. पुष्प - इति नास्ति।
७. ख., ग., च.० गन्ध - इति नास्ति; घ. केतकीपुष्पसौरभैर्गन्धबन्धु इति नास्ति।
८. ग. कीदृश - इति पाठः।
९. ग. प्राणवत्प्राणसदृशः - इत्याधिकः पाठः।
१०. ग. यद्वा - इत्यधिकः पाठः।
११. ग. मानयोः - इत्यधिकः पाठः।
१२. घ. केतकी - इत्यधिकः पाठः।
(अ) वि. प्र. रान्तवर्गः - ११
(आ) अ. को. - ३.३.२१.
(इ) अ. को. २.६.१३९.
(ई) अ. को - २.४.१.
(उ) वि. प्र. णान्तवर्गः - ६
(ऊ) अ. को. - २.८.१०२
(ऋ) अ. को. - १.१.६२.

**९-उन्मीलन्मधुगन्धलुब्धमधुपव्याधूतचूताङ्कुर-**
**क्रीडत्कोकिलकाकलीकलकलैरुद्गीर्णकर्णज्वराः।**
**नीयन्ते पथिकैः कथं कथमपि ध्यानावधानक्षण-**
**प्राप्तप्राणसमासमागमरसोल्लासैरमी वासराः।।९।।**

सम्प्रति वसन्तदिवसानामपि[१] दुरन्तमाह, उन्मीलदित्यादिना[२]। अमी वसन्तसम्बन्धिनो दिवसाः वासराः पथिकैः कथं कथमपि महता कष्टेन नीयन्ते समाप्यन्ते। कथम्भूता[३] वासराः ? उद्गीर्णः प्रकटीभूतः[४] कर्णज्वरः श्रोत्रसन्तापः येषु ते[५]। कैः उन्मीलन्ति प्रकटीभवन्ति यानि मधूनि गन्धाश्च तेषु[६] लुब्धा लोलुपा[७] भ्रमरास्तैर्व्याधूताः कम्पिता ये चूताङ्कुरा आम्रमुकुलानि तेषु क्रीडतां कोकिलानां याः काकल्यः अव्यक्तमधुरध्वनयः[८] ताभिः कृता ये कलकलाः कोलाहलास्तैः। केन प्रकारेण नीयन्त इत्यत आह, ध्यानेति। ध्याने [९]स्वप्रियाचिन्तने यदवधाना तत्परता तेन क्षणं प्राप्तायाः प्राणसमायाः जीवनुल्यायाः कान्तायाः समागमरूपो[१०] रसस्तस्मादुत्पन्ना ये उल्लासा उत्साहास्तैः। काकली तु कले सूक्ष्मे ध्वनावित्य**मरः**[(अ)]। कोलाहलः कलकलः[(आ)] इति च।।९।।

**१०-अनेकनारीपरिरम्भसम्भ्रमस्फुरन्मनोहारिविलासलालसम्।**
**मुरारिमारादुपदर्शयन्त्यसौ सखी समक्षं पुनराह राधिकाम्।।१०।।**

अनेकेत्यादि, असौ सखी राधिकां पुनराह, पुनः कथितवती। किं कुर्वती ? आराद्दुरतः[११] समक्षं प्रत्यक्षं[१२] मुरारिं उपदर्शयन्ती। कथम्भूतं[१३] ? अनेकनारीणां परिरम्भणं[१४]

१. क., ख., ग., घ., छ.० मपि - इति नास्ति।
२. ग. उन्मीलदित्यादि - इति पाठः।
३. ग. कीदृशाः - इति पाठः।
४. ग. प्रकटीकृतः - इति पाठः।
५. ग. तादृशाः - इति पाठः।
६. क., ख., घ., छ. येषु - इति पाठः।
७. च. मधुपा - इत्यधिकः पाठः।
८. च. मधुर - इति नास्ति।
९. च. स्व - इति नास्ति।
१०. क., ग., घ., छ. समागमतुल्यो - इति पाठः।
११. छ. आराद्दुरे - इति पाठः।
१२. च. प्रत्यक्ष - इति नास्ति।
१३. ग. कीदृशं - इति पाठः।
१४. क., ख., ग., छ. अनेकनारी परिरम्भे - इति पाठः।
(अ) अ. को. - १.७.२. (आ) अ. को. - १.६.२५.

सम्भ्रमेण आलिङ्गनादरेण स्फुरन्[१] मनोहारीविलासस्तत्र विलासः तृष्णातिरेकः तस्य[२] लालसा औत्सुक्यं यस्य तम्[३]। सम्भ्रमास्त्रयमिच्छन्ति भयमुद्वेगमादरम्। लालसो लालसाऽपि स्याद्याञ्चतृष्णातिरेकयोः। औत्सुक्ये चेति विश्वप्रकाशः[(अ)]। आराद्दूर-समीपयोः **इत्यमरः**[(आ)]।।१०।।

।। चतुर्थः प्रबन्धः / गीतम् ४।।

।।रामकरीरागयतितालाभ्यां गीयते ।।

**१-चन्दनचर्चितनीलकलेवरपीतवसनवनमाली।**

**केलिचलन्मणिकुण्डलमण्डितगण्डयुगः स्मितशाली।।**

**हरिरिह मुग्धवधूनिकरे विलासिनि! विलसति केलिपरे।। ध्रुवम् ।।१ ।।**

तदेव गीतेन कथयति, चन्दनेत्यादि[४]। गीतस्यास्य रामकरीरागः। तालश्च[५] रूपकः[६]। तल्लक्षणं प्रागुक्तम्। गीतार्थस्तु, हे विलासिनि! विलासशीले! इह[७] वृन्दावने मुग्धवधूनिकरे नववधूनिचये[८] हरिर्विलसति क्रीडां करोति। कथम्भूते[९] मुग्धवधूनिकरे[१०] ? केलिपरे क्रीडापरायणे। अत्र मुग्ध[११] वधूनिकरे हावाद्यनभिज्ञे स्त्रीनिचये केलिपरे सामान्यक्रीडापरायणे[१२] विलसतीति ध्वन्यर्थः। तथा च हावाद्यभिज्ञां त्वां[१३] विना सकलकलाभिज्ञस्यापि हरेर्विलासो[१४] न शोभत इति भावः।

१. ग. छ. यो - इत्यधिकः पाठः।
२. क., ख., घ., च., छ. विलासः तृष्णातिरेकः तस्य - इति नास्ति।
३. ग. तादृशम् - इति पाठः।
४. ग. चन्दनेत्यादि - इति नास्ति; च. चन्दनेत्यादिना - इति पाठः।
५. ग. तालस्तु - इति पाठः।
६. च. रूपकतालः - इति पाठः।
७. क., ख., घ., छ. इह - इति नास्ति।
८. क., ख., घ., च., छ. सुन्दर - इति पाठः।
९. ग. कीदृशे - इति पाठः।
१०. क., ख., ग., घ., छ. मुग्ध - इति नास्ति।
११. क., घ. छ. मुग्ध - इति नास्ति।
१२. च., छ. सामान्यक्रीडापरे - इति पाठः।
१३. क., ख., घ., छ., त्वां - इति नास्ति।
१४. ग० र्विलासो - इति नास्ति।
(अ) वि. प्र. सान्तवर्गः - १८
(आ) अ. को. - ३.३.२४३.

मुग्धः सुन्दरमूढयोरिति **विश्वः**[अ]। विलासो हावविशेषस्तल्लक्षणमुक्तञ्च, स्थाने यानासने वापि नेत्रवक्त्रादिकर्मणाम्। उत्पाद्यन्ते विशेषो यः स विलासः प्रकीर्तितः। एतच्च ध्रुपदम्[१]। कथम्भूतो[२] हरिः ? चन्दनेत्यादि[३], चन्दनेन चर्चिते अनुलिप्ते नीलकलेवरे श्यामशरीरे पीतवस्त्रं वनमाला च यस्य सः[४]। पुनः कथम्भूतः[५] ? केलिषु चलती कम्पमाने मणियुक्ते कुण्डले ताभ्यां मण्डितं अलङ्कृतं गण्डयुगं कपोलयुग्मं यस्य सः[६]। पुनः कथम्भूतो[७] हरिः[८] ? स्मितेन ईषद्धासेन शाली अलक्षितद्विजं धीरमुत्तमानां स्मितं भवेत्[अ]। कलेवरं गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः **इत्यमरः**[इ]। गण्डौ कपोलौ इति च[ई]।।१।।

**२-पीनपयोधरभारभरेण हरिं परिरभ्य सरागम्।**
**गोपवधूरनुगायति काचिदुदञ्चितपञ्चमरागम्।।२।।**

गोपीनां सौन्दर्यविलाससाधनानभिज्ञत्वं[९] च कथयन्नेव केलिमाह, पीनेति[१०]। काचिद्गोपवन्धूः[११] पीनपयोधरभारभरेण[१२]मांसल स्तनगौरवातिशयेन सरागं सानुरागं[१३] यथा स्यादेवं हरिं परिरभ्य आलिङ्गन्य उदचिञ्चत ऊर्ध्वमञ्चितः[१४]

१. क., ख., घ., च., छ. एतच्च ध्रुपदम् - इति नास्ति।
२. ग. कीदृशो - इति पाठः।
३. क., ख., घ., च., छ. चन्दनेत्यादि - इति नास्ति।
४. ग. तादृशः - इति पाठः।
५. ग. पुनः कथम्भूतः - इति नास्ति।
६. ग. तादृशः - इति पाठः।
७. ग. कीदृशः - इति पाठः।
८. ग. हरिः - इति नास्ति।
९. क., ख., ग., छ. विलासानभिज्ञत्वं - इति पाठः।
१०. घ. छ. पीनेत्यादि - इति पाठः।
११. ग. काचिद् गोपवन्धूः - इति नास्ति।
१२. च० भार - इति नास्ति।
१३. च. सानुरागं - इति नास्ति।
१४. घ. उर्ध्वमञ्चितः - इति नास्ति।
(अ) वि. प्र धान्तवर्गः - १०
(आ) ना. शा. - ६.५४.
(इ) अ. को. - २.६.७०.
(ई) अ. को. - २.६.९०.

पञ्चमाख्यो रागो[१] यत्र एव यथा स्यात्तथानुगायति अनु पश्चात् हरेर्गानानन्तरं[२] गायति[३]। अत्र गोप्याः सौन्दर्यं पीनपयोधरेत्यादिना प्रतिपादितम्। अवैदग्ध्यं तु कृष्णस्य, परिरम्भोद्यमं विनैव स्वयं प्रथमं परिरम्भणात्। अन्योन्यकृते हि परिरम्भे शृङ्गाररसः पुष्टो भवति। रम्यदेशकलाकालवेष भोगादिसेवनैः प्रमोदात्मारतिः सैव यूनोरन्योन्यरक्तयोः प्रहृष्यमाणः शृङ्गारो मधुराङ्गविचेष्टितैः (इति) **दशरूपके** कथितमस्ति[(अ)]। शृङ्गारे पञ्चमः स्वरो बाहुल्येन भवति स एवात्र कथितः। तथा च[४] **भरतः**, मध्यमं पञ्चभूयिष्ठं हास्यशृङ्गारयोर्भवेत्[(आ)] (इति)।।२।।

**३-कापि विलासविलोलविलोचनखेलनजनितमनोजम्।**
**ध्यायति मुग्धवधूरधिकं मधुसूदनवदनसरोजम्।। हरि०।।३।।**

कापीत्यादि[५], कापि मुग्धवधूः मधूसूदनस्य वदनसरोजं मुखपद्मम् अधिकं यथा स्यात्तथा[६] ध्यायति[७]। कथम्भूतं[८] ? विलासेन विलोलयोश्चञ्चलयो[९]र्विलोचनयोर्नेत्रयोर्यत्खेलनं[१०] तेन जनित उत्पादितो मनोजः कामो येन अर्थात्तस्यामेवैतत्[११]। अत्र प्रत्यक्षस्यापि मधूसूदनस्य ध्यानादवैदग्ध्यं तस्या अवगम्यते।।३।।

---

१. च. पञ्चमरागो - इति पाठः।
२. च.० र्गानानन्तरं - इति नास्ति।
३. ख. अनु इत्यारभ्य गायति इत्यन्तो नास्ति।
४. क. ख., घ. च - इति नास्ति।
५. क., कापीत्यादि - इति नास्ति; छ. कापि विलसेत्यादि - इति पाठः।
६. च. स्यादेवं - इति पाठः।
७. ग. च. चिन्तयति - इत्यधिकः पाठः।
८. ग. कीदृशम् - इति पाठः।
९. च० श्चञ्चललयो - इति नास्ति।
१०. ग., च., यत् - इत्यधिकः पाठः।
११. ग.० मेव तादृशम् - इति पाठः।
(अ) दशरूपकम् - ४-४८
(आ) भरतनाट्यशास्त्रे इदं नोपलभ्यते।

**४-कापि कपोलतले मिलिता लपितुं किमपि श्रुतिमूले।**
**चारु चुचुम्ब नितम्बवती दयितं पुलकैरनुकूले।। हरि०।।४।।**

कापि कपोलेत्यादि, कचितन्नितम्बवती गोपी दयितं कृष्णं[१] कपोलतले चारु मनोहरं यथा स्यात् तथा चुचुम्ब चुम्बनं कृतवती। कथम्भूता[२] ? किमपि कार्यं लपितुं मन्त्रयितुं[३] श्रुतिमूले कर्णमूले मिलिता संलग्ना। कथम्भूते[४] ? पुलकै: रोमाञ्चैरनुकूले प्रियाविलाससूचके। औत्सुक्येन सहसा कान्तमुखचुम्बनं[५] सखीजनहास्यकरं भवतीति व्याजेन तया तदारब्धमिति भाव:[६]। अत्र प्रथमं स्वमुखस्पर्शेन कृष्णकपोले रोमाञ्चमुत्पाद्य[७] चुम्बनेन तस्या अधीरत्वं ध्वनितम्।।४।।

**५-केलिकलाकुतुकेन च काचिदमुं यमुनाजलकूले।**
**मञ्जुलवञ्जुलकुञ्जगतं विचकर्ष करेण दुकूले।। हरि०।।५।।**

केलिकलेत्यादि, काचिद्गोपी अमुं कृष्णं[८] केलिकलाकुतुकेन दुकुले पट्टवस्त्रविषये[९] विचिकीर्षया आकृष्टवती[१०], दुकूले गृहीत्वा अमुं श्रीकृष्णं[११] विचकर्षेति केचिद्यो-जयन्ति[१२]। कथम्भूतं ? मञ्जुलो मनोहरो वञ्जुलो[१३] वेतसो यत्र[१४] तादृशो य:[१५] कुञ्जस्तत्र[१६] गतं प्राप्तम्। कुत्र विचकर्ष ? यमुनाजलकूले यमुनाया जलयुक्ते रोधसि वञ्जुलकुञ्जस्थं कृष्णं[१७] यमुनाकूलं प्रति क्रीडार्थमाकृष्टवतीत्यर्थ:। अत्र

१. च. श्रीकृष्णं - इति पाठ:।
२. ग. कीदृशी - इति पाठ:।
३. क., ग., घ., छ. मन्त्रयितुं - इति पाठ:।
४. ग. कीदृशे - इति पाठ:।
५. घ. चुम्बनेन - इति पाठ:।
६. ग. तदारुणम्ययारध्वमिति भाव:।
७. घ. सखीजनहास्यकरं इत्यारभ्य रोमाञ्चमुत्पाद्य इत्यन्तो नास्ति।
८. छ. श्रीकृष्णं - इति पाठ:।
९. ग. पट्ट - इति नास्ति।
१०. च. विचकर्षकृष्टवती - इति पाठ:।
११. ग., च. कृष्णं - इति पाठ:।
१२. ग. केचिद्योजयन्ति - इति नास्ति।
१३. च. मनोहरो वञ्जुलो - इति नास्ति।
१४. च.० स्तत्र - इति पाठ:।
१५. क., घ., च., छ. तस्मिन् - इति पाठ:।
१६. च. छ. ० स्तत्र - इति नास्ति।
१७. ग. श्रीकृष्णं - इति पाठ:।

अन्यानुरक्तस्स कृष्णस्य[१] नायिकया [२]वस्त्राकर्षणादधीरत्वं तस्या व्यङ्ग्यम्। कुतुकं च कुतूहलम् **इत्यमरः**[(अ)]। मनोज्ञं मञ्जुमञ्जुलम् इति[(आ)] च। वञ्जुलोवेतसाशोकतिनि-शेष्वऽथ मञ्जुलम्[(इ)]। दुकुलन्तु क्षौमे सूक्ष्मांशुकेऽपि च[(ई)]।।५।।

**६-करतलतालतरलवलयावलिकलितकलस्वनवंशे।**
**रासरसे सहनृत्यपरा हरिणा युवतिः प्रशशंसे।।हरि०।।६।।**

करतलेत्यादि, काचिद्युवतिर्हरिणा प्रशंशने स्तुता। कीदृशी, रासरसे गोपक्रीडाविशेषे[३] सहनृत्यपरा कृष्णेन सह नृत्यन्ती। कथम्भूते[४] रासरसे? करतलयोस्तालेन परम्परं वादनेन[५] तरला चञ्चला या वलयावलिः[६] कङ्कणपङ्क्तिस्तया कलितः मिश्रितः कलस्वनोऽव्यक्तमधुरशब्दसाहितो वंशो वेणुर्यत्र तस्मिन्[७]। अत्र रासरसे इत्यादिना गोदुहां क्रीडास्वेव सा स्तुत्या न तु सकलसङ्गीतकलास्विति ध्वनितम्। द्रुमभेदे करास्फाले तालन्तु हरितालके इति **विश्वः**[(उ)]। तरलश्चञ्चले षिङ्गे हारमध्यमणावपि इति च[(ऊ)]। वलयं कङ्कणेऽपि च[(ए)]। आवलिः पङ्क्तिः **इत्यमरः**[(ऐ)]। वंशो वेणो कुले वर्गे पृष्ठस्यावयवेऽपि च इति **विश्वः**[(ओ)]। रामस्तु गोदुहां क्रीडा इति **हारावलीः**[(औ)]।।६।।

---

१. च० कृष्णस्य - इति नास्ति।
२. च. वस्त्रानुषकर्षणा - इति पाठः।
३. क., छ. क्रीडाविषये - इति पाठः।
४. ग. कीदृशे - इति पाठः।
५. ग. वादेन - इति पाठः।
६. ग. वलया - इति नास्ति।
७. घ. कलिता मिश्रिता - इति पाठः।
८. ग. तादृशे - इति पाठः।
(अ) अ. को. - १.७.३१
(आ) अ. को. - ३.१.५२
(इ) वि. प्र. लान्तवर्ग - ८५
(ई) वि. प्र. लान्तवर्गः - ११५
(उ) वि. प्र. लान्तवर्गः - १७
(ऊ) वि. प्र. लान्तवर्गः - ५८
(ए) वि. प्र. यान्तवर्गः - ६५
(ऐ) अ. को. - २.४.४.
(ओ) वि.प्र. शान्तवर्गः - १०
(औ) हारावलीः पृ० सं० - १९, श्लोक सं० - १७६

**७-श्लिष्यति कामपि चुम्बति कामपि कामपि रमयति रामाम्।**
**पश्यति सस्मितचारुतरामपरामनुगच्छति वामाम्।। हरि० ।।७।।**

श्लिष्यतीति, कामपि रामां क्रीडाशीलां गोपीं[१] श्लिष्यति आलिङ्गति। कामपि चुम्बति, कामपि रमयति। निभृत: सम्भोगेन क्रीडयति। स: कृष्ण: स्मितेन चारुतरां अतिशयेन मनोरमां[२] गोपीं पश्यति। कांश्चिद् वामां वामस्वभावां कोपवतीमनुगच्छति अनुनयार्थमनुगतिं करोति। अत्र कृष्णेनाश्लेषादौ क्रियमाणेऽपि ताभिर्न कृतमित्यवैदग्ध्यं[३] सूचितम्। सुन्दरी रमणी रामा **इत्यमर:**[(अ)]। विद्या वामा अपि स्त्रियाम इति च[(आ)]।।७।।

**८-श्रीजयदेवकवेरिदमद्भुतकेशवकेलिरहस्यम्।**
**वृन्दावनविपिने ललितं वितनोतु शुभानि यशस्यम्।। हरि० ।।८।।**

सम्प्रति[४] गीतसमाप्तो कवि: स्वनाम निबध्नन्नेवाशिषं प्रार्थयते, श्रीजयदेवेत्यादि। श्रीजयदेवकवेरिदं ललितं गीतं शुभानि वितनोतु[५] विस्तारयतु। कीदृशम्[६] ? वृन्दावने अद्भूतं केशवस्य केलिरहस्यं गुप्तक्रीडा[७] यत्र तादृशम्[८]। एकेनैव कृष्णेनानेककामिनीनां कामपूरणाद्भुतत्वम्[९]। पुन: कथम्भूतं[१०] ? यशस्य यश: साहितम्।।८।।

१. ग. गोपीं - इति नास्ति।
२. च. मनोहरां - इति पाठ:।
३. क., घ., छ. कृतमित्यप्यवैदग्ध्यं - इति पाठ:।
४. च., छ. सम्प्रति - इति नास्ति।
५. च. तमोतु - इति पाठ:।
६. क., घ., छ., च. किम्भूते - इति पाठ:।
७. क., घ., छ., च. - इत्यधिक: पाठ:।
८. क., घ., छ. यत् तत् - इति पाठ:; च. यत्र तत् - इति पाठ:।
९. ग. अद्भुतत्वं - इति नास्ति
१०. ग. कीदृशम् - इति पाठ:।
(अ) अ. को. - २.६.४.
(आ) अमरकोशस्य वर्तमानसंस्करणे उद्धरणामिदं नोपलभ्यते।

**११-विश्वेषामनुरञ्जनेन जनयन्नानन्दमिन्दीवर-**
**श्रेणीश्यामलकोमलैरुपनयन्नङ्गैरनङ्गोत्सवम्।**
**स्वच्छन्दं व्रजसुन्दरीभिरभितः प्रत्यङ्गमालिङ्गितः**
**शृङ्गारः सखि मूर्तिमानिव मधौ मुग्धो हरिः क्रीडति ।।११।।**

अथ[१] सकलकलाभिज्ञस्य श्रीकृष्णस्य[२] कथं हावाद्यनभिज्ञाभिः[३] गोपीभिः सहकेलिं कृतवानित्यत आह, [४]विश्वेषामित्यादि[५]। हे सखि! राधे! मधो वसन्ते मुग्धो मनोहरो हरिः क्रीडति। किं कुर्वन्? विश्वेषां[६] गोपीजनानां अनुरञ्जनेन अनुरागेणानन्दं[७] जनयन्[८]। पुनः किं कुर्वन्? इन्दीवराणां नीलकमलानां या[९] श्रेणी[१०] पङ्क्तिस्तद्वत्। श्यामैः नीलैः[११] कोमलैः सुकुमारङ्गैः; अवयवैरनङ्गस्य कामस्य उत्सवं[१२] उपनयन् उपस्थापयन्। कथम्भूतो[१३] हरिः अभितः उभयतो बाह्यैरवयवैरन्तश्चेतसा प्रत्यङ्गं अङ्गमङ्गं प्रति स्वच्छन्दं यथा स्यादेवं[१४]। व्रजसुन्दरीभिरालिङ्गितो[१५] मूर्तिमान्शरीरी[१६] शृङ्गाररस[१७] इव। शृङ्गाररस [१८]स्याशरीरत्वात्क्रीडारसो[१९] न सम्भवतीति

१. ग. ननु - इति पाठः।
२. ग. सकल शृङ्गारकलाभिज्ञः श्रीकृष्णः - इति पाठः।
३. क., घ., च., छ. विहरतः केलिमाह - इति पाठः।
४. क., घ., च., छ. विहरतः केलिमाह - इति पाठः।
५. ग. विश्लेषामित्यादि - इति पाठः।
६. ग. विश्लेषां - इति पाठः।
७. ग., च. अनुरागेणां० - इति नास्ति।
८. घ. अनुरागजननेन - इति पाठः।
९. क., च., छ. या - इति नास्ति।
१०. ग. परम्परा - इत्यधिकः पाठः।
११. ग. च. श्यामलैः - इति पाठः।
१२. घ. उत्सवं - इति नास्ति।
१३. ग. कीदृशो - इति पाठः।
१४. छ. यथा स्यादेवं - इति नास्ति।
१५. ग., चं, च. क इव - इत्यधिकः पाठः।
१६. च. शृङ्गार इव - इत्यधिकः पाठः।
१७. ग. रस - इति नास्ति।
१८. क., ग., घ., छ. रस - इति नास्ति।
१९. च. छ. रसो - इति नास्ति।

मूर्तिमानित्युक्तम्। अत्र शृङ्गाररसस्य श्यामत्वात् श्रीकृष्णस्य सादृशम्[५]। तदुक्तं **भरते**, श्यामो भवति शृङ्गारः सितो हास्यः प्रकीर्तितः इति[(अ)]। यथा मुग्धो मनोहरः शृङ्गाररसो मधौ[६] वसन्ते क्रीडति सर्वत्र विलसति। किं कुर्वन्[७] ? अनुरञ्जनेन यूनोः परस्परानुरागजननेन विश्वेषां प्राणिनां[८] आनन्दं जनयतु[९]। पुनः[१०] किं कुर्वन्? अङ्गैः शृङ्गाररसस्याङ्गभूतैः कटाक्षादिभिरनुभावे रोमाञ्चादिभिश्च सात्विकभावैः शङ्काऽऽसूयादिभिः सञ्चारिभावैश्चानङ्गोत्सवमुपनयन्। केवलमेतैः[११] पूर्वभावैरपीत्याह[१२], इन्दीवरेति। इन्दीवरश्रेणिभिः कमलपङ्क्तिभिः[१३] श्यामलैः गाढान्धकारनीलनिचोलवनादिभिः[१४] कोमलैर्मृदुशय्यादिभिः[१५]। अत्र हेतुगर्भविशेषणमाह, स्वच्छन्दमित्यादि। स्वच्छन्दं यथा स्यादेवं व्रजसुन्दरीभिरङ्ग मङ्गंप्रति आलिङ्गितः आश्रितः[१६] शृङ्गाररसस्याङ्गिनो विभावादीनां मध्ये[१७] कयाचिच्च शङ्काऽऽसूतादिसहचारिरूपं कयाचिच्च रोमाञ्चितत्वादि[१८] सात्विकभावरूपं शृङ्गाररसस्याङ्गमाश्रितमिति भावः। विभावादीनामङ्गत्वं प्रति **भरतः**,

विभावैरनुभावैश्च भावः सञ्चारिसात्विकैः।

५. च. साम्यम् - इति पाठः।
६. घ., च., छ. मधौ - इति नास्ति।
७. क., छ. सर्वत्र विलसति, किं कुर्वन् - इति नास्ति।
८. च. प्राणिनां - इति नास्ति।
९. क., घ., च., छ. जनयम् - इति पाठः।
१०. ग. पुनः - इति नास्ति।
११. ग. च., छ. न केवलमेतैः - इति पाठः।
१२.ग., च., छ. पूर्व - इति नास्ति;० र्विभावैरन्यै - इति पाठः।
१३. ग. कमलपङ्क्तिभिः - इति नास्ति।
१४. क., घ., छ. नीलतमाल - इति पाठः।
१५. घ. कमलपङ्क्तिभिः इत्यारभ्य मृदुशय्यादिभिः इत्यन्तो नास्ति।
१६. च. आश्रितः - इति नास्ति।
१७. ग. कयाचित्ताम्बुलस्रक्चन्दनाद्युदीपनविभावरूपं कयाचित्सुस्मितकटाक्षाद्युनुभावरूपं - इत्याधिकः पाठः।
१८. च. छ. रोमाञ्चस्वेदादि - इति पाठः।
(अ) ना. शा. - ६.४२

जनितो बोधित: स्फीतो वृद्ध: शृङ्गार इष्यते(अ)।। तथा च विभावसामान्यलक्षणं तु **रसरत्नप्रदीपिकायां**[१],

भावयन्ति विशेषेण ये रसान्वै मनोहरान्
ते विभावास्तु कथ्यन्ते नाट्यशास्त्रविशारदै:।
क्रियन्ते ये रसा: सम्यक् लोकानुभवगोचरा:
तेऽनुभावास्तु कथ्यन्ते नाट्यशास्त्रविशारदै:[२]।।

तत्र शृङ्गारविभावा **भरतेनोक्ता**:,

ऋतुमाल्यालङ्कारै: प्रियजनगान्धर्वकाव्यसेवाभि:।
उपवनगमनविहारै: शृङ्गाररस: समुद्भवति[२]।।

अनुभावसामान्यलक्षणं यथा[३],

व्याक्रियते यथा सम्यग्लोकानुभावगोचरा:।
तेऽनुभावास्तु कथ्यन्ते नाट्यशास्त्रविशारदे:(इ)।।

तत्र शृङ्गारानुभाव:[४],

नयनवदनप्रसादै: स्मितमधुरवचोधृतिप्रमोदैश्च।
मधुरै: स्वाङ्गविकारैस्तस्याभिनय: प्रयोक्तव्य:(ई)।।

व्यभिचारिसामान्यलक्षणं **दशरूपके-**

[५]विशेषादाभिमुख्येन चरन्तो व्याभिचारिण:(उ)।

१. क., घ., च., छ. विभावसामान्यलक्षणं तु रसरत्नप्रदीपिकायां - इति नास्ति।
२. ग. क्रियन्ते इत्यारभ्य विशारदै: इत्यन्तो नास्ति।
३. घ., च., छ. अनुभाव इत्यारभ्य विशारदै: इत्यन्तो नास्ति।
४. च., छ. किञ्च - इति पाठ:।
५. घ., च., छ. व्यभिचारि इत्यारभ्य व्यभिचारिण: इत्यन्तो-नास्ति।
(अ) भरतनाट्यशास्त्रे इदं नोपलभ्यते।
(आ) ना० शा० - ६-४७
(इ) ना० शा० - नोपलभ्यते।
(ई) ना० शा० - नोपलभ्यते।
(उ) दशरूपकम् - ४.७.

**शृङ्गारतिलके,**

शङ्कासूया तथा[१] ग्लानिर्व्याधिश्चिन्ता स्मृतिर्धृतिः
औत्सुक्यं विस्मयो हर्षो ब्रीडोन्मादौ भयं[२] तथा।
विषादो जडता निद्रावहित्थं चापलं मतिः
इति भावाः प्रयोक्तव्याः शृङ्गारे व्यभिचारिणः[(अ)]।।

सात्विकभावाः[३] **शृङ्गारतिलके,**

स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभङ्गोऽथ वेपथुः
वैवर्ण्यमश्रुप्रलय इत्यष्टौ सात्विकाः स्मृताः इति[(आ)]।।

एतेषामवान्तरलक्षणानि ग्रन्थगौरवभयान्न लिख्यते। अत्र सकलकलाभिज्ञस्यापि व्रजसुन्दरीभिः सह मुग्धतामाश्रित्य तदनुसारेण क्रीडतोऽपि हरेर्न दक्षत्वहानिः[४]। तासां तथैवानुरञ्जनात्। अत एव विश्वेषामनुरञ्जनेनेत्यनेन विश्वानुरञ्जनकत्वं कृष्णस्योत्कमिति भावः।।११।।

**१२-अद्र्युत्सङ्गवसद्भुजङ्गकवलक्लेशादिवेशाचलं**
**प्रालेयप्लवनेच्छयानुसरति श्रीखण्डशैलानिलः।**
**किं च स्निग्धरसालमौलिमुकुलान्यालोक्य हर्षोदया-**
**दुन्मीलन्ति कुहूः कुहूरिति कलोत्तालाः पिकानां गिरः।।१२।।**

इदानी राधां शीघ्रं[५] गमयितुं मलयनिलाद्रिः[६] दुःसहतामाह, अद्र्युत्सङ्गेत्यादि। श्रीखण्डशैलानिलो [७]मलयसम्बन्धी पवनः ईशाचलं ईशस्य महादेवस्याचलं[८] हिमालयमनुसरति। कस्मादिव? अद्रेर्मलयस्य उत्सङ्गे क्रोडे वसन्तो ये भुजङ्गाः सर्पास्तेषां कवलेन भक्षणेन जनितो यः क्लेशस्तस्मादिव[९]। तर्हि हिमाद्रिं

१. मुद्रितपुस्तकानुसारं तथा इत्यस्य स्थाने भयं - इति पाठः।
२. मुद्रितपुस्तकानुसारं भयं इत्यस्य स्थाने मद - इति पाठः।
३. छ० सात्विकभावा - इति नास्ति।
४. ग० कृष्णस्य न कोविदत्वहानिः - इति पाठः।
५. ग०, च० एव - इत्यधिकः पाठः।
६. च० मलयाद्रि - इति पाठः।
७. च० पर्वत - इत्यधिकः पाठः।
८. च० पर्वतम् - इत्यधिकः पाठः।
९. च० सन्ताप - इत्यधिकः पाठः।
(अ) शृ० ति० ३.४२.४३. (अ) शृ० ति० १-१५

किमिति व्रजतीत्याशङ्क्याह, प्रालेयेत्यादि। प्रालेयं तुषारस्तस्य यत् प्लवनमवगाहनं तस्येच्छया। अत्र सर्पैः कवलितोद्गीर्णस्य पवनस्य [1]तद्विषसम्पर्कादधिकं विरहिणां सन्तापकत्वं ध्वनितम्। न केवलमिदमेव दुःखं[2] वसन्तेऽपरमपीत्याह। किंचेत्यादि किं चेति पक्षान्तरे। पिकानां कोकिलानां कुहूः कुहूरिति गिरः[3] कुहूरित्येवं रूपाः शब्दा उन्मीलन्ति प्रकटीभवन्ति। कथम्भूताः ? कलोत्तालाः कला[4] अव्यक्तमधुराः उत्ताला उद्भटाः। कस्मात्? ये[5] रसाला आम्रवृक्षास्तेषां ये मौलयोऽग्रभागास्तत्र यानि मुकुलानि तान्यालोक्य[6] वीक्ष्य यो हर्षोदय आनन्दस्याविर्भावस्तस्मात् अत्र क्वचित् अद्योत्सङ्गा इति पाठः। तत्राद्यवसन्त इत्यर्थः। तुषारस्तुहिनं हिमम् प्रालेयं मिहिका चाथ **इत्यमरः**[(अ)]। चाषालो होमकुण्डे स्याद्वर्त्ते चोत्ताल उत्कटे। श्रेष्ठोऽपि विकरालोऽपि स्यादुत्तालः प्लवङ्गमे इति **विश्वः**[(आ)]।।१२।।

**१२-(क) ❋रासोल्लासभरेण विभ्रमभृतामाभिरवामभ्रुवा-**
**मभ्यर्णे परिरभ्य निर्भरमुरः प्रेमान्धया राधया ।**
**साधु त्वद्वदनं सुधामयमिति व्याहृत्य गीतस्तुति-**
**व्याजाद्भट चुम्बितस्मितमनोहारी हरिः पातु वः।।१२-क।।**

**इति श्रीगीतगोविन्दे सामोददामोदरो नाम प्रथमः सर्गः।।**

कविः यथोपकृत्यं त्यक्तालोक नाशिष्यति रासोल्लासेत्यादि। हरिः कृष्णो वो युष्मान्पातु अवतु। कथम्भूतो हरिः ? रासोल्लासभरेण गोपक्रीडायां हर्षितशयेन विभ्रमभृता लालित्यवतीनां शृङ्गारभावधारिणीनां वा आभीरवामभ्रुवां गोपाङ्गनानामभ्यर्णे समीपे निर्भरं गाढं यथा स्यादेवमुरो वक्षस्थलं परिरभ्य आलिङ्ग्य राधाया अधरश्चुम्बितः। कीदृश्या राधाया ? अनुरागातिशयेन नेत्रहीनयेव कथं चुम्बितः

---

१. ग. विषय - इति पाठः; छ० विषं - इति नास्ति।
२. ग० दुःसहं - इति पाठः।
३. ग० कुहूः कुहूरिति गिरः - इति नास्ति।
४. ग०, च० कला - इति नास्ति।
४. ग०, च०, स्निग्धा - इत्यधिकः पाठः।
६. च० तान्यवलोक्य - इति पाठः।
❋ अयं श्लोकः, अस्य व्याख्या च नास्ति - क०, ख०, घ०, च०, छ०।
(अ) अ० को० १.३.१८
(आ) वि० प्र० लान्तवर्गः ११६

इत्यत आह, गीतेति, गीतस्तुतिव्याजात् गानप्रशंसाछलेन। किं कृत्वा ? तद्वदन्तम्मुखं सुधारसमयं अमृतमयं साधु तोषणमिति व्याहृत्य उक्ता। पुनः कीदृशो हरि ? स्मितमनोहारी तस्यः चुम्बनछलकौशलमाकलय्य स्मितेन मनो हर्तुं शीलं यस्य सस्तथा।

गोप आभीर **इत्यमर:**[(अ)]। वामे मनोहरे भ्रुवौ यासां तां तथा। अभ्यर्णं निकटे चे**त्यमर:**[(आ)]।।१२-क।।

एषा श्रीकान्तमिश्राणां पदभावार्थचन्द्रिका[१]।

कविवक्तृकुमुद्बोधं कुर्वन्ती भुवि राजताम्।

इति श्रीगीतगोविन्दटीकायां श्रीकान्तमिश्रविरचितायां पदभावार्थ[२] चन्द्रिकानामधेयायां प्रथमः सर्गः समाप्तः।

१. क०, ख०, छ० दीपिका - इति पाठः।

२. च- चन्द्रिका - इति नास्ति।

(अ) अ० को० २.९.५७

(आ) अ० को० ३.१.६७

## ।। द्वितीय सर्गः ।।

।अक्लेशकेशवः।

**विहरति वने राधा साधारणप्रणये हरौ**
**विगलितनिजोत्कर्षादीर्ष्यावशेन गतान्यतः।**
**क्वचिदपि लताकुञ्जे गुञ्जन्मधुव्रतमण्डली-**
**मुखरशिखरे लीना दीनाप्युवाच रहः सखीम्।।१३।।**

एतद्वचनैः[१] सख्या प्रतिबोधितायाः समक्षमन्याभिः सह निर्भरं क्रीडन्तं हरिं[२] दृष्ट्वाऽसहमानायाः, अत एव क्वचित्कुञ्जान्तरगताया राधाया अवस्था अवस्थान्तरं ? वर्णयितुमाह, विहरतीत्यादि। राधा सखीं इति वक्ष्यमाणमुवाचोक्तवती। कथम्भूता ? ईर्ष्यावशेनान्यतोऽन्यत्र[३] गता। ईर्ष्यायां हेतुमाह[४], विगलितेति। विगलितो[५] निजः स्वीयोत्कर्षोऽहमेव हरेः प्रियतमेत्येवंरूपस्तस्मात्। क्व सति ? हरौ[६] वने[७] विहरति सति। किम्भूते हरौ ? साधारणो राधायामन्यगोपाङ्गनायां च[८] समानः प्रणयः प्रेमो यस्य तस्मिन्[९]।अत एव दीना दुःखिता। सा किम्भूता क्वचिदपि-र्वल्लीभिरतिनिबिडैः[१०] कुञ्जे लीना निभृतं निलीय[११] स्थिता। कथम्भूते ? कुञ्जे गुञ्जन्तः शब्दायमाना ये मधुव्रता भ्रमरास्तेषां या मण्डली पङ्क्तिस्तया मुखरं वाचालं शिखरमग्रभागो यस्य तस्मित[१२]। अत्र कुञ्जपदेनैव लताच्छादितगृहप्राप्तौ लतापदमतिनिबिडत्वसूचनाय।

१. छ. तत्र - इति पाठः।
२. छ. हरिं दृष्टवा - इति नास्ति।
३. च.० ऽन्यत्र - इति नास्ति।
४. च. ० माह - इति नास्ति।
५. क., घ., छ. गलितो - इयधिकः पाठः।
६. क., घ. कृष्णे - इत्यधिकः पाठः।
७. च. वने - इति नास्ति।
८. च., छ., च - इति नास्ति।
९. क. प्रेमा यस्मिन् इति पाठः।
१०. च. ० छ. र्वल्लीभि - इति नास्ति।
११. च., छ. निलीय - इति नास्ति।
१२. च. यस्मिंस्तस्मिन् - इति पाठः।

प्रणयः प्रेम्णि विश्रम्भे इति **विश्वः** (अ)।

इर्ष्यामाहुः समानेषु मानादानादमर्षणम् इति ।।१ ३ ।।

।। पञ्चमः प्रबन्धः / गीतम् ५ ।।

**।। गुर्जरीरागेण यतिताले च गीयते।।**

**सञ्चरदधरसुधामधुरध्वनिमुखरितमोहनवंशं**
**चलितदृगञ्चलचञ्चलमौलिकपोलविलोलवतंसम्।**
**रासे हरिमिद विहितविलासं**
**स्मरति मनो मन कृतपरिहासम्।। ध्रुवम् ।।१ ।।**

राधा किमुवाचेत्याह, सञ्चरदित्यादि। गीतस्यास्य गुर्जरीरागः। तालस्तु[१] प्रतिमंठः। अत्रापि सैव नायिका। गीतार्थस्तु, मम मनो हरिं स्मरति। रासे[२] गोपक्रीडा[३] विशेषे विहितः कृतो विलासो येन तम्। पुनः कथम्भूतं ? कृतः परिहासो येन तम् । एतच्च ध्रुवपदम्[४]। कथम्भूतं हरिं ? सञ्चरतां तानप्रतानक्रमेण स्फूरतां (अधरेण) ओष्ठेन (सुधावत् अमृतवत् मधुरः मनोहरः ध्वनिः शब्दः तेन मुखरितः) सुधामधुरध्वनिमुखरितो वादितो मोहनवंशः परममोहकारी[५] वेणुर्येन तम्। तद्वंश-रवेन मोहितं मे मनः कृतापराधमपि तं स्मरतीति भावः। पुनः कथम्भूतं ? चलितः कदाचिन्मूचर्छाविशेषेण प्रकटीकृतेन तत्समानाय घूर्णितो दृगञ्चलोऽपाङ्गो यत् एतादृशश्चञ्चलः स्वयमेव वेणुद्वारा प्रकटीकृतस्य[६] स्वरविशेषस्यान्यैश्चाज्ञानात्स्वयमेव परितो दोषाद्दोलायमानो मौलिर्मस्तकं यस्य अत एव कपोले[७] विलोलश्चञ्चलोऽवतंसः कर्णाभरणं च यस्य तम्। पीयूषममृतं सुधा इत्यमरः(आ)। चूडाकिरीटं केशाश्च संवता मौलयस्त्रयः इति च(इ)। चूडाकिरीटं केशाश्च संवता मौलयस्त्र इति च(इ)। पुंस्युत्तंसावतंसौ द्वौ कर्णपूरे च शेखरे इति च(ई)।।१ ।।

१. च. तालश्च - इति पाठः।
२. च. किं विशिष्ट - इत्यधिकः पाठः।
३. छ.गोप - इति पाठः।
४. छ. ध्रुपदम् - इति पाठः।
५. क., छ. परमोहनकारी - इति पाठः।
६. छ. प्रकटीभूतस्य - इति पाठः।
७. छ. लोल - इति पाठः।
(अ) वि.प्र. यान्तवर्गः - ३५
(आ) अ. को. १.१.४८
(इ) अ. का. ३.३.१९३
(ई) अ. को. ३.३.२२७

**चन्द्रकचारुमयूरशिखण्डकमण्डलवलयितकेशम् ।**

**प्रचुरपुरन्दरधनुरनुरञ्जितमेदुरमुदिरसुवेशम् ।। रासे० ।।२ ।।**

स:[१] विस्मरणीयो न भवतीत्याह-चन्द्रकेत्यादि[२]। चन्द्रकेण विचित्रवर्णचिह्नेन चारूणं मनोहराणां मयूरशिखण्डकानां मयूरपिच्छानां मण्डलेन समूहेन वलयिता वेष्टिता: केशा येन तम्। तथा चात्र मयूरादिदर्शनेऽपि तस्यैव स्मरणं भवतीति ध्वनितम्। पुन: कथम्भूतं ? प्रचुरैर्बहुलै: प्रचुरैर्बहुलै: पुरन्दरधनुर्भिरनुरञ्चित: संवलितो यो मेदुर: सान्द्रस्निग्धो मुदिरो मेघस्तद्वच्छोभनो वेश आकृतिर्यस्य तत्। अत्र नामामणिखचित-हारमुकुटकेयूरादिना शक्रधनु:साम्यम्। श्रीकृष्णस्य[३] मेघसाम्यं बोध्यम्[४]। प्रचुरपुरन्दर-धनुर्भिरनुरञ्जितस्य मेघस्यासिद्धिरत्र इयमभूतोपमा बोध्या। ''समौ चन्द्रकमेचकौ'' **इत्यमर:**[(अ)]। बर्हिकण्ठसमे वर्णे मेचकं ब्रुवते बुधा: इति **कात्य:**[(आ)]। शिखण्डस्तु पिच्छबर्हे नपुंसके **इत्यमर:**[(इ)]। वेष्टितं स्याद्वलयितम् इति च[(ई)]। मुदिर: कामुकेऽम्बुदे इति **विश्व:**[(ऊ)] ।।२ ।।

**गोपकदम्बनितम्बवतीमुखचुम्बनलम्भितलोभम्।**

**बन्धुजीवमधुराधरपल्लवमुल्लसितस्मितशोभम्।।रासे० ।।३ ।।**

नन्वयं त्वय्यनुरागरहितोऽन्याभि: गोपीभि: सह क्रीडतीति त्वं त्वद्गुणोत्कीर्त्तनं किमिति करोषीत्यत आह, गोपेत्यादि। गोपकदम्बस्या-भीरसमूह या नितम्बवत्य:

---

१. ख., छ. स: - इति नास्ति।
२. क., ख. भवतीत्यादि इत्याह - चनद्रकेति - इति।
३. च., श्री - इति नास्ति।
४. क., च., छ. बोध्यम् - इति नास्ति।
(अ) अ. को. २.५.३१
(आ) अस्य लेखकस्य कापि कोशसम्बन्धिनी कृति: सम्प्रति नोपलभ्यते।
(इ) अ. को. २.५.३१.
(ई) अ. को. ३.१.९०
(उ) वि.प्र. रान्तवर्ग: - १२१
(ऊ) वि.प्र. शान्तवर्ग: - ९

प्रशस्तनितम्बशालिन्यः स्त्रियस्तासां मुखचुम्बने लम्भितः प्रापितो लोभो यस्य तम्। यद्वा गोपकदम्बनितम्बवतीभिर्मुखचुम्बने लम्भितः प्रापितः लोभो येन तम्[१]। तथा च तस्य तासु सहजस्नेहो नास्ति किन्तु[२] बलात्कारेण ताभिः चुम्बने लोभः कारितः। सहजस्तु प्रणयो मय्येव तस्येति भावः। पुन कथम्भूते? बन्धुजीवपुष्पवन्मोहरो[३] मधुरोऽधरपल्लवः वल्लवाकृतिरधरो यस्य तम्, उल्लसितेनन (हर्षितेन) स्मितेन ईषद्धासेन शोभा यस्य तम् तथा बन्धूकुन्दादिदर्शनेनापि तदीयाधरपल्लवस्मारकेण स एव स्मर्यते। रक्तकस्तु बन्धुको बन्धुजीवकः इत्यमरः[(अ)]। सुरसो मधुरः प्रोक्तो मधुलेशो मनोहरे **इत्यनेकार्थः**।।३।।

**विपुलपुलकभुजपल्लववलयितबल्लवयुवतिसहस्त्रम्।**
**करचरणोरसि मणिमयभूषणकिरणविभिन्नतमिस्त्रम्।। रासे० ।४।**

पुनः कथम्भूतं? विपुलेत्यादिः। विपुलः[४] पुलको रोमाञ्चो[५] यत्र ताभ्यां भुजपल्लवाभ्यां पल्लववत्कोमलाभ्यां बाहुभ्यां[६] वलयितं वेष्टितं वल्लवयुवतीनामाभीरकान्तानां सहस्त्रं येन तम्। अत्र वलयितमित्यनेनावज्ञया तासां वेष्टनमात्रं न तु गाढलिङ्गनम्। रहस्यं चुम्बनालिङ्गनादिकं[७] मयैव सहेति तस्य स्मरणमुचितमेवेति ध्वनितम्। पुनः कथम्भूतं? करयोश्चरणयोरुरसि च यानि मणिमयानि भूषणान्यलङ्करणानि तेषां किरणैर्विभिन्नं नाशितं तमिस्त्रं येन तम्। एतेन प्रथमाभिसारे स्वकीयालङ्कारकिरणैरुद्योते सति लज्जायां परावर्तमानं मां हठादानीय तां तां चेष्टां कृतवान्। येन तं क्षणमपि मम मनो न विस्मरतीति ध्वनितम्। अन्धकारोऽस्त्रियां ध्वान्तं तमिस्त्रं तिमिरं तमः इत्यमरः[(आ)]।।४।।

---

१. क., ख. प्रापित लोभो येन तम् -इति नास्ति।
२. च. किन्तु-इति नास्ति।
३. कः पुष्प - इति नास्ति।
४. च. बहुलः - इत्यधिकः पाठः।
५. च रोमाञ्च - इति नास्ति।
६. च. वाहुभ्यां - इति नास्ति ।
७. च. आलिङ्गना०-इति नास्ति।
(अ) अ.को. २.४.७३
(आ) अ.को.१.८.३

**जलदपटलचलदिन्दुविनिन्दकचन्दनतिलकललाटम्।**
**पीनपयोधरपरिसरमर्दननिर्दयहृदयकपाटम्।। रासे० ।।५।।**

जलदपटलेति[१]। जलदपटले[२] मेघसमूहे चलन्सञ्चरन्[३] य इन्द्रचन्द्र: तस्य विनिन्दकस्तच्छोभातिशायी चन्दनबिन्दुर्मण्डलाकृतितिलकं यत्र तादृशं ललाटं यस्य तम्। पीनौ मांसलौ पयोधरौ स्तनौ[४] तयो: परिसरस्य पर्यन्तभागस्य मर्दने निर्दयहृदयकपाटं कपाटवद्विस्तीर्णहृदयं यस्य तम्।।५ ।।

**मणिमयमकरमनोहरकुण्डलमण्डितगण्डमुदारम्।**
**पीतवसनमनुगतमुनिमनुजसुरासुरवरपरिवारम्।।रासे० ।।६ ।।**

पुन: कथम्भूतं ? मणिमयेति[५]। मणिमये मकराकारे मनोहरे कुण्डले[६] ताभ्यां मण्डितौ गण्डौ यस्य तम् उदारमौदार्यगुणयुक्तम्। अत्र मया रहसि यद् याचितं तत्सर्वं तत्क्षणमेव पूरितमिति स: कथं विस्मार्य्यत इति ध्वनि:[७]। पीतं वसनं वस्त्रं यस्य तम्। उदारत्वे हेतुमाह, अनुगता आश्रिता ये मुनयो नारदादय: मनुजा भीष्मादय:, सुरा इन्द्रादय:[८], असुरा: प्रह्लादादय त एव वरा:[९] परिवारा: परिजना यस्य तम्। तथा च तैरप्यधिगत: स्वत्वाभिमतपत्नै: सततं सेव्यत इति तस्यौदार्यं ख्यातमेवेति भाव:। परिवार: परिजने खड्गकोषे परिच्छेदे इति **विश्व:**[(अ)]। दानमभ्युपत्तिश्च तथा च प्रियभाषणम्। स्वजने वा परे वापि तदौदार्यमिति स्मृतम्[(आ)]। इति नायकौदार्युगुण-लक्षणम्।।६ ।।

---

१. छ. जलदपटलेति - इति नास्ति।
२. च., छ. सजल - इत्यधिक: पाठ:।
३. च., छ. चलन - इति पाठ:।
४. क., ख. स्तनौ - इति नास्ति।
५. च., छ. मणिमयेति - इति नास्ति।
६. छ.कुण्डले - इति नास्ति।
७. च. ध्वनितम् - इति पाठ:।
८. च. सुरा इन्द्रादय: - इति नास्ति।
९. क., ख., च. तव वरा:-इति पाठ:।
(अ) वि.प्र. रान्तवर्ग: - २५८
(आ) ना. शा. - २२-४०

**विशदकदम्बतले मिलितं कलिकलुषभयं शमयन्तम्।**

**मामपि किमपि तरङ्गवदनङ्गदृशा मनसा रमयन्तम् ।।रासे० ।७।**

पुनः कथम्भूतं ? विशतस्य निर्मलस्य कदम्बस्य तले[१] मिलितं संलग्नं[२] मत्सङ्केतीकृतकदम्बतले मदपेक्षयाग्रत एव गत्वा केचन न मां पश्यन्त्विति मत्प्रतारणाय वा निलीय स्थितं कृष्णं मे मनः स्मरतीत्यर्थः पुनः कथम्भूतं[३] कलिः प्रणयकलहस्तस्माद्यत्कलुषं[४] चित्तकल्मषं "अहं सङ्केते समागता नायमागतः प्रायशोऽन्यवल्लभासक्तो भवेदतः यदाऽऽयास्यति तदा मया न सम्भाषणीयः" इत्येवं रूपम्, एकाकिनी कथमत्र तिष्ठामीति च भयम्। एतद्भयं कदम्बमूलादुपेत्य मधुरोक्तिभिः कलियुगं[५] शमयन्तमित्यर्थः। कलेः कलियुगस्य यत्कलुषं पापं तस्य भयं शमयन्तमिति वा। किमप्यनिर्वचनीयं यथा स्यादेवं तरङ्गवत् तरङ्ग इवाभवत्। वारम्बारं मुहुरुद्गच्छन्ननङ्गः कामो यत्र एतादृशया दृष्ट्या[६] मनस च मामपि रमयन्तमित्यर्थः। यद्वा मत्सन्निधौ विश्वस्मिंस्तरङ्गवदनङ्गदृक् तादृशेन मनसा मामपि रमयन्तमिति मामपीतिशब्देन सोल्लुण्ठनोक्तिः[७]। अहमपि लोकोत्तरप्रणयस्य हरेः प्रियतमा संभवत्येवंविधो वेति ध्वनितार्थः[८]। कलिः स्यात्कलहे शूरे कलिरन्त्ययुगे युधि **इतिविश्वः**[(अ)]। कलुषञ्चाविलैनसोरिति च[(आ)] ।।७।।

---

१. च.मुले - इत्यधिकः पाठः।
२. छ. लग्नं - इति पाठः।
३. ख. कीदृशं - इति पाठः।
४. छ. स्तस्मात्कलुषं - इति पाठः।
५. छ. कलियुगं - इति नास्ति।
६. च. दृष्ट्या - इति नास्ति।
७. च. योलुण्ठोक्तिः - इति पाठः।
८. च. ध्वन्यर्थः - इति पाठः।
(अ) वि.प्र. लान्तवर्गः - ४८
(आ) वि.प्र. षान्तवर्गः - १४८

**श्रीजयदेव भणितमतिसुन्दरमोहनमधुरिपुरूपम्।**
**हरिचरणस्मरणं प्रति सम्प्रति पुण्यवतामनुरूपम्।।रासे० ।।८।।**

श्रीजयदेवेत्यादि।[१] श्रीजयदेवभणितं पुण्यवतां हरिभक्तियुक्तानां हरिचरणस्मरणं प्रति सम्प्रति[२] कलौ अनुरूपं योग्यम्। किं विशिष्टम्? अतिसुन्दरं मोहनं गोपवधूमोहनकारि[३] मधुरिपो: कृष्णस्य स्वरूपं वर्णनीयत्वेन वर्णनीयत्वेन यत्रास्ति तादृशम्। कलौ रागिण एव बहवस्तथा च शृङ्गारादिरसानां स्वादार्थमपि[४] जयदेववाणीश्रवणे प्रवृत्तौ तद्वशेनापि हरिस्मरणं भवतीति भाव:।।८।।

**गणयति गुणग्रामं भामं भ्रमादपि नेहते**
**वहति च परितोषं दोषं विमुञ्चति दूरत:।**
**युवतिषु चलत्तृष्णे कृष्णे विहारिणि मां विना**
**पुनरपि मनो वामं कामं करोति करोमि किम्।।१४।।**

हे सखि! कृष्णस्त्वां विहायान्यगोपीभि: सह क्रीडति, त्वं किमिति स्मरसि इति प्रश्ने राधाह, गणयतीत्यादि। मम मन: कृष्णे पुनरपि[५] काममभिलाषं करोति, तत्किं करोमि किं विशिष्टेषु युवतिषु बह्वीषु गोपवधूषु चलन्ती वर्द्धमाना तृष्णा यस्य तस्मिन्। अत एव मां विना विहारिणि वारं वारं विहरणशीले मन: कथम्भूतं, अत एव वामं प्रतिकूलं वामे हेत्वन्तरमाह, गणयतीति। तस्य गुणानां[६] वत्सलशौर्य्योदार्य्यादीनां ग्रामं समूहं गणयति परिसंख्याति। भामं क्रोधं भ्रमादपि नेहते नेच्छति। दोषं मद्विधकामिन्यवधारणादिकं दूरतो विमुञ्चति वात्सल्यौदार्य्यादीन्यवलोक्य परितोषं सन्तोषं[७] वहति। अत्र विभावनाविशेषोक्ती अलङ्कारौ निजानुसरणरूपानुरागाहेतुं विनाप्यनुरागप्रकाशनात् अन्याङ्गनासक्तिरूप-वैराग्यहेतुसत्वेऽपि[८] वैराग्यकथनाच्च। उक्तञ्च,

क्रियाया: प्रतिषेधेऽपि फलव्यक्तिर्विभावना।
विशेषोक्तिरखण्डेषु कारणेष्वफला वच:[(अ)]।।इति ।।

१. च.कवेरिदं - इत्यधिक: पाठ:।
२. च. सम्प्रति - इति नास्ति।
३. च. मोहकारि - इति पाठ:।
४. च., छ. स्वादनार्थमपि - इति पाठ:।
५. च. पुनरपि - इति नास्ति।
६. ख., च. भक्त - इत्यधिक: पाठ:।
७. च. सन्तोषं - इति नास्ति।
८. च. वैराग्यहेतुसत्वेऽपि - इति नास्ति।
(अ) का. प्र. - १०-१६२

व्याख्यानमस्य[१] हेतुरूपं क्रियाप्रतिषेधेऽपि फलप्रकाशनं विभावना। मिलितेष्वपि कारणेषु कार्यस्याकथनं विशेषोक्तिरिति। ग्रामः स्वरे संवसथे वृन्दे शब्दादिपूर्वकः इति **विश्वः**[(अ)]। भामः क्रोधे रवौ दीप्तौ इत्यपि च। वामं सव्ये प्रतीपे चेति[(आ)]। कामः स्मरेऽभिलाषे चेति च[(इ)]।।१४।।

।। षष्ठः प्रबन्धः / गीतम् ६ ।।

।। मालवगौडरागेण एकतालीतालेन च गीयते ।।

**निभृतनिकुञ्जगृहं गतया निशि रहसि निलीय वसन्तम्**
**चकितविलोकितसकलदिशा रतिरभसभरेण हसन्तम्**
**सखि हे केशिमथनमुदारं**
**रमय मया सह मदनमनोरथभावितया सविकारम् ।। ध्रुवम् ।।१ ।।**

अथोत्कण्ठिता राधा[२] स्वमनोरथानाह। गीतस्यास्य मालवरागः, एकतालितालः। चन्द्रिका विपुला रामा एकतालि त्रिधा मता। तन्मध्ये विपुलेयं, गुणत्रयेण विपुला शृङ्गारे गीयते रसे। निभृतेत्यादि। हे[३] सखि! मया सह केशिमथनं कृष्णं[४] रमय। कथम्भूतया[५], मदनस्य यो मनोरथ इच्छा तद्युक्तो यो भावो रत्याख्यः स जातो यस्यास्तादृश्या। मदनमनोरथेन भावितया प्राप्येयेति वा, न तु मया प्रार्थने कदाचिन्नायात इत्यत आह-उदारं त्वत्प्रार्थितभवस्य दास्यत्वेवेति भावः। कृष्णं[६] सविकारं विकारो मानसो भावस्तत्सहितम्। एतदन्योन्यानुरागपूर्वकत्वेन शृङ्गाररसपुष्ट्यर्थम्, अन्यथा रसभावः[७] स्यात्। यद्वा विकारः स्तनप्राप्तादिप्रकटनं तत्सहितं यथा स्यादेवं मदनमनोरथ- भावितयेत्यन्वयः। तदुक्तं **रसिकसर्वस्वे**-नाभी-मूलकुचोदरप्रकटन-व्याजेन यद्घोषितां साकाङ्क्षं मुहुरीक्षणं स्खलितं नीविनिबन्धनस्य च। केशभ्रंशनसंयमौ च कमितुर्मित्रादि- सन्दर्शनैः।

१. छ.व्याख्यानमपि - इति पाठः।
२. च. राधिका - इति पाठः।
३. च. गीतार्थस्तु - इत्यधिकः पाठः।
४. छ. कृष्णं - इति नास्ति।
५. क.ख.च. कथम्भूत मया- इति पाठः।
६. च. कथम्भूतं - इत्यधिकः पाठः।
७. च. रसाभावः - इति पाठः।
(अ) वि.प्र. मान्तवर्गः - १४
(आ) वि.प्र. भान्तवर्गः - २२
(इ) वि. प्र. मान्तवर्गः - ९

सौभाग्यादिगुणप्रशस्तिकथनैस्तत्सानुरागेङ्गितम्(अ)।। इति ।।

अत्र केशिमथनपदोपादानं सामर्थ्यख्यापनाय। तत्प्रयोजनं च नि:शङ्ककेलि-प्रतिपादने[१]भवितेत्यत्र प्रथमे व्याख्याने तारकादित्वादितच् । द्वितीये पक्षे[२] भावितं वासिते प्राप्ते इति विश्व:(आ)। कथम्भूतया निभृतमेकान्तं यन्निकुञ्जरूपं गृहं तत्र गतया। कृष्णं निशि रात्रौ रहसि एकान्ते निलीय तिरोभूय वसन्तम्। एवम्भूतं मां राधां पश्यत्विति कुतुकेन मत्प्रतारणाय सङ्कुचितमात्मानं कृत्वावस्थितमिति भाव:। मया चकितं यथा स्यादेवं विलोकिता: सकला दिशो यया तया। कुत्र कृष्णो निलीय तिष्ठतीति भाव:। कृष्णं किम्भूतं रतौ यो रभस उत्साहस्तद्युक्तो यो रस: श्रृङ्गाराख्यस्तेन हसन्तम्। क्रीडायां कालक्षेपासहिष्णुम्। तथात्मप्रकटनार्थं पुन:स्थितमपि मामियं न पश्यतीतिकृत्वा हसन्तमिति भाव:।

निभृतं रह एकान्तम् इति धरणि:(इ)।

'रभसो वेगहर्षयो:' इति विश्व:।।१ ।।

**प्रथमसमागमलज्जितया पटुचाटुशतैरनुकूलम्।**

**मृदुमधुरस्मितभाषितया शिथिलीकृतजघनदुकूलम्।। सखि ।२।**

प्रथमसमागमलज्जितया मया अकस्मात् कथमेतस्याग्रे प्रकटयाम्यात्मानमिति लज्जाकारणम्। कथम्भूतं कृष्णं ? पटुनायिकाप्रसादनक्षमं यच्चाटुशतं प्रियवचनशतं तेनानुकूलम्। पुन: कथम्भूतया मया ? मृदु कोमलं मधुरं माधुर्यगुणयुक्तं स्मितयुक्तं भाषितं यस्यास्तया तदीयप्रियोक्तिभिरपहृतलज्जया। किञ्चित् स्मितं भाषितं ययेत्यर्थ:। कृष्णं शिथिलीकृतं स्मितादिरागानुकूलां मां ज्ञात्वा श्लथीकृतं जघनस्थितं दुकूलं पट्टवस्त्रं येन तम्। अशेषनायकशिरोमणिश्रीकृष्णदर्शनेन दृढवन्धापि नीवी स्वयमेव स्खलिष्यति। ततो मेखलावलम्बितं जघनस्थितमेव वासस्तेनापहरणीयमिति।

---

१. छ.प्रतिपादनम् - इति पाठ:।

२. छ. द्वितीयपक्षे - इति पाठ:।

(अ) रसिकसर्वस्व -१

(आ) वि.प्र. तान्तवर्ग - ९३

(इ) कोशोऽयं साम्प्रतं नोपलभ्यते।

ओष्ठाग्रं स्फुरतीक्षणे विचलतः कूपोदरे मत्स्यव-
द्धम्मिल्लः कुसुमाञ्चितो विगलति प्राप्नोति बन्धं पुनः।
प्रच्छन्नौ व्रजतः स्तनौ प्रकटतां श्रोणीतटं दृश्यते,
नीवी च स्खलति स्थितापि सुदृढं कामेङ्गितं योषिताम् इत्युक्तम्[(अ)]।।

वटु चाटु प्रियोक्तिः स्यात्। जघनं कटेरधोभागे इति **हारावली**:।।२।।

**किसलयशयननिवेशितया चिरमुरसि ममैव शयानम्।**
**कृतपरिरम्भणचुम्बनया परिरभ्य कृताधरपानम्।।सखि०।।३।।**

किसलयेत्यादि। पुनः कीदृश्या मया? किसलयशयने नवपल्लवशय्यायां निवेशितया तं कृष्णं चिरं[१] बहुकालं व्याप्य ममैवोरसि सुप्तम् वक्षसियुक्तम्[२]। एतेन आलिङ्गनेन विशेषः क्षीरनीराख्यः। उक्तञ्च, गात्रोपरिष्टादय स्तस्य मध्ये संलीयते यन्मिथुनं शरीरम्। कामाभिमानाक्षतपूर्णचेष्टं तत्क्षीरनीराख्यमिदं प्रदिष्टम् इति (कीदृश्या मया? कृते परिरम्भण[३] चुम्बने[४] यया तया। मया एतच्च जघनोपश्लेषरूपा-लिङ्गनाभिप्रायेण।

जघनकलितकान्तश्रोणिरङ्गोपरिष्टाद्
व्रजति यदिह नारी स्त्रस्तकेशोत्तरीया।
करजरदनकृत्यं चुम्बनं वा विधित्सुः
विलयति जघनोपश्लेषमेनं **मुनीन्द्रः**।।
चुम्बनमपि समौष्ठारूपम्।
ओष्ठेन कान्तस्य मुखोष्ठयुग्मं
निपीड्य जिह्वाञ्चिततालुभागम्।
चुम्बोत्सवं नृत्यति यत्र नारी
प्रोक्तं समौष्ठं कविभिः पुराणैः[(आ)]।। इति ।।

कथम्भूतं तं? परिरभ्यालिङ्ग्य कृतं मदीयाधरपानं येन तम्। अनेन लालाटिकं आलिङ्गनमुक्तम्।

१. च. चिरं - इति नास्ति।
२. क., च., छ. वक्षसि युक्तम् - इति नास्ति।
३. च. परिरम्भणे - इति पाठः।
४. च. आलिङ्गनचुम्बने - इत्यधिकः पाठः।
(अ) र. र. सामान्यधर्माधिकारः, श्लो - २, पृ.-४४
(आ) नोपलभ्यते।

अन्योन्यसंसक्तमुखं कपोलं
नेत्रं ललाटं हृदयं च बाहुम्।
सानन्दभावं श्रममीलिताक्षं
लालटिकं तत्त्वविदो वदन्ति(अ)।।इति ।।
पल्लवोऽस्त्री किसलयं इत्यमर:(आ)।।३।।

**अलसनिमीलितलोचनया पुलकावलिललितकपोलम्।**
**श्रमजलसकलकलेवरया वरमदनमदादतिलोलम्।। सखि० ।४।**

पुन: कथम्भूतं या मया अलसे आलस्ययुक्तेऽत एव निमीलिते[१] मुद्रिते लोचने यथा तथा। अत्र नीमित्तोपादानादवधृष्टाख्यं चुम्बनमुक्तम्। तदुक्तम्,

हस्तेन नेत्रे च निमील्य भर्तृ:
समीलिताक्षी वदने स्वजिह्वाम्।
निक्षिप्य च क्रीडति यत्र लोला
ख्यातं रसज्ञैरवधृष्टसंज्ञम्(इ)।।इति।।

तं कृष्णं पुलकावल्या रोमाञ्चपङ्क्त्या ललितौ मनोहरौ कपोलौ यस्य तम्। मया मदनचिन्तया जनितो[२] य: श्रम: स्वेदस्तज्जनितं[३] तज्जलं प्रस्वेदस्तेन सकलं पूर्णकलेवरमङ्गं यस्यास्तया। क्वचित् श्रमजलसिक्तकलेवरयेति सुगम: पाठ:। कथम्भूतं तम्? वर उत्कृष्टो यो मदा हर्षस्तेनातिशयेन लोलं चञ्चलम्। काये च कलेवरम्, इति विश्व:(ई)।।४।

---

१.छ. निमीलिते - इति नास्ति।
२. छ. मदनचिन्ताजनितो - इति पाठ:।
३. च. यज्जलं - इत्यधिक: पाठ:।
(अ) उद्धरणमिदं नोपलभ्यते।
(आ) अ.को. २.४.१४
(इ) श्लोकोयं मया नोपलब्ध:।
(ई) प्रकाशिते संस्करणे इदं नोपलभ्यते।

**कोकिलकलरवकूजितया जितमनसिजतन्त्रविचारम्।**

**श्लथकुसुमाकुलकुन्तलया नखलिखितघनस्तनभारम्। सखि० ।।५।।**

मया कोकिलस्य कलोऽव्यक्तमधुरो यो रवः शब्दः तत्[१] कूजितं शब्दितं[२] यस्यास्तया। अनेन कूजिताख्यं बाह्यरतमुक्तम्।

पिकशिखिकलहंसप्रायपक्षिव्रजानां
स्वरितमनुकरोतीत्यङ्गना मन्मथार्त्ता।
मुखदशनपिबन्ती तत्कवीन्द्रा वदन्ति
स्तनितमिति समा सा चित्रसम्भोगकाले।। इति ।।
ननु गौतमादिशास्त्रेऽन्य एव क्रम उक्तस्तदुक्तम्,
आश्लेषं प्रथमं कुर्याद्द्वितीयं चुम्बनं तथा।
तृतीयं नखदानं च दंष्ट्राघातं चतुर्थकम्।।
पञ्चमं क्षेपणं प्रोक्तं षष्ठं प्रहरणं तथा
सप्तमं कण्ठशब्दश्च बन्धाख्यं चाष्टमं रतम्।। इति ।।

तथा चात्र कण्ठशब्दस्य सप्तमरतस्याग्रे वक्ष्यमाणनखदानादि-रतात्प्राक्करणे श्रीकृष्णस्य रसिकताभङ्गः स्यादित्यत आह, जितेति। जितोऽवज्ञातो मनसिजतन्त्रस्य **कामशास्त्रस्य**[३] विचारो येन तम्। चतुःषष्ठिकलाकुशलस्यापि परमरसिकनायक-जगदीश्वरस्य स्वानुकूलोत्तम-नायिकासन्निधौ रसमग्नतया क्रमस्मरणाभावान्न दोष इति भावः। रतिचक्रप्रवृत्तस्य नैव शास्त्रं न च क्रमः इत्यपि। कथम्भूतया मया ? श्लथाः केशग्रहणपूर्वकचुम्बनादिपानेन[४] शिथिलाः कुसुमैराकुला व्याप्ताश्च कुन्तलाः केशकलापा यस्याः तया। कृष्णं कथम्भूतं ? नखेन लिखितः क्षतयुक्तः कृतो स्तनभारो येन तम्। अत्र लिखितपदो[५] पादानात्पङ्कजपत्राख्यं[६] नखदानमुक्तम्,

अत्यूर्ध्वमेकं स्फुरितोर्ध्वरेखं
प्राहुः क्षतं पङ्कजपत्रसंज्ञम्।
दोर्मूलनाभिस्तनवक्षसन्धा-
वित्यूर्ध्वयोगं मनुते महेशः।। इति।।

१.ख. तद्वत् - इति पाठः।
२. क. शब्दितं - इति पाठः।
३. ख. शास्त्रस्य - इति नास्ति।
४. च. चुम्बनदानेन - इति पाठः।
५. च., छ. पदो - इति नास्ति।
६. च. पत्राख्ये - इति नास्ति।

तत्रं प्रधानशास्त्रयो: इति **विश्व:**(अ)।

चिकुर: कुन्तलो वाल: कच: केश: शिरोरुह: **इत्यमर:**(आ)।।५।।

**चरणरणितमणिनूपुरया परिपूरितसुरतवितानम्।**

**मुखरविशृङ्खलमेखलया सकचग्रहचुम्बनदानम्।।सखि०।।६।।**

एतावत्पर्यन्तं[१] चुम्बनालिङ्गनादिना सप्तविधं वाह्यरतमुक्तम्। सम्प्रति बन्धाख्यमष्टमरतमाह[२]-चरणेत्यादि। चरणयोरणितौ शब्दायमानौ मणिखचितौ नूपुरौ यस्यास्तया। एतच्च भ्रामरिकं नाम विपरीतरताभिप्रायेणोक्तम्। ''चक्रवद्-भ्रमति कुचताङ्घ्रिका भ्रामरं नृजघने समुच्छ्रिते'' इति । कृष्णं कथम्भूतं ? परिपूरितं सुरतवितानं रतिविस्तारो[३] येन तम्। अनेन नायककर्तृका बन्धा: कथिता:। भ्रामरकबन्धश्रान्तं विदित्वा किसलयशयनस्थितां मां स्वयमपि रमयिष्यतीति भाव:। मया पूर्वं मुखरा शब्दायमाना पश्चाद्विशृङ्खला त्रुटितगुणा मेखला[४] काञ्ची यस्यास्तया। अनेन प्रेङ्खोल्लिखितनामकं विपरीतसुरतमुक्तम्[५]। उक्तञ्च-''स्वजघनमेव दोलायमानं सर्वत्र भ्रामयेदिति प्रेङ्खोल्लिखितम्''। अत्र सर्वत्र शब्दो **मनोरमाकारेण** व्याख्यात:। मध्यात्पूर्वपश्चिमभागे दक्षिणोत्तरभागे चेति। ''सर्वत: कटितटभ्रमो यदि प्रेङ्खपूर्वमिदमुक्त-मूलितम्'' इति(इ)। कीदृशं कृष्णं ? सकचग्रहं केशग्रहणसहितं[६] चुम्बनदानं यस्य तम्। केशग्रहणपूर्वकचुम्बनं विपरीतरतमेवोक्तम्।

शृङ्गारे चुम्बनं कार्यं पुंसालिङ्गनपूर्वकम्।
विपरीतरते नार्या सकचग्रहचुम्बनम्।।

मेखला खड्गबन्धे स्यात्काञ्चीशैलनितम्बयो:(ई) इति विश्व:।।६।।

१. छ. पर्यन्तं- इति नास्ति।
२. च०मष्टम० - इति नास्ति।
३. च. रतिविस्तारो - इति नास्ति।
४. च. त्रुटितगुणा मेखला - इति नास्ति।
५. च रतमुक्तम् - इति पाठ:।
६. क, ख, ग, घ, च सकचग्रहणसहितं - इति पाठ:।

(अ) १९११ ख्रिष्टाब्दे चौखम्बासंस्कृतपुस्तकभाण्डागार०(बनारस)-द्वारा प्रकाशित: शिलास्कन्धस्थविरेण सम्पादित: श्रीमहेश्वरकृत: विश्वप्रकाश:, पृ-५५
(आ) अ. को. - २.६.९५.
(इ) र. र. सुरताधिकार:, श्लो०-४८, पृ.-९५
(ई) वि. प्र. लान्तवर्ग: - ११८

**रतिसुखसमयरसालसया दरमुकुलिनयनसरोजम्।**

**निःसहनिपतिततनुलतया मधुसूदनमुदितमनोजम्।। सखि० ।७।**

[१]कथम्भूतया मया? रतिसुखसमये सुरतसुखप्राप्तिकाले लोकोत्तरानुभवसुखे कृष्णे प्राप्तो यः सम्भोगः शृङ्गाराख्योरसस्तेनालसया मन्थरया। कीदृशं कृष्णम्? दर ईषन्मुकुलिते नेत्रे मुद्रिते नयनसरोजे नेत्रकमले यस्य तम्। एतेन युगपदेव[२] [३] द्वयोरानन्दावाप्तिः सूचिता[४]। तदुक्तं **रतिरहस्ये**, मूर्च्छना मिलनं चाक्ष्णोश्च्युति कालस्य लक्षणम् इति। निःसहासमर्था, अत एव किसलयशयने निपतिता तनुलता यस्यास्तया। अनेन सुरतान्तसमय उक्तः।

अङ्गे स्वेदः श्लथत्वं च केशवस्त्रादिसंवृतिः।

जाते च्युतिसुखे नार्या विरामेच्छा च जायते इत्युक्तम्।।

नन्वभिसारे विघ्नबाहुल्यात्कथमेतावान्क्रियाकलापः सम्भविष्यतीत्यत आह- मधुसूदनमिति। मधुसूदनपदेनैव तस्याभिसारविघ्ननिवारणे कियान्परिश्रम इति ध्वनिः। कथम्भूतम् उदितमनोजं? उदितः तत्कालत्रुटितमुक्ताहारकाञ्चीगुणस्वस्वस्थानात् प्रकटीभूतः मनोजः कन्दर्पः यस्य तम्। पुनः संघट्टनसञ्जातपयोधरश्रोणी नखकर-स्पर्शादिभिः सलज्जयापाङ्गविलोकनादिना च पुनराविर्भूतो मनोजः कामो यस्य तम्। उक्तं च,

अधस्तने च्युते प्रतिरुपचारैरुपस्कृताः।

सविश्रम्भकथायोगैस्ते रतिं नयते पराम् । इयमुत्कण्ठिता नाम नायिका।

नैवागतः समुचितेष्वपि वासरेषु

प्राणेश्वरः स्वगुरुकार्यवशेन यस्याः।

दुर्वारवृत्तविरहज्वरतापताङ्गी-

मुत्कण्ठितां वदति तां **भरतः** कवीन्द्र(अ)।। इति ।।७।।

---

१. च. पुनः - इत्यधिकः पाठः।

२. ख. युगपदेव - इति नास्ति।

३. छ. तयोः - इति पाठः।

४. ख. कथिाः - इति पाठः।

(अ) कस्य ग्रन्थकारस्य वचनमिदमिति न ज्ञायते।

**श्रीजयदेवभणितमिदमतिशयमधुरिपुनिधुवनशीलम्।**
**सुखमुत्कण्ठितगोपवधूकथितं वितनोतु सलीलम्।। सखि०।८।**

श्रीजयदेवेत्यादि। इदं श्रीजयदेवकविना भणितं यदुत्कण्ठिताया गोपवध्वा राधिकाया: कथितं वचनं तत्सुखं वितनोतु विस्तारयतु अर्थात्पठतां शृण्वताम्। कथम्भूतं मधुरिपो: कृष्णस्य निधुवनं सुरतक्रीडां शीलयतीत्येवं रूपम्।

आपोवन निधुवनं सुरतं च रतं समभित्यमर:[(अ)] ।।८।।

**हस्तन्यस्तविलासवंशमनृजुभ्रूवल्लिमद्बल्लवी-**
**वृन्दोत्सारिदृगन्तवीक्षितमतिस्वेदार्द्रगण्डस्थलम्।**
**मामुद्वीक्ष्य विलज्जितं स्मितसुधामुग्धाननं कानने**
**गोविन्दं व्रजसुन्दरीगणवृत्तं पश्यामि हृष्यामि च।।१५।।**

राधा स्वयं मनोरथान्तरमाह, हस्तन्यस्तविलासेत्यादि। हे सखि! अहं गोविन्दं कानने[१] पश्यामि। कदाचित् गोविन्ददर्शनं भविष्यतीत्याशङ्कायां काकु:। अत एव हृष्यामि ।तद् दर्शनजन्य आनन्दो मम कदाचिद्भविष्यतीत्यप्राप्याशंसैव। पश्यामि हृष्यामीति भविष्यसामीप्ये वर्तमानता। कथम्भूतं ब्रजसुन्दरीगणवृत्तं गोपवधूकदम्ब-परिवृतम् । ननु सपत्नीभि: परिवृतं दृष्ट्वा कथं ते हर्ष इत्याशंक्याह, मामुद्वीक्ष्येति[३]। मामुद्दीक्ष्य। दृष्ट्वा विलज्जितं अन्यवधूरूपपरिवृत्तोऽहमानया दृष्ट इति सलज्जं स्मितं तदेव स्मितं तदेव सुधा शुभ्रत्वादतिस्पृहणीयत्वाच्च तथा मुग्धं मनोहरम् आननं मुखं यस्य तम्। तथा च सुन्दरीशतवृतोऽपि जगदीश्वर: सापराधमात्मानं मन्यमानो भक्तो बिभेतीति हर्ष उचित एव इति भाव:। पुन: कथम्भूतम्? अनृजु: कुटिला भ्रूवल्लिर्भ्रूलता यासामेतादृश्यो या वल्लयो गोपवध्वस्तासां वृन्दमुत्सारयति अपसारयतीत्येवं शीलं दृगन्तवीक्षितं नेत्रान्तेनावलोकितं यस्य तम्। शय्यागतायां भिया[४] दृगन्तचेष्टयान्य-गोपीरपसारयन्तमित्यर्थ:। पुन: कथम्भूतं? हस्तादस्ते मद्दर्शनेन साध्वसवशात्स्खलितो[५] विलासवंश: पृथु क्रीडावेणुर्यस्य तम्। पुन: कीदृशम्? अतिशयेन स्वेदैरार्द्रं[६] गण्डस्थलं यस्य तम्। सर्वत्र मामुद्वीक्ष्येत्यस्य सम्बन्ध:।।१५।।

१. क., ख. कदा - इति पाठ:।
२. ख. तद् - इति नास्ति।
३. क., ख.,छ. माममुद्वीक्षेति - इति नास्ति ।
४. च. नृजा - इति पाठ:।
५. च. मद्दर्शनेनैव साध्व - इति पाठ:।
६. ख. प्रस्वेदेन - इत्यधिक: पाठ:।
च.प्रस्वेदै - इत्यधिक: पाठ:।
(अ) व्यवायो ग्राम्यधर्मे मैथुनं निधूवनं रतम् - अ.को.-२७.५७.

**दुरालोकस्तोकस्तबकनवकाशोकलतिका-**
**विकाश: कासारोपवनपवनोऽपि व्यथयति।**
**अपि भ्राम्यद्भृङ्गीरणितरमणीया न मुकुल-**
**प्रसूतिश्चूतानां सखि! शिखरिणीयं सुखयति।**
**इति श्रीगीतगोविन्देऽक्लेशकेशवोनामद्वितीय: सर्ग:।।१६।।**

हे सखि! धैर्यमवलम्बस्व, मिलिष्यत्येव त्वां हरिरित्याश्वासयन्तीं दूतीं प्रत्याह-दुरालोक[१]स्तोकइत्यादि। हे सखि! स्तोकोऽल्प: स्तवको गुच्छो यस्या सा या नबकातिनवाशोका[२] नुकम्प्याशोकशाखा तस्या विकाश उद्वोधो दुरालोको दु:खेनालोकितुं शक्य:। नवकेत्यत्र ह्रस्वे क:। लतिकेत्यत्रानुकम्पायां क:। मद्धस्तपालिताऽतएवानुकम्प्याऽशोकलतिका दुरालोकेति[३] भाव:। किमपरम्? कासार: सरस्तत्संबन्धि[४] यदुपवनं तत्सम्बन्धि य: पवन:[५] सोऽपि व्यथयति दु:खं ददाति। कासार: इत्यनेन वायो: शैत्यं कथितम्। उपवनसम्बन्धित्वेन सौगन्ध्यमात्रं ध्वनितम्। यतो वनवृक्षैरुपहतगतित्वेन मन्द एव वायुर्भवति। यद्वा, स्तोकेत्यादि वायोरेव विशेषणम्[६]। तदा स्तोकस्तबकनवकाशोकलतिकां विकासयतीत्येवंभूत: पवनो व्यथयतीति भाव:। नन्वभिमुखमागच्छन्पवनो निवार्य्यतामित्यत आह-दुरालोक: अतीन्द्रिय इत्यर्थ:। अकस्मादेवासौ न दृश्यत इति भाव:। अपि च इयं शिखरिणी गावर्द्धने पर्वते[७] वर्तमाना चूतानामाम्राणं मुकुलप्रसूतिरपि कुड्मलोद्गमोऽपि[८] न सुखयति। विकासदशायां तु को वेद किं करिष्यतीति ध्वनितम्। यद्वा कीदृशी मुकुलप्रसूति: शिखरिणी प्रशस्ता अग्रभागवतीत्यर्थ:। यद्वा शिखरिणी मल्लिका न सुखयतीत्यर्थ:। कथम्भूतं भ्राम्यन्तीनां भृङ्गीणां भ्रमराङ्गनानां रणितैर्गुञ्जितै रमणीया शिखरिणीनामकं छन्द इत्यपि ध्वनितम्। तल्लक्षणं तु,

---

१. च. दुरालोक इति - पाठ:।
२. च. लतिका - इत्यधिक: पाठ:।
३. ख. दुरालोकेति - इति नास्ति।
४. च. सरसी - इति पाठ:।
५. च. वायु: - इत्यधिक: पाठ:।
६. च. यतो वनवृक्षे इत्यारभ्य विशेषणम् इत्यन्तो नास्ति।
७. छ. पर्वते - इति नास्ति।
८. ख. अपि - इति नास्ति।

**वृत्तरत्नाकरे**-रसै रूद्रैश्छिन्ना यमनसभला गः शिखरिणीति(अ)। स्तोकोऽल्पे चातके इति **विश्वः**(आ)। कासारः सरसी सरः इत्यमरः(इ)। स्त्रीरत्ने मल्लिकायाञ्च प्रोक्ता शिखरिणी बुधैः इति **विश्वः**(ई)।

श्रीकृष्ण कमलाकान्त कैवल्याद्यखिलप्रद!
संसारतापतप्तं[1] मां कृपादृष्ट्या विलोक्य।।
समस्तजगदानन्दकर्त्री व्रजविलासिनी
भगवान् मम.............।। ? ।। राधामाधा मनोगृहे[2] ।।२।।

**इति श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां।**
**पदभावार्थचन्द्रिकानामधेयायां[3] द्वितीयः सर्गः।।**

---

१. क., ख., छ. सन्तप्तं - इति पाठः।

२. क., ख., छ. समस्तजगदानन्द इत्यारभ्य मनोगृहे इत्यन्तो नास्ति।

३. क. मिश्रश्रीकान्तविरचितायां पदभावार्थचद्रिकानामधेयायां इति नास्ति; छ. दीपिकायां-इति पाठः।

(अ) वृ. र. सूत्र - १७८

(आ) वि. प्र. कान्तवर्गः - २९

(इ) अ. को. - १.१०.२८

(ई) वि.प्र. णान्तवर्गः - १०३

❖ गीतगोविन्दस्य मुद्रितग्रन्थेषु अधोऽङ्कितमधिकमुपलभ्यते-
साकूतस्मितमाकुलाकुलगलद्धम्मिल्लमुल्लासित-
भ्रूवल्लीकमलीकदर्शितभुजामूलोर्ध्वदृष्टस्तनम् ।
गोपीनां निभृतं निरीक्ष्य दयिताकाञ्चिच्चिरं चिन्तय-
न्नन्तर्मुग्ध मनोहरं हरतु वः क्लेशं नवः केशवः ।।१६-क।।

❖❖❖

# ।। तृतीयः सर्गः ।।

। मुग्धमधुसूदनः ।

**कंसारिरपि संसारवासनाबद्धशृङ्खलाम्।**
**राधामाधाय हृदये तत्याज व्रजसुन्दरीः ।।१७।।**

राधायाः कृष्णविषयिणीमुत्कण्ठामुक्त्वा सम्प्रति[१] श्रीकृष्णस्यापि तस्यामुत्कण्ठा-माहकंसारीत्यादि[२] । कंसारिः कृष्णोऽपि व्रजसुन्दरीस्तत्याज । त्यागे हेतुः राधां हृदये आधाय आरोप्य[३] । सुन्दरीति पदेन बहुवचनेन च सौन्दयर्यवतीरपि[४] तत्याजेति कथनेन कृष्णस्य राधायामनुरागातिशयो[५] ध्वनितः । कथम्भूतां राधां ? संसारविषयिणी या वासना संस्कारस्तस्य बन्धाय श्रृङ्खलामिव । अनेनाभिलाषाख्या प्रथमावस्था कथिता ।

अभिलाषः स्पृहा तत्र कामे सर्वाङ्गसुन्दरे ।
दृष्टे श्रुते वा तत्रापि विस्मयानन्दसाध्वसाः इति[(अ)] ।
श्रृङ्खला पुंस्कटीवस्त्रबन्धेऽपि निगडेऽपि च इति **विश्वः**[(आ)] ।।१७।।

**इतस्ततस्तामनुसृत्य राधिकामनङ्गबाणव्रणखिन्नमानसः**
**कृतानुतापः स कलिन्दनन्दिनीतटान्तकुञ्जे निषसाद माधवः ।।१८।**

इतस्तत इत्यादि । स माधवः कलिन्दनन्दिन्या यमुनायास्तटान्तकुञ्जे तीरप्राप्तलता-पिहितोदरगृहे निषसाद निषण्णः । अत्र माधवपदेन मा लक्ष्मीस्तस्या अपि धवः स्वामीति । राधायाः सौभाग्याधिक्यं ध्वनितम् । किं कृत्वा ? इतस्ततस्तेषु सङ्केत[६]- स्थानेषु तां हृदयनिहितां राधिकाम् अनुसृत्य अन्विष्य । कथम्भूतः अनङ्ग ? कामः तद्बाणस्य यद् व्रणं क्षतस्तेन खिन्नं दुःखितं मानसं यस्य सः । कृतानुतापः ?

१ .च. श्री - इति नास्ति।
२ . क., छ. कंसारिरपि - इति पाठः।
३ . क., छ. निधायारोप्य - इति पाठः।
४ . क., ख., छ. बह्वीरपि - इत्यधिकः पाठः।
५ . छ. अतिशयो - इति नास्ति।
६ . क., ख. सङ्केत-इति नास्ति।
७ . च. कृतोऽनुतापः-इति पाठः।

(अ) द.रू. चतुर्थप्रकाशः - ५३
(आ) वि.प्र. लान्तवर्गः - ११९

कृत: किमिति मया तस्या अवधीरणं[१] कृतमिति पश्चात्तापो येन स:। अनङ्गबाणेत्यत्रानङ्गपदेनाङ्गरहितस्याप्यलक्षितगतागतस्य कामस्य अशेषदुष्ट[२] दमनेनापि कृष्णेन[३] निवारणं कर्तुं न शक्यत इति ध्वनि:।अनेन श्लोकेन चिन्ताख्या द्वितीयावस्था सूचिता।

स्वयं सम्पद्यत: प्राप्य किं कुपात्रस्य सिद्धये।
कथं भवेदसौ वश्य इति चिन्ता भवेद्यथा।। इति ।।१८।।

।। सप्तम: प्रबन्ध: / गीतम् ७।।

।। गुर्जरीरागयतितालाभ्यां गीयते।।

**मामियं चलिता विलोक्य वृतं वधूनिचयेन।**
**सापराधतया मयापि न वारिताऽतिभयेन।**
**हरि हरि हतादरतया गता सा कुपितेव।। ध्रुवम् ।।१।।**

कृष्णानुतापमेव गीतेन कथयति, मामियमित्यादि। गीतस्यास्य गुर्जरीराग:, प्रतिमण्ठताल:। गीतार्थस्तु-हरिहरि हा कष्टम् । सा राधा हतादरतया नष्टबहुमानतया कुपितेव गता[४]। कुपितेव गतेति ज्ञाने हेतु:[५]-मामियमिति। मां वधूनिचयेन गोपवधूसमूहेन वृतं वेष्टितं विलोक्या दृष्ट्वा चलिता प्रस्थिता। विलोक्येत्यव्यवहितपूर्व[६] काले क्त्वाप्रत्यय:। तेन गोपवधूवेष्टितं मां दृष्ट्वा अव्यवहितकाले एव[७] यतश्चलिता ततो ज्ञायते[८] कुपितेतिभाव:। ननु मा गच्छेति किमिति न निवारितेत्यत आह-सापराधतयेति। मयातिभयेनातिशयितभीत्या सा न निवारिता। भये-हेतुमाह[९]-सापराधेति[१०]। अपराधो राधां विहायान्यगोपीभि: सह क्रीडारूपस्त द्युक्ततया।।१।।

१.छ. तस्या अवधारणं - इति पाठ:।
२. क.,ख. शिखण्डस्य - इति पाठ:।
३.क., च., छ. अपि - इत्यधिक: पाठ:।
४. च. कुपितेव गता - इति नास्ति।
५. च. ज्ञापने हेतु: - इति पाठ:।
६. च. पूर्व - इति नास्ति।
७. क. अव्यवहितकालस्य - इति पाठ:।
८. ख. कुपिते - इति नास्ति।
९. च., छ.० माह - इति नास्ति।
१०. च.,छ. सापराधतया - इति पाठ:।

**किं करिष्यति किं वदिष्यति सा चिरं विरहेण।**
**किं धनेन जनेन किं मम जीवितेन गृहेण।। हरिहरि० ।।२।।**

किं करिष्यतीति[१]। सा चिरं विरहेणेति[२]। चिरकालीन[३] मद्विश्लेषेण किं करिष्यति। विरहतापशान्त्यर्थं कमुपायं करिष्यतीत्यर्थः। अथ च किं वदिष्यति[४] मम सत्कथां दोषान्वेति[५]। (यद्वा) काकुस्वरेण किं वदिष्यति मया सह कदाचिद् वार्तां कथयिष्यतीत्यर्थः। तया विना मम (धनेन किं। न किञ्चित्प्रयोजनमित्यर्थः)। ननु धनं विना कथं परिजनसंग्रहः स्यादित्यत आह, तया विना मम जनेन आश्रितपरिजनेन किं प्रयोजनमित्यर्थः। ननु परिजनं विना गोधनादिरक्षा कथं भविष्यतीत्याहतया[६] विना मम गृहेण किम्? ननु गृहं विना सांसारिकसुखभोगः कथं स्यात्[७]। सुखेनेति। तया विना मम सुखेनापि स्रक्चन्दनादिजन्येन किं प्रयोजनमित्यर्थः। इयं च स्मृत्याख्या तृतीयावस्था।

अर्थानामनुभूतानां देशकालानुवर्तिनाम्।
सातत्येन परामर्शो मानसः स्यादनुस्मृतिः।।
तत्रानुभावनिश्वासो ध्यानंकृत्य विहस्तता।
शय्यासनादिविद्वेष इत्याद्याः स्मरकल्पिताः[(अ)]।।२।।

**चिन्तयामि तदाननं कुटिलभ्रुकोपभरेण।**
**शोणपद्ममिवोपरि भ्रमताकुलं भ्रमरेण।।हरिहरि० ।।३।।**

अहं तदाननं चिन्तयामि स्मरामि[८]। कथम्भूतं? रोषभरेण कोपातिशयेन कुटिलभ्रूः कूटिला भ्रूर्यत्र तादृशं[९]। उपरि भ्रमता सञ्चरता[१०] भ्रमरेणाकुलं व्याप्तं

---

१.च., छ. किं करिष्यतीति - इति नास्ति।
२. क., ख., छ. विरहेण - इति पाठः।
३. च. विरहकालीन - इति पाठः।
४. क., छ. वदिष्यतीति - इति पाठः।
५. क., ख. दोषान्वेतो - इति पाठः।
६. ख. धनेनेति - इत्यधिकः पाठः।
७. ख. भविष्यति - इति पाठः।
८. क., छ. स्मरामि - इति नास्ति।
९. क., ख., छ० मादर्श - इति पाठः।
१०. क., ख., सञ्चरता - इति नास्ति।
मम किं गृहेण सुखेन - इति कवचित् पाठः।
(अ) र. सु. २.१८५, १८६

शोणपद्ममिव रक्तपद्ममिव। अत्र राषारुणे मुखे[१] शोणपद्मसादृश्यं[२] ज्ञेयम्। वारं वारं रोषाद्वक्रीभवन्त्योश्च भ्रुवोर्भ्रमरोपमा ज्ञेया। अनेन गुणकीर्त्तनाख्या चतुर्थावस्था। तदुक्तम्,

अङ्गप्रत्यङ्गलीलाभिर्वाक्चेष्टाहसितेक्षणैः

न तस्य सदृशः कश्चिदित्यादि गुणकीर्तनम्[(अ)]।। इति ।।

''शोणः केकनदच्छविः''- **इत्यमरः**[(आ)]।।३।।

**तामहं हृदि संगतामनिशं भृशं रमयामि।**

**किं वनेऽनुसरामि तामिह किं वृथा विलपामि।। हरिहरि० ।।४।।**

तामहमिति। अहं वने किं ताम् अनुसरामि किमिति तस्यानुसरणं करोमि। इह वृथा किं विलपामि किमिति तस्यानुसरणं करोमि। इह वृथा किं विलपामि किमिति वृथा विलापं करोमि । हृदि सङ्गतां हृदये सन्निहितामनिशं निरन्तरं भृशमतिशयेन तां रमयामि क्रीडयामि। यद्वा किं शब्दः प्रश्ने। अहं ताम् हृदि सङ्गतां अनिशं किं रमयामि किं वा वने तामनुसरामि। वृथा विलपामीत्यर्थः।।४।।

**तन्वि! खिन्नमसूयया हृदयं तवाकलयामि।**

**तन्न वेद्मि कुतो गतासि नतेन तेऽनुनयामि।। हरिहरि०।।५।।**

हे तन्वि! तव हृदयम् असूयया दोषाविष्करणेन[३] खिन्न खेदयुक्तम् आकलयामि पश्यामि। इयमुद्वेगावस्था पञ्चमी।

यस्मिन् रम्यमरम्यं च स्यात्प्रकर्षाय किञ्चन।

प्रद्वेषः प्राणितत्येऽपि स उद्वेगः स्मृतौ यथा[(इ)]।। इति ।।

तन्न वेद्मीति। त्वं कुतो गतासि तदहं न वेद्मि। नतेन प्रणत्यानुनयामि ते त्वामित्यर्थः। क्वचित्तु[४] नुतेनेति[५] पाठे तव स्तुत्या अनुनयामि त्वाम्। यद्वा नु इति

१.क., ख., छ. शोणमुखे - इति नास्ति।

२. क., ख., च. सदृशं - इति पाठः।

३. क., ख., च.० विष्करणेन - इति पाठः।

४. च., छ. क्वचित्तु - इति नास्ति।

५. क., ख., छ. तेनेति - इति पाठः।

(अ) ना.शा.४.१६९

(आ) अ.को.-१.५.१५

(इ) शृं.ति.-२-१७

वितर्के तेन[१] हेतुना। ते इति[२] सम्बन्धे षष्ठी अनेन विलपावस्था कथिता -

ति:बम्भ्रमीति मनो यस्मिन्नत्यौत्सुक्यादितस्तत:।

वाच: प्रियाश्रिता एव स प्रलाप: स्मृतो यथा[(अ)]।। इति।।५।।

**दृश्यसे पुरतो गतागतमेव मे विदधासि।**

**किं पुरेव ससंभ्रमं परिरम्भणं न ददासि।। हरिहरि० ।।६।।**

इदानीं भावनया प्रत्यक्षीकृतां प्रत्याह[३]-दृश्यसे इति। हे सुन्दरि ! पुरेव पूर्वमिव सम्भ्रमं सादरं परिरम्भणमालिङ्गनं किमिति न ददासि। त्वं पुरतोऽग्रे दृश्यसे, गतागतं यातं यातं विदधासि[४]।।६।।

**क्षम्यतामपरं कदापि तवेदृशं न करोमि।**

**देहि सुन्दरि! दर्शनं मम मन्मथेन दुनोमि।। हरिहरि०।।७।।**

हे सुन्दरि! क्षम्यतामिदमपराधं क्षमस्व। कदापि तवेदृशं विप्रियं न करोमि न करिष्यामि। इयं चोन्मादावस्था सप्तमी। अतस्मिंस्तदिति भ्रान्तिरुन्मादो विरहोद्भव: इति **रसार्णवसुधाकरे**[(आ)]। पुन: किञ्चित्सञ्जातविवेक:[५] कथयति, देहीति। हे सुन्दरि! मम दर्शनं देहि। मन्मथेन कामेन दुनोमि अहं सन्तप्तो भवामि।।७।।

**वर्णितं जयदेवकेन हरेरिदं प्रवणेन।**

**किन्दुबिल्वसमुद्रसंभवरोहिणीरमणेन।। हरिहरि० ।।८।।**

वर्णितमित्यादि। जयदेवकेन इदं हरेश्चरितं वर्णितम्। किं विशिष्टेन ? प्रणतेन, अर्थात् कृष्णमित्यर्थ:। पुन: किं विशिष्टेन ? किन्दुबिल्वो जयदेवकुलवृत्ति[६] ग्राम: स एव महत्वात्समुद्र इव तत्र सम्भवो यस्य तेन रोहिणीरमणेन चन्द्रेण। यथा समुद्रोत्पन्नेन पूर्णचन्द्रेण तस्योन्नति: क्रियते तथा तत्कुलस्योन्नतिर्जयदेवेन कृतेति चन्द्रसाम्यम्।

१. च. तव - इति पाठ:।
२. च. इति - नास्ति।
३. च. प्राह - इति पाठ:।
४. च. करोषि मममेति - इत्यधिक: पाठ।
५. क.,ख.,छ. विश्लेष: - इति पाठ:।
६. ख. वृत्ति - इति नास्ति।
(अ) शृं. ति.- २-१९
(आ) र. सु. - २-१९३

ग्लौरिन्दुरेणतिलको हरिरोहिणीशौ इति **हारावली**(अ)।।८।।

**हृदि विसलताहारो नायं भुजङ्गमनायकः।**
**कुवलयदलश्रेणी कण्ठे न सा गरलद्युतिः।।**
**मलयजरजो नेदं भस्म प्रियारहिते मयि।**
**प्रहर न हरभ्रान्त्यानङ्ग! क्रुधा किमु धावसि।।१९।।**

इदानीं काम एव मे दुःखं प्रयच्छतीति तमेवोपालम्भनेनाह, हृदीति[१]। हेऽनङ्ग! कन्दर्प! मयि न प्रहर प्रहारं न कुरू। किमु इति वितर्के। मयि हरभ्रान्त्या महादेवभ्रमात् क्रुधा क्रोधेन त्वं धावसि[२] इति किमु तर्कयामि। यद्वा उ इति सम्बोधने। हेऽनङ्ग! हरभ्रान्त्या मयि किमिति[३] धावसि। कीदृशे मयि? प्रियारहिते[४]। तथा च[५] तद्विश्लेषादेवाहं सन्तप्तस्त्वं मृतमारणं किमिति करोषीति भावः। (यद्वा) हरः सर्वदा प्रियायुक्तोऽहं त्वधुना प्रियारहित इति मयि हरभ्रमो न युक्त इति भावः। अनङ्ग पूर्वं हरेण त्वच्छरीरं दग्ध्वाऽङ्गरहितः कृतः इति हरेः कामस्य महद्वैरश्रवणाय अनङ्ग! पदेन सम्बोधनं भ्रमबीजं निरस्यति। हृदि[६] इति अयं बिसलताहारः मृणाललताहारस्त-द्वद्विरहजन्यतापशान्त्यर्थं धृतः न तु भुजंगमनायक सर्पराजो वासुकिः। इयं कण्ठे कुवलयदलानां नीलोत्पलपत्राणां श्रेणिः पंङ्क्तिः शैत्याद् धृता[७] न तु सा गरलद्युतिर्बिषकान्तिः। इदं सर्वाङ्गे तापशान्त्यर्थं धृतं मलयरजः चन्दनधूलिर्नतु भस्म विभूतिः। अङ्गे प्रशिथिलः लिप्तः विरहतापवशाद्धूलीभूतइति रजः पदेन[८] सूचितम्। तथा च विसलतायां शैत्यदीर्घत्वादिदर्शनाद्। वासुकी[९] भ्रमात्[१०], चन्दनरजसि भस्मभ्रमाच्च मयि महादेवभ्रमस्तव न युक्त इति भावः। अयं च

१. च., छ. तवोपालम्भगोचरं करोमीत्याशयेनाह-हृदित्यादि-इति पाठः।
२. च क्रोधशत्किमु धावसि - इति पाठः।
३. च., छ. किं - इति पाठः।
४. ख. विरहिते - इत्यधिकः पाठः च. कान्ताविरहिते - इत्यधिकः पाठः।
५. च. तथा च - इति नास्ति।
६. च., छ. हृदीति - इत्यधिकः पाठः।
७. च. शैत्याय धृत्या - इति पाठः।
८. च. इति - इत्यधिकः पाठः।
९. क., छ. गरल - इति पाठः।
१०. च. नीलोत्पलदलपंक्तौ श्यामत्वधर्मदर्शनां गरलभ्रमात् - इत्यधिकः पाठः।
(अ) हारावली, श्लो - १३ पृ.-३

भ्रान्तिमानलङ्कारः सादृश्याद्वस्त्वन्तरप्रतीतिर्भ्रान्तिमानिति। तल्लक्षणं वितर्के किं किमूत च **इत्यमरः**(अ)। उसम्बुद्धौ रूषोक्तौ चेति **विश्वः**(आ)। श्लोके वासुदेवमिश्रः व्याख्यापि लिख्यते[१]। सम्प्रति विरहाकुलतया शृङ्गारोपचारे भ्रान्तिमाह, भगवन् अनङ्ग! प्रहरण मारणशील! हरभ्रान्त्या महादेवभ्रमेण किमु धावसि व्यर्थं धावसीत्यर्थः। कृधा क्रोधं कृत्वा मयि हृदि अयं विसलताहारो न भवति किन्तु भुजङ्गमनायकः। मयि इयं कण्ठे कुवलयदलश्रेणी न भवति। किन्तु स गरलद्युतिः। मयि[२] इदं मलयजरजो न भवति। किन्तु भस्मसर्वमस्ति[३] महादेवचिह्नं। किन्तु कथम्भूते मयि ? प्रियारहिते स तु प्रियासहितः स तु प्रियासहितः सदैव तिष्ठति। अहं प्रियारहित इति क्रुधा व्यर्थं धावसीत्यर्थः।।१९।।

**पाणौ मा कुरु चूतसायकममुं मा चापमारोपय**
**क्रीडानिर्जितविश्वमूर्च्छितजनाघातेन किं पौरुषम्।**
**तस्या एव मृगीदृशो मनसिजप्रेङ्खत्कटाक्षाशुग-**
**श्रेणीजर्जरित मनागपि मनो नाद्यापि संधुक्षते।।२०।।**

कुसुमसायकत्वेन[४] कामः प्रसिद्धोऽत इमानेव चूतमञ्जरीरूपा-न्बाणान्धनुष्यारोप्य मां ताडयिष्यतीति शङ्कया पुनरपि कामानुनयं करोति-पाणावित्यादि। हे मनसिज! अमुं पुरः स्थितं चूतसायकं आम्ररूपं बाणं हस्ते मा कुरु चूतसायकं हस्ते मा कुरु[५]। हस्तेऽपि चेत्करोषि तदाऽमुं सायकं चापे[६] मारोपय। मासंधेहीति वा। अत्र मनसिजपदेन मनसो जातस्य ते मत्सन्तापकारित्वमनुचितमिति ध्वन्यर्थः। हे[७] क्रीडानिर्जितविश्व! क्रीडया लीलया निर्जितं विश्वं जगद्येन तथा सम्बोधन मूर्छितस्य मूर्च्छां प्राप्तस्य जनस्य मादृशस्याघातेन प्रहारेण तव किं पौरुषं। अपितु न

१. च. केचन व्याचक्षते - इति पाठः।
२. क., ख० मापि - इति पाठः।
३. च. अस्ति - इति नास्ति।
४. च. कुसुमसायकतया - इति पाठः।
५. क., ख., छ. चूतसायकं हस्ते मा कुरु - इति नास्ति।
६. क., ख., छ. चापे - इति नास्ति।
७. ख. हे - इति नास्ति।
(अ) अ. को. - ३.४.५
(आ) वि. प्र. - २-४

मूर्च्छितस्य जनाघातेन[१] किं पौरुषम्। कुत्सितं पौरुषमित्यर्थः[२]। मूर्च्छितत्वे हेतुमाह-तस्या एव मृगीदृशो हरिणीदृशः प्रेङ्खन्तः प्रसरन्तो[३] ये कटाक्षास्त एवाशुगा बाणास्तेषां श्रेणीभिः पङ्क्तिभिजर्जरितं खण्डितं[४] मनो मनागपि स्वल्पमपि न संधुक्षते न[५] स्वस्थं भवति। अयं भावः, तत्कटाक्षरूपबाणैस्त्वयाहं मूर्च्छितः कृतः। सम्प्रति मयि[६] चूतमञ्जरीरूपसायकप्रहारो मृतमारणमाचरतीति भावः। लीलयैव येन विश्वं जितं तस्य ते मूर्च्छितजनेषु प्रहारो यशोहानिकर इत्यपि ध्वनितम्। सायकः शरखड्गयोः इति **विश्वः**[(अ)]। अथास्त्रियां धनुश्चापौ **इत्यमरः**[(आ)]। किं पौरुषमित्यत्र द्वितीयव्याख्यानपक्षे किमः क्षेपे[(इ)] इत्यनेन निन्दायां समासः।

''आशुगो मारुते बाणे'' **इत्यमर**[(ई)] ।।२०।।

**भ्रूपल्लवं धनुरपाङ्गतरङ्गितानि**
**बाणाः गुणः श्रवणपालिरिति स्मरेण।**
**तस्यामनङ्गजयजङ्गमदेवताया-**
**मस्त्राणि निर्जितजगन्ति किमर्पितानि।।२३।।**

ननु तत्कटाक्षादिस्मरणादेव तव दुःखं भवति। कामस्य तत्र[७] कोऽपराध इत्याह-भ्रूपल्लवमित्यादि। किमित्याक्षेपे। तस्यां राधायां स्मरेण कामेनास्त्राण्यर्पितानीति तर्कयामि। नन्वस्त्राणि वीरेण हस्ते स्थापयितुमुचितानि। नत्वन्यत्रेत्यत आह-निर्जितेत्यादि। निर्ज्जितानि जगन्ति यैस्तानि। तथा च तैरेवास्त्रैर्जगत्त्रयं जित्वा तत्र स्थापितानीति भावः। तर्ह्यन्यत्र किमिति न

---

१. च. तव - इत्यधिकः पाठः।
२. छ. इति बासुदेवः - इति पाठः।
३. क., ख. प्रसर्य्यन्तो - इति पाठः।
४. क.,ख., छ. खण्डीकृतं - इति पाठः।
५. च. न - इति नास्ति।
६. छ. मयि- इति नास्ति।
७. क., छ. तत्र - इति नास्ति।
(अ) वि. प्र. - कान्तवर्गः ७३
(आ) अ. को.-२.८.८३
(इ) पा. अ.- ५.४.७०
(ई) अ.को. - नास्ति

स्थापितानीत्यत आह, अनङ्गेति। अनङ्गस्य कामस्य जगत्रयाय जङ्गमादेवता जंगमनशीलदेवतायै तथा च त्वयैव त्रैलोक्यजयायास्त्राणि दत्तानि। अतो जातप्रयोजनानि तत्रैव स्थितानीति भावः[१]। देवतया यदस्त्रं दीयते तत्केनापि प्रतिहन्तुं[२] न शक्यत इत्यपि[३] ध्वनितम्। कानि तान्यस्त्राणीत्यत आह, भ्रूपल्लवमिति। भ्रूपल्लवमिव भ्रूपल्लवं तदेव धनुः, अपाङ्गतरङ्गितानि कटाक्षस्य गतागतानि बाणाः श्रवणपालिः कर्णलताप्रान्त एव गुणः प्रत्यञ्चिका। अत्र नीलस्निग्धत्वाद्भ्रुवः पल्लवत्वेन निरूपणं वक्रत्वेन धनुत्वनिरूपणम्, अपाङ्गस्य परममर्मभेदकत्वाद् बाणत्वेन निरूपणम्[४] कर्णपालिश्च दीर्घत्वात् प्रत्यञ्चिकात्वेन निरूपिता। अपाङ्गोऽप्यङ्गहीने स्यान्नेत्रान्ते नीलकेऽपि च।

पालिः कर्णलताग्रेऽश्रौ पङ्क्तावङ्कप्रदेशयोः इति **विश्वः**[(अ)]।।२३।।

**भ्रूचापे निहितः कटाक्षविशिखो निर्मातु मर्मव्यथां**
**श्यामात्मा कुटिलः करोतु कबरीभारोऽपि मारोद्यमम्।**
**मोहं तावदयं च तन्वि! तनुतां बिम्बाधरो रागवान्**
**सद्वृत्तः स्तनमण्डलस्तव कथं प्राणैर्मम क्रीडति।।२१।।**

सम्प्रति राधाङ्गविलसितान्येव स्मरबाणरूपाणि मां ताडयन्ति[५]। तस्या एवोपालम्भं करोमीत्याशयेन काममुपेक्ष्य भावनया पुनः स्थितामिव ज्ञात्वा[६] राधां सम्बोध्याह- भ्रूचाप इत्यादि। भ्रूचापे भ्रूरूपे धनुषि निहितोऽर्पितो (कटाक्षविशिखः) कटाक्षरूपो बाणो मर्मव्यथां[८] मर्मपीडां निर्मातु करोतु।

१. क., ख.,छ. अनङ्गेति ........... स्थितानीति भावः - इति नस्ति।
२. च. प्रहतर्तु - इति पाठः।
३. च. अपि - इति नास्ति।
४. क., ख., छ. वक्रत्वेन धनुत्व............बाणत्वेन निरूपणम्-इति नास्ति।
५. च., छ. ताडयेतीति - इति पाठः।
६. ख. विज्ञाय - इति पाठः।
७. च. भ्रूरूपे धनुषि - इति नास्ति।
८. छ. मम - इत्यधिकः पाठः।
(अ) वि.प्र. लान्तवर्गः - ५०

धनुष्यारोपितस्य बाणस्य परं मर्मपीडनमेव धर्मः[१]। अथ च कुटिलो वक्रः, श्यामात्मा श्यामः आत्मा स्वरूपं यस्य एतादृशः कबरीभरोऽपि ग्रथितवेणी केशसञ्चयोऽपि मारोद्यमं मारणं[२] मारणाय उद्यमं पराक्रमं करोतु। (यद्वा) मारस्य कामस्येति वा। योऽन्तर्मलिनः कुटिलश्च भवति सोऽन्यमारणाय यतत इत्यपि ननुचितम् । अथ च हे तन्वि! अयं बिम्बाधरो बिम्बफलतुल्योऽधरो मोहं मूर्च्छां तनुतां तनोतु। कीदृशो रागवान्? रक्तताविशिष्टः। (इदमपि ननुचितम् यतो) यो रागवान् मात्सर्य्ययुक्तः स परं मोहं[३] करोत्येवेति[४] इदमपि नानुचितमिति[५]। अयं तव सुवृत्तो[६] वर्त्तुलः स्तनमण्डलः कुचवितारो मम प्राणैः समं कथं क्रीडति प्राणग्रहरूपां क्रीडां किमिति करोति। सद्वृत्तस्य सच्चरितस्य परप्राणग्राहित्वमनुचितमिति भावः। विरोधनामायमलङ्कारः। सद्वृत्तत्वरूपगुणस्य परप्राणग्रहणक्रियया विरोधकथनात्। तदुक्तं **काव्यप्रकाशे**[(अ)], "विरोधः सोऽविरोधेऽपि विरुद्धत्वेन यद्वचः" इति पाठः। विशिखस्तोमरे शरे इति विश्वः[(आ)]। श्यामे निन्दितकृष्णयोः इति **धरणिः**[(इ)]। आत्मा देहमनोब्रह्मस्वभावधृतिबुद्धिषु इति **विश्वः**[(ई)]। कबरी केशवेशः इत्यमरः[(उ)]। मारो मृत्यो वृषेऽनङ्गे इति **विश्वः**[(ऊ)] । विम्बं फले बिम्बिकायां प्रतिबिम्बे च मण्डले[(ए)]। रोगोऽनुरक्तौ मात्सर्ये[(ओ)] इति च। वृत्ते तु वर्तुलं वृत्तम् इति **शाश्वतः**[(औ)]।।२१ ।।

---

१. च. पीडोचितमेव - इति पाठः।

२. च. मारस्तस्मै - इत्यधिकः पाठः।

३. च. पर - इति नास्ति।

४. च. तनोत्येवेति - इति पाठः।

५. क., ख. इदमपि नानुचितमिति - इति नास्ति।

६. ख. सद्वृत्तो - इति पाठः।

(अ) का.प्र.-दशम उल्लासः, सू.सं.१६६

(आ) वि. प्र. शान्तवर्गः - १०

(इ) धरणिकोषः साम्प्रतं न समुपलभ्यते

(ई) वि. प्र. नान्तवर्गः - ११५

(उ) अ. को.-२.६.७

(ऊ) वि. प्र. रान्तवर्गः - २१

(ए) वि.प्र. वान्तवर्गः - २

(ओ) वि. प्र. गान्तवर्गः - ९

(औ) शाश्वतकोषः -७.२७

**तानि स्पर्शसुखानि ते च तरलाः स्निग्धा दृशोर्विभ्रमा-**
**स्तद्वक्त्राम्बुजसौरभं स च सुधास्यन्दी गिरां वक्रिमा।**
**सा बिम्बाधरमाधुरीति विषयासङ्गेऽपि चेन्मानसं**
**तस्यां लग्नसमाधि हन्त! विरहव्याधिः कथं वर्धते।।२२।।**

ननु तस्यापि नापराधो न वा स्मरस्य[१] किन्तु तदङ्गस्पर्शादिविषयालाभाच्चञ्चलत्वाच्चेतस्त्वां दुःखीकरोत्यतो भावनया पुरः स्थितां मत्वाह-तानीत्यादि। स्पर्शसुखानि तदङ्गस्पर्शजन्यानि सुखानि इदानीमनुभूयमानानि। तान्येव पूर्वानुभूतान्येव। एतेन त्वगिन्द्रियविषयलाभः कथितः। दृशोर्नेत्रयो्तरलाश्चञ्चलाः स्निग्धाः स्नेहगर्भा विभ्रमा विलासास्त एवं पूर्वानुभूता एव अनेन चक्षुर्विषयलाभ उक्तः[२]। वक्त्राम्बुजसौरभं तस्या मुखपद्मसौरभं तदेव अनेन घ्राणस्य विषयप्राप्तिरुक्ता। गिरां तद्वचसां सुधास्यन्दी सुधाममृतं[३] स्यन्दते स्रवतीत्येवंशीलो वक्रिमा वक्रत्वम्। इदानीं श्रोत्रेण ग्राह्यमाणः स एवं[४] पूर्वानुभूत एव अनेन श्रोत्रेन्द्रियविषय-सान्निध्यमुक्तम्। (विम्बाधरमाधुरी तस्या) बिम्बफलप्राययोरधरयो-रोष्ठयोर्माधुरी मधुरताधुना मयास्वाद्यमानैव पूर्वानुभूतैव। अनेन रसनेन्द्रियस्य विषयलाभः कथितः। इत्येवं प्रकारेण विषयासङ्गेऽपि तत्तदिन्द्रियाणां स्वस्वविषयाशक्तावपि मानसं मन्मनश्चैतस्यां राधायां लग्नसमाधि तदेकाग्रं यदि। हन्तेति खेदे। तदा विरहव्याधिः तद्विश्लेषजन्यो व्याधिः कथं वर्द्धते। अपिशब्दो विरोधाभासालङ्कारसूचनार्थः। बाह्येन्द्रियविषयासङ्गे समाधेरसम्भवात्। अपिशब्दो विरोधाभासालङ्कारसूचनार्थः। बाह्येन्द्रियविषयासङ्गे समाधेरसम्भवात्। बाह्येन्द्रिय-वृत्तिनिरोधे सति मानस एकाग्रताया एव समाधिपदार्थत्वात्। तथा च तत्तदिन्द्रियाणां स्वस्वाभिमतविषयलाभे एव विरहः सम्भवति। मम च तत्तदिन्द्रियाणां विषयविच्छेदस्या-भावान्मनस स्तच्चिन्तनैकपरत्वात्तया सह विश्लेष एव नास्तीति कथं विरहजन्यव्याधि-संभव इति भावः। रूपं शब्दो गन्धरसस्पर्शाश्च विषया अमी **इत्यमरः**[(अ)]।।७।।

१. ख. कामस्य - इति पाठः।
२. च. कथितः - इति पाठः।
३. च. तत् - इत्यधिकः पाठः।
४. क. छ. सोऽपि - इति पाठः।
(अ) अ. को. - १.५.७..

निर्गुणो गुणतारोहं मायामानुषविग्रहं।
सर्वाभिमतदातारं तं वन्दे जगदीश्वरम्।।

**इति श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां।**
**पदभावार्थचन्द्रिकानामधेयायां मुग्धमधुसूदनो नाम तृतीयः सर्गः।।२२।।**

---

गीतगोविन्दस्य मुद्रितग्रन्थेषु अधोऽङ्कितमाधिकमुपलभ्यते ! किमर्थमिदं पद्यं श्रीकान्तमिश्रेण नैव व्याख्यातमिति चिन्त्यम्।

तिर्यक्कण्ठविलोलमौलितरलोत्तंसस्य वंशोच्चरद्-
गीतस्थानकृतावधानललनालक्षैर्न संलक्षिताः।
संमुग्धं मधुसूदनस्य मधुरे राधामुखेन्दौ मृदु-
स्पन्दं पल्लविताश्चिरं दधतु वः क्षेमं कटाक्षोर्मयः।।२३-क।।

इति श्रीगीतगोविन्दकाव्ये 'मुग्धमधुसूदनो' नाम तृतीयः सर्गः।।३।।

❖❖❖

## ।। चतुर्थः सर्गः।।

।स्निग्धमधुसूदनः।

**यमुनातीरवानीरनिकुञ्जे मन्दमास्थितम्।**
**प्राह प्रेमभरोद्भ्रान्तं माधवं राधिकासखी।।२४।।**

पूर्वसर्गे श्रीकृष्णस्य विरहजनितावस्था वर्णिता। अत्र तु राधातापं यमुनेत्यादिना राधिकायाः[१] सखी माधवं[२] कृष्णं प्राह, वक्ष्यमाणमुवाच। राधिकेत्यत्रा[३]नुकम्पायां कः[(अ)]। कथम्भूतं माधवं यमुनायास्तीरे वानीरनिकुञ्जे वेत्रलताच्छन्नं वनं तत्र मन्दं मन्दं[४] स्वैरमास्थितमासीनम्। तत्र हेतुगर्भविशेषणमाह, प्रेमेति[५]। प्रेमभरेण राधाविषयकस्नेहाधिक्येन उद्भ्रान्तमुत्क्षिप्तम् । तथा च प्रेमभरेण तद्ध्यानपरम्परया तां साक्षात्कृत्य तदन्वेषणं विहाय लतागृहे स्थितमिति[६] भावः। अथ वेतसे रथाभ्रपुष्पविदुरशीतवानीरवञ्जुलाः **इत्यमरः**[(आ)]। मन्दः खले मन्दरते मुर्खे स्वैरेऽल्परोगिणोः इति **विश्वः**[(इ)]।।२४।।

।।अष्टमः प्रबन्धः / गीतम् ८।।

।।कर्णाटरागैकतालीतालाभ्यां गीयते।।

**निन्दति चन्दनमिन्दुकिरणमनुविन्दति खेदमधीरम्**
**व्यालनिलयमिलनेन गरलमिव कलयति मलयसमीरम्।**
**माधव मनसिजविशिखभयादिव भावनया त्वयि लीना**
**सा विरहे तव दीना।। ध्रुवम्।।१।।**

निन्दतीत्यादि। गीतस्यास्य कर्णाटरागः एकतालितालः। (रामा च गुरुणैकेनरसेन

---

१. छ. राधायाः - इति पाठः।
२. च. माधव - इति नास्ति।
३. छ. अत्र - इति नास्ति।
४. क., ख. मन्दे मन्दे - इति पाठः।
५. छ. प्रेमेति - इति नास्ति।
६. क., ख., च. लतागृहस्थितमिति - इति पाठः।
(अ) पाणिनि० अष्टा० - ५.३.७६
(आ) अ. को. -२.४.३०
(इ) वि.प्र.दान्तवर्गः - १०

सर्वत्र गीयते। इयं रामनामैकताली[१])। हे माधव! सा राधा तव विरहे त्वद्विश्लेषे चन्दनं निन्दति ।अथ चेन्दुकिरणं (चन्द्रकिरणं) लक्ष्यीकृत्य अधीरं त्वलं[२] खेदं दुखं विन्दति प्राप्नोति। मलयपर्वतसम्बन्धिवातं व्यालनिलयमिलनेन व्यालानां सर्पाणां निलयो निवासश्चन्दनवृक्षस्तस्य मिलनेन सम्पर्केण गरलमिव विषमिव कवयति मन्यते। चन्दनवृक्षस्थितसर्पैः पीत्वोद्गीर्णा एते मलयवायवः। अत एव विषमया कथमन्यथा शरीरसम्पर्कादेव मे मूर्च्छां जनयन्तीति मन्यत इति भावः। कुतस्तथा मन्यत इत्यत्र हेतुः (इत्यतो हेतुगर्भविशेषणमाह-दीनेति) दीना दुःखिता (तथा च) दुःखितस्य सुखहेतुरपि दुःखायैव भवतीति भावः। सा किम्भूता? भावनया ध्यानेन त्वयि लीना मग्ना। कस्मादिव ? मनसिजस्य (कामस्य) ये विशिखा बाणास्तद्भयादिव। व्यालो भुजङ्गमे क्रूरे श्वापदे दुष्टदन्तिनि इति **विश्वः**[(अ)]। गरलन्तु विषे माने गरलं तृणपूलके[(आ)] इति च।।१ ।।

**अविरलनिपतितमदनशरादिव भवदवनाय विशालम्।**
**स्वहृदयमर्मणि वर्म करोति सजलनलिनीदलजालम्।। सा वि० ।।२ ।।**

अविरलेत्यादि। सा स्वहृदयमर्मणि स्वहृदयरूपमर्मस्थाने विशालं सजलनलिनी-दलजालं जलसहितं कमलिनीपत्रसमूहं वर्म कवचं करोति। किमर्थमिव[३] अविरलं यथा स्यादेवं निपतितो यो मदनशरः कामबाणस्तस्माद्भवदवनाय भवतो रक्षणाय। तस्या हृदये त्वं सर्वदा तिष्ठसि, अतोऽविरलनिपतद्भिर्मदनशरैस्ते पीडा मा भूदिति। पद्मिनीपत्रैस्ते सन्नाहमिव सा करोतीति भावः। अत्र केचित्तु[४] कीदृशं वर्म्म। अविरलनिपतितमदनशरात् भवदवनाय रक्षणाय भवदिव समपद्यमानमिव करोति[५]। विशालमिव योजयति इति व्याकुर्वन्ति। अवनं रक्षणे प्रीतौ इति **विश्वः**[(इ)] ।।२ ।।

१. छ. रामानामैकताली - इति पाठः।
२. छ. अस्वलं - इति पाठः।
३. ख. कथमिव - इति पाठः।
४.क., ख., छ. वासुदेवः - इति पाठः।
५. छ. करोति - इति नास्ति।
(अ) वि. प्र. लान्तवर्गः -१९
(आ) वि. प्र. - लान्तवर्गः - ५७
(इ) वि. प्र. नान्तवर्गः - २५

**कुसुमविशिखशरतल्पमनल्पविलासकलाकमनीयम्।**
**व्रतमिव तव परिरम्भसुखाय करोति कुसुमशयनीयम्।। सा वि० ।।३ ।।**

कुसुमेत्यादि। सा कुसुमशयनीयं पुष्पशय्यां करोति रचयति । कथम्भूतम्? अनल्पविलासकलायां बहुतरक्रीडाकलायां कमनीयं काङ्क्षणीयम्। दैवस्य गतिर्ज्ञातुं न शक्यते। को वेदाकस्मादेवागच्छतीत्याशयात् (कुसुमशय्याख्य) त्वन्मार्गदत्तदृष्टिरेव तिष्ठतीति भावः। किमिव करोति ? कुसुमविशिखस्य कामस्य ये शराः कुसुमस्वरूपास्तेषां तल्पं शय्या यत्र तत्स्वरूपं व्रतमिव। तव परिरम्भसुखाय तवालिङ्गनजन्यसुखप्राप्तये (करोति)। तल्पन्तु शयनीये स्यात्तल्पमट्टकलत्रयोः इति **विश्वः**(अ)। एतैस्त्रिभिः पदैरुद्वेगाख्या पञ्चमावस्था कथिता। तल्लक्षणं प्रागेवोक्तम्।।३ ।।

**वहति च वलितविलोचनजलधरमाननकमलमुदारम्।**
**विधुमिव विकटविधुन्तुददन्तदलनगलितामृतधारम्।। सा वि० ।।४।।**

बहतीत्यादि। सा उदारमाननकमलं श्रेष्ठं मुखपद्मं वहति धारयति। कथम्भूतं? वलिते त्वन्मार्गप्रेक्षणाय तिर्यक्प्रसारिते विलोचने नेत्रे एव जलधरो मेघो यस्मिंस्तत्। अत्र निरन्तराश्रुवर्षित्वेन (नेत्रयोः) जलधरोपमा। कमिव ? विधुमिव चन्द्रमिव। कथम्भूतं विधुम्? विकटाः विकराला विशाला वा ये विधुन्तुदस्य राहोर्दन्तास्तैर्यद्दलनं खण्डनं तस्माद्गलिता प्रच्युतामृतस्य धारा यत्र तादृशम्। अत्र मुखस्य विधुना नेत्रजलस्य वामृतधारारूपसादृयाद् वाक्यार्थोपमा बोध्या[१]। विकटः सुन्दरे प्रोक्तो विशालविकरालयोः इति **विश्वः**(आ)। तमस्तु राहुः स्वर्भानुः सैंहिकेयो विधुन्तुदः **इत्यमरः**(इ)। इयमुन्मादावस्था।

श्वासः प्रणोदनोत्कम्पवसुधाश्लेषणैरपि।
व्यापारो जायते यत्र स उन्मादः स्मृतौ यथा।। इति।।४।।

१. क., ख., च. अत्र इत्यारभ्य बोध्या इत्यन्तो नास्ति।
(अ) वि. प्र. पान्तवर्गः - ८
(आ) वि.प्र. टान्तवर्गः - ३०
(इ) अ. को.- १.३.२६

**विलिखति रहसि कुरङ्गमदेन भवन्तमसमशरभूतम्।**
**प्रणमति मकरमधो विनिधाय करे च शरं नवचूतम्।। सा वि० ।।५।।**

विलिखतीत्यादि[१]। (किञ्च) रहस्येकान्ते (सा) कुरङ्गमदेन कस्तूर्या भवन्तं विलिखति। किम्भूतम्? असमशरभूतं कामस्वरूपिणम्। तव करे नवचूतं (शरं) निधाय[२] तेऽध आसनस्थाने मकरं निधाय धृत्वा प्रणमति। कुसुमशरो मकरवाहनस्त्वमेवासीत्यनेन चूतरूपपुष्पशरेण[३] किमिति मां सन्तापयीति प्रणम्य त्वं याचत इति भावः। मृगनाभिर्मृगमदः कस्तूरीगन्धकेशरे इति **हारावली**[(अ)]।।५।।

**ध्यानलयेन पुरः परिकल्प्य भवन्तमतीव दुरापम्।**
**विलपति हसति विषीदति रोदिति चञ्चति मुञ्चति तापम्।। सा वि० ।।६।।**

ध्यानेत्यादि। ध्यानं चिन्तनं तत्र यो लयस्तत्परत्वं तेनातीवातिशयेन दुरापं दुःखेन प्राप्यं भवन्तं पुरोऽग्रे परिकल्प्य सा राधा विलपति। शठ! इयत्कालं याभिः सह क्रीडां कृतवानसि तत्रैव गच्छेत्याद्युक्त्वा रोदिति[४]। भाग्यवशादागतोऽप्यतिनिर्भर्त्सनात्को वेद पुनर्यातीत्यनुरागप्रकटनाय हसति(पश्चात् पुनः स्थितोऽप्ययं मामालिङ्गनादिना न सम्भाषयेति इति विषीदति विषादं प्राप्नोति)। पुन कथमयं वश्यः स्यादिति विचार्य रोदिति। यतो नायिकानां नायकस्य पुरतोऽग्रे[५] रोदनं परमवशीकरणोपाय इति ध्वनिः। तदुक्तम्-रुदितमुदितमात्रं योषितां विग्रहेषु इति।

पश्चाद्रोदनेऽपि तदौदास्यमालक्ष्यन्ती[६]। मामयमनुनेष्यतीत्यभिप्रायेण चञ्चति स्थानान्तरं गच्छति। पश्चाद्ध्यानेनैव तत्सङ्गपरिकल्प्यतापं मुञ्चति। किलिकिञ्चिताख्यश्चायं भावः[७]।

१. छ. विलिखतीत्यादि - इति नास्ति।
२. छ. विधाय - इति पाठः।
३. छ. चूतं पुष्परूपशरेण - इति पाठः।
४. ख. विलपति - इति पाठः।
५. ख. अग्रे - इति नस्ति।
६. च., छ.० मालक्ष्य गच्छन्ती - इति पाठः।
७. छ. हावः - इति पाठः।
(अ) हारावलीः, पृ.सं. १२, श्लो.सं.-१०२

क्रोधाश्रुहर्षभीत्यादेः संकरः किलकिञ्चितम् इति[अ]। इयमप्युन्मादाख्यावस्था (कथिता)। अलङ्कारश्चेह दीपकमिति। तदुक्तम् **(काव्यप्रकाशे)** - सैव क्रियासु बह्वीषु कारकश्चेति दीपकम् इति[आ]।।६।।

**प्रतिपदमिदमपि निगदति माधव! तव चरणे पतिताहम्।**
**त्वयि विमुखे मयि सपदि सुधानिधिरपि तनुते तनुदाहम्।। सा वि० ।।७।।**

प्रतिपदमिति[१]। प्रतिपदमितस्ततश्चलन्ती पदं पदं प्रतिपदं[२] निगदति। हे माधव! तव चरणेऽहं पतिता त्वयि विमुखे विश्लेषे सति सुधानिधिरपि अमृतनिधिश्चन्द्रोऽपि तनुदाहं मच्छरीसन्तापं तनुते[३] विस्तारयति। त्वं माया लक्ष्म्या धवः स्वामी। चन्द्रश्च समुद्रोत्पन्नत्वात् सहोदर इति। त्वयि निकटे स्थिते लक्ष्मीः सपत्न्या अपि मे किमपि[४] कर्तुं न शक्नोति। त्वयि प्रतिकूले सति[५] भगिनीसापत्न्यमपि स्मरन्सुधानिधिरपि मे[६] तनुदाहं तनुते इति माधवपदध्वनिः। सुधापतेः तापकारित्वं विरुद्धमिति विरोधनामायमलङ्कारः।।७।।

**श्रीजयदेवभणितमिदमधिकं यदि मनसा नटनीयम्।**
**हरिविरहाकुलवल्लवयुवतिसखीवचनं पठनीयम्।। सा वि० ।।८।**

श्रीजयदेवेत्यादि।श्रीजयदेवकविभणितं[७] जयदेवकवित्वमधिकमतिशयितमिति यदि मनसा नटनीयं नर्त्तितव्यं तदा इदं हरिविरहेणाकुला व्याकुला या बल्लवयुवतिस्तस्या या सखी दुतीत्वेन प्रेषिता तस्या वचनं पठनीयम्। इयमपि विरहोत्कण्ठिता नायिकेति।।८।।

---

१. च. प्रतिपदमित्यादि - इति पाठः।
२. च. प्रतिचलन्ति - इति पाठ, छ. पदं-इति नास्ति।
३. ख. तनुते - इति नास्ति।
४. क., ख., च. किमपि - इति नास्ति।
५. क., च., छ. सति - इति नास्ति।
६. च., छ. मे - इति नास्ति।
७. छ. कवि - इति नास्ति।
(अ) दशरूपकम्, द्वितीयः प्रकाशः -३९
(आ) का.प्र.- १०-१७

**आवासो विभिन्नायते प्रियसखीमालापि जालायते**
**तापोऽपि श्वसितेन दावदहनज्वालाकलापायते।**
**सापि त्वद्विरहेण हन्त! हरिणीरूपायते हा कथं**
**कन्दर्पोऽपि यमायते विरचयञ्छार्दुलविक्रीडितम्।।२५।।**

सा त्वां विना कुत्रापि न निर्वृतिं लभत इत्यत आह[१], आवास इत्यादि। तस्यास्त्वद्विरहे आवासो मन्दिरं विपिनायतेऽरण्यमिवाचरति। प्रियसखीमालापि प्रियसखीपङ्क्तिरपि जालायते बन्धनवदाचरति। यदा त्वद्विश्लेषदुःखासहिष्णुतया जीवितमपि त्यक्तुं प्रवृत्ता भवति तदा सखीभिर्निवार्यत इति। स्वच्छन्दव्यवहार-प्रतिबन्धकतया ता अपि जालवदाचरन्तीति भावः। अथ च तापोऽपि विरहजनितः सन्तापो निःश्वसितेन दावदहनज्वालायाः दावाग्निशिखाया यः[२] कलापः समूहः स इवाचरति। अपरोऽपि दावाग्निर्वायुना प्रचण्डो भवतीति ध्वनिः । साऽपि हरिणीरूपायते हरिणीवदाचरति। हा कष्टम्। कथम्? कन्दर्पोऽपि कामोऽपि परमानन्दजनकोऽपि त्वद्विरहेण यमामते कृतान्त इवाचरति[३]। किं कुर्वन्? शार्दूलस्य व्याघ्रस्य[४] विक्रीडितं क्रीडां कुर्वन्। यथा हरिणी वने समन्ततः प्रदीप्तदावाग्निज्वालयोद्विग्ना व्याघ्रेण त्रासिता पुरो (व्याधः) जालं विततं पश्यन्ती दशदिशश्चकितं विलोकमाना क्वापि न निर्वृतिं लभते, तथेयमपि व्याघ्ररूपेण कामेन त्रासिता सखीष्वावासेषु क्वापि न सुखं लभत इति भावः[५]। शार्दूलविक्रीडितनामकम् इदं छन्द इत्यपि ध्वनिः। अत्र प्रथमपादे उद्वेगाख्यावस्था कथिता। तल्लक्षणं प्रागुक्तम्। शेषे चाष्टमी व्याध्यवस्था कथिता तदुक्तम्, अभीष्टसङ्गमाभावाद्व्याधिः सन्तापलक्षणैः। अत्र सन्तापनिःश्वासौ शीतवस्तुनिषेवणम् (नोत्तरं भाषते प्रश्ने नेच्छते न शृणोति चेति)। हे कैवल्याद्यखिल-प्रदान्तः कोणेनापि मामुद्वीक्ष्य त्यक्तुं प्रवृत्ता भवति। तदा सखीभिर्निवार्यत इति स्वच्छन्दव्यवहारः[६]।।२५।।

---

तापो निःश्वसितेन इति क्वचित् पाठः।

१. छ. दावाग्नि शिखाया यः - इति नास्ति।

२. छ.० वदाचरति - इति पाठः।

३. क., ख., च. व्याघ्रस्य - इति नास्ति।

४. ख. ध्वनिः - इति पाठः।

५. छ. इत्याहः - इति पाठः।

६. छ. हे कैवल्याद्यखिलप्रदान्त इत्यारभ्य व्यवहारः इत्यन्तो नास्ति।

।। नवम: प्रबन्ध: / गीतम् ९ ।।

।। देशाख्यरागैकतालीतालाभ्यां गीयते ।।

**स्तनविनिहितमपि हारमुदारम्।**
**सा मनुते कृशतनुरति भारम् ।**
**राधिका तव विरहे केशव! ।।१ ।।**

पुनरपि व्याधिरूपामष्टमावस्थां[१] सविस्तरं गीतेन कथयति-स्तनेत्यादि। गीतस्यास्य देशाख्यराग:। एकतालीताल:। गीतार्थस्तु, हे केशव! तव विरहे सा राधिका अनुकम्प्या राधा स्तनविनिहितमपि स्तनयोरुपरि हठात्सखीजनैर्धृतमप्युदारमुत्तमं हारं अतिभारं[२] मनुते। तत्र हेतुगर्भविशेषणमाह-कृशतनुरिति। कृशा तनुरङ्गं यस्या: सा।।१ ।।

**सरसमसृणमपि मलयजपङ्कम्।**
**पश्यति विषमिव वपुषि सशङ्कम्।। राधिका ।।२ ।।**

सरसेति[३]। सा[४] मलयजपङ्कं चन्दनपङ्कं[५] वपुषि देहे सशङ्कं शङ्कासहितं यथा स्यादेवं विषमिव पश्यति। कथम्भूतं? सरसमसृणमपि आर्द्रचिक्कणमपि। पङ्क: कर्दमपापयो: इति **विश्व:**[(अ)]। मसृणोऽकर्कशे स्निग्धे इति **मोदिनी**[(आ)]।।२ ।।

**श्वसितपवनमनुपमपरिणाहम्।**
**मदनदहनमिव वहति सदाहम्।। राधिका० ।।३ ।।**

किञ्च सा श्वसिति पवनं नि:श्वासवायुं वहति धारयति। कीदृशम्? उपमारहित: परिणाहो दैर्घ्यं यस्य तादृशम्। कमिव? मदनदहनमिव कामाग्निमिव। कीदृशं? सदाहं दाहसहितम्। परिणाहो विशलता **इत्यमर:**[(इ)] ।।३ ।।

---

१. क., छ. अष्टमीमवस्थां - इति पाठ:।

२. क., प्रतिभारं - इति पाठ:।

३. छ. सरसेति - इति नास्ति।

४. क., ख. सा - इति नास्ति।

५. छ. चन्दनपङ्क - इति नास्ति।

(अ) वि. प्र. - कान्तवर्ग: - ४१

(आ) मेदिनी को० णान्तवर्ग: १५/७०

(इ) अ. को.- २.७.११४

**दिशि दिशि किरति सजलकणजालम् ।**
**नयननलिनमिव विगलितनालम् ।। राधिका० ।।४।।**

सा दिशि दिशि नयननलिनं नेत्रपद्मं किरति क्षिपति। कथम्भूतं ? विगलितं त्रुटितं नालात् विगलितं नालं यस्येति वा सजलकणजालं सजलकणजालैरश्रुजल-कणिकासमूहैः सहितम्। अत्रैव शब्दो वाक्यालङ्कारः। अत्र नेत्रस्य नलिनत्वेन तिमिरत्वं[१] बोधितम्। तेन जडता नवम्यवस्था ध्वनिता। तदुक्तं **रसार्णवसुधाकरे**-यत्र ध्यायति निस्संज्ञं जडता सा प्रकीर्तिता। अत्र स्पर्शानभिज्ञत्वं वैवर्ण्यं शिथिलाङ्गता। अकाण्डहुङ्कृतिः स्तम्भो जडता सा प्रकीर्तिता। अत्र स्पर्शानभिज्ञत्वं वैवर्ण्यं शिथिलाङ्गता। अकाण्डहुङ्कृति स्तम्भो निःश्वासकृशतादयः[(अ)]।। इति ।।४।।

**त्यजति न पाणितलेन कपोलम्।**
**बालशशिनमिव सायमलोलम्।। राधिका० ।।५।।**

किञ्च[२] सा सायं सन्ध्यासमये पाणितलेन करतलेन कपोलं न त्यजति। कथम्भूतम्? अलोलमचञ्चलं स्थिरमित्यर्थः। दिवसस्तु यथाकथञ्चिन्नीतो रात्रिः पुनरागम्यमाना कथं नेतव्येति कपोले पाणि कृत्वा सायं चिन्तयन्ती तिष्ठतीतिभावः। कमिव ? बालशशिनमिव द्वितीयाचन्द्रमिव। मुखार्धस्य करतलच्छन्नत्वेनार्धदृश्यमानतया विरहपाण्डुतया[३] मुखस्य द्वितीयाचन्द्रसाम्यम्। इयमपि जडतावस्था।।५ ।।

**नयनविषयमपि किसलयतल्पम्।**
**गणयति विहितहुताशविकल्पम्।। राधिका० ।।६ ।।**

किञ्च सा नयनविषयमपि चक्षुर्गोचरमपि किसलयतल्पं नवपल्लवशयनीयं विहितो हुताशनस्याग्नेर्विकल्पः संशयो यत्र तादृशं कलयति। अत्र किसलयेषु ताम्रत्वसन्तापकत्वादिसमानधर्मदर्शनादग्नित्वसंशयः। इयमप्युद्वेगावस्था प्रागेवोक्ता।।६ ।।

**हरिरिति हरिरिति जपति सकामम्।**
**विरहविहितमरणेव निकामम्।। राधिका० ।।७।।**

किञ्च, सा नायिका निकाममतिशयेन[४] हरिरिति हरिरिति[५] जपति। केव ? विरहविहितमरणेव। विरहेण त्वद्विश्लेषेण विहितं विधातुं मरणं यस्याः सैव।

---

१.ख. तिमिरत्वेन - इति पाठः।
२. क., ख. किञ्च - इति नास्ति।
३. छ. विरहपाण्डुरतया - इति पाठः।
४. क., छ. ममातिशयेन - इति पाठः।
५. ख. हरिति हरिति - इति पाठः।
(अ) र. सु. - २.१९८

कथं[१] ? सकामं साभिलाषं यथा स्यात्[२]। अभिलाषादिषु नवस्ववस्थास्वभीतास्वपि[३] त्वदौदासीन्यमालक्ष्य[४] मरणाख्यापि दशम्यवस्था चावश्यं[५] या भवितव्यमिति विनिश्चित्य प्रपन्नानां क्लेशहरणाद्धरिरित्युच्यत इति को वेद[६] प्रसन्नस्तस्मिन्नपि जन्मन्यागत्य क्लेशं मे हरिष्यतीति। तथापि[७] अन्ते या मतिः सा गतिरिति जन्मान्तरे स एव वल्लभो भूयादिति साभिलाषं नामान्तरं हरिरित्येवं जपतीति भावः। विहितेत्यत्र आदिकर्मणि क्तः कर्तरि च इति क्तः[(अ)]।।७।।

**श्रीजयदेवभणितमिति गीतम्।**
**सुखयतु केशवपदमुपनीतम्।। राधिका० ।।८।।**

श्रीजयदेवेति। इत्यमुना प्रकारेण श्रीजयदेवेन भणितमुच्चारितं गीतं सुखयतु। अर्थाच्छ्रोतृन्नायकांश्च। कथम्भूतं ? केशवपदमुपनीतं प्रापितम्।।८।।

**सा रोमाञ्चति सीत्करोति विलपत्युत्कम्पते ताम्यति**
**ध्यायत्युद्भ्रमति प्रमीलति पतत्युद्याति मूर्च्छत्यपि ।**
**एतादृश्यतनुज्वरे वरतनुर्जीवेन्न किं ते रसा-**
**त्स्ववैद्यप्रतिम प्रसीदसि यदि त्यक्तोऽन्यथा हस्तकः ।।२६।।**

सा रोमाञ्चतीत्यादि। अञ्चति उद्गमयतीत्यर्थः। यद्वा रोमाञ्चोऽस्या अस्तीत्यर्थे आदित्वादच्प्रत्यये रोमाञ्चवदाचरतीत्यर्थः[८]। यद्वा रोमाञ्चपदं रोमाञ्चवतीपरं लक्षणया तथा च ओजस्वी वाचरति इत्यादिवत्। रोमाञ्चवती वाचरतीत्यर्थः[९]। अनेनाभिलाषः कथितः। सीत्करोति सीत्कारं करोति। अनेन चिन्तास्मृती कथिते। अथ च विलपति स शूरः सुन्दरश्चेत्यादि नायकगुणान्विशेषेणालपति।

१. छ. यथा स्यात् - इत्यधिकः पाठः।
२. क., ख., छ. सकाममित्ययं भावः - इत्यधिकः पाठः।
३. छ. नवम्यवस्थासु अतीतासु - इति पाठः।
४. छ. त्वदौदास्यमालक्ष्य - इति पाठः।
५. क., ख. चावश्यं - इति नास्ति।
६. क., ख. वेद - इति नास्ति।
७. छ. सकामम् - इत्यधिकः पाठः।
८. ख. सः इवाचरति - इत्यधिकः पाठः।
९. क., छ. यद्वा इत्यारभ्य वाचरतीत्यर्थः - इत्यन्तो नास्ति।
(अ) पा. अ.- ३.४.७१

अनेन गुणकीर्तनमुक्तम्। उत्कम्पते कथं विरहदुःखं सोढव्यमिति कम्पयुक्ता भवति। ताम्यति ग्लानी र्भवति। ध्यायति तव ध्यानं करोति। एतैर्विशेषणैरुद्वेगावस्था कथिता। उद्भ्रमति क्रीडादिस्थलं निर्दिशती भ्रमति[1]। अनेन प्रलापः कथितः। प्रमीलति[2] ध्यानकल्पिततवालिङ्गनादि-जन्यसुखभावनेन चक्षुषी निमीलयति। अनेनोन्मादः कथितः। पतति कार्श्येन स्थातुमशक्यतया भूमौ पतति। पश्चाद्भावनया त्वां दृष्ट्वा कथं कथमप्युद्याति त्वदभ्युद्गमनं करोति। अनेन व्याधिः कथितः। ततो मूर्च्छति मूर्च्छां प्राप्नोति। अनेन जडता कथिता। जडता पर्य्यन्तावस्था जातैव तथापीत्याह, एतादृशीति। हे[3] स्ववैंद्यावश्विनीकुमारौ! तत्प्रतिम तुल्य। एतादृश्यतनुज्वरेऽतनोः कामस्य ज्वरे यदि त्वं प्रसीदसि तदा सा वरतनुः कमनीयदेहा ते तव रसाच्छृङ्गाररसात्किं न जीवेत्। अपि तु जीवेदेव। अन्यथा त्वं चेन्न प्रसीदसि तदा तया हस्तकोऽपि त्यक्तप्राय इत्यर्थः। सम्प्रति मूर्च्छितायास्तस्या वक्तुमपारयन्त्या हस्तचेष्टयैव सखीषु व्यवहारो भवतीति सोऽपि तया[4] त्यक्तव्य इत्यर्थः। ''त्वक्तोऽन्यथा नान्तकः इति पाठे''। त्वमेवान्तको भवसीति यदि न प्रसीदसीत्यर्थः[5]। अथ ध्वन्यर्थः। अन्यत्रापि ज्वरे ज्वरी (रोमाञ्चति शीतादिना वेदनया शीतेन वा) रोमाञ्चानिवाचरति शोषेण सीत्कारं करोति विलपति। मोहाद्यत्किञ्चिद्वदति। उत्कम्पते कम्पयुक्तो भवति । ताम्यति विह्वलो भवति । ध्यायति अहं जीवामि तवेति चिन्तयति। उद्भ्रमति छर्द्दिं करोति निमीलति, अबलतया अक्षिणी मीलति पतति। शय्यातो वेदनया भूमौ पतति उद्याति वायुवेगाद्धावति। मूर्च्छति मीलति पतति। शय्यातो वेदनया भूमौ पतति उद्यति वायुवेगाद्धावति। मूर्च्छति मूर्च्छां प्राप्नोति। एतादृश्यतनुज्वरे महति सान्निपातिकज्वरे कस्यचित्स्ववैंद्यप्रतिमस्य प्रसादेन रसात्पारदादितो[6] ज्वरी किं न जीवेत् अपितु जीवेदेव[7]। (ननु) सान्निपातिकज्वरे सहसा रसदानं चरकादिभिर्निषिद्धमपि अन्यथा अन्यप्रकारेण संहितामार्गेण हस्तकोऽपि[8] वैद्यानां हस्तप्रक्रियाविशेषेण

---

१. ख. भ्रमति - इति नास्ति; छ. निर्दिशन् भ्रमति - इति पाठः।

२. छ. प्रमीलति - इति नास्ति।

३. क., छ. स्ववैंद्यप्रतिम - इत्यधिकः पाठः।

४. क., छ. अपि - इति नास्ति।

५. ख. न प्रसीदसीत्यर्थः - इति नास्ति।

६. ख. रसानन्दादितो - इति पाठः।

७. क., छ. अपितु जीवेदेव - इति नास्ति।

८. छ. अपि - इति नास्ति।

''हथवटी'' इति लोके प्रसिद्धस्त्यक्तो (संहिताप्रक्रियोपचारे कृते विशेषप्राप्ते रसदानमुचितमिति भावः। क्वचित्वत्तोऽन्यथानान्तक इति पाठः। तदा अन्यथा यदि न प्रसीदसि तदा त्वत्तवापेक्षयान्तको न, अपितु त्वमेवान्तक इत्यर्थः। रोमाञ्चतीत्यत्र द्वितीयव्याख्याने क्विप् प्रत्यये त लोपेऽपि रूपं बोध्यम्)। गतप्राय इति। रसो गन्धरसे स्वादे चित्तादौ विषरागयोः। शृङ्गारादौ द्रवे वीर्ये देहघातौ च पारदे'' इति **विश्वः**(अ)।।२६।।

**स्मरातुरां दैवतवैद्यहृद्य! त्वदङ्गसङ्गामृतमात्रसाध्याम्।**
**विमुक्तबाधां कुरुषे न राधशमुपेन्द्रवज्रादपि दारुणोऽसि ।।२७।।**

स्मरातुरामित्यादि। हे दैवतवैद्यहृद्य! देवतानां देवानां यौ वैद्यावश्विनीकुमारौ तद्वद् मनोज्ञ! स्मरातुरां कामेन उग्रां त्वदङ्गसङ्ग एव यदमृतं तन्मात्रसाध्यां राधां विमुक्तबाधां त्यक्तपीडां न कुरुषे[१]। ''अतो हेतोरुपेन्द्रवज्रादपि (कुलिशादपि) दारुणोऽसि कठिनोऽसि। यतो वज्रमिन्द्रेण निक्षिप्तं[२] क्षिप्तमङ्गसम्बद्धं सद्व्यथयति, त्वं तु विश्लेषे सत्येव व्यथयसीति वज्रापेक्षयापि दारुणत्वमिति भावः। उपेन्द्रवज्रानामकं छन्दः इत्यपि ध्वनितम्। तल्लक्षणं **वृत्तरत्नाकरे**। उपेन्द्रवज्रा जतजा स्ततो गौ इति(आ)।।२७।।

**कन्दर्पज्वरसंज्वरातुरतनोराश्चर्यमस्याश्चिरं**
**किन्तु क्लान्तिवशेन शीतलतनुं त्वामेकमेव प्रियं**
**ध्यायन्ती रहसि स्थिता कथमपि क्षीणा क्षणं प्राणिति ।।२८।।**

ननु शीतोपचारैरेव तनुज्वरशान्तिर्भविष्यतीति किं शपत्यत आह-कन्दर्पेत्यादि। अहो इत्याश्चर्यम्, अस्याश्चेतश्चित्तं चन्दनचन्द्रमः-कमलिनीना चिन्तासु चन्द्रचन्दनपद्मिनी-वत्तास्वपि सखीभिः सह क्रियमाणासु सन्ताम्यति ग्लानिं प्राप्नोति। कथम्भूतायाः? कन्दर्पज्वरेण (कामज्वरेण) यः (संज्वरः) सन्तापस्तेनातुरतनो रुग्णदेहायाः। विरोधोऽयमलङ्कारस्त प्रागुक्तम्। नन्वेवम्भूते सन्तापे कथं जीवतीत्यत्र हेतुः। (हे इन, हे प्रभो! त्वां) एकमेव प्रियं शीतल तनु,

---

१. छ. न करोषि - इत्यधिकः पाठः ।
२. क., ख. निक्षिप्तं - इति नास्ति ।
(अ) वि० प्र० सान्तवर्ग - १
(आ) वृत्तरत्नाकरस्थवर्णसमवृत्तेषु - ३.११५

र्यस्य तं ध्यायन्ती सती क्षणं जीवति[१]। कथम्भूता? क्षीणा कृशा। केन? (उत्क्रान्तिवशा उत्क्रान्तेः[२]) प्राणोत्क्रमणस्य वशा आयत्ता। तत्र हेतुगर्भविशेषणमाह-हे इन, हे प्रभो! कथम्भूता? उत्क्रान्तिवशेति तथा च तवाङ्गस्पर्शं भावः। सन्तापः संज्वरः समौ इत्यमरः[(अ)]। इनः सूर्ये नृपे पत्यौ इति विश्वः[(आ)]।।२८।।

**क्षणमपि विरहः पूरा न सेहे**
**नयननिमीलनखिन्नया यया ते।**
**श्वसिति कथमसौ रसालशाखां**
**चिरविरहेण विलोक्य पुष्पिताग्राम्।।२९।।**
**इति श्रीगीतगोविन्दे स्निग्धमधुसूदनो नाम चतुर्थः सर्गः।।४।।**

नन्विषत्कालं यथा जीविता तथाग्रे जीविष्यतीत्यत आह-क्षणमपीत्यादि। अनया राधया ते विरहः पुरा त्वत्सङ्गमदशायां क्षणमपि न सेहे न सोढः। कथम्भूतया? अनया राधया ते विरहः पुरा त्वत्सङ्गमदशायां क्षणमपि न सेहे न सोढः। कथम्भूतया? नयनयोर्यन्निमीलनं निमेषस्तेन (खिन्नया) दुःखितया। किमिति धात्रा चक्षुषोनिमिषः सृष्टः यतस्तत्क्षणोऽपि कृष्णमुखारविन्ददर्शने प्रत्यूहो भवतीति खेदयुक्तयेतिभावः। असौ (राधा) चिरविरहेण कथं श्वसिति। श्वसिते जीविष्यतीत्यर्थः। किं कृत्वा? पुष्पिताग्रां पुष्पितोऽग्रभागो यस्यास्तादृशीम्। रसालशाखां चूतशाखां[४] विलोक्य दृष्ट्वा। श्वसितीत्यत्र भविष्यसामीप्ये[(इ)] वर्तमानात्। छन्दोऽपि चेदं पुष्पिताग्रानामकमिति ध्वनितम्। तल्लक्षणं तु **वृत्तरत्नाकरे**, अयुजि नयुगरेफतो यकारो युजि च नजौ जरगाश्च पुष्पिताग्रा इति[(ई)]।

१. क., ख., छ. प्राणिति - इत्यधिकः पाठः।
२. क., ख., छ. उत्क्रान्तिवशेन - इति पाठः।
३. छ. सती - इति नास्ति।
४. छ. चूतशाखां - इति नास्ति।
(अ) अ.को.-१.१.५७
(आ) वि. प्र. नान्तवर्गः-१
(इ) पा. अ.- ३.३.१३१
(ई) वृत्तरत्नाकरस्य अर्धसमवृत्तेषु - ४.२१८

योषिदीहामृगीभूता कामतस्करलुम्पिता:।
परमानन्दराधेव रक्षणीया वयं त्वया।।

इति श्रीगीतगोविन्दटीकायां श्रीकान्तमिश्र[१] विरचितायां पदभावार्थचन्द्रिका-नामधेयायां चतुर्थ: सर्ग:[२]।

---

१. ख. मिश्रश्रीकान्त - इति पाठ:।

२. छ. समाप्त: - इत्यधिक: पाठ:।

मुद्रितग्रन्थेषु अधोलिखितं पद्यमधिकं वर्त्तते -

वृष्टिव्याकुलगोकुलावनवशादुद्धृत्य गोवर्धनं
बिभ्रद्वल्लवसुन्दरीभिरधिकानन्दाचिरं चुम्बित:।
कन्दर्पेण तदर्पिताधरतटीसिन्दूरमुद्राङ्कितो
वाहुर्गोपतनोस्तनोतु भवतां श्रेयांसि कंसद्विष:।।२९-क।।

इति श्रीगीतगोविन्दकाव्ये स्निग्धमाधवो नाम चतुर्थ: सर्ग:।।४।।

❖❖❖

## ।। पञ्चमः सर्गः ।।

।साकाङ्क्षपुण्डरीकाक्षः।

**अहमिव निवसामि याहि राधा-**
**मनुनय मद्वचनेन चानयेथाः।**
**इति मधुरिपुणा सखी नियुक्ता**
**स्वयमिदमेत्य पुनर्जगाद राधाम्।।३०।।**

अहमित्यादि। मधुरिपुणा श्रीकृष्णेन इत्येवंप्रकारेण नियुक्ता आज्ञप्ता सखी स्वयमेत्यागत्य राधामिदं वक्ष्यमाणम् उवाच, इति किम्। त्वं राधां याहि गच्छ। ताम् अनुनय। कृतापराधेन मया साक्षाद् वक्तुं न शक्यतेऽतो माधवेनैवमेवमुक्तमिति भावः। तां च मदन्तिकमानयेथा। आनयनस्थानमाह, अहमिहेति। इहैव निकुञ्जे अहं तां प्रतीक्षमाणस्तिष्ठमीति भावः।।३०।।

।। दशमः प्रबन्धः / गीतम् १०।।

।। देशीवराडीरागेण रूपकतालेन गीयते।।

**वहति मलयसमीरे मदनमुपनिधाय**
**स्फुटति कुसुमनिकरे विरहिहृदयदलनाय**
**तव विरहे वनमाली सखि! सीदति।। ध्रुवम्।।१।।**

यत्तत्सखीं जगाद तदेव गीतेन कथयति, वहतीत्यादि। गीतस्यास्य देशीवराडीरागो रूपकतालः। गीतार्थस्तु, हे सखि! वनमाली कृष्णः सीदति अवसन्नो भवति। क्व सति? मलयसमीरे मलयाचलसम्बन्धिनि वाते वहति सति, कुसुमनिकरे पुष्पसमूहे विरहिणां हृदयदलनाय विदारणाय स्फुटति विकसति सति। किं कृत्वा? मदनं काममुपनिधाय समीपवर्तिनं कृत्वा। तथा च कुसुमनिकरैरेव बाणैस्तत्संनिहितेन कामेन[1] विरहिणां हृदयं विदारणीयमिति भावः।।१।।

**दहति शिशिरमयुखे मरणमनुकरोति।**
**पतति मदनविशिखे विलपति विकलतरोऽति।। तव वि०।।२।।**

किञ्च शिशिरमयुखे हिमकरे दहति सति मरणं मरणावस्थामनुकरोति। मरणावस्थायां यादृशी मूर्च्छादिरूपा चेष्टा तां स्वीकरोति। अथ च मदनविशिखे कामबाणे पतति सति विकलतरोऽति अति विलपति अतिशयेन विलापं करोति।।२।।

१. छ. विरहितेन - इत्यधिकः पाठः।

**ध्वनति मधुपमूहे श्रवणमपिदधाति।**
**मनसि कलितविरहे निशि निशि रुजमुपयाति।। तव वि० ।।३ ।।**

किञ्च मधुपसमूहे भ्रमरसमूहे ध्वनति गुञ्जति सति श्रवणं श्रोत्रं हस्ताभ्यां पिदधाति मुद्रयति। अथ च निशि निशि प्रतिरात्रौ मनसि चित्ते रुजं पीडामुपयाति प्राप्नोति। किम्भूते मनसि ? कलित उद्भूतो विरहो यत्र तस्मिन्।।३ ।।

**वसति विपिनविताने त्यजति ललितधाम।**
**लुठति धरणिशयने बहु विलपति तव नाम।। तव वि० ।।४।।**

किञ्च स विपिनविताने वनविस्तारे वसति तिष्ठति। ललितमनोहरं धाम गृहं त्यजति। धाम देहे गृहे रश्मौ स्थाने जन्मप्रभावयोः इति **विश्वः**(अ)। किञ्च स धरणीशयने भूशय्यायां लुठति। तव नाम, हे प्राणेश्वरि! हे राधे! इत्येवं बहु वारं वारं विलपति विशेषेण जल्पति।।४।।

**भणति कविजयदेवे विरहविलसितेन।**
**मनवि रभसविभवे हरिरुदयतु सुकृतेन।। तव वि० ।।५।।**

श्रीजयदेवकवौ भणति कथयति सति यत्सुकृतं पुण्यं जातं तेन मनसि। अर्थाद् गायतां श्रृण्वतां च हरिः कृष्ण आविर्भवतु। कथम्भूते मनसि? रभसस्य कृष्णकीर्तनविषयोत्साहस्य विभवः प्राचुर्यं यस्मिंस्तस्मिन्? किम्भूतो हरिः? विरहविलसितेन विलासेनोपलक्षितः। वस्तुतस्तु तस्य विश्वात्मनः केनापि सह विश्लेषो न घटते लीलया विरहविलासमात्रमिति भावः। विरहविलसितेनेत्यत्र विशेषणे इत्यनेन सूत्रेण तृतीया।।८।।

**पूर्वं यत्र समं त्वया रतिपतेरासादिताः सिद्धय-**
**स्तस्मिन्नेव निकुञ्जमन्मथमहातीर्थे पुनर्माधवः।**
**ध्यायंस्त्वामनिशं जपन्नपि तवैवालापमन्त्रावलीं**
**भूयस्त्वत्कुचकुम्भनिर्भरपरीरम्भामृतं वाञ्छति।।३१।।**

---

❋ निम्नश्लोकाः अस्माकं मातृकायां न सन्ति। मुद्रितपुस्तकेष्वेव उपलभ्यन्ते।
रणति पिकसमुदाये प्रतिदिशमनुयाति।
हसति मनुजनिचये विरहमपलपति नेति।। तव वि० ।।५।।
स्फुरति कलरवरावे स्मरति भणितमेव।
तव रतिसुखविभवे बहुगणयति गुणमतीव।। तव वि० ।।६।।
त्वदभिधशुभदमासं वदति नरि श्रृणोति ।
तमपि जपति सरसं परयुवतिषु न रतिमुपैति।। तव वि० ।।७।।

❋ नाममन्त्रावलीम् - इति पाठः।
(अ) वि.प्र.-७१.१२१

पुन: श्रीकृष्णस्य राधाविषयिणीमुत्कण्ठां श्लोकेनाह-पूर्वमित्यादि। हे सखि! माधवो भूयस्त्वदीयौ यौ कुम्भाविव कुचौ स्तनौ तयोनिर्भरं गाढं य: परीरम्भ आलिङ्गनं तदेवामृतं मोक्षस्तं वाञ्छति।[१] आनन्दसन्दोहाविर्भाव-जनकत्वेन तत्कुचकुम्भपरीरम्भस्य मोक्षत्वेन निरूपणम्। वेदान्तिनां तु मते परमानन्दावाप्तेरेव मोक्षत्वात्। किं कुर्वन्? तस्मिन्नेव निकुञ्जरूपे मन्मथस्याधिष्ठानभूते महातीर्थेऽनिशं निरन्तरं त्वामेवेष्टदेवतां ध्यायन् । तवैव च ये आलापास्त एव मन्त्रास्तेषामावलीं पङ्क्तिं, जपन्। महातीर्थत्वे हेतुगर्भं विशेषणमाह, पूर्वं पुरा यत्र त्वया समं रतिपते: कामस्य चुम्बनालिङ्गनादिरूपा: सिद्धय आसादिता माधवेन प्राप्ता:। शीघ्रवाञ्छित-फलप्रदत्वेन महातीर्थमिति ज्ञेयम्। अन्योऽपि साधको मोक्षं वाञ्छन् यत्र सिद्धिं पूर्वं प्राप्नोति तत्रैव सिद्धनिकुञ्जादिमहातीर्थे कस्याश्चिद्देवताया मन्त्रावलीं जपति, तामेव देवतां ध्यायति। अत्रावलीपदोपादानान्माला-मन्त्रत्वमस्य प्रतिपादितम्। तदुक्तं **योगरत्नावल्याम्**(अ),

स्वप्ने पदे स्त्रिया दत्ते मालामन्त्रे तथैव च।
वैदिकेषु च सर्वेषु सिद्धादीन्नैव शोधयेत्।। इति ।।

निकुञ्जादिमहातीर्थे मन्त्रादि जपन् झटिति फलसिद्धिर्भवतीति[२] ध्वनितम् । तदुक्तं **मन्त्रमञ्जुषायाम्**(आ) -

गृहे गोष्ठवनारामनदीनागसुरालये।
समीपे वा गुरो: सिद्धि: शीघ्रं स्यादुत्तरोत्तरम् इति।
मुक्ति: कैवल्यनिर्वाणश्रेयोनि:श्रेयसामृतम् **इत्यमर:**(इ) ।।३१।।

।। एकादश: प्रबन्ध: / गीतम् ११ ।।

।। गुर्जरीरागेण एकतालीतालेन गीयते।।

**रतिसुखसारे गतमभिसारे मदनमनोहरवेशम् ।**
**न कुरु नितम्बिनि! गमनविलम्बनमनुसर तं हृदयेशम्।**
**धीरसमरे यमुनातीरे वसति वने वनमाली।**
**गोपीपीनपयोधरमर्दनचञ्चलकरयुगशाली।। ध्रुवम्।।१।।**

किञ्चित्प्रसादोन्मुखीं राधां दृष्ट्वा सङ्केतगमनाय त्वरयितुमाह, रतिसुखसार इत्यादि। गीतस्यास्य गुर्जरीराग:, एकतालीताल:। गीतार्थस्तु-हे नितम्बिनि!

१. क., छ. आनन्दादिर्भाव - इति पाठ:।
२. छ. ध्वनि: - इति पाठ:। (अ) ग्रन्थोऽयं साम्प्रतं न समुपलभ्यते।
(आ) ग्रन्थोऽयं साम्प्रतं न समुपलभ्यते। (इ) अ. को. - १.५.६

प्रशस्तनितम्बवति! तं हृदयेशं हृदयेश्वरं[१] कृष्णं अनुसरानुगच्छ। गमनविलम्बनं कालक्षेपणं न कुरु। कथम्भूतं कृष्णं ? अभिसारेऽभिसरणस्थाने गतं प्राप्तम्। कथम्भूते अभिसारे ? रतिसुखं सारमुत्कृष्टं यत्र तस्मिन्। मदनस्येव मनोहरश्चित्तहरणक्षमो वेशोऽलङ्कारो यस्य तं कृष्णम्। आकल्पवेषौ नेपथ्यं इत्यमरः[(अ)]। वेशो वेश्यागृहे प्रोक्तो नेपथ्ये गृहमात्रके इति **विश्वः**[(आ)]।

अभिसारत्वमेवाह-धीरसमीर इत्यादि। यमुनायास्तीरे वने वनमाली कृष्णो वसति। कथम्भूते वने ? धीरो मन्दः समीरो यत्र तस्मिन्। अत्र ''धीर'' इत्यनेन वायोर्मन्दत्वं ''यमुनातीर'' इत्यनेन शैत्यं, ''वने'' इत्यनेन सौगन्ध्यं (च) कथितम्। कथम्भूतः ? गोपीनां पीनपयोधरपरिरम्भमांसलस्तनप्राप्तस्य मर्दनं यत्करयुगलं हस्तयुगलं[२] तेन शालितुं शोभितुं शीलं यस्य सः।

समीरमारुतमरुज्जगत्प्राणसमीरणाः इत्यमरः[(इ)]। धीरः पण्डितमन्दयोः इति धरणिः[(ई)]।।१।।

**नामसमेत कृतसङ्केतं वादयते मृदुवेणुम्।**
**बहु मनुते❋ऽतनु ते तनुसङ्गतपवनचलितमपि रेणुम् ।। धीर० ।२।**

यदि मद्वचनेन न प्रत्येषि तदा कृष्णेन वाद्यमानं वेणुमेवा[३] कणयित्याह-नामसमेतमित्यादि। नामसमेतं यथा स्यात्त्वन्नामाक्षरसहितं यथा स्यादेवं मृदु वेणु वादयते। हे राधे! प्राणेश्वरि! कृष्णेन वाद्यमानाद् वेणोः स्वरः आविर्भवतीत्यर्थः। कथम्भूतं वेणुं ? कृतसङ्केतम्। यदा यत्र मया वेणुर्वाद्यते तदा तत्र त्वया राधा[४] नेयेत्येवं कृतः सङ्केतो यत्र तम्। यद्वा, मया कृतो यः सङ्केतस्तं।

❋ मनुते ननुते - इति क्वचित् पाठः।
१. क., छ. हृदयेश्वरं - इति नास्ति।
२. क. हस्तयुगलं - इति नास्ति।
३. छ० मेव - इति नास्ति।
४. छ. राधा - इति नास्ति।
(अ) अ. को. - २.६.९९
(आ) वि. प्र. शान्तवर्गः - ९
(इ) अ. को. - १.१.६२
(ई) साम्प्रतं नोपलभ्यते

त्वन्नामासमेतं त्वन्नामाक्षरसहितं वेणुं वादयते। अहमेतस्मिन्निकुञ्जे तिष्ठामि। राधे! त्वरितमेहीति कृष्णेन[१] वाद्यमानो वेणुर्वदतीत्यर्थः। किञ्च नन्विति सम्बोधने। ते तनुसङ्गतस्त्वदङ्गसम्बन्धी यः पवनो वायुस्तेन चलितमागतमपि रेणुं धूलीं बहु मनुतेऽधिकं यथा[२] स्यादेवमाद्रियते। अयं रेणुर्धन्यो यस्तदङ्गसङ्गिना मरुता स्पृश्यते, अहमपि धन्यो यस्तेन रजसा स्पृश्ये इत्येवं बहु मनुत इति भावः। रेणुर्द्वयोः स्त्रियां धूलिः इत्यमरः(अ)।।२।।

**पतति पतत्रे विचलति पत्रे शङ्कितभवदुपयानम्।**

**रचयति शयनं सचकितनयनं पश्यति तव पन्थानम्।। धीर० ।।३।**

किञ्च पततीत्यादि[३]। स कृष्णः शयनं शय्यां रचयति। कथम्? यथा स्यादेवं पतत्रिणि पक्षिणि वृक्षाग्रं चलति सति गच्छति सति शङ्कितं तर्कितं भवत्या उपयानं समीपे गमनं यथा स्यादेवम्। कीदृशे पतत्रे ? विचलितं पतत्रं पत्रं यस्मात्तस्मिन्। क्वचिद् विचलित पत्र इति पाठः सुगम एव। ततः सचकितनयनं यथा स्यादेव तव पन्थानं त्वदागमनवर्त्म पश्यति। पत्रे विचलत्यायाता मे प्राणेश्वरीति शङ्कया चकितं पन्थानं पश्यतीति भावः। पतत्रं पक्षपक्षिणोरिति धरणिः। तदुपयानमित्यत्र[४] ''सर्वनाम्नो वृत्तिमात्र'' इति पुंवद्भावः(आ)।।३।।

**मुखरमधीरं त्यज मञ्जीरं रिपुमिव केलिसु लोलम्।**

**चल सखि! कुञ्जं सतिमिरपुञ्जं शीलय नीलनिचोलम्।। धीर० ।।४।।**

गमनोत्कण्ठितां दृष्ट्वाह, मुखरमित्यादि। हे सखि! मञ्जीरं नुपूरं त्यज। कीदृशम्? केलौ सुलोलं सुष्ठु लोलं चञ्चलमत एवाधक्षरममन्दं यथा स्यादेवं मुखरं शब्दायमानम्। कमिव? रिपुमिव। रिपुरप्यधीर उत्तरलो मुखरो वाचालः केलौ सुलोलश्च भवतीति मञ्जीरे तत्साम्यम्। हे सखि! सतिमिरपुञ्जेनान्धकारसमूहेन सहितं कुञ्जं चल गच्छ। नीलनिचोलं प्रच्छदपटं शीलय परिधेहि।

१. क., ख. कृष्णेन - इति नास्ति।
२. छ. यथा स्यादेवं - इति नास्ति।
३. छ. पततीत्यादि - इति नास्ति।
४. छ. भवदुपयानमित्यत्र - इति पाठः।
❀ पतत्रिणि विचलितपत्र - इति पाठः।
(अ) अ.को. - २.८.९८
(आ) पा.अ.-२.१.५१, तद्धितार्थोत्तरपदसमाहारे चेति सूत्रान्तर्गतं वार्तिकम्।

''मञ्जीरो नूपरोऽस्त्रियाम्'' **इत्यमरः**(अ)। निचोलः प्रच्छदपटः इत्यपि च(आ) ।।४।।

**उरसि मुरारेरुपहितहारे घन इव तरलबलाके।**

**तडिदिव पीते रतिविपरीते राजसि सुकृतविपाके।।धीर० ।।५।।**

अत्युत्कण्ठां जनयितुमाह,उरसीति। हे पीते! गौराङ्गि! पुनः कीदृशे? सुकृतविपाके सुकृतस्य पुण्यस्य विपाकः परिणामो यस्यास्तादृशी। पुनः कीदृशे? उपहित आरोपित हारो यया तादृशे। रतिविपरीते रतौ सुरते वैपरीत्यं पुंभावमापन्ने त्वं मुरारेः उरसि हृदये राजसि। अधुनैव राजसीत्यत्र भविष्यत्सामीप्ये वर्तमानः(इ)। यद्वा ''सुकृतविपाके'' ''उपहितहारे'' इति द्वयमप्युरसीत्यस्यैव विशेषणम्। तदा त्वत्सुकृतस्य विपाकस्वरूपे उपहितो हारो यत्र तस्मिन्। केव? तडिदिव विद्युदिव। उरसि कथम्भूतं? तरलवलाके। तरलाश्चञ्चला बलाका वकपङ्क्तिर्यत्र तस्मिन्। घन इव मेघ इव। अत्र पीतविद्युद्राधाया उपमानन्मेघसजलत्वं विवक्षितम्। तदुक्तम्,

वाताय कपिला विद्युदातपायातिलोहिनी।

पीतावर्षाय विज्ञेया दुर्भिक्षाय भवेत् सिता(ई)।।

अत्र कृष्णस्य हृदयश्यामत्वेन सजलमेघसाम्यम्। राधायाश्चञ्चलहारस्य चञ्चलबलाकापङ्क्तिसाम्यम्। राधायाश्च तदानीं तरलतया पीततया पीतविद्युत्साम्यम्। अत्र यद्यपि वलाकाया मेघस्याधः स्थितत्वाद्विद्युतश्चोपरि वर्तमानत्वाद्धारविशिष्ट-कृष्णोरस्थलसद्राधोपमानं च तरलवकपङ्क्तिविशिष्टमेघोपरिस्थितविद्युतो विरुद्धं, तथापि मेघोपरि वकपङ्क्तिर्यदि भवति तदुपरि च विद्युत्तदैतादृशं राधाय उपमानं भवतीत्यभूतोपमा ज्ञेया। सर्वपद्मप्रभासारः समाहृत इव क्वचित्। तवाननं विभातीति तामभूतोपमां विदुः इति **दण्डिनोक्तम्**(उ)। तथा च, हे तरलबलाके! चञ्चलकामुकी-त्यर्थः। तस्मिन्कोटिकन्दर्पलावण्ये दृष्टे त्वमेव कामुकी सती पुरुषायितमाचरिष्यसीति भावः।

(अ) अ. को.- २.३.१०९ (आ) अ.को.-२.३.११६ (इ) वर्तमानसामीप्ये वर्तमानवद् वा - पा० सू० ३.३.१३१ (ई) अस्योदाहरणास्यांशः कारकप्रकरणे (पा०सू०-१.४.४४) सिद्धान्तकौमुद्यामुदाहृतो यथा वाताय कपिला विद्युत् इति ।
(इ) काव्यादर्शः - २-३८

''बलाका वकपङ्क्तौ स्याद् वलाका बिसकण्ठिका। बलाका कामुकी प्रोक्ता बलाकाश्च वको मतः'' इति **शाश्वतः**(अ)। ''पीतो गौरो हरिद्राभः'' **इत्यमरः**(आ)। ''विपाकः कीर्त्यते स्वादौ परिणामे च दुर्गतो'' इति(इ) ।।५ ।।

**विगलितवसनं परिहृतरसनं घटय जघनमपिधानम्।**

**किसलयशयने पङ्कजनयने! निधिमिव हर्षनिधानम्।धीर० ।६ ।**

पुरुषायितसुखोत्कण्ठां कारयित्वा सम्प्रति नायककृतरतोत्कण्ठां जनयितुमाह- विगलितवसनमित्यादि। हे पङ्क्तजनयने! पद्मनयने राधे! किसलयशयने नवपल्लवशय्यायां कृष्णेन रचितायां जघनं घटय आरोपय। कथम्भूतं जघनम्? विगलितवसनं मदनगोपालदर्शनेन स्वयमेव स्खलितं वसनं यस्य तम्। अत एवापिधानं अनावरणं तद्रहितम्। पुनः कथम्भूतं? परिहृता दूरीकृता रसना क्षुद्रघण्टिका येन तम्। पुनः कीदृशम्? हर्षस्यानन्दस्य निधानं गृहम्। कमिव? निधिमिव। रसना काञ्चिजिह्वयोः इति **विश्वः**(ई) ।।६ ।।

**हरिरभिमानी रजनिरिदानीमियमपि याति विरामम्।**

**कुरु मम वचनं सत्वररचनं पूरय मधुरिपुकामम्।। धीर० ।।७ ।।**

हरिरभिमानीत्यादि। हरिः कृष्णोऽभिमानी मनस्वी तथा चैतावता दैन्येनापि दुर्ग्रहमत्यजन्त्यां (त्वयि) को वेदोदास्यमेवाचरेदिति भावः। इयं रजनिरपि रात्रिरपीदानीं विराममवसानं याति। मम वचनं ''चल सखि कुञ्जम्' इत्यादि मद्वाक्यं कुरु। किम्भूतं? सत्वरं त्वरया वेगेन सहितं गमनं रचयेति सत्वररचनम्। मधुरिपोः कृष्णस्य कामं वाञ्छां पूरय। नायिका चात्राभिसारिका वर्णनीया।

मदनानलसन्तप्ता याभिसारयति प्रियम्।
ज्योत्स्नातमस्विनीयानयोग्याम्वरविभूषणा।
स्वयं चाभिसरेद् या तु सा भवेदभिसारिका(उ) ।। इति ।।७ ।।

(अ) कोशे नोपलभ्यते।
(आ) अ. को. - १.५.१४
(इ) वि. प्र. कान्तवर्गः- ८७
(ई) वि. प्र. नान्तवर्गः - ३०
(उ) र. सु. - १-१३४-१३५

**श्रीजयदेवे कृतहरिसेवे भणति परमरमणीयम् ।**
**प्रमुदितहृदयं हरिमतिसदयं नमत सुकृतकमनीयम् ।।धीर० ।।८ ।।**

श्रीजयदेवेत्यादि। श्रीजयदेवेन कृता हरेः सेवा येन तादृशे परमरमणीयं यथा स्यादेवं भणति सति हे जनाः! हरिं (कृष्णं) नमत प्रणमत। कथं यथा स्यात् ? प्रमुदितमानन्दयुक्तं हृदयं यस्य तादृशम्। किम्भूतं हरिं ? सदयं दयासहितम्। पुनः कथम्भूतं ? सुकृतेन पुण्येन कमनीयं वाञ्छनीयम्।।८ ।।

**विकिरति मुहुः श्वासान्नासापुरो मुहुरीक्षते।**
**प्रविशति मुहुः कुञ्जं गुञ्जन्मुहुर्बहु ताम्यति।**
**रचयति मुहुः शय्यां पर्याकुलं मुहुरीक्षते।**
**मदनकदनक्लान्तः कान्ते! प्रियस्तव वर्तते।।३२।।**

श्लोकद्वये[१] नापि नायकस्योत्कण्ठामाह, विकिरतीत्यादि, हे कान्ते! तव प्रियो मदनकदनक्लान्तः। मदनः कामस्तज्जनितं यत्कदनं[२] दुःखं तेन क्लान्तो ग्लानो वर्तते । मुहुर्वारम्वारं श्वासान्सन्तापनिःश्वासान्विकिरति क्षिपति नासापुरो नासाग्रं मुहुर्वारम्वारमीक्षते। ध्यानेनापि प्रियां पश्यामीति नासाग्रं वीक्षमाणस्त्वां ध्यायतीति भावः। ध्यानसमये नासाग्रवीक्षणेन मनः ऐकाग्र्यं भवतीति नासापुर इत्युक्तम्। क्वचित् ''श्वासानाशा'' इति तालव्यशकारवान्पाठस्तदा श्वासान्विकिरति। अथ च पुर आशाः पुरोभागस्थदिशः अनेन वर्त्मना गमिष्यतीत्याशयेन मुहुरीक्षत इत्यर्थः। मुहुः (वारम्वारं) कुञ्जं प्रविशति। कथम्भूतं कुञ्जं ? कूजत् भ्रमरशब्दं कुर्वन् कदाचिदनेन पथागत्य तिरोभूय तिष्ठतीत्याशयेन कुञ्जं प्रविशति। मुहुर्मुहुरधिकं ताम्यति ग्लानो भवति। ध्यानविच्छेदे त्वामपश्यंस्ताम्यतीति भावः। क्वचित्कुञ्जन्मुहुः परिताम्यतीति पाठः। तदा कूजन्नार्तस्वरं कुर्वन् ताम्यतीत्यर्थः। मुहुर्वारम्वारं शय्यां रचयति। एतावत्कालं गुरुजनदृष्टिभीत्या नायातातः परमायास्यतीति विचार्य्य शय्यां रचयतीति भावः। मुहुर्वारम्वारं परित आकुलं व्याकुलं यथा स्यादेवं ईक्षते।

नासा तु नासिकायां स्यात् - इति विश्वः[अ]।

---

१. ख. द्वये - इति नास्ति ।
२. ख. यत् - इति नास्ति ।
❀ बहुत्रन्नाशापुरो इति पाठः ।
(अ) वि.प्र. सान्तवर्गः - ११

आशास्तुष्णादिशोः प्रोक्ता इति च(अ) ।।३२।।

**३३-त्वद्बाष्पेन* समं समग्रमधुना तिग्मांशुरस्तं गतो**
**गोविन्दस्य मनोरथेन च समं प्राप्तं तमः सान्द्रताम्।**
**कोकानां करुणस्वनेन सदृशी दीर्घा मदभ्यर्थना**
**तन्मुग्धे! विफलं विलम्बनमसौ रम्योऽभिसारक्षणः।।३३।।**

पुनरपि त्वरयितुमाह, त्वद्बाष्पेणेति। हे मुग्धे! असौ अभिसारयोग्यः क्षणो रम्यः। अत हेतोर्विलम्बनं विफलं निष्कलम्। रम्यत्वे हेतु, त्वद्वावाष्पेण समं त्वदीयनेत्रजलेन सह तिग्मांशुः सूर्यः समग्रं समप्तं यथा स्यादेवमस्तंगतः। त्वदीयवाष्पमप्यस्तं गतं सुर्योऽप्यस्तङ्गत इत्यर्थः। तमस्तिमिरं गोविन्दस्य मनोरथेन समं वाञ्छाया सह सान्द्रतां निबिडतां प्राप्तं गतम्, अन्धकारश्च निविडो जातः। वाञ्छापि जातेत्यर्थः। क्वचित् "वाक्येन समम्" इति पाठः। तदा त्वदीयवचनेन समं तिग्मांशुरस्तंगतः। मयि गमनाय त्वरयन्त्यामुत्तरमप्रयच्छन्त्यास्ते वाक्यं सुखान्नोपलभ्यते[१] इत्यर्थः। कोकानां चक्रवाकानां करुणस्वरेण करुणरसगर्भेण सदृशी दीर्घा विस्तीर्णा मदभ्यर्थना सम्पन्ना यथा कोकनां करुणो स्वरो नानाप्रकारः श्रूयते। एवं नानाप्रकारः श्रूयते। एवं काकुस्वरोपि सम्प्रति तवाग्रे भवतीति भावः। अयं सहोक्तिनामालङ्कारः।

सहोक्तिः सहभावेन कथनं गुणकर्मणाम् इति **कविर्दण्डी**(आ) ।।३३।।

**३४-आश्लेषादनु चुम्बनादनु नखोल्लेखादनु स्वान्तज-**
**प्रोद्बोधादनु संभ्रमादनु रतारम्भादनु प्रीतयोः।**
**अन्यार्थ गतयोर्भ्रमान्मिलितयोः संभाषणैर्जानतोर्**
**दम्पत्योरिह को न को न तमसि व्रीडाविमिश्रो रसः।।३४।।**

पुनरप्यकारस्यातिनैविड्यकथनेनाभिसारक्षणस्या[२]तिरम्यतामेवाह-अश्लेषा-दित्यादि। इह तमसि दम्पत्योर्जायापत्योः को न व्रीडामिश्रितो लज्जासमन्वितो रस आविर्भवतीत्यर्थः। कथम्भूतयोर्दम्पत्योः ? अन्यार्थगतयोरन्यां नायिकामन्यनायकं

---

* त्वद्वाक्येन - इति च पाठः।

१. ख. सूर्योऽपि नोपलभ्यते - इत्यधिकः पाठः।

२. छ. अभिसारलक्षण - इति पाठः।

(अ) वि. प्र. शान्तवर्गः - १४

(आ) काव्यादर्शः - २-३५

चोद्दिश्य गतयोः[१]। पश्चाद् भ्रान्त्या भ्रमान् मिलितयोः। पुनः कीदृशोः ? आश्लेषादनु आलिङ्गनादनु पश्चाद्यच्चुम्बनं, तदनु यो नखोल्लेखः, तदनु य स्वान्तजस्य कामस्य प्रोद्बोध उद्रेकस्तदनु यः सम्भ्रमः सम्भोगादरः कामोद्वेगश्च तदनु यो रतारम्भः सुरतारम्भः, तदनु प्रीतयोर्लब्धानन्दयोः सम्भाषणैर्जानतोरन्यानायिकानामग्राहिपत्युरन्य-नायकनामग्राहिपत्न्याश्चालापैः कथं ममायं पतिः कथं पत्नीयं मे (इति) स्वरविशेषेण जानतोरित्यर्थः। रताद्यनन्तरं परस्परं ज्ञातेऽपि न तुल्यापराधात्परस्परदोषोद्भावनम् । किन्तु लज्जासहितः शृङ्गाररसः एवाविर्भवतीति भावः। अथ प्रथमाश्लेष-स्ततश्चूम्बनं ततो नखक्षतं ततः कामोद्बोधः ततः सम्भ्रमः ततो रतं ततः प्रीतिस्ततो रसभावनमिति कामशास्त्रप्रसिद्धः क्रमः। उक्तं च , ''आश्लेषचुम्बननखक्षतकामबोधशीघ्रत्वमैथुन-मनन्तसुखप्रबोधम्। प्रीतिस्ततोऽपि रसभावनमेव कार्यमेवं नितान्तचतुराः सुचिरं रमन्ते'' इति। यद्यपि कामशास्त्रे दन्तक्षतकूजितकेशग्रहणादिकमष्टविधं प्रोक्तं क्रमेण तथापि अत्र परपुरुष-परनारीगतयोः शङ्काकुलचित्तत्वान्न क्रमः। तथाह **रुद्रः**:-ईर्ष्याकुलस्त्रीषु न नायकस्य निःशङ्ककेलिर्न पराङ्गनासु इति। गाढान्धकारे ते गमनविलम्बमनुचितमिति भावः। दम्पती जम्पती जायापती भार्यापती च तौ **इत्यमरः** (अ)।।३४।।

**सभयचकितं विन्यस्यन्ती दृश तिमिरे पथि**
**प्रतितरु मुहुः स्थित्वा मन्दं पदानि वितन्वतीम्।**
**कथमपि रहः प्राप्तामङ्गैरनङ्गतरङ्गिभिः**
**सुमुखि! सुभगः पश्यन्स त्वामुपैतु कृतार्थताम्।।३५।।**

**इति❋ श्रीगीतगोविन्दे साकांक्ष पुण्डरीकाक्षो नाम पञ्चमः सर्गः ।५।**

---

१. छ. चोद्दिश्य तयोः - इति पाठः।

(अ) अ.को.-२.६.३८

❋ मुद्रितपुस्तकेषु निम्नोक्तः श्लोक अधिको वर्तते -

राधामुग्धमुखारविन्दमधुपस्त्रैलोक्यमौलिस्थली।
नेपथ्योचितनीलरत्नमवनीभारावतारक्षमः।।
स्वच्छन्दंब्रजसुन्दरीजनमनस्तोषप्रदोषश्चिरं।
कंसध्वंसनधूमकेतुरवतु त्वां देवकीनन्दनः।।३५-क।।

पुनरपि त्वरयितुं श्रीकृष्णस्योत्कण्ठामाह, सभयेत्यादि। हे सुमुखि! शोभनः श्रीकृष्णस्त्वां पश्यन्कृतार्थतामुपैतु प्राप्नोतु। कथम्भूतां ? तिमिरेऽन्धकारे सति पथि मार्गे भयसहितं चकितं यथा स्यादेवं दृशं नेत्रं विन्यस्यन्तीमर्पयन्तीम्। निविडान्धकार-दर्शनाद्भयं अन्धकारे निशङ्गमनां तामित्यर्थः। पुनः कीदृशीं ? त्वां प्रतितरु तरुं तरुं प्रति मुहुः पुनः पुनः स्थित्वा मन्दं यथा स्यादेवं पदानि वितन्वतीम् विस्तारयन्तीं। वृक्षं कृष्णभ्रान्त्या स्वचरणायात भयादिति भावः। गाढान्धकारे तमालविटपेषु स्वयमेव कृष्णः इति भ्रमात्को वेदात्रैव कृष्णः स्थितो भविष्यतीत्याशयेन वायमेव कृष्ण इति भ्रमात्तदन्तिकमुपेत्य पश्चाद्विशेषदर्शने सति तत उत्थाय पुनरग्रे तथेत्येवं प्रतितरु स्थित्वा गच्छन्तीमिति भावः। पुनः कथम्भूता ? कथमपि शनैः शनैश्चरणक्षेपादिना रहः एकान्तस्थलं प्राप्ताम्। पुनः कीदृशीम् ? अनङ्गतरङ्गिभिरनङ्गस्य कामस्य यस्तरङ्गः पुनः पुनरुद्बोधस्तद्युक्तै-(हस्तपादादिभिः) रङ्गैरुपलक्षितम्। अङ्गैरित्यत्र विशेषणे तृतीया।

कामिनो दर्शयन् कामं तन्नूनं दुःखसम्भवम्।<br>
यो हरी रमते लोके तस्मै भद्रात्मने नमः।

इति श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां पदभावार्थ-चन्द्रिका-नामधेयायां[१] साकाङ्क्षपुण्डरीकाक्षो नाम पञ्चमः सर्गः।

---

१.ख. मिश्रश्रीकान्तविरचितायां पदभावार्थचन्द्रिकानामधेयायां - इति नास्ति।

❖❖❖

## ।। षष्ठः सर्गः ।।

।धन्यवैकुण्ठङ्कुमः।

**अथ तां गन्तुमशक्तां चिरमनुरक्तां लतागृहे दृष्ट्वा**
**तच्चरितं गोविन्दे मनसिजमन्दे सखी प्राह ।।३६।।**

अथेत्यादि। अथानन्तरं सखी तच्चरितं तस्या राधशयाश्चरितं[१] गोविन्दे[२] गोविन्दं विषयीकृते प्राहोवाच। कथम्भूते गोविन्दे? मनसिजेन कामेन मन्दे मन्दगतौ। किं कृत्वा? तां राधां लतागृहे क्वचिल्लतामण्डपे चिरं बहुकालं व्याप्यानुरक्तां दृष्ट्वास्मिन्नेव लतागृहे केलिः कर्तव्येति चिरकालीनं तस्यानुरागं ज्ञात्वेत्यर्थः। पुनः कथम्भूताम्? गन्तुमशक्तां कृष्णान्तिकं प्रयातुमसमर्थाम्।

मन्दः खले मन्दरते मुर्खे स्वैरेऽल्परागिणोः इति **विश्वः**[(अ)] ।।३६।।

।। द्वादशः प्रबन्धः / गीतम् १२ ।।

।। गुणकरीरागेण रूपकतालेन गीयते।।

**पश्यति दिशि दिशि रहसि भवन्तम्।**
**त्वदधरमधुरमधूनि पिबन्तम्।**
**नाथ! हरे! सीदति राधावासगृहे।। ध्रुवम्।।१।।**

सखी यदुवाच तदेव गीतेन कथयति, पश्यतीत्यादि। गीतस्यास्य गुणकरीरागो रूपकतालः। गीतार्थस्तु, हे नाथ! हे हरे! राधावासगृहे (लीलागृहे) त्वद्भवतः सकाशात्सीदत्यवसन्ना भवति। विशेषतस्त्वमेव तस्या अवसादकारणमिति भावः। रहस्येकान्ते भवन्तं दिशि दिशि पश्यसि? कथम्भूतं भवन्तं? त्वदधरमधुरमधूनि त्वदीयाधणरूपाणि मधुरमधूनि पिबन्तमास्वादयन्तम्। भावनया स्वकीयाधरपानं कुर्वन्तं त्वामेव दिशि दिश पश्यतीति भावः। यद्वा त्वच्छब्दस्त्वन्यवाचकः। तथा च त्वदधरमधु-मधूनि पिबन्तं त्वां दिशि दिशि पश्यतीत्यर्थः। त्वच्छब्दस्तकारान्तोऽन्यपर्यायः सर्वनामगणे पठितस्तदुक्तं-सर्वनामगणव्याख्याने प्रक्रियाप्रसादे त्वच्छब्दोऽन्यवाची द्विः पठितः। स्वरभेद एक उदात्तोऽन्योऽनुदात्त इति **(काशिकाकारमते)**। दुर्गोपाध्यायो-ऽपि एकोऽकारान्तोऽन्यस्तकारान्तो द्वावप्यनुदात्ताविति।

१. क. तस्या राधायाश्चरितं - इति नास्ति।
२. छ. गोविन्दे - इति नास्ति।
(अ) वि. प्र. - दान्तवर्गः - १०

'भोगावासो वासगृह'' इति **हारावली**:(अ) ।।१ ।।

**त्वदभिसरणरभसेन वलन्ती।**

**पतति पदानि कियन्ति चलन्ती।। नाथ! हरे० ।।२ ।।**

ननु किमिति सीदति, अत्रैव किमिति नायातीत्यत आह, त्वदभिसरणेत्यादि। त्वदभिसरणे तवाभिसारे यो रभस उत्साहस्तेन चलन्ती प्रसाधनादौ व्याप्रियमाणा कियन्ती पदानि कतिपयानि पदानि चलन्ती त्वदन्तिकमागन्तुं[१] गच्छन्ती[२] सती पतति स्खलति । तथा च त्वद्विरहसन्तप्ता त्वदन्तिकमागन्तुमसमर्था[३] इत्यर्थ:।।२।।

**विहितविशदबिसकिसलयवलया।**

**जीवति परमिह तव रतिकलया।। नाथ! हरे० ।।३ ।।**

नन्वेवं चेदशक्ता तर्हि कथं जीवतीत्यत आह, विहितेत्यादि। सा परं केवलं तव रतिकलया पूर्वानुभूतेन तव रतिलेशकलनेन जीवति। कथम्भूता? विहिता: विशदैनिर्मलैर्बिषेर्मृणालै: किसलयैर्नवपल्लवैश्च वलयानि कङ्कणानि यया सा,

कलनाकालयो: कला इति **विश्व**:(आ)। वलयं कङ्कणेऽपि च **इत्यपि**(इ)।।३ ।।

**मुहुरवलोकितमण्डनलीला।**

**मधुरिपुरहमिति भावनशीला।। नाथ! हरे० ।।४ ।।**

पुन: कथम्भूतां? मुहुरिति। मुहुर्वारम्बारमवलोकिता वीक्षिता मण्डनानां मुकुटकुण्डल-वनमालादीनां लीला तवानुकृतिर्यया सा। पुन: कीदृशी? अहं मधुरिपुरिति भावनशीला चिन्तनपरा। रहसि तव वेशं विधायानुरागातिशयेनाहमेव[४] मधुरिपुरिति चिन्तयन्तीति भाव:। लीला विहारविशेष: शृङ्गार: प्रयोजनस्य चेष्टा याऽनुरागातिशयेन या क्रियतेऽनुकृति: सेयं लीलोक्ता मुनिसत्तमैरिति।।४।।

---

❋ चलन्ती - इति क्वचित् पाठ:।

१. छ.० गच्छन्ती - इति नास्ति।

२. छ. गच्छन्ती - इति नास्ति।

३. क. इत्यर्थ: - इति नास्ति।

४. छ. अनुरागातिशयेन - इति नास्ति।

(अ) हारावली: पृ० सं०-१६, श्लो०सं०-१४०

(आ) वि.प्र. लान्तवर्ग: - ४३

(इ) वि.प्र. यान्तवर्ग: - ६५

**त्वरितमुपैति न कथमभिसारम्।**

**हरिरिति वदति सखीमनुवारम्।। नाथ! हरे० ।।५।।**

हरिस्त्वरितमभिसारकुञ्जं कथं नोपैत्यागच्छतीति सखीमनुवारं सा वदति।।५।।

**श्लिष्यति चुम्बति जलधरकल्पम्।**

**हरिरुपगत इति तिमिरमनल्पम्।। नाथ ! हरे० ।।६।।**

किञ्च सा कृष्ण उपगत इति बुद्ध्वानल्पमधिकं तिमिरमन्धकारं श्लिष्यत्यालिङ्गति चुम्बति च। किम्भूतं तिमिरम्? जलधरकल्पं श्याममेघसदृशं यदा यदोत्थाय तवातिकं चलति तदा तदा निकुञ्जद्वारि पुञ्जीभूतमन्धकारं दृष्ट्वा त्वद्भ्रमात्तस्यैव चुम्बना[१] लिङ्गनादिकमाचरतीत्यागन्तुमेव न पारयतीति भावः। भ्रान्तिमानयमलङ्कारस्तल्लक्षणं प्रागेवोक्तम्।।६।।

**भवति विलम्बिनि विगलितलज्जा।**

**विलपति रोदिति वासकसज्जा।। नाथ! हरे० ।।७।।**

पश्चाद्विशेषदर्शने सति, भवति त्वयि विलम्बिनि विलम्बं कुर्वति सति विगलितलज्जा सती सा वासकसज्जा वासके लीलागृहे कान्ताभिसरणाय सज्जा सम्भृतसकललीलोपकरणा विलपति, हे निष्कृप! कथमेतावदौदास्यं मयि त्वया रचितमिति विलापं करोति। रोदिति रोदनं करोति।

वासकसज्जालक्षणं **(रसार्णवसुधाकरे)**[(अ)]

भरताद्यैरभिदधे स्त्रीणां वारस्तु बासकः।
स्ववासकगते कान्ते समेष्यति गृहान्तिकम्।
सज्जीकरोति चात्मानं या सा वासकसज्जिका इति।
कोऽपि भवेद्वासकसज्जासौ सज्जिताङ्गरतालया।
निश्चित्यागमनं भर्तुर्द्वारिक्षणपरा यथेति[(आ)]।।७।।

---

१. छ.० चुम्बन -इति नास्ति।
(अ) र. सु. - १.१२५-१२६
(आ) शृ.ति० -१-१३७

**श्रीजयदेवकवेरिदमुदितम्।**

**रसिकजनं तनुतामतिमुदितम्।। नाथ! हरे० ।।८।।**

श्रीजयदेवेत्यादि-श्रीजयदेवकवेरिदमुदितं कथितम् गीतं[१] रसिकजनं भगवद्भक्तिरूपसास्वादग्राहिणं शृङ्गाररसप्रधानमपि अतिमुदितं अतिशयेनानन्दितं तनुतां विस्तारयतु।।८।।

**विपुलपुलकपालिः स्फीतसीत्कारमन्त-**
**र्जनितजडिमकाकुव्याकुलं व्याहरन्ती।**
**तव कितव! विधायामन्दकन्दर्पचिन्तां**
**रसजलधिनिमग्ना ध्यानलग्ना मृगाक्षी।।३७।।**

विपुलपुलकेत्यादि[२]। हे कितव! धूर्त! सा मृगाक्षी रसजलधौ शृङ्गाररससमुद्रे निमग्ना आस्ते। तत्र हेतुगर्भविशेषणमाह, ध्यानलग्नेति। ध्याने तव चिन्तने लग्ना एकाग्रचित्ता। तथा च निरन्तरं त्वच्चिन्तनवशात् त्वां पुरः स्थितमिव मत्वा रससमुद्रमग्ना तिष्ठतीति भावः। किं कृत्वा? अमन्दा अनल्पा या कन्दर्पचिन्ता कामविषयिणी चिन्ता कथं प्रियो मिलिष्यति मिलितोऽपि प्रसादं करिष्यति न वा इत्यादि (कन्दर्पचिन्ता) विधाय यदि तदन्तिकं न यास्यसि तदा तवैवानिष्टं, सा तु निरन्तरं रसमग्नैवास्ते इति भावः। यद्वाऽयमर्थः तवामन्दकन्दर्पचिन्तां त्वद्विषयिणीं कथं कृष्णो मिलिष्यतीति विधाय तथापि चेन्न मिलसि त्वं तदा तवध्यानमेवाचरतीति भावः। कथम्भूता? विपुला प्रचुरा पुलकपालिः रोमाञ्चपङ्क्तिर्यस्या सा ध्यानकल्पितत्वत्करस्पर्शोद्भूतरोमाञ्चवतीत्यर्थः। सा किं कुर्वती? काकुव्याकुलं काक्वा ध्वनिविकारविशेषेण व्याकुलं यथा स्यादेवं व्याहरन्ती। ध्यानेनेव तव करं नीवीबन्धनोन्मोचनासक्तं परिकल्प्य (कुट्टमिताख्यहावमिश्रिता) मुञ्च मुञ्च मामित्यादिनिषेधकं वाक्यं कथयतीति भावः। पुनः कथं यथा स्यात् ? स्फीतः प्रवृद्धः सीत्कारो यत्रैवं यथा स्यात्। ध्यानेनैव त्वद्दन्तनखक्षतादिकं परिकल्प्य सीत्कारं करोतीति भावः। ध्यानकल्पितं तवालापादि (सभयस्तम्भाख्यासात्विको) भवतीति भावः। अन्यस्यापि जलनिधिमग्नस्यान्तर्जाड्यं शीतदुःखवशात् सीत्कारः व्याकुलं त्रुट्यद्वर्णं यथा स्यादेवं भाषणं भवतीति ध्वनिः। इयं च जडताख्या[३] पञ्चम्यवस्था[४]। तल्लक्षणं चोक्तं प्राक्[५]।

---

१. क. गीतं - इति नास्ति। २. छ. विपुलपुलकेति-इति पाठः। ३. छ. नवम्य- इति पाठः। ४. छ. प्रागुक्ता - इत्यधिकः पाठः। ५. छ. कुट्टिमिताख्यशृङ्गारः - इति पाठः।

कुट्टिमितलक्षणं **रसार्णवसुधाकरे**-[(अ)]

केशाधरादिग्रहणे मोदमानेऽपि मानसे।

दु:खितेव बहि: कुप्येद्यत्र कुट्टिमितं हि तत् इति।

काकु: स्त्रियां विकारो य: शोकभीत्यादिभिर्ध्वने: **इत्यमर**:[(आ)] ।।३७।।

**अङ्गेष्वाभरणं करोति बहुश: पत्रेऽपि सञ्चारिणि**
**प्राप्तं त्वां परिशङ्कते वितनुते शय्यां चिरं ध्यायति।**
**इत्याकल्पविकल्पतल्परचनासङ्कल्पलीलाशत-**
**व्यासक्तापि विना त्वया वरतनुर्नैषा निशां नेष्यति।।३८।।**

**इति श्रीगीतगोविन्दे वासकसज्जावर्णने सोत्कण्ठवैकुण्ठो नाम षष्ठ: सर्ग:।।६।**

पुन: कृष्णं त्वरयितुमाह, अङ्गेष्वाभरणमित्यादि। हे कृष्ण! त्वया विना एषा वरतनु: सुन्दराङ्गी निशां रात्रिं न नेष्यति न प्रभातं प्रापयिष्यति। कथम्भूता? इत्यनेन प्रकारेणाकल्पोऽलङ्कारो विकल्पस्त्वदागमनशङ्का। तल्पं शय्यां तद्रचना सङ्कल्पस्त्वदीय-सङ्गादिध्यानमित्यादि लीलाशतव्यासङ्गेऽपि त्वत्सङ्गाभिलाषिन्यास्तस्या न कुत्रापि मनोरमत इति भाव:। अलङ्कारादिव्यासङ्गमेवाह-अङ्गेष्विति। अङ्गेष्वाभरणमलङ्कारं करोति रचयति। कथंचिदागतोऽपि कृष्ण: एतादृशीं दुरवस्थां मां दृष्ट्वा किं वदिष्यतीत्यङ्गेष्वाभरणं करोति। कथंचिदानतोऽ कृष्ण एतादृक्करोतीति भाव:। अनेनाकल्प उक्त:। अथ च बहुशो बारम्बारं पत्रेऽपि सञ्चारिणि पक्ष्यादिचरणाघातेन चलति सति त्वां प्राप्तमागतं परिशङ्कते। अनेन विकल्प: कथित:। अथ च शय्यां शयनीयं वितनुते विस्तारयति। अनेन तल्परचनोक्ता। अथ च चिरं बहुकालं व्याप्तं त्वां ध्यायति। अनेन सङ्कल्प उक्त:। तथा च तवागमनप्रत्याशया एतैर्व्यापारै: सम्प्रति कालं नयति। यदि च त्वया सर्वथा न गन्तव्यं तदा त्वत्सङ्गं प्रति निराशा रात्रिं नेतुं न शक्ष्यतीति भाव: अल्पताख्यश्च हावो वर्णित:। तदुक्तम्,

अल्पता सा तु कथिता प्रियस्यागमने सति।

दिदृक्षयातयोस्तद्वत्ससंभ्रममलङ्कृति:।। इति ।।

(अ) र. सु.- १-२०५ (आ) अ.को.-१.६.१२

❀ मुद्रितपुस्तकेषु निम्नोक्त: श्लोकोऽधिको दृश्यते -

किं विश्राम्यसि कृष्णभोगिभवने भाण्डीरभूमीरुहि
भ्रातर्यासि न दृष्टिगोचरमित: सानन्दनन्दास्पदम्।
राधाया वचनं तदध्वगमुखान्नन्दान्तिके गोपतो
गोविन्दस्य जयन्ति सायमतिथिप्राशस्त्यगर्भा गिर:।।३८-क।।

आकल्पवेषौ नेपथ्यम **इत्यमर**(अ) । तर्को विकल्पः शङ्का च(आ) इति। तल्पं चशयनीये स्यात्तल्पमट्टकलत्रयोः इति **विश्वः**(इ)। सङ्कल्पः कर्म मानसम् **इत्यमरः**(ई) ।।३८।।

दिक्षु त्वां परिपश्यन्तं चेतं तं मानसानिशम्।
कीर्त्तयन्तं विषण्णा या पाहि मापन्नमच्युत !।।१०।।

इति[1] श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां[2] पदभावार्थ-चन्द्रिका-नामधेयायां[3] सोत्कण्ठो वैकुण्ठो नाम[4] षष्ठः सर्गः।

१.क. श्री - इति नास्ति।
२. क., छ. मिश्रश्रीकान्तविरचितायां - इति नास्ति।
३. क., छ. चन्द्रिकानामधेयायां - इति नास्ति।
४. क., छ. सोत्कण्ठो वैकुण्ठो नाम - इति नास्ति।
(अ) अ. को.-२.६.९९
(आ) कोशे नोपलभ्यते।
(इ) वि. प्र. पान्तवर्गः - ८
(ई) अ. को. - १.५.२

# ।। सप्तमः सर्गः ।।

।। नागरनारायणः ।।

**अत्रान्तरे च कुलटाकुलवर्त्मपात-**
**सञ्जातपातक इव स्फुटलाञ्छनश्रीः ।**
**वृन्दावनान्तरमदीपयदंशुजालै-**
**र्दिक्सुन्दरीवदनचन्दनबिन्दुरिन्दुः ।।३९ ।।**

अत्रान्तर इति। अत्रान्तरेऽस्मिन्नवसरे इन्द्रश्चन्द्रोंऽशुजालैः। किरणसमूहै-र्वृन्दावनान्तरं वृन्दावनमध्यमदीपयत्प्रकाशितवान्। कथम्भूतः ? दिक्षु पूर्वा दिक्सैव सुन्दरी कामिनी तस्याः वदनस्य मुखस्य चन्दनबिन्दुर्मण्डलाकारचन्दनतिलकम्। अत्र पूर्णचन्द्रः खण्डे चन्द्रे चन्दनविन्दोः सादृश्याभावात्। पुनः कीदृशः ? स्फुटा प्रकटीभूता लाञ्छनकलङ्कस्य श्रीः शोभा यस्मिन् सः। कुलटाकुलस्य व्यभिचारिणीसमूहस्य यो वर्त्मपातः सङ्केतगमनमार्गप्रतिरोधस्तेन सञ्जातं पातकं यस्य सः। अपरस्यापि कृतपापस्य कलङ्कः स्फुटीभवतीति ध्वनिः ।।३९ ।।

**प्रसरति शशधरबिम्बे विहितविलम्बे च माधवे विधुरा।**
**विरचितविविधविलापं सा परितापं चकारोच्चैः ।।४० ।।**

प्रसरतीत्यादि। शशधरबिम्बे चन्द्रबिम्बे प्रसरति सति । माधवे कृष्णे[1] विहितविलम्बे कृतकालक्षेपे सति विधुरा दुःखिता सा राधोच्चैः परितापं चकार। कथं यथा स्यात्? विरचितो विविधो नानाविधो विलापो[2] (परिदेवनं) यत्रैवं यथा स्यात्। पूर्वं तदागमनशङ्काप्यासीत्। चन्द्रे उदितेऽभिसारिणां कुत्र सञ्चारं इति तदागमनं प्रति निराशयाधिकं[3] विललापेति भावः ।।४० ।।

१. छ. श्रीकृष्णे - इति पाठः।
२. ख. विलापो - इति नास्ति।
३. छ. निराशाधिकं - इति पाठः।

।। त्रयोदशः प्रबन्धः / गीतम् १ ३ ।।

।। मालवरागयतितालाभ्यां गीयते ।।

**कथितसमयेऽपि हरिरहह ! न ययौ वनं**

**मम विफलमिदममलरूपमपि यौवनम्**

**यामि हे ! कमिह शरणं सखीजनवचनवञ्चिता ।। ध्रुवम् ।।१ ।।**

विविधविलापमेव गीतेन कथयति, कथितसमयेऽपीत्यादि। गीतस्यास्य गौडमालवरागः। प्रतिमण्ठतालः। गीतार्थस्तु, इह विपिने कं जनं शरणं यामि। कं जलं वा अग्नि वा यमं वा शरणं यामि। तेन विना जलप्रवेशमग्निप्रवेशं यमगृहं यामीति वा केचित्। किं भूता ? सखीजनानां वचनेन वञ्चिता प्रतारिता। मया हरिरानीयत एवेति सखीवचनेन प्रतारितेत्यर्थः। सख्योऽप्येवं चेत् प्रतारितास्तदा कोऽन्यो विश्वासपात्रं भवेदिति भावः। को ब्रह्मात्मानिलार्केषु शमने सर्वनाम्नि च।

पावके च मयूरे सुखशीर्षजलेषु कम् इति विश्वः(अ)। शरणं गृहरक्षित्रोः **इत्यमरः**(आ)। सखीवचनमेवाह, कथितसमयेऽपीति। हरिः कथितसमयेऽपि[१] सख्यग्रे स्वयमेव कथितो[२] यः समयः कालोऽस्मिन्नवसरे मया सङ्केतस्थलमागन्तव्यमिति। यद्वा, सख्या मदग्रे यः समयः कथितस्तदपि[३] वनं सङ्केतनिकुञ्जं न ययौ न गतवान्। इदमारूढमेव मे यौवनं तारुण्यममलरूपमपि[४] निर्मलरूपमपि सौन्दर्यमपि विफलम्। पूर्वं तदागमनप्रत्याशया स्थितं सम्प्रत्यवधिलङ्घने निरवधिदुःखोपभोगेऽसमर्था शरीरं त्यक्ष्याम्येवेत्यभुक्तमेव यौवनं यास्यतीति भावः ।।१ ।।

**यदनुगमनाय निशि गहनमपि शीलितं ।**

**तेन मम हृदयमिदमसमशरकीलितम् ।। यामि हे० ।।२ ।।**

यदिति। यस्य कृष्णस्यानुगमनायानुसरणाय निशि रात्रौ गहनमपि[५] शीलितं तेन कृष्णेन निमित्तभूतेन मे मम हृदयमसमशरेण कामेन कीलितं विद्धम् ।।२ ।।

**मम मरणमेव वरमिति वितथकेतना।**

**किमिति विषहामि विरहानलमचेतना।। यामि हे० ।।३ ।।**

ममेत्यादि। मम मरणमेव वरमुत्कृष्टम्। तत्र हेतुमाह, इह वनेऽचेतना संमूर्च्छा[६]। यद्वा अचेतना मूर्च्छया ज्ञानरहिता। तथा च मम दुःखस्य कोऽपि ज्ञातापि

१. क.हिरः कथितसमयेऽपि - इति नास्ति।
२. क.,छ. स्वयमेव कथितो - इति नास्ति।
३. छ. कथितस्तत् - इति नास्ति।
४. ख. रूपमपि - इति नास्ति।
५. छ. गमनमपि - इति पाठः।
(अ) वि.प्र. कान्तवर्गः - २४
६. छ. मूर्च्छा - इति पाठः।
(आ) अ.को.-३.३.५३

नेत्यरण्यरुदितं किमाचरामीति भावः कथम्भूताऽहम्? अतिवितथकेतनातिशयेन वतथं मिथ्याभूतं केतनं गृहं यस्याः सा। यद्वा अतिवितथं केतनं शरीरं यस्याः सा, तथा च निरूपमसौन्दर्यालयमपीदं शरीरं तेन विना विफलमित्यर्थः। यद्वा कुलटेयमित्येवं रूपं केतनं लाञ्चनं यस्याः सा। तस्मिन्मिलिते लाञ्छनमपीदं न मे दुःखाय स्यात्। ''षह मर्षणे'' इति चुराद्यन्तर्गणयुजादौ परस्मैपदी-पठितस्य णिच्प्रत्ययाभावपक्षे विषहामीति प्रयोगः। केतनं लाञ्छने कार्ये गेहे चोपनिमन्त्रणे इति विश्वः[(अ)]।।३।।

**मामहह! विधुरयति मधुरमधुयामिनी।**
**कापि हरिमनुभवति कृतसुकृतकामिनी।। यामि हे० ।।४।।**

मामित्यादि[१]। अहहेति खेदे। इयं मधुरा मनोहरा मधुयामिनी वसन्तरात्रि मां विधुरयति विकलयति कापि। कृतं सुकृतं पुण्यं यया सा कामिनी हरिमनुभवति। केलिसमये पश्यति। विधुरं स्यात्प्रविश्लेषे विधुरो विकलेऽन्यवत् इति विश्वः[(आ)]। मधुरं सरसे ज्ञेयं स्वादुन्यपि मनोहरे इति धरणिः[(इ)]। स्याद्धर्ममस्त्रियां पुण्यश्रेयसी सुकृतं वृषः इत्यमरः[(ई)]।।४।।

**अहह! कलयामि वलयादिमणिभूषणम्।**
**हरिविरहदहनवहनेन बहुदूषणम्।। यामि हे० ।।५।।**

अहहेत्यादि। अहहेत्यद्भुते। वलयादिमणिभूषणं कटकादिकं मणिखचितमलङ्कारं हरिविरहदहनेन[२] कृष्णविरहाग्निधारणेन बहुदूषणमनेकदोषं (कलयामि) पश्यामि। स्त्रीणां प्रियाण्याभरणानि तान्यप्यधुना भारभूतानीत्यद्भुतमिति भावः।।५।।

---

१. छ. मामिति - इति पाठः।
२. छ. हरिविरहदहनवहनेन - इति पाठः।
(अ) वि. प्र. नान्तवर्गः - ५
(आ) वि. प्र. रान्तवर्गः - १३
(इ) कोशोऽयं साम्प्रतं नोपलभ्यते।
(ई) अ.को. - १.४.२४

**कुसुमसुकुमारतनुमतनुशरलीलया।**
**स्रगपि हृदि हन्ति मामतिविषमशीलया।। यामि हे० ।।६ ।।**

कुसुमेति। स्रगपि पुष्पमालापि। अतनुः कामस्तस्य ये विषमबाणाः[१] शरास्तल्लीलया मां हृदि हन्ति[२] ताडयति। कामबाणाः अपि पुष्पाण्येव स्रगपि पुष्पमयीति तल्लीलया हन्तीति भावः। कथम्भूतया ? अतनुशरलीलया[३] अतिविषमशीलया अतिशयेन विषमं शीलं स्वभावो यस्यास्तया। अन्यबाणा हि क्षिप्ताः सन्तः[४] क्षतमुत्पाद्य घ्नन्ति। कामबाणास्तु हृदि सङ्गता एव क्षतमकृत्वैवान्तरे घ्नन्तीति विषमशीलां मां कुसुमसुकुमारतनुं पुष्पकोमलाङ्गीम्।।६ ।।

**अहमिह निवसामि न गणितवनवेतसा।**
**स्मरति मधुसूदनो मामपि न चेतसा।। यामि हे० ।।७।।**

अहमिहेत्यादि। अहमिह निकुञ्जे वसामि[५]। कथम्भूता ? न गणिताः[६] न सम्भाविताः वनवेतसाः विपिनस्य वेत्रलताः यया सा। मधुसूदनो मां चेतसापि न स्मरति। चेतोमात्रसाध्यं यत्र स्मरणमपि न करोति अन्यस्य का वार्तेति चेतसेत्यनेन ध्वनितम्। अन्यथा स्मरणस्य चेतोऽजन्यत्वेन चेतसेत्यस्य वैयर्थ्यापत्तेः। न गणितेत्यत्र निषेधवाचकेन न शब्देन समासः न तु नञ्शब्देन। नञ्समासे नस्य तत्पुरुषे लोप इति नलोपे अगणितेति स्यात्। केचित्तु गणिताः प्रतिलवं कृष्णमन्वेषयन्त्या परिसंख्याता वनवेतसाः यया सा। अहमिह वने किं न वसामि[७] अपि निवसाम्येव शेषे समासः। मधुसूदनपदेनात्र निर्दयत्वं ध्वनितम्। विप्रलब्धा चेयं नायिका। तल्लक्षणं कृत्वा सङ्केतमप्राप्ते दयिते व्यथिता तु या विप्रलब्धेति सा प्रोक्ता बुधैरस्यास्तु विक्रियाः, निर्वेदचिन्तास्वेदाश्रुमूर्च्छानिःश्वसितादयः इति[(अ)] ।।७।

१.ख. विषमबाणाः - इति नास्ति।
२. क., छ. दहन्ति - इति पाठः।
३. पूर्वव्याख्याततत्वादयं शब्दोऽत्रानावश्यकः प्रतीयते पाठः।
४. छ. हि क्षिप्ताः सन्तः - इति नास्ति।
५. छ. निवसामि - इति पाठः।
६. छ. न गणिताः - इति नास्ति।
७. छ. नवसामि - इति पाठः।
(अ) र. सु. - १.१४८-१४९

**हरिचरणशरणजयदेवकविभारती।**

**वसतु हृदि युवतिरिव कोमलकलावती।। यामि हे० ।।८।।**

हरिचरणेत्यादि। हरेश्चरणौ शरणं यस्य स जयदेवकविस्तस्य वाणी हृदि हृदये वसतु। अर्थात्कृष्णस्य भक्तानाम्। कथम्भूता भारती ? कोमला मधुरा कलावती कवित्वकलायुक्ता। केव ? युवतिरिव। कथम्भूता ? कोमला मृदङ्गी। कलावती चतुःषष्ठिकलाकुशला।।८।।

**तत्किं कामपि कामिनीमभिसृतः किं वा कलाकेलिभि-**

**र्बद्धो बन्धुभिरन्धकारिणि वनाभ्यर्णे किमुद्भ्राम्यति।**

**कान्तः क्लान्तमना मनागपि पथि प्रस्थातुमेवाक्षमः**

**सङ्केतीकृतमञ्जुवञ्जुललताकुञ्जेऽपि यन्नागतः।।४१।।**

तत्किमित्यादि। कान्तः कृष्णः सङ्केतीकृतो यो मञ्जुर्मनोहरो वञ्जुललताकुञ्जो वेत्रलतागृहं यस्मिन् तस्मिन्। यद्धेतोर्नागतः तत्कामपि कामिनीं किमभिसृतः। अन्यस्याः कस्याश्चिभिसारभूमिं प्राप्त इति किमु इत्यर्थः। यद्वा। बन्धुभिर्गोपबालैः कलाकेलिभिः कौतुककलाभिर्बद्धो नियन्त्रितः किमु। यद्वा। अन्धकारिणी[१] घनतरुच्छायया[२] निविडान्धकारवति अभ्यर्णे वनोपान्ते[३] सङ्केतीकृतविपिनसमीपे सङ्केतस्थलमप्राप्य भ्राम्यति किमु परिभ्रमणं करोति किम्। संशयान्तरामाहक्लान्तमना इति। प्रकृतकिमु-शब्दोऽत्रापि सम्बध्यते। तथा च क्लान्तं मद्विश्लेषे दुःखेनोपतप्तं मनो यस्य एतादृशः प्रस्थातुमक्षमः। ततश्चलितुमेवासमर्थः इति किमु इत्यर्थः। उत्का चेयं नायिका-उत्का भवति सा यस्याः सङ्केतं नागतः प्रियः तस्यानागमने हेतुं चिन्तयत्याकुला यथा(अ)।। इति ।।४१।।

**अथागतां माधवमन्तरेण सखीमियं वीक्ष्य विषादमूकाम्।**

**विशङ्कमाना रमितं मयापि जनार्दनं दृष्टवदेतदाह।।४२।।**

अथेत्यादि। अथानन्तरमियं राधा एतद्वक्ष्यमाणं दृष्टदाह उक्तवती। यथा माधवमन्तरेण कृष्णं विना गतां वीक्ष्य दृष्ट्वा। अत एव विषादेन मूकां कृतमौनाम्। कथम्भूता ? कयाचिन्नायिकया जानर्दनं रमितं विशङ्कमाना तर्कयन्ती मम तापजनक-त्वमुचितमिति जनार्दनपदेन ध्वनितम्।।४२।।

१. छ. अन्धकारिणी - इति नास्ति।

२. क., ख. घनतरतरुच्छायायां - इति पाठः।

३. क., ख. निविडान्धकारे वनोपान्ते - इति पाठः। (अ) श्रृ.ति.-१.१३५

।। चतुर्दशः प्रबन्धः / गीतम् १४।।

।।वसन्तरागयतितालाभ्यां गीयते।।प्र० ।।१४।।

**स्मरसमरोचितविरचितवेशा**

**गलितकुसुमभरविलुलितकेशा**

**कापि मधुरिपुणा विलसति युवतिरधिकगुणा।। ध्रुवम् ।।१।।**

तदेव गीतेन कथयति, स्मरसमरेत्यादि। गीतस्यास्य वसन्तरागः। एकतालीतालः। गीतार्थस्तु-कापि युवतिर्मधुरिपुणा कृष्णेन[१] विलसति रमते[२]। अत एवाधिकगुणा अधिकः सौन्दर्य्यादिरूपो गुणो यस्याः सा। मत्सङ्केतागमनोत्सुकमपि कृष्णं गुणैरपहृत्य रमत इति। मत्तोऽप्यधिकगुणेति भावः। युवति विलसतीत्यनेनापि कामिकर्त्तृकविलासाकथनाद्विपरीतसुरतमुक्तम्। कथम्भूता ? स्मरसमरः कामसंग्रामः। सुरतमिति यावत्। तत्रोचितो योग्यो विरचितः कृतो वेश आभरणं यया सा। पुनः कथम्भूता ? गलितः स्खलितः कुसुमभरो येभ्यस्ते। विलुलिताः कृष्णेन कचग्रहणपूर्वकं चुम्बनदानेन स्रस्ताः केशाः यस्याः सा। विपरीतरते सकचग्रहचुम्बनं नायिकायाः प्रागुक्तम्। अस्त्रियां समरानीकरणाः **इत्यमरः**[(अ)]। वेशो वेश्यागृहे प्रोक्तो नेपथ्ये गृहमात्रके इति **विश्वः**[(आ)]।।१।।

**हरिपरिरम्भणवलितविकारा।**

**कुचकलशोपरि तरलितहारा।। कापि० ।।२।।**

पुनः कथम्भूता ? हरेः परिरम्भणेनालिङ्गनेन वलितो जातो विकारो रोमाञ्चादिर्यस्याः सा। पुनः कथम्भूता ? कलशाविव यौ कुचौ तत्र तरलितश्चञ्चलो हारो यस्याः सा।।२।।

**विचलदलकललिताननचन्द्राः।**

**तदधरपानरभसकृततन्द्रा।। कापि० ।।३।।**

पुनः कथम्भूता ? विचलद्भिश्चञ्चलै[३]रलकैश्चूर्णकुन्तलैर्ललितो मनोहर आननचन्द्रो मुखचन्द्रः[४] यस्याः सा। लालित्यं चालकानां कलङ्कसादृश्यान्मुखे

१. छ. सह - इत्यधिकः पाठः।

२. छ. रमते - इति नास्ति।

३. क., ख० रधिकैः - इति नास्ति।

४. क., ख. मुखचन्द्रः - इति नास्ति।

(अ) अ. को. - २.८.१०४ (आ) वि. प्र. शान्तवर्गः - ९

चञ्चलवत्कलङ्कवच्चन्द्रसाम्यं प्रतीतेः। तस्य कृष्णस्याधरपानरभसेनाधर[१-] पानोत्साहेन कृता चक्षुर्निमीलनेनाविष्कृता तन्द्रा रतिसुखानुभवजनिता निद्रा यया सा।।३।।

**चञ्चलकुण्डलदलितकपोला।**
**मुखरितरसनजघनगतिलोला।। कापि० ।।४।।**

पुनः कथम्भूता ? चञ्चलाभ्यां कुण्डलाभ्यां दलितौ मृदितौ कपोलौ यस्याः सा। हारकुण्डलयोश्चाञ्चल्यम्। पुरुषायिते सकलनायिकातनुचाञ्चल्याद्भवत्येव। मुखरिता शब्दायमाना रसना क्षुद्रघण्टिका यत्र तस्य जघनस्य[२] गत्या गतेन लोला चञ्चला।।४।।

**दयितविलोकितलज्जितहसिता।**
**बहुविधकूजितरतिरसरसिता।। कापि० ।।५।।**

पुनः कथम्भूता ? दयितस्य कृष्णस्य विलोकितेन लज्जितहसिते लज्जाहास्ये यस्याः सा[३]। यद्वा[४] दयितविलोकिते[५] च[६] लज्जिता लज्जावती हसिता[७] हास्ययुक्तेत्यर्थः। पुरुषायमानया तया अधः स्थिताङ्गनायमानस्य कृष्णस्य दर्शनेन लज्जा हास्यं च तस्या अभूदिति भावः। लज्जितहसितेत्यत्र प्रथमव्याख्यानेन[८] नपुंसके भावे क्तः। बहुविधं नानाप्रकारं पिकशिखिकलहंसादीनामिव कूजितं शब्दितं यत्र सः[९]। यो रतिरसः सुरतरसस्तेन रसिता हृष्टा अथवा बहुविधं नानाप्रकारं पारावतादीनां यत्कूजितं तद्वद्रतिरसे[१०] रसितं शब्दितं यस्याः सा। रसितं शब्दिते हृष्टे इति विश्वः[(अ)]।।५।।

---

१. छ. पानरभसेनाधर - इति नास्ति।
२. छ. जघनस्य - इति नास्ति।
३. छ. वासुदेवमिश्रः - इत्यधिक पाठः।
४. छ. यद्वा - इति नास्ति।
५. छ. दयितविलोकितेन - इति पाठः।
६. छ. च - इति नास्ति।
७. क., ख. हसिता - इति नास्ति।
८. ख. प्रथमव्याख्यानेन - इति नास्ति।
९. छ. सः - इति नास्ति।
१०. छ. रसेन - इति पाठः।
(अ) कोशे नोपलभ्यते।

**विपुलपुलकपृथुवेपथुभङ्गा।**

**श्वसितनिमीलितविकसदनङ्गा।। कापि० ।।६।।**

पुनः कथम्भूता? विपुलाः प्रचुरा ये पुलका रोमाञ्चास्तेषां पृथुर्महान्यो वेपथुः कम्पस्तस्य भङ्गस्तरङ्गो यस्याः सा रोमाञ्चकम्पयोरुत्तरोत्पत्त्या-तरङ्गसाम्यम्। भङ्गस्तरङ्गे रूग्भेदे भेदे जयविपर्ययेति **विश्वः**(अ)। श्वसितं सुरतायासजनितो निश्वासो निमीलितं परमानन्दावाप्तिजनितं नेत्रनिमीलनं ताभ्यां विकसन्प्रकटीभवन्ननङ्ग कामो यस्याः सा। श्वसितेत्यनेनानन्दा-वाप्तिसान्निध्यं[१] सूचितम्। निमिलितेत्यनेन च्युतिकालसूचनम्। तदुक्तम्,

मुहुश्च स्वजनाश्लेषः सीत्काराञ्चितलज्जितम्।
हुङ्कारोच्छवसितं नार्या वीर्यसान्निध्यसूचकम्।
मूर्च्छना मीलनं चाक्ष्णोश्च्युतिकालस्य लक्षणम्।।इति।।६।।

**श्रमजलकणभरसुभगशरीरा।**

**परिपतितोरसि रतिरणधीरा।। कापि० ।।७।।**

पुनः कथम्भूता? श्रमजलकणभरेण सुरतायासजनिप्रस्वेद-विन्दुसमूहेन सुभगं मनोहरं शरीरं यस्याः सा। त्रुटितहारेऽपि वक्षसि स्वेदबिन्दुभिर्मुक्ताहारशोभा-जननात्सुभगशरीरेति भावः। उरसि कृष्णस्योरसि परिपतिता। रतिरणे सुरतसंग्रामे धीरा पण्डिता। अनेन सुरतान्तकाल सूचितः। अङ्गे स्वेदः श्लथत्वं च केशव-स्वादिसंस्रुतिः। जाते च्युतिसुखे नार्या विरामेच्छा च जायते। लवलेशकणाणवः **इत्यमरः**(अ)।।७।।

**श्रीजयदेवभणितहरिरमितम्।**

**कलिकलुषं जनयतु परिशमितम्।। कापि० ।।८।।**

श्रीजयदेवेन भणितं कथितं यद्धरेः कृष्णस्य रमितं क्रीडितं तत्कलेः कलियुगस्य कलुषं पापं परिशमितं जनयतु नष्टं करोतु, अर्थात् पाठकानां श्रोतृणाञ्च[२]।।८।।

---

१. छ. सानिध्यं - इति नास्ति ।
२. ख. वा - इति पाठः ।
(अ) वि. प्र. गान्तवर्गः - १८
(आ) अ. को.-३.१.६२

**विरहहपाण्डुमुरारिमुखाम्बुजद्युतिरयं तिरयन्नपि वेदनाम्।**
**विधुरतीव तनोति मनोभुवः सुहृदये हृदये मदनव्यथाम्।।४३।।**

सम्प्रति चन्द्रोऽप्ययमधिकतरं व्यथयतीत्याह, विरहेत्यादि। अये इति विषादे। अयं दृश्यमानश्चन्द्रो मम हृदये मदनव्यथां कामपीडां अतीवाधिकं तनोति विस्तारयति। कीदृशः? विरहेण मद्विश्लेषेण पाण्डु धूसरं यन्मुरारेः मुखाम्बुजं तद्वत् द्युतिर्यस्य सः। कृष्णमुखाम्बुजसदृशचन्द्रदर्शने कृष्णमुखाम्बुजस्य स्मरणादतिव्यथा जायत इति भावः। किं कुर्वन्? वेदनां ज्ञानमपि तिरयंस्तिरोहितां कुर्वन्। तथा च चन्द्रबिम्बदर्शनेन विवेकोन्मूलनं भवति। येन कृतापराधमपि तमेव मनः स्मरतीति भावः। वेदनां दुःखं तिरयन्नपि। अपिशब्दादन्येषां सुखप्रद अस्माकं व्यथाजनक इत्यर्थ इति केचित्। व्यथाजनकत्वे हेतुमाह[१]-मनोभुव इति[२]। मनोभुवः कामस्य सुहृन्मित्रम्। सख्युः कामस्य साहाय्यं चिकीर्षता चन्द्रेणापि व्यथा जन्यत इति भावः। सोदरत्वेन कामचन्द्रयोः सौहार्दम्। अत एवात्र मनोभूवपदेन कामस्योपादानम्। **श्रुतिरपि** चन्द्रमा मनसो जातश्चक्षोः सूर्यो अजायत इति[(अ)]। वेदना ज्ञानदुःखयोः। भये क्रोधे विषादे च संभ्रमे स्मरणेऽपि च इति **विश्वः**[(आ)]। तिरोऽन्तर्धे तिर्यगर्थे इति च[(इ)]।।४३।।

।। पञ्चदशः प्रबन्धः / गीतम् १५ ।।

।। गुर्जरीरागैकतालीलालेन गीयते ।।

**समुदितमदने रमणीवदने चुम्बनवलिताधरे**
**मृगमदतिलकं लिखति सपुलकं मृगमिव रजनीकरे**
**रमते यमुनापुलिनवने विजयी मुरारिरधुना।। ध्रुवम् ।।१।।**

पूर्वगीतेन[३] कस्याश्चिद्विपरीतरतमुक्तमधुना कस्याश्चित्स्वाधीनभर्तृकाया नायककर्तृकां क्रीडामाह-समुदितेत्यादि। गीतस्यास्य गुर्ज्जरीरागः। एकतालीतालः। गीतार्थस्तु-विजयी जयशीलो मुरारिर्यमुनापुलिने वने यमुनायाः सैकते यद्वनं तत्र रमते क्रीडति। निःशङ्ककेलिप्रतिपादनाय विजयीत्युक्तं। मुरारीतिपदेनापि क्रीडामेवाह, समुदितेति। रमणीवदने कामिनीमुखे सपुलकं सरोमाञ्चं यथा स्यादेवं

१. छ. ० माह - इति नास्ति।
२. छ. मनोभुव - इति नास्ति।
(अ) ऋग्वेद-पुरुषसूक्तम्-१३
(आ) वि.प्र.-यान्ता - ५४
(इ) अ. को. - ३.३.२५६
३. छ. गीतेन - इति नास्ति।

मृगमदतिलकं कस्तूरीतिलकं लिखति। कीदृशे वदने ? समुदितः सम्यगुदितो[१] मदनो यस्मात्सः। पूर्णचन्द्रस्य कामोद्दीपकत्वात्। कीदृशे चन्द्रे ? चुम्बनाय वलितः संमुखीकृतोऽधरो यस्मात्सः तस्मिन्। चन्द्र दर्शनाद्यूनोश्चुम्बनादौ प्रवृत्तिः। अत्र मुखस्याह्लादकारित्वादिना चन्द्रसाम्यम् कस्तूरीतिलकस्य च मृगसाम्यम् ।।१ ।।

**घनचयरुचिरे रचयति चिकुरे तरलिततरुणानने।**
**कुरबककुसुमं चपलासुषमं रतिपतिमृगकानने।। रमते० ।।२ ।।**

केल्यन्तरमाह-घनचयेत्यादि। चिकुरे तस्याः केशपाशे कुरबककुसुमं शोणाम्लानमरुण-झिल्लिपुष्पं वा रचयति। यथाविन्यासमर्पयतीत्यर्थः। कीदृशे चिकुरे ? घनचयवन्मेघ-समूहवद्रुचिरे मनोहरे। रतिपतिः कामः स एव मृगस्तस्य कानने वने। पुनः कीदृशे ? तरलितानि विलोकनाय[२] चञ्चलीकृतानि तरुणानां यूनामाननानि येन तस्मिन्। कीदृशं कुसुमम् ? चपलाया इव रक्तविद्युदिव सुषमा अतिशयेन शोभा यस्य तम्। सुखमिति पाठे स एवार्थः। अत्र विरहतापशमकतयाऽतिश्यामलतया[३] च चिकुरणं सजल-मेघसाम्यम्। केशग्रथितकुरबककुसुमानां चान्तरान्तरा दृश्यमानतया विरहिणां सन्तापजनकतया रक्ततया लोहितविद्युत्साम्यम्। चिकुरः कुन्तलो वालः कचः केशः शिरोरुहः इत्यमरः[अ]। स्मृतः कुरबकः शोणाम्लानझिण्डीप्रभेदयोः इति **विश्वः**[आ]। कुसुमं पुष्पफलयोः[इ]। चपला कमलाविद्युत्पुंश्चली पिप्पलीषु च इत्यपि[ई]। सुषमं चारुसमयोः सुषमा परमाद्युतौ'' इति **विश्वः**[इ] ।।२ ।।

---

१ .ख., छ. सम्यगुदितोऽनुकूलनायककृष्णः करस्पर्शेनाविर्भूतः कामो यस्मिन् । चुम्बनाय वलितः सम्मुखीकृत्य सङ्कोचितोऽधरो यस्मिन् । तादृशे कस्मिन् कमिव रजनीकरे चन्द्रे मृगमिव, हरिणमिव । कीदृशे चन्द्रे सम्यगुदितो - इत्यधिकः पाठः ।

२ . छ. स्वावलोकनाय - इति पाठः ।

३ . ख. अतिश्यामलतया - इति नास्ति ।

(अ) अ. को. - २.६.९५

(आ) वि. प्र. कान्तवर्गः - १८२

(इ) वि. प्र. मान्तवर्गः - ४५

(ई) वि. प्र. लान्तवर्गः - ५४

(उ) वि. प्र. मान्तवर्गः - ४६

**घटयति सुघने कुचयुगगगने मृगमदरुचिरुषिते।**

**मणिसरममलं तारकपटलं नखपदशशिभूषिते।। रमते० ।।३ ।।**

केल्यन्तरमाह, घटयतीत्यादि। कुचयुगलं गगनमिव बृहत्त्वात्। तत्रामलं निर्म्मलं मणिसरं मुक्ताहारं तदेव तारकपटलं तारकासमूहं घटयति योजयति। कीदृशे कुचयुगगगने ? युघने सुष्टु अतिशयेन घनो विस्तारो यत्र तस्मिन्। पुनः कीदृशे ? मृगमदस्य रुच्या दीप्त्या रुषितो व्याप्ते। पुनः कीदृशे ? नखपदं नखाङ्कस्तदेव शशी तेन भूषितेऽलङ्कृते। अर्धेन्दुसंज्ञकोऽलङ्कारः[१] अर्धेन्दुसङ्कासमिदं नखक्षतमर्धेन्दुसंज्ञं कथितं समासतः। कक्षानितम्बस्तनपार्श्वमध्ये दातव्यमेतत्करजं सदैव इति[(अ)]। अत एवात्र शशिपदमप्यर्धचन्द्रपरं बोध्यम्। पूर्णचन्द्रस्य तत्साम्याभावात् अत्र कुचयुगस्य विस्तीर्णत्वात्कस्तूरिकायाः श्यामत्वान्नखाङ्करूपचन्द्रवत्त्वाद् गगनत्वेन निरूपणम्। गगनस्यापि कविसम्प्रदाये श्यामत्वेनैव[२] प्रसिद्धेः । अत एव सुघन इत्यादि-भिस्त्रिभिर्विशेषणैर्गगनत्वनिरूपणौपमकविशेषणोपादानात्साङ्गमेतद्रूपकम्[३]।

घनं सान्द्रे दृढे दार्ढ्ये लोहमुद्गरे इति **विश्वः**[(आ)]। गुण्ठितरुषिते **इत्यमरः**[(इ)]। क्षीरस्वामिनाप्युक्तम्-रुषिते लौकिकव्यावृत्येत्यर्थः यत्रान्तर्गिरिरेणुरुषितः। नक्षत्रे चापि मध्ये च तारकं तारकापि च इति **विश्वः**।।

**जितबिसशकले मृदुभुजयुगले करतलनलिनीदले।**

**मरकतवलयं मधुकरनिचयं वितरति हिमशीतले।।रमते० ।।४ ।।**

किञ्च। मृदुभुजयुगले तस्याः कोमले बाहुयुगले मरकतवलयमिन्द्रनीलमणिकङ्कणं तमेव मधुकरनिचयं भ्रमरसमूहं विकिरति[४] अर्पयति। कीदृशे भुजयुगले ? जितं निजमार्दवेन शैत्येन चाभिभूतं बिसशकलं मृणालखण्डं येन तस्मिन्। पुनः कीदृशे ? करतलमेव नलिनीदलं पद्मपत्रं यत्र। यद्वा, करतलमेव नलिनीदलं पद्मिनीपत्रं यस्मिन्। पुनः कीदृशे ? हिमवच्छीतले। अत्र यद्यपि कविसम्प्रदाये क्वापि पद्मिनीपत्रत्वेन[५] वर्णनं

१.क. अर्न्धेन्दुसंज्ञकालङ्कारः - इति नास्ति। २. छ. श्यामत्वे सिद्धेः - इति पाठः।

३. छ. रूपणं साङ्गमेतत् - इति पाठः। ४. छ. वितरति - इति पाठः।

५. क., ख. पद्मिनी - इति नास्ति।

(अ) व्याख्यान्तरेषु एतद् वचनं पञ्चसायकस्थमिति उद्धृतं वर्तते। परन्तु पञ्चसायकं सांप्रतं नोपलभ्यते।

(आ) वि. प्र. नानन्तवर्गः - ३

(इ) अ. को.-३.१.८९

नास्ति। तदपि भुजस्य विसत्व[१] रूपणोपपत्तये दलस्य पद्मिनीपत्रत्वनिरूपणम् न[२] विरुद्धं। अत्र द्वितीयव्याख्याने मरकतवलयस्य भ्रमरसमूहत्वेन निरूपणात्करस्य पद्मत्वनिरूपणम्। नलिनी पद्मिनी पद्मव्योमसिन्धुसरोवरे इति **विश्वः**[(अ)]। मरकतो नीलमणिः इति।।४।।

**रतिगृहजघने विपुलापघने मनसिजकनकासने।**
**मणिमयरसनं तोरणहसनं विकिरति कृतवासने।। रमते० ।।५।।**

किञ्च। रतेः शृङ्गाररसरूपगृहे[३] आश्रये जघने मणिमयरसनं मुक्तामयीं मेखलां विकिरति क्षिपति। अत्र विकिरतीत्यनेन काञ्चीबन्धनसमयेन श्रोणीस्पर्शजनित-साध्वसवशात्कम्पमानकरा[४] क्षिपति न तु बध्नातीति ध्वनितम्। पुनः कीदृशे? विपुलापघने विपुलो विस्तीर्णोऽपघनोऽवयवो यस्य तस्मिन्। अतिमांसल इत्यर्थः। पुनः कीदृशे ? मनसिजस्य कामस्य[५] कनकनिर्मित[६] सिंहासन इव। विस्तीर्णत्वादति-गौरत्वाच्च जघनस्य कनकासनसाम्यम्। अत्र जघनस्य कनकासनत्वरूपणमनुपठ्यमान-मनसिजस्य महाराजत्वमाक्षिपतीत्यैकदेशविवर्त्तिगत्यादिरूपकमिति। कीदृशं मणिमयरसनं? तोरणस्य मङ्गलस्य स्रजो हसनमुपहासो यस्मात्तादृशम्। अन्योऽपि यदि सिंहासने उपविशति तदा परिजनैर्वन्दनमालिका बध्यते। अतो मनसिजसिंहासनीभूते तस्या जघने क्षुद्रघण्टिकारूपं मङ्गल्यस्रजमयं निबध्नातीति भावः। पुनः कीदृशे जघने? कृतं वासनं वस्त्रं समाहृत्यापि काञ्चीं बध्नाति कृष्णेऽतिलज्जया नायिकया कृतं शाटिकादिरूपं वस्त्रं यत्रेत्यर्थः। यद्वा, कृतं वासनं श्रीकृष्णवशीकरणाय धूपविशेषो यत्र तादृशे। अत एव तया वशीकृतः सन् मामवधूय तया सह रमत इति भावः। वटयुवतीमलयोद्भवसूक्ष्मैलासर्जवृष्टसिद्धार्थैः सर्वाङ्गीणो धूपः सर्वजनानां वशीकरणम्[(आ)] इति कामशास्त्रेऽभ्यधायि। यद्वा, कृता

१. छ. निरूपणो - इति पाठः।
२. छ. न - इति नास्ति।
३. क., ख. शृङ्गारस्य - इति पाठः।
४. छ. कम्पनकरमाक्षिपति - इति पाठः।
५. ख. कामस्य - इति नास्ति।
६. छ. कनक - इति नास्ति।
(अ) वि.प्र. नान्तवर्गः - १२
(आ) र. र. वशीकरणाधिकरणम्ए श्लो०-३५, पृ० -१७४

तत्कान्तिदर्शनात्कृष्णेन वासना भोगेच्छा यत्र तस्मिन्। यद्वा कृतवासनमर्थात्कामेन स्थानं यत्रेति केचित्। अङ्गं प्रतीकोऽवयवोऽपघनोऽथ कलेवरम् इत्यमरः(अ)। सिंहासनं तु तत् हैममित्यपि च(आ)। रसनं स्वादने ध्वाने रसना काञ्चिजिह्वयोः(इ)। रसनाञ्चाऽपीति **विश्वः**(ई)। मङ्गल्यस्त्रक्तोरणो नूनं भवेद्वन्दनमालिका। वासनं वसने वीरासने ज्ञाने च धूपने इति **विश्वः**(उ)।।५।।

**चरणकिसलये कमलानिलये नखमणिगणपूजिते।**
**बहिरपवरणं यावकभरणं जनयति हृदि योजिते।। रमते० ।।६।।**

किञ्च, सा चरणकिसलये चरणे एव किसलये ताम्रत्वात्कोमलत्वाच्च। तत्र यावकभरणं अलक्तपूरणं जनयति। कीदृशे ? कमलायाः श्रियो निलये आश्रये। पुनः कीदृशे ? नखा एव ये मणिगणा मणिसमूहास्तैः पूजितेऽलंकृते । कीदृशं यावकभरणं ? बहिरपवरणं बहिर्भूतं दूरीभूतमपवरणं संवरणं यस्य तम् स्पष्टमित्यर्थः। पुनः कीदृशे ? हृदि स्वहृदये योजिते। अनुरागातिशयात्प्रापिते स्वहृदये तच्चरणकिसलयं कृत्वा रचयतीत्यर्थः। हृदि तस्यैव विशेषणं सर्वमिति केचित्। कीदृशे हृदि ? कमलाया लक्ष्म्या निलये आश्रये। लक्ष्म्याः कृष्णवक्षस्येव सर्वदा स्थितिः। पुनः कीदृशे ? नखमणिगणपूजिते लक्ष्म्या अपि गृहे तदीयचरणकिसलयं तं ददातीति तस्याः सौभाग्यातिशयो ध्वनितः। अत्र चरणकिसलये नखमणिगणपूजिते इत्यत्र रूप्यमाणयोः किसलयत्वमणिगणत्वयोः परस्परमयोगादयुक्तं नामरूपकम्।

इदमार्दस्मितज्योत्स्नं स्निग्धनेत्रोत्पलं मुखम्।
इति ज्योत्स्नोत्पलायोगादयुक्तं नाम रूपकम्(ऊ) इति।

कमला श्रीवरस्त्रियोः इति **विश्वः**(ए)। लाक्षा राक्षा जतु क्लीबे यावोऽलक्तो द्रुमामयः **इत्यमरः**(ऐ)।।६।।

(अ) अ.को.-२.६.७०
(आ) अ.को.- २.८.३१
(इ) वि.प्र.नान्तवर्गः -३०
(ई) वि.प्र. नान्तवर्गः - ३१
(उ) वि.प्र. नान्तवर्गः - ४२
(ऊ) काव्यादर्शः - २-७८
(ए) वि.प्र.लान्तवर्गः - ५३
(ऐ) अ.को.-२.६.१२५

**रमयति सुदृशं कामपि सुभृशं खलहलधरसोदरे।**
**किमफलमवसं चिरमिह विरसं वद सखि! विटपोदरे।।रमते० ।७।**

रमयतीत्यादि। एवं स्वयमेव तत्तदाभरणं[१] विधाय कामपि सुदृशं शोभदे दृशौ[२] नेत्रे यस्यास्ताम्। खलो दुर्जनो यो हलधरो बलभद्रस्तस्य सोदरो भ्राता कृष्णस्तस्मिन्सुभृशमतिशयेन रमयति। हे सखि ? वद कथय। इह विटपोदरे कुञ्जमध्ये विरसं रसशून्यं स्यादेवमत एवाफलं यथा स्यादेवं चिरं बहुकालं व्याप्य किं किमित्येव[३] (अवसं) संस्थितास्मीत्यर्थः। अत्र हलधरसोदरत्वेन कृष्णस्योपादानम्। हलधरो ग्राम्यस्तत्सोदरोऽयमपि तथैव भविष्यतीति तस्य मां विहाय यया कयाचिद् गोपिकया सह केलिकरणमुचितमेवेति ध्वनिः। विटपः पल्लवे षिङ्गे विस्तारे स्तम्बशाखयोः इति **विश्वः**[अ]। अवसमिति ''वस निवासे'' इत्यस्य धातोर्लङ्युत्तमपुरूषैकवचने प्रयोगः। स्वाधीनभर्तृकेययं नायिका।

यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति।
विचित्रविभ्रमासक्ता सा स्वाधीनपतिर्यथा[आ] इति।।७।।

**इह रसभणेन कृतहरिगुणने मधुरिपुपदसेवके।**
**कलियुगरचितं न वसतु दुरितं कविनृपजयदेवके।। रमते० ।।८।।**

इहेत्यादि। इहैतत्काव्यकर्तरि कविनृपजयदेवके कवीनां नृपे ईश्वरे कलियुगे चरितमाचरितं कृतं दुरितं न वसतु न तिष्ठतु। कीदृशे ? रसस्य कृष्णविषयशृङ्गाररसस्य भणनं कथनं यस्य तस्मिन्। अत एव कृतं हरेर्गुणनं चिन्तनं येन-तस्मिन्। अत्रापि हेतुः मधुरिपोः कृष्णस्य पदसेवके ।।८।।

**नायातः सखि! निर्दयो यदि शठस्त्वं दूति! किं दूयसे**
**स्वच्छन्दं बहुवल्लभः स रमते किं तत्र ते दूषणम्।**
**पश्चाद्य प्रियसङ्गमाय दयितस्याकृष्यमाणं गुणै-**
**रुत्कण्ठार्तिभरादिव स्फुटदिदं चेतः स्वयं यास्यति।।४४।।**

पूर्वमन्यस्याः कस्याश्चित्कृष्णेन सह केलिमुत्प्रेक्ष्य सख्या अग्रे वर्णितवती। सम्प्रति दूतीमेव कृष्णेनोपभुक्तां शङ्कमाना वक्रोक्त्या दूतीं प्रत्याह, नायात इत्यादि। हे सखि! दूति! दौत्यकर्मकुशले! स निर्दयो दयारहितोऽत एव शठः कृतगूढमदपराधो यदि नायातस्तदा किं दूयसे किमिति दुःखिता भवसि ? किन्तु धृष्टः स्वच्छन्दमेव

१. छ. तत्राभरणं - इति पाठः। २. छ. दृशौ - इति नास्ति।
३. छ. किमित्यत्र - इति पाठः।
(अ) वि. प्र. पान्तवर्गः - १३ (आ) शृ.ति.- १.१३३

रमतेऽतो किं दूयसे इत्याह, स्वच्छन्दमित्यादि[१]। स कृष्णो बहुवल्लभोऽनेकनायिकाप्रियोऽत एव स्वच्छन्दं निःशङ्कं रमते। यया कयाचिद् गोपिकया सह केलिं करोति। तत्रार्थे ते तव किं दूषणम्। अपितु न किमपीत्यर्थः। क्षणं पुनरपि समाश्वसिहि। यावत्पुनरपि तदन्तिकं गत्वा तमानयामीति वदन्तीं प्रत्याहपश्चाद्येति। अद्यैवं पश्य प्रियस्य कृष्णस्य सङ्गमाय मिलनायेदं मच्चेतोऽन्तःकरणं यास्यति गमिष्यति। कीदृशं ? दयितस्य कृष्णस्य गुणैः सौन्दर्यादिभिराकृष्यमाणं बलात्कारेणानीयमानम्। अपरमपि गुणैः रज्जुभिराकृष्यमाणमन्यत्र नीयत इति ध्वनितम्। कीदृशं चेतः ? उत्कण्ठार्तिभरादिव स्फुटम्। उत्कण्ठा औत्सुक्यमार्तिः पीडा तयोर्योऽतिशयस्तस्मादिव बहिर्भवत्। अपरमपि वस्त्वन्तरसङ्कुले स्थाने स्थितं वस्तु शङ्कया बहिर्भवतीति ध्वनिः। तथा च अतः परं विरहदुःखं सोढुमशक्यतया मया तद्गुणानेव स्मरन्त्या प्राणा एव त्याज्यास्ततोऽन्ते या मतिः सा गतिरिति स्वयमेव चेतस्तत्र यास्यतीति किमतः परं तवात्र[२] गता[३] गतायासेनेति भावः। अत्र शठधृष्टौ नायकौ सूचितौ।

अनुकूलस्यैकजातिः शठो गूढापराधकृत्।
धृष्टो व्यक्तान्ययुवतिभोगलक्ष्मा विनिर्भयः[(अ)]। ।इति। ।४४। ।

। । षोडशः प्रबन्धः / गीतम् १ ६ । ।
। । देशाख्यरागेण रूपकतालेन गीयते। ।

**अनिलतरलकुवलयनयनेन**
**तपति न सा किसलयशयनेन**
**सखि ! या रमिता वनमालिना। । ध्रुवम्। ।१ । ।**

सम्प्रति कृष्णेन सह रममाणायाः सौभाग्यसुखं तद्विरहिण्याश्च सन्तापमष्टापद्या कथयति, अनिलेति। गीतस्यास्य देशाख्यरागो, रूपकतालः। गीतार्थस्तु, हे सखि ! या वनमालिना कृष्णेन रमिता क्रीडिता सा किसलयशयने नवपल्लवशय्यायां न तपति नोपतप्ता भवति। कृष्णाङ्गसङ्गे तत्सुखप्रदमेव भवतीति भावः। कीदृशेन

१. छ. इति - इति पाठः।
२. छ. तव तत्र - इति पाठः।
३. छ. गता - इति नास्ति।
(अ) र. सु. प्रथमो विलासः - ८।

वनमालिना ? अनिलेन वायुना तरले अनिलवद् वा तरले चञ्चले ये कुवलये तद्वन्नयने यस्य तेन नायिकासन्निधौ साध्वसवसाच्चञ्चलनेत्रेणेत्यर्थ: । केचिदेवं योजयन्ति अरमितेति प्रश्लेष: । न पतति अपितु पतत्येव । नञ्द्वयेन प्रकृतस्यैवार्थप्राप्ते: । यद्वा किसलयशयनेन तृतीयैव नञ्शिरश्चालने । अनलो वसुवातयो: इति **विश्व :**(अ) ।।१ ।।

**विकसितसरसिजललितमुखेन।**

**स्फुटति न सा मनसिजविशिखेन।। सखि या० ।।२ ।।**

अथ च । या वनमालिना रमिता सा मनसिजविशिखेन कामबाणेन न स्फुटति न द्विधा भवति । कीदृशेन वनमालिना ? विकसितं पुष्पितं यत्सरसिजं पद्मं तद्वल्ललितं मनोहरं मुखं यस्य तेन । मुखस्य हास्यत्वेन विकसितपद्मसाम्यं ज्ञेयम् । पूर्ववद् द्वितीयोऽर्थो ग्रहणीय: ।।२ ।।

**अमृतमधुरमृदुतरवचनेन।**

**ज्वलति न सा मलयजपवनेन।। सखि या० ।।३ ।।**

अथ या वनमालिना रमिता सा मलयगिरिजातेन वातेन न ज्वलति न तप्यते। कीदृशेन ? अमृतादपि मधुरं मृदुतरमतिशयेन कोमलवचनं यस्य तेन । अमृतेत्याद्युचितविशेषणोपपत्या चामृतसेकेन ज्वालाभावस्यौचितत्वात्। पूर्ववद् द्वितीय: ।।३ ।।

**स्थलजलरुहरुचिकरचरणेन।**

**लुठति न सा हिमकरकिरणेन।। सखि या० ।।४ ।।**

अथ च या वनमालिना रमिता सा हिमकरस्य किरणेन न लुठति न पृथिव्यामितस्तत: परिवर्त्तिनी भवति। स्थलोद्भवं जलरुहं कमलं तद्वद्रुचिर्ययोस्तौ करौ चरणौ च यस्य तेन पूर्ववद् द्वितीयोऽर्थ: ऊहनीय: ।।४ ।।

---

(अ) वि.प्र.लान्तवर्ग: - ५६

**सजलजलदसमुदयरुचिरेण।**
**दलति न सा हृदि विरहभरेण।। सखि या० ।।५।।**

किञ्च या वनमालिना रमिता सा विरहभरेण विरहाधिक्येन हृदि[१] हृदये न दलति न दीर्य्यते। कीदृशेन वनमालिना ? सजलो जलसहितो यो जलदो[२] मेघस्तद्वत्समुदय-रुचिरेण मनोहरेण पूर्ववद् द्वितीयोऽर्थः।।५।।

**कनकनिकषरुचिशुचिवसनेन।**
**श्वसिसि न सा परिजनहसनेन।। सखि या० ।।६।।**

या वनमालिना रमिता सा परिजनानां हसनेन इयती लज्जा रोदितीत्यादि-परिजनहास्येन न श्वसिति। न सन्तापनिःश्वासं त्यजति। परितः सर्वतोजनानां हास्येनेति वा। कीदृशेन वनमालिना ? कनकनिकषः सुवर्णकषणपट्टिका तस्येव रुचिदीप्तिर्यस्य तत्। शुच्यनुपहतं वसनं वस्त्रं यस्य तेन। अत्र कनकपदेनैव पीतत्वेऽपि स्निग्धत्वे प्राप्ते[३] निकषपदोपादानम्। पूर्ववद् द्वितीयोऽर्थोवेदितव्यः। निकषः कषपट्टिका इति हारावली[(अ)]। शुचिः शुद्धेऽनुपहते इति विश्वः[(आ)]।।६।।

**सकलभुवनजनवरतरुणेन।**
**वहति न सा रुजमतिकरुणेन।। सखि या० ।।७।।**

या वनमालिना रमिता सातिकरुणेनातिशयितकरुणारसेनोपलक्षिता सती रुजं तद्विश्लेषजन्यां व्याध्यवस्थां न वहति न धारयति। कीदृशेन वनमालिना ? सकलभवने समस्ते लोके ये जनास्तेभ्योऽपि वरतरुणेन श्रेष्ठतरुणेन कृष्णेनैव। विशेषणं वा अतिक्रान्ता करुणा दया यस्य तादृशेन निर्दयेनेत्यर्थः। अति अत्यधिकं करुणा कृपा यस्य तेन दयालुनेति वा। रुजं न वहति, अपितु वहत्येवेत्यर्थः पूर्ववत्। करुणास्तु रसे वृक्षे कृपाया करुणा मता इति **विश्वः**[(इ)]।।७।।

---

१. छ. हृदि - इति नास्ति।
२. छ. यो जलदो - इति नास्ति।
३. छ. प्राप्तये - इति पाठः।
(अ) कोशे नास्ति।
(आ) वि.प्र.चान्तवर्गः - ६ (इ) वि.प्र. णान्तवर्गः - ३०

**श्रीजयदेवभणितमिलनेन।**
**प्रविशतु हरिरपि हृदयमनेन।। सखि या० ।।८।।**

श्रीजयदेवेत्यादि। अनेन श्रीजयदेवभणितमिलनेन श्रीजयदेवकविना भणितं वर्णितं यन्मिलनं कृष्णस्यान्यकामिन्या सहेत्यर्थः। तेन हरिः हृदयं अर्थात् श्रोतृणां गातृणां च प्रविशतु। यद्वा श्रीजयदेवभणितस्य यन्मिलनं संबन्धोऽध्ययनगानरूपस्तेन हरिरपि हृदयं प्रविशत्वित्यर्थः।।८।।

**मनोभवानन्दन चन्दनानिल! प्रसीद रे दक्षिण! मुञ्च वामताम्।**
**क्षणं जगत्प्राण! विधाय माधवं पुरो मम प्राणहरो भविष्यसि।४५।**

सम्प्रत्यनिलमेव संतापदं मत्त्वोपालभते, मनोभवेत्यादि। हे चन्दनानिल! चन्दनसम्बन्धिवायो! मे मम प्रसीद प्रसादं कुरु। हे दक्षिण! सर्वेषां विलासिनामनुकूल-स्वभाव! मे वामतां प्रतिकूलतां मुञ्च। अत्र चन्दनसंसर्गिणस्ते तत्संसर्गरतस्ववामत्वं च[१] नोचितमिति चन्दनानिलदक्षिणपादाभ्यां ध्वनितम्। वामत्वेन[२] हेतुगर्भविशेषणमाह-मनोभवेति मनोभवं काममानन्दयतीति मनोभवानन्दनः। तथा च मम वैरी कामस्तं यदानन्दयसि[३] तदेव मत्प्रातिकूल्यमाचरसीति भावः। यदि च वामतां न मुञ्चसि तदा माधवं कृष्णं क्षणं मम पुरोऽग्रे निधाय कृत्वा पश्चात्तद्दर्शनकृतार्थाया मम मे प्राणहरः प्राणानां हर्त्ता भविष्यसि। यथा विरहिणीं मां व्यथयसि तथा मया विरहितं तमपि सन्तापय। यथा मदन्तिकं स आयास्यतीति[४] भावः। कथम्भूतः? जगत्प्राणः जगतां प्राणभूतः (तस्य सम्बोधने जगत्प्राण इति)। अनेन कृष्णस्य नयने तत्प्राणहरणे च वायोः सामर्थ्यं ध्वनितम्। हे चन्दनानिल! क्षणं वामतां मुञ्च । माधवं पुरो निधाय पश्चान्मम प्राणहरो भविष्यसीत्यन्वयः। शेषं समानम् इति केचित्। वामे सव्ये प्रतीपे च द्रविणे चातिसुन्दरे। दक्षिणः सरलावामपरच्छन्दानुवर्त्तिषु इति **विश्वः**[(अ)]।।४५।।

---

१. ख., च., छ., - इति नास्ति।
२. ख. वामत्वे - इति पाठः।
३. छ. इति - इत्यधिक पाठः।
४. ख., छ. आयातीति - इति पाठः।
(अ) वि.प्र.-णान्तवर्ग - ४३।

**रिपुरिव सखी संवासोऽयं शिखीव हिमानिलो**
**विषमिव सुधारश्मिर्यस्मिन्दुनोति मनोगते।**
**हृदयमदये तस्मिन्नेवं पुनर्वलते बला-**
**त्कुवलयदृशां वाम! कामो निकामनिरङ्कुशः।।४६।।**

अधुना ममैवापराधो नान्यस्येत्याह, रिपुरिवेत्यादि । यस्मिन्कृष्णे मनोगते चेतसि कृते सति अयं सखी संवासः सखीभिः सहावस्थानं रिपुरिव दुनोत्युपतापयति। सखीभिर्दृष्ट्वा तत्कृतालङ्काररचनापरिहासवासभवन-परिष्कारादिस्मरणेनाधिकतर उपतापो भवतीति भावः। अयं च हिमानिलो हिमाभिव्याप्यनिलो[१] वायुः शिखीवाग्निरिव दुनोति। अयं सुधारश्मिश्चन्द्रो विषमिव दुनोति। तस्मिन्नेव कृष्णेऽदये दयारहिते हृदयं पुनर्भूयोऽपि बलाद्धठाद्वलते। निवार्यमाणमपि तत्रैव गच्छतीत्यर्थः। अतः कुवलयदृशां कमलनयनानां कामो निकाममत्यर्थं निरङ्कुशस्त्यक्तमर्यादः। अत एव वामः प्रतिकूलः अन्योन्यानुरागो हि कामो मनोहरो भवति। अत्र तु मद्विषयको रागः केवलं ममैव चेतस्तत्र धावतीति वामता कामस्येति भावः। अत्र सखक्षनां रिपुवत् हिमानिलस्य वह्निवत् सुधारश्मेर्विषवत् उपतापकत्वं विरुद्धमिति विरोधनामायमलङ्कारः[(अ)]। शिखिनी वह्निवर्हिणौ **इत्यमरः**[(आ)]।।४६।।

**बाधां विधेहि मलयानिल! पञ्चबाण!**
**प्राणान्गृहाण न गृहं पुनराश्रयिष्ये ।**
**किं ते कृतान्तभगिनि! क्षमया तरङ्गै-**
**रङ्गानि सिञ्च मम शाम्यतु देहदाहः।।४७।।**

**इति श्रीगीतगोविन्दे विप्रलब्धावर्णने नागरनारायणो नाम सप्तमः सर्गः।।७।।**

सम्प्रति विरहदुःखमसहमाना मलयानिलादीन् प्रार्थयति, बाधामित्यादि। हे मलयानिल! मलयशैलसम्बन्धिवायो! बाधां (पीडां) विधेहि कुरु। अत्र मलयश्चन्दना-श्रयत्वेन महाश्रयोऽतस्तदाश्रितस्य ते याचकप्रत्याख्यानं नोचितमिति ध्वनिः। हे पञ्चबाण! मम प्राणान्गृहाण। पञ्चभिर्बाणैः पञ्चानामपि प्राणानां ग्रहणं कामस्योचितमिति सूचनाय पञ्चपदोपादानम्। ननु कृष्णेन चेदुपेक्षिता तदा गृहं[२] किमिति न गच्छसीत्यत आह, न गृहमिति। गृहं पुनः येन भूयो गृहं[३] नाश्रयिष्ये।

१. क. हिमाभिव्याप्यनिलो - इति नास्ति। छ.० हिमगर्भोऽप्यनिलो - इति पाठः।
२. छ. मेव - इत्यधिकः पाठः। ३. छ. गृहं - इति नास्ति ।
(अ) काव्यादर्शः - २-३३३ (आ) अ.को - २.३.१०६.

तेन विना गृहमपि मे सन्तापजनकमेवेति भावः ।हे कृतान्तभगिनि! यमभगिनि[१]! (यमुने!) ते क्षमया सहिष्णुतया किम्? किं प्रयोजनमित्यर्थः। तरङ्गैरुर्मिभिर्मेऽङ्गानि सिञ्च आप्लावय। देहदाहो विरहानलजन्यो देहदाहः शाम्यतु निवर्तताम्। कृतान्तो निर्दयस्तद्भगिन्यास्तेऽपि न दया युक्तेति ख्यापनाय कृतान्तेत्युपात्तम्। कामबाणश्चसंमोहनः क्षोभणश्च दहनः शोषणस्तथा। उच्चाटनश्च कामस्य बाणाः पञ्च प्रकीर्तिताः इति। भगिनी स्वसेत्य**मरः**[(अ)]।।४७।।

गृहाणि पुत्राः सौख्यानि पुरुषार्थचतुष्टयम्।
यद्भक्त्या दुर्ल्लभा नो स्युरेते तं नौमि माधवम्।।

इति श्रीगीतगोविन्दटीकायां पदभावार्थचन्द्रिकानामधेयायां[२] सप्तमः सर्गः समाप्तः[३]।

---

१. क., ख. यमभगिनि - इति नास्ति।
२. क. पदभावार्थचन्द्रिकानामधेयायां - इति नास्ति।
३. छ. समाप्तः - इति नास्ति।
(अ) अ.को.-२.६.२९

❋ मुद्रित पुस्तकेषु निम्नोक्त निम्नोक्तः श्लोकः उल्लिखितोऽस्ति -

सान्द्रानन्दपुरन्दरादिदिविषद्वृन्दैरमन्दादरा-
दानम्रैर्मुकुटेन्द्रनीलमणिभिः सन्दर्शितेन्दिवरम्।
स्वच्छन्दं मकरन्दसुन्दरगलन्मन्दाकिनीमेदुरं
श्रीगोविन्दपदारविन्दमशुभस्कन्दाय वन्दामहे।।१०।।

❖❖❖

# ।। अष्टमः सर्गः ।।

।। विलक्ष्यलक्ष्मीपतिः ।।

**अथ कथमपि यामिनीं विनीय स्मरशरजर्जरितापि सा प्रभाते**
**अनुनयवचनं वदन्तमग्रे प्रणतमपि प्रियमाह साभ्यसूयम् ।।४८ ।।**

अथेत्यादिः । अथानन्तरं सा राधा प्रभाते प्रातः प्रियं[1] कृष्णं साभ्यसूयमसूयासहितं यथा स्यादेवमाह[2] उक्तवती । किं कृत्वा ? यामिनीं रात्रिं कथं कथमपि कष्टं सोढ्वा विनीय नीत्वा । अत्र यामिनीपदेन प्रियाविरहेऽतिदीर्घत्वं ध्वनितम् । उदरवती कन्येतिवत् । कथम्भूता ? स्मरशरजर्जरितापि कामबाणपीडितापि अन्यनायिकानखाङ्कादिदर्शनजनित-महादुःखा विस्मृतविरहदुःखा उवाचेत्यर्थः । कथम्भूतं प्रियं ? अनुनयाय स्वापराध-जनितकोपशान्तये वचनं[3] यज्जातं तज्जातं भूयो नेदृशमाचरामि, इत्यादि विनयवाक्यं वदन्तम् । पुनः कथम्भूतं ? प्रणतं नम्रमपि । "रजनी यामिनी" **इत्यमरः**[(अ)] ।।४८ ।।

।। सप्तदशः प्रबन्धः / गीतम् १७ ।।

।।भैरवीराग यतितालाभ्यां गीयते ।।

**१-रजनिजनितगुरुजागररागकषायितमलसनिमेषम्❋**
**वहति नयनमनुरागमिव स्फुटमुदितरसाभिनिवेशम् ।।**
**हरिहरि ! याहि माधव ! याहि केशव ! मा वद कैतववादम्**
**तामनुसर सरसीरुहलोचन ! या तव हरति विषादम् ।। ध्रुवम् ।।१ ।।**

तदेव गीतेन कथयति, रजनीत्यादि । गीतस्यास्य भैरवी रागो, यतितालः । गीतार्थस्तु, हरिहरीति खेदे । हे माधव ! हे केशव ! याहि याहि इतोऽपसर । लक्ष्मीः चञ्चलातस्तद्भर्त्तुस्तेऽपि तादृशीष्वेवानुरागो युज्यते । स्थिरानुरागाणां मादृशां ते किं प्रयोजनमिति माधवपदेन ध्वनितम् । कैतववादं छलवाक्यं मा वद मा कथय ।

१ . छ. प्रियं - इति नास्ति ।
२ . छ. आह - इति नास्ति ।
३ . छ. विनयं - इति पाठः ।
❋ निवेशम् - इति कतिपयमुद्रितपुस्तकेषु पाठः ।
(अ) अ.को. - १.४.४.

कैतवन्तु छले द्यूते इति **विश्वः**(अ)। ननु त्वदनुसरणायैवेतस्ततो मे भ्रमतो विलम्बो जात इत्यत आह, तामिति। हे सरसीरुहलोचन! कमलनयन! तां नायिकामनुसरानुगच्छ या तव विषादं दुःखं हरति। अहं तु स्वयमेव सन्तप्ता। ते विषादं कथमपनेष्यामीति भावः। अत्र पद्मं प्रभाते यथा अद्धाद्बुद्धमर्द्धमुकुलितं तद्वत्ते नयनं रात्रिजागरणग्लानान्मुकुलीभवद्बलात्त्वया प्रसार्यमाणमस्तीत्युन्निद्रवशाद्यत्किञ्चित्प्रलपसीति[१] सरसीरुहलोचनेत्येनेन ध्वनितम्। अथवा सरसीरुहं यथा रात्रौ मुकुलितं तिष्ठति प्रभाते प्रसरति तथा त्वदीयनयनं रात्रौ मद्विषये निमीलितमासीदिदानीं त्वया प्रसारितमिति तेन पदेन ध्वनितम्। ननु मम त्वत्तोऽन्या प्रेयसी नेत्यन आह, रजनीत्यादि। हे कृष्ण! तव नयनं नेत्रं तदनुरागमिव वहति धारयति। कीदृशं नयनम्? रजनिजनितो रात्रिजातो गुरुर्महान् यो जागरस्तत्कृतो[२] रागो रक्तता तदेव रञ्जनद्रव्यं तेन कषायितमीषल्लोहितम् तदेवालसनिमेषम्। अलसो मन्थरो निमेषः पक्ष्मविन्यासो यस्य तम्। अन्योऽपि यः किञ्चिद्वस्तु वहति सोऽप्यलसो भवतीति ध्वनिः। अत एव स्फुटं यथा स्यादेवमुदितः कथितो रसस्यान्यकामिनीविषयकशृङ्गाररसस्याभिनिवेशो येन तादृशं। यस्याः कस्यायितस्य गोपिकायाः केलिव्यासङ्गेन वृथाजागरणं कारित इति रागेण क्रोधेन कषायितस्य नयनस्य राधाया अग्रेऽन्यनायिकागुप्तरसाभिनिवेशनं[३] प्रकाशनमुचितमेवेति ध्वनितम्। गुरुर्महति वाच्यवत् इति **विश्वः**(आ)। रागोऽनुरक्तौ मात्सर्ये क्लेशादौ लोहितादिषु। गान्धारादौ नृपे रागः इति **विश्वः**(इ)।

कषायो रसभेदे स्यादङ्गरागे विलेपने।
निर्यासेऽपि कषायोऽथसुरभौ लोहितेऽन्यवत्।

इति(ई) च।

---

१. छ. मुकुलयसि - इति पाठः।
२. ख. जनितो यो - इत्यधिकः पाठः।
३. ख. छ निवेश - इति पाठः।
(अ) वि. प्र. वान्तवर्गः - ३४
(आ) वि. प्र रान्तवर्गः - ७४
(इ) वि. प्र गान्तवर्गः - ९
(ई) वि. प्र. यान्तवर्गः - ७३

निवेश: शिबिरद्वाहविन्यासेषु प्रकीर्त्तित: इत्यपि(अ)।

हरिहरीत्यव्ययम्।।१।।

**२-कज्जलमलिनविलोचनचुम्बनविरचितनीलिमरूपम्।**

**दशनवसनमरुणं तव कृष्ण! तनोति तनोरनुरूपम्।। हरिहरि०।।२।।**

ननु त्वदन्वेषणार्थपर्यटनजनितरजनिरात्रि[१] जागरान्नेत्रयोर्लौहित्यमित्यलं दु:शङ्कयेत्यन आह, कज्जलेति। हे कृष्ण! अरुणमपि तव दशनवसनमधरस्तव तनो: शरीरस्यानुरूपं योग्यं रूपं कान्तिं तनोमि विस्तारयति। तनुरपि ते श्यामाधरोऽप्यधुना श्याम इति भाव:। कीदृशे, कज्जलेनाञ्जनीभूतेन मलिने ये विलोचने नेत्रे तयोश्चुम्बनेन विरचितो नीलिमा नीलत्वं यत्र तादृशं। तथा च चुम्बनसमये लग्नं तन्नेत्राञ्जनेन तेन श्यामीभूतस्ततधर एव स्फुटत्वेन धूर्ततां प्रकटयति इति भाव:। नेत्रयोरपि चुम्बनमुक्तं **कामशास्त्रे**, "गण्डे नेत्रे ललाटे च चुम्बनं परिकीर्तितम् इति।" ओष्ठाधरौ तु रदनच्छदौ दशमवाससी **इत्यमर:**(आ)।।२।।

**३-वपुरनुहरति तव स्मरसङ्गरखरनखरक्षतरेखम्।**

**मरकतशकलकलितकलधौतलिपेरिव रतिजयलेखम्।।हरिहरि०।।३।।**

वपुरित्यादि। हे कृष्ण! स्मरस्य कामस्य सङ्गरे सङ्ग्रामे[२] खराणां तीक्ष्णानां नखराणां नखानां क्षतं रेखा यत्र एतादृशं। तव वपुर्मरकतशकले नीलमणिखण्डे कलिता निर्मिता या कलधौतलिपि: सुवर्ण इवाक्षर[३] विन्यासस्तस्या इव रतिजयलेखं सुरतविजयप्रशस्तिं [४]लेखनपत्रमनुहरति सदृशीकरोति। अत्र कृष्णवपुषो नीलत्वान्मरकतशकलसाम्यम्। सुवर्णस्य कविसम्प्रदाये आरक्तत्वेनैव वर्णनीयत्वान्नखक्षतस्य सुवर्णलिपिसाम्यं। सङ्गरोऽङ्गीकृतौ युधि इति **विश्व:**(इ)। पुनर्भव: कररुहो नखोऽस्त्री नखरोऽस्त्रियाम् **इत्यमर:**(ई)।

---

१. क., ख. रात्रि - इति नास्ति।
२. छ. सङ्ग्रामे - इति नास्ति।
३. छ. द्रवाक्षर - इति पाठ:।
४. छ. लिखन - इति पाठ:।
(अ) वि. प्र शान्तवर्ग: - २४
(आ) अ. को. - २.६.९०
(इ) वि. प्र. रान्तवर्ग: - १५४
(ई) अ. को. - २.६.८३

गारुत्मनं मरकतमश्मगर्भो हरिन्मणि: इति(अ) च। भित्तं शकलखण्डे वा पुंसीति(आ) च। कलधौतं रूपहेम्नो: कलधौतं कलध्वनौ इति **विश्व:**(इ)। वर्णदूत: स्वस्तिमुखो लेखो वाचिकहारक: इति **हारावली**(ई)।।३।।

**४-चरणकमलगलदलक्तकसिक्तमिदं तव हृदयमुदारम्।**
**दर्शयतीव बहिर्मदनद्रुमनवकिसलयपरिवारम्।। हरिहरि०।।४।।**

ननु मार्गं विस्मृत्य कण्टकादिक्षतवर्त्मनागच्छतो मे वपुषि कण्टकक्षतं दृश्यते नतु नखाङ्कमित्यत आह, चरणेत्यादि। इदमुदारं[१] तव हृदयं मदनद्रुमस्य कामवृक्षस्य हृदयान्तर्गतस्य नवकिसलयपरिवारं नूतनपत्रसमूहं बहिर्दर्शयतीव प्रकटयतीव। कीदृशं हृदयम्? चरण[२]कमलादन्यकामिनीपदपद्मदलात्[३] विगलता स्खलताऽलक्तकेन सिक्तम्। अपरोऽपि वृक्ष: सिक्तमूल: समूल्लसन्पल्लवानुद्दर्शयतीति ध्वनि:। हृदि नायिकाचरणालक्तकसम्बन्धकथनेन क्रौञ्चाख्यो बन्ध: कथित:।
योषित्पादौ हृदि न्यस्य कराभ्यां धारयेत् कुचौ।
यथेष्टं ताडयेद्योनिं क्रौञ्चबन्ध: प्रकीर्तित:। इति **वात्स्यायन:**(उ)।
परिवार: परिकरे समूहे वेष्टनेऽपि च इति **विश्वप्रकाश:**(ऊ)।।४।।

**५-दशनपदं भवदधरगतं मम जनयति चेतसि खेदम्।**
**कथयति कथमधुनापि मया सह तव वपुरेतदभेदम्।। हरिहरि०।।५।।**

किञ्च। भवदधरगतं दशनपदं तवाधरस्थितं कस्याश्चिद्दन्तक्षतं मम चेतसि खेदं दु:खं जनयति। एतत्तव वपुरधुनापि मया सह कथमभेदं कथयति अन्यशरीरक्षतस्यान्यत्र

---

१. छ. मनोहरं - इत्यधिक: पाठ:।
२. ख. दलात् - इत्यधिक: पाठ:।
३. छ. प्रसिद्धाभेदभेदकरणानिषेधे - इति पाठ:।
(अ) अ. को. - २.९.९२
(आ) अ. को. - १.३.१६
(इ) वि. प्र. तान्तवर्ग: - १९०
(ई) हारवली: श्लो. - ५४, पृ० - ७
(उ) कामशास्त्रे नोपलभ्यते।
(ऊ) परिवार: परिजने खङ्गकोषे परिच्छदे-रान्तवर्ग: - २५८

व्यथाजनकत्वासम्भवाद्वपुषोरभेदो ज्ञायत इति भावः। अधुनात्यन्तहृदयभेदे वपुरभेदे नोचित इति काक्वा व्यज्यते। प्रसिद्धभेदकारणानिषेधे[१] भेदकारणस्य विभाव्यमानत्वाद्विभावनालङ्कारः[२]।

प्रसिद्धहेतुव्यावृत्या यत्किञ्चित्कारणान्तरम्।
यत्र स्वाभाविकत्वं वा विभाव्यं सा विभावनेति **कविदण्डी**[(अ)] ।।५।।

**६-वपुरिव* मलिनतरं तव कृष्ण मनोऽपि भविष्यति नूनम्।**
**कथमथ वञ्चयसे जनमनुगतमसमशरज्वरदूनम्।। हरिहरि० ।।६।।**

ननु तवोपायनार्थं कमलं त्रोटयति मयि पुष्पकोशादापतता भ्रमरेण ममाधरोष्ठो दष्टो न तु दशनक्षतमिदमित्यत आह, वपुरित्यादि। हे कृष्ण! नूतमुत्प्रक्षायाम्। तव मनोऽपि चित्तमपि वपुरिव शरीरमिव मलिनतरमतिशयेन मलिनं भविष्यति। यथा तव वपुः श्यामं तद्वत्तव मनोऽपि श्यामं भविष्यतीत्यर्थः। बहिरित्यपि पाठः सुबोध एव। ननु[३] मनोमालिन्यं त्वया कथं ज्ञातमित्याह, कथमिति[४]। अथेति संप्रश्ने। त्वमेव पृच्छ्यसे यदि तवान्तर्मलिनं न[५] तदाऽसमशरदूनम् असमशरो विषमशरः कामस्तज्जनितेन ज्वरेण दूनं दुःखितमत एवानुगतं त्वामनुसृतं मादृशं जनं कथं[६] वञ्चयसे प्रतारयसि। तथा च शरणागतजने वञ्चनमन्तर्मालिन्यमन्तरेण न सम्भवतीति भावः। तथा च व्याजेन दशनक्षतादिगोपनेऽपि प्रपन्नजनवञ्चनं कथं त्वया गोपनीयमिति भावः। अथोऽथ च सम्प्रश्ने मङ्गलारम्भयोरपीति **विश्वः**[(आ)]। नूनमिति शब्दोपादानादुत्प्रेक्षानामायमलङ्कारः।

मन्ये शङ्के ध्रुवं प्रायो नूनमित्येवमादिभिः।
उत्प्रेक्षा व्यज्यते शब्दैरिवशब्दोऽपि तादृशः।। इति।।६।।

**दण्डिना** कविनोक्तम्[(इ)]।

---

१. छ. प्रसिद्धाभेदकरणानिषेधे - इति पाठः। *वहिरिव
२. छ. विभज्य - इति पाठः।
३. ख. मम - इत्यधिकः पाठः।
४. छ. न - इति नास्ति।
५. छ. न - इति नास्ति।
६. ख. कथं - इति नास्ति।
बहिरिव - इति कतिपयमुद्रितपुस्तकेषु पाठः।
(अ) काव्यादर्शः - २-१९९
(आ) वि. प्र. द्वितीयपरिच्छेदः - २६
(इ) काव्यादर्शः - २-२३४

**७-भ्रमति भवानबलाकवलाय वनेषु किमत्र विचित्रम्।**
**प्रथयति पूतनिकैव वधूवधनिर्दयबालचरित्रम्।। हरिहरि० ।।७।।**

चित्तमालिन्यमेवाह[१] भ्रमतीत्यादि। भवान्वनेषु [२]विपिनेष्ववबलाकवलाय कामिनीकवलाय कामिनीग्रसनाय[३] भ्रमति। अत्रार्थे किं चित्रम्? न किमपीत्यर्थ:। अत्र हेतुं प्रथयतीति। पूतनिकैव वराकी पूतनैव वधूवधे स्त्रीवधे[४] तव निर्दयं दयारहितं बालचरित्रं बालचेष्टां प्रथयति ख्यापयति[५]। तथा च बाल्ये येन स्तनदानप्रवृत्ता पूतना निहता तस्य सम्प्रति कोमलाङ्गीनां मादृशां[६] मारणे किं वक्तव्यमिति भाव:। खण्डिता चेयं नायिका -
निद्राकषायकलुषीकृतताम्रनेत्रौ नारीनखव्रणविशेषविचित्रिताङ्ग:।
यस्या कुतोऽपि गृहमेति पति: प्रभाते
सा खण्डितेति कथिता कविभि: पुराणै: इति।।७।।

**८-श्रीजयदेवभणितरतिवञ्चितखण्डितयुवतिविलापम्।**
**श्रृणुत सुधामधुरं विबुधा विबुधालयतोऽपि दुरापम्।। हरिहरि० ।।८।।**

श्रीजयदेवेत्यादि। हे विबुधा:! पण्डिता:! इमं श्रीजयदेवेन कविना वर्णितं रतौ वञ्चिताया: प्रतारिताया: खण्डिताया: प्रातरागतान्यनायिकानखाङ्कादिचिह्निताप्रियाया विलापं परिदेवनं[७] शृणुताकर्णयत। कथम्भूतम्? सुधातोऽपि मधुरम्। तत्र हेतु: विबुधालयतोऽपि देवालयेऽपि दुरापं दुष्प्रापमित्यर्थ:। सुधा तु स्वर्गे सुलभा कृष्णकथामृतपानसुखं तु तत्रापि दुर्ल्लभमिति सुधापेक्षयाकमाधुर्यमिति भाव:। विबुध: पण्डिते देवे इति **विश्व:**[(अ)]। सुरालयतोऽपीत्यत्राद्यादित्वात्सप्तम्यन्तात्तम्।।८।।

१. छ. चित्तमालिन्यमेवाह - इति नास्ति।
२. छ. विपिनेषु - इति नास्ति।
३. क., ख. कामिजन - इति पाठ:।
४. छ. स्त्रीवधे - इति नास्ति।
५. छ. ख्यापति - इति पाठ:।
६. छ. मादृशां - इति नास्ति।
७. छ. परिवेदनं - इति पाठ:।
(अ) वि. प्र. धान्तवर्ग: - २१

**४९-तवेदं पश्यन्त्याः प्रसरदनुरागं बहिरिव**
**प्रियापादालक्तच्छुरितमरुणच्छायहृदयन्।**
**ममाद्य प्रख्यातप्रणयभरभङ्गेन कितव**
**त्वदालोकः शोकादपि किमपि लज्जां जनयति।।४९।।**

**इति श्रीगीतगोविन्दे खण्डितावर्णने विलक्ष्यलक्ष्मीपतिर्नाम अष्टमः सर्गः।।८।।**

❋तवेदं पश्यन्त्याः इत्यादि[१]। हे केशव! धूर्त! त्वदालोकस्तव दर्शनम्। प्रख्यातः प्रसिद्धो यः प्रणयभरोऽनुरागातिशयस्तस्य भङ्गेन नाशेन हेतुना शोकादिदुःखादपि[२] किमप्यनिर्वचनीयां लज्जां जनयति। कीदृश्या मे? तदेवं प्रत्यक्षं हृदयं पश्यन्त्याः। कीदृशम्? प्रियापादालक्तकैः प्रियायाश्चरणसम्बन्धियावकैः छुरितं[३] व्याप्तम्। अत एवारुणच्छायमरुणा छाया दीप्तिर्यस्य तादृशम्। कमिव? बहिः प्रसरदनुरागमिव हृदयं परिपूर्य्याधिक्यभावाद्बहिर्निःसृतम्[४]। प्रेम्णैव[५] या राधा पूर्वं सौभाग्यगर्विता कामपि न गणयति[६] स्म सा इदानीं समक्षमन्यनायिकाचरणालक्तकं कृष्णहृदये पश्यन्ती जीवत्येवेति विपक्षयुवतीपरिहासशङ्कया शोकादपि मेऽधिकलज्जा भवतीति भावः। छाया स्यादातपाभावे प्रतिबिम्बार्कयोषितोः।
पालनोत्कोचयोः कान्तिसच्छोभापङ्क्तिषु स्मृतेति **विश्वः**[(अ)]।
कामिनीविषमभ्रूणां जालविज्ञानवत् द्विज।
गोविन्दकरुणासिन्धो! (ममानन्दप्रदो भव)[(आ)]।।२।।❋

इति श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां पदभावार्थचन्द्रिकानामधेयायां विलक्षलक्ष्मीपतिर्नामाष्टमसर्गः[७]।

---

❋तवेदं पश्यन्त्याः इति श्लोकस्य व्याख्या "क" मातृकायां नास्ति।

१. छ. तदेवमिति - इति पाठः। २. छ. हेतुदपि दुःखादपि - इति पाठः। ३. छ. छुरितं - इति नास्ति। ४. छ. भावाद् - इति नास्ति। ५. छ. प्रेमेव - इति पाठः। ६. सौभाग्यगर्वेण न काचन गणयति - इति पाठः। ७. छ. इति - इत्यधिकः पाठः। (अ) वि. प्र. यान्तवर्गः - ५९-६० (आ) अस्य पद्यस्य पूर्वार्धौ मातृकायां गलितत्वान्मयैव कतिपयाक्षरानुसारं पूरितः।

मुद्रितपुस्तकेषु निम्निलिखितः श्लोकोऽधिकः प्राप्यते -
प्रातर्नीलनिचोलमच्युतमुरः संवीतपीतांशुकं
राधायाश्चकितं विलोक्य हसति स्वैरं सखीमण्डले।
व्रीडाचलञ्चमञ्चलं नयनयोराधाय राधानने
स्मेरस्मेरमुखोऽयमस्तु जगदानन्दाय नन्दात्मजः।।३।।

❖❖❖

# ।। नवमः सर्गः ।।

।। मुग्धमुकुन्दः ।।

**❋तामथ मन्मथखिन्नां रतिरसभिन्नां विषादसंपन्नाम्**

**अनुचिन्तितहरिचरितां कलहान्तरितामुवाच रहसि सखी ।।५० ।।**

पूर्वसर्गे खण्डिताया राधायाश्चरितमुक्तम्। सम्प्रति कृतपश्चात्तापां[१] राधामुवाच सखीत्याह, तामथेति[२]। अथानन्तरं तां कलहान्तरितां परुषवचनानन्तरं कृतपश्चत्तापां राधां रहसि एकान्ते सखी उवाच कथितवती। कथम्भूतां[३] ? मन्मथेन कामेन खिन्नां दुःखिताम्। अत एव रतिरसेन शृङ्गाररसेन[४] भिन्नां संगताम्। अत एव विषादसम्पन्नामुद्वेगसहिताम्। अत एवानुचिन्तितं स्मृतं हरेश्चरितं पुरा रहो विलसितं यया ताम्। भिन्नमन्यार्थवचने सङ्गते दारिते स्फुटे इति **विश्वः**[(अ)]।

कलाहान्तरितायास्तु लक्षणं भरतेनोक्तम्-

प्राणेश्वरं प्रणयकोपभरेण भीतं
या चाटुकारमवधीरयतीति पश्चात्।
सन्तप्यते मदनवह्निशिखासहस्रै-
र्बाष्पाकुला च कलहान्तरिता तु सा स्यादिति।।५०।।

।। अष्टादशः प्रबन्धः/ गीतम् १८ ।।

।। गुर्ज्जरीरागयतितालाभ्यां गीयते ।।

**१-हरिरभिसरति वहति मधुपवने।**
**किमपरमधिकसुखं सखि भुवने।।**
**माधवे मा कुरु मानिनि मानमये।। ध्रुवपदम् ।।१ ।।**

तदेव[५] गीतेन कथयति, हरिरभिसरतीत्यादि। गीतस्यास्य गुर्जरीरागो यतितालश्च। गीतार्थस्तु, अये इति मम्भ्रेमे। हे मानिनि! मानवति! माधवे लक्ष्मीपतौ मानं मा कुरु। लक्ष्मीपतिरपि त्वां प्रसादयत्यहो भाग्यमित्यवश्यं त्वया मानस्त्याज्य इति सूचनाय

१. छ. तापो तां - इति पाठः। २. छ. अथ तामिति - इति पाठः।३.छ. कीदृशी - इति पाठः।
४. क., ख. शृङ्गाररसेन - इति नास्ति। ५. क., छ. हरिरभिसरति इति श्लोकस्य व्याख्या नोपलभ्यते।
❋ अथ तां - इति कतिपयमुद्रितपुस्केषु पाठः।
(अ) वाच्यवद्धिवृता क्षुद्ररोगो स्याद्धिवृतं स्फुटे -वि० प्र०तान्तवर्गः - १४५

माधवपदोपादानम्। मृदुपवने वसन्तवायौ वहति सति हरिः कृष्णोऽभिसरति त्वदीयसङ्केतभूमिमागच्छति। हे सखि! भुवने त्रैलोक्येऽपरं कृष्णाभिसरणादन्यात्किं सुखम्। अपि तु न किञ्चिदपीत्यर्थः।

मधु क्षौद्रे जले क्षीरे मद्ये पुष्परसे मधुः।
दैत्ये चैत्रे वसन्ते च जीवाशोके मधुद्रुमे इति **विश्वः**[(अ)]।।१।।

**२-तालफलादपि गुरुमतिसरसम्।**
**किं विफलीकुरुषे कुचकलशम्।। माध०।।२।।**

किञ्च कुचकलशं कलशवत्पीनं मांसलं स्तनं किं[१] किमिति विफलीकुरुषे। कृष्णकरस्पर्शादेव कुचकलशयोः साफल्यं तदभावे वैफल्यमिति[२] भावः। कीदृशं? तालफलादपि तालफलापेक्षयापि गुरु कठिनमतिसरसं च। रसः शृङ्गाराख्यस्तत्साहितम्। तालफलपक्षे रसो माधुर्यं तत्सहितम्। अतिविमर्दनेनैव रसप्रदत्वकथनाय तालफलादपीत्युक्तम्। तालफलं हि विमर्दनेनैव रसप्रदं भवति। अपरः कलशोऽपि पूर्णः सन्गुरुर्भवति। रसो जलं तत्सहितञ्च भवतीत्यपि ध्वनितम्।।२।।

**३-कति न कथितमिदमनुपदमचिरम्।**
**मा परिहर हरिमतिशयरुचिरम्।। माध०।।३।।**

ननु यदा हरिरायातस्तदा त्वया किमिति नोक्तमित्यत आह, कति नेति। इदमचिरं साम्प्रतमेवानुपदं स्थानं स्थानं प्रति मया कियन्न कथितं[३]। इदं किम्? हरिम् अतिशय[४] अतिशयेन मनोहरं मा परिहर मोपेक्षस्व।।३।।

**४-किमिति विषीदसि रोदिषि विकला।**
**विहसति युवतिसभा तव सकला।। माध०।।४।।**

किमितीति। त्वं किमर्थं विषीदसि विषण्णा भवसि। विषण्णत्वे हेतुः, विकला विह्वला सती रोदिषि रोदनं करोषि। अत एव सकला समग्रा[५] युवतिसभा हसतीति भावः।

---

१. क., ख. किं - इति नास्ति।
२. छ. तदभावे वैफल्य० - इति नास्ति।
३. क. कति न कथितं - इति पाठः।
छ. अपि तु वहु कथितं - इत्यधिकः पाठः।
४. क. अपरुचिरं - इति पाठः।
५. छ. समस्ता - इति पाठः।
(अ) वि. प्र. धान्तवर्गः - ११

यद्वा इयं मानापनोदाय प्रणतमपि प्रियमुपेक्ष्य सम्प्रति रोदितीति मानपरिपाटीं न जानासि। सकला चतुःषष्टिकलासहिता युवतीसभा हसतीति भावः।।४।।

**५-सजलनलिनीदलशीतलशयने!।**

**हरिमवलोकय सफलय नयने।। माध० ।।५।।**

तर्हि किं करोतीत्यत आह। सजलेत्यादि। हे सजलनलिनीदलशीतलशयने! जलसहितानि यानि नलिनीदलानि कमलिनीपत्राणि तेषां शीतलं शयनं शय्या यस्यास्तादृशे! त्वं पुरःस्थितं हरिं कृष्णमवलोकय पश्य। अत एव नयने नेत्रे सफलय कृतार्थय। केचिदाहुः, सजलेत्यादो सप्तमी। तथा च त्वया रचितं यत्सजलनलिनीदल-शीतलशयनं तत्रोपविष्टं हरिमवलोकयेत्यर्थः। तथा च सत्कारपूर्वकं शयने उपवेश्य हरिं पश्येति भावः।।५।।

**६-जनयसि मनसि किमिति गुरुखेदम्।**

**श्रृणु मम वचनमनीहितभेदम्।। माध० ।।६।।**

जनयसीत्यादि, तथापि मनसि चित्ते गुरुखेदं महद्दुःखं किमिति जनयसि मम वचनं "माधवे मानं मा कुरु" इति मम वाक्यं शृणु। कीदृशम्? अनीहितोऽनाकाङ्क्षितो युवयोर्भेद[१] उपजाप येन एतादृशम्। तथा च मम वचनं[२] युवयोः प्रीतिकारकं तदवश्यं त्वया[३] श्रोतव्यमिति भावः। यद्वा अनीहितभेदं मया सहानाकलितभेदं यथा स्यादेवं मम वचनं शृणु। इयं सखी मत्तोऽभिन्ना, मदनिष्टं न वदिष्यतीति बुद्ध्वा मद्वचनं शृण्विति भावः।।६।।

**७-हरिरुपयातु वदतु बहु मधुरम्।**

**किमिति करोषि हृदयमतिविधुरम्।। माध० ।।७।।**

हरिरुपयातु त्वदन्तिकं गच्छतु। बहुमधुरम् अतिसरसं यथा स्यादेवं वदतु। स्वकीयं हृदयं हृदयमतिविधुरमतिदुःखितं किमिति करोषि।।७।।

**८-श्रीजयदेवभणितमतिललितम्।**

**सुखयतु रसिकजनं हरिचरितम्।। माध० ।।८।।**

श्रीजयदेवेत्यादि। श्रीजयदेवेन भणितं वर्णितं ललितं मनोहरं हरिचरितं रसिकजनं कृष्णभक्तिरसास्वादग्राहिणं शृङ्गारादिरसास्वादपरं जनं वा सुखयत्वानन्दयतु।।८।।

१. छ. उपायो यत्र तादृशम् - इति पाठः।
२. छ. मम वचनं - इति नास्ति।
३. छ. त्वया - इति नास्ति।

**५१-स्निग्धे यत्परुषासि यत्प्रणमति स्तब्धासि यद्रागिणि**
**द्वेषस्थासि यदुन्मुखे विमुखतां यातासि तस्मिन् प्रिये।**
**तद्युक्तं विपरीतकारिणी! तव श्रीखण्डचर्चाविषं**
**शीतांशुस्तपनो हिमं हुतवहः क्रीडामुदो यातनाः।।५१।।**

**इति श्रीगीतगोविन्दे कलहान्तरितावर्णने मुग्धमुकुन्दो नाम नवमः स्वर्गः।**

स्निग्ध इति। यद्यतो हेतोः स्निग्धे तस्मिन् प्रिये मधुरवचनैः स्नेहं प्रकाशयति सति यत् पुरुषासि निष्ठुरभाषिण्यसि। यच्च प्रणमति तस्मिन् त्वं[१] स्तब्धासि यच्च रागिण्यनुरागवति तास्मिंस्त्वं द्वेषस्थासि द्वेषमवलम्ब्य स्थितासि। यच्चोन्मुखे आलिङ्गनाय संमुखे तस्मिस्त्वं विमुखतां यातासि पराङ्मुखतां गतासि[२] तद्धेतोर्हे विपरीतकारिणि! एतत्सर्वं विपरीतमेव[३]। एतत् किम्? तव[४] श्रीखण्डचर्चा चन्दनलेपोऽपि विषं यथा भोक्तारं मूर्च्छयति तथा चन्दनलेपोऽन्येषां सुखदोऽपि त्वां मूर्च्छयतीति भावः। अथ च शीतांशुस्तपनः सूर्यः। अन्येषां शीतलस्वभावोऽपि चन्द्रस्त्वयि तापप्रदत्वात्तपन इति भावः। हिमं तुषारोऽपि हुतवहोऽग्निः। अथ च क्रीडामुदः सखीक्रीडाजन्या मुदः[५] प्रमोदा यातनाः तीव्रवेदनाः। यः परस्मिन्विपरीतमाचरति तस्य सर्वं विपरितमेवेति ध्वनिः[६]। परुषं कर्बुरे रुक्षे स्यान्निष्ठुरवचस्यपि इति **विश्वः**[(अ)]। यातना तीव्रवेदना **इत्यमरः**[(आ)]।।५१।।❋

कलिप्रचण्डकानने मुकुन्दनामधारिणं पुनर्न्नयत्रकर्हिचिद्भयंकरो निरीक्षते। इति श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां पदभावार्थचन्द्रिकानामधेयायां नवमः[७] सर्गः।

१. क., छ. त्वं - इति नास्ति। २. छ. जातासि - इति पाठः।
३. छ. युक्तमेव - इति पाठः। ४. छ. तव - इति नास्ति।
५. छ. मुदः - इति नास्ति। ६. ख. भवतीति भावः।
७. क., ख. मिश्रश्रीकान्तविरचितायां पदभावार्थचन्द्रिकानामधेयायां - इति नास्ति।
(अ) वि. प्र. पृ० - १७२
(आ) अ. को. - १.९.३
❋ कतिपयमुद्रितपुस्तकेषु निम्नोक्तः श्लोकोऽधिकः प्राप्यते
अन्तर्मोहनमौलिघूर्णनचलन्मन्दारविस्रंसनः
स्तब्धाकर्षणदृष्टिहर्षणमहामन्त्रः कुरङ्गीदृशाम्।
दृप्यद्दानवदूयमानदिविषद्दुर्वारदुःखापदां
भ्रंशः कंसरिपोर्व्यपोहयतु वः श्रेयांसि वंशीरिवः।।३।।

❖❖❖

## ।। दशमः सर्गः ।।

।। चतुरचर्तुभुजः ।।

**५२- अत्रान्तरे मसृणरोषवशामसीम-**
**निःश्वासनिःसहमुखीं सुमुखीमुपेत्य।**
**सव्रीडमीक्षितसखीवदनां दिनान्ते**
**सानन्दगद्गदपदं हरिरित्युवाच ।।५२।।**

अत्रान्तरे इति। अत्रान्तरेऽस्मिन्नवसरे हरिः कृष्णः[१] राधां समुपेत्य[२] समीपं गत्वा प्रदोषे रात्रिमुखे इति वक्ष्यमाणमुवाच। कीदृशीम्? अमसृणः कर्कशो यो रोषस्तद्वशादसीमोऽधिको यो निःश्वासस्तेन निःसहं विरहदुःखसहनाक्षमं मुखं यस्यास्ताम्। पुनः कीदृशीम्? सव्रीडं सलज्जं यथा स्यादेवमीक्षितं[३] सख्या वदनं मुखं यया ताम्। कथं यथा स्यात्? सानन्दागद्गदपदम् आनन्देन गद्गदपदं[४] गद्गदाक्षरवाक्यसहितं यथा स्यात्।।५२।।

।। ऊनविंशप्रबन्धः/ गीतम् १९ ।।

।। देशवराडीरागाष्टतालाभ्यां गीयते।।

**१-वदसि यदि किंचिदपि दन्तरुचिकौमुदी। हरति दरतिमिरमतिघोरम्।**
**स्फुरदधरसीधवे तव वदनचन्द्रमा। रोचयतु* लोचनचकोरम्**
**प्रिये! चारुशीले! मुञ्च मयि मानमनिदानम्**
**सपदि मदनानलो दहति मम मानसं देहि मुखकमलमधुपानम्।।ध्रुवम्।।१ ।।**

तदेव गीतेन कथयति, वदसीत्यादि। गीतस्यास्य देशवराडीरागस्तालश्चाष्टतालः[५]। गीतार्थस्तु, हे प्रिये! राधे! चारु मनोहरं शीलं यस्यास्तादृशे! त्वं मयि

१. क., छ. कृष्णः - इति नास्ति। २. छ. समुपेत्य - इति नास्ति। ३. छ. वीक्षितं - इति पाठः।
४. छ. गद्गदपदं - इति नास्ति। ५. छ. ०श्लोक्त - इति पाठः।
* रोचयति - इति कतिपयमुद्रितपुस्तकेषु पाठः।

मद्विषयेऽनिदानमकारणकं मानं मुञ्च, त्यज। सपदि त्वन्मानकाल एव मदनानलः कातािग्निर्मम मानसं दहति मापयति। अतो मुखकमलममलं[१] तत्सम्बन्धि यन्मधु तत्पानं देहि। चारुशीलत्वमेवाह, वदसीति। त्वं यदि किञ्चिदपि उदासीनवचनमपि वदसि[२] तदा दन्तरुचिकौमुदी तव दन्तानां या रुचि सैव कौमुदी चन्द्रज्योत्स्ना सातिघोरमतिभीमं दरतिमिरं, दरः साध्वसं स एव तिमिरमन्धकारः तद्धरति दूरीकरोति। अत्र साध्वसे सति पुरः स्थितमपि वस्तु न प्रकाशत इति साध्वसस्यान्धकारत्वेन निरूपणम्। अथ च स्फुरन्कोपवशात्किंचिच्चलन्त्योऽधरः ओष्ठः स एव शीधु अमृतं तस्मै तव वदनचन्द्रमेव[३] चन्द्रमा लोचनचकोरं मदीयनेत्रमेव चकोरं रोचयतु[४]। अधरशीधुत्वं मम नेत्रचकोरस्य रुचिमुत्पादयतु[५] इति कस्यचिद्व्याख्यानमिति मन्दम्। तथा सत्यधरशीधुत्वरूपेण वैयर्थ्यापत्तेः, नह्यधररूपामृतविषयिणी रुचिर्ल्लोचनरुपचकोरस्य[६] सम्भवति। तस्मादेवं व्याख्येयम्, तव वदनचन्द्रमा लोचनरुपचकोरवतो मम रुचिमुत्पादयत्वित्यर्थः। अत्र पूर्वं दन्तरुचीनां कौमुदीत्वरूपणंल्लोचनयोश्चकोरत्वेन रूपणम्। अधरस्य चामृतत्वेन नायकस्य देवत्वमाक्षिप्यते। चन्द्रिकायाञ्च कौमुदी इति **विश्वः**[(अ)]। दरः साध्वसगर्तयो इति च[(आ)]। घोरं भीमे हरे घोरः इत्यपि[(इ)]। शीधुनी मदिरामृते। शीधुशब्दः पुंस्यपि। तथा च पुंन्नपुंसकशेषेऽमरसिंहः, कुष्टं मुण्डं शीधु पुंस्यपि। अत्राधरशीधवे इत्यत्र तादर्थ्यविवक्षायां चतुर्थी[(ई)]। ननु लोचनचकोरमित्यत्र यस्मै दित्सा रोचते इत्यादिना कथं न चतुर्थीति चेत् न। यस्मै रोचन इत्यत्र इन्द्रियतृप्तिलक्षणां रुचिं प्रति कर्त्तुविषयतया चतुर्थीविधानात्।

---

१. छ. अमलं - इति नास्ति।
२. छ. वदसि - इति नास्ति।
३. ख. चन्द्र - इति नास्ति।
४. ख. रोचयति - इति पाठः।
५. ख. उत्पादयति - इति पाठः।
६. छ. न - इत्यधिकः पाठः
(अ) वि. प्र. दान्तवर्गः - २९
(आ) वि. प्र. रान्तवर्गः - ११
(इ) वि. प्र. रान्तवर्गः - ३१
(ई) पा. अ. १.४.४४ सूत्रोपरि तादर्थ्ये चतुर्थी वाच्या (वा.)।

इह तु वदनचन्द्रमसोरतृप्तिजनकत्वं विवक्षितम्। किं त्वधरशीधुविषयकाभिलाषमात्र-जनकत्वं यस्मै रुचिरिति कृते इच्छामात्रे सति स्यादतः कर्तृनिर्देशाद्यत्रेन्द्रियतात्पर्यं सा लक्षणा रुचिस्तत्रैव चतुर्थीति। अत एव रुच्यर्थानां प्रीयमाणः इति **पाणिनेः** सूत्रम्[(अ)] ।।१ ।।

**२-सत्यमेवासि यदि सुदति! मयि कोपिनी**
**देहि खरनखरशरघातम्।**
**घटय भुजबन्धनं जनय रदखण्डनं**
**येन वा भवति सुखजातम्।। प्रिये० ।।२ ।।**

सत्यमेवासीत्यादि। हे सुदति! शोभनदशने! त्वं सत्यमेव यथार्थमेव यदि मयि कोपनी कोपवत्यसि तदा करास्तीक्ष्णा ये नखरा नखास्त एव बाणास्तैर्घातं प्रहारं देहि। तेनापि चेद्दुष्यसि तदा भुजबन्धनं भुजाभ्यां बाहुभ्यां बन्धनं घटय। तेनाप्यसन्तोषे रदखण्डनं रदनैर्दशनैः खण्डमधरे क्षतं जनय[१], येन वा सुखसमूहो भवति तदेव कुरु। तथा च मय्यपराधानुकूलं दण्डं विधाय कोपं मुञ्चेति भावः। सुदति शोभना दन्ता अस्या इति वाक्ये वयसि दन्तस्य दतृ[(आ)] इति दन्तशब्दस्य दतु आदेशः।
जातं जात्योघजन्मसु इति **विश्वः**[(इ)] ।।२ ।।

**३-त्वमसि मम भूषणं त्वमसि मम जीवनं**
**त्वमसि मम भवजलधिरत्नम्।**
**भवतु भवतीह मयि सततमनुरोधिनी**
**तत्र मम हृदयमतियत्नम्।। प्रिये० ।।३ ।।**

ननु या तव प्रिया तस्या मानं मोचय। मम मानत्यागे[२] तव किं प्रयोजनमित्यत आह, त्वमसीत्यादि। त्वं मम जीवनमसि। त्वयि विषण्णायां मम विषादो भवति। प्रसन्नायां प्रसाद इति त्वमेव मम जीवनमिति भावः। त्वं मम भूषणमलङ्करणमसि। त्वां विना किरीटादिकमपि मे न शोभाप्रदम्। त्वयि प्रसन्नायाम् अलङ्कारं विनापि परमकान्तिरिति त्वमेव मम लोकोत्तरं भूषणमिति भावः। भवजलधौ

---

१. छ. सुखजाते - इत्यधिकः पाठः।
२. छ. मानत्यागेन - इति पाठः।
(अ) पा. अ. - १.४.३३.
(आ) पा. अ. - ५.४.१४१.
(इ) वि. प्र. तान्तवर्गः - १४

संसाररूपरत्नाकरे त्वमेव रत्नमसि। यथा दरिद्रस्य रत्ने सुखं एवं मम त्वयि[१]। प्रणते मयि भवती सततं सर्वदानुरोधिनी अनुरोधवती भवतु। तत्रार्थे मम हृदयं अतियत्नं [२]अतिशययत्नवत्।।३।।

**४-नीलनलिनाभमपि तन्वि! तव लोचनं**
**धारयति कोकनदरूपम्।**
**कुसुमशरबाणभावेन यदि रञ्जयसि**
**कृष्णमिदमेतदनुरूपम्।। प्रिये० ।।४।।**

नीलनलिनेत्यादि। हे तन्वि! कुशाङ्गि! नीलनलिनस्य नीलोत्पलस्येवाभा कान्तिर्यस्य एतादृशामपि तव लोचनं रोषारुणं यत्कोकनदरूपं रक्तोत्पलसौन्दर्यं धारयति[३]। यदि कुसुमशरः[४] कामस्तस्य[५] बाणभावेन[६] तद्बाणाभिप्रायेण वा इमं कृष्णं चक्षुरनुरञ्जयसि रक्तं करोषि। एतस्य चक्षुषोऽनुरूपं सदृशम् शरा हि सततं परशरीरभेदिनो रुधिराक्तत्वेनारक्ता भवन्तीति ध्वनितम्[७]। यद्वा कुसुमशरबाणभावेन तद्बाणस्वरूपेण चक्षुषा भित्त्वा[८] कृष्णं मां यदि रञ्जयसि इदं रञ्जनमेतस्यास्तवैतस्य बाणस्य चानुरूपं सदृशम्। श्यामे लौहित्यापादनसामर्थ्यायास्ते मम रञ्जनमनुरूपमेवेति। यश्च बाणेन ताड्यते स रुधिरादिना रक्तो[९] भवतीति भावः। कुसुमशरबाणभावेनानेन नयनेन कृष्णं नन्दात्मजं[१०] मां रञ्जयसि प्रणयास्पदं करोषीति। इदमेतस्यावानुरूपमेवेति प्रकृतार्थः। भवेत् कोकनदं रक्तकैरवे रक्तपङ्कजे इति **विश्वः**।।४।।

**५-स्फुरतु कुचकुम्भयोरुपरि मणिमञ्जरी**
**रञ्जयतु तव हृदयदेशम्।**
**रसतु रशनापि तव घनजघनमण्डले**
**घोषयतु मन्मथनिदेशम्।। प्रिये० ।।५।।**

स्फुरत्विति। मणिमञ्जरी मणिपरम्परा कुचकुम्भयोः स्तनकलशयोरुपरि स्फुरतु चञ्चला भवतु। तव हृदयदेशं वक्षःप्रदेशं रञ्जयतु स्वरश्मिभिः शोभयतु। त्वन्नयननलिनं

१. छ. इष्टयामिति भावः - इति पाठः।
२. ख. अतिशयित - इति पाठः।
३. छ. धारयति - इति नास्ति।
४. छ. कुसुमशरस्य - इति पाठः।
५. छ. कामस्य - इति पाठः।
६. छ. बाणभावत्वेन - इति पाठः।
७. ख. भावः - इति पाठः
८. छ. भित्त्वा - इति नास्ति।
९. छ. रुधिराक्तो - इति पाठः।
१०. छ. नन्दात्मजं - इति नास्ति।

रक्तत्वं[1] धत्ते, त्वं च कृष्णं मां रञ्जयसि। अतो मणिमञ्जरी अर्पिता वक्षो यदि रञ्जयति तदानुरूपं भवतीति भावः। अत्र स्मरकेलिरूपशुभकर्मारम्भे मञ्जरीयुक्तपूर्णकलश-स्थापनमुचितमेवेति सूचनाय कुचयोः कलशत्वेन निरूपणम्[2]। मणिपरम्परायाश्च मञ्जरीत्वेन रूपणम्[3]। तव घनजघनमण्डले मांसलजघनभागे रसनापि क्षुद्रघण्टिकापि रसतु शब्दायमाना भवतु, मन्मथनिदेशं कामाज्ञां घोषयतु वारं वारं कथयतु। कामाकुलौ तौ केलिं कुरुते (?) कामाज्ञया भोः केलिं कुरुत इति कामाज्ञया सर्वे विलासिनो रमन्तमिति वा मन्मथनिदेशं घोषयत्विति भावः।।५।।

**६-स्थलकमलगञ्जनं मम हृदयरञ्जनं**
**जनितरतिरङ्गपरभागम्।**
**भण मसृणवाणि! करवाणि चरणद्वयं**
**सरसलसदलक्तकरागम्।। प्रिये०।।६।।**

स्थलेत्यादि। हे मसृणवाणि! स्निग्धवचने! भण आज्ञां देहि। तव चरणद्वयं सरसलसदलक्तरागं सरसः सान्द्रि लसन्नलक्तकरागो यत्र तादृशं करवाणि कुर्याम्। कथम्भूतं? स्थलकमलगञ्जनं स्थलोत्पन्नं यत्कमलं स्वकान्त्या तस्य तिरस्कारकम्। पुनः कीदृशम्? मम हृदयरञ्जनं मम हृदयानुरागजनकं तथा चेदं मम हृदयं रञ्जयति। ममाप्यलक्तकेनैद्रञ्जनमुचितमेवेति भावः। अत एव जनितो रतिरङ्गे सुरतकौशले परभागः[4] परस्परशोभा[5] येन तादृशम्। ममाप्यलक्तकेन[6] चेदिदं रज्यते। तदेतत्क्रौञ्च[7] वधादौ मम हृदयलग्नं सत् परमशोभां दास्यतीति भावः। स्फुरतु मणिमञ्जरीत्यनेन रसनेन च विपरीतरतमत्राभिमतम्।

परस्परं तु या कान्तिः परभागः स कथ्यते इति **धरणिः**[(अ)]।
रङ्गः कौशलरागयोः इति च[(आ)]।।६।।

१. छ. रक्ततां - इति पाठः।
२. ख. रूपणम् - इति पाठः।
३. छ. निरूपणम् - इति पाठः।
४. छ. परभागः - इति नास्ति।
५. छ. भागः - इत्यधिकः पाठः।
६. ख. अपि - इति नास्ति।
७. छ. ०मपि - इत्यधिकः पाठः।
(अ) धरणिकोशः नोपलभ्यते साम्प्रतम्।
(आ) धरणिकोशः नोपलभ्यते साम्प्रतम्।

**७-स्मरगरलखण्डनं मम शिरसि मण्डनं**
***धेहि पदपल्लवमुदारम्।**
**ज्वलति मयि दारुणो मदनकदनारुणो**
**हरतु तदुपाहितविकारम्।। प्रिय० ।।७।।**

स्मरगरलेत्यादि। हे प्रिये! उदारं सुन्दरं पदपल्लवं चरणकिसलयं मम शिरसि धेहि स्थापय। कीदृशम्? मण्डनं मम मस्तकस्यालङ्करणम्। पुनः कथम्भूतं[१]। स्मरस्य यद्गरलं विषं तस्य खण्डनं[२] नाशनम्। विरहिणां मूर्च्छादिप्रदत्वेन मलयानिलादेः स्मरगरलत्वरुपणात्स्मरस्य सर्पत्वमाक्षिप्यते। चरणपल्लवं [३]धेहीत्यनेन नायिकाया गारुडिकत्वं च इत्याक्षेपकरूपकमिदम्। अपरमपि सर्पादिविषं [४]गारुडिकचरणाघोतनाभिमन्त्रितपल्लवाद्यारोपणेन शाम्यतीति ध्वनिः। किञ्च मयि[५] दारुणो दुःसहो मदनकदनारुणः मदनः कामस्तज्जनितं यत्कदनं तापः स एवारुणः सूर्यो ज्वलतीति अतस्तेन उपोहितं जनितं विकारं ग्लान्यादिरूपं हरतु दूरीकरोतु। अन्योऽपि सूर्यसन्तापः शिरसि पल्लवादिस्थापनेन शाम्यतीति ध्वनिः।

अरुणोऽस्फुटरागे स्यात्सूर्ये सूर्यस्य सारथौ इति **विश्वः**[(अ)]।
कदनं कलुषे तापे इति च[(आ)]।।७।।

**८-इति चटुलचाटुपटुचारु मुरवैरिणो**
**राधिकामधिवचनजातम्।**
***जयति पद्मावतीरमणजयदेवकवि**
**भारतीभणितमतिशातम्।। प्रिय० ।।८।।**

---

१. ख. कीदृशम् - इति पाठः।
२. छ. खण्डनं - इति नास्ति।
३. ख. देही - इति पाठः।
४. छ. गरुडि - इति पाठः।
५. ख. मम - इति पाठः।
❋ कतिपयमुद्रितपुस्तकेषु "देहि" इति पाठः।
❋ कतिपयमुद्रितपुस्तकेषु "जयति जयदेवकवि भारती भूषीतं मानिनीजनजनितशातम्"।।
(अ) अरुणो व्यक्तरागे स्यात् सन्ध्यारागेऽर्कसारथौ इति विश्वः-वि० प्र० णान्तवर्गः - २८।
(आ) कदनं मूर्च्छने पापे सदनं मन्दिरे जले, वि० प्र० नान्तवर्गः - ३२

इति चटुलेत्यादि। इत्यनेन प्रकारेण मुरवैरिणः कृष्णस्य राधाम् अधिकृत्य वचनजातं वाक्यसमूहो जयति सर्वोत्कर्षेण [१]वर्त्तताम्। कीदृशम्? चटुलं[२] मनोहरं चाटु प्रीतियुक्तं पटु चतुरं चारु सुकुमारम्। पुनः कीदृशम्? पद्मावती जयदेवपत्नी तस्याः रमणो जयदेवकविस्तेन[३] भारतीसंज्ञकया[४] कवित्ववृत्या भणितं वर्णितम्। जयदेवकवेर्भारत्या वाण्या भणितमिति तु व्याख्यानं मन्दम्। तथा सति पौनरुक्त्यापत्तेः। जयदेवकविभणित-मित्यस्यैव[५] सम्यक्त्वात्। पुनः कीदृशम्? अतिशातमतिशयितं शातं सुखं यस्मात्तादृशम्। भारतीवृत्तिलक्षणं **शृङ्गारतिलके** प्रधानपुरुषप्राया सद्वक्रोक्तिनिरन्तरा भारती सा भवेद्वृत्तिर्वीरहास्याद्भुताश्रया इति[(अ)]। चटुलः सुन्दरे चले इति धरणि[(आ)]। **रसार्णवसुधाकरेऽपि**-शृङ्गरादिषु सर्वेषु रसेष्विष्टैव भारती इति[(इ)]। चटु चाटु प्रियं वाक्यम्[(ई)]। पटुस्तीक्ष्णे नीरोगे चतुरेऽन्यवत् इति **विश्वः**[(उ)]। शर्माशातसुखानि च [६]**इत्यमरः**[(ऊ)]।।८।।

---

१. अत्र वर्तते इति युक्तः पाठः।
२. ख. चटुलं - इति नास्ति।
३. ख. भारत्या - इत्यधिकः पाठः।
४. ख. संज्ञया - इति पाठः।
५. छ. मित्य - इति नास्ति।
६. छ. इति श्रीगीतगोविन्दटीकासमाप्तम्, शुभमस्तु, शुभमस्तु - इत्यधिकः पाठः।
❋ स्तनभर - इति कतिपयमुद्रितपुस्तकेषु पाठः।
(अ) शृ. ति. - ३.६९
(आ) कोशोऽयं साम्प्रतं न समुपलभ्यते।
(इ) र. सु. - २९१
(ई) कोशे नास्ति।
(उ) वि. प्र. टान्तवर्गः - १२
(ऊ) अ. को. - १.४.२४

**५३-परिहर कृतातङ्के! शङ्कां त्वया सततं घन-**
**स्तनजघनयाक्रान्ते स्वान्ते परानवकाशिनि।**
**विशति वितनोरन्यो धन्यो न कोऽपि ममान्तरं**
**प्रणयिति❋ परीरम्भारम्भे विधेहि विधेयताम्।।५३।।**

परिहरेत्यादि। हे कृतातङ्के! विहितसन्ताप! शङ्कामयि! अन्यनायिकासङ्गसंशयं परिहर त्यज। यतो मम स्वान्ते चित्तेऽभ्यन्तरे वितनोस्तनुशून्यात्कामादन्यो धन्यो जनो न विशति[१]। कुतो न प्रविशतीत्यत आह, परेति। परानवकाशिनि इतरावकाशशून्यो। तत्रापि हेतुः, त्वयेति। घने निविडे स्तनजघने यस्यास्तादृश्या त्वया सतताक्रान्ते व्याप्ते। तथा च सदा त्वया पूरिते मदीये हृदयेऽन्यस्य प्रवेष्टुं स्थलमेव नास्ति। अनङ्ग एव परान्प्रविशति तस्याङ्गाभावादित्यर्थः। तस्मात्परीरम्भारम्भे आलिङ्गनारम्भे विधेयतां वचनग्राहितां विधेहि कुरु परीरम्भमाचरेति मद्वचनं कुर्वित्यर्थः।

रक्तापशङ्कास्वतङ्कः **इत्यमरः**।।५३।।

**५४-मुग्धे! विधेहि मयि निर्दयदन्तदंशं**
**दोर्वल्लिबन्धनिबिडस्तनपीडनानि।**
**चण्डि! त्वमेव मुदमञ्चय पञ्चबाण-**
**चण्डालकाण्डदलनादसवः प्रयान्तु❋।।५४।।**

वचनग्राहिपद्येन न प्रत्येषि तदा मय्यपराधानुकूलं दण्डमाचरेत्याह, मुग्धेत्यादि। हे मुग्धे! सुन्दरि! निर्दयं दयारहितं दन्तदशं दन्तक्षतम्। अथ च दोर्वल्लिबन्धं भुजलताबन्धं निबिडं गाढं स्तनाभ्यां पीडनं च विधेहि कुरु। ततो हे चण्डि! कोपने! त्वमेव मुदमानन्दमञ्चय प्राप्नुहि। न पुनः पञ्चबाणः कामः स एव निरपराधमादृग्जनहिंसकत्वेन चाण्डालः। तस्य काण्डदलनान्नाराचप्रहरणादसवः प्राणाः प्रयान्तु निर्गच्छन्तु। चाण्डालप्रहरणेन मरणे न समीचीना गतिः। अतस्त्वया साक्षादेव यथोचितदण्डाचरणं विधेयमिति भावः।

चण्डी कात्यायनीदेव्यां हिंस्रकोपनयोषितोः इति **विश्वः**[(अ)]।।५४।।

**५४-क- शशीमुखि तव भातिभङ्गुरभ्रूर्युवजनमोहकरालकालसर्पः❋**
**तदुदितभयभञ्जनाय यूनां त्वदधरसीधुसुधैव सिद्धमन्त्रः।।५४-क।।**

ननु कोपो मम नास्त्येवेति आह, शशिमुखीत्यादि। हे शशिमुखि! चन्द्रानने! तव भङ्गुरभ्रुः भाति। कीदृशी? युवजनानां तरुणजनानां मोहनाय करालो भीषणः

१. ख. प्रविशति - इति पाठः। ❋ प्रयान्ति - इति कतिपयमुद्रितपुस्तकेषु पाठः।
❋ "कालसर्पी" - इति कतिपयमुद्रितपुस्तकेषु पाठः।
(अ) चण्डी कात्यायनीहिंस्राकोपनस्त्रीषु सम्मता। वि. प्र. डान्तवर्गः - १०

कालसर्पः भुजङ्गो दष्ट्वा मोहयति। इयं दृष्ट्वा मोहयतीत्येतस्याः करालत्वम्। अतस्तदुदितविषभञ्जनाय तत्सकाशादुदितमुद्गतं यद्विषं तस्य भञ्जनाय नाशाय यूनां तरुणजनानां त्वदधरसीधुसुधैव त्वदीयाधर एव सीधुर्मदिराविशेषः स एवामृतं समीचीनः सिद्धः साधिते मन्त्रः। अन्यो मन्त्रो जपादिना विषं नाशयति। अयं त्वासादित एवेति एतस्यान्यमन्त्रापेक्षया सिद्धत्वम्। तथा चायमपि तव भ्रुकालसर्पीविषमूर्च्छितस्तन्नाशौषधत्वेन तवाधरः सुधा इति भावः। करालो भीषणेऽन्यवत् इति **विश्वः**(अ)।।५४-क।।

**५५-व्यथयति वृथा मौनं तन्वि प्रपञ्चय पञ्चमं**
**तरुणि मधुरालापैस्तापं विनोदय दृष्टिभिः।**
**सुमुखि विमुखीभावं तावद्विमुञ्च न मुञ्च मां**
**स्वयमतिशयस्निग्धो मुग्धे प्रियोऽहमुपस्थितः।।५५।।**

व्यथयतीत्यादि। हे तन्वि! तव वृथा मौनमकारणवाग्बन्धनं मां व्यथयति पीडयति। किञ्च, हे तरुणि! मधुरालापैर्मधुरालपनैः पञ्चमं स्वरविशेषं प्रपञ्चय विस्तारय। किञ्च दृष्टिभिरवलोकनैस्तापं सन्तापं विनोदय विशेषतोऽपसारण। हे सुमुखि! विमुखीभावं त्यज मयि विमुखतां तावद्विमुञ्च। सुमुख्यास्ते वैमुख्यमनुचितमिति भावः। मानं मुञ्च त्यज। हे मुग्धे! अयं प्रियः स्वयमनाहूत एवोपस्थितः आगतः। कीदृशः? अतिशयस्निग्धोऽतिशयेन स्नेहवान्। तथा च स्वयमागतः प्रियः हेतुर्नोचित इति भाव।।५५।।

**५६-बन्धूकद्युतिबान्धवोऽयमधरः स्निग्धो मधूकच्छवि-**
**र्गण्डश्चण्डि! चकास्ति नीलनलिनश्रीमोचनं लोचनम्।**
**नासाभ्येति तिलप्रसूनपदवीं कुन्दाभदन्ति! प्रिये!**
**प्रायस्त्वन्मुखसेवया❋ विजयते विश्वं स पुष्पायुधः।।५६।।**

सम्प्रति त्वयि मानवत्यां त्वन्मुखेनैव कामो मां पीडयति। अतस्त्वं प्रसीदेत्याशयेनाह- बन्धुकेत्यादि। हे चण्डि! अतिकोपने! अयं तवाधरो बन्धुकद्युतिबान्धवः बन्धुकस्य पुष्पविशेषस्य या द्युतिर्दीप्तिस्तस्या बान्धवः सुहृत्। अत्र तद्बान्धवरूपेण बन्धुकद्युतीनामधरे नित्यद्युतिर्व्यज्यते। अयं स्निग्धो गण्डः कपोलो मधुकच्छविर्मधूकपुष्पस्येव छविः कान्तिर्यस्य एतादृशश्चकास्ति शोभते।

---

❋ सेवया - इति कतिपयमुद्रितपुस्तकेषु पाठः।
(अ) वि. प्र. - लान्तवर्गः - १०७

लोचनं नीलनलिनश्रीमोचनं स्वकान्त्या नीलनलिनस्य नीलोत्पलस्य श्रियं कान्तिं मोचयति त्याजयतीति तादृशं प्रथमस्वभावत एव नीलतारकत्वान्नीलं चक्षुरञ्जनेन सुतरां नीलमिति नीलोत्पल [१]मतिशेत इति भावः। हे कुन्दाभदन्ति! कुन्दपुष्पस्येवाभा दीप्तिर्येषां ते दन्ता [२]यस्यस्तादृशी। तव नासा तिलप्रसूनपदवीं तिलपुष्पप्रसिद्धिमभ्येति प्राप्नोति प्राय इति तर्कयामि। स प्रसिद्धः पुष्पायुधः पुष्पमेवायुधं शस्त्रं यस्य सः कामः त्वन्मुखसेनया त्वन्मुखमेव या सेना कटकं तेन विश्वं जगत् विजयते। कामः पञ्चभिः शरैर्विश्वं जयति। त्वन्मुखे बन्धुकमधूकनीलोत्पलतिलकुन्दपुष्पाणि पञ्च सन्तीति त्वन्मुखेनैष कामो विश्वं जयतीति भावः। बन्धुकं बन्धुजीवे स्यात्[अ]। मधुपुष्पो मधूकश्च गूढपुष्पो मधुद्रुमः इति **हारावली**[आ]।।५६।।

**५७-दृशौ तव मदालसे वदनमिन्दुमत्यास्पदं**
**गतिर्जनमनोरमा विधूतरम्भमूरुद्वयम्।**
**रतिस्तव कलावती रुचिरचित्रलेखे भ्रुवा-**
**वहो विबुधयौवतं वहसि तन्वि! पृथ्वीगता ।।५७।।**

**इति श्रीगीतगोविन्दे मानिनीवर्णने चतुरचतुर्भुजो नाम दशमः सर्गः।**

दृशौ तवेत्यादि। हे तन्वि! त्वं पृथ्वीगता पृथ्वीप्राप्ता सती विबुधयौवतं देवयुवतीनां तारुण्यमहो आश्चर्येण वहसि धारयसि। तदेवाह, दृशाविति। तव दृशौ नेत्रे मदेन हर्षेणालसे मन्थरे। अथ च मदालसा स्वर्वेश्या। तथा च स्वर्गे एकैव मदालसा त्वं तु एकवद्द्वे मदालसे दधासीत्याश्चर्यमिति भावः। तव वदनमिन्दुमत्यास्पदं चन्द्रविषयिणी या मतिस्तस्या आस्पदं विषय इत्यर्थः। तव मुखेऽयामिन्दुरिति मतिर्भवति लोकानामिति भावः। अथवा, इन्दुमती या देवाङ्गना तस्या आस्पदम् आश्रयः। तव गतिर्गमनं जननां लोकानां मनोरमा मनोहारिणी अथवा मनोरमा नाम्नी या देवाङ्गना तदात्मिका रमा लक्ष्मीस्तदात्मिकेत्यर्थः। तथा तवोरुद्वयमूरुयुग्मं विधूतरम्भं विधूते स्वशोभया तिरस्कृते रम्भे कदल्यौ येन तादृशम्।

१. ख. अपि - इत्यधिकः पाठः।
२. ख. यस्याः - इति नास्ति।
(अ) मेदिनीकोशः - कान्तवर्गः - १२८
(आ) हारवलीः श्लो० - ८६ पृ० - ११

अथवा रम्भा स्वर्वेश्या। स्वर्गे एकैव रम्भा त्वमूरुद्वयात्मकं रम्भाद्वयं दधासीति भावः। अथ च तव रतिः सुरतकेलिः कलावती कौशलशालिनी अथ च तव रतिः कामपत्नीः। अस्ति कलावतीनाम्नी देवाङ्गना। ते भ्रुवौ रचितचित्रलेखे रचिता मयि कोपवशान्निर्मिता चित्रा विचित्रा लेखा रेखा याभ्यां तादृशी अथवा चित्रलेखा देवाङ्गना स्वर्गे एकैव चित्रलेखात्वद्भ्रुभ्यां तु चित्रलेखाद्वयं रचितमित्याश्चर्यमिति भावः। प्रेयो नामायमलङ्कारः। प्रियः प्रियतराख्यानां रसवद्रसपेशलम्(अ) इति। पृथ्वीनामकं चेदं छन्द इत्यपि ध्वनितम्। रम्भा कदल्यप्सरसोः इति **विश्वः**(आ)। युवतीनां समूहो योवतम्। शिक्षादिभ्योऽण्(इ)। गर्भिणं यौवनं **इत्यमरः**(ई)।।५७।। ❉

कोषानुसारिलिखितं स्मरतन्त्रतत्वं सालङ्कृतिध्वनियुतं कृतशब्दशुद्धिः[१]। व्याख्यानमा-
कलयितुं जयदेवकाव्ये चेदुत्सुकोऽसि तदिमां कलयस्व टीकाम्।।

इति श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां पदभावार्थचन्द्रिकायां मानिनीवर्णने चतुरचतुर्भुजो नाम[२] दशमः सर्गः समाप्तः[३]।

---

१. ख. सिद्धिः - इति पाठः।

२. क. मिश्र इत्यारभ्य नाम इत्यन्तो नास्ति।

३. ख. समाप्तः - इति नास्ति।

❉ मुद्रितपुस्तकेषु निम्नोक्तः श्लोकः अधिकः प्राप्यते-
प्रीतिं वस्तनुतां हरिः कुवलयापीडेन सार्धं रणे
राधापीनपयोधरस्मरणकृत्कुम्भेन सम्भेदवात्
यत्र स्विद्यति मीलति क्षणमपि क्षिप्रं तदालोकन-
व्यामोहेन जितं जितं जितमभूत्कंसस्य कोलाहलः।।८।।

(अ) काव्यादर्शः - २, २७५

(आ) वि. प्र. भान्तवर्गः - २१

(इ) पा. अ. - ४.२.३८

(ई) अ. को. - २.६.२२

❖❖❖

## ।। एकादश: सर्ग: ।।

। सानन्ददामोदर: ।

**५८-सुचिरमनुनयेन प्रीणयित्वा मृगाक्षीं**
**गतवति कृतवेशे केशवे कुञ्जशय्याम्।।**
**चितरुचिरभूषां दृष्टिमोषे प्रदोषे**
**स्फुरति निरवसादां कापि राधां जगाद।।५८।।**

सुचिरेत्यादि। कापि सखी राधां जगादोवाच। क्व सति ? प्रदोषे स्फुरति सति। कीदृशे ? दृग्विमोषे दृशौ विमुष्णाति चोरयति स्वविषयग्रहणसमर्थं करोतीति तस्मिन् गाढान्धकारे इत्यर्थ:। पुन: क्व सति ? केशवे मृगाक्षीं हरिणनयनां राधां सुचिरं बहुकालं व्याप्य अनुनयेन प्रीणयित्वा प्रसादयित्वा कुञ्जशय्यां लताद्यावेष्टितकुटीराभ्यन्तरस्थशयनीयं गतवति गते सति। कीदृशे केशवे ? कृतवेशे कृतालङ्करणे। कीदृशीं राधाम् ? रचिता रुचिरा मनोहरा भूषणालङ्कृतिर्यया ताम्। पुन: कीदृशीम् ? निरवसादां निर्गतोऽवसाद: कृष्णानागमनजन्यं दु:खं यस्यास्ताम्।।५८।।

।। विंश: प्रबन्ध: / गीतम् २०।।

।। वसन्तराग यतितालाभ्यं गीयते ।।

**१-विरचितचाटुवचनरचनं चरणे रचितप्रणिपातम्।**
**संप्रति मञ्जुलवञ्जुलसीमनि केलिशयनमनुयातम्।।**
**मुग्धे ! मधुमथनमनुगतमनुसर राधिके।। ध्रुवम्।।१।।**

तदेव गीतेन कथयति, विरचितेत्यादि। गीतस्यास्य वसन्तरागो यतिताल:। गीतार्थस्तु, हे मुग्धे! राधे! मधुसूदनं कृष्णमनुसर। कीदृशम्? अनुगतं त्वामनुसृतम्। अनुगतत्वमेवाह, विरचितेति। विरचिता विहिता या चाटुवचनस्य रचना सन्दर्भो येन तादृशम्। पुन: कीदृशम्? तव चरणे रचित: प्रणिपात: प्रणामो येन तादृशम्। तर्हि सम्प्रति कुत्रास्तीत्यत आह, सम्प्रतीति। सम्प्रत्यधुना मञ्जुलो मनोहरो यो वञ्जुलो वेतसस्तस्य सीमनि पर्यन्ते यत्केलिशयनं क्रीडाशय्या तामनुलक्षीकृत्य यातं गतम्। त्वां तत्रस्थ: प्रतीक्षत इत्यर्थ:।।१।।

**२-घनजघनस्तनभारभरे दरमन्थरचरणविहारम्।**

**मुखरितमणिमञ्जीरमुपैहि विधेहि मरालविकारम्।। मुग्धे०।।२।।**

तां प्रोत्साहयन्ती सखी प्राह, घनेत्यादि। हे [१]राधे! उपेहि कृष्णमप्यनुगच्छ। कथं यथा स्यात्? मुखरित: शब्दायमान: कृतो मणिमञ्जीरो मणिखचितो मञ्जीरो नूपुरो यत्र गमने एवं यथा स्यात्? पुन: कथं यथा स्यात्? दरेण साध्वसेन मन्थरश्चरणविहार: पदविन्यासो यत्रैवं यथा स्यात्। तत्र हेत्वन्तरगर्भविशेषणमाह, घनेति घनयोर्निबिडयो-र्जघनस्तनयोर्भारस्य भरोऽतिशयो यस्यास्तादृशी। मरालानां हंसानां स्वकीयमन्थराचणेन मञ्जीरादिशब्देन च निकारं तिरस्कारं विधेहि कुरु। सम्प्रति मरालेषु शब्दायमानेषु सत्सु मञ्जीरादिध्वनिरपि मरालशब्दत्वेनैव लोके ग्राह्य इति सम्प्रति योग्योऽभिसारक्षण इति ध्वनि:। अथ च सम्प्रति हंसस्य शब्दो यात्रायां शुभं सूचयतीति गमनं विलम्बो न कार्य इत्यपि ध्वनितम्। तदुक्तं वसन्तरागे काषासु सर्वास्वपि दर्शनेन हंसस्य शब्देन च सर्वसिद्धिरिति। मरालो हंसराजे स्यान्मरालो हंसमात्रके इति **धरणि:**। निकार: स्यात्परिभवे धान्यस्योत्क्षेपणेऽपि च इति **विश्व:**[(अ)]।।२।।

**३-शृणु रमणीयतरं तरुणीजनमोहनमधुपविरावम्।**

**कुसुमशरासनशासनबन्दिनि पिकनिकरे भज भावम्।। मुग्धे ०।।३।।**

शृण्विति। तरुणीजनानां मोहनं मोहजनकं मधुरिपो: कृष्णस्य रावं शब्दं शृणु। कीदृशम्? रमणीयतरं रमणीजनानाम् अतिशयेन रमणियम्। पिकनिकरे कोकिलसमूहे कुसुमशरासनबन्दिनि सति। कुसुमान्येव शरासनं धनुर्यस्य सकामस्तत् शासनस्य तदाज्ञया बन्दिनि स्तुतिपाठके सति। यद्वा कुसुमशरासनशासनं बन्दितुं नमस्कतुं शीलनस्य तादृशे कामाज्ञाकारिणि सतीत्यर्थ:। भावमनुरागं कृष्णे भज आश्रय। अत्र पिकनिकरझङ्कारेण कृष्णमधुरालापस्य परैरलक्ष्यतया तदीयनि: शङ्कभाषितान्यापि त्वं तत्रागता सती श्रोष्यसीति ध्वनितम्। पिकस्य मधुरस्वरो यात्राणां शकुनमित्यपि ध्वनितम्। "वन्दिन: स्तुतिपाठका:" **इत्यमर:**[(आ)]।।३।।

१. ख. राधिके - इति पाठ:।

(अ) वि० प्र० रान्तवर्ग: - ७० (धान्यस्योत्किरणोऽपि च)।

(आ) अ. को. - २.८.९७.

**४-अनिलतरलकिसलयनिकरेण करेण लतानिकुरम्बम्।**

**प्रेरणमिव करभोरु! करोति गतिं प्रति मुञ्च विलम्बम्।। मुग्धे० ।।४।।**

अनिलेत्यादि। हे करभोरु! करभ: कनिष्ठान्तो मणिबन्धपर्यन्तं करस्य बहिर्भागस्तन्निम्नोन्नतो ऊरु यस्यास्तादृशि। गतिं गमनं प्रतिं विलम्बं कालक्षेपं मुञ्च। अनिलतरलकिसलयनिकरेण करेण अनिलेन वायुना तरलश्चञ्चलो य: किसलयनिकरो नवपल्लवसमूहस्तत्स्वरूपेण करेण लतानिकुरम्बं लतासमूहस्तव प्रेरणमिव करोति। किसलयकम्पच्छलेनासमञ्जसमसहमानो यात्रायां फलसिद्धिसूचकमित्यतो गमनं प्रति विलम्बो न कार्य इत्यपि ध्वनितम्। शकुनशास्त्रे तदुक्तं -

वामे मधुरवाक्पक्षी वृक्ष: पल्लवितोऽग्रत:।
अनुकूलो वहन्वायु: प्रयाणे शुभसूचक:।।इति।।
समूहे निकुरम्बमस्त्रियामित्**यमर:**।
मणिवन्धादाकनिष्ठं करस्य करभो बहि: इत्यपि च।।४।।

**५-स्फुरितमनङ्गतरङ्गवशादिव सूचितहरिपरिरम्भम्।**

**पृच्छ मनोहरहारविमलजलधारममुं कुचकुम्भम्।। मुग्धे० ।।५।।**

स्फुरितमित्यादि। अमुं कुचकुम्भं स्तनकलशं पृच्छ, सखी सदसद्धा वदतीति प्रश्नं कुरु। कीदृशम्? स्फुरितं सकम्पम्। कस्मादिवानङ्गतरङ्गवशादिवानङ्गस्य कामस्य यस्तरङ्ग ऊर्मिस्तद्वशादिव। अत्रानङ्गतरङ्गवशादित्यनेन तस्या रसतरङ्गिणीत्वमाक्षिप्यते। अन्योऽपि कुम्भो नद्यास्तरङ्गै: प्रेर्यमाण: सकम्पो भवतीत्ययमपि ते कुचकुम्भस्त्वयि रसतरङ्ग्ण्यामनङ्गतरङ्गै: प्रेरणादिव सकम्प इति भाव:। इव शब्दोऽत्रोत्प्रेक्षाद्योतक:। पुन: कीदृशं कुचकुम्भम्? मनोहरो यो हार: स एव बिमला निर्मला जलधारा यस्मिस्तादृशम्। अत्र स्तनोपरिस्थितस्य हारस्य जलधारात्वरूपणात्स्तनयो: पूर्णकलशत्वेन रूपणमाक्षिप्यते। पूर्णदिव कलशात्तरङ्गैरान्दोलने सति बहिर्जलधारानि:-सरणसम्भवात्। पुन: कीदृशम्? सूचितं हरे: कृष्णस्य परिरम्भमालिङ्गनं येन तादृशम्। नारीणां स्तनकम्प: प्रियसङ्गं सूचयतीति। **शाकुनिकास्त**दुक्तम्, नित्यं नार्या: स्तने कम्प: प्रियसङ्गमसूचक:। पूर्णकलशत्वेन स्तनरूपणमपि यात्रायां पूर्णकलशदर्शनं शुभसूचनायेति।।५।।

(अ) अ० को० - २.५.४०
(अ) अ० को० - २.६.८१.

**६-अधिगतमखिलसखीभिरिदं तव वपुरपि रतिरणसज्जम्।**
**चण्डि! रसितरशनारवडिण्डिममभिसर सरसमलज्जम्।। मुग्धे० ।।६।।**

ननु सखीजनेषु पश्यत्सु, कथं मया गन्तव्यमित्यत आह, अधिगतमित्यादि। इदं तव वपुः सखीभिरतिशयेन रतिरणाय सुरतसङ्ग्रामाय सज्जं कृत्वालङ्करणादि[१]। संविधानमधिगतं ज्ञातम्। तथा च सखीभिर्दृष्टमेवाधुना किं विलम्बेनेति भावः। यद्वा सखीभिरिदं तव वपुर्बहुआ रतिरणे शय्यामधिगतं ज्ञातम्। तथा च तासां का लज्जेति भावः। अतो हे चण्डि! कोपने! रसितः शब्दायमानः कृतो रशनावलिः क्षुद्रघण्टिका-श्रेण्येव डिण्डिमो वाद्यविशेषो यत्रैवं यथा स्यादेवमभिसर [२]कृष्णसङ्केतभूमिमुपैहि। अन्यत्रापि रणे डिण्डिमस्ताड्यत एवेति ध्वनिः। पुनः कथं यथा स्यात्? सरसमलज्जम्। रसः शृङ्गाररसस्तत्सहितं लज्जारहितं च यथा स्यात्।।६।।

**७-स्मरशरसुभगनखेन करेण सखीमवलम्ब्य सलीलम्।**
**चल वलयक्वणितैरवबोधय हरिमपि निजगतिशीलम्।। मुग्धे० ।।७।।**

स्मरेत्यादि। करेण सखीमवलम्ब्य सलीलं लीलासहितं यथा स्यादेवं चल गच्छ। कीदृशेन करेण? स्मरस्य कामस्य ये शरास्तद्वत्सुभगाः सुन्दरा नखा यास्मिंस्तेन। अन्यस्मिन् रणे शस्त्रास्त्राणि भवन्ति। रतिरणे तु दन्तनखा एव स्मरस्य शस्त्राणीति भावः। अथ च वलयक्वणितैः कङ्कणशब्दैर्हरिमपि निजं स्वकीयं गतिशीलं गमनस्वरूपमवबोधय ज्ञापय। अन्यत्रापं समीचीनो योधः प्रतिभटमवहितं कृत्वैव युध्यत इति ध्वनितम्।।७।।

**८-श्रीजयदेवभणितमधरीकृतहारमुदासितरामम्।**
**हरिविनिहितमनसामधितिष्ठतु कण्ठतटीमविरामम्।। मुग्धे० ।।८।।**

श्रीजयदेवेत्यादि। इदं श्रीजयदेवेन भणितं कथितं हरिविनिहितमनसां हरौ विनिहितं तत्परं मनो येषां तेषामविरामम् अनवरतं कण्ठदेशे वसत्वित्यर्थः। कीदृशम्? अधरीकृतः स्वगुणैर्हीनीकृतो हारो येन तादृशम्। पुनः कीदृशम्? उदासिता स्वगुणैस्तिरस्कृता रामा येन तादृशम्। अत्र यद्यपि हारस्य रामाणां कण्ठदेशस्थितया सुशोभाप्रदत्वं सम्भवति, तथापि तया रागिणामेव शोभाप्रवत्वं न तु मुमुक्षूणाम्। तत्रापि तारुण्य एंव, न तु सर्वदा जयदेवभणितं तु कृष्णकथात्वेन च सर्वेषां सर्ववयः शोभाप्रदामिति हारापेक्षया नायिकापेक्षया चेदमधिकमिति भावः। कण्ठतटीमित्यत्र अधिशीङ्स्थासां कर्म[(अ)] इत्यधिकरणे द्वितीया।।८।।

१. क. आभरणादि - इति पाठः।
२. ख. कृष्ण - इति नास्ति।
(अ) पा० अ० - १.४.४६.

**५९-सा मां द्रक्ष्यति वक्ष्यति स्मरकथां प्रत्यङ्गमालिङ्गनैः**
**प्रीतिं यास्यति रंस्यते सखि! समागत्येति चिन्ताकुलः।**
**स त्वां पश्यति वेपते पुलकयत्यानन्दति स्विद्यति**
**प्रत्युद्गच्छति मूर्च्छति स्थिरतमःपुञ्जे निकुञ्जे प्रियः।।५९।।**

इदानीं हरेरुत्कण्ठाधिक्यमाह, सा मामित्यादि। हे सखि! सा राधा आगत्य मां द्रक्ष्यति ईक्षिष्यते। दृष्ट्वापि मां स्मरकथां वक्ष्यति कथयिष्यति। स्मरकथामुक्त्वापि सा प्रत्यङ्गवयवं ममालिङ्गनैः प्रीतिं यास्याति। प्रीतियुक्तापि मया सह रंस्यते केलिं करिष्यति इति चिन्ताकुलः सन्कृष्णः स्थिरतमः पुञ्जे स्थिरान्धकारसमूहे निकुञ्जे त्वां पश्यति ध्यानेन दृष्ट्वापि किमियं पुरुषं वदिष्यति मधुरं चेति भिया साध्वसेन च वेपते कम्पते पुलकयति अङ्गानीत्यर्थः। ध्यानेनैव तवालिङ्गनं परिकल्प्य साध्वसेन रोमाञ्चयुक्तो भवति इत्यर्थः। पश्चाद्ध्यानेनैव त्वत्सुरतकेलिं परिकल्प्यानन्दयुक्तो भवति। ततो ध्यानेनैव सुरतसुखं परिकल्प्य स्विद्यति प्रस्वेदति प्रस्वेदयुक्तो भवति। पश्चात्केलिं कृत्वोत्थाय गन्तुं प्रवृत्तायां त्वयि प्रत्युद्गच्छति प्रत्युत्थानं करोति। पश्चाद्ध्यानविच्छेदे त्वामदृष्ट्वा मूर्च्छति मूर्च्छां प्राप्नोति।।५९।।

**६०-अक्ष्णोर्निक्षिपदञ्जनं श्रवणयोस्तापिच्छगुच्छावलीं**
**मूर्ध्नि श्यामसरोजदाम कुचयोः कस्तूरिकापत्रकम्।**
**धूर्तानामभिसारसाहासकृतां विष्वङ्निकुञ्जे सखि!**
**ध्वान्तं नीलनिचोलचारु सुदृशां प्रत्यङ्गमालिङ्गति।।६०।।**

नन्वलङ्करणरचनां विधाय गन्तव्यमित्यत आह, अक्ष्णोरिति। अभिसारसाहसकृताम् अभिसाररूपं साहसं कुर्वन्तीत्यभिसारसाहसकृतस्तासामत एव धूर्तानां शठानां सुदृशां नायिकानां ध्वान्तं तमसि कुञ्जे विष्वक्सर्वतः प्रत्यङ्गं प्रत्यवयवं आलिङ्गति (आश्लिष्यति)। तदेव विशेषणैराह, अक्ष्णोरिति। किं कुर्वत्तमः ? अक्ष्णोर्नयनयोरञ्जनं कज्जलं निक्षिपदर्पयत् श्रवणयोः श्रोत्रयोस्तापिच्छगुच्छावलीं तापिच्छस्य तमालस्य गुच्छावलीं स्तबकपरम्परां निक्षिपत् कुचयोः कस्तूरिकापत्रकं मृगमदपत्ररचनां निक्षिपत्। कीदृशं ध्वान्तम् ? नीलनिचोलचारु नीलनिचोलवत् श्यामकञ्चुकवत् चारु मनोहरम्। तथा च तवाभिसारयोग्याभरणानि तम एवार्पयिष्यतीत्यलं विलम्बेनेति भावः। अत्र स्त्रीणामलङ्करणादिरचनाधिकारो नपुंसकादीनामेवेति ध्वान्तमिति नपुंसकनिर्देशेन ध्वनितम्। कालस्कन्धस्तमालः स्यात्तापिच्छः **इत्यमरः**(अ)। स्याद्गुच्छः स्तवके स्तम्बे हारभेदकलापयोः इति **विश्वः**(आ)।।६०।।

(अ) अ. को. - २.४.६८. (आ) वि० प्र० छान्तवर्गः - ३

**६१-काश्मीरगौरवपुषामभिसारिकाणा-**
**माबद्धरेखमभितो रुचिमञ्जरीभि:।**
**एतत्तमालदलनीलतमं तमिस्त्रं**
**तत्प्रेमहेमनिकषोपलतां तनोति।।६१।।**

किञ्च सम्प्रति मणिसुवर्णाभरणं नोपादेयमित्यत आह, काश्मीरेत्यादि। काश्मीर-वत्कुङ्कुमवद्गौरं वपु: शरीरं यासां तासामभिसारिकाणामभिसारपराणां नायिकानामभितं उभयतो मणिमञ्जरीभिर्मणिपरम्पराभिराबद्धा रेखा येन तादृशमेतत्तमालदलनीलतमं तमालदलवत्तमालपल्लववदतिशयेन नीलं तमिस्त्रमन्धकारं तत्प्रेममेनिकषोपलतां तनोति विस्तारयति। सङ्केतभूमिं व्रजन्तीनामभिसारिकाणां ताटङ्ककङ्कणमञ्जीरादिखचितमणि-दीप्तिभिरुभयपार्श्वे उद्योते सति रेखाकारतया लक्ष्यमाणातिगौरतराङ्गकान्तिरन्धकार-रूपकषपट्टिकायां तत्प्रेमसुवर्णरेखेन भातीति भाव:। एतादृश्यापि गाढान्धकारे कान्तारे सर्वमुपेक्ष्य कान्ताभिसारप्रस्थानेन प्रेम्ण: शुद्धिं परीक्ष्यत इति ध्वनि:। पाषाणप्रस्तर-ग्रावोपलाश्मान: शिला दृषत् **इत्यमर:**(अ)।।६१।।

**६२-हारावलीतरलकाञ्चनकाञ्चिदाम-**
**केयूरकङ्कणमणिद्युतिदीपितस्य।**
**द्वारे निकुञ्जनिलयस्य हरिं निरीक्ष्य**
**व्रीडावतीमथ सखी निजगाद राधाम्।।६२।।**

हारावलीत्यादि। अथानन्तरमियं दूती सखीं राधामिति वक्ष्यमाणमुवाच। कीदृशीं सखीम्? निकुञ्जनिलयस्य निकुञ्ज एव निलयो निभृतगृहं वचांसि मयोक्तानि, सम्प्रति कथं तत्समक्षं यामीति लज्जया युक्ताम्। कीदृशस्य निकुञ्जनिलयस्य? हारावल्यो हारपङ्क्तयस्तरलो हारमध्यगमणि: काञ्चनकाञ्चिदाम सुवर्णखचितमेखला मञ्जीरो नूपुर: कङ्कणं करभूषणमेतेषु खचिता ये मणयस्तेषां द्युत्या कान्त्या दीपितस्य प्रकाशितस्य। तरलश्चञ्चले षिङ्गे हारमध्यमणावपि इति **विश्व:**(आ)।।६२।।

(अ) अ० को० - २.३.४.
(आ) वि. प्र. लान्तवर्ग: - ५८

।। एकविंश: प्रबन्ध: / गीतम् २१ ।।

।। वराडीराग-मण्ठतालाभ्यां गीयते।।

**१-मञ्जुतरकुञ्जतलकेलिसदने**
**विलस रतिरभसहसितवदने।।**
**प्रविश राधे ! माधवसमीपमिह।। ध्रुवम्।।१ ।।**

तदेव गीतेन कथयति, मञ्जुतरेति। गीतस्यास्य वराडीरागो मण्ठताल:[१]। गीतार्थस्तु, हे राधे ! माधवसमीपं कृष्णान्तिकदेशं प्रविश। इह मञ्जुतरकुञ्जतलकेलिसदने मञ्जुतरं मनोहरं यत्कुञ्जतलं निकुञ्जाभ्यन्तरदेशस्तदेव यत्केलिसदनं लीलागृहं तत्र विलस विलासं कुरु। त्वं कीदृशी ? रतिरभसेन सुरतोत्साहेन हसितं हास्ययुक्तं वदनं मुखं यस्यास्तादृशी। प्रविश राधे ! माधवसमीपमिह विलसेत्युक्तम्[२]। ध्रुवपदं प्रतिपदमनुवर्तमानत्वात्। यद्वा, इह माधवे विलस। कीदृशे माधवे ? मञ्जुतरकुञ्जतलं केलिसदनं यस्य तादृशे। पुन: कीदृशे ? रतिरभसेन हसितं वदनं यस्य तादृशे।।१ ।।

**२-नवभवदशोकदलशयनसारे।**
**विलस कुचकलशतरलहारे।। प्रविश० ।।२ ।।**

कीदृशे केलिसदने ? नवं नूतनमथ च लसच्छोभायमानं यदशोकदलशोकपल्लवं पत्रं यस्य तच्छयनं शय्या तदेव सारो महाधनं यत्र तादृशे। त्वं कीदृशी ? कुचकलशयो: स्तनकलशयोस्तरलश्चञ्चलो हारो यस्यास्तादृशी। अपरस्मिन्नपि गृहे महाधनं तिष्ठतीति ध्वनितम्। यद्वा नवलसदित्यपि राधे इत्यस्यैव विशेषणम्। तदा नवलसदशोकदलशयनमेव सारो यस्यास्तादृशी। यद्वा इह माधवे विलस। कीदृशे माधवे ? नवलसदशोकदलमेव सारो यस्य तादृशे।।२ ।।

**३-कुसुमचयरचितशुचिवासगेहे।**
**विलस कुसुमसुकुमारदेहे।। प्रविश० ।।३ ।।**

कुसुमचयेत्यादि। हे राधे ! इह कुसुमचयेन पुष्पसमूहेन रचितं विरचितं शुचि अनुपहतं नायिकान्तरेणानुपभुक्तं यद्वासगेहं लीलागृहं तत्र विलस। यद्वा कुसुमचयेन रचितमर्थात् कृष्णेन निर्मितं शुचि[३] वासगृहं यस्यास्तादृशी इति राधे इत्यस्यैव विशेषणम्। पुन: कीदृशी त्वम् ? कुसुमवत्सुकुमार: कोमलो देहो यस्यास्तादृशी। यद्वा इह माधवे विलस। कीदृशे माधवे ? कुसुमचयेन रचितं शुचि वासगृहं येन तस्मिन् ! पुन: कीदृशे माधवे ? कुसुमवत्सुकुमारो देहो यस्य तस्मिन्। शुचि शुद्धेऽनुपहते इति **विश्व:**[(अ)] ।।३ ।।

१. ख. रूपकताल: - इति पाठ:। २. विलसेत्यन्तरम् - इति पाठ:।
३. ख. शुचि - इति नास्ति। (अ) वि. प्र. चान्तवर्ग: - ६

**४-चलमलयवनपवनसुरभिशीते।**
**विलस रसवलितललितगीते।। प्रविश० ।।४।।**

चलेत्यादि। हे राधे ! माधवसमीपं चल व्रज। इह केलिसदने प्रविश विलस च। कीदृशे केलिसदने ? मलयपवनसुरभिशीते। मलयसम्बन्धी य: पवनो वायुस्तेन सुरभौ शीते च। यद्वा इह माधवे विलस। कीदृशे माधवे ? मलयपवनसुरभिशीते मलयसम्बन्धी य: पवनो वायुस्तेन सुरभिशीतले वा। यद्वा चलेत्यपि पवनस्यैव विशेषणम्। चलश्चञ्चलो यो मलयपवनस्तेन सुरभौ शीते चेत्यर्थ:। चलेत्यनेन ईषच्चाञ्चल्यमुक्तम् तेन मान्द्यमुक्तम्। त्वं कीदृशी ? रतिवलितललितगीते रतौ वलिते मनोहरे ललितगीते। लालित्य हावविशेषो, गीतं च यस्यास्तादृशि यद्वा इह कृष्णे विलस। कीदृशे ? रतिललितं मनोहरं वलितं संभक्तं गीतं यस्य तादृशे। क्वचित्सरसवलितललितेति पाठ:। ललितलक्षणं तु -

नानाविधमनाहार्यं स्वभावेन मनोहरम्।
शृङ्गारचेष्टितं स्त्रीणां ललितं संप्रचक्षते इति।।४।।

**५-विततबहुवल्लिनवपल्लवघने।**
**विलस चिरमलसपीनजघने।। प्रविश० ।।५।।**

विततेत्यादि। हे राधे ! माधवसमीपं प्रविश। इह केलिसदने चिरं विलस च। कीदृशे केलिसदने ? विततैर्विस्तीर्णैर्बहुभिर्वल्लीनां लतानां नवपल्लवैर्घने सान्द्रे। कीदृशी त्वं ? अलसपीनजघने। अलसे मन्थरे पीने मांसले जघने यस्यास्तादृशि।।५।।

**६-मधुमुदितमधुपकुलकलितरावे।**
**विलस मदनरससरसभावे।। प्रविश० ।।६।।**

मधुमुदितेत्यादि। कीदृशे केलिसदने ? मधुना पुष्परसेन मुदितान्यानन्दितानि यानि मधुपकुलानि भ्रमरसमूहास्तै: कलितो विहितो राव: शब्दो यत्र तस्मिन्। त्वं कीदृशी ? मदनरसरभसभावे। मदनस्य कामस्य यो रस: शृङ्गाराख्यस्तत्र यो रभस उत्साहस्तेनोपलक्षितो भावो यस्य तस्मिन्। यद्वा, इह माधवे विलस। कीदृशे माधवे ? मदनरसेन यो रभसस्तेनोपलक्षितो भावो यस्य तादृशे इत्यर्थ:। यद्यपि मधुपेनैव मधुपानकर्त्तुत्वं प्राप्तं तथापि इदानीं मधुपानं प्राप्यते मधुमुदितेत्युपात्तम्।।६।।

**६-मधुरतरपिकनिकरनिनदमुखरे।**
**विलस दशनरुचिरुचिरशिखरे।। प्रविश० ।।६।।**

मधुरतरेत्यादि। कीदृशे केलिसदने ? मधुरतरोऽतिशयेन मधुरो य: पिकनिकरणां कोकिलसमूहानां निनद: शब्दस्तेन मुखरे वाचाले यद्वा एतदपि राधे इत्यस्यैव

विशेषणम्। तदा मधुरतरपिकनिकराणामिव यो निनदः सुरते कण्ठकूजितं तेन मुखरत्वमित्यर्थः। पुनः कीदृशी ? दशमरुचिर्दन्तकान्तिरेव रुचिरं शिखरं मणिक्यविशेषो यस्यास्तादृशि। यद्वा, दशनरुचिवद्रुचिरं शिखरं माणिक्यविशेषो यस्यास्तादृशि। यद्वा इह माधवे विलस। कीदृशे माधवे ? दशनरूचिरुचिरशिखरे। दशनरुचीत्यत्र द्वितीयव्याख्याने प्रसिद्धशिखरस्योपमेयतयास्य विपर्यासोपमा बोध्या। तदुक्तं **दण्डिना,** त्वदाननमिवोन्निद्रमरविन्दमभूदिति। सा प्रसिद्धविपर्यासाद्विपर्यासोपमेष्यते(अ) इति। पक्वदाडिमवीजाभं मणिक्यं शिखरं विदुः इति **शाश्वतः**(आ)।।७।।

**८-विहितपद्मावतीसुखसमाजे।**
**कुरु मुरारे! मङ्गलशतानि।**
**भणति जयदेवकविराजे।। प्रविंश।।८।।**

विहितेत्यादि। हे मुरारे! जयदेवकविराजराजे जयदेव एव कवीनां राजराजा सार्वभौमस्तत्र मङ्गलशतानि कल्याणशतानि कुरु। कीदृशं भणति ? तव गुणान्वदति। पुनः कीदृशे ? विहितः पद्मावत्याः स्वपत्न्याः [१]सुखसमाजः सुखसमूहो येन तादृशे। एतेन स्वस्त्रीतत्परत्वकथनेन परस्त्रीवैमुख्यं ध्वनितम्। राजराजः कुबेरेऽपि सार्वभौमे सुधाकरे इति **विश्वः**(इ)।।८।।

**६३-त्वां चित्तेन चिरं वहन्नयमतिश्रान्तो भृशं तापितः**
**कन्दर्पेण तु पातुमिच्छति सुधासंबाधबिम्बाधरम्।**
**अस्याङ्गं तदलंकुरु क्षणमिह भ्रूक्षेपलक्ष्मीलव-**
**क्रीते दास इवोपसेवितपदाम्भोजे कुतः सम्भ्रमः।।६३।।**

[२]श्रीकृष्णस्योत्कण्ठधिक्यमाह, त्वामित्यादि। अयं कृष्णस्त्वां चित्तेन मनसा वहन् धारयन् अतिश्रान्तः[३] अतिश्रमयुक्तो[४] जातः। कन्दर्पेण कामेन च भृशमतिशयेन तापितः सन्तापितः। अतिसूक्ष्मे चित्ते पीनस्तनजघनवत्याः स्तनधारणेन श्रमो युक्त एव। अन्योऽपि यो गुरुतरभारोद्वहनं करोति तस्याप्यतिश्रमो भवतीति भावः। अतस्तव सूधयामृतेन संबाधं सङ्कटं बिम्बाधरं बिम्बफलसदृशमधरोष्ठं

१. क. स्वपत्न्याः - इति नास्ति। २. ख. श्री - इति नास्ति।
३. ख. अतिश्रान्तः - इति नास्ति। ४. ख. अत्यर्थ - इति पाठः।
(अ) काव्यादर्शः - २,१७
(आ) शाश्वतकोशे नास्ति।
(इ) वि० प्र० जान्तवर्गः - ३१

पातुमिच्छति। तस्माद्धेतोस्तस्य [1]कृष्णस्याङ्कं क्रोडं क्षणं त्वमलंकुरु नन्वयमपि स्फुटापराधोऽतस्तदङ्कारोहणे बिभेमीत्यत आह, भ्रुक्षेपेति। इह कृष्णे कुतः कस्माद्धेतोः संभ्रमो भयम्। कीदृशे कृष्णे। सेवितं त्वदीयपदाम्भोजं त्वदीयचरणकमलं येन तस्मिन्। अत एव दास इव सेवक इव। अत्र हेतु भ्रुक्षेपस्य भ्रुवः चालनस्य या लक्ष्मीः संपत्तस्या लवो लेशस्तेन क्रीतं संकटं ना तु संबाधः **इत्यमरः**[(अ)]। लवलेशकणाणवः **इत्यमरः**[(आ)] ।।६३।।

**६४- सा ससाध्वससानन्दं गोविन्दे लोललोचना।**
**सिञ्जानमञ्जुमञ्जीरं प्रविवेश निवेशनम्।।६४।।**

सा ससाध्वसेत्यादि। सा राधा निकेतनं लीलागृहं प्रविवेश प्रविष्टा। किं कुर्वति? मञ्जुर्मनोहरो मञ्जीरो नूपुरस्तं सिञ्जाना शब्दं कुर्वती। कथं यथा स्यात्? ससाध्वसं साध्वससहितं, सानन्दमानन्दसहितं च यथा स्यात्। कीदृशी सा? गोविन्दे लोले साध्वसेन चञ्चले लोचने यस्याः सा।।६४।।

।। द्वाविंशः प्रबन्धः / गीतम् २२ ।।
।। वराडिरागयतितालाभ्यां गीयते ।।

**१-राधावदनविलोकनविकसितविविधविकारविभङ्गम्।**
**जलनिधिमिव विधुमण्डलदर्शनतरलिततुङ्गतरङ्गम्।।**
**हरिमेकरसं चिरमभिलषितविलासं**
**सा ददर्श गुरुहर्षवशंवदवदनमनङ्गनिवासम्।। ध्रुवम्।।१ ।।**

राधावदनेत्यादि। गीतस्यास्य वराडीरागो रूपकतालः। गीतार्थस्तु, सा राधा हरिं कृष्णं ददर्श दृष्टवती। कीदृशम्? एकरसं एको मुख्यः शृङ्गराख्यो रसो यस्य तम्। यद्वा एकस्तुल्यो रसो यस्य तम्। राधाया यादृशः शृङ्गाररसः कृष्णस्यापि तादृश एवेति भावः। पुनः कीदृशम्? चिरं बहुकालं व्याप्याभिलषितो वाञ्छितो विलासः केलिर्येन तम्। पुनः कीदृशम्? गुरुर्महान्यो हर्ष आनन्दस्तस्य वशंवदमायत्तं वदनं यस्य तम्। पुनः कीदृशम्? अनङ्गविकारम्। "क्वचित् अनङ्गविकास" इति पाठः। तदानङ्गस्य कामस्य विकाशः स्फूर्तिर्यत्र तम्। राधेति। पुनः कीदृशम्? राधाया यद् वदनं मुखं तस्य विलोकनेन वीक्षणेन विकसिताः प्रकटिता विविधा नानाविधा

---

१. ख. कृष्ण - इति नास्ति।
(अ) अ० को० - ३.१.८५.
(आ) अ. को. - ३.१.६२.

विकारा जृम्भणापाङ्गक्षेपणकरविमर्शादिरूपास्त एव विभङ्गा विशिष्टोर्मयो येन तम्। कमिव ? जलनिधिमिव समुद्रमिव। कीदृशं जलनिधिम् ? विधुमण्डलस्य चन्द्रमण्डलस्य दर्शनेन तरलिताश्चञ्चलीकृतास्तुङ्गा अत्युच्चास्तरङ्गा ऊर्मयो यस्य तादृशम्। अत्रागाधशृङ्गाररसाश्रयत्वेन कृष्णस्य जलनिधिसाम्यम्। राधामुखस्य चाह्लादकारित्वादिना चन्द्रसाम्यम्। जृम्भणादिरूपाङ्गविकारस्योत्तरोत्पन्नतया तरङ्गस्य साम्यम्। भङ्गस्तरङ्गे रुग्भेदे भङ्गो जयविपर्यये इति **विश्व:**[(अ)] ।।१ ।।

**२-हारममलतरतारमुरसि दधतं परिरभ्य विदूरम्।**

**स्फुटतरफेनकदम्बकरम्बितमिव यमुनाजलपूरम्।। हरि० ।।२ ।।**

विविधविकारानेवाह, हारमित्यादि। कीदृशं कृष्णम् ? विदूरमतिशयेन परिरभ्यालिङ्ग्य उरसि वक्षसि हारं दधतं बिभ्राणम्। कीदृशम् ? अमलतरोऽतिशयेन विमलतरस्तार: शुद्धमौक्तिकं यत्र तादृशम्। कमिव ? स्फुटतर: प्रकटतरो य: फेनकदम्ब: फेनसमूहस्तेन करम्बितं मिश्रितं यमुनाजलपूरमिव कालिन्दीप्रवाहमिव। अत्र कृष्णशरीरस्य श्यामस्निग्धतया यमुनाप्रवाहसाम्यम्। हारस्य चातिशुभ्रतया फेनसमूहसाम्यं बोध्यम्। अत्र हारालिङ्गनेन स्वाभिलाषप्रकटनान्मोट्टायिताख्यो भावो वर्णित:। तदुक्तं **रसार्णवसुधाकरे**, स्वाभिलाषप्रकटनं मोट्टायितमितीरितम् इति[(आ)]। मिश्रितं तु करम्बितम् इति **धरणि:**[(इ)]। तारो मुक्तादिसंशुद्धौ तरणे शुद्धमौक्तिके इति **विश्व:**[(ई)]। पुरो जलप्रवाह: स्यात् इति च[(उ)] ।।२ ।।

**३-श्यामलमृदुलकलेवरमण्डलमधिगतगौरदुकूलम्।**

**नीलनलिनमिव पीतपरागपटलभरवलयितमूलम्।। हरि० ।।३ ।।**

पुन: कीदृशम् ? श्यामलेत्यादि। श्यामलं नीलं मृदुलं कोमलं कलेवरमण्डलं यस्य तम्। पुन: कीदृशम् ? अधिगतमधिकं परिधेयत्वेन ज्ञातं गौरपीतं दुकूलं पट्टवस्त्रं येन तम्। किमिव ? नीलनलिनमिव श्यामकमलमिव। कीदृशं नीलनलिनम् ? पीतो य: पराग: पुष्परेणुस्तस्य पटलं समूहस्तस्य यो भरोऽतिशयस्तेन वलयितं वेष्टितं मूलं यस्य तम्। अत: कृष्णस्य स्निग्धश्यामतया नीलोत्पलसाम्यम्। पीतपट्टाम्बरस्य

(अ) वि० प्र० गान्तवर्ग: - १८

(आ) र० सु० - २०४

(इ) साम्प्रतं नोपलभ्यते कोशोऽयं।

(ई) वि० प्र० रान्तवर्ग: - १८

(उ) वि० प्र० रान्तवर्ग: - २४

च मूललग्नपीतरागसाम्यम्। अथ कलेवरम्। "गात्रं वपु: संहननम् **इत्यमर:**(अ)" ।।३।।

**४-तरलदृगञ्चलचलनमनोहरवदनजनितरतिरागम्।**

**स्फुटकमलोदरखेलितखञ्जनयुगमिव शरदि तडागम्।। हरि० ।।४।।**

पुन: कीदृशम्? तरलेति। तरलो यो दृगञ्चल: कटाक्षस्तस्य चलनेन मनोहरं सुन्दरं यद्वदनं तेन जनित उत्पादितो रतिरागो राधाया: सुरतेच्छा येन तम्। कमिव? शरदि शरत्काले स्फुटकमलोदरे विकसिरपद्मगर्भे खेलितं क्रीडितं खञ्जनयुगं खञ्जरीटयुगलं यत्र तादृशं तडागमिव। अत्र कृष्णस्य राधादर्शनसंक्षुभितत्वेन शरत्कालीनतडागसाम्यम्। स्मेरमुखं मन्दहास्यं च विकसितकमलसाम्यम्। तारका: श्यामिकोपेतत्वेन परित: शुभ्रत्वेनातिचञ्चलत्वेन तन्नेत्रयो: खञ्जनसाम्यम्। शरत्काले जलाशयस्य कमलगर्भे खेलत्खञ्जनो दृष्ट: सन्यथा द्रष्टुर्वाञ्छितं प्रयच्छत्येवं चलदपाङ्गवत्कृष्णवदनदर्शनं राधाया वाञ्छितं केलिसुखं दास्यतीति शरत्कालीन, कमलमध्यस्यखञ्जनोपमानेन ध्वनितम्। तदुक्तं **वराहसंहितायाम्,** हेमसमीपसिताम्बरकमलोत्पलपूजितोपलब्धेषु। दधिपात्र-धान्यकूटे दृष्टोऽभीष्टानि चेष्टते विहग: इति खञ्जरीटस्तु खञ्जन: **इत्यमर:**(आ)। तडागंस्तु जलाधार: इति **विश्व:**(इ)।।४।।

**५-वदनकमलपरिशीलनमिलितमिहिरसमकुण्डलशोभम्।**

**स्मितरुचिरुचिरसमुल्लसिताधरपल्लवकृतरतिलोभम्।। हरि० ।।५।।**

पुन: कीदृशम्? वदनेति। कृष्णवदनकमलस्य मुखपद्मस्य परिशीलनाय मिलितौ यौ मिहिरौ सूर्यौ ताभ्यां समे ये कुण्डले ताभ्यां शोभा कान्तिर्यस्य तम्। अत्र कुण्डलयोर्नानामणिखचितत्वेन सूर्योपमा बोध्या। अभूतोपमा चेयम्। क्किर्तनार्कमार्तण्ड-मिहिरारुणपूषण: **इत्यमर:**(ई)। पुन: कीदृशम्? पुन: कीदृशम्? स्मितस्य इषद्धासस्य या रुचि: कान्तिस्तया रुचिरो मनोहरोऽथ च समुल्लसितो राधादर्शनोत्कण्ठया ईषत्कम्पितो योऽधरपल्लवस्तेन कृतो राधाया रतिलोभ: सुरतेच्छा येन तम्।।५।।

(अ) अ० को० - २.६.७०.

(आ) अ० को० - २.५.१५

(इ) वि० प्र० गान्तवर्ग: - ३५

(ई) अ० को० - १.३.२९.

**६-शशिकिरणच्छुरितोदरजलधरसुन्दरसकुसुमकेशम्।**

**तिमिरोदितविधुमण्डलनिर्मलमलयजतिलकनिवेशम्।। हरि० ।।६ ।।**

पुनः कीदृशम् ? शशिकिरणेति। शशिकिरणैश्चचन्द्रकिरणैश्छुरितं संबद्धमुदरमभ्यन्तरं यस्य स जलधरो मेघस्तद्वत्सुन्दरं कुसुमं पुष्पं तत्सहिताः केशा यस्य तम्। अत्र केशानां श्यामतया जलधरसाम्यम्। तत्र स्थितकुसुमानां च मेघान्तरितचन्द्रकरिणसाम्यं बोध्यम्। पुनः कीदृशम्। तिमिरेऽन्धकारे उदितं प्रकटीभूतं यच्चन्द्रमण्डलं तद्वन्निर्मलस्य मलयजतिलकस्य निवेशो विन्यासो यस्य तम्। अत्र कृष्णस्य गाढान्धकारसाम्यं ललाटस्थमण्डलाकृतितिलकस्य पूर्णचन्द्रबिम्बस्थितिकाले तिमिरसाम्यस्या-संभवादभूतोपमा बोध्या।।६ ।।

**७-विपुलपुलकभरदन्तुरितं रतिकेलिकलाभिरधीरम्।**

**मणिगणकिरणसमूहसमुज्ज्वलभूषणसुभगशरीरम्।। हरि० ।।७।।**

पुनः कीदृशम् ? विपुलो यः पुलकभरो रोमाञ्चातिशयस्तेन दन्तुरितं व्याप्तम्। पुनः कीदृशम् ? रतिसम्बन्धिनीभिः केलिकलाभिः चुम्बनालिङ्गनादिभिः विशेषचातुरीभिरधीरं चञ्चलम्। पुनः कीदृशम् ? मणिसमूहानां किरणसमूहेन समुज्ज्वलानि यानि भूषणानि मुकुटाङ्गदमञ्जीरादीनि तैः सुभगं मनोहरं शरीरं यस्य तम्। निम्नोन्नततया व्याप्तं दन्तुरं कथ्यते बुधैः इति **धरणिः**(अ)।।७।।

**८-श्रीजयदेवभणित विभवद्विगुणीकृतभूषणभारम्।**

**प्रणमत हृदि विनिधाय हरिं सुचिरं सुकृतोदयसारम्।। हरि० ।।८।।**

श्रीजयदेवेत्यादि। हे जनाः! हरिं प्रणमत। किं कृत्वा ? सुचिरं बहुकालं व्याप्य हृदि चित्ते विनिधाय। कीदृशम् ? सुकुतोदयस्य [१]पुण्योदयस्य सारं सारभूतम्। यद्वा सुकृतोदय एव सारो धनं यस्मात्तम्। पुनः कीदृशम् ? श्रीजयदेवस्य भणितविभवे वाग्विभवे द्विगुणीकृतभूषणभारोऽलंकारसमूहो येन तम्। जयदेवसरस्वती स्वयमेवोत्प्रेक्षालंकारवती भगवद्गुणैस्तु वर्णनीयैः सुतरामलंकृतेति भावः।।८।।

---

१. ख. पुण्योदयस्य - इति नास्ति।

(अ) कोशाऽयं सांप्रतं नोपलभ्यते।

**६६-भजन्त्यास्तल्पान्तं कृतकपटकण्डूतिपिहित-❋[१]**
**स्मितं याते गेहाद्बहिरवहितालीपरिजने।**
**प्रियास्यं पश्यन्त्याः स्मरशरसमाकूतसुभगं**
**सलज्जा लज्जापि व्यगमदिव दूरं मृगदृशः ।।६६।।❋[२]**

भजन्त्या इति। तस्मिन्काले तल्पान्तं शय्यैकदेशं भजन्त्या आश्रयन्त्या मृगदृशो हरिणनयनाया राधाया लज्जापि सलज्जेव सव्रीडेव भूत्वा दुरमतिशयेन व्यगमद्विगता। क्व सति ? अवहितालीपरिजने अवहितः कृतावधानो य आलीपरिजनः सखीपरिजनस्य-स्मिन्। कृतकपटकण्डूति यथा स्यात्तथा। कृता कपटेन व्याजेन कण्डूतिः कर्णादिकण्डूयनं यत्रैवं यथा स्यात्तथा। बहिर्याति सति कुञ्जाद्बहिर्गते सति। पुनः कथं यथा स्यात् ? विहितस्मितं विहितेषद्धासं यथा स्यात्। कथम्भूतायास्तस्या ? प्रियस्य कृष्णस्यास्यं मुखं पश्यन्त्याः। कीदृशं मुखम् ? स्मरसरसं स्मरेण कामेन सरसं शृङ्गाररससहितम्। पुनः कीदृशम् ? आकूतं सुभगं। आकूतेन तत्तन्मनोरथेन मनोहरम्।।६६।।

**(गूढा❋[३]तिगूढमिह भावमुदीक्ष्य किञ्चि-)**
**द्यत्कोषजातमथ शब्दनयप्रमेयम्।**
**यस्यप्यलंकृतिरहस्यमलेखि तत्वं**
**न प्राप्तमूलमितिसान्मतिभिर्विभाव्यम्।।**

इति श्रीगीतगोविन्दटीकायां एकादशसर्गः समाप्तः।

❋ १ पिहित० इति कतिपयमुद्रितपुस्तकेषु पाठः।

❋ २. मुद्रितपुस्तकेषु निम्नोक्ताश्चत्वारः श्लोकाः प्राप्यन्ते-

अतिक्रम्यापाङ्गं श्रवणपथपर्यन्तगमन-
इदानीं राधायाः प्रियतमसमालोकसमये
पपात स्वेदाम्बुप्रसर इव प्रियतमसमालोकसमये।।२।।
सानन्दं नन्दसूनुर्दिशतु मितपरं संमदं मन्दमन्दं
राधामाधाय बाह्वोर्विवरमनु दृढं पिडयन्प्रीतियोगात्।
तुङ्गौ तस्या उरोजावतनु वरतनोर्निर्गतौ मा स्म भूतां
पृष्ठं निर्भिद्य तस्माद्बहिरिति वलितग्रीवमालोकयन्वः।।३।।

❋ ३ मूलमातृकायां गलितत्वादस्य श्लोकस्य प्रथमपादो मयाऽपुरि (संपा०)।

जय श्री विन्यस्तैर्महित इव मन्दारकुसुमैः
स्वयं सिन्दूरेण द्विपरणमुदा मुद्रित इव।
भुजापीडक्रीडाहतकुवलयापीडकारिणः
प्रकीर्णासृग्विन्दुर्जयति भुजदण्डो मुरजितः।।४।।
सौन्दर्यैकनिधेरनङ्गललनालावण्यलीलापुषो
राधाया हृदि पल्वले मनसिजक्रीडैकरङ्गस्थले।
रम्योरोजसरोजखेलनरसित्वादात्मनः ख्यापयन्
ध्यातुर्मानसराजहंसनिभतां देयान्मुकुन्दो मुदम्।।५।।

# ।। द्वादशः सर्गः ।।

।सानन्ददामोदरः।

**६७-गतवति सखीवृन्देऽमन्दत्रपाभरनिर्भर-**
**स्मरपरवशाकूतस्फीतस्मितस्नपिताधराम्।**
**सरसमनसं दृष्ट्वा राधां मुहुर्नवपल्लव-**
**प्रसवशयने निक्षिप्ताक्षीमुवाच हरिः प्रियाम् ।।६७।।**

गतवतीत्यादि। हरिः प्रियां राधामुवाच। क्व सति ? सखीवृन्दे सखीसमूहे गतवतिसति। कीदृशीम् ? अमन्दत्रपाभरनिर्भरस्मरपरवशाकूतस्फीतस्मितस्नपिताधराम्, अमन्द क्रुरोऽथ त्रपाभरेण लज्जासमूहेन निर्भरोऽतिशयो यः स्मरः कामस्तत्परवशस्तदायत्तो य अकूतोऽभिप्रायस्तेन स्फीतं प्रवृद्धं यत्स्मितं तेन स्नपितौ व्याप्तौ अधरौ यस्यास्ताम्। पुनः कीदृशीम् ? सरसमनसं रसोऽनुरागस्तत्सहितं मनो यस्यास्ताम्। किं कृत्वा ? नवपल्लवप्रसवशयने नवपल्लवकिसलयपुष्पमये शयने शयनीये निक्षिप्ताक्षीं निहितनयनां विलोक्य दृष्ट्वा अत्र शय्याविलोकनेन सम्भोगेच्छा ध्वन्यते।।६७।।

।।त्रयोविंश प्रबन्धः / गीतम् २३।।

।।विभासरागैकतालाभ्यां गीयते ।।

**१-किसलयशयनतले कुरु कामिनि चरणनलिनविनिवेशम्।**
**तव पदपल्लववैरिपराभवमिदमनुभवतु सुवेशम्।।**
**क्षणमधुना नारायणमनुगतमनुसर भो* राधिके।। ध्रुवम् ।।१ ।।**

किसलयेत्यादि। गीतस्यास्य विभासराग एकतालिताल:। गीतार्थस्तु, हे राधे! क्षणमधुनानुगतं नारायणमनुसर। हे कामिनि ! किसलशयनतले चरणकमलविनिवेशं पादपद्मार्पणं कुरु। इदं सुवेशमपि सम्यक्पत्ररचनादिना सुष्ठ्वलंकृतमपि किसलयशयनं पराभवमनुभवतु। तव पदपल्लव एव यो वैरी शत्रुस्तस्मात्पराभवं पराजयमनुभवतु। यद्वा इदं किसलयशयनं पराभवमनुभवतु। कीदृशम् ? तव पदपल्लववैरि-विरोधीत्यर्थः।।१ ।।

* कतिपयमुद्रितपुस्तकेषु माम् इति पाठः।

**२-करकमलेन करोमि चरणमहमागमितासि विदूरम्।**
**क्षणमुपकुरु शयनोपरि मामिव नूपुरमनुगतिशूरम्।। क्षण० ।।२ ।।**

करेत्यादि। अहं करकमलेन निजकराम्बुजेन तव चरणं करोमि संवाहयितुमर्थात् यद्वा तव चरणमहनित्येकमेव पदम्। तथा च करकमलेन तव चरणयोर्महं पूजां संवाहनादिरूपां करोमि। कथमित्याह, त्वं विदूरमतिशयेन दूरमागमितासि आनीतासि अर्थान्मया। तथा च दूरागमनजन्यं ते श्रममपनयामीति भाव:। शयनोपरि शय्याया उपरि नूपुरमुपकुरु। नुपुरस्य परिधानेन महार्थतापादनमेवोपकार:। कीदृशं नूपुरम्? अनुगतिशूरम्। अनुगतौ तवानुसरणे शूरम्। अपरोऽपि योऽनुगतिशूरो भवति स उपक्रियत इत्युचितमेवेति भाव:। कमिव? मामिव। यथा[१] तवानुसरणशूरं ममालिङ्गनादिनोपकरोषि तथा नूपुरमप्युपकुर्वित्यर्थ:।।२ ।।

**३-वदनसुधानिधिगलितममृतमिव रचय वचनमनुकूलम्।**
**विरहमिवापनयामि पयोधररोधकमुरसि दुकूलम्।। क्षण० ।।३ ।।**

वदनेत्यादि। हे प्रिये! अनुकूलमुचितं वचनं रचय। कीदृशम्? वदनमेव सुधानिधिश्चन्द्रस्तस्माद्गलितं च्युतम् [२]अमृतमिव। अतस्त्वत्प्रणयवाक्यम् अथ चाप्युरसि हृदये दुकूलं पट्टवस्त्रमपनयामि। कीदृशम्? पयोधरयो रोधकं तिरोधायकम्। कमिव? विरहमिव। यथा त्वद्विवरहो मयापनीतस्तथा दुकूलमपनयामीत्यर्थ:। विरहपक्षे पयोधररोधकं स्तनाश्लेषप्रतिरोधकम्।।३ ।।

**४-प्रियपरिरम्भणरभसवलितमिव पुलकितमतिदुरवापम्।**
**मदुरसि कुचकलशं विनिवेशय शोषय मनसिजतापम्।। क्षण० ।।४ ।।**

प्रियत्यादि। हे राधे! मदुरसि मद्वक्षसि कुचकलशं विनिवेशय अर्पय। कीदृशम्? अतिदुरवापमतिदुर्लभम्। पुन: कीदृशम्? पुलकितं रोमाञ्चितम्। तत्र हेतुमुत्प्रेक्षयति, प्रियपरिरम्भणरभसवलितमिव प्रियस्य परिरम्भणे आलिङ्गने यो रभस उत्साहस्तेन वलितमिव युक्तमिव अपरोऽपि यो हर्षयुक्तो भवति तस्य रोमाञ्चो भवत्येवेति ध्वनितम्[३]। तेनालिङ्गनेन मनसिजतापं कामजन्यं सन्तापं शोषय नाशय।।४ ।।

१. ख. नूपुरं - इत्यधिक: पाठ:।
२. क. अमृतमिव - इति नास्ति।
३. ख. ध्वनि: - इति पाठ:।

**५-अधरसुधारसमुपनय भाविनि ! जीवय मृतमिव दासम्।**

**त्वयि विनिहितमनसं विरहानलदग्धवपुषमविलासम्।। क्षण० ।।५ ।।**

अधरेत्यादि। हे भामिनि ! अधरसुधारसमधरसंबन्ध्यमृतरससमुपनय वितर। दासं मातृशमनुगतं जीवय। कीदृशं ? मृतमिव। अन्योऽपि मृतोऽमृतपानेन जीवतीति ध्वनिः। मृतत्वे हेतुः त्वयि विनिहितमनसं त्वय्यर्पितचित्तम्। पुनः कीदृशम्? विरहानलेन त्वद्विरहरूपेणाग्निना दग्धं वपुर्यस्य तम्। अत एवाविलासं विलासरहितम्। अन्योऽपि यो मृतः स्यात् स निश्चेष्टो दग्धदेहश्च भवतीति[१] ध्वनिः।।५ ।।

**६-शशिमुखि मुखरय मणिरशनागुणमनुगुणकण्ठनिनादम्।**

**श्रुतियुगले पिकरुतविकले मम शमय चिरादवसादम्।। क्षण० ।।६ ।।**

शशिमुखीत्यादि। हे शशिमुखि ! चन्द्रवदने ! मणिरसनागुणं मणियुक्तकाञ्चीदाम मुखरय सशब्दं कुरु। अनेन हंसलीलाख्यं विपरीतरतं भजस्वेति ध्वनितम्। कीदृशं ? मणिरसनागुणं अनुगुणं कण्ठनिनादम्। अनुगुणः सदृशः कण्ठनिनादः कण्ठशब्दो यस्य तम्। रसनागुणानुकारिकण्ठशब्दं च कुर्वित्यर्थः। अनेन शब्देन मम श्रुतियुगले श्रोत्रयुग्मे चिरादवसादं चिरकालीनमुपतापं शमय नाशय। कीदृशे ? पिकरुतेन कोकिलशब्देन विकले दुःखिते।।६ ।।

**७-मामतिविफलरुषा विकलीकृतमवलोकितुमधुनेदम्।**

**मीलितलज्जितमिव नयनं तव विरम विसृज रतिखेदम्।। क्षण० ।।७ ।।**

मामित्यादि। हे राधे ! मामवलोकयितुं तव नयनं मिलति मुद्रां प्राप्नोति। किमिव ? लज्जितमिव। मां कीदृशम्? अतिविफलरुषा अतिनिष्फलेन रोषेण विफलीकृतं विफलतां नीतम्। अधुनेदानीं नयनमीलने विरम विरक्ता भव। निष्फलरोषादित्यर्थात्। रतिखेदं रते सम्भोगस्य खेदं दुःखं विसृज त्यज।।७ ।।

**८-श्रीजयदेवभणितमिदमनुपदनिगदितमधुरिपुमोदम्।**

**जनयतु रसिकजनेषु मनोरमरतिरसभावविनोदम्।। क्षण० ।।८ ।।**

श्रीजयदेवेत्यादि। इदं श्रीजयदेवभणितं जयदेवेन कथितं गीतं रसिकजनेषु मनोरमरतिरसभावविनोदं, रतिः सम्भोगरसः शृङ्गाररसो भावाः सञ्चारिसात्विकादयस्तेषां मनोरमं विनोदं कौतुकं जनयतु। कीदृशं भणितम्? अनुपदं प्रतिपदं निगदितो मधुरिपोः कृष्णस्य मोद आनन्दो यत्र तादृशम्।।८ ।।

१. ख. स्यादिति - इति पाठः।

**६७-क-प्रत्यूहः पुलकाङ्कुरेण निबिडाश्लेषे निमेषेण च**
**क्रीडाकूतविलोकितेऽधरसुधापाने कथाकेलिभिः।**
**आनन्दाधिगमेन मन्मथकलायुद्धेऽपि यस्मिन्नभू-**
**दुद्भूतः स तयोर्बभुव सुरतारम्भः प्रियंभावुकः।।६७-क।।**

प्रत्यूह इत्यादि। तयोः राधामाधवयोः स लोकोत्तरो ललितारम्भो ललितो मोनहर आरम्भो यस्यैतादृशः शृङ्गारक्रीडाविशेष उद्भूतः उद्भटः प्रियं भावुको बभूव। स क इत्यस आह, प्रत्यूह इति। यस्मिंल्ललितारम्भे निविडाश्लेषे कर्तव्ये पुलकाङ्कुरेण रोमाञ्चोद्गमेन प्रत्युहो विघ्नोऽभूत्। अथ च क्रीडाकूतविलोकिते क्रीडासु यदाकूतपूर्वकमभिप्रायपूर्वकं यद्विलोकितं तत्र[१] निमेषेण नेत्रस्पन्दनेन प्रत्यूहोऽभूत्। अथ च अधरसुधापानेऽधरामृतपाने कर्तव्ये कथानर्मभिः रहः कथाकौतुकैः प्रत्यूहोऽभूत्। अथ च मन्मथकथायुद्धे मन्मथकथायां कर्त्तव्यायां मन्मथयुद्धे सुरते च आनन्दाधिगमेन आनन्दप्राप्त्या प्रत्यूहोऽभूत्।।६७-क।।

**६७-ख -दोर्भ्यां संयमितः पयोधरभरेणपीड़ितः पाणिजै-**
**राविद्धौ दशनैः क्षताधरपुटः श्रोणीतटेनाहतः।**
**हस्तेनानमितः कचेऽधरमधुस्यन्देन संमोहितः**
**कान्तः कामपि तृप्तिमाप तदहो! कामस्य वामा गतिः।।६७-ख।।**

दोर्भ्यामित्यादि। दोर्भ्यां बाहुभ्यामर्थाद्राधया संयमितो बद्धः। अथ च तयैव पयोधरभरेण [२]स्तनभारेण पीडितः। अथ च तया पाणिजैर्नखैराविद्धस्ताडितः। अथ च तथा दशनैः दन्तैः क्षताधरपुटः क्षतोऽधरपुटो यस्य स कृतः। अथ च तया श्रोणितटेन नितम्बबिम्बेनाहतः आस्फालितः। अथ च तया हस्तेनानमितः कचे केशे धृत्वेत्यर्थात्। ततोऽधरमधुस्यन्दनेन संमोहितः। एवंविशिष्टोऽपि कान्तः कामप्यनिर्वचनीयां[३] तृप्तिमाप [४]प्रापत्। तद्धेतोरहो! इत्याश्चर्य्ये। कामस्य वामा गतिः[५] विरुद्धा गतिः। यस्य बन्धनादिकं क्रियते स प्रीतिं न प्राप्नोति। अयं तु तादृशोऽपि प्रीतिं प्राप्तवानिति। कामस्य विरुद्धैव रीतिरिति भावः।।६७-ख।।

---

१. ख. तत्र - इति नास्ति।
२. क. स्तनभरेण - इति नास्ति।
३. ख. कामस्यानिर्वचनीयां - इति पाठः।
४. ख.प्रापयत् - इति पाठः।
५. ख. गतिः - इति नास्ति।

**६८- माराङ्के रतिकेलिसंकुलरणारम्भे तया साहस-**
**प्रायं कान्तजयाय किञ्चिदुपरि प्रारम्भि यत्सम्भ्रमात्।**
**निष्पन्दा जघनस्थली शिथिलिता दोर्वल्लिरुत्कम्पितं**
**वक्षो मीलितमक्षि पौरुषरसः स्त्रीणां कुतः सिध्यति।।६८।।**

माराङ्क इत्यादि। माराङ्के मारस्य कामस्य चिह्ने। युद्धपक्षे मारस्याङ्के चिह्ने रतिकेलिसङ्कुलरणारम्भे रतिकेलिभिश्चुम्बनालिङ्गननानाबन्धादिरूपाभिःसङ्कुले व्याप्ते रणारम्भे कामयुद्धारम्भे तया राधया साहसप्रायं साहसबहुलं कान्तजयाय तदुपरि तस्य कान्तस्योपरि किञ्चिल्लोकोत्तरं प्रारम्भिकपुरुषायितमारब्धम्। यत्संभ्रमात्संवेगात्तस्या राधाया निष्पन्दा[१] जघनस्थली निष्पदा निश्चला जाता। दोर्वल्लिर्बाहुलता शिथिला श्लथीभूता। वक्षो हृदयमुत्काम्पितम्। अक्षि मुद्रितम्। ततः स्त्रीणां पौरुषरसः पराक्रमाभिलाषः कथं सिध्यति ? अपि तु न सिध्यत्येवेत्यर्थः। मारो मृत्यौ विषेऽनङ्गे इति **विश्वः**[(अ)]। समौ संवेगसंभ्रमौ **इत्यमरः**[(आ)]।।६८।।

**६८- (क) तस्याः पाटलपाणिजङ्कितमुरो निद्राकषाये दृशौ**
**निर्धौताधरशोणिमा विलुलितस्त्रस्तस्त्रजो मुर्धजाः**
**काञ्चीदाम दरश्लथाञ्चलमिति प्रातर्निखातैर्दृशो-**
**रेभिः कामशरैस्तदद्भुतमभुत्पत्युर्मनः कीलितम्।।६८-क।।**

तस्या इति। एतै कामशरैः पत्युर्दृशोर्लोचनयोः प्रातर्निखातैर्मनः कीलितं विद्धम्। इत्यद्भुतमाश्चर्यम्। अन्यत्र निखातैर्बाणैरन्यत्कीलितमित्याश्चर्यमित्यर्थः। कैः ? कामशरैः। तस्या राधायाः पाटलेन श्वेतरक्तेन पाणिजेन नखेनाङ्कितमुरः निद्राकषाये निद्रया कषाये ते दृशौ लोचने च। निर्धौताधरशोणिमा। निर्धौतश्चुम्बनादिना क्षालितो योऽधरः तस्य शोणिमा लौहित्यम्। तच्च मूर्धजाः केशाश्च कीदृशाः ? मूर्द्धजा विलुलितस्त्रजो विलुलिता केशग्रहणपूर्वकचुम्बनादिदानेन म्लानाः। अत एव स्त्रस्ताः शिथिलाः स्त्रजः पुष्पमालाः येषु तादृशाः। काञ्चीदाम च मेखलासूत्रं च दरश्लथाञ्चलं दरमीषच्छ्लथं शिथिलमञ्चलं वस्त्रप्रान्तं च।।६८-क।।

---

१. ख. निष्पदा - इति नास्ति।
(अ) वि० प्र० रान्तवर्गः - २१
(आ) कोशे नोपलभ्यते.

**६९- अथ निर्गतबाधा सा राधा स्वधीनभर्तृका।**

**निजगाद रतिक्लान्तं❋ कान्तं मण्डनवाञ्छया।।क्षण० ।।६९ ।।❋**

अथेत्यादि। अनन्तरं राधाकान्तं कृष्णं मण्डनवाञ्छया निजगादं। कीदृशं कान्तम्? रतिक्लान्तं सुरतखिन्नं चित्तमपि निर्गता बाधा पीडा यस्याः सा राधा। पुनः कीदृशी? स्वाधीनो भर्त्ता यस्याः सा स्वाधीनभर्तृका। तल्लक्षणं,

यस्या रतिगुणाकृष्टः पतिः पार्श्वं न मुञ्चति।
विचित्रविभ्रमासक्ता सा स्वाधीनपतिर्यथा।।६९ ।।

---

❋ मुद्रितपुस्तकेषु अस्य श्लोकस्य स्थाने निम्नोत्काश्चत्वारः श्लोकाः प्राप्यन्ते,

७१ ख-त्वामप्राप्य मयि स्वयंवरपरां क्षीरोदतीरोदरे
शङ्के सुन्दरी! कालकूटमपिबन्मूढो मृडानीपतिः।
इत्थं पूर्वकथाभीरन्यमनसो निक्षिप्य वक्षाऽञ्चलं
राधायाः स्तनकोरकोपरि मिलन्नेत्रो हरिः पातु वः।।७१-ख।।(२० संजीवनी)

६८-ख-व्याकोशेः केशपाशस्तरलितमलकैः स्वेदमोक्षौ कपोलै
क्लिष्टा बिम्बाधरश्रीः कुचकलशरुचा हारिता हारयष्टिः।
काञ्चीकान्तिर्हताशा स्तनजघनपदं पाणिनाच्छाद्य सद्यः
पश्यन्ती सत्रपा सा तदपि विलुलिता मुग्धकान्तिर्धिनोति।।६८-ख।।

ईर्षन्मीलितदृष्टिमुग्धविलसत्सीत्कारधारावशा-
दव्यक्ताकुलकेलिकाकुविकसद्दन्तांशुधौताधरम्।
शान्तस्तब्धपयोधरं भृशपरिष्वङ्गात्कुरङ्गीदृशो
हर्षोत्कर्षविमुक्तिनिःसहतनोर्धन्यो धयत्याननम्।।

अथ सहसा सुप्रीतं सुरतान्ते सा नितान्तखिन्नाङ्गी।
राधा जगाद सादरमिदमानन्देन गोविन्दम्।।

❋ रतिशान्तम् इति रसमञ्जरीटीकाग्रन्थे पाठः।

(अ) **शृ० ति०** - १.१३३.

।। चर्तुविंश प्रबन्धः/गीतम् २४।।

।।रामकरीरागयतितालाभ्यां गीयते।।

**१-कुरु यदुनन्दन! चन्दनशिशिरतरेण करेण पयोधरे**
**मृगमदपत्रकमत्र मनोभवमङ्गलकलशसहोदरे**
**निजगाद सा यदुनन्दने क्रीडति हृदयानन्दने।। ध्रुवम् ।।१ ।।**

तदेव गीतेन कथयति, कुर्वित्यादि। गीतस्यास्य रामकरीरागो, यतितालः। गीतार्थस्तु-सा राधा यदुनन्दने निजगाद उक्तवती। कीदृशे ? क्रीडति रममाणे। पुनः कीदृशे ? हृदयानन्दकारके कृष्णे जगाद कुर्विति। हे यदुनन्दन! कृष्ण! अत्र मृष्टाङ्गरागे मम पयोधरे स्तने करेण मृगमदपत्रकं कस्तूरिकापत्रावलीं कुरु। कीदृशेन करेण? शिशिरतरेण चन्दनादपि शीतलतरेण। कीदृशे पयोधरे ? मनोभवस्य कामस्य यो मङ्गलकलशो माङ्गल्याय स्थापितः। पूर्णकुम्भस्तस्य सहोदरे सदृशे।।१ ।।

**२-अलिकुलगञ्जनमञ्जनकं रतिनायकसायकमोचने।**
**त्वदधरचुम्बनलम्बितकज्जलमुज्ज्वलय प्रिय! लोचने।। निज० ।।२ ।।**

अलिकुलेत्यादि। हे प्रिय! लोचने नेत्रे त्वदधराभ्यां यच्चुम्बनं तेन लम्बितं यत्कज्जलं तदुज्ज्वलय पुनर्दीपय। नयनयोः कज्जलं पुनरञ्जयेत्यर्थः। कीदृशे लोचने? रतिनायकस्य कामस्य सायकान्बाणान् कटाक्षरूपान्मुञ्चतीति रतिनायकसायकमोचनं तस्मिन्। कीदृशं कज्जलम्? अलिकुलस्य भ्रमरसमूहस्य यद्गञ्जनं तिरस्कारस्तस्य जनकं विधायकम्। उज्ज्वलो दीप्तशृङ्गारविशदेषु विकाशिनि इति **विश्वः**(आ) ।।२ ।।

**३-नयनकुरङ्गतरङ्गविकासनिरासकरे श्रुतिमण्डले।**
**मनसिजपाशविलासधरे शुभवेश निवेशय कुण्डले।। निज० ।।३ ।।**

नयनकुरङ्गेत्यादि। हे शुभवेश! शुभः शोभनो वेशोऽलंकरणं यस्य तादृश। मम श्रुतिमण्डले कर्णप्रदेशे कुण्डले निवेशयार्पय। कीदृशे श्रुतिमण्डले ? नयने एव यौ कुरङ्गौ मृगौ। तयोस्तरङ्गस्य यो विकासस्तस्य प्रसरणं तस्य निरासकरे निरासकारिणि नयनयोर्दैर्घ्यविघातकारिणि। अन्यथा कियद्दूरं तयोर्वृद्धिः स्यादित्यर्थः। पुनः कीदृशे ? मनसिजस्य यः पाशो बन्धनं विशेषस्तस्य विलासधरे तल्लीलाभृति।।३ ।।

१. ख. कीदृशम् - इति पाठः।

**४-भ्रमरचयं रचयन्तमुपरि रुचिरं सुचिरं मम सम्मुखे।**

**जितकमले विमले परिकर्मय नर्मजनकमलकं मुखे।। निज० ।।४।।**

भ्रमरचयमित्यादि। मम सम्मुखं मुखे रुचिरं मनोहरमलकं चूर्णकुन्तलं परिकर्मय भूषय। कीदृशमलकम्। नर्मजनकं क्रीडाजनकम्। कीदृशे मुखे ? विमले निर्मले। पुन: कीदृशे ? जितकमले जितं तिरस्कृतं निजशोभया कमलं येन तादृशे। कीदृशमलकम् ? सुचिरं चिरादुपरि मुखस्योपरि भ्रमरचयं भ्रमरसमूहं रचयन्तम्। स्वकान्त्या भ्रमरभ्रमं जनयन्तमित्यर्थ:।।४।।

**५-मृगमदरसवलितं ललितं कुरु तिलकमलिकरजनीकरे।**

**विहितकलङ्ककलं कमलानन! विश्रमितश्रमशीकरे।। निज० ।।५।।**

मृगमदेत्यादि। हे कमलानन! पद्ममुख! अलिकरजनीकरे अलिकं ललाटमेव रजनीकरश्चन्द्रस्तस्मिन्। तिलकं कुरु। कीदृशं तिलकम् ? [१]मृगमदरसवलितं। मृगमदरसेन कस्तुरीरसेन वलितं निर्मितम्। पुन: कीदृशं तिलकम् ? विहितकलङ्ककलम्। विहिता कलङ्कस्य कला येन तादृशम्। अत्र कमलाननेति विशेषणेन आननरूप-कमलविरोधिन्यलिकरूपरजनीकरे मृगमदतिलकच्छलेन कलङ्कादानमुचितमेवेति ध्वनितम्। कीदृशे अलिके ? विश्रामितश्रमशीकरे। विश्रमितो विश्रामं प्रापितो य: श्रमस्तज्जनित: शीकरोऽम्बुकणो यत्र तादृशे। अतनुभूतां प्रस्वेदबिन्दूनामतिशयिततया हिमकणत्वमाक्षिप्यते। तेन चालिकस्य चन्द्रत्वरूपणं साङ्गं निर्वहतीति ध्वनितम्। ललाटमलिकं गोधि: **इत्यमर:**[(अ)]।।५।।

**६–मम रुचिरे चिकुरे कुरु मानद! मानसजध्वजचामरे।**

**रतिगलिते ललिते कुसुमानि शिखण्डिशिखण्डकडामरे।। निज० ।।६।।**

मम रुचिर इत्यादि। हे मानद! मादृशप्रपन्ननायिकाभिमानप्रद! मम रुचिरे मनोहरे चिकूरे केशे कुसुमानि पुष्पाणि कुरु रचय। कीदृशे चिकूरे ? ललिते मनोहरे मनसिजस्य कामस्य ध्वजचामरे पताकाभूतचिह्ने चामरे। पुन: कीदृशे ? रतौ सुरतसमये गलिते मुक्तबन्धने। पुन: कीदृशे ? शिखण्डिनां मयूराणां शिखण्डस्य पिच्छस्येव डामर आटोपो यस्य तादृशे।।६।।

१. ख. मृगमदरसवलितं - इति नास्ति।

(अ) अ० को० - २.६.१२.

**७-सरसघने जघने मम शम्बरदारणवारणकन्दरे।**

**मणिरशनावसनाभरणानि शुभाशय वासय सुन्दरे।। निज०।।७।।**

सरसघनेत्यादि। हे शुभाशय! शोभनहृदय! मम सुन्दरे जघने मणिमयी या रशना क्षुद्रघण्टिका वसनं वस्त्रमाभरणान्यलंकरणानि वासय परिधापय। कीदृशे जघने? सरसघने सरसे शृङ्गाररससहिते घने निबिडे। पुनः कीदृशे? शम्बरं शम्बरनामानं दैत्यं दारयतीति शम्बरदारणः कामः स एव वारणो हस्ती महाबलत्वात् तस्य कन्दरे। अपरोऽपि हस्ती पर्वतकन्दरायां तिष्ठतीति ध्वनिः। कुञ्जरो वारणः करी **इत्यमरः**(अ)। दरी तु कन्दरो वा स्त्री इत्यपि च(आ)। वासयेति च वस आच्छादने ण्यन्तस्य प्रयोगः।।७।।

**८-श्रीजयदेववचसि रुचिरे हृदयं सदयं कुरु मण्डने।**

**हरिचरणस्मरणामृतनिर्मितकलिकलुषभवज्वरखण्डने।। निज०।।८।।**

श्रीजयदेवत्यादि। हे देव! कृष्ण! जय सर्वोत्कर्षेण वर्तस्व। अथ च जयदेवस्य कवेर्वचसि वाक्ये सदयं दयासहितं यथा स्यादेवं हृदयं कुरु। कीदृशे मण्डने? जयदेवस्यालङ्कार-जनके। पुनः कीदृशे? हरिचरणस्मरणमेव यदमृतं तेन निर्मितं कलिकलुषज्वरस्य कलियुगसञ्चितपापरूपज्वरस्य खण्डनं नाशनं येन तादृशे।।८।।

**७०-रचय कुचयोः पत्रं चित्रं कुरुष्व कपोलयो-**
**र्घटय जघने काञ्चीमञ्च स्रजा कबरीभरम्।**
**कलय वलयश्रेणीं पाणौ पदे कुरु नूपुरा-**
**विति निगदितः प्रीतः पीताम्बरोऽपि तथाकरोत्।।७०।।**

रचयेत्यादि। हे कृष्ण! कुचयोः पत्रं मकरिकापत्रं रचय। कपोलयोश्चित्रं चित्रकाख्यं रचनाविशेषं कुरुष्व। अथ च जघने काञ्चीं त्रुटिनां क्षुद्रघण्टिकां घटयार्पय। कबरीभरे रचितकेशपाशसमूहे स्रजं माल्यमञ्चय प्रापय। वलयश्रेणीं कङ्कणपङ्क्तिं पाणौ हस्ते कलय अर्पय। पदे चरणे नूपुरौ कुरु। इत्यनेन प्रकारेण राधाया निगदितः उक्तः। पिताम्बरः कृष्णोऽपि तथैवाकरोत् यथा राधा उक्तवती तथैवाकरोदित्यर्थः।।७०।।

**७१-यद्गान्धर्वकलासु कौशलमनुध्यानं च यद्वैष्णवं**
**यच्छृङ्गारविवेकतत्वमपि यत्काव्येषु लीलायितम्।**
**तत्सर्वं जयदेवपण्डितकवेः कृष्णैकतानात्मनः**
**सानन्दाः परिशोधयन्तु सुधियः श्रीगीतगोविन्दतः।।७१।।**

यद्गान्धर्वेत्यादि। हे सुधियः! पण्डिताः! सानन्दाः सन्तः जयदेवपण्डितकवेः

(अ) अ० को० - २.८.३४. (आ) अ० को० - २.३.६.

श्रीगीतगोविन्दतः तत्सर्वं शोधयन्तु। तत्किमित्यादि, गान्धर्वकलासु गानविद्यासु यत्कौशलं नैपुण्यम्। अथ च वैष्णवं विष्णुसंबन्धि यदनुध्यानं अनुक्षणचिन्तनम् यच्च शृङ्गारविवेकतत्त्वं शृङ्गाररसस्य यो विवेकः सम्भोगविप्रलम्भादिरूपेण यद्विवेचनं तस्य तत्त्वं यथार्थम्। यदपि च काव्येषु कविकर्मसु[१] कवित्वनिर्माणरूपेषु लीलायितं विलसितं तत्सर्वमित्यर्थः। कीदृशस्य जयदेवकवेः ? कृष्णैकतानात्मनः कृष्णैकतानस्तत्पर आत्मा मनो यस्य तस्य। एकतानोऽनन्यवृत्तिरेकाग्रैकायनापी**त्यमरः**[(अ)] ।।७१ ।।❋

**७२-श्री❋ भोजदेवप्रभवस्य रामादेवीसुतश्रीजयदेवकस्य।**
**पराशरादिप्रियवर्गकण्ठे श्रीगीतगोविन्दकवित्वमस्तु ।। ७२ ।।**

**इति श्रीजयदेवकृतौ गीतगोविन्दे सुप्रीतताम्बरो नाम द्वादशः सर्गः।।**

**समाप्तं चेदं काव्यम्।।**

अधुना पितृमातृनाम निबध्नम् प्रार्थयते सज्जनानिति स्वगुणान्प्रकाशयितुम्- श्रीभोजदेवेत्यादि

---

१. क. कर्मसु कवित्व ..................................इत्यमरः - इति नास्ति।

(अ) अ० को० - ३.१.७९.

❋ मुद्रितपुस्तकेषु निम्नोत्कास्त्रयः श्लोकाः अधिकाः सन्ति,

पर्यङ्कीकृतनागनायकफणाश्रेणीमणीनां गणे
सङ्क्रान्तप्रतिबिम्बसंवलनया बिभ्रद्विभुप्रक्रियाम्।
पादाम्भोरुहधारिवारिधिसुतामक्ष्णां दिदृक्षुः शतैः
कायव्यूहमिवाचरन्नपचितौ भूतो हरिः पातु व।।

साध्वी माध्वीक! चिन्ता न भवति भवतः शर्करे कर्कशासि
द्राक्षे द्रक्षन्ति के त्वाममृत मृतमसि क्षीर! नीरं रसस्ते।
माकन्द ! क्रन्द कान्ताधर! धरणितलं गच्छ यच्छन्ति भावं
यावच्छृङ्गारसारस्वतमिह जयदेवस्य विष्वग्वचांसि।।

इत्थं केलिततीर्विहृत्य यमुनाकुले समं राधया
तद्रोमावलिमौक्तिकावलियुगे वेणिभ्रमं बिभ्रति।
तत्राह्लादिकुचप्रयागफलयोर्लिप्सावतोर्हस्तयो-
र्व्यापाराःपुरुषोत्तमस्य ददतु स्फीतां मुदां सम्पदम्।।

❋ क. मातृकायां श्रीभोजदेवप्रभवस्य .............. शृण्वताम् इति श्लोकः नास्ति।

एतत्काव्यविवेचनप्रणयिनां यत्संशयोन्मूलना-
त्पुण्यं यच्च हरिस्मृतौ प्रतिपदव्याख्यासु मे संचितम्।
तेन प्रीतमनास्तनोतु सततं श्रेयो मम श्रीपतिः
शश्वन्मङ्गलमातनोत्वपि सतां संलापतां शृण्वताम्।।

**इति श्रीगीतगोविन्दटीकायां मिश्रश्रीकान्तविरचितायां द्वादशः सर्गः[१] समाप्तः[२]।**

शुभमस्तु। संवत् १८५२ शके १७१७ मिति पौषकृष्णद्वादश्यां गुरवार दशशत अजोरकायथमोकाम पटिहटा[३]।

---

१. क. मिश्रश्रीकान्तविरचितायां ..................... द्वादशः सर्गः - इति नास्ति।

२. ख. समाप्तः - इति नास्ति।

३. ख. शुभमस्तु इत्यारभ्य पटिहटा इत्यन्तो नास्ति।

❖❖❖

शोध-प्रकाशनविभागः
श्रीलालबहादुरशास्त्रीराष्ट्रियसंस्कृतविश्वविद्यालयः
बी-4, कुतुबसांस्थानिकक्षेत्रम्, नवदेहली-110016